Almira 3
Shelf 3
21

Nepal Sanskrit [illegible] Campus, Kathmandu

४९३५

जागदीश्याः व्यधिकरणव्याप्तेः कालीशङ्करीविवेचना·

कालीशङ्करी
व्यधिकरणस्य

॥ अथव्यधिकरणस्य कालीशङ्करी प्रारभ्यते ॥

श्री ५ को सरकार

1. Kalishankari Vyadhikarana Vyapti Commentary Of Jagadisha Bhattacharya
2. Siddhantalakshana Kalishankari
3. Jagadishi Panchalakshani
4. Vishayata Vada By Gadadhara Bhattacharya 1868
5. Nyayabodhini Commentary On Tarkasamgraha
6. Avayava Didhiti Vyakhya By Jagadisha
7. Pramanyavada In Bengali Script
8. Siddhanta Lakshana
9. Sharirka Sutra
10. Shanti Patha In Gauda Brahmanandi
11. Swayamprakasha Yati Of Adi Shankaracharya
12. Siddhanta Lesha Sangraha
13. Anirvacaniya Vada
14. Atma Bodha Of Adi Shankaracharya
15. Tattva Viveka
16. Tattva Bodha
17. Atma Bodha Of Adi Shankaracharya 2
18. Atmabodha Tika 1852
19. Gita Sara Bhasha
20. Gadadhara Bhattacharya's Vivriti (Sub-commentary) on Raghunatha Siromani's Didhiti (Commentary) on Udayanacharya's Atmatattvaviveka (Root Text, also known as the Bauddhadhikara
21. Bhavarthadipika Commentary On Tarkabhasha By Gaurikanta Sarvabhauma Bhattacharya
22. Gadadhari Commentary
23. Avacchedakatva Nirukti

24. Shodasha Karika
25. Vritta Ratnakara
26. Dharma Samhita In Shiva Purana

श्रीगणेशाय नमः ॥ ॥ॐ॥ नन्विदं वाच्यं ज्ञेयत्वादित्यत्र समवायितया वाच्यत्वाभावरूपस्य साध्याभावस्य प्रसिद्धत्वेपि प्रमेयवान्वाच्यत्वादित्यादौ केवलान्वयिनि तदप्रसिद्धेरनुद्धारः मूलस्य न्यूनत्वमत आह· प्रमेयसाध्यके चेत्यादि जगदीशेनोक्तम्। ननु अत्रापि समवायितया वाच्यत्वाभावस्यैव लक्षणघटकसंभवे भावान्तरत्वानुसरणस्य प्रयोजनाभावात्· न च साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावः साध्याभावशब्दार्थ इति वाच्यम्· इदं वाच्यं ज्ञेयत्वादि केवलान्वयिनि तदप्रसिद्धेः। स्वव्यापकसाध्यतावच्छेदकव्यापकप्रतियोगिताकाभावघटितत्वस्य प्रमाणसार्वभौमीयलक्षणाभिप्रायकतया भावत्वेनाभावाभावीयप्रतियोगित्वस्य प्रमेयत्वरूपसाध्यतावच्छेदकाव्यापकत्वादभावत्वेन भावाभावस्य लक्षणघटकत्वं दुर्वारमिति चेन्न समनियताभावस्यैक्यमतेन तदभिधानमिति· अथ किं स्वरूपसम्बन्धेन तादात्म्येन वा प्रमेयसाध्यतायामभावासिद्धिः उक्तेति· नाद्यः· वह्निलिन प्रमेयाभावप्रसिद्ध्यापत्त्या वृत्तिगगनत्वादिना प्रमेयाभावानुधावनस्य मन्दत्वविरोधापत्तेः· नापि द्वितीयः· ननु कालिकसम्बन्धेन प्रमेयसाध्यकस्थले कालिकसम्बन्धेन साध्याभावस्य प्रसिद्धिः कार्या इति जगदीशासङ्गतेः। तादात्म्येन साध्यतायामपि तद्दोषसंभवस्थलानामननुधावनवैयर्थ्यादिति सम्बन्धसामान्येन साध्याभावापि तद्दोषस्य जागरूकत्वादिति चेन्न· सम्बन्धसामान्येन साध्यतास्थल एवाभावप्रसिद्धिकृतत्वात्· ननु कालिकसम्बन्धेन प्रमेयसाध्यकस्थल इत्यादि जगदीशग्रन्थस्य सम्बन्धसामान्याले

गतकालिकसंबन्धस्यापि साध्यतावच्छेदकसंसर्गत्वमित्यभिप्रायकत्वात्। अप्रसिद्धिदोषस्यैव सत्वान्मूले प्रतियोगिदोषान्तरं किमित्युपात्तमतदवतारयितुं शंकते।
नन्विति अव्यभिचरितत्वमिति। अथेदं वाच्यं ज्ञेयत्वादित्यादिग्रन्थाभिहितमिति शेषः। तथा च नचैवं घटादेर्यादिमूलस्यापि केवलान्वयिनि व्यभिचरितत्वेनालक्ष्यता
भिप्रायकतया न पूर्वापरमूलयोर्विरोधिताविति ध्येयमिति जगदीशः। अथैवं तादृशसाध्याभावसामानाधिकरण्याभावो व्याप्तिस्त्वोदि स्फुरति। अथेदं वाच्यमिति ग्रन्
थस्य पारिभाषिकाव्यभिचरितत्वाभिप्रायकतया तादृशसाध्यवत्त्वसामान्याभावस्य व्याप्तित्वाभिधानानुपपत्तिरिति चेन्न। अथेदं वाच्यं ज्ञेयत्वादित्यादिमूल
स्य पारिभाषिकाव्यभिचरितत्वाभिप्रायकतया नचैवमित्यादिमूलस्यापि लक्षणाव्याप्तिप्रदर्शनपरत्वेन च साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकेत्यादिग्रन्थे
स्याव्याप्तत्वापरिहारत्वात्। नन्वव्यभिचरितत्वस्य पारिभाषिकत्वे व्यभिचारधीविरोधिविषयत्वस्यैव व्याप्तित्वमिति नियमभङ्गः स्यादत उक्तं मूले तादृशसाध्या
भावसामानाधिकरण्याभावो व्याप्तिरित्युक्तत्वात्। तस्याप्रामाण्यमित्यभिप्रायेण शङ्कते प्रतियोगिकृतेत्यर्थ इति अन्यत्र समानाधिकरणत्वस्यानुक्तेः साध्य
व्यापकताव च्छेदकस्याभावत्वसामान्याभावस्यापि यावदन्तर्गतत्वात्तस्य व्यापकताघटकसमवायसम्बन्धेन प्रतियोग्यधिकरणे केनापि सम्बन्धेनावृ
त्तित्वादव्याप्तेस्तदुपात्तमित्यग्रे स्फुटीभविष्यतीति जगदीशः। ननु गगनाभावाभावस्य तादृशत्वात्तस्य यावन्तर्भावस्य स्वविशिष्टेतराधिकरणावच्छेदेन

मूला ३

२

प्रतियोगिसामानाधिकरण्याभावादसंभव इति कथं परित्यक्तमिति चेन्न । तादृशाभावस्य वृत्तिमत्त्वेन विशेषणीयत्वात् । तथा च तादृशाभावस्य गगनस्वरूपतया वृत्तिम-
त्त्वविरहात् तद्दशायनासंभव इति । ननु व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकैकदेशावृत्त्यभावस्य केदाराभेदस्य च संदेहस्वीकारात् घटपटयोर्नोभयत्वमित्यादि-
प्रतीत्या उभयत्वावच्छेदेनात्मान्यप्यात्मत्वसामान्याभावस्य सत्त्वेन तत्र व्यापकताघटकसमवायसम्बन्धेन प्रतियोगिसामानाधिकरण्यालाभादयमा-
नि त्मानादिद्रव्यत्वाव्याप्तिविरहेण कथं तद्वारणाय यत्समानाधिकरणादलं निवेशनीयमित्यत्र केचित् । व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावानभ्यु-
पगमात् । अन्यथा यत्समानाधिकरणादलं विशेषधूमवान्वह्नेरित्यत्राव्याप्त्यापत्तेः । धूमाद्यभावस्य पर्वतायोगोलकत्वावच्छेदेन पर्वतादिसत्त्वेन साध्यव्या-
पकतावच्छेदकप्रतियोगिताकत्वविरहेण लक्षणाघटकत्वादित्याहुः । तन्न । व्यापकताघटकसाध्यवद्वृत्तित्वस्य व्यासज्यवृत्तिधर्मावच्छिन्ना-
धिकरणत्वानिरूपितत्वान्निवेशेन तद्धूमाभावस्य लक्षणाघटकतया धूमवान्वह्नेरित्यादावतिव्याप्त्यसंभवेऽपि तेन व्यासज्यवृत्तिधर्मावच्छिन्नप्रति-
योगिताकाभावाभ्युपगमस्यौचित्यत्वादिति । अत्रेदं समाधीयते । रूपपक्षे साध्याभावस्य यावदन्तर्गतस्य स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियो-
गिसामानाधिकरण्याभावेन तत्राव्याप्तिरतो यत्समानाधिकरणादलम् । ननु वह्निमान्धूमादित्यादावपि पर्वतीयाभावाभावस्य तादृशप्रतियोगिताक-

स्यहेत्वधिकरणावच्छेदेनप्रतियोगिसामानाधिकरण्याभावेनाव्याप्तिसंभवेऽयमात्माज्ञानादित्यादौयत्समानाधिकरणादलव्यावृत्तिदानमुचितमि
ति चेन्न तस्यमहाकालीनाभावेनप्रतियोगिसामानाधिकरण्यात्स्वविशिष्टत्वाद्यप्रवेशेऽव्याप्तिविरहेणोभयथैवायमात्माज्ञानादित्यत्राव्याप्तिसंभवेग्रन्थका
रस्यात्राव्याप्तिदानस्यायुक्तत्वादितिध्येयम्· वस्तुतस्तुमहाकालस्यापिहेत्वधिकरणतयास्वविशिष्टहेत्वधिकरणमहाकालीनाभावेनप्रतियोगिसा
मानाधिकरण्यापाद्वह्निमान्धूमादित्यादावव्याप्तिरेवनास्तीति ध्येयम्· अथ आत्मत्वाभावस्यापिसमानकालीनत्वादिसंबन्धेनप्रतियोगिसमानाधि
करणतया कथमव्याप्तिरुक्तेति· मैवम्· प्रतियोगिसमानाधिकरणा इत्यत्रप्रतियोग्यधिकरणावृत्तित्वस्य च निवेश्यत्वात्· सम्बन्धविशेषनिवेशे तु गगना
भावाभावस्यसमानकालीनत्वसम्बन्धेनप्रतियोगिसमानाधिकरणतया व्यधिकरणधर्मावच्छिन्नाभावं विनापिसर्वत्रैवैतेनलक्षणसमन्वयात्‌ प्रतियोग्यवृ
त्तिश्चेत्यादिग्रन्थानुपपत्तिप्रसङ्गः स्यादिति· न च हेतुसमानाधिकरणा इत्यपहाय इत्यादिजगदीशग्रन्थः· न च साध्याधिकरणवृत्तित्वं विशेषणताविशेषेण
ग्राह्यम्· अतो द्रव्यमात्मत्वादित्यादौ नाव्याप्तिः कुतो द्रव्यत्वाभावस्यमहाकाले विशेषणताविशेषेणसाध्यवद्वृत्तित्वविरहादितिवाच्यम्· तथासति द्रव्य
त्वात्मत्वोभयाभावस्यापितादृशस्यस्वविशिष्टहेत्वधिकरणाप्रसिद्ध्याव्याप्तितादवस्थ्यमतद्वारणायवैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्न
त्वेनसाध्याधिकरणवृत्तित्वस्यविशेषणीयत्वात्· केचित्तु प्रतियोगिसामानाधिकरण्यञ्जगदभिन्नत्वोभयाभावस्याविशेषणीयत्वा

यत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकयावन्तोऽभावाः प्रतियोगिसमानाधिकरणास्तत्त्वमित्युक्तौ धूमवान्वह्नेरित्यादावतिव्याप्तिः समनियताभावानामैक्यात् घटत्वेन धूमाभावस्य धूमत्वेन घटाभावस्य तादात्म्यात् प्रतियोगितायां यावत्त्वनिवेशानुक्तस्य जगदीशा निरित्याहुः॰ वस्तुतस्तु धूमवान्वह्नेरित्यादावव्याप्तिः॰ समनियताभावानामैक्यात्॰ घटत्वेन वह्न्यभावमित्युक्तौ तावद्वह्नित्वं घटाभावीयघटनिष्ठप्रतियोगिताया अपि यावदन्तर्गतत्वात्तदाश्रयसामानाधिकरण्यात्॰ यदि च प्रतियोगिव्यापकतानिवेशान्नदोषः इति विभाव्यते तदा व्यापकतावच्छेदकतायां द्विधानिवेशे गौरवमिति ध्येयम्॰ योऽत्र प्रतियोगितापर्याप्तत्वनिवेशान्नादः यत्किञ्चिदभावोऽपि हेत्वधिकरणावच्छेदेन प्रतियोगिसमानाधिकरण इत्यस्यैव सम्यक्त्वात् व्यधिकरणधर्मावच्छिन्नइत्यादिविशेषणस्य भेदान्तस्य च वैयर्थ्यात्॥ ॥ ॥ ॥

न्नोक्ता व्याप्तिरित्याहुः॰ न च तथापि समनियताभावैक्यमेतु अयमात्मा आत्मगगनान्यतरत्वादित्यत्रातिव्याप्तिर्व्यधिकरणधर्मावच्छिन्नाभावस्यैतत्त्व साध्यसमानाधिकरणतया तस्य च वाच्यत्वादिरूपप्रतियोगिसामानाधिकरण्यादिति वाच्यम् समनियताभावानामैक्यमनङ्गीकृत्य गौरवाभिधानादिति वाच्यम्॰ यत्त्वित्यारभ्य वैयर्थ्यापत्तेरित्यन्तं जगदीशाः॰ अथ यावत्पदोपादानेपि कालो गोमान्गोत्वादित्यादावतिव्याप्तिवारकं तथा हेत्वधिकरणावच्छेदेन साध्यसामानाधिकरण्यं वक्तव्यम् अन्यथा यावदभावस्यापि स्वीयकालावच्छेदेन साध्यसमानाधिकरणत्वे नातिव्याप्त्यापत्तेः इत्थं च नाहस्यायाः किञ्चिदभावो हेत्वधिकरणावच्छेदेन साध्यसमानाधिकरणः स्यादेव सम्यक्त्वेन यावत्पदस्य वैयर्थ्यमपि कथं नोक्तमिति चेन्न॰ साध्याधिकरणे वृत्तित्वस्य दैशिकविशेषणतया वाच्यत्वात्कालो गोमान्गोत्वादित्यादौ महाप्रलयान्यत्वाद्यभावस्य प्रलयत्वादिस्वरूपस्य दैशिकविशेषणतासम्बन्धेन साध्याधिकरणेऽवृत्तित्वादतिव्याप्तिविरहेऽपि तन्मते हि हेत्वधिकरणावच्छेदेन साध्यसामानाधिकरण्यस्यानुक्तत्वादिति॰ तथा च यावत्त्वमनुक्तौ घटाद्यभावमादाय धूमवान्वह्नेरित्यादावतिव्याप्तिरिति॰ न च वह्न्यादिसामान्याभावमादाय वह्निमान्धूमादित्यादावव्याप्तिरिति वाच्यम्॰ हेत्वधिकरणवृत्तित्वस्यापि दैशिकविशेषणतया वाच्यत्वादिति ध्येयम्॰ केचित्तु॰ व्यापकत्वदले वैयर्थ्यकथनं तु प्रतियोग्यवृत्तित्येत्यादिमूलासङ्गत्यापुरुक्तोपयोगित्वं यावत्पदस्य वैयर्थ्यकथनं तु न प्रकृतोपयोगि यतस्त

स्वं विशेष्य इत्यस्य हेत्वधिकरणत्वाभावि

अत एवावच्छेदकत्वविवक्षायां प्रतियोगितावच्छेदकस्वरूपविवेकपरित्यागसंभवेऽपि तत्परित्यागस्य प्रकृतानुपयुक्तत्वमित्येतावत्तात्पर्यबाधकेत्यपि स्फुटमित्यनेन सर्वं तत्त्वावच्छेदकपर्यायस्य यत्पदार्थपरत्वमिति दीधितिग्रन्थे स्फुटीकृतमिह तु यावदभावप्रयमैव वस्तादृशा
इति तल्लाभायैव यावदभावोपादानम्॥२॥ ।। ।। ।।।। ।। ८

लोकं जगदीशेनेत्याहुः । अथ प्रतियोगिसामानाधिकरण्यघटितलक्षणेऽपि विशिष्टाभावोभयाभावादिकमादाय व्यधिकरणधर्मावच्छिन्ना
भावत्वेऽपि लक्षणागमनसंभवेन प्रतियोग्यधिकरणेत्याद्यंशस्य प्रस्थितिप्रसङ्गस्य स्वयं वक्ष्यमाणत्वात् । इदानीमेतल्लक्ष्ये तदभिधानमनुचितमिति चे
न । एतदंशस्य फ मते विशिष्टाभावप्रतियोगित्वं विशिष्टे उभयाभावप्रतियोगित्वं यदभावप्रयुक्तो भयाभावस्तस्मिन्नेव स्वीक्रियते विशि
ष्टाभावस्य विशेष्यप्रतियोगिकत्वोभयाभावस्योभयप्रतियोगिकत्वमिति मतानुसारेण द्वितीयलक्षणानुसरणबीजमात्रमुपन्यस्य तदभिधा
नात् । एवं चैकस्य चिन्तनेऽस्य तद्लक्षणेऽपि व्यधिकरणधर्मावच्छिन्नाभावाप्रसिद्धिस्तस्यैव साध्यसामानाधिकरण्यघटितलक्षणे तदपि नास्ती
त्यभावः । अथाश्रयसमानाधिकरणाया वृत्तेः क्षाद्यभावाभावविशिष्टाद्यस्यैव सम्यक्त्वे स्वस्वप्रतियोगिसामानाधिकरण्यप्रवेशो व्यर्थ इति हेत्व
धिकरणधर्मत्वस्य विशेषणतया बोध्यम् । तेन वह्निसंयोगाद्यात्मकाभावमादाय वह्निमान् धूमादित्यादौ नाव्याप्तिरिति । न च तथापि प्रतियोगिव्य
धिकरणव्यापकताघटितकल्पानुसारेणापर्याप्त्याकारकयत्किञ्चिज्ज्ञानीयविषयत्वाभावाभावादेर्भावभिन्नत्वाभावेन तमादाय व
ह्निमान् धूमादित्यादावसंभवस्तदवस्थ एवेति वाच्यम् । प्रतियोगिवैयधिकरण्यघटितव्यापकत्वस्यानुसरणात् । अत्रोच्यते · सप्तपदार्थातिरिक्त
पदार्थस्यानुपगतमतेऽभावत्वस्याभावधर्मिविषयत्वस्याभावधर्मिप्रतियोगित्वादेश्चाभावात्मकतया घटाभावभिन्नाभावत्वादि

स्यादावतिव्याप्तिः हेत्वधिकरणवृत्त्यभावमात्रस्यैव भावभिन्नत्वादिति । अथ यत्समानाधिकरणा यावन्तोऽत्यन्ताभावाः प्रतियोगिवृत्त
यस्तत्वमत्यस्यैव सम्यकत्वे कृते गुरुतरस्वस्वप्रतियोगिसामानाधिकरण्यप्रवेशो नेति चेन्न · वह्निमान्धूमादित्यादौ साध्यव्याप
कतावच्छेदकप्रतियोगिताकस्य वाच्यत्वविशिष्टवाच्यत्वाभावस्य गगनाभावस्य किञ्चिद्धेत्वधिकरणान्यत्वोभयाभावस्य प्रतियो
गिवृत्तित्वाभावेनासम्भवापत्तेरिति · यद्यपि यत्समानाधिकरणा इत्यस्य इति कृतपदद्वयवित्ते नेति मूलमगत्याद्याः अत्र किन्त्वेयावृत्त
दनुक्तौ धूमवान्वह्नेरित्यादावतिव्याप्तिः · धूमाद्यभावस्योभयवृत्तित्वात् · इदानीं तु यावदनुगततत्तद्योगानेकीयरूपध्वंसा
भावाभावस्याविशेषेणातयोभयवृत्तित्वविरहान्नातिव्याप्तिः · यत्समानाधिकरणपदानुक्तौ वह्निमान्धूमादित्यादौ तद्घटीयरू
पध्वंसवदन्यत्वाभावमादायाव्याप्तिः · व्यापकत्वदलानुक्तौ तृतीयरूपध्वंसात्मकाभावमादायैवं नाव्याप्तिः · दैशिकविशेष
णतयेत्यनुक्तौ तादृशयोगानेकीयरूपध्वंसात्मकाभावस्यापि कालिकादिसम्बन्धेनोभयवृत्तित्वाच्च विचारणयातिव्याप्ति
रिति · न चात्र कल्प्ये संयोगात्मकाभावमादाय सर्वत्रासम्भवे तमपहाय कथं वह्निमान्धूमादित्यादावव्याप्तिरित्युक्तं जगदीशैः

तथा च तस्मादायासम्भवविरहादेवेत्यर्थः ॥ २

नेति वाच्यम् प्रमेयवान् घटभेदत्वादित्यत्र लक्षणागमनात् विषयतादेर्वृत्त्यनियामकत्वेन घटभेदवृत्त्याकारकयत्किञ्चिज्ज्ञानाभावस्यापि हेत्वधिकरणावृत्तित्वविरहेण तमादायाव्याप्तिविरहात् अथात्र तत्प्रवृत्तिधूमरूपध्वंसात्मकाभावस्यापि तादृशयावदन्तर्गतस्य विशेषणतयोभयवृत्तित्वविरहेण वह्निमान् धूमादित्यादावव्याप्तिरिति चेन्न प्रतियोगिवैयधिकरण्यघटितव्यापकत्वस्यानुसरणीयत्वादिति अथैवं प्रागुक्ते नस्य घटभिन्नं घटत्वादित्यादौ न दूषणं वृत्तिरूपप्रागभावात्मकाभावस्य च यावदन्तर्गतस्य भावभिन्नस्य विशेषणतयोभयवृत्तित्वविरहान्नातिव्याप्तिरिति चेदाद्यदान्तद्रूपभिन्नगुणत्वादित्यादावव्याप्तेरेकत्वात् न च तथापि तद्रूपभेदगुणत्वप्रकारकप्रमाविशेष्यत्वपरतदन्यतराभावस्य यावदन्तर्गतस्य भावभिन्नस्य विशेषणतयोभयवृत्तित्वविरहान्नातिव्याप्तिरिति वाच्यम् विषयत्वस्य ज्ञानासमानकालीनतया तादृशाभावस्यैवाप्रसिद्धेः न च तथापि तद्रूपभेदेन लक्षणधर्मित्वेन तदन्यतराभावस्य तत्सत्ताविगमकालीनवेदेन तद्रूपावच्छिन्नत्वेन प्रसिद्धतया तादृशयावदन्तर्गतस्य भावभिन्नस्य विशेषणतयोभयवृत्तित्वविरहान्न तत्रातिव्याप्तिरिति वाच्यम् भेदाभावस्य लक्षणावृत्तित्वाभावविशिष्टतद्रूपस्य स्वरूपत्वेन कल्पिततया भावभिन्नत्वाभावात् अथात्र तद्घटवृत्तिरूपध्वंसात्मकाभावस्यापि कालिकादिसम्बन्धेन हेत्वधिकरणावृत्तितया साध्यव्यापकाभावस्य दकप्रतियोगितावच्छेदकस्य विशेषणतयोभयवृत्तित्वविरहाद् वह्निमान् धूमादित्यादावव्याप्तिरिति चेन्न भावभिन्नपदेन विशेषणतया

यद्यपि तादृशाभावाः प्रतियोगितावच्छेदकसम्बन्धेन साध्याधिकरणावृत्तिरित्यस्यैव सम्यक्त्वे तेन घटाभिन्नघटत्वादिना घटादावतिव्याप्तिरुद्धारसम्भवः· एवं तादृशाभावो हेतुमन्निष्ठः सति साध्याधिकरणावृत्तिरित्यस्यैव सम्यक्त्वेन तथापि घटाभावभिन्नमभावत्वादिना सा
दावतिव्याप्तिः अभावप्रतियोगिकाभावाधिकरणकाभावस्याधिकरणस्वरूपत्वात्· यद्येवं नयोगितानुधावनं तथाप्युक्तरीत्यैवारणासम्भव इति ध्येयम्·।।२

पारिभाषिकभावभि
न्नत्वनिवेशेनागत्या
लक्षणाभावत्वस्य
रोगनाभावभिन्न
मभावत्वादित्यादा
वतिव्याप्तिः·।।

हेत्वधिकरणवृत्त्यभावस्य लभ्यत्वात्· तादृशाभावस्य विशेषणतया हेत्वधिकरणावृत्तित्वविरहेण लक्षणाघटकत्वात् यद्धर्मावच्छिन्नपदेन हेत्वधिकरणवृत्तित्वस्याविशेषणतया विवक्षणात् तादृशरूपेण वृत्तित्वं तद्रूपभेदस्तदन्यतराभावस्य तद्रूपानवच्छिन्नाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावाभावस्य तादृशसम्बन्धेन हेत्वधिकरणवृत्तितया तमादाय न पूर्वोक्तातिव्याप्तिरिति विभाव्यते· न चैवं स्ववृत्तित्वनिरूप्यध्वंसाभावविशिष्टसाध्यत्वविरहस्य तादृशध्वंसाभावविरहत्वेऽप्यभावस्य च निरुक्तरूपस्वत्वस्य वैशिष्ट्यकोटावप्रवेशात्तयोर्भेदवृत्तित्वाभावात् वह्निमान् धूमादित्यादावव्याप्तिरेव तत्र संयोगस्यापि इति वाच्यम्·· यद्धर्मविशिष्टाभावस्य प्रतियोगित्वं विवक्षितं तेनाभयाभावस्य प्रतियोगित्वं यस्याप्युक्तोभयाभावत्वस्य नैव स्वीक्रियते वैशिष्ट्यस्य प्रासज्यमानधर्मानवच्छिन्नत्वं वा साध्यव्यापकतावच्छेदकप्रतियोगिताविशेषणं देयम्· न चैतन्मते कोऽपि दोषो नास्तीति निपुणतरं विभावनीयम्· अत्र च साध्यवन्निष्ठाभावप्रतियोगिव्यधिकरणत्वेनोक्तौ भणीयमित्यस्य साध्यव्यापकतावच्छेदकमित्यन्तेन ग्रन्थः· अथात्र यद्यत्प्रतियोगित्वावच्छेदकानधिकरणं साध्यवन्निष्ठप्रतियोगिताभिन्नत्वं साध्यव्यापकतावच्छेदकत्वमित्यस्यैव सम्यक्त्वे साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकत्वपर्यन्तानुधावनमव्यर्थमिति चेन्न· व्यापकतावच्छेदकत्वपदस्याधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकत्वस्यैव प्रतीयमानत्वात् तदनुक्तौ व्यापकतावच्छेदकत्वपदस्य पारिभाषिकत्वापत्त्या जगदीशेन तथा रीत्यनभिहितत्वात्· व्यापकतावच्छेदकपदस्य पारिभाषिकत्वस्वीकारस्य लाघवमात्रानुरोधेन महता चेयत्तन्तथैवोक्तत्वाच्च· अत्र केवलान्वय्यप्रतियोगिव्यधिकरणत्वेनाभावविशेष्य

अन्येऽनुगतधर्मपदेत्यस्याप्यनिवेशे गौरवात् पूर्वोक्तन्यायेन साध्यवन्निष्ठाभावप्रतियोगि
तावच्छेदकत्वाभावादेव तद्भेदस्यानिवेशादिति ध्येयम्· २

णीयत्वेपि समवायित्वेनात्मत्वाभावप्रतियोग्यधिकरणत्वेन घटादिभेदस्य साध्याधिकरणेऽसत्वेन च प्रसिद्धितादवस्थ्यमिति चेन्न साध्याधिकरणवृत्तितादृशाभावप्रति
योगितावच्छेदिकाया प्रतियोगितातदन्यत्वस्य व्यापकतावच्छेदकत्वपदेन विवक्षितत्वात् साध्याधिकरणवृत्तित्वस्य स्वनिष्ठावच्छेदकताकभेदवत्त्वसम्बन्धेन अवच्छे
दकतावत्त्वावच्छिन्ननिरूपकताकाधिकरणत्वसम्बन्धेन स्वसाध्यवन्निष्ठाभावप्रतियोगितावच्छेदकत्वेनाभिमतं प्रतियोगित्वं न च तस्यापि स्वावच्छिन्नाधिकरणत्वस
म्बन्धेन समवायित्वेन वात्मत्वाभावप्रतियोगित्ववत् घटादिभेदस्यापि संसर्गतया तादृशप्रतियोगित्वस्यापि साध्याधिकरणेऽसत्त्वेन पुनरप्रसिद्धितादवस्थ्यमिति
वाच्यम् प्रतियोगितायाः अन्यूनानतिरिक्तवृत्तिधूमावच्छिन्नप्रतियोगिताकभेदस्यैव संसर्गतया तादृशभेदस्य संसर्गत्वानभ्युपगमात् न्यूनाधिकासतीरुच्छिन्न
वेधोगापत्तारेण कल्पनीयोऽनुलभते नान्मानयोगव्याधत इत्यादिव्याख्यानावसरे लक्षणसंचारप्रस्तावे त्यमेवोक्तत्वात् अथात्र लघुरूपसम्भव
यत्र गुरुधर्मेऽस्य प्रतियोगितावच्छेदकत्वानङ्गीकारे अन्यथा घटाद्यप्रतियोगित्वावच्छिन्नप्रतियोगियोगिताकाभावस्य प्रतियोगितावच्छेदकत्वम् घटत्वावच्छिन्नप्रति
योगित्वापेक्षया गुरुभूतस्य स्वीकरणीयम्। तथा च घटाघटाभावप्रतियोगित्वस्य साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकाभिन्नत्वेन घटाघटाभावसा
पद) ध्यसाध्य [illegible] प्रतियोगिताकत्वाया यावदन्तर्गतस्य स्वाविशिष्ट इत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यविरहादसंभव इति चेन्न अनति
रिक्तवृत्तित्वरूपावच्छेदकत्वस्यानुसरणीयत्वादिति। तथा च साध्याधिकरणवृत्तित्वविशिष्टसामान्यकाया या प्रतियोगिता तदन्यत्वं साध्यव्यापक
तावच्छेदकत्वमिति समुदितार्थः। इत्थं घटघटाभावप्रतियोगिताविशिष्टसामान्यस्यैव साध्याधिकरणवृत्तितया तदन्यत्वस्य घटाघटाभावप्रतियोगित्वेऽसत्वेन

घटाद्यभावस्य लक्षणाघटकत्वमिति सर्वं सुस्थितम्। वस्तुतः साध्यवन्निष्ठाभावस्य तत्संबन्धावच्छिन्नप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकमेव तत्सम्बन्धे न साध्यव्यापकत्वावच्छेदकं वाच्यम्। न तु साध्यवन्निष्ठाभावस्य स्वरूपसम्बन्धे व्याप्यम्। तेन च स्पन्दः कालत्वादित्यादौ स्पन्दत्वाद्यभावस्यैवास्य भावभिन्ना इति च तदर्थस्य फलं गगनादौ ॥१०॥ न च प्रमेयवान् घटाद्यभावत्वादित्यादौ जातिरूपाभावस्य हेत्वधिकरणवृत्तित्वाभावेन लक्षणाघटकत्वेनाभावत्वरूपादेर्य लक्षणासम्भवात् कथमुपसम्भवापत्तेरित्युक्तमिति अव्याप्त्यापत्तौ गीत्यस्यैवके भिञ्चितत्वादिति वाच्यम्। विषयतासंबन्धेन जातिनियामकत्वमतः घटाभावानुयोगिकविषयतासम्बन्धेन नित्यज्ञानाभावाभावस्य व्यभिचारादेः सम्बन्धस्य धर्मित्वेन मत्कल्पमते जातिसामान्याभावाभावस्यापितात्वे सम्बन्धेन हेत्वधिकरणवृत्तित्वात्समादायोक्तस्थलेपि लक्षणागमनसम्भवात्। अथ घटत्वेन जातिसामान्याभावाभावस्यापि तादृशस्य तादृशत्वात्तस्य च हेत्वधिकरणावृत्तिदेनप्रतियोगिसामानाधिकरण्याभावात्पुनरपि असम्भवापत्तिरिति चेन्न। भावभिन्नत्वपदेन साध्यवद्वृत्तिभावप्रतियोगिकान्यत्वस्यैव विवक्षितत्वात्। अत एव समानान्यत्वाद्यभावस्येत्यादिदीधितिकारोक्तस्थलेपि सङ्गच्छते। अन्यत्वाद्यभावस्यापि तादृशभावाभिन्नत्वाभावात्। तदाह साध्यवदित्यादि। साध्यवद्वृत्तिभावस्वरूपाभावप्रतियोगिप्रतियोगिपरस्येति विग्रहः। साध्यवद्वृत्तिप्रतियोगिप्रतियोगिकान्यत्वेनोक्ते च तादृशाभावाप्रसिद्धिरत उक्तं भावेति। ननु साध्यवद्वृत्तिभावप्रतियोगिप्रतियोगिकान्यत्वरूपभावभिन्नत्वमनिवेश्य विशिष्य वैशिष्ट्यमन्यत्वे तदन्यतत्स्वरूपस्यान्यतराभावाभावस्य साध्यवद्वृत्तित्वमथवा स्वतत्प्रतियोगिप्रतियोगिकत्वमन्यस्य स्वस्वरूपाभावत्वभावाभिन्नत्वाविरहाद्दीधितिकारोक्त

अत्र तादृशग्रन्थानुरोधेन लक्षणे तद्वित्रोभर्यस्यानर्थक्यमिति वाच्यम्। व्याख्यायां ग्रन्थानुरोधः कार्यः इति ग्रन्थानुरोधेनैव निरोधत्वानुसृतम्। सार्थकं तु अन्यतराभावघटकतया संभवादिति। अत्र यद्यपि प्रतियोगि
सामानाधिकरण्यं विरोधस्य प्राप्तिरनिवेशः संभवः तथापि कपिसंयोगाभावः प्रतियोग्यसमानाधिकरण इत्यादिमूलान्तरोपि नैव वा प्रयास इति सिद्धान्तलक्षणगादाधरीयो नोक्तम्:

पे

सङ्गतिनादवस्थामिति नच घटत्वेन मनोऽन्योन्याभावस्तदन्यत्वस्वरूपाभावाभावस्याप्यसाध्यवद्वृत्त्यभावप्रतियोगिप्रतियोगिकत्वाविशिष्टत्वेन साध्यवद्वृत्त्यभावप्रतियोगि
निष्ठयत्प्रतियोगितातदन्यप्रतियोगिताकोऽपि ऽभावः स्वरूपाभावभिन्नोऽप्रसिद्धत्वस्य पर्यवसितत्वादिति साध्यवद्वृत्त्यभावस्य साध्यव्यापकताघटकस्य सम्बन्धावच्छिन्नप्रति
योगिताकोऽपेक्ष्यः तेन घटत्वेन घटान्योन्याभावस्य पटत्वेन भिन्न[illegible]स्य घटत्वेन स्वरूपत्वेन साध्यवद्वृत्त्यभावप्रतियोगिप्रतियोगिकत्वेन लक्षणाघटकत्वेऽपि न क्षतिः
वत्तो भावभिन्नत्वपदेन साध्यवद्वृत्त्यभावीयप्रतियोगितावच्छेदकप्रतियोगिताकान्यस्य विवक्षणान्नकोऽपि दोष इति निष्कृष्टम् भावस्य साध्यवद्वृत्तित्वे यदि केना
पि सम्बन्धेनाप्यते तदा घटत्वस्वरूपस्य घटनाभेदाभावस्य कालिकादिसम्बन्धेन साध्यवद्वृत्तित्वेन मनोऽन्यत्वाभावस्यातथात्वान्नातिप्रसङ्गः इति दीधितिकारोक्ता
सङ्गतिरिति स्वरूपभिन्न गुरुत्वादित्यादौ स्वरूपत्वतत्स्वरूपाभावस्याप्यतथात्वादिति ध्येयम् यदि स्वरूपसम्बन्धेन विशेष्यते तदा जातिसामान्याभावाभावमादा
य पुनरसम्भवात् एवं च स्वप्रतियोगिमत्ताग्रहविरोधितावच्छेदकसम्बन्धेन साध्यवद्वृत्तित्व[illegible]स्वमनोऽन्यत्वाभावीयप्रतियोगि
मत्ताग्रहविरोधितावच्छेदकसम्बन्धेन साध्यवद्वृत्तित्वविरहेण मनोऽन्यत्वाभावस्य निरुक्ताभावभिन्नत्वमनपेक्ष्य वैशिष्ट्यासङ्गतिः जातित्वस्वरूपाभावस्य स्वीयप्रति
योगिमत्ताग्रहविरोधितावच्छेदकसम्बन्धेन साध्यवद्वृत्तितया जातिसामान्याभावाभावस्य लक्षणाघटकत्वात् एवं च व्यापकताघटकोऽभावः साध्यवन्निष्ठत्व
भवस्वप्रतियोगिमत्ताग्रहविरोधितावच्छेदकसम्बन्धेन वाच्यम् तावतैव जातिरूपाभावस्य लक्षणाघटकतया असम्भववारणसम्भवात् भावभिन्नत्वदे

वस्तुतो भावभिन्नत्वपदेन स्वरूपसम्बन्धेन घटाभावप्रतियोगितावच्छेदकत्वव्यापकत्वाघटकसंबन्धावच्छिन्नत्वोभयाभाववत्प्रतियोगिताकत्वस्य विवक्षितत्वान्नेयमाशङ्केति · १

व्यर्थमिति पूर्वपक्षो दुर्वार इति सुधीभिर्विभावनीयम्· केचित्तु स्वाभावाभावस्य स्वप्रतियोगित्वमिति मते समानाधिकरणधर्मावच्छिन्नप्रतियोगित्वस्य प्रतियोगितावच्छेदके स्वरूपत्वेन जातिसामान्याभावत्वावच्छिन्नप्रतियोगितावच्छिन्नाभावस्य जातिस्वरूपत्वेपि घटत्वेन जातिसामान्याभावप्रतियोगिताया अतिरिक्ततया तदवच्छिन्नाभावस्य जात्यनात्मकत्वाद् घटत्वेन जातिसामान्याभावाभावस्य साध्यव्यापकतावच्छेदकप्रतियोगिताकत्वाभावेन लक्षणाघटकत्वात्तमादाय नासम्भवस्स्यादिति· तदीयमनोरमम्· एवमपि द्वितीयलक्षणे जात्यभावत्वेन घटाद्यभावमादायासम्भवस्य दुर्वारत्वादिति ध्येयम्· परे तु समनियताभावानामैक्यमते घटत्वादिना जातिसामान्याभावाभावस्यैव घटत्वादिनावाच्यत्वात् घटभूतलत्वपूर्तया तस्य च वाच्यवाद्यभावरूपप्रतियोगिसामानाधिकरण्याप्येवमसम्भवशङ्का विभावनीया· भावभिन्नत्वं साध्यवन्निष्ठाभावीयत्वं यदि च यथाश्रुतमेव मनोरमत्वाद्यभावद्वयमेकमात्यन्तसमनियताभावानामैक्यमते घटत्वेन मनोरमत्वाद्यभावमादाय संगमनीयम्· नन्वेवमपि जातित्वादिविशिष्टजातिसामान्याभावाभावमादायासम्भवो दुर्वार एवेति वाच्यम्· तेन तादृशाभावस्य वक्ष्यमाणस्वन्यूनवृत्तिधर्मानवच्छिन्नत्वविशेषणेनैव वारणीयत्वादित्याहुः· यत्तु साध्यवदन्यभावप्रतियोगितावच्छेदकप्रतियोगिताका इति तन्मन्दम्· इत्याद्यस्य हेतुसमानाधिकरणत्वासम्भवादित्यन्ये मदीयाः· अथानु घटत्वेन गगनाभावाभावीयप्रतियोगित्वावच्छिन्नाभावस्य गगनस्वरूपतया साध्यवद्वृत्तित्वेन साधनसमानाधिकरणस्य साध्यवदन्यभावप्रतियोगितावच्छेदकप्रतियोगिताकस्य घटत्वेन गगनाभा

एतादृशलक्षणे यावत्पदसत्त्वे फलतोऽवच्छिन्नपदव्यावृत्तिरेव। एवं सति व्याप्यतावच्छेदकावच्छिन्नत्वादिदलव्यावृत्तिकालस्यैव एतद्ग्रन्थलिखनापत्तेः। यावत्पदव्यावृत्तिकालेनाधिरवनस्य सन्दर्भविरोध इति चिन्त्यम्।

वाभावस्य प्रतियोगिसमानाधिकरणतया केवलान्वयिलक्षणागमनसम्भवात् एतद्ग्रन्थासमञ्जसमिति चेन्न। स्वाभावाभावत्वं प्रतियोगित्वमिति मते समानाधिकरणाभावा
वच्छिन्नप्रतियोगित्वस्य प्रतियोगितावच्छेदकस्वरूपत्वेन गगनाभावत्वावच्छिन्नप्रतियोगिताविच्छिन्नाभावस्य गगनस्वरूपत्वस्वीकारेऽपि घटत्वेन गगनाभावीयप्रति
योगित्वस्यातिरिक्ततया तदवच्छिन्नाभावस्य गगनस्वरूपत्वास्वीकारेण तस्यैवासिद्धतया घटत्वेन गगनाभावाभावप्रतियोगित्वस्य साध्यवद्वृत्तिस्वाभावप्रतियोगि
तावच्छेदकत्वविरहावकाशादिति ध्येयम्। ननु साध्यतावच्छेदके व्यापकत्वघटकाभावीयावच्छेदकत्वापादानगौरवमत एवास्यानन्वयदोषः। नन्वस्यायमाशयः साध्य
तावच्छेदकसम्बन्धावच्छिन्नतादृशप्रतियोगिताकाभावप्रतियोगितावच्छेदकसम्बन्धेन स्वविशिष्टहेत्वधिकरणावच्छेदके न प्रतियोगिसमानाधिकरणा
त्त्वमिति समुदायार्थः। सम्बन्धान्तरावच्छिन्नाभावमादायासम्भववारणाय साध्यतावच्छेदकसम्बन्धावच्छिन्नेत्युक्तम्। कालिकादिसम्बन्धेन प्रतियोगिसामानाधि
करण्यात् धूमवान् वह्नेरित्यादावतिव्याप्तिः। अतः प्रतियोगितावच्छेदकसम्बन्धेनेति। न च साध्यतावच्छेदकसम्बन्धेन प्रतियोगिसामानाधिकरण्यं प्रतियोगित्वं यथाश्रुतवि
सम्बन्धेनैव ग्राह्यमिति। अत एव नासम्भवोऽपीति वाच्यम्। सम्बन्धान्तरावच्छिन्नतादृशप्रतियोगिताकाभावमादाय लक्षणासमन्वयप्रतियोग्य[illegible]ते चेति ग्रन्थानुपपत्तिप्रस
ङ्गादिति। न च धूमनीलत्वाद्यव्याप्तिः। साध्यतावच्छेदकीभूतस्वाश्रयसम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धिरिति वाच्यम्। वृत्त्यनियामकसम्बन्धावच्छिन्न
प्रतियोगित्वस्वीकर्तृनयेन निरुक्त्यादरात्। अत एवासिद्धेर्लक्षणागमनदोषो न तदुक्तमिति ध्येयम्। यद्यपि ननु यादृशाभावप्रतियोगितायाः व्यापकं साध्यतावच्छेदक
इत्याद्यारभ्य तादृशनिरुक्तेः वाङ्कृतमसम्यक्त्वादित्यत्र जगदीशाः। अत्रेदं बोध्यम् उभयत्वस्य पर्याप्तिसम्बन्धेनैकमात्रावच्छेदेनाभावसत्त्वेऽपि प्रतियोगिव्यधिक

५

कृतिर्व्यापकताघटकसंबन्धेनैव व्यापकताया वाच्यत्वे नैकालिकेन न्यान्यत्वविशिष्टघटविशिष्टस्य महाकालस्य साध्यतात्मेन साध्यतायां सत्त्वादव्याप्तिः साध्याभावप्रतियोगितावृत्तिमहाकाले कालिकेन प्रतियोगिव्यधिकरणाभावाप्र
सिद्धिः महाकालान्यत्वविशिष्टघटस्यापि महाकाले स्वीकारादिति ध्येयम्ः

रूपघटितव्यापकत्वमस्त्येवेति चेन्न प्रतियोगिवैयधिकरण्यनिवेशेऽयं वह्निधूमोभयवान् धूमादित्यादावव्याप्तिवारणाय न्यूनवेऽपि गुरुत्वान्यत्वविशिष्टस्याभावत्वात् न्यूनादित्वा
दावतिव्याप्तिः सत्तावदभावीयप्रतियोगितावच्छेदकत्वेनातिरिक्तसाध्यतावच्छेदकीभूतविशिष्टसत्ताधिकरणत्वसत्त्वेन तस्याभावस्य लक्षणाघटकत्वेन तस्य प्रतियोगिता
सामानाधिकरण्यसम्भवात् न चैतत्रातिव्याप्तिः भूतत्वमूर्तत्वोभयवान् मूर्तत्वादित्यादिवत् स्वोक्तरीत्यापत्तिर्वाच्यम् जगदीशमतेन तत्रातिव्याप्त्यभावे न भवन्मतस्वीकारे उभा
वसंदेहनिरोधापत्तेः न च तथापि साध्यतावच्छेदकीभूतविशिष्टसत्तावच्छिन्नानधिकरणत्वेन विशिष्टसत्त्वस्य सत्तावदभावीयप्रतियोगितावच्छेदकस्य व्या
पकत्वात् सत्तावदभावस्य लक्षणाघटकत्वेन न तत्रातिव्याप्तिरिति वाच्यम् तथा सति स्वरूपतः साध्यतावच्छेदकस्थले वह्निमान् धूमादित्यादावव्याप्तिः तत्र
साध्यतावच्छेदकस्याभावादिति ध्येयम् वस्तुतस्तु यथाश्रुताभिप्रायेण ग्रन्थकृताद्दूषितत्वेन प्रतियोगिवैयधिकरण्यनिवेशप्रयोजनातिव्याप्तिवारणं न स्यादिति कैश्चि
न्निर्धेयम् न व्यास्तु साध्यतावच्छेदकातिरिक्तधर्मानवच्छिन्नत्वात् स्यसाध्यनिष्ठपदमपि तदर्थमेवेत्यन्तं जगदीशः धूमवान् वह्नेरित्यादावपि कालिकादिसम्बन्ध
न धूमाद्यभावस्य हेत्वधिकरणावृत्तेः न प्रतियोगिसामानाधिकरण्यादित्याशयः साध्यतावच्छेदकसम्बन्धेनेति अत्र साध्यतावच्छेदकसम्बन्धेन प्रति
योगिसामानाधिकरण्यमेको प्रतियोगितायाः सम्बन्धावच्छिन्नत्वं निवेश्यते प्रयोजनाभावात् तथा च वह्निमान् धूमादित्यादौ व्यधिकरणसम्बन्धावच्छिन्नप्रतियो
गिताकवह्न्याद्यभावमादाय लक्षणसमन्वयसम्भवेऽपि प्रमेयवान् वाच्यत्वादित्यादौ गगनादिरूपेण प्रमेयाद्यभावरूपव्यधिकरणधर्मावच्छिन्नाभावविना लक्षणा
गमनासम्भवात् प्रतियोग्य[illegible]निवेशे प्रयोजनाय स्थितिप्रसङ्गः अत्र च लक्षणे तादृशपदेन साध्यनिष्ठप्रतियोगित्वमाचरम् तथा सति यः कश्चिदभावो यदधिकर

परेतु स्वरूपत्वं नूनं एतिजातिमत्वान् रूपादित्यत्राव्याप्तिः साध्याभावप्रतियोगित्वाधिकरणे धूमेऽकं नीलपीताद्यभावसत्वात् तद्वारणायैव तात्पर्यमित्याहुः अन्येतु स्वसामानाधिकरण्यसम्बन्धेन तद्धटादिक
स्यात्त्वादिभिन्नत्वविशिष्टसंयोगावत् संयोगेन साध्यतायां द्रव्यत्वादित्याद्यव्याप्तिः साध्याभावप्रतियोगितायामवच्छेदकस्य लक्षणासत्त्वेपि प्रतियोगिवैयधिकरण्याघटितव्यापकत्वस्य सत्त्वात् सकलसंयोगस्य[illegible]

तथा च प्रमेयवान् वाच्यत्वादित्यादौ विशेष्यत्वसमवायादिसम्बन्धावच्छिन्नप्रमेयाभावप्रतियोगिसामानाधिकरण्यः हेत्वधिकरणावच्छेदेन गगनाभावसत्त्वात् प्रतियोगितायां स्वनिरूपकत्वस्य यथोक्ताभावावस्थानात् अस्मन्मते च गगनाभा
वस्थाने तस्य प्रतियोगित्वविरहेण लक्षणाघटकत्वात् समवायादिना प्रमेयाभावस्य हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यविरहात् व्यधिकरणधर्मावच्छिन्नाभावस्यैव धर्मव्यवस्थापकत्वात् दरामूलोत्थितिः किं च प्रमेयप्रतियोगिताको
इत्यत्र परिचायकम् न च लक्षणे निवेशसाद्रा प्रतियोगितापदेन च निरुक्तधर्मावच्छिन्नप्रतियोगिता उच्यते परिचयकारी स्वलाघवाय स्वविवेकेनानास्मीति आकाङ्क्षा ग्रन्थोपस्थापनायेनोक्तत्वादिति ध्येयम् ॥ ॥ ॥ ॥ ॥

णावच्छेदेन साध्यतावच्छेदकातिरिक्तधर्मानवच्छिन्नसाध्यनिष्ठप्रतियोगिताश्रयसमानाधिकरणत्वम् अस्यैव सम्यक्त्वे साध्यनिष्ठप्रतियोगिताकत्वपर्यन्तमभा
वविशेषणार्थम् धूमवान् वह्नेरित्यादावतिव्याप्तेरभावात् तन्मात्रोक्तौ च व्यधिकरणधर्मावच्छिन्नाभावविना लक्षणासम्भवप्रतियोगितां सत्त्यैवेति मूलावतारप्रसङ्गः अथा
सूत्रधूमानवच्छिन्नत्वमेवोच्यतां किं साध्यतावच्छेदकातिरिक्तस्य धर्मस्यानुपसरणेनेति एवं चैव गगनरूपेण साध्याभावस्य लक्षणाघटकसम्भवाद्व्याप्त्यभावादिति
चेन्न अखण्डाभावघटकतया सार्थक्यम् न चैवमप्यनतिप्रयोजकतया कथमेतावत्पर्यन्तं विवक्षितमिति वाच्यम् भूतत्वमूर्तत्वोभयवान् स्यादित्यादौ सङ्गमनार्थ
कत्वात् केचित्तु धूमानवच्छिन्नत्वस्य तदर्थं निवेशे प्रतियोगितामात्रस्यैव सम्बन्धावच्छिन्नत्वेन धर्मिमत्स्वरूपधर्मानवच्छिन्नप्रतियोगित्वाप्रसिद्ध्यासम्भवस्यात
तिरिक्तोऽनु धर्मे विशेषणम् न च धर्मानवच्छिन्नधर्मविशिष्टावच्छेदकत्वानिरूपकनिवेशेन तु सम्भवाभावात् [illegible]कमानीक वैयाकरणमतसिद्धमिति वाच्यम् यथासन्निवे
शावेयव्याभावात् व्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितावच्छेदकत्वस्य प्रतियोग्यतावच्छेदकविशेषणीभूतधर्मापेक्षया किञ्चित्त्वादिना भट्टाचार्येण स्वीकृतत्वात् तन्मते
सम्भवतादवस्थ्यादित्याहुः न चैवमपि साध्यतावच्छेदकातिरिक्तधर्मानवच्छिन्नत्वमपहाय साध्यतावच्छेदकावच्छिन्नत्वमेव निवेश्यतां तथा च व्यधिकरण
सम्बन्धावच्छिन्नप्रतियोगिताकाभावमादायैव लक्षणगमनसम्भवादिति वाच्यम् प्रमेयवान् वाच्यत्वादित्यादावव्याप्तिः प्रमेयत्वावच्छिन्नप्रतियोगिताया
व्यधिकरणसम्बन्धावच्छिन्नप्रमेयाभावस्य हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्याभावात् न च व्यधिकरणसम्बन्धावच्छिन्नावच्छेद

(तत्र समनियताभावानामैक्यमते धूमाभावस्यैव वह्निधूमोभयाभावतया तदीयोभयत्वावच्छिन्नप्रतियोगितामादाय प्रतिव्याप्तिरिति वाच्यम् समनियताभावानामैक्यमते भट्टाचार्यकृत्य तद्[illegible]सरणादिति)
समनियतपदार्थस्याविशेषरूपत्वात् अन्यथाभावस्याभावीयप्रतियोगितावच्छिन्नाभावप्रतियोगितावच्छिन्नाभावप्रतियोगिता[illegible]संमवायेनेत्यपि[illegible])

[illegible]

[illegible]

कताकप्रतियोगिताकाभावमादायैव लक्षणासंभव इति वाच्यम्· कालिकसम्बन्धेन धूमत्वादिविशिष्टाभावमादाय धूमवान्वह्नेरित्यादावतिव्याप्तिवारणार्थं सा
ध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकत्वस्यैव निवेश्यत्वात्· नचावरूभयत्वस्य संसर्गतावच्छेदकतानभ्युपगमात्· विशिष्यधर्मितायाम
कतावच्छेदकस्यैव संसर्गतावच्छेदकत्वात्· अभ्युपगमे तु विलक्षणोभयसम्बन्धेन प्रमेयत्वावच्छिन्नाभावमादाय व्यधिकरणधर्मावच्छिन्नाभाव
विना लक्षणागमनसम्भवे प्रतियोग्यवृत्तीत्यादिमूलानर्थक्यप्रसङ्गः॥ केचित्तु गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वनये घटत्वसमनिय
त गुरुरूपस्य साध्यतायामव्याप्तिभिया साध्यतावच्छेदकावच्छिन्नत्वस्य निवेशासम्भवादिति प्राहुः· येन सम्बन्धेन व्यापकत्वं तेन सम्बन्धेन प्रति
योगिव्यधिकरणत्वमिति वाच्यम्· अन्यथा पृथिवी महाकालकपालान्यतरत्वादित्यादावारम्भकस्पन्दवति विषयतासम्बन्धेन न वृत्ति
व्यक्त्यभावसत्त्वादिति जगदीशः· अत्रायं पूर्वपक्षः· प्रतियोगिव्यधिकरणघटितव्यापकतायां साध्याधिकरणस्पन्दस्य स्पन्दत्वानौपकर
यादेशावच्छेदेन स्पन्दत्वाभावप्रतियोगिताविशिष्टस्पन्दत्वस्य कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाभावसत्त्वात् सोव्यर्थाभिक्षाभाव
प्रतियोगितावच्छेदकैव स्पन्दत्वाभावीयप्रतियोगितात्मककालिकेन साध्यव्यापकताघटकसम्बन्धः कथं तत्सम्बन्धावच्छिन्नाभावमादा
य स्पन्दो महाकालवृत्तित्वेनातिव्याप्तिः· प्रतियोगिव्यधिकरणघटितव्यापकताकल्पे च यावदन्तर्गतस्य स्पन्दस्य साकारकपाले

श्चिज्जन्यज्ञानाभावस्य साध्यव्यापकतायां कस्मिन्नपि सम्बन्धेन हेत्वधिकरणावच्छेदेन प्रतिसामानाधिकरण्याभावान्नातिव्याप्तिरेवं दं समाधानम् समवायनियमाभावान्ना
मैक्यमते स्पन्दानुयोगिकस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकस्पन्दाभावस्य समवायसम्बन्धावच्छिन्नप्रतियोगिताकस्पन्दत्वाभावाभिन्नतया साध्यत
निष्ठकालिकसम्बन्धावच्छिन्नप्रतियोगिताकाभावप्रतियोगितानवच्छेदकस्पन्दानुयोगिकस्वरूपसम्बन्धावच्छिन्नैवाच्यत्वान्निष्ठप्रतियोगिताकस्पन्दसमवायसम्बन्धा
वच्छिन्नप्रतियोगिताकस्पन्दत्वाद्यभावेऽपि सत्त्वात् कालिकस्यापि व्यापकतायां घटकस्मसमवायत्वाभावेऽस्य प्रसङ्गेनेति केचित्तु वस्तुतः कालिकसमवायान्यतासम्ब
न्धेनापि स्पन्दत्वनिष्ठप्रतियोगितायाः स्पन्दव्यापकतावच्छेदकत्वं नवीनमते कत्वा ममाद्यान्यतरसम्बन्धेनाद्यायां व्याप्तौ सत्त्वं तिव्यन्ति. प्रमेयमित्यादौ कथ
ञ्चिज्जन्यज्ञानाद्यभावसमानाधिकरणाधिकरणत्वमात्रस्य अभावव्याप्तिरेकलक्षणगमनान्नप्रतियोगिधर्मावच्छिन्नकरणाधीनत्वव्यापकत्वस्य वा नसरणीयत
या स्पन्द इत्याकारकप्रतीतौ किञ्चिज्जन्यज्ञानाद्यभावस्य प्रतियोगिवैयधिकरण्यघटितस्पन्दत्वव्यापकतावच्छेदकत्वस्य वापि नानुपपत्तिरिति ध्येयम्.
वस्तुतस्तु एतदस्वरसेनैवाकालिकत्वेत्यादिना दोषान्तरस्य सम्बन्धे कालिकविवक्षणीयं मत्वा स्वकालिकनिष्ठाभावः पक्षित्या स्पन्दनायत्वेन इत्यभाववाक्ये व्यभिचारा
पत्तेरित्यतो जगदीशः अथवा स्ववृत्तिः संयुक्तसमवेतत्वसम्बन्धेन विशेषणतया स्पन्दप्रभावबोधकापत्तौ वारणाय कालिकावच्छेदककोटौ समवेतान्तर्भावेऽप्य
निवेशनीयम् तेन कालिकावच्छेदककोटौ समवेतशब्दव्यावर्त्यं तु विशेषणव्याप्तिरेके प्रसरणात् इत्यभाववाक्ये व्यभिचारासम्भवात् कालिकावच्छे
दककोटौ द्रव्याद्यपेक्षया विशेषणानिवेशप्रयोजनाभावादस्मिन् कालावच्छेदेन रूपाभाववारणं अवधारणं जगदीशस्यानुचितमिति चेन्न परमाणोश्चक्षुःसंयोगदशायामु

प्यत्वादेस्तन्मात्राभावचाक्षुषापत्तेः। चक्षुःसंयुक्तसमवेतयोग्यविशेषणतात्वेन कार्यकारणभावस्य कल्पनीयत्वाद्रूप्य यभावचाक्षुषत्वावच्छिन्नस्य तस्य
कारणविरहेण न घटादेः स्पार्शिकाभाववद्देशेऽभावचाक्षुषापत्तिरिति ध्येयम्। ननु धूमाद्यभावविशिष्टे महत्त्वजलादिधर्म्येनं नगाद्याः। ननु धूमवान् वह्नेरित्यत्र या
वद्गगनस्य भावस्वरूपायोगोलकान्यत्वाभावस्य प्रतियोगिसामानाधिकरण्याभावेनातिव्याप्तिविरहान्नासङ्गतिः। अभावाधिकरणकाभावस्याधिकरणस्वरूपतयाऽय
योगोलकत्वादिधर्मैः जलादिधर्मित्वविशिष्टगोलाद्यभावस्यायोगोलकीयाद्यभावात्मकत्वात्। एवं गगनाभावभिन्नप्रमेयत्वादिरूपेनातिव्याप्तिः। यावदनुगतस्य
गगनाभावभेदाभावस्य गगनाभावात्मकतया तस्मात् जलादिधर्मित्वविशिष्टगोलाद्यभावाभावस्य तादात्म्यकतया तत्प्रतियोगिना गोलाभावेन समं प्रतियोगिसा
मानाधिकरण्यादिति ध्येयम्। यावत्पदस्य फलतः प्रतियोगितावच्छेदकत्वेनेत्याद्युक्तं यद्यपि वह्नौ जगदीशः। अस्मान्नाशङ्कते। साध्यव्यापकतावच्छेदकः याव
त्प्रतियोगिताकाभावाः धूमकेतुप्रतियोगिनाश्रयसामानाधिकरण्यविवक्षणेऽपि सामञ्जस्येऽपि तत्सामानाधिकरण्यपदस्य विशेषणपदस्य च
वैयर्थ्यापत्तिः। न च महानसीयवैयर्थ्यभयेन तत्कल्पस्य परित्यक्तत्वात् जगदीशेनापि तद्दोषेणाऽसंग्रहापि अग्रे स्वोक्तमिति वाच्यम्। तथासति हेतुसमाना
धिकरणेत्यस्यैव वैयर्थ्येन तत्कल्पस्य अभिधानासङ्गतिरितिमेव। प्रतियोगिव्यधिकरणघटितव्यापकत्वस्य स्वयमेव दूषितत्वेन प्रतियोगिव्यधिक
रणघटितव्यापकत्वस्यानुसरणीयत्वात् जातिसामान्याभावाभावीयप्रतियोगितत्वस्य यावदगगनत्वाद्यधिकरणावच्छेदेन तत्प्रतियोगिसा
मानाधिकरण्यविरहादसम्भवः स्यादतुपाक्षात्। न च तथापि भावभिन्नाभावीयनिरुक्ततत्प्रतियोगिताश्रयसामानाधिकरण्यविरहेणासम्भव

वारणसंभवादुक्तदोषसत्त्वादवस्थ्यमिति वाच्यम् । भावभिन्नवृत्त्यभावान्यत्वावच्छिन्नप्रतियोगितांशे तस्यानिवेशेन यथाश्रुते वैयर्थ्याभावादिति ध्येयम् । केचित्तु
यत्स्वसमानाधिकरणाभावीयसाध्यव्यापकतावच्छेदकप्रतियोगिताकव्यापकोऽभावस्तत्त्वमेव व्याप्तिः । व्यापकत्वं च स्वविशिष्टहेत्वधिकरणतावद्व्यापकत्वं स्वनिरू-
पितत्वोभयसम्बन्धेन स्वविशिष्टहेत्वधिकरणतावद्व्यापकत्वं च साध्यसामानाधिकरण्यस्वनिरूपकाभाववद्वृत्तित्वोभयसम्बन्धेन बोध्यम् । एवं च यत्समानाधिकर-
णाऽन्यस्यानुक्तौ वाच्यत्वाभावीयप्रतियोगितास्वनिरूपकोभयसम्बन्धेन स्वविशिष्टहेत्वधिकरणताव्यापकत्वादव्याप्तिरतस्तदुपादानम् । कपिसंयोगाभाववा-
न्मेयत्वादित्यत्र कपिसंयोगाभावनिष्ठप्रतियोगितास्वनाश्रयोभयसम्बन्धेन हेत्वधिकरणताव्यापकत्वादव्याप्तिरतस्तदुपादानम् । न च स्वविशिष्टहेत्वधि-
करणताविशिष्टसम्बन्धविषयतास्वनिरूपकाभाववद्वृत्तित्वनिवेशनमनुचितमिति वाच्यम् । स्वविशिष्टसाध्यार्थकत्वेनैव निवेशनात् । अन्यथा यावत्त्वस्याभावावि-
शेषणं तु हेत्वधिकरणताव्यापकप्रतियोग्यधिकरणतावद्वृत्तित्वनिवेशेनापि सामञ्जस्ये स्वविशिष्टपदवैयर्थ्यभयेन तदर्थत्यागे को हेत्वधिकरणता-
नियावान्तीसात्विना गुरुतरार्थकरणस्यानौचित्यापत्तेरित्याहुः । वस्तुतस्तु त्वाऽस्यूरुतिप्रसक्तमुक्तरूपं भजति जगदीशः । अथ धूमाभावस्य धूमवह्नित्व-
विशिष्टगोत्वाभावाभावात्मकतया स्वन्यूनवृत्तिधर्मावच्छिन्नगोत्वाभावनिष्ठप्रतियोगिताश्रयसामानाधिकरण्यादतिव्याप्तितादवस्थ्यमिति । न च स्वसमा-
नाधिकरणत्वे सति स्वाश्रयवृत्तिसाध्याभावप्रतियोगितावच्छेदकधर्मावच्छिन्नोभयतदन्यप्रतियोगित्वं स्वन्यूनवृत्तिधर्मानवच्छिन्नपदेन विवक्षणीयम् । तथा च
धूमवह्नित्वविशिष्टगोत्वाभावनिष्ठप्रतियोगित्वस्य स्वसमानाधिकरणीभूतस्वाश्रयवह्निसाध्याभावप्रतियोगितावच्छेदकेन धूमवह्नित्वविशिष्टगोत्वाभाव

त्वावच्छिन्नत्वेन तन्मात्रयाप्तिर्व्याप्तिरिति वाच्यम् । विशिष्टाभावो भवत्यभावस्य व्यधिकरणधर्मावच्छिन्नाभावविनिर्मोकेण सद्धेतुमात्र एव न क्षुण्णसम्भवनात्प्रतियो
गधर्मेत्यंत्वाद्यन्यानीत्यतिप्रसङ्गः । इष्टापत्तेरयथा सङ्गतेः । मैवं धूमवह्निमत्त्वाविशिष्टत्वाभावाभावस्य धूमाभावरूपत्वे सामान्यत्याप्रतियोगित्वमपि धूम
एवस्वीक्रियते अतो न गोत्वाभाववन्निष्ठप्रतियोगित्वमादाय न दोषः । वस्तुतस्तु स्वन्यूनवृत्तित्वसमानाधिकरणत्वे सति तत्स्वाश्रयवन्निष्ठभेदप्रतियोगिताव
च्छेदकतावच्छेदकत्वं अतो धूमवन्निष्ठवह्निमत्त्वविशिष्टगोत्वाभावत्वात् वह्न्यभावस्य धूमाद्यभावस्य रूपत्वेपि तदीय धूमवद्भिन्नत्वविशिष्टगोत्वाभा
वत्वावच्छिन्नप्रतियोगित्वमादाय न धूमवान् वह्नेरित्यादावतिव्याप्तिः । धूमवद्भिन्नत्वविशिष्टगोत्वाभावस्य गोत्वाभावविशिष्टधूमप्रतियोगितायास्तदवृत्ति
न्यूनवृत्तित्वात् । अतो विशिष्टाभावस्य पर्यायतो व्यत्ययगगनाभावाभावमादाय व्यधिकरणधर्मावच्छिन्नाभावविनिर्मोकेण लक्षणगमनाय द्वितीयलक्ष
णानुसरणबीजं न दर्शितमिति । न चैवं तथापि गोत्वाभाववत्त्वविशिष्टधूमवद्भिन्नत्वविशिष्टगोत्वाभावाभावाभावस्य धूमरूपत्वेन धूमधूमान्यधूमप्रतियोगिताभा
भावस्य च धूमाभावानतिरिक्ततया तस्यासिद्धेः न स्वन्यूनवृत्ति धूमान्वह्निमत्प्रतियोगिताया अभावात् अतिव्याप्तिविरहेपि [illegible] यत्वात् । वह्नित्वं च स्वान
त्यूनकत्वस्वाश्रयवृत्तितावच्छेदकधर्मावच्छिन्नाधिकरणवृत्तित्वोभयसम्बन्धेन बोध्यम् । वस्तुतस्तु स्वन्यूनवृत्तित्वं धूमान्वह्निमत्प्रतियोगित्वपदेन प्र
तियोगिनाविशिष्टप्रतियोगिताया विवक्षणान्न कोपि दोषः । [illegible] च स्वनात्व स्वन्यूनवृत्तिधर्मावच्छिन्नत्वसम्बन्धावच्छिन्नस्वानिष्ठा
वच्छेदकताकभेदवत्त्वस्य कालोनाभाववृत्तित्वसम्बन्धावच्छिन्नस्वानिष्ठावच्छेदकताकभेदवत्त्वस्य भावात् यसम्बन्धेन ससगघटकेधूमनाव

प्रागुक्तोभयसम्बन्धेनग्राह्येतिध्येयम् ॥१॥ अथ द्वितीयलक्षणे साध्यव्यापकतावच्छेदकरूपावच्छिन्नत्वानुपादाने जलत्ववह्नित्वविशिष्टद्रव्यत्वाभावे गुणत्ववह्नित्वविशिष्टसत्ताभावमादाय वह्निमान् धूमात् सत्तावान् द्रव्यत्वादित्यादावव्याप्तिरतो जगदीशेनुसातुनसङ्कृते । तादृशविशिष्टाभावस्य तत्प्रतियोगितावच्छेदकीभूतद्रव्यत्वावच्छिन्नसामानाधिकरण्यात् । न च प्रतियोगितावच्छेदके तापर्याप्तिनिवेशाभिप्रायेणैवाभिहितमिति वाच्यम् । व्यभिचारिणि यावद्धेतुगतायां व्यभिचारनिरूपकाधिकरणधूमित्वाभाववविशिष्टाभावस्य स्वप्रतियोगितावच्छेदकीभूतव्यभिचारस्थलधूमित्वाभावावच्छिन्नसामानाधिकरण्यविरहेणातिव्याप्तिप्रसङ्गात् । पर्याप्तिनिवेशस्य निष्प्रयोजनकतया परिष्कृतत्वात् । एवं पर्याप्तिनिवेशेऽपि यावद्धेतुगतस्य साध्यव्यापकतावच्छेदकप्रतियोगिताकस्वाधेयतासम्बन्धेन जलत्वविशिष्टाभावस्य स्वप्रतियोगितावच्छेदकीभूतजलत्वावच्छिन्नसामानाधिकरण्यविरहेण वह्निमान् धूमात् सत्तावान् द्रव्यत्वादित्यादावव्याप्तिरित्येव जगदीशस्य तात्पर्यमिति केचिदाहुः । तन्न पर्याप्तिनिवेशे [illegible] वाच्यत्वगगनोभयाभावमादाय लक्षणसमन्वयः प्रतियोग्य[illegible]त्यादिग्रन्थानुत्थितिप्रसङ्गात् । उभयाभावस्य प्रतियोगितावच्छेदकीभूतवाच्यत्वत्वावच्छिन्नसामानाधिकरण्यात् । तस्मात्समानयतनामधर्मावच्छिन्नप्रतियोगितायाःस्वैक्यमते व्यभिचारस्थलवृत्त्यभावस्य प्रतियोगितायां व्य

१२

ज्ञेयत्वादित्यादिअन्यथा वैयर्थ्यमिति वाच्यम्· घटत्वेन वह्न्यभावमादाय प्रतियोग्यव्यधिकरणत्वासम्भवात्· न च तथाप्येकव्यक्तिमत्त्वादिसाध्यकस्थले साध्याभावस्य प्रतियोगिव्यधिकरणत्वाप्रसिद्ध्याव्याप्तिसम्भवेन वह्न्यादे[illegible]

[illegible]वात्र व्याप्तेरित्यादौ वह्निव्याप्तेः· साध्याभावस्य प्रतियोगिव्यधिकरणत्वाभावादिति वाच्यम्· प्रतियोगिव्यधिकरणपदेन साध्यतावच्छेदकावच्छिन्नप्रतियोगिताव्यधिकरणत्वस्य विवक्षितत्वात्·

मिधारत्वेना वह्नित्वविशिष्टवाच्यत्वादिनाप्यवच्छिन्नतया तत्प्रतियोगितावच्छेदकीभूतवाच्यत्वावच्छिन्नसामानाधिकरण्याक्षतेस्त
द्व्यभिचारित्वमिति व्याप्तेः तः पर्याप्तिनिवेशस्यावश्यकत्वमिति पुरुषोत्तममतमपास्तम् :: अत्र वाच्यं ज्ञेयत्वादित्यादावपि साध्यव्यापकतावच्छे
दकप्रतियोगिताकस्याधेयतासम्बन्धेन घटविशिष्टाभावस्य प्रतियोगितावच्छेदकीभूत—वह्निमत्सामानाधिकरण्यविरहादसम्भ
वेऽव्याप्तेरन जगदीशस्यानुचितमिति चेन्न· अव्याप्तिपदस्यासम्भवपरत्वादिति· केचित्तु साध्यता[illegible]कसम्बन्धेन व्यापकत्वेन न सम्ब
न्धेन प्रतियोगित्वं प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं च वाच्यम्· तथा च कालो घटवान् महाकालत्वादित्यलक्षणाग-
मनाभासम्भवः· महाकालत्वान्यत्वविशिष्टाधिकरणत्वस्यापि महाकालस्वीकारादित्याहुः ·।०:। व्याप्यवृत्तेर्हेतुसमानाधिकरण
साध्याभावे साध्ये हेतुसमानाधिकरणस्येति जगदीशाः :- न चात्र यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमत्तस्मादृशा
प्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके विवक्षणे न वाच्यं ज्ञेयत्वादित्यादावव्याप्तिवारणाद् व्याप्यवृत्तित्वानिवेशनमनुचि
तमिति वाच्यम्· वह्नित्वेन घटाभावमादाय वह्निमान् धूमादित्यादावव्याप्तिवारकसाध्याभावपदवैयर्थ्यापत्तेरिति· न[illegible]
लक्षणाविवक्षणीयस्य साध्यतावच्छेदकसम्बन्धेन स्वसमानाधिकरणस्वावच्छेदकधर्मावच्छिन्नाधिकरणायावृत्तं

[illegible]

अत्र गगनपत्रिकोक्तरीत्या सामान्याभावनिवेशेपि वह्नित्वेन तादृशी। तादृशोभयाभावमादायाव्याप्तिदुर्वारत्वात् इति न दूषणम्। यस्त्विमि... सदवच्छेदकंय... धूमि... त्वनिवेशे साध्यनिष्ठ... द्वैयर्थ्यप्रसङ्गादिति वाच्यम्, वस्तुतो वह्नित्वेन वह्न्यभावमादायाव्याप्तिदुर्वारतापत्तिरेव ध्येयम् ॥ ॥ ॥

धिकरणीकाभावत्वः प्रतियोगितात्वं तदन्यप्रतियोगितानवच्छेदकत्वस्याविवक्षितत्वात् वाच्यं ज्ञेयत्वादित्यत्राव्याप्तिः। न चास्य साध्य
पदवैयर्थ्यमिति वाच्यम्। तादृशविशेषणस्य गुरुतया निवेशायितुमशक्यत्वात्। अथ समनियताभावैक्यमते हेतुसमानाधिकरणाभावीय
साध्यनिष्ठप्रतियोगितानवच्छेदकत्वविवक्षणे नेव घटत्वेन वह्न्यभावस्य वह्नित्वेन घटाभावस्यापि तदीयसाध्यनिष्ठप्रतियोगितानवच्छेदकत्व
स्य साध्यतावच्छेदके सत्त्वादव्याप्त्यभावात् उक्तलक्षणानुगमस्याभिमतत्वादिति चेत् न विवक्षितव्याप्यधर्मितत्वस्य तत्तदभावपर्यवसिततया व्याप्य
धर्मिहेतुमत्यभावप्रतियोगितावच्छेदकत्वाभाववत्त्वस्य व्याप्तिघटकत्वे व्याहन्ति यो धूमस्तत्र घटाद्यभावानिरूपितसाध्यनिष्ठप्रतियोगि
त्वाप्रसिद्ध्या वह्निमान् धूमादित्यादावव्याप्तिरिति। व्याप्यधर्मितया तल्लक्षणाघटकस्य प्रयोगिसत्त्वादित्यत आह व्याप्तिमात्रं कथं वक्ष्यमाणप्रति
योगितावच्छेदकानतिरिक्तवृत्तित्वमेव हेतौ विवक्षितमिति पर्यवसितार्थमाह तथा चेति। हेतुसमानाधिकरणाभावीययत्सम्बन्धावच्छिन्नप्रतियो
गितायाः सामानाधिकरण्येनानवच्छेदकं यद्धर्मविशिष्टसम्बन्धावच्छिन्ननिष्ठाभावीयतत्सम्बन्धावच्छिन्नप्रतियोगितायाः सामानाधिकरण्य
नानवच्छेदकं तद्धर्मव्यापकाधिकावच्छेदकमित्यादिना अथ तद्धर्मस्य साध्याभावाघटितत्वात् हेतौ लक्षणाभिप्रायकस्तु वाच्यग्रन्थः। प्रथ

मूलक्षणस्य हेतुसमानाधिकरणस्य साध्याभावप्रतियोगितावच्छेदकं यद्धर्मविशिष्टसम्बन्धिनिष्ठाभावीयप्रतियोगितायाः सामानाधिकर
ण्येनानवच्छेदकं तद्वत्पारिभाषिकमित्यर्थः तथा चेन्धनत्वेन वह्न्यभावप्रतियोगितावच्छेदकौ यत इन्धनत्वस्य वह्नित्वविशिष्टसम्बन्धि
निष्ठाभावप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकत्वमनिवेश्य यद्धर्मविशिष्टसम्बन्धिनिष्ठाभावीयप्रतियोगितासमानाधिकरणप्रतियो
गितानवच्छेदकत्वस्य तन्निष्ठाभावप्रतियोगितावच्छेदके विवक्षणीयत्वात् तथा च वह्नित्वविशिष्टसम्बन्धिनिष्ठाभावीयवह्नित्वसमाना
धिकरणप्रतियोगितावच्छेदकत्वस्य इन्धनत्वे सत्त्वात् न तादृशाभावमादायाव्याप्तिः वह्निमान् धूमादित्यादौ हेतुसमानाधिकरणाभावप्रति
योगितानवच्छेदकत्वान्नोक्तावच्छेदकाप्रसिद्धिरिति तादृशसाध्याभावप्रतियोगितानवच्छेदकयद्धर्मविशिष्टसम्बन्धिनिष्ठाभावीयप्र
तियोगितायाः सामानाधिकरण्येनानवच्छेदकत्वमिति यद्धर्मविशिष्टसामानाधिकरण्यस्य विवक्षणान्नाव्याप्तिरिति वदन्ति ॥६९॥ सा
ध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यावच्छेदकेत्यादेरस्यानया कालः प्रमेयवानित्यादावतिव्याप्तिरित्यत जगदीशः ॥७०॥ नच
यावदन्तस्य व्यभिचारनिरूपकाधिकरणान्यत्वाभावस्य कालिकसम्बन्धेन धूमाधिकरणायोगोलकादौ विग्रहधरणात्तयाघ्रत्या धूम

गत

परेतुप्रतियोगिकरणताविशिष्टान्यसाध्यसामान्याभावनिवेशे धूमवान्वह्नेरित्यादौ नातिव्याप्तिः यन्निष्ठस्य स्वाविशेषणतानिरूपकतावत्वमधिकरणत्वमित्यादौ [illegible] सम्बन्धेन स्वसमानाधिकरणतानिरूपकत्वविशिष्टस्य
वच्छेदकसम्बन्धावच्छिन्नस्वावच्छेदकतानिरूपकतानिरूपितत्वसम्बन्धेन स्वनिरूपकत्वम् तथाचमहाकालेधूमसम्बन्धिताप्यधिकरणताविशिष्टाऽस्त्येव धूमाधिकरणतायाः निरूपकसम्बन्धेन तत्रसत्त्वादिति तथाच
यस्येवसम्बन्धेन [illegible] चित्तत्त्वाचिताऽधिकरणतातत्राधिकरणतेवाधिकरणताविशिष्टान्या तादात्म्यसंबन्धेनसम्बन्धितानुसन्धेयैव निरूपितसम्बन्धेनाधिकरणताविशिष्टान्याऽप्रसिद्धेरित्यादि

[illegible]

वान्वह्नेरित्यत्रातिव्याप्तिस्त्वेवस्थलान्तरानुधावनमनुचितमितिवाच्यम् जन्यमात्रस्यकालोपाधित्वानभ्युपगमात् नचतथापिमात्यतावच्छेदकसंयोगसंबन्धेनधूमाधिक
रणमहाकालादेकालिकसम्बन्धेनतादृशाभावप्रसिद्ध्यसम्भवे प्रसिद्धस्यतत्त्वान्नातिव्याप्तिसम्भवेसामानाधिकरण्यघटकधूमनिष्ठावच्छेदकीभूतदैशिकविशेषणतास
वन्हिनिष्ठार्थकालः प्रमेयत्वादित्याद्यनुधावनमनुचितमितिवाच्यम् तत्यानियामकसम्बन्धेन व्याप्यव्यापकभावानभ्युपगमात् संयोगसम्बन्धेनधूमाधिकरणत्वस्यम
हाकालेऽभावाद्धूमवान्वह्नेरित्यत्रातिव्याप्तिसम्भवात् अतएवहेत्वधिकरणत्वनिष्ठातावच्छेदकरणतानिरूपकसम्बन्धेनयाहेत्वधिकरणकालः कालेपरिमाणादित्यादौ
कालत्वमनुचितमिति अधेयतावच्छेदकसम्बन्धेनहेत्वधिकरणत्वानिवेशसमवायनहेत्वधिकरणधूमावयवादौवर्त्तमानस्यवन्ह्याद्यभावस्यसाध्यसामाना
धिकरण्यविरहाद्धूमान्धूमादित्यादौ चाव्याप्तिसम्भवे अयमात्माज्ञानादित्यादिपर्यन्तानुधावनमनुचितमितिविभावनीयम् ०॥ यत्समानाधिकरणसाध्याभाव
प्रमाभासाध्यवत्ताज्ञानप्रतिबन्धकत्वनास्तितत्तामितिप्रगल्भलक्षणेसमानाधिकरणरीत्यर्थः प्रमाणभासरणमितिजगदीशः तदर्थश्चयत्स्वावच्छिन्नवाह्
श्यकसाध्याभावप्रमाणान्यसाध्यवत्ताज्ञानप्रतिबन्धकत्वनास्तितत्त्वमवत्त्वम् अथात्मपक्षावच्छिन्नावच्छेदकताकविधेय[illegible]ताकसाध्याभावप्रमासामान्य
स्यनुक्तपक्षधर्मावच्छिन्नवाह्यविशेष्यकसत्त्ववतानाधर्मावच्छिन्नवाह्यविशेष्यकप्रमासत्त्वएकसाधनतमुपादानमात्रचेन्न पक्षमुद्राप्रतिबन्धकतायामव्याप्यधर्मे
लक्षणस्योजकत्वमताभिप्रायेणसंयोगवान्संयोगाभावादित्यत्रातिव्याप्तिः संयोगाभावधर्मितावच्छेदकसंयोगवत्त्वानिश्चयस्यानाहार्यस्याप्रसि
द्धत्वादिति अतएवनिरवच्छिन्नविषयतयासाध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकसम्बन्धेनहेत्वधिकरणवृत्तित्वमभावेऽनैवंदृश्यप्रमायास्त्वयमेवनिवे

सत्वविशेषेवयामतएववह्निमान्धूमादित्यादावव्याप्तिसम्भवः अयमात्माज्ञानादित्यादौ तस्यसत्त्वेऽसत्त्वेचोभयथाऽव्याप्तिः साध्याधिकरणेआत्मनिकेनापिसम्बन्धेनात्माभावस्यासत्त्वादिति एतत्
कालादेरपिसम्बन्धेनास्वीकारादितिमते भवद्भिन्नमूलकत्वस्यधूमावयवेऽसत्त्वात्कालादितिआक्षेपः अपरेतुनिरोधाव्याप्तिलक्षणाभिप्रायेणेदम् यत्तधूमावयवेवह्नि[illegible]तत्तन्नत्वसाध्याभावोजस्ता

[illegible]

१४

न च तथापि वाच्यत्वं ज्ञेयत्वादित्यत्र हेतुमन्निष्ठविशेष्यताभिन्नत्वाप्रसिद्ध्याऽव्याप्तिरिति चेन्न· हेतुमन्निष्ठत्व किञ्चित्त्वावच्छिन्नलोभयाभाववृत्तियाः साध्यतावच्छेदकावच्छिन्नाभावत्वावच्छिन्नप्रकारतानिरूपितविशेष्यतातदनिरूप-
कत्वस्यानिवेशात्· निरवच्छिन्नतादृशविशेष्यताया प्रसिद्धत्वात्· न च धूममानो दृष्टान्तः· वह्निहृदयज्ञेनेत्यादिसावात्मकवह्नित्वेन घटमावत्वान् साध्यवत्ताज्ञानप्रतिबन्धकत्वादव्याप्तिरिति वाच्यम् असमानप्रकारकादित्व-
ज्ञानस्य प्रतिबन्धकतानभ्युपगमस्य दृष्टान्तत्वेनाभावकत्वात्·५

च्छिन्नम्· एतेन यत्त्वित्यादिना हेतुत्ववह्निमद्विशेष्यकसाध्यवत्ताज्ञानप्रतिबन्धकत्वाभावघटितलक्षणासंगतं कथम्· हेतुमन्मात्रवृत्तिधर्मा वह्निमद्विशेष्यकसा-
ध्यवत्ताज्ञानप्रतिबन्धकत्वाभावघटितेतरलक्षणमनुचितमिति परास्तम्· अथ हेत्वधिकरणवृत्तित्वस्य प्रमाविशेष्यतात्वे पर्वतो वह्निमान् धूमादित्यादव्-
याप्तिः· हेतुमद्विशेष्यकधूमवांश्च ह्रदत्वेन घटाभाववांश्च घटाभाववांश्च ह्रद इत्याकारकसमूहालम्बनप्रमायाः साध्यवत्ताज्ञानप्रतिबन्धकत्वादिति चेन्न· हे-
तुमन्निष्ठविशेष्यताभिन्नसाध्याभावत्वावच्छिन्नप्रकारतानिरूपितविशेष्यतानिरूपकत्वस्य प्रमाविशेषणत्वेन विवक्षितत्वादिति· तथा च हेतुमन्निष्ठवि-
शेष्यताभिन्नसाध्याभावत्वावच्छिन्नप्रकारतानिरूपितह्रदत्वावच्छिन्नविशेष्यतानिरूपकत्वाभावस्य तादृशप्रमायां सत्त्वेन नाव्याप्तिः· केचित्तु ह्रदत्वाव-
च्छिन्नविशेष्यतानिरूपितसाध्याभावावच्छिन्नप्रमीयप्रकारतासामान्ये साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकत्वाभावघटितलक्षणावधारणा-
नोक्तसमूहालम्बनबाधमादायाव्याप्तिरित्याहुः· तन्न· महानसीयधूमभावप्रकारकज्ञानस्य समवायेन धूमो भवप्रकारकज्ञानस्य च तादृशसम्ब-
न्धेन तादृशसाध्यवत्ताज्ञानप्रतिबन्धकत्वेन वह्निमान् धूमादित्यादावव्याप्तिवारणाय साध्यवत्ताज्ञानपदेन साध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मा-
वच्छिन्नप्रकारताशालिज्ञानं विवक्षणीयमित्याहुरन्यथाऽसङ्गतेः· अथ पर्वतीयधूमनिष्ठत्वादिव्याप्यत्वेऽप्येतिप्रसङ्गः· न व्यापकत्वप्रतियोगित्वेऽ· नचै-
केनापि सम्बन्धेनेति विवक्षणीयत्वात् साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वस्य च तत्साध्यतावच्छेदकतावच्छेदकत्वेनापि विवक्षणीयत्वान्महा-
नसीयधूमाभावस्य समवायेन धूमाभावस्य लक्षणाघटकतया समवायेन धूमाभाववान् महानसीयधूमाभाववांश्चेत्यादायाव्याप्तिवारणाय साध्यवत्ताज्ञा-

नपदेनसाध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रकारताशालिज्ञानविवक्षणमेवानुचितमितिचेन्न·धूमवान्वह्नित्वेनघटाभाव
नमहानसीयवह्न्यभाववानस्त्वित्याकारकसमूहालम्बनज्ञानस्यानुमितिप्रतिबन्धकतयातमादायैवाव्याप्तिवारणायतन्निवेशस्यावश्यकत्वात्·नचविवक्षितविशेष्यतानिरूपित
साध्याभावत्वावच्छिन्नप्रकारतासामान्येसाध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकत्वाभावविवक्षणेनेदृशाम अस्येच्छतसाध्यतावच्छेदकधर्मसम्बन्धेनेतिवाच्यम·वह्नित्वेनघ
टाभावप्रमायावह्निमद्भेदोभयव्याप्यवत्ताप्रतिबन्धकतयावह्निमान्धूमादित्यादावव्याप्तिरतस्तद्वारणायसाध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नत्वस्यावश्यंनिवेश
नीयतयासाध्यवत्ताज्ञानीयप्रकारतायाःसाध्यतावच्छेदकतासमानावच्छिन्नत्वविशेषणस्यैवचक्रवर्त्तिलक्षणसामानाधिकरण्यघटकस्यव्यधिकरणधर्मावच्छिन्नस्यापि·
प्रमेयवान्महाकालत्वादित्यादौतादृशविशेषणस्यचव्यधिकरणधर्मावच्छिन्नाभावस्याग्राहकत्वेनप्रतियोगितायांव्यापकताघटकसम्बन्धावच्छिन्नत्वस्यानिवेशात्त
मन्नियताभावानामैक्यमतेवह्नित्वेनघटाभावस्यस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभावाभिन्नतयापर्वतःस्वरूपेणवह्न्यभाववानितिज्ञानीयप्रकारताया
अपिनिरुक्तसाध्याभावत्वावच्छिन्नप्रकारतासामान्यान्तर्गतत्वेनतत्रस्वरूपसम्बन्धेनवह्निमत्ताज्ञानप्रतिबन्धकतावच्छेदकत्वसम्भवाच्च·तथाचैवाव्याप्तिवारणायसा
ध्यतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशस्यावश्यकत्वादितिध्येयम·वस्तुतस्तुव्यधिकरणधर्मावच्छिन्नाभावस्याग्रहार्थंसाध्याभावप्रतियोगितायांव्यापकत्वघटक
सम्बन्धावच्छिन्नत्वस्यावश्यंनिवेशेस्वरूपसम्बन्धेनप्रमेयत्वादेःसाध्यतावच्छेदकावच्छिन्नव्यापकतयाप्रमेयत्वेनस्वरूपसम्बन्धेनवह्न्यभावस्यापिनिरुक्त
साध्याभाववत्तयातदीयप्रमाप्रमेयत्वेनवह्निमत्ताज्ञानप्रतिबन्धकतावच्छेदकतयाप्रमेयवह्निमान्धूमादित्यादावव्याप्तिरतस्तद्वारणायसाध्यतावच्छेदकस

१५

न्धेन सखण्डवन्नाशानां विक्षूणायिमिति ध्येयम्· अथात्र साध्यतावच्छेदकसम्बन्धेन स्वरूपेण च साध्यवन्नानिवेशो समवायावच्छिन्नवह्न्यभावप्रमायां महानसीयवह्न्यभावप्रमा
चादाया व्याप्तिरुक्ता जगदीशेन· तन्न युज्यते· सर्वत्रैवासम्बन्धावान्तरावच्छिन्नधर्मी न्तरावच्छिन्नसाध्याभावप्रकारकप्रमामादाया सम्भवस्यैव वक्तुमुचितत्वादिति चेन्न·
विशेष्यस्वरूपेण सम्बन्धत्वस्य घटत्वभयामकसम्बन्धेन व्याप्यव्यापकभावानभ्युपगमात् प्रमेयवान् घटत्वादित्यादावेव लक्षणगमनात्· तत्र हेतुमन्निष्ठाव्यक्तसम्ब
न्धान्तरावच्छिन्नसाध्यसामान्याभावप्रकारकप्रमाया धर्मिग्राहकत्वात्· न च तथापि साध्यतावच्छेदकधर्मस्यानिवेशे व्याप्तिकथनमनुचितम् तत्राप्रवेशे ऽस
म्भवसम्भवात् इति वाच्यम्· तदप्रवेशे ऽसम्भवसम्भवस्योभयव्याप्तिनिदानायां व्याप्तिकथनस्योचितत्वादिति ध्येयम्· ८· । साध्याभाववद्वृत्ति यत्प्रकृतानुमिति
विरोधित्वं नास्ति तत्प्रगल्भमते तीयलक्षणसारस्यं यो न्नवृत्तित्वविषयतासामान्येन प्रकृतानुमितिप्रतिबन्धकज्ञानानतिरिक्तवृत्तित्वाभावस्यैवोक्तत्वादि
ति जगदीशः· न चात्र यन्निष्ठवृत्तित्वविषयतासामान्येन प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्तित्वाभावस्यैव सम्यक्त्वे साध्याभाववतीत्यस्य वैयर्थ्यमि
ति वाच्यम्· वह्नित्वावच्छिन्नप्रतियोगिताकघटाभाववद्वह्निसामान्याभावं चावगाह्य वह्निसामान्याभाववद्वृत्तिर्धूम इत्याकारकज्ञानीयधूमादिनिष्ठवृत्तित्वविष
यित्वस्यानिरुक्तविषयित्वसामान्यान्तर्गतस्यानुमितिप्रतिबन्धकतानतिरिक्तवृत्तिभिन्नत्वाभावाद्वह्निमान्धूमादित्यत्राव्याप्तिसमुद्धारणाय यन्निष्ठवृत्ति
त्वमित्यर्थो वाच्य इति । तथा च वह्निनिष्ठवृत्तित्वपर्याप्तावच्छेदकताकविषयितासामान्यस्य च धूमसाध्यकानुमितिप्रतिबन्धकतानतिरिक्तवृत्तिभि
न्नत्वेन धूमवान्वह्नेरित्यत्रातिव्याप्तिसमुद्धरणाय साध्याभाववतीत्यस्य सामर्थ्यात्· अथात्र यन्निष्ठसाध्याभाववद्वृत्तित्वविषयतासामान्येन प्रकृतानुमि

तिप्रतिबन्धकतानतिरिक्तधर्मितत्वमित्युक्तावेव सामंजस्ये निवेशपदोपादानमनतिप्रयोजनकमिति न च वह्नित्वेन घटाभाववद्वह्निधूमकालीनधूमो वह्निसामान्याभावव
द्वृत्तिरित्याकारकज्ञानीयधूमनिष्ठवह्नित्वेन घटाभाववद्वृत्तित्वविषयिताया अपि निरुक्तविषयितासामान्यान्तर्गतत्वेन तस्य प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तत्व
नियतविरहात् वह्निमान् धूमादित्यादौ व्याप्तिरतस्फुरणानाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयवृत्तित्वविशिष्टयद्रूपावच्छिन्नविषयिताव्यापकं प्रकृता
नुमितिप्रतिबन्धकत्वं तद्रूपावच्छिन्नविषयितात्वाभिन्नं यन्निष्ठसाध्याभाववद्वृत्तित्वविशिष्टविषयितासामान्यान्तर्गतत्वमित्यर्थकेनाभावघटितत्वाद्‌वात सामर्थ्यमिति वा
च्यम् सद्धेतुस्थले निरुक्तयद्रूपस्याप्रसिद्ध्या तादृशाविनाशायाप्यव्याप्तितादवस्थ्या। इति चेदेवम् उक्तव्याप्तिवारणाय न तद्व्यपदेन प्रकृतलक्षणस्य यद्रू
पावच्छिन्नविषयितासामान्ये प्रकृतानुमितिप्रतिबन्धकताभून्यूनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयाघटिततद्रूपावच्छिन्नविषयिताभिन्नयन्निष्ठसा
ध्याभाववद्वृत्तित्वविषयितासामान्यान्तर्गतत्वमित्यर्थकनयाप्तान्साथक्यादिति सद्धेतुस्थले तु संयोगि संयोगाभाववानित्याकारकज्ञानस्यानियताहार्यतया
सर्वत्रैव यद्रूपपदेन संयोगाभावविशिष्टसंयोगत्ववत्त्वस्य धर्मव्यतया यद्रूपावच्छिन्नविषयिताभिन्नत्वं च साध्याभाववद्वृत्तित्वविषयितामात्रस्येव सत्वा
न्नमादाय लक्षणसमन्वयः धूमवान् वह्नेरित्यादौ निर्धूमधर्मित्वाभाववान् वह्निर्निर्धूमधर्मित्याकारको हार्यज्ञाने वह्निर्निर्धूमधर्मिवृत्तिर्न वा इदं ज्ञानमप्रमा
इत्यप्रामाण्यज्ञानाविशिष्टज्ञाने एवं वह्निर्निर्धूमधर्मिर्न वा इति संशये च निर्धूमधर्मित्वविशिष्टवह्नित्वावच्छिन्नविषयत्वस्य धर्मित्वेन यद्रूपपदेन निर्धूम
धर्मित्वविशिष्टवह्नित्वस्य धर्तुमशक्यत्वादिति व्याप्तिरतस्फुरणाया नाहार्याप्रामाण्यज्ञानानास्कन्दितत्वस्य निश्चयत्वस्य चानिवेशः न चात्रैक

५
२६

त्ये साध्याभाववदित्यस्य वैयर्थ्यमिति वाच्यम् । यद्रूपपदेन संयुक्तत्वाभावविशिष्टवह्नित्वेन घटाभाववत्संयुक्तत्वस्य वर्ण्यव्यतया संयुक्तत्वाभाववद्धू
मो वह्नित्वेन घटाभाववद्वृत्तिरित्याकारकानाहार्यज्ञानीययद्रूपावच्छिन्नविषयताभिन्नत्वस्य धूमनिष्ठधर्मिताविषयतासामान्ये सत्त्वाद्वह्निमान्धू
मादित्यादावव्याप्तिरतस्तद्रूपस्यायोक्तरीत्या पर्याप्तिनिवेशे धूमवान्वह्नेरित्यादावतिव्याप्तिवारकत्वान्न सामर्थ्यमिति ध्येयम् । तथा च साध्याभा
ववन्निरूपितयन्निष्ठधर्मिताविषयतासामान्यप्रयुक्तानुमितिप्रतिबन्धकतायाः स्वरूपसम्बन्धरूपत्वावच्छेदकताभाववद्वृत्त्यस्यैव सम्यक्त्वे न
तिरिक्तधर्मितानिवेशनं व्यर्थमिति । न च धूमो वह्निमान्धूमादित्यादौ वह्नित्वेन घटाभाववद्वृत्तित्वयान्वस्य भाववान् वह्नित्वेन घटाभाववद्वृत्तित्ववा
न्धूम इति निश्चयस्य ज्ञानविशिष्टज्ञानत्वेन प्रतिबन्धकतया वह्नित्वेन घटाभाववद्वृत्तित्वविषयतायां धूमनिष्ठायां धूमधर्मिकवह्निमत्ता
धीप्रतिबन्धकतावच्छेदकत्वसत्त्वादव्याप्तिरिति वाच्यम् । अनुमितित्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वविवक्षण
मेव तद्दोषवारणासंभवात् । न चानुमितौ साध्याभाववद्वृत्तित्वज्ञानस्य साक्षात्प्रतिबन्धकतया साध्याभाववद्वृत्तित्वावच्छेदकत्वेन गृहीतधर्मव
त्ताज्ञानस्य प्रतिबन्धकत्वे युक्तिसहम् । तथा चोक्तस्थले वह्नित्वेन घटाभाववद्वृत्तित्ववान् वह्न्यभाववन्निरूपितधर्मितावान् वह्नित्वेन घटाभा
ववद्वृत्तित्ववांश्च धूम इत्याकारकनिश्चयस्य ज्ञानविशिष्टज्ञानत्वेन प्रतिबन्धकत्वेन घटाभावनिरूपितधर्मिताविषयतायां धूमनिष्ठायाव

स्यानुमितिप्रतिबन्धकतावच्छेदकत्वसत्त्वादव्याप्तिरिति धान्यं ग्रामे नेत्रीच्छानवच्छिन्नप्रतिबन्धकतानिवेशेनैव तद्वारणादिति चेन्न वह्निधूमवान् ध्वनित्ववह्न्यभावकोलि
नेवह्निरित्यादौ विनिगमकाप्रसिद्ध्या धूमाभाववद्धर्मिध्वनित्ववह्न्यभाववत्कालीनवह्निरित्यादावतिव्याप्तेः तद्धूमाभाववद्ध्वनित्ववह्न्यभाववत्कालीनवह्निरित्यस्य
३८ व्यभिचारितया ध्याने नेत्रीच्छानवच्छिन्नप्रतिबन्धकत्वात् तन्मात्राभावादिति ध्येयम् यावन्तः साध्याभावाः प्रत्येकं तत्तत्सजातीया यत्तत्तदधिकरणध्वनित्वाभावास्त
द्वृत्तित्वाभावस्यैतादृशध्वनित्वाभाववत्त्वविवक्षितत्वोरक्षाय परैरुक्तिर्जगदीशाः तन्न सङ्गच्छते हेतुतावच्छेदकविशिष्टहेत्वधिकरणध्वनित्वस्य साध्याभावविशेषण
तेसज्जातीयाधिकरणधर्मावच्छिन्नसाध्याभावस्य वह्निनिरूपणाय प्रकततया तादृशाभाववदभावसजातीयव्याधिकरणधर्मावच्छिन्नतत्तदधिकरणध्वनित्वाभावस्य च हेतौ
सत्त्वेनाव्याप्तिवारणाय प्रत्येकपदस्य तत्तत्पदस्य वैयर्थ्यात् न च हेत्वधिकरणध्वनित्वस्य साध्याभावविशेषणत्वप्रत्येकपदं तु सत्यन्तञ्चानुपादेयमिति वाच्यम् तथा स
ति व्यभिचारस्थानुरोधेन साध्यसामान्याभावप्रसिद्धिनिरूपकत्वाभावात् साध्याभावसजातीयतदधिकरणध्वनित्वाभावस्याप्रसिद्ध्यैवातिव्याप्यसत्त्वेन तथापि धूमवान् वह्नि
रित्यत्र नातिव्याप्तिदानमसङ्गतमिति चेन्न धूमत्वादिसामान्यधर्मावच्छिन्नाधिकरणतायामानाभावेन धूमत्वावच्छिन्नाधिकरणाप्रसिद्ध्या वह्निमान् धूमादित्या
दावव्याप्तिवारणाय हेत्वधिकरणपदेन हेतुतावच्छेदकधर्मावच्छिन्नाधिकरणतानवच्छेदकत्वस्याधिकरणतावच्छेदकत्वस्य चोभयाभाववत्त्वार्थकत्वे धूमवान् विवक्षणी
यम् तथा च ह्रदादेरपि तत्तद्धूमाधिकरणतया तत्र ध्वनिवह्निसामान्याभावस्य वह्नित्वेन यत्नाभावसजातीयतादृशध्वनित्वाभावाप्रसिद्ध्यावाप्तेः निर्धूमध्वनित्वसा

मान्याभावस्यापि महानसीयवह्नौ सत्त्वादित्यादिग्रन्थेनातिव्याप्तिमभिधानात्तत्तु ·निरिति विभावनीयम् ॥०॥ यद्वा व्यापकता साध्याभावाः प्रत्येकं तेषां सजातीयस्य व्यापकी
भूतस्य व्याप्यतावच्छेदकाभावस्य प्रतियोगितावच्छेदकधूमत्वरूपा वह्निं प्रति व्यापकत्वमवच्छिद्यते तद्रूपवत्त्वमिति द्वितीयलक्षणार्थः धूमवान्वह्नेरित्यादावव्या
प्तिः तादृशाभावस्य धूमसामान्याभावत्वात्तत्त्वविरहादिति जगदीशाः न चात्र लक्षणे स्वसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वमधिकरणधर्मावच्छिन्न
प्रतियोगिकत्वान्यतररूपेण सजातीयविशेषणेपि [illegible] कल्पसंज्ञाकेदितासम्भवस्यासत्त्वात् धूमे चातिप्रसक्तिव्याप्तिवारणासम्भवाच्च तादृशसजातीयत्वावच्छेदेन
स्यौचित्येन प्रागुक्तचैत्रमैत्रादिद्वयोरननुगमाभावत्वेनेदन्त्वोत्पन्नत्वरूपस्तास्तज्जाति विवक्षणमनुचितमिति वाच्यम् तथा सति व्यापकीभूतस्य व्याप्यधर्मान्तरस्य
स्य तद्वैयर्थ्यापत्तेः धूमवान्वह्नेरित्यादौ धूमाद्यभावसाधारण्यस्य सत्त्वाद्वह्निसप्रतियोगिताकत्वेनास्य धूमाभावादावसत्त्वे न धूमाद्यभावसजातीयत्व धूमाभावमा
दायाव्याप्त्यसम्भवादिति न चैवं तथापि वह्नित्वस्य स्वसंयोगसम्बन्धेन प्रतियोगित्वाधिकरणवह्निमान्नास्तीत्यभावप्रतियोगितानवच्छेदकत्वेन सम्बन्धावच्छि
न्नाधेयतावच्छेदकत्वविरहेणाव्याप्त्यादिव्यापकतावच्छेदकत्वविरहात् तदवस्थातिव्याप्तिरिति वाच्यम् गौरवेणाचसम्बन्धावच्छिन्नाधेयतावच्छेदकत्वस्यास
व्यापकतायामनिवेशनादिति ध्येयम् अथात्र संयोगेन वह्निमत्त्वस्य धूमाभावसत्त्वात् यत्त्वे प्रतिवद्धप्रमाणाभयाभावघटितव्याप्यधर्मित्वावरकादवताद
णाभावस्य धनुमत्त्वादिना नतमाद्यातिव्याप्त्यभिधानमनुचितमिति चेत् न पूर्वोक्तलक्षणानुकूलतया यत्प्रतियोगिताकाभावत्वावच्छेदकसम्ब

न्त्वेन स्वसमानाधिकरणस्वावच्छेदकावच्छिन्नसामानाधिकरण्यवत्तदन्यप्रतियोगिताकत्वेनैव व्याप्यवृत्तित्वमित्यभिप्राये सति व्याप्त्यभि
धानात् यत्प्रतियोगिताकाभावस्यावच्छेदकावच्छिन्नसामानाधिकरण्यव्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वमेतदुभयवत्त्वात्तदन्यप्रतियो
गित्वमेव व्याप्यवृत्तितानिरूपकमिति प्रतियोगिनास्वत्वसमनभ्यवधानेऽकृत्वादिति । एतेन गुरुधर्मस्याभावप्रतियोगितावच्छेदकत्वानभ्युपग
मे केवलान्वयिनि स्वावच्छेदकावच्छिन्नसामानाधिकरण्यव्यधिकरणधर्मावच्छिन्नाभावाभिन्नत्वोभयाभावाप्रसिद्ध्या व्याप्तिः सामानाधि
करण्यमात्रघटितोभयत्वस्यैव तादृशाभावप्रतियोगितावच्छेदकत्वादित्याधुः प्रत्युक्तम् । केचित्तु स्वसमनियताभावानामैक्यमते संयोग
सम्बन्धावच्छिन्नद्रव्यत्वाभावस्य द्रव्यत्वत्वेन घटाभाववत्तया तस्य च धूमादिसामान्याभावसजातीयस्य यद्धर्मेण व्याप्यवृत्तितानिरूपकीभू
तपटनिष्ठप्रतियोगितावच्छेदकेन द्रव्यत्वेन व्याप्तिनावृत्त्यादिकं प्रति व्यापकत्वादिति व्याप्तिः स्यादतस्तद्वारणाय प्रागभावादिशेषवत्सजातीयत्वाय
मित्याहुः । अन्ये त्वित्यादि कल्पनापर्यन्तं द्रव्यत्वस्य व्यभिचारान्नोक्तदोष इति जगदीशः । अथासत्ताव्याप्याभावव्यापकेनावच्छेदकत्वमपहाय समाना
धिकरणाभिन्नत्वोक्तौ धूमाभावरूपस्य व्यापकतान्यत्वाद्घटाभावरूपस्य च साध्याभावस्य सजातीयसमानाधिकरणे सत्तारूपे भावेऽव्यापनमेव
द्रव्यान्यत्वाविशिष्टसत्त्वाभाववत्त्वावच्छिन्नप्रतियोगिताकाभावत्वात् स्वरूपतत्प्रतियोगितावच्छेदकीभूतद्रव्यान्यत्वाविशिष्टसत्त्वाभावादिनाव्याप्ति

५
१६
१८

व्यापकतयाऽवच्छेदकंकरीत्या धूमवान्वह्नेरित्यत्रातिव्याप्तिसम्भवे स्थलान्तरानुसरणमनुचितमिति चेत् अत्र केचित् गुणान्यत्वविशिष्टसत्तावान् द्रव्यान्यत्वविशिष्टसत्ताभाववान्द्रव्यत्वादित्यस्योपलक्षणत्वाद्धूमवान्वह्नेरित्यत्रातिव्याप्तिर्भवत्येवेत्याहुः परे तु साध्याभावसजातीयस्य साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकताकप्रतियोगिताकत्वेनावश्यकीयत्वात् धूमवान्वह्नेरित्यादौ द्रव्यत्वमत्सत्ताद्यभाववत्त्वावच्छिन्नाभावस्य तथात्वे तत्साध्याव्याप्यसम्भवात्स्थलान्तरानुधावनमित्याहुः अत्र यावन्तः साध्याभावाः प्रत्येकं तत्तत्सजातीयनिरूपितयद्रूपावच्छिन्नप्रतियोगिताकाभाववत्त्वं तत्तत्साध्याभावाधिकरणनिष्ठभिन्नतावच्छेदकाभावोपवातिव्याप्तिवारणसम्भवे व्यापकतावच्छेदकत्वनिवेशनमनुचितमिति विभावनीयम् अथात्र द्रव्यान्यत्वविशिष्टसत्ताभावत्वावच्छिन्नप्रतियोगिताकाभावत्वस्य साध्याभावसमानाधिकरणधर्मित्वेपि द्रव्यान्यत्वविशिष्टसत्तारूपस्य तादृशाभावस्य सत्तातोतिरिक्ततया सप्रतियोगिकाभावे स्वावच्छेदकावच्छिन्नसामानाधिकरण्यव्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वेनान्याभावः तादृशप्रतियोगिताकत्वरूपव्याप्यधर्मित्वविरहेण लक्षणघटकतया तस्मादव्याप्तिव्याप्तिसम्भवे साध्याभावसमानाधिकरणधर्मित्वमात्रोक्तावपि साध्याभावस्य व्यापकतावच्छेदकत्वप्रवेशो व्यर्थ इति

न चाभावेऽन्यथाभावमपहाय यत्प्रतियोगितानिरूपितानुयोगितया: स्वावच्छेदकावच्छिन्नाधिकरणवृत्तितावच्छेदकत्वं व्यधिकरणधर्मावच्छिन्नप्रतियोगितानिरूपित
त्वोभयाभावस्तादृशप्रतियोगिताकत्वमेव व्याप्यवृत्तित्वमस्यम् घटाभावभिन्नघटत्वादिस्थले तद्द्रव्यान्यत्वविशिष्टसत्ताभावाभावप्रसिद्धेस्सम्भवतीति वाच्यम् अ
ति व्याप्तिघटनार्थतादृशव्याप्यवृत्तित्वनिवेशस्यानौचित्यादिति व्यावृत्तिलेन पूर्वतात्पर्यभावमादाय वह्निमान्धूमादित्यादावव्याप्तिवारणाय साध्याभावेऽपि व्याप्यवृत्तित्वमेव
रूपम: व्याप्यवृत्तित्वं न प्रागुक्तं व्याप्यवृत्तित्वप्रायम् अन्यथा घटाभावभिन्नं अभाववानात्मत्वादित्यादौ अभावे घटाभावस्याधिकरणस्वरूपसत्तेऽतिव्याप्तिरिति अथात्र घट
भावभिन्नं पटत्वादित्यादावव्याप्तिवारणाय सजातीयाभावेऽपि व्याप्यवृत्तित्वानिवेशरूपमतावजगदीशातिव्याप्तिसङ्गतिरिति ध्येयम् परन्तु वृत्तिमत्त्वं ज्ञेयायावर्न्न:
साध्याभाववद्वृत्तित्वाभावास्तत्त्वमिति शिरोमणिः न चैवमपि व्यधिकरणधर्मावच्छिन्नद्रव्यत्वाभाववद्वृत्तित्वेन घटवृत्तित्व जातित्वान्यतररूपवत्त्वस्य
घटभेदाभावमादाय द्रव्यं पृथिवीत्वादित्यादावव्याप्तिरिति वाच्यम् हेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तिताभिन्नाधेयत्वेनापि प्रतियोगितया विशेषणीय
त्वादिति जगदीशाः अथात्राप्येतदभावपर्यन्तानुधावनं स्यात् एवंलक्षणे सामान्यधर्मेण विशेषाभावमनभिप्रेत्य तदभ्युपगमेनतु सर्वत्र व्यधिकरणधर्माव
च्छिन्नसाध्याभाववद्वृत्तित्वेन हेतुनिष्ठवृत्तित्वमादायैतल्लक्षणस्यासम्भवापत्तेः स्वावच्छिन्नत्वस्वन्यूनवृत्तित्वस्वव्याप्यत्वोभयसम्बन्धेनधर्मविशिष्टा
न्यप्रतियोगित्वविवक्षणेनायं दोष इति ध्येयम् न च तथापि व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वेन स्वानिष्ठवृत्तित्वगगनान्यतराद्यभावमादा

१९

यल्लक्षणस्यासंभवसंभवे कथमव्याप्तिरिति जगदीशेन निर्वाच्यम्· पार्थिवत्वादिवृत्तियोगिकसमवायसम्बन्धेन हेतुतायां द्रव्यं पृथिवीत्वादित्यादावेव लक्षणगमनात्
तत्रैकेन सम्बन्धेन हेतौ तद्धर्मिमत्त्यापातकृतियावदभावस्याप्रसिद्धत्वात्· यत्स्वाश्रयवृत्तित्वेन ध्वनित्वसामान्याभावमादायासम्भव उक्तः· तदपि विशेषसंकेतेन
ससर्गत्वमनभ्युपेत्य प्रतियोगिकत्वाधमावच्छिन्नसाध्याभाववत्तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताया जगत्त्वरूपतया तादात्म्येन प्रमेयहेतौ लक्षणगमनान्नासंभव
इत्यपि वदन्ति· अथ तत्रापि व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्त्वघटितत्वेन पर्वतवृत्तित्वजातिवाव्यतराभावमादाय वह्निमान् धूमादित्यादावव्याप्ति
संभवे द्रव्यं पृथिवीत्वादित्यादावपर्यन्तानुधावनमनुचितमिति चेन्न· हेतुतावच्छेदकीभूतसंयोगसम्बन्धावच्छिन्नधूमवृत्तित्वस्य संयोगसम्बन्धेनाव्याप्यवृत्तितया
तत्प्रतियोगिताभावस्य धूमादौ सत्वेन तत्राव्याप्तिविरहात्· न चैवं धूमवान् वह्नेरित्यत्रातिव्याप्तिरिति वाच्यम्· महानसीयवह्न्यादावुत्पाद्यत्वादिदोषस्य तुल्यत्वेन पर्याये
तादृशाभावे तत्राप्यतिव्याप्तिविरहात् सौलभ्यम्· केचित्तु वह्निमान् धूमादित्यादौ स्वत्वसमवायेन रूपसाधनस्य यथात्वहेतुकप्रसिद्धस्थले प्रदेवातत्र कुठारघटितमवच्छे
येषा वह्निमान्धूमादित्यत्र हेतुतावच्छेदकीभूतसंयोगसम्बन्धेनावच्छेदकीभूततादृशैकत्वावच्छिन्नाभाववत्स्य गुणादौ द्रव्यं पृथिवीत्वादित्यत्र चावि
वच्छेदकीभूतस्पर्शादिप्रत्येकाभाववत्त्वावच्छिन्नाभावकूटस्य ज्ञानत्वादावधिकरणासत्त्वान्न दुष्प्रसिद्धिर्निबन्धनाऽव्याप्तिः· उक्तस्थलेऽवच्छे
दकद्वयनाप्यपेक्षितमिति ग्रन्थकृतेवोक्तमित्याहुः· अथ प्रतियोगितायां हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वघटितत्वाभिन्नाघटितत्वेन विचारणीयं

त्वेपि साध्याभाववद्वृत्तित्वेन घटवृत्तित्वतदन्यवृत्तित्वोभयाभावमादाय अव्याप्तिर्दुर्वारैवेति चेन्न· सार्वभौममतेऽभ्युपगम्य तस्यैकविशिष्टापरत्वेनाविशिष्टस्यातिरिक्ततया भावस्य धर्मभेदाकल्पनात्· अथवा नाऽत्र वृत्तिताभिन्ना वृत्तित्वेन सव्यासज्यवृत्तिधर्मानात्मकत्वेनापि प्रतियोगिताविशेषणीयत्वादित्याहुः· उक्ताभावीयप्रतियोगिकस्य प्रतियोग्यनारोपकारीभूतादृत्वस्वरूपत्वादिति· एतेन तादात्म्येन प्रमेयहेतुकस्थले साध्याभाववद्वृत्तित्वेन यावन्तोऽन्योन्याभावमादाय लक्षणासमन्वयसंभवेन तत्राव्याप्तिवारणाय केचिदित्यादिना वक्ष्यमाणनिषेधद्वयप्रवेशाव्यावृत्तिदानमसङ्गतमिति निरस्तम्· उक्ताभाववारकिञ्चिद्विशेषणस्यावश्यकत्वादित्यवधेयम्· अन्ये तु वृत्तिमत्त्वसो यावन्तः साध्याभाववद्वृत्त्यधिकरणवृत्तित्वाभावासहत्त्वमिति शिरोमणिः· अत्र प्रतियोगिताप्रतिव्यापकत्वं साध्यताघटकसम्बन्धेन ग्राह्यम्· तेन नित्यज्ञानवत्तादात्म्येन साध्यतायामीश्वरत्वादिहेतौ घटान्यभेदस्य च व्याप्तिविषयतासम्बन्धेन प्रतियोगिता व्यापकीभूतनित्यज्ञानकयोः साध्यतावच्छेदकव्यापकप्रतियोगिताकयावदधिकरणाप्रसिद्धत्वेऽपि नाव्याप्तिः· द्रव्यत्वप्रकारकप्रमाविषयत्वादित्यत्र पृथिव्यादौ साधनसमानाधिकरणस्य पृथिव्यादिनवद्रव्यारणप्रत्येकाभिन्नभेदकूटाधिकरणगुणादौ सत्तोः सत्वेपि अतिव्याप्तिरिति जगदीशाः· अथात्र प्रागुक्तरीत्या नापि घटान्यभेदपटान्यभेदस्यापि कूटान्तर्गततया तद्घटितकूटाधिकरणाप्रसिद्ध्यैव नातिव्याप्तिः·

१९
१०

कश्चित्तु द्रव्यानुयोगिकतादात्म्येन नित्यज्ञानवतः साध्यतायां तात्पर्यान्न दोषः· साध्यतावच्छेदकद्रव्यानुयोगिकतादात्म्येन पक्षस्य पृथिवीभिन्नद्रव्यगुणादिमत्त्वेऽस्पृश्यत्वादिसत्त्वादिति प्राहुः· ५

न च साध्यतावच्छेदकसम्बन्धेन स्वप्रतियोगितावच्छेदकविशिष्टसाध्यवत्ताग्रहविरोधिताघटकसम्बन्धेन धर्मिमत्त्वं अभावस्य प्रागुक्ततया घटान्यभेदादे स्तादृशसम्बन्धेनावर्त्तमानत्वेन लक्षणाघटकत्वम्· अतस्तत्र प्रागुक्ताव्याप्तिमपहायातिव्याप्त्यभिधानमपि सङ्गच्छते इति वाच्यम्· पृथिवीभिन्नद्रव्यगुणान्यतरभेदजलभिन्नद्रव्यकर्मान्यतरभेदतेजोभिन्नद्रव्यसामान्यान्यतरभेदादीनामपि तादृशत्वेन तद्घटितकृत्स्नाधिकरणाप्रसिद्धेरेवातिव्याप्त्यभिधानासङ्गतिरिति चेन्न· तादात्म्येन नित्यज्ञानविशिष्टस्य समवायेन साध्यतायां द्रव्यत्वप्रकारकप्रमाविषयत्वादिहेतौ साधनसमानाधिकरणघटासमवेताभावपटासमवेताभावघटितकृत्स्नाधिकरणजातमादाय सत्त्वेनाव्याप्तेरेव तद्दूषणतयोचितत्वादिति ध्येयम्· ननु यावतामर्थः सामानाधिकरण्यं तावतां समुदायो विवक्षितः· किं वा यावत्साध्याभाववदन्तरसामानाधिकरण्यं तत्समुदायो विवक्षितः· प्रथम इत्यादि इति जगदीशः· अत्र प्रथमकल्पे स्वघटितसाध्याभाववत्त्वव्यापकयदधिकरणघटितत्वं तदधिकरणघटितसाध्याभाववत्त्वव्यापकत्वं यस्याः यथा यावत्तावदन्यान्यतमघटितत्वः यत्किंचिदेकघटितसाध्याभाववत्त्वव्यापकसमुदायत्वावच्छिन्नसमानाधिकरणसाध्याभाववत्त्वव्यापकसमुदायत्वावच्छिन्नाधिकरणतावत्त्वं सामान्यतः समुदायलक्षणवाक्यस्य पर्यवसितार्थः· अन्यतमत्वं च तदधिकरणघटितधर्मशून्यत्वम् एतेन केवलान्वयिन्यप्रसिद्धिः· अग्रेदमितिपोधिव्याविशेषणानपक्षाने

देशाः तथा च नीलघटत्वपृथिवीत्वपटत्वद्रव्यत्वादीनां तयोर्मिथः सामानाधिकरण्यापन्नसाध्याभावाधिकरणतद्वृत्तितद्धर्मसत्वादेव वायुत्वादिहेतावतिव्याप्त्य नुपपत्तेरिति जगदीशाः । न च कपिसंयोगसत्वादित्यादावतिव्याप्तिवारणाय साध्याभावाधिकरणतायां निरवच्छिन्नत्वस्य निवेशनीयत्वात् कपिसंयोगाभाववान् मूलत्वादित्यादावव्याप्तिवारणाय यत्र साध्याभावोपि व्याप्यवृत्तित्वेनैव विवक्षणीयः तथा च एकत्वव्यक्तेरव्याप्यवृत्तित्वाभावेन लक्षणघटकत्वमिति वाच्यम् प्राचीनमते हि द्वित्वादिनिष्ठद्वित्वप्रागभावकालावच्छेदेन तदत्यन्ताभावासत्वात् साधिकरणयत्किञ्चिद्व्यक्तिनिष्ठाभावाप्रतियोगित्वरूपव्याप्यवृत्तित्वस्य द्वित्वादेरपि सत्वात् न च व्यक्तमतानुसारेण तत्स्थले परित्यज्य सत्तान्यत्वपृथिवीसमवेतत्वस्य रसादिस्थलानुसरणेनानुधावनं कृतम् तथा च पृथिवीसमवेतत्वावच्छिन्नाभावाप्रसिद्ध्या द्रव्यत्वस्यैव तदवच्छेदकत्वादिति वाच्यम् सकलद्रव्यवृत्तित्वादिघटितस्य द्रव्यत्वस्य तादृशासमवेतत्वापेक्षया गुरुतया अनवच्छेदकत्वादिति जगदीशाः ॥ अत्रेयमापत्तिः अथात्र द्रव्यत्वत्वस्य च तादृशासमवेतत्वापेक्षया गुरुत्वेपि द्रव्यासमवेतत्वस्य लघुत्वेन सत्तान्यत्वपृथिवीसमवेताभावीयप्रतियोगितावच्छेदकत्वसंभवात् सत्तान्यत्वपृथिवीसमवेतत्वावच्छिन्नाभावस्याप्रसिद्धत्वेन तादृशाभावसाध्यकव्यभिचारिण्यतिप्रसङ्गदानमनुचितमिति ध्येयम् । न च पर्वतवृत्तित्वपर्वतान्यवृत्तित्वोभयत्वावच्छिन्नाभावमादाय अव्याप्तिवारणार्थं व्याप्यवृत्तिधर्मानवच्छिन्नत्वेन प्रतियोगिता अवश्यं विशेषणीया इति । अत एव वृत्तित्वालोकान्यत्वोभयाभावस्योदासात् तादृशावृत्तित्वेन प्रतियोगितावच्छेदकत्वस्योपादानं विफलमिति वाच्यम् पर्वतवृत्तित्वपर्वतान्यवृत्तित्वोभयत्वावच्छि

२ अत्र प्रमात्वस्य सत्तानिष्ठप्रकारताघटकत्वे द्रव्यत्वान्तत्वाद्यवगमिति । न च तादृशाभावप्रतियोगितावच्छेदकत्वादेव द्रव्यत्वनिष्ठप्रकारत्वमिति वाच्यम् प्रकारत्वस्याव्याप्यवृत्तित्वमते नैतत्स्योपपत्तेः परे तु सत्तानिष्ठतत्प्रकारितास्य निरवच्छिन्नत्वा
न स्वीकार्य पक्षतान्यत्वप्रतियोगितावच्छेदके न तथात्वात् द्रव्यान्यसमवेतत्वम् तादृशाभावप्रतियोगितावच्छेदकमिति च तादृशाभावप्रतियोगितावच्छेदकत्वेनापवादकद्रव्यनिष्ठतत्प्रकारितेनास्य अपादानं [illegible] नातिव्याप्तिरिति वाच्यम्

[illegible] वत्वनिष्ठधर्मावच्छेदकत्वं न स्वीकार्यं वदन्ति मतसामान्य [illegible]

चाभाववारणाय वह्नित्वपर्याप्त्यासज्यवृत्तिधर्मानवच्छिन्नत्वेन प्रतियोगिताया वक्तव्यत्वान्नादृशप्रतियोगिताकत्वस्य वह्नित्वालोकान्यत्वोभयाभावेऽपि सत्त्वादिति
जगदीशाः॰ न चात्र व्यासज्यवृत्तिधर्मस्य वह्नित्वपर्याप्तत्वविशेषणवैयर्थ्यमिति वाच्यम् तस्याखण्डाभावघटकतया सार्थक्यात् न च वह्नित्वपर्याप्त्यासज्यवृ
त्तिधर्मानवच्छिन्नत्वेन प्रतियोगिताविशेषणेऽपि तत्साध्याभाववद्वृत्तितया पर्वते वह्नित्वपर्वतान्यत्वोभयाभावमादाय अव्याप्तितादवस्थ्यमिति वा
च्यम्॰ तत्प्रतियोगिताकाभावस्य वच्छेदकावच्छिन्नसामानाधिकरण्ये व्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वोभयाभावः वह्नित्वपर्याप्त्यासज्यवृत्ति
धर्मानवच्छिन्नतादृशप्रतियोगिताया अवच्छेदकत्वात् अथ तादृशव्यासज्यवृत्तिधर्मानवच्छिन्नत्वपदेन तादात्म्यसम्बन्धेन तादृशव्यासज्यवृत्तिध
र्मविशिष्टान्यत्वस्य विवक्षणात् तदा संयुक्ताभावप्रतियोगित्वस्य प्रतियोग्यंशप्रकारीभूततादृशधर्मस्वरूपत्वादिति ध्येयम्॰ अथात्र सर्वत्र हेतुतावच्छे
दकावच्छिन्ने वह्नित्वतदन्यवह्नित्वोभयाभावमादायासम्भवसम्भवे अव्याप्तिवारणार्थं व्यासज्यवृत्तिधर्मानवच्छिन्नत्वेन प्रतियोगिताविशेषणीयेति क
थमुक्तं जगदीशेन असम्भववारणायेत्यस्यैव वक्तुमुचितत्वादिति॰ मैवम्॰ तत्कृमीयसंयोगसम्बन्धेन धूमहेतुकस्थले तादृशसम्बन्धेन यो वह्निमान् तद्वृ
त्तियावदभावस्य हेतौ सत्त्वेन लक्षणगमनादिति ध्येयम्॰ अत्र केचित्॰ सार्वभौमसत्तासामानाधिकरण्यस्याव्याप्यवृत्तिमत्स्वरूपकालावच्छे
देन घटादाववृत्तिमति वर्तमानस्य महाकाले वृत्तित्वसामान्याभावस्य पर्याप्त्यधिकरणावच्छेदेन हेतावसत्त्वात् महाकालान्यापक्षादित्यादौ नातिव्याप्तिः॰
परेतु तादात्म्येन प्रमेयहेतुकस्थले तद्वह्नित्वतदन्यवह्नित्वोभयाभावप्रतियोगितावच्छेदकत्वस्य बाधवत्ता नद्वह्निता तेकल्पनीयतया तादृशाभावस्य लक्षणाघटकत्वात् तद्धर्मस्य प्रतियोगितावच्छेदकत्वात् तदलक्षणगमनान्नासंभवः

सामान्यनिरुक्तिः २

हेनाव २

वह्निमद्वृत्तियोयावन्तस्तादृशवह्नित्वाभावायावत्त्वाधिकरणावच्छेदेन महत्त्वस्य विवक्षितत्वादित्याहुः इति जगदीशाः अथात्र कल्पे वह्निमान्धूमादित्यादावव्याप्तिः धूमावयवावच्छेदेन साध्याभाववत्संयुक्तत्वसामान्याभावस्य वह्निमति धूमादावप्रसिद्धस्य हेत्वधिकरणावच्छेदेन सत्त्वात् न च हेतुतावच्छेदकसम्बन्धेन यत्किञ्चिद्धेत्वधिकरणावच्छेदेन साध्याभाववद्वृत्तिवह्नित्वाभावस्य विवक्षणीयत्वेन तादृशवह्नित्वाभावो न लक्षणघटक इति वाच्यम् धूमान्तरसंयुक्तस्वावयवावच्छेदेन वह्निमति यत्किञ्चिद्धूमेप्रसिद्धस्य तादृशवह्नित्वसामान्याभावस्य यावत्त्वाधिकरणावच्छेदेन हेतावसत्वात्तथाव्याप्तिरिति चेदत्र नवीनाः हेतुतावच्छेदकसम्बन्धेन यत्त्वाधिकरणतदवच्छेदेन वर्तमानहेतुसमानाधिकरणसाध्याभावसमुदायाधिकरणवह्नित्वाभावत्वाभावायावत्त्वाधिकरणावच्छेदेन हेतोर्महत्त्वस्य विवक्षितत्वान्न दोषः स्वपदं वह्निमत्त्वेनाभिमतपरमित्याहुः केचित्तु स्वानुयोग्यधिकरणावच्छिन्नाधिकरणतातदन्यहेत्वधिकरणावच्छिन्नाधिकरणताकत्वेन तादृशसाध्याभावसमुदायाधिकरणवह्नित्वाभावस्य विवक्षणीयत्वात्तादृशाभावस्य लक्षणाघटकत्वात्तमादाय न दोषः स्वानुयोग्यनधिकरणत्वं हेतुतावच्छेदकसम्बन्धेन ग्राह्यम् स्वपदं तादृशसाध्याभावसमुदायाधिकरणवह्नित्वाभावाधिकरणतापरमित्याहुः अथात्र लक्षणे घटत्वविशिष्टवाच्यत्वघटान्यघटत्वविशिष्टवाच्यत्वाभावमादाय घटो वाच्यो ज्ञेयत्वादित्यत्राव्याप्तिः तादृशसाध्याभावघटितत्वाधिकरणाप्रसिद्धेः न चाविशिष्टस्यातिरिक्तत्वमतेनाविशिष्टाभावस्य साध्यतानवच्छेदकसमनियतप्रतियोगिताकत्वाभावादव्याप्तिप्रसङ्ग इति वाच्यम् तथा सति घ

यावद्

द्भेदतदन्यप्रमेयत्वतदुभयाभावघटितकृत्स्नाधिकरणाप्रसिद्ध्या प्रमेयवान् वाच्यत्वादित्यत्राव्याप्तेर्वारत्वात् · न चोभयत्वमेकविशिष्टापरत्वमेवेति वाच्यम् तथा सति घटत्वा
लोकान्यत्वोभयाभावमादाय तादृशाद्यभिलात्वस्तित्वप्रतियोगिताव्यापकत्वदलव्यावृत्तिदानासङ्गतिरिति चेन्न · साध्यतावच्छेदकसमनियतप्रतियोगिताया
स्वन्यूनवृत्तिधूमानवच्छिन्नत्वस्य स्वयमेव निवि[illegible] तयास्वन्यूनवृत्तिपदेन स्वावच्छिन्नाधिकरणसाध्याधिकरणनिष्ठभेदप्रतियोगितावच्छेदकत्वस्यासमा
नाधिकरणधर्मस्य विवक्षितत्वाद्वोक्ताभावव्युदासात् · साध्याधिकरणत्वनिवेशाच्च वह्निधूमोभयवान् वह्नेरित्यादावुभयाभावादेः सङ्ग्राह्यतया नातिव्याप्तिरिति च व
स्तुतस्तु अदस्वरसेनैव एतल्लक्षणमपहाय परे तत्त्यादिना लक्षणान्तरमनुधावन्तितम् · अतएव परे तु लक्षणे साध्याभावे साध्यव्यापकतावच्छेदकरूपावच्छि
न्नप्रतियोगिताकत्वनिवेशो वा वह्निमान् धूमादित्यत्रैवाव्याप्तिसम्भवे तत्सम्प्रहाय वाच्यं ज्ञेयत्वादिति · सत्तावान् द्रव्यत्वादित्येकव्यक्तिकसाध्यके नगर्थस्यास्याव्याप्ति
दानमपि सङ्गच्छत इति ध्येयम् · अत्र च हेत्वधिकरणायात्के द्रव्यत्वोक्तकोटौ घटकविशेषणतया कृतस्य वर्त्तमानत्वमेव हेतुसामानाधिकरण्य[illegible] तेन
पृथिवीद्रव्यत्वप्रकारकप्रमाविषयत्वादित्यादौ जलत्वतेजस्त्वस्य च साधनसमानाधिकरणजलाधृत्यभावस्य तेजोवृत्त्यभावस्य च उक्तरूपावच्छिन्नप्रतियो
गिताकत्वतदुभयघटितकृत्स्नाधिकरणजात्यादौ हेतोर्भिन्नत्वेऽपि नातिव्याप्तिः · हेत्वधिकरणजलादिवृत्त्येकनिष्ठस्य नाश्याकृत्स्न तदधिकरणजलादौ हेतोः स
त्त्वादिति जगदीशाः अत्रेयमनुपपत्तिः · अथात्र साधनसमानाधिकरणस्य विपक्षीभूततत्तद्व्यक्तिभेदाभावस्यापि साध्यव्यापकतावच्छेदकरूपावच्छिन्न

२३

अस्यानुगमस्तु संसर्गतावच्छेदकविशिष्टहेतुतावच्छेदकवत्त्वम् हेतुतावच्छेदकवैशिष्ट्यञ्च स्वाधिकरणीभूताभावप्रतियोगित्वसम्बन्धेन स्वाधिकरणत्व अस्वनिष्ठाभावत्वावच्छिन्नानुयोगिताकपर्याप्तिकक त्वसम्बन्धेन अभावे स्ववैशिष्ट्यञ्च स्वावच्छिन्नसंसर्गताकप्रतियोगिताकत्वस्वावच्छिन्नसंसर्गताकप्रकृतसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वस्वकालीनहेतुमत्त्वनिरूपितप्रतियोगितासम्बन्धेन स्वं संसर्गतावच्छेदकरूपकूटवत्त्वस्वावच्छिन्नाधिकरणताप्रतियोगितात्वसमनियतप्रतियोगिताकत्वस्वकालीनहेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तिमत्त्वोभयसम्बन्धेन स्वव्यापकत्वे अभावप्रतियोगित्वस्वसामानाधिकरण्यसम्बन्धेन स्वहेतुतावच्छेद (कामिति विषयः ॥)

प्रतियोगिताकत्वानन्तर्भावे तत्कूटाधिकरणाप्रसिद्ध्यैवातिव्याप्तिसंभवे तद्वारक हेत्वधिकरणयत्किंचिद्व्यक्तिदैशिकविशेषणतया वर्त्तमानत्वमित्यादिविशेषणवैयर्थ्यमितिचेदत्र केचित् साध्यतावच्छेदकसम्बन्धेन व्यापकत्वं तत्सम्बन्धावच्छिन्नप्रतियोगिताकत्वमभावविशेषणमित्यभिप्रायेणैतद्ग्रन्थसङ्गतिरित्याहुः तन्मन्दम् साध्यतावच्छेदकसम्बन्धेन साध्यव्यापकमित्यादिमात्रस्य ग्रन्थकृतैव प्रागुद्धितत्वादितिमैवम् यद्यत्सम्बन्धेन व्यापकत्वं तत्तत्सम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावकूटाधिकरणनिवेशापेक्षया लाघवेन साध्यव्यापकताघटकीभूतयत्किंचित्सम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावकूटवत्त्वं विवक्षितम् पृथिवीद्रव्यत्वप्रकारकप्रमाविषयत्वादित्यादौ साध्यव्यापकताघटकीभूतसमवायसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावकूटाधिकरणत्वाभावस्य हेतौ सत्त्वेनातिव्याप्तिरतो हेत्वधिकरणयत्किंचिद्व्यक्तिदैशिकविशेषणतया वर्त्तमानत्वं साध्याभावविशेषणत्वमिति ग्रन्थकृतामभिप्राय इति वयं समादधिमहे ॥ :०: ॥ ॥ इति कौलीनाकरी व्यधिकरणग्रन्थस्य ॥१०३॥ ॥

श्री
कालीशङ्करी ·

जगदीशभट्टाचार्यकृतव्यधिकरणव्याप्तिनिरूपणग्रन्थस्य
कालीशङ्करभट्टाचार्यकृताविवेचना
समाप्ता ·

४१३८

॥ सिद्धान्तलेशटीकाशंकरा ॥
॥ समाप्ते ॥

श्री ५ को सरकार
संस्कृत महाविद्यालय

श्रीगणेशाय नमः ॥ नन्वस्मिन्ग्रन्थेऽभाववन्नाशयवह्निमान्धूमादित्यादावव्याप्तिवारणायानवच्छेदकत्वानुसरणं । तद्दीधितिकारेण तन्न
सङ्गच्छते रूपवान्पृथिवीत्वादित्यादावव्याप्तिवारणाय रूपमवच्छेदकतायाः साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वस्य निवेशस्यावश्यकत्वादिति । न चै
तत्कृत्स्ने प्रतियोगितावच्छेदकताघटकसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नभिन्नत्वस्य निवेशादव्याप्तिवारणसम्भवे प्रतियोगितावच्छेदकता
यां साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वं निवेशनीयमिति वाच्यम् । विषयितासमवायान्यतरसम्बन्धेन रूपत्वविशिष्टस्य साध्यतायां तदा
न्यपदान्यतरत्वादिहेतौ समवायेन रूपत्वविशिष्टाभावविषयितया रूपत्वविशिष्टाभाववत्तया व्याप्तिवारणाय तत्र प्रतियोगितावच्छेदकताघटकसं
सर्गतापर्याप्त्यधिकरणं यद्रूपं तद्रूपपर्याप्तावच्छेदकताकसंसर्गतावच्छेदकताकत्वस्याप्यवश्यं निवेशनीयत्वादिति चेन्न । यत्र वह्नित्वनिरूपितसमवायेन वह्
नित्वविशिष्टस्य साध्यता तत्र साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वाप्रसिद्ध्या धूमादिहेतावव्याप्तिवारणार्थं स्वानवच्छेदकसम्बन्धावच्छिन्नत्वस्य सामा
नाधिकरण्योभयसम्बन्धेन साध्यतावच्छेदकविशिष्टावच्छेदकत्वानिरूपितत्वस्य प्रतियोगितायां निवेशनीयत्वेन तादृशावच्छेदकत्वानिरूपकप्रतियोगिता

१

दि. टि. ह

कं न तत्र कपित्वावच्छिन्नाभावमादायाव्याप्तिसङ्गतिरिति · ननु यत्सम्बन्धावच्छिन्नत्ववाचकपदे न समन्यादिपदश्रुतिरित्यादिग्रन्थस्य प्रतियोगितावच्छेदकावच्छिन्नं
यद्भिन्नं भवति तेन समं सामानाधिकरण्यं इति वक्तुमुचितम् · ननु तन्निवेशे किं स्वीकरणीयम् · अनुयोग्यभावादिति चेत् प्रतियोगितावच्छेदकावच्छिन्नत्वा
वच्छेदेन यद्भिन्नत्वेन सामानाधिकरण्यं व्याप्तिरिति वक्तव्यम् · अन्यथा प्रतियोगितावच्छेदकघटत्वावच्छिन्नधूमभेदसत्वाद्धूमवान्वह्नेरित्यादावति
व्याप्तिः · न च तथाप्युभयभेदमादायाव्याप्तिरिति वाच्यम् · यत्र हेतुस्तत्सम्बन्धावच्छिन्नप्रतियोगिताकस्य विवक्षितत्वात् · तथा च प्रमेयवान् वाच्यत्वादित्या
दौ प्रमेयत्वावच्छिन्नप्रतियोगिताकभेदाप्रसिद्ध्याऽव्याप्तिरिति । ।प्रतियोग्यसमानाधिकरणेति · नोक्तलक्षणेन तत्र कपित्वावच्छिन्नाभावमा
दाय वह्निमान्धूमादित्यादावव्याप्तिमाशङ्क्यानवच्छेदकत्वं प्रकारान्तरेणोक्तं दीधितिकारेण · तन्न सङ्गच्छते · स्वप्रतियोगिकत्वस्वसामानाधिकरण्यो
भयसम्बन्धेन साध्यविशिष्टान्यत्वस्याभावे विशेषणत्वात् · धूमवान्वह्नेरित्यादावतिव्याप्तिवारणाय स्वसामानाधिकरण्यदलम् · वह्निमान्धूमादि
त्यादावव्याप्तिवारणाय स्वप्रतियोगिकत्वदलम् · न च यस्या महानसीयवह्निव्यक्तेः प्रतियोगिकत्वं तस्याः सामानाधिकरण्यविरहान्न तत्राति

तावच्छेदकसामानाधिकरण्यात् किञ्चिदवच्छिन्नावच्छिन्नभेदनिवेशेनाव्याप्तिवारणे विशुद्धविशेषणस्याप्रयोजकत्वादिति भावः ::

त्वावच्छिन्नाभावस्य लक्षणाघटकत्वेन तमादाय व्याप्तिमद्वस्त्वभिप्रायम् स्वप्रतियोगिकत्वपदेन स्वाश्रयप्रतियोगिकत्वस्य स्वसामानाधिकरण्यपदेन स्वाश्रयसा
मानाधिकरण्यस्योक्तत्वात् । न च कपिसंयोग्येतद्वृक्षत्वादित्यादौ कपिसंयोगाभावस्य लक्षणाघटकत्वात् संयोगी सत्त्वादित्यादौ गुणत्वावच्छिन्नाभावमादाया
तिव्याप्तिवारणाय । तथा च प्रतियोगिसामानाधिकरण्यपदवैयर्थ्यमिति वाच्यम् । प्रमेयवान् वाच्यत्वादित्यत्राभावसामान्यस्य प्रमेयत्वाश्रयप्रतियोगिकत्वप्रमेयत्वाश्रय
सामानाधिकरण्योभयसत्त्वेन लक्षणाघटकत्वादव्याप्तिवारणाय स्वसामानाधिकरण्यघटकीभूतवृत्तित्वस्य विशेषणतया विवक्षितत्वात् । कपिसंयोगाभाव
वान् मेयत्वादित्यादावव्याप्तिवारणाय तत्सार्थक्यात् । न च प्रतियोगिवैयधिकरण्यस्य स्वप्रतियोगितावच्छेदकसम्बन्धेन निवेश्य तथा संयोगादिनावृत्तिसाध्य
के धूमादित्यादौ वृत्त्यभावाभावमादायाव्याप्त्यभावात् स्वप्रतियोगिकत्वस्य वैयर्थ्यमिति वाच्यम् । वह्निमान् धूमादित्यादौ पर्वतावृत्तित्वावच्छिन्नाभावस्य तत्
पर्वतत्वरूपतया तस्य विशेषणविशेष्यसम्बन्धावच्छिन्नप्रतियोगित्वाविरहात् लक्षणाघटकत्वेन तमादायाव्याप्तिवारणाय साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियो
गिता निवेशनीया । तथा च साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकाभावसामान्यस्य भावानात्मकेन तया स्वाश्रयसामानाधिकरण्यसम्बन्धेन साध्यताव
च्छेदकविशिष्टतया तदन्याभावाप्रसिद्ध्याऽव्याप्तेरिति । न च समवायेन प्रमेयसाध्यकसत्त्वादिहेतौ साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकतादृशाभा

-नं॰ अभावो भेद इत्यादिना दोषाद्यभावाप्रसिद्धेः अव्याप्तेरुक्तत्वात् नैवम् घटत्वाभाववदभावान्यत्वान्तर्भवत्वादित्यादौ घटत्वघटत्वाभावप्रतियोगित्वस्य
साध्यत्वे नैव व्याप्तिरिति· नन्वेतद्दोषवारणाय नैव हेतुकानुसारेण नैकधाता मिति वाच्यम्· २

वाप्रसिद्धाः व्याप्तिवारणार्थं साध्यतावच्छेदकसम्बन्धेन साभान्वेयाद्यप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकत्वेत्यादि सम्बन्ध
धर्मिको ऽभयाभावादिलक्षणानुसरणे प्रतियोगितायां सम्बन्धविशेषस्यानिवेशनीयतया ऽभावानात्मकाभाववत्प्रदाया व्याप्तिवारणसम्भवे तद्वैयर
र्थ्यं दुर्वारमिति वाच्यम् अभाववान्मेयत्वादित्यादौ घटत्वाभावाभाववत्प्रदायाः ऽव्याप्तिरिति· ननु साध्याधिकरणवृत्तित्वगगनभिन्नत्वोभयाभा
ववि शिष्टहेत्वधिकरणवृत्त्यभावप्रतियोगितासूक्ष्मसाध्यसामानाधिकरण्यस्यैव सम्यक्त्वे नवच्छेदकानुसरणं व्यर्थमिति वाच्यम्· समवायेन
प्रमेयसाध्यकव्यभिचारिणि वाच्यत्वादि हेतावतिव्याप्तिवारणाय तद्वावश्यकत्वात्· साध्यवद्भिन्नत्वप्रतियोगिसम्बन्धग्रहे) असंभवस्थावारणाय
जगद्वृत्तिभिन्नत्वस्य व्यभिचारिण्यतिव्याप्तिवारणाय साध्यवद्भिन्नत्वस्योभयाभावप्रतियोगिकोटौ निवेशः· न च व्यधिकरणसम्बन्धेन साध्याभावस्य
जगद्वृत्तितया नाद्यराभावमादाय व्यभिचारिण्यपि व्याप्तिसम्भवे साध्यवद्भिन्नत्वस्य वैयर्थ्यमिति) विरोधिताघटकसम्बन्धेन वाच्यम्· तेन घटस्था
न वह्निरित्यादौ नातिव्याप्तिः· संयोगाभावस्य जगद्वृत्तितयोभयाभाववत्त्वेन तमादाया ऽव्याप्तिवारणाय प्रतियोगिवैयधिकरण्यस्य सार्थक
क्यम्· तदर्थञ्च साध्यतावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणो वाच्यः· प्रतियोगिता तु न सम्बन्धविशेषेणाभिवेशनीया· तथा च वह्निमान्

धूमादिस्थले स्वरूपसम्बन्धेन घटाद्यभावस्यादाय लक्षणसमन्वयः । एवं साध्यतावच्छेदकसम्बन्धसामान्यधर्मिकाभ्याभावघटितप्रतियोगिवैयधिकरण्यकल्पे च गगनाभावमादाय लक्षणसमन्वयः । एवम् संयोगी द्रव्यत्वादित्यादावव्याप्तिः सकलसंयोगस्यैव निरुक्तप्रतियोगिवैयधिकरण्यस्य केवलान्वयिनस्तु न संयोगाभावस्य प्रतियोगित्वादिति कृतम्पल्लवितेन । ।अथ निरवच्छिन्नविशेषणतासम्बन्धेन गगनवृत्तिभिन्नत्वस्य स्वप्रतियोगिमत्त्वग्रहविरोधिताघटकसम्बन्धेन साध्याधिकरणवृत्तित्वस्य योभयाभावविशिष्टहेत्वधिकरणवृत्त्यभावस्तत्प्रतियोगिताशून्यसाध्यसामानाधिकरण्यं कोमो कस्थलेऽव्याप्तिः तत्संयोगाभावस्य नादृशोभयाभाव[illegible]त्वाभावादिति । अनुगमस्तु स्वसमानकालीननिरवच्छिन्नविशेषणतानाविशेषसम्बन्धावच्छिन्नगगनवृत्तित्वावच्छिन्नस्वनिष्ठावच्छेदकताकभेदवत्त्वस्य प्रतियोगिमत्ताग्रहविरोधिताघटकसम्बन्धावच्छिन्नसाध्याधिकरणवृत्तित्वस्य तदुभयस्य वावच्छिन्नत्वस्वनिष्ठावच्छेदकताकभेदवत्त्वसम्बन्धेन यत्किञ्चिदभावविशिष्टहेत्वधिकरणवृत्तिर्योऽभावस्तत्प्रतियोगिताशून्यसाध्यसामानाधिकरण्यमिति समुदितार्थः । एवम् घटत्वाभावपटत्वाभावान्यतरवान् घटत्वपटत्वान्यतरत्वादित्यादौ कालिकसम्बन्धावच्छिन्नप्रतियोगिताकवाच्यत्वाभावः आमानुयोगिकस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकगगनाभावस्याभावस्य तदन्यतरस्य साध्यतायां प्रमेयत्वादिहेतौ व्याप्तिः सर्वस्यैव साध्यस्य प्रत्येकाभावस्य निरुक्तलक्षणघटकतया तत्प्रतियोगित्वादिति (यस्तु तस्य अधिकरणतेन घटत्वाभावमादायाव्याप्त्यापत्तेः प्रतियोगितायां साध्यतावच्छे

(टि[illegible]लीवन्) इत्योभयवत्त्वसम्बन्धेनाभावविशिष्टनिवेशेन तद्दोषवारणात् [illegible] ज्ञानिकेति । ३

तद्वत्त्वादिप्रत्येकाभाववत्त्वादावनातिव्याप्तिरीत्यर्थः महानसीयवह्निभिन्नवह्निमत्त्वे धूमादिव्यावृत्तिव्याप्तिरूपत्वेकाभावप्रसिद्धेभिन्नत्वाभावान्तः ५

दकसम्बन्धावच्छिन्नत्वं निवेश्यतया रत्नोऽपि नाद्यः एवं न प्रमेयत्वव्यापकस्थले ऽव्याप्तिश्चेयम् । महानसीयवह्निर्नास्तीत्याकारकप्रमितिविलसितत्वादित्यन्नं न साध्यः साध्यतावच्छेदकेतरपदं न साध्यतावच्छेदकतावच्छेदकरूपेणस्थानवच्छिन्नप्रकारतावच्छेदकत्वं विवक्षणीयम् अतो न प्रमेयवह्निधूमादित्यवच्छेदस्थानवच्छिन्नप्रकारत्वाप्रसिद्ध्यादिनाप्रसिद्धिः एवं च तज्जातिमत्त्वाभाववत्वादित्यत्राप्यव्याप्तिः । तथाहि जातिमदभावीयप्रतियोगिता या जातित्वरूपेण जात्यनवच्छिन्नघटो वा नेत्याकारकज्ञानीयसाध्यनिष्ठप्रकारतावच्छेदकं यद्घटत्वादिकं साध्यतावच्छेदकं तज्जातिमत्त्वमेतदुभयभिन्नावच्छेदकतानिरूपकत्वाज्जातिमदभावो न लक्षणघटकः किन्तु घटाद्यभाव एव तथा च तत्प्रतियोगितानवच्छेदकं जातिमत्त्वमेवमेवं साध्यतावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकीभूतधर्मविशिष्टधर्मावच्छिन्नानुयोगिकपर्याप्तिकावच्छेदकतानिरूपिका या प्रतियोगिता तदन्यप्रतियोगितानवच्छेदकत्वस्य विवक्षितत्वात् वैशिष्ट्यं च स्वाभाववद्वृत्तित्वस्वसमानाधिकरण्योभयसम्बन्धेन तथा च वह्निमान् धूमादित्यादौ महानसीयवह्न्यभावमादाय नाव्याप्तिरिति ध्येयम् वस्तुतस्तु स्वनिरूपितत्वस्वभिन्नप्रकृतलिङ्गमिति विधेयतावच्छेदकतापर्याप्त्यनुयोगितानवच्छेदकीभूतधर्मावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकतानिरूपितत्वएतदुभयसम्बन्धेनावच्छेदकताविशिष्टान्यस्याः प्रतियोगिताया अनवच्छेदकत्वस्य साध्यतावच्छेदके

ननु जातिमान् सत्त्वादित्यादौ घटत्वेन जातिरूपेण सद्भावमादायाव्याप्तिरित्यत आह वस्तुतस्त्विति

पिव वितासेव मेव प्रमेयसाध्यके नित्यदोनावत्तहेतुके [illegible] विशिष्टयत्नप्रत्यभावसाध्य लक्षणघटनार्थं सामानाधिकरण्यप्रवेशः ४

विवक्षितत्वान्न कोपि दोषः वह्निमान् धूमादित्यादौ महानसीयवह्नित्वभिन्नत्वविशिष्टजातिमदभावमादाय व्याप्तिवारणायावच्छेदकतायानिरवच्छिन्नत्वं
निवेशनीयमग्रे न न चात्र महानसीयवह्नित्वभिन्नत्वविशिष्टजातिमद्वह्निर्नास्तीतिप्रतीतिसिद्धाभावीयप्रतियोगितायानिरवच्छिन्नावच्छेदकत्वस्य सत्वात्
व्याप्तिताद्वस्थ्यमिति वाच्यम् अव्यावर्त्तकत्वेन तादृशप्रतीत्या वह्नित्वे निरवच्छिन्नावच्छेदकत्वानवगाहनात् अथवा स्वावच्छिन्नावच्छेदकताविशि
ष्टान्यत्वरूपनिरवच्छिन्नत्वमत्र विवक्षितम् वैशिष्ट्यं च स्वनिरूपकप्रतियोगितानिरूपितत्वस्वसामानाधिकरण्योभयसंबन्धेन ग्राह्यम् तथा च
वह्नित्वनिष्ठनिरवच्छिन्नावच्छेदकत्वस्यापि तादृशसम्बन्धेन स्वावच्छिन्नावच्छेदकताविशिष्टतया नाव्याप्तिरिति भावः वस्तुतस्तु स्वावच्छिन्नाव
च्छेदकतानिरूपकत्वमेव प्रतियोगितायां निरवच्छिन्नत्वमतो न तादृशाभावप्रतियोगितायां लक्षणघटकेति नाव्याप्तिरिति भावः न च स्वसाध्यता
वच्छेदकताद्वितयोभयानवच्छिन्नत्वमर्थः महानसीयवह्निप्रतियोगितायाः स्वावच्छिन्नावच्छेदकतानिरूपकत्वेन लक्षणाघटकत्वादिति वा
वाच्यम् तादृशाभावमादाय वह्निमान् धूमादित्यादावव्याप्तिप्रसङ्गात् यद्यपि तादृशाभावप्रतियोगितावच्छेदकत्वं तादृशजातेरेव स्वीक्रियते
लाघवात् न तु वह्नित्वे व्यावर्त्तकत्वात् तथापि कालोपजनतामितिप्रतीत्या कालिकसंबन्धेनोत्पादेः स्वरूपतो भानात् कालिकसम्बन्धेन ग्रहण

सामानाधिकरण्यावच्छिन्नसामान्याभावे

त्वविशिष्टस्य साध्यतावच्छेदकत्वादिहेतौ कालिकेन गगनत्वविशिष्टस्य तन्मात्रव्यापकस्य त्वविशिष्टस्य गगनत्ववच्छेदकस्याभावमादाय व्याप्तिवारणाय पुनस्तार्थ
प्रात् अत्रेयमापत्तिः - व्यभिचारिमात्रस्य सर्वस्यापि एवानिरुक्तलक्षणतया साध्यतावच्छेदकस्थलीयाभिरुक्ते एतद्गमात् व्यत्वात् त्यादौ वर्त्तिव्याप्ति
रिति चेन्न हेतुमन्निष्ठाभावप्रतियोगितायाः निरवच्छिन्नावच्छेदकत्वाभाववत्त्वे सति निरवच्छिन्नावच्छेदकताश्रयसाध्यतावच्छेदकावच्छिन्नसामानाधि
नं ३४ करण्यं व्याप्तिरिति सर्वं सुस्थम् । धर्मविशिष्टसाध्यतावच्छेदकस्थले हेतुमन्निष्ठाभावप्रतियोगितायाः साध्यतावच्छेदकतावच्छेदकनहितरोभयावच वच्छेदकता
च्छिन्नत्वनिवेशेऽपि द्रव्यत्वमान् द्रव्यसंयोगादित्यादौ न घटभिन्नत्वावच्छिन्नद्रव्यभिन्नावच्छेदकताकप्रतियोगिताकाभावमादाय व्याप्तिसम्भवेन
पत्त्यसम्भवेन हेतुमन्निष्ठरूपादित्यादिस्थलानुधावनफलं चेन्न न च साध्यतावच्छेदकतावच्छेदकेतरधर्मानवच्छिन्नत्वनिवेश एव तात्पर्यम् अन्यथा
जातिमत्त्वान् घटत्वादित्यादौ पदसमवेतत्वविशिष्टजातित्वप्रतीतिसाक्षिकपरसमवेतत्ववैशिष्ट्याभावानवच्छिन्नजातिभिन्नावच्छेदकताक
प्रतियोगिताकाभावमादाय व्याप्तितादवस्थ्यापत्तेः साध्यतावच्छेदकतापर्याप्त्यधिकरणसंयोगसम्बन्धावच्छिन्नहेतुमन्निष्ठाभावीयप्रतियोगितावच्छे
दकतायां साध्यतावच्छेदकतावच्छेदकेतरधर्मानवच्छिन्नत्वेन तादृशावच्छेदकत्वाप्रसिद्धेः । गगनत्वत्वरूपोपाध्यनिरुक्तस्वरूपतोऽभावेऽसामानाभावा

उ २ × तथा च नञ्घटितत्वावच्छिन्नदृश्यत्वावच्छेदकता[illegible]यां साध्यतावच्छेदकतावच्छेदकेतरधर्मानवच्छिन्नत्वेन तादृशाभावस्य लक्षणघटक
त्वान्नाव्याप्तिरिति तत्त्वम् । तथा च तदनवच्छिन्नत्वसङ्कीर्तनं इत्यादि स्वरूपसम्बन्धेन साध्यताकाभावापत्तेः ॥ २

न्. रूपत्ववत्वान्नरूपवान्न वायुः पृथिवीत्वादित्यादौ विषयितया रूपवत्त्वविशिष्टाभावमादाय व्याप्तिवारणाय। अवच्छेदकतायां साध्यतावच्छेदकताघटकसम्बन्धाव
च्छिन्नत्वनिवेशात्स्याद्वत्त्वपकत्वाद्रूपनिवेशे न तथा व्याप्तिवारणाय साध्यतावच्छेदकतानवच्छेदकेन धर्मेनावच्छिन्नावच्छेदकतायां साध्यतावच्छेदकताघटकसम्ब
न्धातिरिक्तसम्बन्धावच्छिन्नतत्साध्यतावच्छेदकनिष्ठत्वोभयाभाववद्विशिष्टत्वस्यानिवेशात्। यत्र तथा च रूपत्ववत्त्वात्पृथिवीत्वादित्यादौ विषयि
तासम्बन्धावच्छिन्नरूपत्वनिष्ठावच्छेदकताया अभावासत्त्वे विषयितया रूपत्वविशिष्टाभावस्य तत्स्वरूपघटकतान्याव्याप्तिः। संयोगेन धूमिमतः
त्पर्वतान्तस्वन्धेन साध्यतास्थले तु घटाभावो नद्राणां घटत्वः घटत्वनिष्ठावच्छेदकतायां साध्यतावच्छेदकनिष्ठत्वविरहेणोभयाभावस
त्त्वात्। ।रूपवान्पृथिवीत्वादित्यादौ विषयितयेत्यारभ्यानिवेशनीयमित्यन्तं जगदीशोक्तम्। ।अथैवमनुपपत्तिः कालिकसम्ब
न्धेन महानसानुयोगिकसंयोगविशिष्टस्य समवायेन वह्नित्वविशिष्टस्य वह्नेः संयोगेन साध्यतायां महानसादिहेतुः। समवायेन महानसानुयोगिकसंयो
गविशिष्टस्य कालिकेन वह्नित्वविशिष्टस्याभावस्य हेतुमन्निष्ठस्य प्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वाद्व्याप्तेरेवं विरोधस्य पर
संसर्गतासत्त्वे वह्नित्वप्रातियोगिकसमवायेन वह्नित्वस्य साध्यतावच्छेदकस्थले साध्यतावच्छेदकताघटकसंसर्गावच्छिन्नावच्छेदकताकहेतु

समानाधिकरणाभावाप्रसिद्धेर्व्याप्तिश्च न च पूर्वोक्तस्थले कालिकसम्बन्धेन महानसानुयोगिकसंयोगविशिष्टस्य समवायेन वह्नित्वविशिष्ट
स्य पर्वते सत्वात् । पूर्वोक्तनादृशाभावस्य प्रतियोगिव्यधिकरणत्वाभावादेव नाव्याप्तिरिति वाच्यम् । समवायेन महानसानुयोगिकसंयोगविशि
ष्टस्य कालिकसम्बन्धेन वह्नित्वविशिष्टस्य साध्यतायां धूमादिहेतावतिव्याप्तिभिया स्वानवच्छेदकसम्बन्धावच्छिन्नत्वस्वसामानाधिकरण्योभयसं
बन्धेन स्वप्रतियोगितावच्छेदकविशिष्टान्यत्वस्य प्रतियोगितावच्छेदकावच्छिन्नाधिकरणताघटकनिरूपकतायां निवेश्यत्वात् । न च तथापि का
लिकसम्बन्धेन वह्नित्वनिष्ठावच्छेदकतानिरूपिका सा तेन सम्बन्धेन महानसानुयोगिकसंयोगनिष्ठावच्छेदकतानिरूपिका याऽधिकरण
तानस्या अपि निरुक्तस्वप्रतियोगितावच्छेदकताविशिष्टान्यवह्नित्वनिष्ठकालिकसम्बन्धावच्छिन्नावच्छेदकताकनिरूपकतानिरूपितायाः
पर्वतादेस्सत्वात् प्रतियोगिव्यधिकरणत्वाभाव इति वाच्यम् । स्वानवच्छेदकसम्बन्धावच्छिन्नत्वस्वसामानाधिकरण्योभयसम्बन्धेन प्रतियो
गितावच्छेदकताविशिष्टावच्छेदकत्वानिरूपकत्वस्य प्रतियोगितावच्छेदकावच्छिन्नाधिकरणताघटकनिरूपकतायां प्रवेशनीयत्वात् । एवं
स्वानव[redacted]च्छेदकसम्बन्धावच्छिन्नत्वसामानाधिकरण्योभयसम्बन्धेन साध्यतावच्छेदकताविशिष्टा याऽवच्छेदकता तन्निरूपकत्वस्य प्रति

साध्यतावच्छेदकविशिष्टावच्छेद[redacted]दकत्वानिरूपकत्वानिवेशेपि तत्रैवातिव्याप्तिः तत्रघटत्वरूपा जातिस्वपदेनोपादाय तन्निष्ठजातित्वावच्छिन्नावच्छेद
कतानवच्छेदकसम्बन्धावच्छिन्नतन्निष्ठजातितावच्छिन्नावच्छेदकतासामानाधिकरण्योभयसम्बन्धेन × २
योगितायाश्च दोषसत्त्वेपि कालिकेन जातिविशिष्टस्य समवायेन धूमत्वविशिष्टस्य साध्यत्वे वह्न्यादिहेतावतिव्याप्तिः धूमत्वनिष्ठकालिकसम्बन्धा
वच्छिन्नायाः साध्यतावच्छेदकतानवच्छेदकसम्बन्धावच्छिन्नत्वतत्सामानाधिकरण्योभयसम्बन्धेन तद्विशिष्टप्रतियोगितावच्छेदकतानिरूपितत्वेन
साध्याभावस्थलेऽसङ्गाघटकत्वात् स्वनिष्ठसाध्यतावच्छेदकतानवच्छेदकसम्बन्धावच्छिन्नत्व —— —— सामानाधिकरण्योभयसम्बन्धेन घटत्ववत्व
स्वधूमत्वनिष्ठसमवायसम्बन्धावच्छिन्नावच्छेदकतायास्सत्वात् यदि जातित्वावच्छिन्नावच्छेदकतापि जातिभेदेन भिन्ना इति न घटत्वविशिष्टावच्छेदकतासा
मानाधिकरण्यं धूमत्व[redacted] निष्ठावच्छेदकताया इति न दोषस्तथापि समवायेन जा
तिविशिष्टस्य समवायेन वह्नित्वविशिष्टाभावसाध्यके यत्समवायेन जातिविशिष्टस्य कालिकेन वह्नित्वविशिष्टस्य साध्यतायां ह्रदत्वादिहेतावव्या
प्तिः समवायेन ज्ञानत्वत्वावच्छिन्नस्य विषयितया स्वरूपतो ज्ञानत्वस्य तत्र साध्यतावच्छेदकत्वं ज्ञानाभिन्नाकारकज्ञानत्वं वह्नि तत्र साध
नसमानाधिकरणस्य साध्यतावच्छेदकीभूततादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकस्य विषयितया ज्ञानत्वत्वविशिष्टवज्ज्ञान
भेदस्य निरूप्यकोभयसम्बन्धेन साध्यतावच्छेदकविशिष्टावच्छेदकत्वानिरूपकप्रतियोगितायामेवावच्छेदकत्वस्य साध्यतावच्छे
दकत्वात् तत्र हि तावव्याप्तिः न च स्वानवच्छेदकसम्बन्धावच्छिन्नत्वस्य स्वसमनियतत्वोभयसम्बन्धेन साध्यतावच्छेदकवैशिष्ट्यं निवे

ढिं ढि ढं

ण्यमतो न कोपि दोष इति वाच्यम् । कालिकेन धूमत्वविशिष्टस्य समवायेन धूमत्वविशिष्टस्य कालिकेन रूपत्वविशिष्टस्य समवायेन रूपत्वविशिष्टस्य वा यत्र साध्यता तत्र धूमत्ववद्धूमवान् वह्निरूपत्ववद्रूपवा ऽजलत्वादिन्वादौ वातिव्याप्यापत्तेरिति चेदत्र केचित् । स्वानवच्छेदकसम्बन्धावच्छिन्नत्वस्वसामानाधिकरण्योभयसजातीयत्वएतत्त्रितयसम्बन्धेन साध्यतावच्छेदकताविशिष्टप्रतियोगितावच्छेदकत्वानिरूपकत्वविशिष्टत्वेन न दोषः । साजात्यं च निरवच्छिन्नत्वकिंचिद्धर्मावच्छिन्नत्वान्यतररूपेणाविलक्षणतयाभासमानस्य धूमत्वादेश्चानेविधा साध्यतावच्छेदकत्वम्मानाभावात् । अतः कालिकेन स्वरूपतश्च धूमत्वस्य यत्र साध्यतावच्छेदकत्वं समवायेनच्च तथात्वं तत्र नातिव्याप्तिः । यत्र कालिकसमवायोभयसम्बन्धेन धूमत्वस्य साध्यतावच्छेदकत्वं तत्र दोषप्रसक्तिरेव नास्तीति ध्येयम् । सम्बन्धभेदेपि निरवच्छिन्नावच्छेदकताऽऽवैवेति हृदयम् । न च तथापि रूपत्ववत्वोन्पृथिवीत्वादित्यादौ विषयितया स्वरूपतो रूपत्वविशिष्टाभावमादाय व्याप्तिरिति वाच्यम् । एतत्त्रितयसम्बन्धेन साध्यतावच्छेदकताविशिष्टावच्छेदक

अत्र केचित् (गु.) अत्र कल्पे सत्सूपतः कालिकेन वह्नित्वविशिष्टसमवायेन जातिविशिष्टस्य साध्यतायां वह्नित्वत्वरूपेण समवायेन जातिविशिष्टाभावमादाय व्याप्तिः। समवायसम्बन्धावच्छिन्नावच्छेदकतायाः कालिकसम्बन्धावच्छिन्नसाध्यतावच्छेदकतायाः सामान्यविरहेण विशिष्टत्वाभावात्तादृशाभावस्य प्रतियोगिव्यधिकरणत्वात्।

तानिरूपकप्रतियोगिताकहेतुसमानाधिकरणाभावीयप्रतियोगितानिरूपितसाध्यतावच्छेदकताघटकसम्बन्धातिरिक्तसम्बन्धावच्छिन्नत्वसाध्यतावच्छेदकनिष्ठत्वोभयाभाववदवच्छेदकत्वाभावस्य विवक्षितत्वात् स्वावच्छिन्नत्वस्वावच्छिन्नसाध्यतावच्छेदकताव्यापकत्व एतदु[illegible]यसम्बन्धेन साध्यतावच्छेदकताघटकसम्बन्धावशिष्टान्यसाध्यतावच्छेदकनिष्ठसाध्यतावच्छेदकताघटकसम्बन्धावच्छिन्न[illegible]च्छेदकत्वानिरूपकत्वं प्रतियोगितायां निवेशनीयमतो न कोपि दोषः। उक्तस्थले समवायेन महानसीयत्वविशिष्टकालिकेन वह्नित्वविशिष्टाभावमादाय व्याप्तिवारणाय साध्यतावच्छेदकनिष्ठावच्छेदकतायां स्वविशिष्टान्यत्वसम्पादनाय सम्बन्धघटकतया स्वावच्छिन्नत्वनिवेशः। समवायेन जातेः साध्यतावच्छेदकतायां कालिकेन वह्नित्वस्य साध्यतावच्छेदकतायां जातिमद्वह्निमानित्यादौ समवायेन वह्नित्वविशिष्टस्य कालिकेन जातिविशिष्टस्याभावमादाय व्याप्तिवारणार्थं सम्बन्धघटकतया व्यापकत्वनिवेशः। तथा च समवायसम्बन्धावच्छिन्नवह्नित्वविशिष्टावच्छिन्नावच्छेदकतायां तादृशविशिष्टान्यत्वानिरूपकाभावस्य लक्षणाघटकत्वादिति भावः। वह्निमान् धूमादित्यादौ घटाभावस्यैव लक्षणघटकत्वसम्पादना

२

ग्र साध्यतावच्छेदकनिष्ठेति अवच्छेदकताविशेषणान् समवायेन प्रमेयस्य साध्यतावच्छेदकतास्थले च प्रमेयवत्त्वा धूमादित्यादौ धूय
भावस्य तच्छरीराघटकत्वेपि तत्सम्बन्ध्यभावमादाय तच्छरीरसमन्वया साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वसाध्यतावच्छे
दकनिष्ठावच्छेदकताविशेषणं स्यामिति· यदि च वह्निमान् धूमादित्यादौ निरूपकसम्बन्धविशिष्टान्यसाध्यतावच्छेदकनिष्ठसाध्य
तावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकत्वाप्रसिद्ध्याऽव्याप्तिरिति विभाव्यते· तदा स्वावच्छिन्नत्वस्वावच्छिन्नसाध्यतावच्छेदकता
व्यापकत्वएतदुभयसम्बन्धेन साध्यतावच्छेदकताघटकसम्बन्धाविशिष्टान्यावच्छेदकत्वानिरूपितत्वसाध्यतावच्छेदकताघटकसंस
र्गावच्छिन्नसाध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपितत्वोभयाभाववत्त्वस्य प्रतियोगितायां निवेशान्न कोपि दोषः· अथवा निरूप
कसम्बन्धेन तादृशसम्बन्धविशिष्टान्याया साध्यतावच्छेदकताघटकसंसर्गाविशिष्टावच्छेदकतातदनिरूपितत्वहेतुमन्निष्ठाभाव
प्रतियोगितायां विवक्षितम्· साध्यतावच्छेदकताघटकसम्बन्धवैशिष्ट्यं स्वावच्छिन्नसाध्यतावच्छेदकताव्यापकत्वसम्बन्धे
नोभयत्वैकव्यापकत्वं स्वानिरूपकप्रतियोगितानिरूपितावच्छेदकत्वत्वरूपेणावोध्यमितिध्येयम्· यद्वा स्वानवच्छेदकसम्बन्धा

वच्छिन्नस्वसमानाधिक[illegible]रणावच्छेदकतानिरूपितत्वस्य निरूपितसाध्यताऽवच्छेदकप्रतियोगिव्यधिकरणाभावीयत्वस्य तद
भयसम्बन्धेन साध्य[illegible]वच्छेदकताविशिष्टान्यत्वहेतुमन्निष्ठाभावीयप्रतियोगितायां निवेश्य इति न कोऽपि दोषः । न च [illegible]य
त्वेन ज्ञानत्वेन ज्ञान[illegible]विशिष्टस्य साध्यत्वे तज्ज्ञानत्वादिहेतौ विषयितया स्वरूपतो ज्ञानत्वविशिष्टभेदमादायाव्याप्तिरिति वाच्यम् । विशि
ष्टसाध्यतावच्छेदकस्थले साध्याभावच्छेदकीयप्रति[illegible]
स्थले [illegible] स्वरूपसम्बन्धेन यद्रूपेण साध्यतावच्छेदकत्वं तदितरानवच्छिन्नावच्छेदकताकहेतुमन्निष्ठाभावी
यनिरूपितोभयसम्बन्धेन साध्यतावच्छेदकताविशिष्टान्यप्रतियोगितावच्छेदकत्वाभावस्य साध्यतावच्छेदके विवक्षितत्वादिति ध्येयम् । । अथ
महानसीयवह्न्यभावमादाय वह्निमान् धूमादित्यादावव्याप्तिवारणाय साध्यतावच्छेदकतादितरोभयानवच्छिन्नत्वं हेतुमन्निष्ठाभावप्रतियोगिताया
यां निवेशितं जगदीशेन । । अत्रेयमापत्तिः प्रकृतसाध्यवृत्त्यभावीयत्वस्य साध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपितत्वोभयाभावविशिष्टहेतुम
न्निष्ठाभावप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके विवक्षितत्वात् साध्यतावच्छेदकतादितरत्वोपाधिवच्छेदकतायां निवह्नित्वं यद्रूपेण साध्य
तावच्छेदकत्वं तदितरोभयानवच्छिन्नत्वस्य साध्यतावच्छेदकतायाः सम्बन्धावच्छिन्नत्वाभिप्रायेण विशिष्टोपरागप्रयत्नम् । न च कपिसंयोग्येतत्त्वादित्या

स॰ व्या॰ ८

दावव्याप्तिवारणार्थं प्रतियोगिवैयधिकरण्यपदं व्यर्थमिति वाच्यम् कपिसंयोगी सत्वादित्यादौ कपिसंयोगाभावस्य तादृशोभयाभावविशिष्टप्रतियोगिताकत्व
विरहेण लक्षणाघटकतयातिव्याप्तिवारणार्थो न वह्निमद्वृत्तिकाभावीयत्वसाध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपितत्वोभयाभावस्य वक्तव्यतया साध्याभाववदा
दायोक्ते स्थले ऽव्याप्तिवारणाय तत्सार्थक्यात् न च विशिष्टसत्तावाञ्जातेरित्यादौ ऽतिव्याप्तिः विशिष्टसत्ताभावाभावस्य ~~विशिष्ट~~ सत्तानातिरिक्ततया तदीयप्रतियोगिता
यां तादृशोभयाभावासत्वेन लक्षणाघटकत्वादिति वाच्यम् साध्यवत्त्वनितावच्छेदकीभूततानुयोगितानिरूपितत्वघटितोभयाभावस्य प्रतियोगितायां निवेशनी
यत्वात् न च प्रमेयवत्त्वाद्धूमादित्यादौ प्रमेयसाध्यतावच्छेदके स्थले तादृशाभाववत्प्रतियोगिताकाप्रसिद्ध्याऽव्याप्तिरिति वाच्यम् अनुपरम्परासम्बन्धेन प्रमेय
त्वस्य साध्यतावच्छेदकत्वात् तथा च घटाद्यभावमादायैव लक्षणसङ्गतिः (यत्किञ्चित्साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नसाध्यतावच्छेदकनिष्ठावच्छेदकत्वा
निरूपकत्वानिवेशात् सम्बन्धान्तरावच्छिन्नावच्छेदकताप्रसिद्ध्या नाव्याप्तिः) विशेषयितयोरूपत्वाविशिष्टाभावमादायाव्याप्तिवारणाय पूर्ववत् न च तत्राव्याप्तिवा
रणाय सा वह्निमद्वृत्तिकान्यसाध्यवद्वृत्त्यभावीयत्वघटितोभयाभाववत्त्वं तादृशप्रतियोगितायां विवक्षणीयम् घटाद्यभावस्य सा वह्निमद्वृत्तिकान्यभाव
न्तर्दीयप्रतियोगितायां तादृशोभाववत्त्वेन तमादाय लक्षणसमन्वयसम्भवेतावत्प्रयासोऽनुचित इति वाच्यम् तथा सति संयोगी द्रव्यत्वादित्यादौ कपि
संयोगाभावस्यापि तथात्वेन तमादायाव्याप्तिरिति मैवम् समवायसम्बन्धावच्छिन्नघटत्वाद्यभावमादाय वह्निमान्धूमादित्यादावव्याप्तिमाशंक्यमानीशिरो

मरोग्रीयसामानाधिकरण्ये हेतोर्यादृशः सम्बन्धः प्रविष्ट इत्यग्रिमग्रन्थानुरोधान्न प्रसङ्गात् न च तथापि नैतादृशं लक्षणं कथं प्रकृतमिति वाच्यम् इत्यपि नियाम
कसम्बन्धावच्छिन्नप्रतियोगित्वास्वीकारात्सम्बन्धान्तरावच्छिन्नप्रतियोगिताकाभावस्य तादृशाभावाभाववत्त्वनियोगिताकत्वविरहेण लक्षणाघटकत्वात्स्वामि
त्वसम्बन्धेन धूमादिसाध्यकद्रव्यत्वादिहेतावतिव्याप्तिः अस्मन्मतेन तु साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणहेत्वधिकरणवृत्तिसम्बन्धान्तरावच्छि
न्नप्रतियोगिताकसाध्याभावमादाय नातिव्याप्तिः अत्र च साध्यतावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणसाध्यवद्वृत्त्यभावीयत्वघटितोभयाभावत्वविवक्षणेन को
पि दोषः (अत्राभाववान्मेयत्वादित्यादौ केपि संयोगाभावाभावमादायाव्याप्तिः व्याप्यवृत्तिसाध्यकस्थले प्रतियोगिवैयधिकरण्यापूर्वि ग्राह्यं. अव्याप्यवृत्ति
साध्यकस्थले तु सामान्यधर्मावच्छिन्नाधिकरणत्वास्वीकारात्प्रतियोगितावच्छेदकसामान्ये इत्यादि साध्यतावच्छेदकसम्बन्धेनेत्यादि पारिभाषिकानु
गमस्तु प्रतियोगिवैयधिकरण्यस्याङ्कुशप्रवेशतया गौरवमिति ध्येयम्) वस्तुतः साध्यवद्भिन्नत्वं यदि यथाकथंचित्सम्बन्धेन विवक्ष्यते तदा धूमवान्वह्नेरित्या
दावतिव्याप्तिः न हि विशेषणतया भाववान्मेयत्वादित्यत्र घटत्वाभावाभावमादायाव्याप्तेः अत एव न साध्यताज्ञानविरोधिताघटकसम्बन्धेनापि ना
पि स्वप्रतियोगिमत्त्वग्रहविरोधिताघटकसम्बन्धेन आत्मभाववान्मेयत्वादित्यत्रातिव्याप्तिः समवायेन साध्यवद्भिन्नत्वाप्रसिद्ध्या स्वरूपाभावस्य ल
क्षणाघटकतयाऽतो नोक्तः प्रकारः साधीयान्। (यदि च यस्य कस्यचिदभावस्य निरूपितत्वस्य निवेशादेवानुक्तस्थले यत्पद्यभावस्य निरुक्तसम्ब

८

न्धेन साध्यवद्भिन्नत्वप्रसिद्ध्या नातिव्याप्तिरित्युच्यते तदा धनी द्रव्यत्वादित्यादावतिव्याप्तिः स्वामित्वसम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्ध्या सम्बन्धान्तरावच्छि
न्नप्रतियोगिताया अप्रसक्तत्वादिति। अथैतत्कल्पे साध्यतावच्छेदकसम्बन्धावच्छिन्नाधिकरणत्वीयस्वरूपसम्बन्धेन प्रतियोगितावच्छेदकाश्रयाधिकरण
त्वाभावस्य विवक्षितत्वादिति चेन्न व्याप्यवृत्तिसाध्यकस्थलीयनिरुक्तो प्रतियोगिवैयधिकरण्यप्रवेशेन साध्यतावच्छेदकतादृशतोभयानवच्छि
(उ३× वद्वृत्त्वधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यस्य व्याप्तित्वसंभवे व्यर्थं साध्यतावच्छेदकतादृशतो
भयानवच्छिन्नेति निवेशः न च घटत्वाभाववान् द्रव्यत्वादित्यादावतिव्याप्तिः सर्वस्यैव हेतुः प्रतियोगितावच्छेदकीभूताभावत्वाश्रयाधिकरणत्वादिति वा
च्यम् साध्यतावच्छेदकावच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नाधिकरणत्वीयस्वरूपसम्बन्धेन प्रतियोगितावच्छेदकाश्रयाधिकरणत्वाभाव) × उ२
न्नेत्यादिनिवेशस्यावश्यकतया तत्साधारणाभावेन व्याप्यवृत्तिसाध्यकस्थलीयलक्षणमात्रेण निवेश्यसाध्यतावच्छेदकतादृशेत्यादिविशेषणस्वारस्य
मस्यातीवसन्दर्भविरोधापत्तेरिति ध्येयम्॥ (म्रा व्युप्रतात्पर्याभिप्रायेण शाब्दबोधवत्यर्थोऽधिकरणत्वमिति. केचित् प्रतीत्युपपत्तौ प्रतीतिः प्रमात्वोपपन्नोऽपि
वर्थः) ।यद्यप्यवश्यक्लृप्ताभिरत्यारभ्यमाणाभाव इत्यनुयादीशाः। ।अथात्र पर्वतत्वविशिष्टधूमत्वावच्छिन्नाधिकरणतावगाहिप्रतीतौ पर्वत

न चाद्द्रव्यातिरिक्तद्रव्याः म के त्वादि दीधितिव्यवस्था नापन्नोऽस्तीति ध्येयम्॥ २

वैशिष्ट्यं यदि धूमे भासते तदा तस्यैवावच्छेदकत्वेनोपपत्तौ धूमत्वस्योपलक्षणतयैवौचित्येन धूमत्वनिष्ठनिरूपकतानिरूपिताधिकरणतावान्कोऽभि-
रेव धूमवानिति प्रतीतेः प्रमात्वोपपत्तौ विशिष्टधूमत्वस्यावच्छेदकत्वकथनं विरोधरतिचेन्न एकधर्मावच्छिन्नाधिकरणतानामैक्यमते यदान्यत्वाविशि-
ष्टद्रव्यवानिति ज्ञानाय घटभेदावच्छिन्नधूमनिष्ठनिरूपकतानिरूपिताधिकरणताद्वयोपि सत्वान्न प्रमात्वाय द्रव्यो धूमवानिति प्रतीतेः प्रमात्वोपपत्तेरि-
तिध्येयम्। यदि च समानाधिकरणवृत्तित्वसम्बन्धेन पर्वतो विशिष्टधूमत्वे भासते तदा धूमत्वस्यावच्छेदकत्वमेवेति तद्धर्मस्य विशेषणत्वे तस्योपलक्षे-
णत्वाभावात्। वैशिष्ट्यस्यावच्छेदकत्वमत एव तस्य विशेषणत्वं उपलक्षितपक्षकन्यायविशेषणानङ्गीकारात्।। ।अथैतादृशाधिकरणत्वाप्रसि-
द्ध्या तदभावाप्रसिद्धिः सिद्ध्यसिद्ध्या तन्निषेधानुपपत्तेः न च धूमत्वे अधिकरणतानिरूपकतावच्छेदकत्वाभावः साध्यतयेति वाच्यम्। विशिष्टधूमत्वे
स्वीकारादेव धूमत्वेपि तत्सिद्धेः विशिष्टस्यानतिरेकात् न च धूमत्वनिष्ठेकत्वेऽधिकरणतानिरूपकतावच्छेदकतात्वावच्छिन्नप्रतियोगिता-
कपर्याप्त्यनुयोगितावच्छेदकत्वाभावः साध्यत इति वाच्यम् सामान्यतोऽधिकरणतानिरूपकतावच्छेदकतात्वावच्छिन्नप्रतियोगिताक-
पर्याप्त्यनुयोगितावच्छेदकतस्य यावत्त्ववृत्तितया तदभावस्य सामान्यधर्मावच्छिन्नाधिकरणतावादिनापि स्वीकारात्तत्सिद्धसाधनापत्तेः

छ॰ गु॰ १०

न च पर्वतनिष्ठनिरूपकतावह्नित्वप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वाभाववद्धूमत्वकत्वे साध्यत इति वाच्यम्। पर्वतेपि तादृशानन्ता
धिकरणतात्वेनानिरूपकतावच्छेदकत्वाभावसाधने सिद्धसाधनतापत्तेः। न च तन्निष्ठयत्किञ्चिदधिकरणतानिरूपकतावच्छेदकतात्वावच्छि
न्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वाभाववत्साध्यते तेन सिद्धसाधनमिति वाच्यम्। यत्किञ्चित्वस्यान[illegible]नुगतत्वात्। तन्निष्ठ
ता वाच्या दृयत्किञ्चिदधिकरणतामादायैव पुनः सिद्धसाधनतादवस्थ्यात्। अधिकरणतात्वसमानाधिकरण[illegible]भयावृत्तिधर्मावच्छिन्न
निरूपकतानिरूपितनिरूप्यतावन्निरूपकतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगिताभावो धूमत्वनिष्ठैकत्वे साध्य
साध्यते। वस्तुतस्तु अधिकरणताविशिष्टान्यत्वं धूमत्वनिष्ठैकत्वे साध्यते वैशिष्ट्यञ्च स्वनिरूपितनिरूपकतावच्छेदकतात्वावच्छि
न्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेद~~[illegible] धूमत्वानवच्छेदकत्व~~धिकरणतानिरूप
कत्वसम्बन्धेन स्याद्यमतो न कोपि दोषप्रसक्तिः। ।। न चात्र सर्ववादिसिद्धायास्तदधिकरणतानिरूपकतावच्छेदकतात्वावच्छि

ऽप्रतियोगिताकपर्याप्तेरेव प्रसिद्धतया तत्रैवोपपत्तौ सामान्यतोऽधिकरणतानिरूपकतावच्छेदकतात्वावच्छिन्नस्यास्वीकारात्। तथा
च धूमत्वानि[illegible]कत्वेऽधिकरणतानिरूपकतानिरूपकतावच्छेदकतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगिताव
च्छेदकत्वं सामान्याभावस्यैव साध्यते इत्यर्थः एवञ्च यथातात्पर्यमस्य व्याख्येयम्। । अथात्र सामान्यधर्मावच्छिन्नाधिकरण[illegible]ताप्रसि
द्धावपि हेतुतावच्छेदकनिष्ठावच्छेदकतानिरूपिताधिकरणतामादाय वह्निमान् धूमादित्यादौ लक्षणसमन्वयसम्भवेऽपि तादृश
पारिभाषिकाधिकरणतानुसारेण नवद्रव्यत्वे गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ हेतुतावच्छेदकीभूतसत्तात्वावच्छिन्नाव
च्छेदकतानिरूपिताधिकरणत्वस्य गुणेऽपि सत्त्वात्तत्राव्याप्तिरिति वाच्यम्। हेतुतावच्छेदकताव्यापकनिरूपकतानिरूपिताधि
करणत्वस्यैव विवक्षितत्वात्। व्यापकत्वञ्च स्वावच्छेदकत्वसम्बन्धेन ग्राह्यमिति चेन्न। समानाधिकरणधर्मित्वसम्बन्धेन गुणक
र्मान्यत्वावच्छिन्नसत्त्वावच्छिन्नहेतुतायां द्रव्यत्वादिसाध्यकेऽव्याप्तिवारणाय हेतुतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकप

१४

र्याप्त्यनुयोगितावच्छेदकीभूतधर्मावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकनिरूपकताकाधिकरणत्वस्य विवक्षितत्वात्· अत्रावच्छेदकसाधारण्यावच्छे
दकत्वं बोध्यम्· अन्यथा तन्निवेशे तद्दोषतादवस्थ्यम्· न चैवमत्र पूर्वकल्पेऽपि उक्तस्थलेऽपि नाव्याप्तिः· हेतुतावच्छेदकतायां गुणकर्मान्यत्वादावपि सत्त्वेन ताद
शनिरूपकतायां हेतुतायां हेतुतावच्छेदकत्वाव्यापकत्वादिति वाच्यम्· तद्गुणान्यत्वस्य साध्यतायां समानाधिकरणवृत्तित्वसम्बन्धेन तद्गुणकर्मान्यत्वविशिष्ट
सत्तात्वविशिष्टस्य हेतुतायामव्याप्तिः· तद्गुणान्यकर्मान्यावच्छिन्नप्रतियोगिताकभेदविशिष्टसत्तात्वावच्छिन्नाधिकरणतावच्छेदकाभावप्रतियोगितावच्छेद
कत्वस्य साध्यतावच्छेदके सत्वात्· एवं धूमसमानकालीनतद्व्यक्तित्वावच्छिन्नाधिकरणतामादाय वह्निमान्धूमादित्यादावव्याप्तेः· तथा च तादृशाधिक
रणत्वाप्रसिद्ध्याऽव्याप्त्यसङ्गतिः· न च पर्वतत्वविशिष्टधूमत्वावच्छिन्नाधिकरणतानिरूपकतावच्छेदकतायास्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकपर्या
प्त्यनुयोगितावच्छेदकं यद्धूमत्वं केवलं तद्वहेतुतावच्छेदकत्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकं तथा च पर्वतत्वविशिष्टधूमत्वावच्छिन्ना
धिकरणतामादाय तत्र नाव्याप्तिरिति वाच्यम्· प्रतियोगितासम्बन्धेन हेतुतायां महानसीयवह्न्यभावाभिन्नवह्नितरत्वादावव्याप्तेः· निरुक्ताधिक
रणत्वस्य महानसीयवह्न्यभावेऽपि सत्त्वात्· वस्तुतो विशिष्टसत्ताप्रतियोगिकसमवायेन सत्ताहेतुकद्रव्यत्वसाध्यकविरुद्धेऽतिव्याप्तिः· विशि
ष्टसत्तावन्निष्ठाभावप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वात् अतोऽधिकवारकपर्याप्तिनिवेशः· अन्यस्मादृशवारणाय हेतुतावच्छेदकतावच्छिन्न

प्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकीभूतधर्मावच्छिन्नानुयोगिताकपर्याप्तिकप्रतियोगितावच्छेदकीभूतधर्मावच्छिन्नानिरूप्यतानिरूपितानिरूपकतावन्निरूपकतानिरूपिताधिकरणत्वस्यैव लक्षणघटकत्वात्· तथा च तादृशाधिकरणताऽप्रसिद्ध्यैव नात्राव्याप्तिरिति ध्येयम्· सम्बन्धाविषयाप्रवेशात्तु हेतुतावच्छेदकतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकीभूतधर्मद्वितयवदधिकरणत्वं तत्त्वम्· स्वनिष्ठाधिकरणतानिरूपकतावच्छेदकीतात्वावच्छिन्नपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन स्वमाधिकरणत्वम्॥ अथैवं हेतुतावच्छेदकधर्मस्याश्रयाधिकरणीभूतधर्मावच्छिन्नानिरूप्यतानिरूपितानिरूपकतावन्निरूपकतानिरूपिताधिकरणतावच्छेदकत्वस्याभावस्तथाविधहेतुतावच्छेदको अप्याधिकरणेऽप्येवहेतुतावच्छेदकावच्छिन्नाधिकरणेत्यनेनाविवक्षितत्वम्· इति चेन्न· यन्निष्ठाधिकरणतानवच्छेदकेऽन्यत्राधिकरणत्वं हेतुतावच्छेदकसम्बन्धेन व्याप्यमन्यथा द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादावव्याप्तिः· विशिष्टसत्तात्वे कालिकसम्बन्धेनैव व्याप्यमन्यथा वान्हिमान्धूमादित्यादावव्याप्तिः :- पर्वतनिष्ठाधिकरणतानवच्छेदकत्वविशिष्टावच्छेद्यत्वसम्बन्धावच्छिन्नाधिकरणतावच्छेदकत्वस्य धूमत्वे सत्त्वेन तादृशविशिष्टाभावासत्त्वात्· एवं सति धूमप्रतियोगिकसंयोगे हेतुताका पर्वतादिनिष्ठ

२४ सम्बन्धावच्छिन्नगुणनिष्ठाधिकरणतानिरूपकतानवच्छेदकत्वस्य समवायेन तादृशविशिष्टाभावस्य हेतुतावच्छेदके सत्त्वात्· एवं सामान्यतोऽधिकरणतावच्छेदकत्वेऽपि वन्ह्यधिकरणत्वं हेतुतावच्छेदक ४२

सि· काली· १२

हेतुतावच्छेदकसम्बन्धावच्छिन्नाधिकरणतानवच्छेदकत्वविशिष्टाधिकरणतानवच्छेदकत्वस्याप्रसिद्ध्या वह्निमान्धूमादित्यादावव्याप्तिरिति ध्ये-
यम् । ।अथानुकल्पे सम्बन्धानवच्छिन्नसामान्यधर्मावच्छिन्नाधिकरणत्वास्वीकारेपि विषयित्वसम्बन्धावच्छिन्नाधिकरणत्वमवश्यं स्वीकरणी-
यं अन्यथा विषयितया घटवानिति प्रतीतिर्यदि घटत्वानवच्छेदकताकनिरूपकताकाधिकरणत्वान्यावगाहते तदा घट इत्याकारकप्रतीतावपि
घटवानिति प्रतीत्यनुपपत्तेः न हि घट इत्याकारकप्रतीतावपि घटवानिति प्रतीत्यापत्तेश्च तथा च निरुक्तज्ञानभेदे साध्ये विषयितासम्बन्धेन घटादिहेतावति-
व्याप्तिः स्वाश्रयाधिकरणीभूते निरुक्तज्ञाने निष्ठाधिकरणतानवच्छेदकतायाः कुत्राप्यसत्त्वात् यत्पदेन निरुक्तज्ञानं व्यक्ते धर्मिभिन्नावच्छिन्नत्वेन ज्ञानान्तरस्यैव धर्मि-
व्यतया तन्निष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वादिति चेत् न । निरुक्तज्ञानान्यत्वविशिष्टघटत्वादावेवप्र-
सिद्धेरिति । ।अथैवं द्रव्यं घटत्वपटत्वोभयत्वादित्यत्रातिव्याप्तिः तादृशहेतुतावच्छेदकाश्रयाधिकरणे घटः पटत्वतन्निष्ठाभावप्रतियोगितानवच्छे-
दकत्वस्य साध्यतावच्छेदके सत्त्वादिति चेन्न हेतुतावच्छेदकपर्याप्त्यनुयोगितावच्छेदकीभूतयावद्धर्मविशिष्टस्यैव यत्पदेन विवक्षितत्वात् । वैशिष्ट्यं च
स्वसमानाधिकरणभेदप्रतियोगितानवच्छेदकत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकभेदवत्त्वसम्बन्धेन अवच्छेदकत्वं च स्वनिष्ठाधिकरणतानिरूपि-
न्तोधिकरणतापर्याप्तिकिञ्चिन्निवेशान्नदोष इति ध्येयम् । ४

ताधेयत्वसम्बन्धेन । तथा च घटत्वपटत्वोभयत्वपर्याप्त्यवच्छेदकीभूतं यदुभयत्वं तादृशाभेदवत्त्वसम्बन्धेन तद्विशिष्टधर्मस्याप्रसिद्ध्या नाव्याप्तिरिति । पूर्वकल्पे
नुगमप्रकारस्तु स्वनिष्ठभेदप्रतियोगितावच्छेदकत्वस्वाश्रयाधिकरणत्वोभयसम्बन्धेन प्रकृतहेतुतावच्छेदकविशिष्टस्य हेतुतावच्छेदकावच्छिन्नाधिकरणत्वे
न विवक्षितत्वान्नानुगमः । अवच्छेदकत्वं स्वनिष्ठावच्छेदकताकभेदवत्त्वस्वसमानकालीनाधिकरणतानिरूपकतावच्छेदकत्वोभयसम्बन्धेन स्वनिष्ठावच्छेद
कत्वं च स्वनिष्ठाधिकरणतावच्छेदकत्वसम्बन्धेन ग्राह्यम् । यद्वा स्वनिष्ठात्यन्ताभावप्रतियोगित्वस्वाश्रयाधिकरणत्वोभयसम्बन्धेन हेतुतावच्छेदकविशिष्ट
मेव हेतुतावच्छेदकावच्छिन्नाधिकरणत्वेन विवक्षितम् । प्रतियोगित्वं च निरुक्तोभयसम्बन्धेन बोध्यम् । तेन धूमीयसंयोगत्वेन धूमहेतुकस्थले निरुक्तोभय
सम्बन्धावच्छिन्नावच्छेदकत्वाप्रसिद्धावपि न क्षतिरिति ध्येयम् । हेतुतावच्छेदकं च निरुक्तानां ज्ञानविषयताश्रयप्रज्ञाने ज्ञानित्वेनावच्छेदकसम्बन्धावच्छिन्न
प्रकारतावच्छेदकत्वेन विवक्षणीयम् । अतो द्रव्यं घटत्वपटत्वोभयस्मादित्यादिहेतौ नातिव्याप्तिरिति केचित् । हेतुतावच्छेदकज्ञानिधर्मेण च हेतुतावच्छेदकाव
च्छिन्नाधिकरणत्वेनाविवक्षितत्वात् । ज्ञानित्वं च स्वस्वघटितयाभावप्रतियोगितावच्छेदकसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकभेदवत्त्वरूपत्वमपि केचित् ॥ ॥ प
रितः प्रतियोग्युपलक्षणे दोषाद्वा न कपिसंयोगज्ञानिनां ध्यक्तांनुमितावितरो मरिचः । । न चैवमपि प्रतियोगिनोऽग्रहदशायां व्यभिचारस्य प्रसञ्जनत्वात् दत्वलांज

नित्वज्ञानज्ञानिविषयतावच्छेदकत्वेन निवेशेऽप्यनुगमलभ्यनमादाय तद्विशिष्टज्ञानादवस्थमतास्वादज्ञानानुगमराप्तः ।

गदाधराः। तस्याप्यमान्तरायः। तत्पुरुषीयसंयोगाभाववत्त्वावच्छिन्नलौकिकप्रकारताशालिप्रत्यक्षं प्रति तत्पुरुषीयसंयोगत्वावच्छिन्नलौकिक
प्रकारताशालिज्ञानत्वेन प्रतिबन्धकत्वमनुभवसिद्धम्। प्रतिबध्यस्य विशेष्यत्वप्रतिबन्धकस्य स्वविशेष्यीभूतसंयोगवत्त्वसम्बन्धः। न चैवं द्रव्ये संयो
गाभावप्रत्यक्षस्य कस्यापि अनुत्पत्त्या ईश्वरज्ञानसाधारणज्ञानत्वेनैव प्रतिबन्धकत्वं युक्तम्। तथा च प्रतियोगिग्रहदशायां नापत्तिरिति वाच्यं
तथासति प्रति[illegible]योग्युपलम्भे दोषादुत्पन्ने न दोषकोटिनिवेशेऽप्यापत्त्यापाताद्वाराभिमतरुद्रभट्टाचार्यस्य व्याख्यानस्यानुपादेयत्वादिति दिक्।।॥
कोयन्नानी[illegible]गदाधराः॥ न चान्यतमजातिसमानाधिकरणोभयावृत्तिप्रतियोगिताकयावदभाववत्त्वस्य सम्यक्त्वे उभयावृत्तिधर्म
पर्याप्ताधारवत्त्वमर्थ इति वाच्यम्। स्वरूपसम्बन्धात्मिकायाः प्रतियोगितायाः प्रतियोगिभेदेन भिन्नतया सत्त्वगुणत्वावच्छिन्नाभाव
मात्रस्य स्वरूपासिद्धिप्रसङ्गात्। न च तथापि प्रतियोगितासम्बन्धेनान्यतमजातिसमानाधिकरणोभयावृत्तिअभाववत्त्वस्य हेतुत्वसंभवेन
निवेशवैयर्थ्यमिति वाच्यम्। समनियताभावयोरैक्यमिति मते व्यभिचारापत्तेः। तद्घटीयरूपरसादेः समानकालोत्पन्नविनष्टस्य
योऽभावस्तस्य रूपत्वसमानाधिकरणोभयावृत्त्यभावानन्तर्गततया तदन्यथावद्वैरोधाभावस्य तद्घटरस[illegible]सत्त्वेन रूपत्वावच्छिन्नाभावास

त्वादिति । ।आत्मुपादाननादित्यारभ्य न व्यभिचार इत्यन्तं जगदीशः ॥ अत्र यद्धर्मसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नयत्सम्बन्धावच्छिन्न
प्रतियोगिताकाभाववृत्तियावत्त्वस्यानुगतानतिप्रसक्तधर्मेण निवेशनमशक्यत्वेन तादृशाभाववत्त्वव्यापकत्वेन निवेश एव कार्यः । तादृश
व्यापकत्वं च एतादृशाभाववत्त्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वाभावरूपं वाच्यम्, तथा च कम्बुग्रीवादिमत्त्वसमानाधिकरणोभयावृत्तिध
र्मावच्छिन्नप्रतियोगिताकाभाववत्त्वसमानाधिकरणभेदप्रतियोगितावच्छेदकतात्वमपेक्ष्य घटत्वसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नप्रतियोगि
ताकाभाववत्त्वसमानाधिकरणभेदप्रतियोगितावच्छेदकतात्वस्य लघुतया तादृशाभावाप्रसिद्धेर्यत्पदेन कम्बुग्रीवादिमत्त्वस्य धर्मिविशेष्यतयात्मा
मुपादानवैयर्थ्यमिति चेन्न, व्याप्यतासम्बन्धेन यज्जातिसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नप्रतियोगिताकाभाववत्त्ववृत्तितया च विवक्षित
त्वात्, व्याप्यत्वं च स्वाभाववृत्तित्वसम्बन्धेनावच्छिन्नस्वनिष्ठावच्छेदकताकभेदवत्त्वरूपं ग्राह्यम्, तथा च तादृशाभावाप्रसिद्धावपि तादृशनिखिला
भाववृत्तित्वसमुदायत्वस्य तादृशाभाववत्त्ववृत्तित्वेन ग्रहीतुमशक्यतया यत्पदेन कम्बुग्रीवादिमत्त्वमादाय व्यभिचारवारणाय तस्य सार्थक्यात् ।
यो यज्जातिसमानाधिमाधिकरणोभयावृत्तिधर्मावच्छिन्नयत्सम्बन्धावच्छिन्नप्रतियोगिताकाभाववदभाववान्, स जात्यवच्छिन्नतत्सम्बन्धाव

च्छिन्नप्रतियोगिताकाभाववानिति व्याख्यायां जातिपदोपादानात्कम्बुग्रीवादिमत्त्वसमानाधिकरणोभयावृत्तितन्मत्त्वावच्छिन्नप्रतियोगि
ताकाभाववति भूतले तेन तदवच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्या न व्यभिचारापत्तेरिति जगदीशोक्तम्· अत्र यद्यपि साध्याप्रसिद्धेरेव न
व्यभिचारस्तथापि साध्याप्रसिद्धिरन्यैस्तत्सूचितत्वात्:· साध्याप्रसिद्धिरेतल्लक्षणाभिप्रायेण व्यभिचारस्तु व्याप्त्यन्तराभिप्रायेण· तथाहि· य
त्वसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नयत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावो यदभावाधिकरणकं तदधिकरणनिष्ठतादृशाभावप्रति
योगितावच्छेदकमित्यनेन साध्याप्रसिद्ध्या कम्बुग्रीवादिमत्त्वादौ व्यभिचारो दर्शितः। अथवा यो यज्जातिसमानाधिकरणोभयावृत्तिधर्मा
वच्छिन्नयत्सम्बन्धावच्छिन्नप्रतियोगिताकयावदभाववान् तज्जात्यवच्छिन्नात्मसम्बन्धावच्छिन्नप्रतियोगिताकाभाववत्त्वसम्बन्धेन तद्वान्
त्यर्थतात्पर्यम्· तथा च साध्याभाववद्वृत्तित्वरूपव्यभिचारस्यैव सम्पकत्वान्न कोऽपि दोषः॥ । अत्रेदं बोध्यम्· संयोगी द्रव्यत्वादित्यादौ
लक्षणघटकप्रतियोगिवैयधिकरण्यपदं व्यर्थं संयोगाभावप्रत्यक्षसंभवेन एतादृशव्या[illegible]प्त्या एतदनुमीयते· तत्र यद्यपि तादृशव्या
प्यसंयोगाभावस्यानुमितिरपि व्याप्तिलक्षणप्रतियोगिवैयधिकरण्यंपदं विना संभवति· संयोगाभावाभावस्य यावद्विशेषाभावाधिकरणेऽ

ध्वो दोसत्वेन संयोगाभाववत्वरूपसाध्यतावच्छेदकस्य व्यापकतावच्छेदकत्वविरहात्तमद्दर्थप्रतियोगव्यधिकरणनिवेशनमावश्यकं तथा च येन प्रकारेण तस्य सिद्धिस्तत्रैवैतस्य प्रयोजनसत्वेन सम्भवविरोधः स्यान्तथापि सामान्यव्याप्तौ प्रसिद्धस्थले व्यापकसामानाधिकरण्यग्रहपक्षापेक्षणमानत्वम् । अप्रसिद्धस्थले द्रव्यत्वादौ संयोगाभावादिसाधने साध्यसाधनयो व्यभिचारमात्रं निश्चितामिश्रादिभिरप्युक्तरीत्वतो नसदंभविरोधः स्यादित्यलमतिविस्तरः । । शब्दो नित्यः सामान्यवत्वे सति विशेषगुणान्तरसमानाधिकरणबहिरिन्द्रियग्राह्यत्वात् हेतौ नित्यत्वे साध्ये सामान्यवत्वविशेषणस्य शब्दध्वंसे व्यभिचारवारणाय सार्थक्यम् । विशेषगुणान्तरसमानाधिकरणविशेषणस्य रूपादौ व्यभिचारवारणाय सार्थक्यम् । लौकिकप्रत्यक्षविषयतार्थकस्य बहिरिन्द्रियग्राह्यत्वदलस्य मनः क्रियादौ व्यभिचारवारणाय सार्थक्यम् । एतन्मते ध्वन्यात्मके शब्दे व्यभिचारवार कु णाय ध्वनिभिन्नत्वं पुनर्हेतौ विशेषणं देयम् । अनित्यत्वे साध्ये सामान्यवत्व विशेषणस्य शब्दत्वे व्यभिचारवारणाय सार्थक्यम् । गगनादौ व्यभिचारवारणाय बहिरिन्द्रियग्राह्यत्वदलम् । न चाग्राह्यान्यशब्दे ऽशतः स्वरूपासिद्धिरिति वाच्यम् । सामान्यवत्वे सति बहिरिन्द्रियग्राह्यत्वदलस्य बहिरिन्द्रि

८७ मु.ख.टी.

यत्राघ्रातावच्छेदकजातिमत्त्वरूपार्थकित्वेन वारणात्· घ्राणग्राह्यद्रव्यत्वादिजातिमादाय व्यभिचारवारणाय [illegible]
~~[illegible] विशेषणादेयम् · अनित्यत्वे साध्ये [illegible]~~ नाइरा जोतो
वीन्द्रिय यत्राघ्रातानवच्छेदक~~ह~~विशेषणादेयम्· एवं जलीयपरमाणुरूपव्यभिचारवारणाय विशेषणं गुणात्मसमानाधि
करणत्वदेतम्· आत्मत्वजातिमादाय व्यभिचारवारणाय बहिः पदम्· अनित्यपक्षे बहिरिन्द्रियग्राह्यत्वस्य लौकिकप्रत्य
क्षविषयत्वरूपत्वार्थः। अथात्र यपदस्य स्वरूपासिद्धिवारकत्वात् सार्थकत्वम् ऊह्यम्· तन्नु संदे· वह्नौ तो· हेत्वप्रसिद्धिवारकत्वे
वसार्थक्यात् इति विभावनीयम्·। ।यद्यपि यदीयानाभिप्रायमनन्तरभवतो व्यर्थविशेषणत्वे भिन्नु नं जगादिरीः
। ।न्वानाप्यप्रसेकपदस्य स्वरूपासिद्धिवारकतया न दोषः तादृशस्य भातिवाच्यम्· यद्धर्मावच्छिन्नप्रत्येकावच्छिन्ना
भावचान्तोऽस्मिन्नेव तादृशप्रतियोगितानिरूपितावच्छेदकताकाभाववत्त्वस्य विवक्षितत्वात्· नचवसंयोगत्वावच्छिन्नप्रतियो(

गीनास्तीति प्रतीतिसिद्धाभावमादाय पक्षस्वरूपासिद्धिमिति वाच्यम् । तादृशाभावप्रतियोगित्वस्य लाघवेन संयोगत्वेऽ
वक॰त्वनीयत्वात् । न च तत्तत्प्रतियोगित्वावच्छिन्नाभावप्रतियोगितावच्छेदकं तत्तत्संयोगत्रित्वं तत्प्रतियोगित्वमेव लाघवान्न
तत्तत्प्रतियोगित्वम् । तथा च संयोगत्वावच्छिन्नप्रतियोगितानिष्ठानवच्छेदकताकप्रतियोगिताकाभावाप्रसिद्ध्या हेत्वप्रसि
द्धिरिति वाच्यम् । गगनीयेनञीतीतरस्य स्वरूपतो भानाङ्गीकारात् । स्वरूपतो न तत्प्रतियोगित्वस्यैवावच्छेदकत्वस्य स्वीकारात् । तद्वे
षपानद्य । कित्वस्यावच्छेदकत्वकल्पनेन लाघवानवकाशात् । तथा च प्रतियोगित्वानिरूपितावच्छेदकत्वं स्वरूपसम्बन्धावच्छि
न्नं ग्राह्यम् । अन्यथा कालिकसम्बन्धावच्छिन्नप्रतियोगितानिरूपितावच्छेदकताकप्रतियोगिताकाभाववत्त्वस्य हेत्वादौ सत्त्वे
न स्वरूपासिद्धिप्रसङ्गः । न चात्र स्वरूपासिद्धिवारकस्य विशेषणस्य वैयर्थ्यमिति वाच्यम् । पक्षिनिष्ठ[illegible]तासम्बन्धावच्छि
न्नावच्छेदकता[illegible]व्यापारतन्त्रलक्षणवैयर्थ्यविशेषणत्वाभावादिति । वस्तुतस्तु । यद्धर्मावच्छिन्नप्रतियोगित्वव्यापकसमुदाय

त्वविशिष्टविरोध्यभाववत्त्वमेव हेतुः । व्यापकत्वञ्च स्वाश्रयाभावप्रतियोगितानवच्छेदकत्वसम्बन्धेन बोध्यम् इति । नचाभिप्रायतत्वेत्वार
प्यमाते रेवपूर्वोक्तादित्यनं जगदीशोभोक्तम् । । नन्न सङ्केदेत उपाधिदानार्थं ज्ञानविभाजकनानानिवेशस्यसंगतत्वादिति चेन्न । ज्ञानविभाज
कतात्पर्यघटिताभाववत्साध्यकानुमानेतूपाधिसत्त्वे न ज्ञानविभाजकनानात्ववदच्छिन्नाभावस्यप्रवेशप्रभृति नासिद्धोऽसामान्यतो नात्ववदच्छिन्नाभाववत्सा
ध्यकानुमाने उपाधिरूपाधित्वोपपत्तेः नाद्दशीसवाधेन सामान्यतः सिद्धसाधनतापत्तेरित्यर्थः । एव सति संयोगत्वावच्छिन्नाभाववत्साध्यकानुमाने उपा
धितानेन संयोगाभावेतराभाववत्सिद्धोऽपि सिद्धसाधनतापत्तिसम्भवेऽपि ज्ञानविभाजकनानातेपर्वतप्रवेशोऽव्यर्थ इति ध्येयम् । । ननु तथापि यद्धूमव
द्भुरिन्द्रियानाद्यसामान्याभाववत्त्वात्मानं निरवच्छिन्नद्दिनि कतदीय यावद्विरोध्यभावाप्रसिद्ध्यापाधेः साध्यव्यापकत्वाभावात्त्वाव्याप्तम् । सा
ध्यघटकगुणविभाजकजातेः साविषयकावृत्तित्वेनापि विशेषणीयत्वादिति ध्येयम् । इदमपि चिन्त्यते । एवं यत्र त्यादि कल्पेऽपि रू
पाद्यवृत्तितेनापि जातिविशेषणेतस्य वैयर्थ्ये तत्कत्वस्यपरित्यागानौचित्यात् । । यत्र तु कानाद्देवेनेत्यस्येतारम्भताधिगम
प्यतिजगदीशः । । तस्याप्यमाशयः । निरवच्छिन्नवृत्तित्वविशिष्टयावद्विरोध्यभाववत्त्वस्योपाधित्वे यत्रापि संयोगाभाववत्त्वादावुपाधि

साधकव्याप्तो व्यभिचारमाशंक्यैवं रूपविभाजकतावच्छिन्नाभावानिवेशं कृतं गगादीशेन· एतन्मते परस्परानवच्छेदकानवच्छिन्नप्रति
बन्धकावशिष्टपक्षसंयोगीयं चापादनेवाभावस्य पक्षेसत्वान्नव्यभिचारः· स्वावच्छेदकत्वेसम्बन्धावच्छेदकतावच्छेदकभेदवत्वस्वप्रतियो
गधिकरणसमवेतत्वोभयसम्बन्धेनयत्किंचिद्रूपाभावविशिष्टधर्मानवच्छिन्नप्रतियोगिकत्वावशिष्टतादीयप्याबहिर्विशेषाभावत्वमुपा
धिरिति·।=। नोपादेयवसदपिवेपाधिशिरोमणिः।। ।एवंव्याख्यानप्रसंगावेसभावात्रानीरित्यादौ वक्ष्यमाणप्रकरणनअथवेति
लताविशेषसम्बन्धावच्छिन्नवृत्तित्वानिवेशादेवसंभवति· इष्टत्वं न्यूनसत्वादित्यादाविव्याप्यद्रव्यत्वान्तरिकादिनिव्याप्तिः तिङ्क
गदीशः।। ।इष्टापिनत्वप्रकारकप्रमाविशेष्यत्वाभावस्यानतिरिक्ततया पक्षप्रतियोगितानवच्छेदकस्य साध्यतावच्छेदकस्य त्वा
दितिव्याप्तिनिरुक्ततयापार्थाभावस्यातिरिक्त ■ एवस्ङ्नस्यानोऽविसंजगदीशस्येति· नाइष्टत्वाभावाभावस्यानतिरिक्तत्वा
नापेक्षणाच्चेनइष्टत्वस्वरूपस्यैव कल्पयितुमुचितत्वेनैकभूइष्टत्वमिलनत्वप्रकारकप्रमाविशेष्यत्वाभावेऽपि किंचापितंवा

पाव्याप्तिन्योगिताधोभावोऽतिरिक्त इति गदाधर
महार्णवोगाव्यवच्छेदकस्त्वभावमपिप्रयोगं
कौतिमाप:।। १२

९ [illegible]

क्वचित्तथा विशेषणताविशेषसम्बन्धेन वर्त्तमानस्य तादृशाभावस्य प्रतियोगितावच्छेदकमेव साध्यतावच्छेदकमतो नाव्याप्तिरित्याशंक्य द्वयोर्भिन्नत्व
प्रकारकप्रमाविशेष्यत्वाभावस्याप्यतिरिक्तत्वस्य स्वऽपि तद्व्यभिन्नत्वप्रकारकप्रमाविशेष्यत्वेति अतो न काचिदनुपपत्तिरिति· तथापि सा
ध्यतावच्छेदकसम्बन्धेन [illegible] स्वप्रतिमत्त्वे तथाप्यविवक्षितमित्युक्तं जगदीशेन ॥ अस्यायमर्थः · साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताभाव
च्छेदकावच्छिन्नप्रकारताशालिज्ञानत्वावच्छिन्नप्रतिबध्यतानिरूपितज्ञाननिष्ठवैशिष्ट्यावच्छिन्नप्रतिबन्धकतावच्छेदकीभूतप्रकारतासम्बन्धेन हेतुम
त्त्वे विवक्षितमिति फलितम्· तथा च साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वानवच्छिन्नवैशिष्ट्य इति वाच्यम् विशेष्यतासम्बन्धेन घटाभावावविशिष्टभेदे
साध्ये घटाभावाविषयकत्वेनाव्याप्त्यादोषाभावाप्तेः· स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभाववत्त्वावच्छिन्नप्रकारतातदवच्छेदकी
भूतविशेषणताविशेषसम्बन्धेन हेत्वधिकरणवृत्तितादृशाभावस्य प्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वादिति· न च तथापि स्वरू
पसम्बन्धावच्छिन्नप्रतियोगिताकघटत्वाभावस्य कालिकसम्बन्धावच्छिन्नप्रतियोगिताकोऽभावस्तस्य स्वरूपसम्बन्धेन साध्यतायां ग
नत्वादिहेतावव्याप्तिः· साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावस्य साध्यतावच्छेदकसम्बन्धेन स्वप्रतियोगिता
× ४ घटाभावानतिरिक्ते न तथा कालिकसम्बन्धावच्छिन्नस्य प्रतियोगितावच्छेदकावच्छिन्नप्रकारताशालिज्ञानत्वावच्छिन्नप्रतिबध्यतानिरूपित

वच्छेदकीभूतघटत्वत्वविशिष्टवृत्तेः प्रतिबन्धकतावच्छेदकीभूतविशेषणताविशेषेणाहेत्वधिकरणवृत्तित्वात्तदवच्छेदकस्य साध्यता
वच्छेदकसत्त्वादिति वाच्यम् साध्यतावच्छेदकसम्बन्धेन यादृशप्रतियोगितावच्छेदकावच्छिन्नाभावप्रतिबन्धकतावच्छेदकप्रकारतावच्छेद
कसम्बन्धेन हेत्वधिकरणवृत्तित्वं यदभावस्य तदभावीयतादृशप्रतियोगितानवच्छेदकस्य साध्यतावच्छेदकत्वात्। अथवा स्वनिरूपितप्रति
योगितावच्छेदकावच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रकारतावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकीभूतस्वावच्छिन्न
प्रकारतावच्छेदकसम्बन्धावच्छिन्नहेत्वधिकरणवृत्तित्वावच्छेदको यत्संयदनुयोगित्वं तन्निरूपितप्रतियोगितानवच्छेदकत्वं तत्साध्यतावच्छे
दकत्वस्य साध्यतावच्छेदके विवक्षितत्वात्। स्वमनुयोगित्वं च निवेशनीयम्। । वस्तुतो व्याप्यवृत्तित्वमत्यन्ताभावाप्रतियोगित्वमित्यनं
जगदीशः। अत्रेदं चिन्त्यते। विषयितासम्बन्धेन गगनवदित्यस्य साध्यप्रमेयत्वादिहेतौ व्याप्तिः। स्वाश्रयसम्बन्धेनाभिधेयत्वं
सम्बन्धेन रूपवदन्यत्वस्य साध्यता यानि स्वरूपगगनान्यतरत्वहेतावतिव्याप्तिश्चेति वि ति निरूपकताविशेषसम्बन्धावच्छिन्नस्वप्रति
योगिताकसाध्याभावस्य हेत्वधिकरणे वृत्तित्वाभावेन हेत्वधिकरणवृत्त्यभावीयप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके

सत्वादिति । मेवञ्च साध्यतावच्छेदकसम्बन्धेन साध्यवत्ताग्रहविरोधिताघटकसम्बन्धात् । तादृशसम्बन्धावच्छिन्नत्वसाध्याभावावच्छि
त्वोभयाभावघटकेऽधिकरणसम्बन्धितावृत्त्यभावस्य प्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदकोऽभ्युपगतत्वात् इति । वस्तुतस्तु इत्थं
नियामकसम्बन्धावच्छिन्नत्वसाध्याधिकरणनिरूपितत्वोभयाभावघटकेऽधिकरणसम्बन्धितावृत्त्यभावस्य प्रतियोगितानवच्छेदकत्वस्य साध्य
तावच्छेदके विवक्षितत्वान्न कोऽपि दोष इति ध्येयम् ॥ । अथात्राभावाधिकरणत्वकाभावस्याधिकरणस्वरूपत्वेऽव्याप्यवृत्तिसाध्यकस्थलीय
संयोगघटत्वाभाववान् पटत्वादित्यादौ साधनसमानाधिकरणसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावात्मकसा
ध्यभेदीयप्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके सत्वेनाव्याप्तिरतस्तद्धारणाय साधनसमानाधिकरणाभावाया व्याप्यत्वाभावत्व
निरूपितप्रतियोगितानवच्छेदकत्वं साध्यतावच्छेदके वाच्यम् । तथा सत्वादिघटत्वाभावस्य संयोगसम्बन्धावच्छिन्नप्रतियोगिता
कयोभावत्वस्याविघटघटनावत्वरूपतया साधनसमानाधिकरणस्य घटाभावस्य संयोगसम्बन्धावच्छिन्नप्रतियोगिताकघट
त्वाभावाभावत्वरूपस्यान्यत्वाभावत्वनिरूपकप्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके सत्वेन पुनस्तत्राव्याप्तिरतस्तद्धारणा

यत्साधनसमानाधिकरणाभावीयात्यन्ताभावत्वनिरूपकसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकं साध्यताव
च्छेदकं व्याप्यम्। तथा चेयओः सत्तावत्त्वादित्यादौ साधनसमानाधिकरणाभावीयात्यन्ताभावत्वनिरूपकप्रतियोगितायाः सा
ध्यतावच्छेदकतादात्म्यसम्बन्धावच्छिन्नत्वाप्रसिद्ध्याऽव्याप्तिसंभवे इदन्त्वभावत्वस्याभावीनाधिकरणत्वरूपत्वे इति जगदीशग्रन्थासं
गतिरिति चेन्न व्याप्यवृत्तिसाध्यकस्थलीयस्तु प्रतियोगितायामत्यन्ताभावत्वनिरूपकत्वमप्युक्तसाधनसमानाधिकरणात्य
न्ताभावीयसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके विवक्षितत्वादिति। न च घट
भावत्वस्य तादात्म्येन साध्यतायां — — घटादिहेतावव्याप्तिः साधनसमानाधिकरणस्य घटत्वाभावात्मकघटभेदस्य साध्यभे
दात्मकतया तदीयसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वादिति वाच्यम्। हेतु
समानाधिकरणाभावीयहेत्वधिकरणवृत्तितावच्छेदकीभूतानुयोगितानिरूपितसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियो
गितावच्छेदकत्वस्य साध्यतावच्छेदके विवक्षितत्वान्न कोऽपि दोष इति। तथा चाभाववदत्यन्ताभावस्याधिकरणत्वरूपत्वेना
व्याप्तिसंभव इति ध्येयम्॥ ।

स्यप्रतियोगितयावृत्तिसम्बन्धावच्छिन्नाभित्याद्यघटाद्यभावस्यप्रतियोगिव्यधिकरण इत्यत्र जगदीशः ।
अत्रेयमापत्तिः पूर्वक्षणवृत्तित्वविशिष्टघटाभावाभाववानयं त्वादित्यादावव्याप्तिः सोऽयघटो नेत्थंयत्प्रतियोगित्वं संयोगसं
बन्धावच्छिन्नसंयोगे न प्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणं यत्स्वरादि तद्वृत्त्यभावीयसाध्यतावच्छेदकस्वरूपसम्बन्धा
वच्छिन्नपूर्वक्षणवृत्तित्वविशिष्टघटाद्यभावाभावप्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वात् । न चोक्ततावच्छेदकीभूतानुयोगि
तानिरूपितास्वसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितायां विवक्षणीयम् । तथा च पूर्वक्षणवृत्तित्वघटाभावाभावत्वस्वरूपा
नुयोगितानिहेतुमद्वृत्तितावच्छेदकानां तु पूर्ववृत्तित्वविशिष्टघटाभावत्वरूपानुयोगितैव तन्निरूपितत्वस्य पूर्ववृत्तित्वविशिष्टघटाभावा
भावनिष्ठप्रतियोगितायां न साध्यतावच्छेदकीभूतविशेषणताविशेषसम्बन्धावच्छिन्नपूर्वक्षणवृत्तित्वविशिष्टघटाभावाभावप्रति
योगितायामतो नाव्याप्तिरिति वाच्यम् कपिसंयोगविशिष्टघटाभावाभाववान् एतद्वृक्षत्वादित्यादौ अव्याप्तिः । न च कपिसं
योगविशिष्टघटाभावाभावस्य वृक्षे सत्त्वात् कथं कपिसंयोगविशिष्टघटाभावाभावसाध्यके तद्वृक्षत्वादित्यादौ कस्याव्याप्तिरिति

वाच्यम्. कपिसंयोगस्याव्याप्यवृत्तित्वेन वृक्षे कपिसंयोगविशिष्टघटाभावाभावस्यापि मूलावच्छेदेन सत्त्वाद्विशेषणस्याव्याप्यवृत्तितया
विशिष्टस्याप्यव्याप्यवृत्तित्वस्य ग्रन्थकृतैव व्याप्तिग्रहोपाये विवक्षितत्वात्. स्वीयघटभिसंप्रतियोगित्वं संयोगसम्बन्धावच्छिन्नं संयोगेन प्र
तियोगितावच्छेदकावच्छिन्नानधिकरणं यद्वृत्त्यधिकरणं वृक्षादि तद्वृत्तितावच्छेदकीभूतकपिसंयोगविशिष्टघटाभावाभावत्वं तत्पानुयोगि
तानिरूपितसाध्यतावच्छेदकीभूतविशेषणताविशेषसम्बन्धावच्छिन्नकपिसंयोगविशिष्टघटाभावाभावनिष्ठप्रतियोगितायाअवच्छेदकत्वस्य सा
ध्यतावच्छेदककपिसंयोगविशिष्टघटाभावाभावत्वे सत्त्वात्. अनधिकरणान्तस्य वैयर्थ्यभयेन हेत्वधिकरणवृत्तितायां निरवच्छिन्नत्वनिवेशा
संभवात्. न चैवं हेतुमद्वृत्तितावच्छेदकत्वेनावच्छिन्नवृत्तितावच्छेदकत्वं यद्यपि अनुयोगितायां विशेषणं देयम्. तथा च कपिसंयोगविशि
ष्टघटाभावस्य सर्वथाव्याप्यवृत्तितया कपिसंयोगविशिष्टघटाभावाभावाभावत्वरूपानुयोगितायां निरवच्छिन्नवृत्तितावच्छेद
कत्वाप्रसिद्ध्युदास इति वाच्यम्. कपिसंयोगाभावविशिष्टघटाभावाभाववान् एतद्वृक्षत्वादित्यत्राव्याप्तिप्रसङ्गात्. गगनपर
तारूपनिरूपितनिरवच्छिन्नवृत्तितावच्छेदकत्वस्य साध्याभाववत्येव सत्त्वात्. अत्र केचित्. स्वीयवृत्तिप्रतियोगित्वं यादृशसंबन्धावच्छिन्नं
तादृशसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नताभावानधिकरणं यद्धेत्वधिकरणं तद्वृत्तिसाध्यतावच्छेदकसंबन्धावच्छिन्नप्रतियो

गिताकाभावीयसन्निष्ठप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके विवक्षितत्वात् तथा च स्वीयघटनिष्ठप्रतियोगित्वं संयोगसम्बन्धावच्छि-
न्नसंयोगेन प्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणघटेऽधिकरणपटादिनिष्ठमिति साध्यतावच्छेदके विशेषणताविशेषसम्बन्धा-
वच्छिन्नपूर्वक्षणवृत्तित्वविशिष्टघटाभावाभावनिष्ठप्रतियोगिताकाभावीयाभावघटनिष्ठप्रतियोगितानवच्छेदकत्वस्य साध्यता-
वच्छेदके सत्त्वान्न तत्राव्याप्तिः न च घटाभाववानात्मत्वादित्यादावव्याप्तिः घटाभावाभावनिष्ठप्रतियोगित्वं कालिकसम्बन्धावच्छिन्नं का-
लिके न प्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणघटेऽधिकरणआत्मादिनवृत्तिसाध्यतावच्छेदके विशेषणताविशेषसं-
म्बन्धावच्छिन्नप्रतियोगिताकस्य पूर्वक्षणवृत्तित्वविशिष्टकालिकसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावाभावस्य कालिकसम्बन्धावच्छि-
न्नप्रतियोगिताकघटाभावाभावतया तदीयाया घटाभावनिष्ठप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वादिति वाच्यम्
अभावे साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वमपहाय प्रतियोगितायां साध्यनिष्ठसाध्यतावच्छेदकसम्बन्धातिरिक्तसम्ब- ल२
न्धावच्छिन्नत्वस्याभावनिवेशात् तथा च कालिकसम्बन्धावच्छिन्नघटाभावनिष्ठप्रतियोगितायामुभयासत्त्वात् न प्रतियोगितायां

लक्षणघटकत्वेनाव्याप्तिः। पूर्वक्षणावृत्तित्वविशिष्टघटाभावाभाववान्यत्वादित्यादौ घटनिष्ठप्रतियोगितायां साध्यनिष्ठत्वविरहेणो
भयाभावसत्वात् नत्वप्रतियोगितामादायैव लक्षणसमन्वय इत्याहुः। केचित्तु हेतुसमानाधिकरणाभावीयसाध्यतावच्छेदकसम्बन्धाव
च्छिन्नप्रतियोगितायां स्वप्रतियोगितावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणहेत्वधिकरणं
तादृशसम्बन्धावच्छिन्नतत्साध्यतावच्छेदकावच्छिन्नतदुभयाभावस्यैव साध्यतावच्छेदकावच्छिन्नतत्साभावविशिष्टोभयाभावस्थितिस
पा तावद्भावसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नतदुभयाभावस्यापि तत्सत्त्वीयत्वात् तथा च पूर्वक्षणावृत्तित्वविशिष्टघटाभा ×२
२ स्वस्वप्रतियोगित्वस्य स्वप्रतियोगित्वपदेनैव विवक्षितत्वात्। तथा च संयोगसम्बन्धावच्छिन्नघटनिष्ठप्रतियोगितायां साध्यतावच्छेदक
१ (ताभाववानित्यादौ संयोगसम्बन्धावच्छिन्नघटाभावीय पूर्वक्षणावृत्तित्वविशिष्टघटाभावाभावनिष्ठप्रतियोगितेयं लक्षणघटके
त्याहुः। नव्यास्तु साध्यतावच्छेदकसम्बन्धावच्छिन्नतत्साध्याभाववन्निरूपितत्वोभयाभाव ×१) सम्बन्धावच्छिन्नपूर्वक्षणावृत्तित्वविशिष्टघटपु
टाभावाभावाभावस्वरूपसाध्याभाववन्निरूपितत्वोभयसत्त्वेन लक्षणघटकत्वात्। पूर्वक्षणावृत्तित्वविशिष्टघटाभावाभावस्वरूपपूर्व
क्षणावृत्तित्वघटाभावात्मकतया तस्य तत्स्वप्रघटाभाववानातिरेकात्। न च द्रव्यत्वाभावे स्योपशोधनतावच्छेदकसमसम्बन्धावच्छिन्नप्रतियो

गिताकाभावएव इत्यभिमानात् यौगिकस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकत्वात् तथा च द्रव्यत्वाभावनिष्ठं यद् इत्यभिमानात् यौगिकस्वरू
पसम्बन्धावच्छिन्नप्रतियोगित्वं न असाध्यतावच्छेदकस्वरूपसम्बन्धावच्छिन्नत्वसाध्याभावनिरूपितत्वोभयाभावसत्त्वेन स्वप्रतियोगिता
वच्छेदक इत्यभिमानात् यौगिकस्वरूपसम्बन्धेन नाद्यप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यानधिकरणत्वं हि वोधिकरणद्रव्ये सत्त्वा
त् द्रव्यत्वस्वरूपस्य साध्याभावस्य लक्षणघटकत्वात् कथं द्रव्यत्वाभाववान् सत्त्वादित्यादौ न व्याप्तिरिति वाच्यम् यत्रात्मत्वप्रकार
कप्रमाविशेष्यत्वस्य तदात्मान् यौगिकस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकोभाववत्त्वस्य कालिकसम्बन्धावच्छिन्नप्रतियोगिताको
भावस्य स्वरूपेण साध्यतायामात्वादिहेतौ साध्याभावीयप्रतियोगित्वं तदात्मान् यौगिकस्वरूपसम्बन्धावच्छिन्नत्वेन तदभावप्रति
योगितावच्छेदकावच्छिन्नसामानाधिकरणहेत्वधिकरणेऽपि नेयमसाध्याभावान् यौगिकस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकात्म
त्वप्रकारकप्रमाविशेष्यसाभावसत्त्वेऽपि साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वे प्रकृतसाध्याभावनिष्ठाया प्रतियोगितायास्तदवच्छेदकत्वसाध्यताव
च्छेदके सत्त्वादव्याप्तिरनुद्धारणाय साध्यतावच्छेदकसंसर्गतावच्छेदकेतरधर्मावच्छिन्नसंसर्गतानिरूपितत्वसाध्याभावनिरूपितत्वो
भयाभाववत्प्रतियोगित्वस्य विवक्षितत्वात् तथा च तदात्मान् यौगिकत्वविशेषणताविशेषसम्बन्धावच्छिन्नात्मत्वप्रकारकप्रमावि

रोध्यत्वनिरूपितप्रतियोगितायाः साध्यतावच्छेदकसंसर्गतावच्छेदकेतरतादात्म्यानुयोगित्वावच्छिन्नसंसर्गतानिरूपितत्वसाध्याभावनिरूपितत्वोभयसत्त्वेन लक्षणघटकत्वान्न· किन्तु घटाभावीयप्रतियोगितायामेव तथात्वम्· तस्याः साध्यतावच्छेदकसंसर्गतावच्छेदकेतरसंयोगत्वावच्छिन्नसंसर्गतानिरूपितत्वेपि साध्याभावनिरूपितत्वाभावसत्त्वेन तादृशोभयाभावसत्त्वात्· तथा च द्रव्यत्वाभाववान् सत्त्वादित्यादौ द्रव्यभिन्नानुयोगिकत्वरूपसम्बन्धेन द्रव्यत्वाभावाभावो लक्षणघटकः· द्रव्यभिन्नानुयोगिकत्वरूपसम्बन्धावच्छिन्नायाः साध्याभावनिरूपितप्रतियोगिता तत्र साध्यतावच्छेदकसंसर्गतावच्छेदकेतरद्रव्यभिन्नानुयोगित्वावच्छिन्नसंसर्गतानिरूपितत्वसाध्याभावानिरूपितत्वोभयसत्त्वात्· किन्त्वभावान्तरमादायाव्याप्तिरिति संगच्छते· अत्र घटत्वान्न क्रियात्वादिरूपत्रैकालिकसम्बन्धेन साध्यतायां तत्क्रियात्वस्य हेतुत्वे; व्याप्तिः· तत्र स्वप्रतियोगित्वं यादृशसम्बन्धावच्छिन्नं तादृशसम्बन्धेन तत्प्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणवृत्तित्वाधिकरणत्वं द्वयाभावीयप्रतियोगितायां साध्यतावच्छेदकसम्बन्धघटितत्व तादृशसम्बन्धेन प्रतियोगिव्यधिकरणाभावप्रसिद्धिः· एतेन क्रियासमानकालीनत्रैकालिकसम्बन्धावच्छिन्नप्रतियोगिताकपदार्थ·

भावमादाय नाव्याप्तिः। विभिन्नकालीनवस्तुनः कालिकसम्बन्धेनाधाराधेयभावाकल्पनादिति वाच्यम्। एतत्कालासमानकालीन
पटप्रागभावस्य पूर्वक्षणवृत्तित्वविशिष्टघटाभावाभावाभावानतिरिक्ततया पूर्वक्षणवृत्तित्वविशिष्टघटाभावाभावरूपप्रतियोगिनः कालि
कसम्बन्धेन तत्क्रियायामधिकरणे ध्वंसस्य च प्रतियोग्यधिकरणाभावाप्रसिद्धेः। अत्रोच्यते। स्वप्रतियोगित्वं यादृशसम्बन्धावच्छिन्नं
तादृशसम्बन्धेन तादृशसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणत्वस्य हेत्वधिकरणे विवक्षितत्वात्। एतत्का
लासमानकालीनपटप्रागभावमादाय नाव्याप्तिः। एतत्कालासमानकालीनपटप्रागभावप्रतियोगिकः पूर्वक्षणवृत्तित्वविशिष्टघटा
भावाभावत्वनिष्ठप्रतियोगितायास्तादृशकालिकसम्बन्धावच्छिन्नत्वात्। पूर्वक्षणवृत्तित्वविशिष्टएतत्क्रियासमानकालीन
पटप्रागभावाभावनिष्ठकालिकसम्बन्धावच्छिन्नप्रतियोगिताको भावस्तु एतत्क्रियासमानकालीनपटाभावस्वरूपः। कथमतिरि
क एतेन संयोगादिसम्बन्धेन घटप्रागभावस्य विशेषणतासम्बन्धेन घटप्रागभावतादृशभेदाभावकल्पनापादयितया घटप्रागभावावच्छिन्न
वह्न्यादिरूपप्रतियोगिसामानाधिकरण्यप्रतियोग्यधिकरणाभावाप्रसिद्ध्या धात्मा धूमादित्वादावसम्भवतादवस्थ्यमि
हेत्वधिकरणवृत्तितावच्छेदकीभूतानुयोगितानिरूपितप्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणविवक्षायां [illegible]

त्वेपि स्वरूपसम्बन्धावच्छिन्नस्वाधिकरणावृत्त्यभावत्वस्य स्वस्वरूपतया पराभावस्य स्वस्वरूपसम्बन्धेन स्वाधिकरणावृत्तित्वग्रहादि
रूपप्रतियोगिसमानाधिकरणत्वेन यावद्धूमाभूमादित्वादेव व्याप्यत्वाविरोधेति निरस्तम्· एतद्घटाभावीयघटादिनिष्ठप्रतियोगितया
स्तादृशसम्बन्धानवच्छिन्नत्वात् इति ध्येयम्। ।प्राचां मते संयोगसामान्याभावेत्वात्म्यो मत्वे हेतुरुक्त इति जगदीशाः। ।अन्ये यमा
शू॰ इ॰ ना॰ न च कपिसंयोगवृक्षत्वान्यतराभावाभावमादाय कपिसंयोगाभाववान् वृक्षत्वादित्य[illegible] माव्याप्तिसम्बन्धे कथं तत्प्रति
सत्के मूहति वाच्यम्· वृक्षत्ववृत्तिकपिसंयोगान्यतरस्वरूपतया वृक्षत्वकपिसंयोगान्यतराभावस्य हेतुसमानाधिकरण
कपिसंयोगान्यतमसाध्याभावप्रतियोगितानवच्छेदकत्वात्· न च तथापि कपिसंयोगरूपांशे वृक्षवृत्तिकपिसंयोगवृक्षत्वान्यतरस्व
पाभावाप्रतियोगितावच्छेदकीभूतवृक्षवृत्तिकपिसंयोगवृक्षत्वान्यतराभावत्वावच्छिन्नानधिकरणत्वाद्वृक्षस्यैतद्दोषताद
वस्थ्यम्· न च वृक्षवृत्तिकपिसंयोगवृक्षत्वान्यतराभावाभावो वृक्षत्वस्वरूपो ऽतिप्रसक्त्याभावादिति वाच्यम्· कपिचरणकपिसंयो
गवृक्षत्वान्यतराभावाभाववानिति प्रतीत्यनुपपत्तेरिति वाच्यम्· यत्प्रतितावच्छिन्नानधिकरणं हेतुमानिति सम्भवति तत्प्रतियोगिता

२६

हे॰ टि॰

ास्ववृत्तिपदार्थविभाजकीभूतधर्मानधिकरणप्रतियोगिताकाभाववृत्तित्वे निवेश्यम् । न च गुणसामान्याभावनिष्ठप्रतियोगित्वमपि
मताद्, वं विशिष्टस्यातिप्रसक्तेनयास्ववृत्तिपदार्थविभाजकीभूतधर्मानधिकरणो यः पूर्वक्षणवृत्तित्वविशिष्टगुणसामान्याभावाभा
वस्तत्प्रतियोगियोगिताकाभाववृत्तित्वादिति वाच्यम् । निरुक्तप्रतियोगितायां स्ववृत्तिपदार्थविभाजकीभूतधर्मानधिकरणवृ
त्त्यनुयोगितानिरूपितत्वस्याविवक्षितत्वात् । स्वपदं हि गुणसामान्याधिकरणाभावपरम् । तथा च स्ववृत्तिपदार्थविभाजकीभूतयद्गुण
त्वानधिकरणं यद्वृत्तित्वादि तद्वृत्त्यनुयोगितानिरूपितत्वं अन्यतराभावनिष्ठप्रतियोगितायामस्त्येवात एवं लक्षत्वादेहे
तावन्यतराभावाभाववत्तादात्म्याप्रसिद्धावात्मत्वं नानुधावनामिति भावः । आत्मत्वादेहेतु कस्थले गुणसामान्याभावनि
ष्ठप्रतियोगितायां स्ववृत्तिपदार्थविभाजकीभूतगुणत्वानधिकरणवृत्त्यनुयोगितानिरूपितत्वाद्व्याप्तिः [illegible]ति ध्येयम् । अथ कपि
संयोगप्रतियोगितावच्छेदकगुणसामान्याभाववत्त्वमात्रे कपिसंयोगाभाववत्तान्तमत्त्वादित्यादौ व [illegible]गु
णसामान्याभावाभावस्य घटादिवृत्तिनानागुणकूटप्रतियोगिकपघटादिवृत्त्येकत्वादिकं न्यमप्याः सर्ववृत्तानन्तापवादादीति वृत्तं ।

जन्यज्ञानविशिष्टैकत्वाभाववानात्मत्वादित्यादौ जन्यज्ञानविशिष्टैकत्वसाध्याभावप्रतियोगितावच्छेदकगुणसामान्याभावत्वावच्छि-
न्नानधिकरणं हेत्वधिकरणमिति अव्याप्तिरिति चेत् जन्यज्ञानाविशिष्टैकत्वाभावाभावस्य जन्यज्ञानविशिष्टैकत्वमपेक्ष्य लाघवा-
ज्जन्यज्ञानस्वरूपकल्पनीयम्। अत्रेदं समाधानम्। कपिसंयोगाभाववानात्मत्वादित्यादौ तत्[illegible]पिसंयोगान्यत्वे तत्कपिध्वंसान्यगुणा-
न्यगुणाभावः तस्यापि कपिसंयोगरूपसाध्याभावप्रतियोगितावच्छेदकत्वात् तद्वच्छिन्नानधिकरणात्मनि मानसत्वान्नाव्याप्तिः सं-
गतेति। न चैवं कपिसंयोगाभावसाध्यके द्रव्यत्वादिहेतुकस्थले तत्कपिध्वंसान्यसमवेतान्यसमवेताभावत्वस्यापि कपिसंयोगसा-
ध्याभावस्य प्रतियोगितावच्छेदकतया तद्रूपावच्छिन्नानधिकरणद्रव्यस्य सत्त्वात् अव्याप्तिसम्भवे तदुपेक्षायां बीजाभावादि-
ति वाच्यम्। द्रव्यत्वे कपिसंयोगान्यतराभाववद्धवारणार्थं येव महूसणात् तद्वृत्ति वाच्यम्। अत्र च प्रतियोगितावच्छेदकधर्मेणावच्छि-
न्नसाध्यतावच्छेदकताघटकत्वारम्भणाति व्याप्तिरित्यलं जागदीशी। ।अथात्र साधनसमानाधिकरणात्यन्ताभावस्यैव कालिक-
कालिकसम्बन्धेन स्वप्रतियोगितावच्छेदकविशिष्टगुणादिसमानाधिकरणत्वात्प्रतियोगिव्यधिकरणाभावाप्रसिद्धा समवाये

गगनत्वान्महाकालत्वादित्यादावव्याप्तिसम्भवे धूमवान्वह्नेरित्यादावतिव्याप्तिभावनं संसर्गभविष्यतीति चेन्न · तादृक्स्थले गगनादिनिष्ठाभाव
मादायैव लक्षणसमन्वयात् · केनापि सम्बन्धेन [illegible] योगितावच्छेदकीभूतगगनाविशिष्टस्य महाकालसम्बन्धित्वविरहात् · नन्वसा
ध्यतावच्छेदकसम्बन्धेन प्रतियोग्यधिकरणत्वाप्रसिद्धौ घटादौ तादृशाभावस्य लक्षणाघटकत्वाभिप्रायो यम् · महानसानुयोगिकसंयोगे
न वह्नेः साध्यतायां धूमादिहेतावव्याप्तिवारणाय प्रतियोगिव्यधिकरणत्वस्य ग्रन्थकृतैव प्रागुक्तत्वादिति ध्येयम् ।   । स्वप्रतियोगितावच्छेद
कधर्मेण स्वाश्रयाधिकरणीभूतेत्यारभ्य हेतुमतो वाच्य इत्यन्तं जगदीशाः ।   । अत्र स्वाश्रयाधिकरणत्वं साध्यतावच्छेदकसम्बन्धेन ग्राह्य
म् · अन्यथा धूमवान्वह्नेरित्यादावतिव्याप्तिः · कालिकसम्बन्धेन स्वाश्रयाधिकरणं यद्घटो गोलकं तन्निष्ठाधिकरणतानवच्छेदकत्वस्या
धिकरणतावच्छेदकत्वस्य द्वयोर्व्यतिरेकस्य प्रतियोगितावच्छेदकत्वसत्त्वान्न तन्नास्ति भेदवत्त्वस्य हेतुमत्यसत्त्वात् · एवमधिकरणतानवच्छेद
कत्वविशिष्टाप्यधिकरणत्वं साध्यतावच्छेदकसम्बन्धेन ग्राह्यम् · अन्यथा तु ज्ञानत्वविशिष्टत्ववान् ज्ञानत्वादित्यादावतिव्याप्तिः · स्वा
श्रयाधिकरणीयज्ञानं तन्निष्ठविषयितासम्बन्धावच्छिन्नाधिकरणतानवच्छेदकत्वाभावसत्त्वात् तादृशयोर्व्यतिरेकसत्त्वात् तन्निष्ठभेदवत्त्वस्य हे
तुमत्यसत्त्वात् ।   । अत्रायं पूर्वपक्षः · वह्निप्रतियोगिकसंयोगेन वह्नेः साध्यतायां धूमादिनाऽभावाप्रसिद्ध्याऽव्याप्तेः साध्याभावानिरुक्तौ

अत एव केवलान्वयिग्रन्थोऽनवधानमूलं चापपरास्तः। गदाधरव्याख्याने

भावप्रतियोग्यधिकरणतायाः साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वाप्रसिद्धेः साध्याभावप्रतियोग्यधिकरणतायां तत्सम्बन्धावच्छिन्नता
प्रसिद्धावपि साध्यतावच्छेदके स्वाभयाधिकरणतानवच्छेदकत्वाधिकरणतावच्छेदकत्वरूपोभयाव्यतिरेकसत्वान्न घाकिमद्देस्य हेतुमत्य
सत्वादभावाप्रसिद्धेः एवमधिकरणतानवच्छेदकत्वमित्यत्रापि तथा न च साध्यतावच्छेदकसम्बन्धातिरिक्तसम्बन्धावच्छिन्नत्वसाध्यनि
रूपितत्वेन दुभयाभावदलस्य स्वाभयाधिकरणतायां निवेशान्नाप्रसिद्धिरेवमधिकरणतावच्छेदकत्वमित्यत्रापि तथा वाच्यम् वह्निप्रतियो
गिकसंयोगसम्बन्धेन प्रमेयसाधकधूमादिसद्धेतावप्रसिद्धेः वह्न्याद्यतिरिक्ताभावप्रतियोग्यधिकरणतायाः साध्यतावच्छेदकातिरि
क्तसम्बन्धावच्छिन्नत्वप्रमेयत्वनिरूपितत्वोभयोः सत्वात् वह्निप्रतियोगिकसम्बन्धावच्छिन्नवह्न्यभावप्रतियोग्यधिकरणतायां स
त्वेपि तत्र घाकिमद्देस्य हेतुमत्यसत्वादिति चेत्सत्यम् साध्यतावच्छेदकसम्बन्धेन साध्याधिकरणवृत्तिसाध्यनिरूपितत्व साध्यतावच्छे
रिम् दकसम्बन्धातिसम्बन्धावच्छिन्नत्वोभयाभावस्य विवक्षितत्वात् यद्वा घभावप्रतियोग्यधिकरणतायामेव साध्यतावच्छेदकसम्बन्धे
न साध्याधिकरणवृत्तिसाध्यानिरूपितत्वाभावद्वयोभयाभावस्येत्यादि तात्पर्यम्। ॰ ।अत एव गोत्वसाध्यकदशायामित्यादिविरो
तमपि। नन्वयं गोरित्यत्र मितिरित्या[illegible] ऽन्यगवेतरादृत्तित्वमित्यत्र न गदीत्याः। ।अन्यथा तत्सम्बन्धेन गोत्वसाध्यकस्थले सा

स्ताद्गोरश्वयवत्वेन समवेतत्वसम्बन्धेन तस्य सकृत्त्वम् । तथा च गवेतरनिरूपितसमवेतत्वसम्बन्धावच्छिन्नवृत्तित्वाभावस्यैव तद्धेतोर्व्यापकतया
गोत्वव्यापकगवेतरासमवेतत्वहेतोर्व्याप्तिस्वरूपस्य नानुचितं गगनादेरस्त्येति चेन्न गोप्रतिपाद्यपृथिवीसाधकसामान्यादेः समवेतत्वात् स्थला
भिन्नापेतद्भिन्नत्वगगनादिनि समवायेन तस्यादिहेतुकस्थलसम्प्रायेण वनक्षत्वेनादिश्यते प्रमेयम् । । ननु चैवं यथा समवायेन यत्र घटाभावादौ तन्नाधिकर
णत्वभिन्नत्वात्समानाधिकरणत्वासम्भवात् । तादात्म्यसम्बन्धेन गगनाभावाधिकरणत्वसम्भवोपि धर्मविशिष्टप्रमेयत्वान्तस्य साधित्वादेरपादा
व्याप्तेरिति भगदीशः । । ननु तद्धटस्य स्वप्रतियोग्यधिकरणाभावाघटितत्त्वात् घटाभावो प्रतियोगिव्यधिकरण इति गगनादत्राम्
भावस्य स्वप्रतियोगिव्यधिकरणाभावघटितत्वमिति चेन्न स्वप्रतियोगिव्यधिकरणाभावघटितत्वम् । मामिति तु तथा प्रतियोगिव्यधिकरणाभावघटितमवेतत्स्थल
नाक्षम् । तथा च यथा प्रतियोगिव्यधिकरणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकधर्मभिन्नत्वं साध्यतावच्छेदकधर्मे निवेश्यापि म् । स्रो
कनक्षेत्रस्यपर्यन्ताद्यधिकृता कृतस्तथा च स्वप्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणहेतुमन्निष्ठसाध्यताव
च्छेदकावच्छिन्नप्रतियोगिताकाभावीयतत्तत्प्रतियोगितावच्छेदकसम्बन्धभिन्नत्वं साध्यतावच्छेदकसम्बन्धे निवेश्यापि म् । कलन

ध्वंसस्याविपरीत्यकतं नाव्यते इत्याशङ्कावतां जगदीशेन घटाद्यभावोपीति ग्रन्थस्योक्तत्वादिति ध्येयम्· प्रतियोगितासम्बन्धेन घटसाध्यकघ
टाभावहेतुकस्थले एवं तथोक्तत्वात् घटाभावस्य हेत्वधिकरणे तथा समवायेन घटानधिकरणत्वादित्याहुः। ।अथहेतुमन्निष्ठाभावी
यप्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावीयत्वारम्भके नापि सम्बन्धेन हेतुमत्तान्तसाध्यतावच्छेदकावच्छिन्ना
नधिकरणत्वाभाव इति जगदीशः। ।अगत्यधिकरणविशिष्टसामानाधिकरण्यसम्बन्धेन तत्समवायेन तद्धित्वाधिकरणे समवायेन होमि
त्ताद्युत्प्रमेयं नसरत्वादि तत्प तद्धित्वाद्यकं नतुप्रमेयकं परमाणौ तद्धित्वस्याप्यभावात्· नच सामानाधिकरण्यसम्बन्धेन वोद्धव्यादि
ह्नेत्· ततदभावो हेत्वधिकरणे समवायेन तादा· प्रतियोगिव्यधिकरणत्वस्य व्याप्तिः· साध्यवत्त्वं तादात्म्येन वोध्यम्· समवाये
नतादध्वत्वे स्थूलपदस्य व्यभिचारवारकत्वेन व्यर्थत्वात्तादात्म्येन तादध्वत्वस्य स्थूलपदानुक्तौ प्रमेयके व्यभिचारापत्तेः· ननु तादात्म्येना
ध्वस्य च सत्त्वेऽपि तादात्म्येनाभावात्· नच समवायेन साध्यत्वे किं स्थूलपदेनेति वाच्यम्· तथा सति व्याप्यसाध्यकत्वेन प्रकृतानुपयोगात्
घ्वणुक तत्पे हेत्वधिकरणे साध्यस्य तादात्म्येन सध्येनाभावसत्त्वात्· भवेयमाशङ्का· विवयिताससम्बन्धमादाय तद्धित्वादिविशिष्टप्रमे

व्या.टी. ४८

यस्यानधिकरणत्वस्य हेत्वधिकरणसत्वे नप्रतियोगितावच्छेदकत्वसम्बन्धा[illegible]त्वस्य साध्यतावच्छेदकसम्बन्धेसत्वात्तत्राव्याप्तिविरहात् इति
चेन्न विषयित्वादेः संसर्गत्वमानाभावात् क्वचित्तु ज्ञानत्ववत्ता-पत्तत्वस्य समवायेन साध्यतायां तज्ज्ञानत्वस्य समवायेन हेतुतायाम
व्याप्तिः तत्र केनापि सम्बन्धेनानधिकरणत्वाविरहात् न च महाकालानुयोगिककालिकसम्बन्धेनाधिकरणत्वात्ताव्याप्तिरिति वाच्यं
तत्रावृत्ती स्वरूपेण संसर्गतानभ्युपगमादिति चेन्न दिक्कालविशेषणतासम्बन्धेन साध्यानधिकरणत्वस्य गगनादेः सत्वादिति ध्येयम्
। ।कालोघटवान् महाकालत्वादित्यादावव्याप्तिवारणाय साध्यतावच्छेदकसम्बन्धतासामान्ये यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रति
योगिकत्वस्यापि विवक्षितत्वम् उभयाभावमप्रसिद्ध्य विशिष्टाभाववन्निवेशे कालोघटवान् महाकालत्वादित्यादावव्याप्तिर्गगनप्रतियो
गिकत्वविशिष्टमहाकालानुयोगिकत्वाप्रसिद्ध्या गगनाभावस्य लक्षणाघटकत्वादिति नव्यदत्ताः। ।तन्न सङ्गच्छते महाकाला
भावस्येव लक्षणाघटकत्वात् तादात्म्यसम्बन्धेन च महानसानुयोगिकत्वविशिष्टमहाकालप्रतियोगि[illegible]त्वसम्भवात् अत्र केचि
त् तादात्म्यकालिकान्यतरसम्बन्धेन साध्यतावच्छेदकस्थलतावताप्यव्याप्तेरपरिहारात् न व्यापकताव्याप्तत्वादव्याप्यमिति जगदीशः

ग्रन्थासङ्गतिरिति वाच्यम् प्रकृतसाध्यकहेतुकव्याप्तिपरत्वात्तत्सङ्गतेरित्यलं पल्लवितेनेति वदन्ति · ध्वनितायामप्यधिकरणस्यानुगमकः · हेत्वधिकरणत्वानिष्ठप्रतियोगितानवच्छेदकसा[illegible]नावच्छेदके विवक्षितत्वात् ध्वनितत्वं च स्वावच्छेदकावच्छिन्नाधिकरणत्वस म्बन्धेनावच्छिन्नस्वनिरूपकावच्छेदकताकभेदवत्त्वसामान्यमिति बोध्यम् ॥ ॥इति सिद्धान्तलक्षणजागदीशी ॥ शुभमस्तु

४१२८

[illegible]

श्री ५ को सरकार

श्री. ॥स्वरूपसम्बन्धेन ज्ञानत्वविशिष्टस्य समवायेन साध्यत्वे ज्ञानिरूपसद्धेतौ सामानाधिकरण्यसम्बन्धेन ज्ञानत्वविशिष्टस्याभावसाध्यायाव्याप्तिवारणाय साध्यतावच्छेदकताघटकसम्बन्धनिवेशः। उक्तान्यतरसम्बन्धेन साध्यतावच्छेदकतायां सत्यामव्याप्तिवारणाय साध्यतावच्छेदकताघटकसंसर्गतावच्छेदकत्वप्रवेशः। वह्नित्वप्रतियोगिकसमवायेन वह्नित्वविशिष्टस्य विषयितया साध्यत्वे तद्विषयकज्ञाने वह्नित्वसमवायेन वह्नित्वविषयकज्ञानान्यतरस्य हेतुतायामव्याप्तिवारणाय सूत्रधारकपर्याप्तिनिवेशः। तादृशरीत्या साध्ये नाद्यहेतावव्याप्तिवारणाय धिक्पारकपर्याप्तिनिवेश इति ध्येयम्। पत्र १ पङ्क्ति ६ पर्याप्ति ॥ ॥तच्च साध्यतावच्छेदकतावच्छेदकतासम्बन्धानवच्छिन्नप्रतियोगितानिवेशनैव तदधिकरणाश्रितयाध्येयम्। गगनाभाववान वाच्यत्वादित्यादौ सामानाधिकरण्यघटितसामानाधिकरण्यसम्बन्धेन तद्घटान्यत्व। विशिष्टगगनाभाववत्वविशिष्टाभाववत्त्वे घटस्यान्यहेतौ निरूपकत्वरूपत्वान्न च साध्यतावच्छेदकप्रतियोगितावच्छेदकत्वात्। इति। पत्र २ पृ १ पं २ ॥ ॥ ॥समक्रूपे समवायेन ज्ञानत्वत्वच ज्ञानत्वविशिष्टस्य विषयितया स्वरूपतो ज्ञानत्वविशिष्टस्य तादात्म्येन साध्यतायां समवायेन ज्ञानत्वविशिष्टविषयितया ज्ञानत्वस्वरूपेण ज्ञानत्वविशिष्टाभाववत्त्वादाव्याप्तिः। यदि चान्तरवाच्छिन्नावच्छेदकतापदेन स्वावच्छेदकसम्बन्धावच्छिन्नत्वं स्वसामानाधिकरण्यसम्बन्धेन साध्यतावच्छेदकताविशिष्टावच्छेदकत्वनिरूपितत्वं निवेश्यते तदा न दोषः। अग्रेऽपि साध्यतावच्छेदकस्थले घटाभावसंग्रहाय तावच्छेदकसम्बन्धनिवेशः।

॥ ॥प. ८ प १ पं ८ ॥ ॥

यद्यपि स्वरूपत्वेन न्यूनवृत्तिजातिमत्त्वान् स्वरूपादित्वादो नीलपीतादिभाववता दायाद्व्याप्तिदानासङ्गतिः तथोक्तसम्बन्धेन निरवच्छिन्नावच्छेदकत्वाभाव
त्वात् तथापि विशेषणरूपेण संसर्गतानभ्युपगन्तृमते यत्किञ्चित्साध्यतावच्छेदकविशिष्टान्यत्वस्यावच्छेदकताया निवेशनीयत्वात् बोधि
ध्यं च वह्निविष्टावच्छेदकत्वासमानाधिकरणाहीनित्वेन यत्सम्बन्धेन इत्यन्तभागः साध्याभाववत्कृहत्सातव्येयम्॥ प ६ प २ पं ६॥
फलितसप्रतियोगिता सम्बन्धेन महानसीयवह्निहेतुतायां न च अस्ति किं त्वत्र साध्ये कृत्व्याप्तिः हेत्वधिकरणीभूतवह्निमहानसीयो भास्वी
तिप्रतीतिसिद्धा भावानवाभावप्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके सत्वान् प्रतीतिभेदेनाभावस्यैव भेदादिति । प.१२ पृ
२। पं.२। ।केचित्तु महाकालभेदे साध्ये कालिकेन घटादिहेतावतिव्याप्तिः स्वाश्रयाधिकरणीभूतमहाकालनिरूपिताधिकरणतानव
च्छेदकत्वविशिष्टाधिकरणतानावच्छेदकत्वाप्रसिद्धा महाकालस्य च भिन्नत्वाभावत्वात् महाकालान्यत्वविशिष्टघटत्वादेरपि मह
कालानिरूपिताधिकरणतावच्छेदकत्वाद्गगनस्वयं वच्छेदमानत्वात् अन्यतोऽधिकरणतावच्छेदकत्वस्य गगनेऽप्रसिद्धत्वात्
गगनादेर्नियतोऽपि केवलघटत्वादेरप्रसिद्धत्वात् । प.१२ पृ.२ पं.८। ।सम्बन्धानिवेशे कालिकेन नित्यत्वाभेदे साध्ये स्वरू
पादिसम्बन्धितावच्छिन्नसामानाधिकरण्यसम्बन्धेन नित्यज्ञानान्यत्वविशिष्टसत्ताहेतौ केऽव्याप्तिः स्वाश्रयाधिकरणनित्यज्ञाननिष्ठाधिकर

रातानवच्छेदकत्वेपि सामान्यतोधिकरणतावच्छेदकत्वस्य सत्वात्. समवायादिसम्बन्धावच्छिन्नाधिकरणतावच्छेदकत्वस्य तादृशाविच्छिन्नस
मात्वेऽस्वीकारात्. अधिकरणतावच्छेदकत्वस्य तत्सम्बन्धावच्छिन्नत्वनियमः:. अत एव परव्याप्तिरतोऽधिकरणतानवच्छेदकत्वेऽप्यत्रापि सम्बन्धेन्यनि
वेशूतिध्येयम्: । प. १३ प. १ पं. २ । । अत्र धूमस्य साध्यतायां वह्निधूमगतैकापेक्षा बुद्धिविषयत्वरूपस्यादित्वस्य हेतुतावच्छेद
कत्वे धूमवान् वह्नेः आहू धूमो भवतु साध्यत्वेन व्याप्तिः. तादृशहेतुतावच्छेदकपर्याप्त्यनवच्छिन्नावच्छेदकीभूतवह्नित्वेऽसिद्धस्यैकत्वात्यसत्वादि
त्यभिधेयम्: प १३ प १ पं १ । । अथैवं कल्पे स्वाश्रयाधिकरणीभूतया नेकाधिकरणतावच्छेदकत्वसामान्यतोऽधिकरणतानव
च्छेदकत्वघटितदन्यतरत्वं इति पक्षीयेरणा नैयायिकोपनोपनेयो उभयाभावाभिधेयत्वं प्रसिद्धिरिति चेन्न. अवच्छेदकत्वस्य भेदघटितत्वे नाभाव
वात्मेः. वस्तुतस्तु विवक्षिता सम्बन्धेन पक्षादि हेतुकेऽधिकरणतानवच्छेदकत्वाप्रसिद्ध्या व्याप्त्याव्याप्तेः सर्वस्यैव निरुक्तानन
हृपिताधिकरणतावच्छेदकत्वात्. ममत्वधिकरणतानवच्छेदकत्वघटकाधिकरणतायां धर्मत्वस्य प्रविष्टत्वात् स्वाश्रयाधिक
रणीभूतदन्यत्वविशिष्टपदत्वापेक्षयाऽनेनाधिकरणतानवच्छेदकत्वस्याप्रसिद्ध्या दोषाभावम्: । प १३ प २ पं ८ । । । २

अत्र नव्याः । समानाधिकरण्येन सम्बन्धेन तत्पुरुषीयसंयोगाभाववत्ताबुद्धित्वमिति तत्पुरुषीयसंयोगाभावबुद्धिः प्रकृतं तत्र बाधबुद्धेरेव
नाहार्यत्वेऽप्यलौकिकत्वात् । नियतज्ञानताधारतो तत्प्रतिबध्यकत्वाभावात् । प्रतियोगिग्रहोत्पत्तिदशायामपि तद्वैशिष्ट्यावगाहित्वात् । तत्र मेयः
पर्यन्तानुधावनं नावश्यकमिति । अत्र सामग्री[illegible]त्वमावश्यकत्वं तत् । किन्तु प्रतियोगिन उपलब्धियत्नतः प्रत्यक्षात्मकं भावत्वप्रतियोगिग्रहणे
न च संयोगवत्त्वप्रतिबन्धकत्वमिति । आदिना द्रव्यत्वादिपरिग्रहः । तेन सामग्रीसत्त्वदशायां नावगाहित्वं सम्भावयतीति प्राहुः । प १४ ८ १ पं ४ ॥
॥ ॥ व्यापकतावच्छेदकधर्मस्यापि पर्याप्तप्रतियोगितावच्छेदकत्वे व्यासज्यवृत्तितायाः स्वमतानाय । तस्येति तन्नेयः । अतिप्रसक्ताधिकरणे
वा तन्निष्ठधर्मावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नप्रतियोगिताकपर्याप्तेरवच्छेदकत्वं तदवच्छेदकत्वान्तरेतराः । तदवच्छेदकत्वे
विषयतावच्छेदकत्वं तस्याविशेषो वा । तत्पर्याप्तिसम्बन्धेनाभावाद्देवदत्ते । एतच्च सामान्याभावग्रहेऽभावाद्देवदत्त्वायाः
तत्तनावच्छेदकत्वेऽपि पर्याप्तिसम्बन्धेनासत्त्वेऽपि घटाभावादिति जगदीशेनाप्युक्तम् । प १४ ८ २ पं ८ । । ।
। । तद्वत्तया विषयीकृत्य कारकज्ञानेऽवच्छेदकतन्निष्ठम् । तन्निष्ठावच्छिन्नत्वविषयित्वसम्बन्धावच्छिन्नाभावकूटसत्तान्तः सम्बन्धी
तदवच्छिन्नघटत्वावच्छिन्नाभावसत्त्वाधिकरणः पर्याप्तिः तदवच्छिन्नविषयत्वव्याप्तितत्तदवच्छेदकधर्मसम्बन्धावच्छिन्नाभिके

रूपत्वं नान्वयोति। तत्रत्यघटाकिंचित्वावच्छिन्नाभावस्य लोके दृष्टो घटाभावादितिवाच्यम्। तादृशसम्बन्धावच्छिन्नाभावानभ्युपगमा
त्। समवायसम्बन्धावच्छिन्नत्वादिकं ह्येकत्वाद्युद्धृतप्राहुः। अत्रेदमवधेयम्। अनुयोगितायामभयावृत्तित्वांशे निवेशनीयम्। इति
त्वेऽसामान्याधिकरण्यघटत्वनिरूपितप्रतियोगितासम्बन्धेन। स्वसमनुयोगितानात। समानियतभावेप्यभावादायदोषः। अनुयोगि
ज्ञानः। तत्संयोगाभावस्वरूपानुयोगिताकअपिसत्वाभावद्धर्मितयोभयावृत्तित्वविरहात्स्वरूपासिद्धिरेवायम्॥ ॥
।संयोगसमवच्छिन्नप्रतियोगिताव्यापकः। तत्तत्सम्बन्धावच्छिन्नात्वच्छिन्नाभाववानित्यर्थः। व्यापकत्वं च स्वनिष्ठाभावप्रतियो
गितावच्छेदकत्वसम्बन्धेन। प० ८० १ पं० १। ।स्याच्चेत्संयोगेनरावच्छेदेनाभियातात्वसंयोगोत्वजातेतदवच्छेदेनाभयातात्वसंयोग
भावस्य रसत्वात्। तदवच्छिन्नवृत्तितातापानिरूपकाभय सम्बन्धेनानुवृत्तिअभियातात्वाभाववत्वात् धर्मितवच्छेदनतयाव
दोतादृशोऽननुगतावच्छिन्नाभियातात्वाभावरूपत्वस्वरूपवन्तं। इत्यादीनां घटेऽव्ययवास्मनादृकेनापदेशैकसंयोगस्वत्वात्। निरू
पकसम्बन्धेनयात्किंचित्संयोगाभावविशिष्टधर्मितावच्छिन्नवृत्तितायाः कुड्येसत्वेनोपाधेर्व्यापकता भंगः। इत्यतआह

चाभिघाताभावकूटध्वनितापाध्वंसानवच्छेद्या। किं विशिष्टाभिघाताभावविशिष्टधर्मावच्छिन्नत्वात्। द्वितीयस्य सम्बन्धानवेद्यः तृतीयस्यानि-
ताया निरवच्छिन्नतया धर्मिग्राहकत्वान्न दुष्प्रवेशः अभिघाताभावकूटे ध्वंसध्वनितासंग्रहाय प्रथमं न प्रवेशः। प ९ प ३
पं ४। ।केचित्तु तदवच्छिन्नाभावत्वं तत्सम्बन्धस्वविशिष्टसामान्यकत्वमिति पारिभाषिकं लक्षणाभिप्रायेणोदर्शितं चेन्न। तद्
घटध्वंसत्वस्य ध्वंसाभावाभावसाधारणत्वात्तत्प्रतियोगिकाभावस्यासम्भवेनाघटध्वंसाभावासङ्गतेः। कोऽपि तु अभावत्वसाध्यके प्रतियोगिकाभाव
साध्यके तावसात् द्रव्यभिन्नत्वे तद्धर्मकरणानामनुपपत्तिः प ५ द प ९ पं २। । ।नन्वाद्यं प्रतियोगितावच्छेदक[illegible] यथाविध-
पिनिरूपकलिपतारतासम्भवः भगगमकसोलापदवत्तादेरतः पर्यवसायाः संसर्गतानावच्छेदत्वे तत्तपवानवानवच्छिन्नात्। प ५ प २ पं ६
। ।साध्यवद्वृत्तित्वपदेन साध्यवद्वृत्तित्वसामान्यतावृत्तित्वतामात्रस्पतोवृत्तित्वत्वस्याभावविवक्षणात्। किं चोक्तस्थले साध्याभा-
वस्य गगनत्वस्वरूपस्य स्वीकारेणाद्रव्यत्वादौ प्रत्ययभावप्रसङ्गः अप्रसक्तेः चेति अतिरिक्तत्वस्वीकारेऽप्येतयानदोषत्वात्। ।
प ५ प २ पं ७। ।परे तु साध्यतावच्छेदकं यत्साध्यवत्वानिरूपितं तद्वृत्तिकं यद् तु मान्निरूपितसम्बन्धित्वाभावमिति विवक्षणान्नदोषमा-
हुः। तन्न तु साध्यवद्वृत्तित्वनिरूपिततत्साध्याभाववत्त्वोभयाभावानवैशिष्ट्यान्नदोषः। अत्र क्रमः स्वरूपावारणस्य प्रागपि
ताभ्यां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वानवेशावेयर्थ्यात्। हेतुमद्वृत्तिसामान्यतो वृत्तित्वोभयाभाववत्त्वे हेतावधिकं तथा[illegible]

पानिवेशांगी[illegible]र्. गगनानिर्वचनीया
यत्का दृप्या दीर्घ[illegible] प्रागिति ध्येयम्:
पुस्तक २ प ०

अथ कालिके न घटाभाववत्साध्यत्वे पटस्य हेतुत्वे व्याप्तिः । हेतुमन्निष्ठाभावे कालिकेन साध्याभाववत्त्वात् । तादृशाभावनिरू
पित साध्यनिष्ठप्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वोक्तेः इति दोषवारणाय तादृशप्रतियोगितायां हेत्वधिकरणवृत्त्यभावीयत्वे
न निरूपितत्वस्य विवक्षितत्वात् । पृ० १८ प ४ । । । गन्धेन घटाभाववान् घटत्वादित्यादौ कालिकसम्बन्धेन साध्याभावमा
दाय व्याप्तिवारणाय साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकहेत्वधिकरणवृत्त्यभावत्वनिवेशात् तादृशाभावत्वनिरूपि
तप्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य साध्यतावच्छेदकावच्छिन्नत्वस्य च निवेशेन । तत्र चाभाव
स्यैवाप्रवेशात् । न च साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकीभूतसम्बन्धेन तादृशाभावस्य सम्बन्धे
नोदासीनाभावमादाय व्याप्तिरिति वाच्यम् । अभावाधिकरणतावच्छेदकाधिकरणवृत्तित्वविशिष्टाभावात् तादात्म्येन सा
ध्यकव्यभिचारित्वे इदानीं नाभावस्यैव घटकत्वादिति भीत्या प्रतियोगितावच्छेदकनिवेशनात् तत्रैव हेतुतावच्छेदकत्वाभा
वाप्रतिप्रवानातिव्याप्तिरिति पाठः । पृ० १८ पं ११ । । एतत्कल्पे कालिकादिना घटाभावस्य साध्यतायां वह्निव्या
प्यतिव्याप्तिः साध्याभावप्रतियोगितायाः निरुक्तोभयाभावस्य सत्त्वेन सम्बन्धमात्रस्यावच्छेदकत्वादिति केचिन्न तत्समाहितं विशेषयोगिति ।

तत्रसाध्य संयोगाभावविशिष्टसंयोगत्वसम्बन्धावच्छिन्नप्रतियोगिताकाभाववद्घटान्यतराभावाभाववज्ञानुल्लङ्घनत्वादिना गगनाव्याप्तिः. साध्या
भावीयसाध्यनिरूढं यत्प्रतियोगित्वं संयोगसम्बन्धावच्छिन्नं संयोगित्वप्रतियोगिव्यधिकरणाभावीयाभावमहाकोमयाभावपदस्मा
वानवच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वादिति ध्येयम्. प२१पृ२ प२ ||
। १ अथयन्ये प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वानवेक्षणमर्थमिति ध्येयम् । प२१पृ२ पं५ ||
एतत्कल्पे घटाभाववान् । महत्वादित्यादौ कालिकेन साध्याभाववत्तया व्याप्तिवारणाय प्रतियोगितायां सम्बन्धावच्छिन्न
त्वनिवेशः तदर्थञ्च साध्यतावच्छेदकसम्बन्धानवच्छिन्नत्वसाध्यतावच्छेदकावच्छिन्नो भयाभाववत्त्वेन वक्तव्यता
त्घटवान् तादात्म्यात्वादित्यादावव्याप्तिः संयोगेन घटाभाववत्तादात्म्येन गगनादाविति ध्येयम्. प२१पृ२ पं४ ||
न व्याप्तौ कल्पे प्रतियोगितायां स्वतन्त्रसाध्यतावच्छेदकसम्बन्धावच्छिन्नत्वानिवेशस्यावश्यकत्वात् संयोगेन घटाभावसा
दा घटन्वत्तत्साधनगगनादावव्याप्तिः । प२१पृ१ पं५ ।न च घटकालिकसम्बन्धावच्छिन्नप्रतियोगिकाभाववस्य स्वरूपेण साध्य
तान संयोगादिसम्बन्धावच्छिन्नघटाभावप्रतियोगितायाः साध्यतावच्छेदकसम्बन्धा[illegible]सम्बन्धावच्छिन्न(

वसाध्याभाववन्निरूपितत्वस्योभयोः सत्वादसम्भवापत्तेः तादृशप्रतियोगिताप्रविष्टघटाद्यभावस्य प्रमेयरूपसाध्याभाव-
वत्त्वादव्याप्तिरिति वाच्यम्. साध्याभाववन्निरूपितत्वपदेन साध्याभावत्वव्यापकप्रतियोगितानिरूपितत्वस्यैव विवक्षितत्वा-
न्न दोष इत्याहुः ।। पत्र ८ पं १६ । ।न चात्मत्वे प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वाभावेन वेगात्
पदादिप्रतियोगिकसंयोगेन घटाद्यभाववमादाय अव्याप्तिविरहादिति ध्येयम्. पत्र ३ पं ९ । ।न च हृदत्वादिनि-
कपिसंयोगदृष्टान्तपतराभावसाध्यकव्यभिचारिणातिव्याप्तिरिति वाच्यम्. तादृशप्रतियोगितायां निरूपको-
ऽयोगितानिरूपितत्वस्य साध्यतावच्छेदके। वह्नित्वोभयाभावान्न वेगात्. यत्किंचित्प्रतियोगितावच्छेदकाव-
मपि देन दण्डत्वोभावस्यापि वर्ण्य शक्यत्वादिति.। पत्र ४ पं १ । ।न नु पारिभाषिककल्पानुसरणे कालिकस-
म्बन्धेन साध्यतायां कालो घटवान्महाकालत्वादित्यत्राव्याप्तिः - कालिकसम्बन्धेन विषयितासम्बन्धेन तत्त-
विशिष्टप्रतियोगिकत्व[illegible] कालान्यूयोगिकत्वोभयोः सत्वादिति वाच्यम्. विषयितायाः सम्बन्धत्वमस्वीकृ

पितोक्तत्वात्. तादात्म्यसम्बन्धेन गगनसम्बन्धित्वविशिष्टगगनाभावस्माद्प्रत्यक्षतागगननाभ. वेशिष्ट्यापुट
कसम्बन्धेनाप्रत्यवावशिष्टाधिकरणता. गनवृत्तिकाप्रसिद्धेः. प२७२।४ नच संयोगवान्महाकालत्वादित्यादौ घट
देः व्याप्तिरेतत्सम्बन्धेनाधिकरणताया अपि निरूप्यो भयाभाववत्तु गगनादूराधिकरणता. वस्पे महाकालीयत्वेनज
धिकरणताप्रसिद्ध्याऽव्याप्तिविरहितचेत्. गगनत्वाद्यभावमादाये वर्तत्सम्भवात्. गगनादेः कालिकेनाप्यधिकर
णत्वाप्रसिद्ध्या तादात्म्येन सम्बन्धिता पारूपताद्दशीत्वावतीति ध्येयम्. । प२५८।२।१ । नचातिव्याप्तेरूनत्वात्
प्रदर्शनाभावरूपकमितिवाच्यम्. सद्धेतौ लक्षणसमन्वयस्याव्यवहृतत्वात्तदनुपपत्तिप्रदर्शनस्योचितत्वात्. अत एव व
ह्निमान्धूमादित्यादावव्याप्तिसं[illegible]भवे घटध्वंसो ध्वंससाध्यकहेत्वादावतिव्याप्तिप्रदर्शनसंदर्भविवरणमितिवि
रोधव्याप्तौ जगदीशो वक्ष्यनिरुक्तेति ध्येयम्. १२५।१।१७

[illegible]
[illegible]

४१३९

जातकीय अवलक्षणी
ज्योतिषसंहिता. पत्र ८
स्थाने:।

श्री ५ को सरकार
... संस्कृत ...

[illegible]

मू. समारब्धानुमानप्रामाण्यपरीक्षाकारणीभूतव्याप्तिग्रहोपायप्रतिपादननिदानं व्याप्तिस्वरूपनिरूपणमारभते नतिव्याप्तिः। साध्यवद्भिन्नेति। साध्याभाववद्वृत्तित्वमित्यर्थः। सिद्धान्ता:

अव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिमाह। कस्मात् साध्यवद्भिन्नेति

जा. ग्रि. टी. १ व२

श्रीगुरुचरणसरोजमवलम्बे॥ ॥समारब्धेति। समारब्धं यदनुमानप्रामाण्यपरीक्षणं तत्कारणीभूतं यद्व्याप्तिग्रहोपायप्रतिपादनं तन्निदानं व्याप्तिस्वरूपनिरूपणमित्यर्थः। तथा च प्रामाण्यव्यवस्थापनोपोद्घातसङ्गत्या व्याप्तिस्वरूपनिरूपणमिति भावः। अव्याप्यवृत्तीति। कपिसंयोगी एतद्वृक्षत्वादित्यादावित्यर्थः। इदञ्च येन रूपेण येन संबन्धेन साध्यत्वं तेन संबन्धेन तेन रूपेण प्रयोगमात्र इत्य। अन्यथा तु व्याप्यवृत्तिसाध्यकस्थलेऽपि विशिष्टसाध्यकमात्रपदेशो बोध्यः। अव्याप्यवृत्तिसाध्यकेप्याकाशादिहेतावव्याप्त्यभावादाह। सद्धेताविति। वृत्तिमद्धेताविति तदर्थः। ननु साध्यवद्भिन्नो यः साध्याभाववानित्यर्थे साध्याभाववत्पदवैयर्थ्यम्। साध्यवद्भिन्नावृत्तित्वस्यैव सम्यक्त्वात्। न चावृत्तित्वेन साध्यवद्भिन्नस्यान्वयाविवक्षणात् साध्याभाववता सममेव तादात्म्येन तस्यान्वयाविवक्षणान्न वैयर्थ्यमिति वाच्यम्। तथा सति साध्यवद्भिन्नानुयोगिमनुदर्थः संबन्धी तद्वृत्तित्वस्यैव सम्यक्त्वे साध्याभावपदव्यर्थताप्तेर्वादिनः सप्तमीसमासं समर्थ्य व्याचष्टे। साध्यवद्भिन्न इति। तथा च साध्यवद्भिन्नस्य वृत्तावे तन्वयादन्यथा सन्निवेशेन वैयर्थ्यम्। साध्याभावे साध्यवद्भिन्नवृत्तित्वविशेषणं त्वव्याप्यवृत्तिसाध्यकसङ्ग्रहार्थमेवेत्याशयः। साध्यवद्भिन्नवृत्तिद्रव्यत्वादिमति धूमादेरसत्त्वादव्याप्तिरसंभवो वास्यादत आह। साध्याभावेति। न च कपिसंयोगी एतद्वृक्षत्वादित्यादेः सङ्ग्रहार्थमधिकरणभेदेनाभावस्येदृमाश्रितत्वेव लक्षणमिदं कार्यम्। तथा च साध्यवद्भिन्नो योऽभाववांस्तद्वृत्तित्वस्यैव सम्यक्त्वे साध्यपदवैयर्थ्यमिति वाच्यम्। प्रतियोगितासंसर्गेण साध्यो

साध्याभावस्य ३

धूमादेरसीद
१

अ.मू. ३ न च कपिसंयोगाभाववान् वृक्षत्वादिर्वृत्तिमद्धेतावर्थवान् व्याप्तिरिति वाच्यम्। अव्याप्यवृत्तिसाध्यके हेतौ सद्धेतौ व्याप्यवृत्तिसाध्यकत्र तद
व्याप्यवृत्तिसाध्यकत्वादिकरणे ---- हेतौ विशेषणं हस्तको नेयदोषः x स्ट्र.मू. १

मू: कर्मादेःसंयोगाद्यभावस्य भिन्नत्वे मानाभावादाह· साध्यवान्निहेतोः साध्यवत्त्वस्याभिन्नत्वान्न वृत्तित्वेनाव्याप्तेराह· इत्यत्रेति ।शि·

यत्त्वेनैव साध्याभावप्रवेशेन त्वभाववत्त्वेनापीति तद्वैयर्थ्यमक्षुण्णवकाशात् । वस्तुतः स्वप्रतियोगितावच्छेदकसंबन्धेन साध्यवद्भिन्नेवर्त्तते यः साध्यता
वच्छेदकसंबन्धेन साध्यीयप्रतियोगिताभावस्तद्वदवृत्तित्वमित्यर्थः । [illegible] च साध्यतावच्छेदकसंबन्धेन साध्यीयत्वार्थकस्य साध्यपदस्यानुक्तौ स्वप्रतियोगिताव
च्छेदकीभूतसमवायादिसंबन्धेन वह्न्यादिमतो ऽयस्पिण्डवृत्तेर्वर्तते यः समवायावच्छिन्नवह्न्याद्यभावस्तद्वति धूमादेः सत्त्वादव्याप्तिस्स्यादतस्त
दुपात्तमिति नव्याः । केचित्तु अव्याप्यवृत्तित्वाव्याप्यवृत्तित्वादिविरुद्धधर्माध्यासात्संयोगाद्यभावस्यैव द्रव्यगुणाद्यधिकरणभेदेन भेदे तत्तु गगनाद्यभाव
स्यापि मानाभावात् । तथा च साध्यवद्भिन्नवृत्ति गगनाद्यभाववति धूमादेः सत्त्वादव्याप्तिः स्यादतः साध्यपदमित्याहुस्तन्न रम्यम् । गुणे गगनाद्यभा
वे गुणत्वादिसामानाधिकरण्यं न तु द्रव्यगगनाद्यभावे तथात्वमिति प्रतीत्या गगनाद्यभावस्यापि गुणत्वादिसामानाधिकरण्यतदभावयोर्विरुद्ध
धर्मयोः समवायादितिकि । न च घटत्वघटाकाशसंयोगान्यतरत्वावच्छिन्नाभाववान् गगनत्वादिस्तत्राव्याप्तिः । साध्यवद्भिन्ने घटे वर्तमानस्य गगनसंयो
गात्मकसाध्याभावस्याधिकरणे गगनत्वहेतोः सत्त्वादिति वाच्यम् । अभावाभावस्यातिरिक्तत्वमतएवैतल्लक्षणकरणादिति भावः । यद्यपि
धूमहेतौ वह्निसाध्यके ऽव्याप्तिवारणाय वृत्तित्वं हेतुतावच्छेदकसंबन्धेनैव निवेश्यं । तथापि समवायावच्छिन्नतादृशहेत्वव्याप्तेः । साध्याभाववद्वृत्तितेन संब
न्धेनैव ध्येयत्वेतेरप्रसिद्धेस्तथापि हेतुतावच्छेदकसंबन्धवृत्तीयस्वरूपसंबन्धावच्छिन्नप्रतियोगिताकवृत्तित्वाभावविवक्षणान्नानुपपत्तिरितिसङ्क्षेपः ।
भिन्नत्वरीत । द्रव्यगुणसंयोगाभाव[illegible]वतो भिन्नत्वस्यार्थः । मानाभावादिति । तथा चात्राप्यव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिरिति भावः । अव्याप्ते-

०च्छिन्न २

शि० २

म्: साकल्यं साध्याभाववृत्तिसाध्ये तद्वोध्यम्। साध्याभावो वा साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको ग्राह्यः। मूलम्

आविती ति। न च साध्यवत्प्रतियोगिकान्योन्याभावस्य केवलान्वयित्वादसंभवस्तद्वत्कुसुमितो नाव्याप्तिरिति वाच्यम्। अत्यंतगगनादिहेतौ लक्षणासंभवात्।
तस्यापि सद्धेतुतायाः स्तुयं वक्ष्यमाणत्वादिति भावः। साध्यपदस्यासिद्धिकर्मत्वं तत्र ह्यात्मप्रतया तत्तद्व्यक्त्यवच्छिन्नान्योन्याभावासामानाधिकरण्यपरस्याप
२ र्थ३ र्थवीभूतस्याँस्य द्रव्यं पृथिवीत्वादित्यादावेव संभवात् द्रव्यवती पृथिवीत्वादित्यादावव्याप्तिः कथमिति मन्तव्यमिव इति। ननु सकलसाध्यप्रतियोगि[illegible]काभावस्या
धिकरणावृत्तित्वमव्यभिचारित्वं तदव्याप्तिवारणार्थं यदि साध्याभावस्य विशेषणं साकल्यं तदा वह्निमान् धूमादित्यादावव्याप्तिः। तत्रापि न तादृक्पक्षावृत्ति
त्वावच्छिन्नाभावरूपस्य तत्पक्षावृत्तित्वावच्छिन्नाभावरूपस्य वा साध्यप्रतियोगिकाभावस्याधिकरणाप्रसिद्धेरत आह। साकल्यं साध्याभाववतो
ति। तथा च साकल्यं न साध्याभावविशेषणं। अतो नाप्रसिद्धिरिति भावः। नन्वेवमपि साध्याभाववतोऽखिलान्तर्गतमहानसादेर्वर्तमानस्याभावस्य
धूमादौ भावात्तथाव्याप्तितादवस्थ्यमत आह। साध्यवेति। तथा च पक्षो महानसादिर्न सकलसाध्यस्याभाववानिति हेतुः। प्राग्वत्सु। व्यभिचारिण्यतिव्या
प्तिवारणार्थं साध्याभाववति यावत्त्वविशेषणे दत्ते एवं साध्ये यावत्त्वमप्यापेक्षिनां रुततया सार्थकमवसेयं। साध्याभाववत्त्वे च साकल्यं साकयोग्ये यन्निष्ठा
कल्यमित्यादिनेत्यवतारयन्ति। तन्न। साध्याभाववति साकल्यविशेषणानुक्तावव्याप्तिव्याप्तिभाग्कतयैव साध्ये साकल्यविशेषणस्य प्रथमतः सार्थक्य
सम्भवात्। अन्यथा गगनादिन्नि धर्मवान् द्रव्यत्वादित्यादौ घटादिलक्षणात तत्साध्यवत्त्वभाववद्गुणादिनिष्ठाभावं प्रतियोगिनि द्रव्यत्वाद्यवत्तिप्रसङ्ग इति ध्ये-
यम्। ननु साध्यवत्त्वादिनि हि त्वाद्यवच्छिन्नप्रतियोगिताकस्य सकलसाध्याभावस्य सत्त्वादसंभवः॥ किंच। सकलपदेतरनाम्ना सकलसाध्यप्रति
योगिताकाभाववतोऽनुपस्थापनात्तेन समसकलपदस्य कर्मधारयोऽप्यनुपपन्न इत्यतः साध्याभावो वेति। तथा च साध्याभाववत्त्वेन साकल्यं नेयमनु- गारे
२

मू॰ तेनैव पक्षैकदेशे निरुक्ताभावप्रतियोगिनि व्यभिचारिणि नातिव्याप्तिः। न वा नानाव्यक्तिसाध्यकस्थले तादृशव्याप्तिः। अतो व्याप्यवृत्तिसाध्यकव्याप्यवृत्तिमद्वृत्तित्वव्याप्तेर्व्यभिचारिणि चाव्याप्यवृत्तितानतिव्याप्तेर्वा

साध्येपीति भावः। साध्याभाववत्तिसाकल्यप्रयोजनमाह। तेनेति। विपक्षैकदेशस्य व्यभिचारिपक्षः साध्यनिष्ठसाकल्यस्य साध्यसामान्याभावस्य वा विवक्षायाः फलमाह। नवेति। एकव्यक्तिसाध्यके सकलसाध्याभाववदवृत्तित्वव्याप्तिः गोत्वस्यापि इत्यतस्त्यत्नायेनवायेनुक्तम्। अव्याप्यवृत्तीति। कपिसंयोगी एतद्वृक्षत्वादित्यादावित्यर्थः। यद्यप्यत्र हेत्वभाव-स्यापि प्रतियोगिवैयधिकरण्याविच्छिन्नत्वे प्रतियोगिवन्नाङ्करणीयः हेत्वव्याप्यवृत्तित्वे नाव्याप्तिः सम्भवति। तथापि यथाश्रुतमूलस्य तत्राव्याप्तिरित्याशयेनेदं व्याप्यवृत्तीत्युक्तम्। कपि-संयोगीति। एतद्वृक्षत्वान्कपिसंयोगादित्यादावित्यर्थः। अभाव इत्यादि। साध्याभावे हेत्वभाववत्त्वे इत्यर्थः। अत्र च साध्याभावे प्रतियोगिवैयधिकरण्यं साध्यताघटकसंबन्धेन प्रतियोगितदधिकरणानधिकरणत्वम्। तेन धूमसाध्याभाववतोऽप्ययःपिण्डादेः कालिकादिसंबन्धेन धूमादिमत्त्वेपि नातिव्याप्तिः। हेत्वभावे प्रतियोगिवैयधिकरण्यं तु प्रतियोगिताव-च्छेदकसंबन्धेन प्रतियोग्यनधिकरणत्वघटितं वाच्यम्। तेनायमात्मा ज्ञानादित्यादौ साध्याभाववति घटादौ विषयतया हेत्वभावप्रतियोगिमत्त्वेपि नाव्याप्तिः। हेत्वभाववतोपीति। अपि-ना साध्याभावसमुच्चयः। तेनाविशिष्टस्य तावान् जातीत्यादौ नातिव्याप्तिः। यद्यपि साध्याभाववतोपीति वक्तुमानुरोधाद्धेतुमध्ये न्यस्य अपिना द्वादेव हेत्वभावस्य लाभसंभवात्। तथापि तत्प्रतियोगित्वं चेत्यग्रेतनेनान्वयादेवानिरिष्ट हेत्वभावपरामर्शसंभवाद्धेत्वभावप्रतियोगित्वं चेत्यभिधाने चमोरवादित्यभिधानम्। प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगीति प्रतियोगिपदं प्रतियोगितावच्छेदकताघटकसंबन्धेनावच्छेदकस्य वैशिष्ट्यलाभाय। तेन द्रव्यं हेतोः कालिकादिसंबन्धेन धूमत्वाद्यवच्छिन्नस्य काष्ठादेः संयोगसंबन्धेन सत्त्वेपि नाव्याप्तिः। न प्रतियोगित्वं हेत्वभावप्रतियोगित्वम्। हेतुतावच्छेदकरूपेणेति। हेतुतावच्छेदकसंबन्धेनापि विवक्षणीयम्। तेनोक्तस्थले द्रव्यत्वादित्यादौ साध्यकाभाववत्त्वात्मनि वर्त-मानस्य प्रतियोगितावच्छेदकसंबन्धेन प्रतियोगिव्यधिकरणस्य कालिकसंबन्धावच्छिन्नद्रव्यत्वाभावस्य प्रतियोगित्वेपि द्रव्यत्वस्य नातिव्याप्तिः। न च हेतुतावच्छेदकसम्ब-न्धेन प्रतियोगिवैयधिकरण्ये तेनैवातिव्याप्तिवारणसंभवात् हेतुतावच्छेदकसंबन्धेन प्रतियोगित्वविवक्षा व्यर्थेति वाच्यम्। तथा सति धूमत्वावच्छिन्नवह्नित्वादित्यादौ तेन-वह्नित्वमेदमात्रेय्यैव लक्षणासंभवो धूमत्वव्याप्ये स्यात् तत्र ग्रन्थे वह्नेर्मानाव्याप्तिलगुकतापत्तेरिति ध्येयम्। हेत्वभावेऽपि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगि-वैयधिकरण्यविवक्षायाः फलमाह। तेन द्रव्यत्वादिति। अन्यथा साध्याभाववति गुणादौ विशिष्टसत्ताभावस्य समानाधिकरणप्रतियोगिसामानाधिकरण्यत्वादव्याप्तिरेव स्यादिति भावः। अत्र द्रव्यस्य साध्यतायां सकलसाध्याभाववद्व्यावृत्तत्वविवक्षया प्रकृतालक्षणासाधिपरम्। तेन गुणवत्त्वादि साध्यस्यापि सङ्ग्रहः। द्रव्येतरासमवेतसामान्या-

मू॰ गाद्यभाव इत्येप्रतियोगिव्यधिकरणत्वं बोध्यम्। तेन द्रव्यत्वादौ साध्ये विशिष्टसत्तादौ नाव्याप्तिः। हेत्वभावो निरुक्तप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणः। तत्प्रतियोगित्वं च हेतुतावच्छेदकरूपेण

४ व्याप॰

मू॰। नवाविशिष्टसत्तात्वादिनानादृशाभावप्रतियोगिभिन्नमात्रवृत्तिव्याप्तिः। यद्यैकव्यक्तिकसाध्यं विपक्षो गगनं निर्धूमत्वादिव्याप्ये तत्त्वेन साध्ये निर्वह्नित्वादौ चाव्याप्तिः। तत्र हेत्वभावस्य वृत्तेः प्रत्येकं याव

जा॰ त्रि॰ गी
२

प्रकृते द्रव्यत्वभिन्नितो ध्येयम्। हेतुतावच्छेदकरूपेण हेत्वभावप्रतियोगित्वविवक्षायाः फलमाह। नवेति। सत्तादावेति। द्रव्यत्वादौ साध्येऽव्याप्तेरनुवर्तते। यद्यैकव्यक्तिकमिति। तथा च द्रव्यं पृथिवीत्वादित्यत्राव्याप्तिः। तत्र सकलसाध्याप्रसिद्धेरित्यर्थः। नन्वितोप्यत्र साध्यसामान्याभावस्यैव निवेशात्तत्त्वा साध्ये साकल्यं तद्देयमेवेत्यत आह। विपक्ष इति। एकव्यक्तिक इत्युपलक्षणमेते। तथा च पक्षे एकव्यक्तिके साध्याभाववती तत्र गगनावृत्तिधर्मवान् गगनायत्वादित्यत्राव्याप्तिः। साध्याभाववतः साकल्याप्रसिद्धेरित्यर्थः। ननु साध्यादिभेदेन व्याप्तिभेदात् एकैकव्यक्तिकस्थले विपक्षलक्षणलक्षणे साध्याभाववति साकल्यविशेषणं देयमतोऽव्यापकत्वरूपमाह त्वं वानिवेश्य मतो दोषान्तरमाह। निर्धूमत्वव्याप्येति। निर्धूमत्वसाध्यत्वे यद्यैकव्यक्तिकमिति पक्षेनैव गतार्थता स्यादतो व्याप्यपर्यन्तम्। निर्धूमत्वव्याप्यस्यापि देशहेत्वादेः स्वे हेत्वादिना साध्यतायां वह्न्यभावस्य व्यभिचारित्वात्तदसङ्ग्रहे साध्ये त्यत आह। तत्त्वेन साध्य इति। निर्धूमत्वव्याप्यत्वेन साध्य इत्यर्थः। प्रत्येकमिति। हेत्वभावस्य महानसीयादिवह्नेः साध्याभाववत्सकलान्तर्गतपर्वतादिवृत्तित्वाद्व्याप्तिघटितभावः। निरुक्तप्रतियोगित्वेऽप्यधिकरणावच्छिन्नसाध्याभावव्यापकतावच्छेदकं भिन्नप्रतियोगित्वेऽयधिकरणावच्छिन्नत्वपर्यवच्छिन्नाभावत्वं तद्धर्मवत्त्वं व्याप्तिः तु तेनैतेषु नोऽसंग्रह इति ध्येयम्। ननु साध्यवत्प्रतियोगिकान्यतरस्य धूमादिमत्यपि सत्त्वादव्याप्तिरत आह। अन्येति। तथा च साध्यव त्व

प्यदेन निरुक्तलक्षणस्योपस्थापितस्य साध्यतावच्छेदकविशिष्टसाध्यवत्त्वावच्छिन्नप्रतियोगिताकस्यान्यपदार्थैकदेशेऽन्वयेनाप्रसिद्धेनान्वयात्। साध्यवति च साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदासत्त्वान्नाव्याप्तिः। गुणधर्मस्यावच्छेदकत्वोपगमात् द्रव्यं पृथिवीत्वादित्यादौ द्रव्यत्वत्वविशिष्टद्रव्यत्ववत्त्वावच्छिन्नप्रतियोगिताकभेदाप्रसिद्ध्या नाव्याप्तिरिति भावः। पक्षधर्मविशिष्टबोधकपदस्य समभिव्याहृतेनान्यादिपदेनोपस्थापितेऽन्यत्वादौ तद्धर्मावच्छिन्नप्रतियोगिताकत्वप्रकारेणोपस्थितावन्वय इत्यन्वयोऽनुत्पत्तिः धर्माश्रयप्रतियोगिकत्वे नेत्यनुपपन्नमतमाह। नहीति। तथा च तादृशव्युत्पत्त्यस्वीकारे नीलघटे घटत्वप्रतियोगिकभेदस्य सत्त्वान्नीलघटो घटान्य इत्यादिव्यवहारस्यापत्तिरिति भावः। अथ द्रव्यं घटान्यत्वादित्यादौ प्रतियोगितानवच्छिन्नप्रतियोगिताकत्वस्य भेदे अन्यादिपदेन बोधनेऽद्रव्यनिधर्मस्यैवानुयोगितावच्छेदकत्वात्तत्रैव घटो घटान्य इत्यस्य वारणाय प्रकारनीलघटत्वस्य धर्मितावच्छेदकत्वपर्यन्तानुधावनमितिमत्तत्त्वम्। नीलो घटो घटान्य इत्येव पाठः सम्यक्। तथैव प्रकृतप्रतियोगित्वसङ्गतेः। घटान्यदित्यत्र कठसू साध्यपदन्त्वेव पञ्चमीसमासे तद्विभक्तिस्त्वादि प्रतियोगित्वे तदवच्छेदकावच्छिन्नत्वस्य स्वसंसर्गेण गौण्यदसाधारणाद्यर्थविरुद्धप्रतीयः। घटः पटो नेत्यादौ तु घट

५२

चारदेअमीह
३

मू॰। प्रत्यक्षादिन्यादत आह। साध्यवतीति। अत्यन्ताभावस्य साध्यवत्त्वावच्छिन्नप्रतियोगिताकत्वं तु पूर्वमुक्तम्। नहि साध्यवान्नीलो घटो घट इत्यत्रैति। समाप्ता पंचलक्षणी। श्रीरेमीरा॥

देघटत्वावच्छिन्नप्रतियोगिताकत्वसंसर्गेणैव पटत्वान्वयसम्भवात्।×१

पदमुख्यार्थपरमेव। ननु भूतलस्य घटत्वावच्छिन्नप्रतियोगितानिरूपिताधिकरणस्य स्वरूपसामर्थ्ययोर्भेदान्वयस्तात्कुतस्तत्तयात्र यथा प्रतियोगिपटत्वावच्छिन्नप्रतियोगिताकत्वं नु पटत्वमवच्छिन्नत्वं प्रतियोगित्वं चेति निश्चयमेकविशेष्यविशेषणभावापन्नसंसर्गेण ननु वक्तुं शक्यते घटत्वावच्छिन्नप्रतियोगिताकत्वसंसर्गाभावात्। पटे नेमग पटत्वावच्छिन्नत्वस्याप्यनुभवसिद्धत्वात्। अन्यथा प्रतियोगिताव्यक्तिभिर्वैव तादृशविशिष्टबुद्धेर्संभवेऽपि पटत्वादेस्तदवच्छेदकत्वमेव न स्यात्। मानाभावात्। अत एव केवलान्वयिग्रन्थे वह्नित्वावच्छिन्नाभावे वह्नित्वं तदवच्छिन्नत्वं प्रतियोगित्वं च संसर्गमर्यादया भासत इति स्वग्रन्थ उक्तम्। इत्थमेव च प्रमेयत्वात्मनाऽस्ति कम्बुग्रीवादिमान्नास्तीत्यादिशाब्दबोधानां संसर्गकोटौ च प्रतियोगितायां प्रमेयत्वाद्यवच्छिन्नत्वावगाहितया भ्रमत्वम्। संसर्गप्रकारकसाधारणविशेष्यविशेषणभावस्यैव भ्रमत्वघटकत्वात्। अन्यथा स्वरूपसंबन्धेन प्रमेयत्वाद्यवच्छिन्नप्रतियोगिताकत्वस्य लौकिकप्रत्यक्षविषयतासंबन्धेन प्रमेयस्याभावे धर्मिण्यन्वयासंभवेन भ्रमत्वानुपपत्तेः। तदुपरागेण प्रमाणसंसर्गमर्यादया भानस्य स्वीकारात्। एकदेशमपदुत्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेनाभावे प्रमेयस्य सत्त्वेन तादृशसंबन्धे न भ्रमत्वस्य वक्तुमशक्यत्वात्। पटत्वादेरन्वयिताऽवच्छेदकतया तदवच्छिन्नप्रतियोगित्वसंबन्धेन प्रमेय त्वादिविशिष्टस्यान्वये विरतकांक्षत्वाच्च। अन्यथा घटवत्यपि पटो नास्तीत्यादेः प्रमाणत्वापत्तेः। नन्वेव घटत्वावच्छिन्नप्रतियोगित्वसंबन्धेन घटविशिष्टस्य घटविशेषाभावस्य तत्त्वात्। एतेन सत्तासमवायिन्यपि गुणादौ विशिष्टप्रमात्वाय[illegible]वच्छिन्नस्य समवायेनासत्त्ववत् घटत्वाद्यवच्छिन्ने प्रतियोगित्वसंबन्धेन घटत्वावच्छिन्नवतोऽपि घटाद्यभावस्य तादृशसंबन्धेन प्रमेयत्वाद्यवच्छिन्नवत्त्वमतः प्रमेयत्वोपस्थितौ घटत्वावच्छिन्नत्वप्रतियोगित्वसंबन्धेन प्रमेयत्वाद्यवच्छिन्नाभावे आवश्यकत्वेऽपि प्रामाण्यम्। घटत्वादेरन्वयिताऽवच्छेदकतया तदवच्छिन्नप्रतियोगितासंबन्धेन प्रमेयत्वविशिष्टस्यान्वयेऽनिराकाङ्क्षत्वात्। अन्यथा तथाप्याकाशस्याभाववानिति प्रत्ययः। नीलो घटो नास्तीत्यादौ नीलघटत्वस्यान्वयितावच्छेदकत्वेनोक्तधर्मावच्छिन्नप्रतियोगित्वमेव संसर्गोऽङ्गीकर्त्तव्यः। प्रमेयत्वावच्छिन्नप्रतियोगित्वं न। नीलपटत्वपीतघटस्य चाधिकरणे तादृशप्रयोगापत्त्या पत्तेः। नीलो घटो नास्तीत्यत्र घटत्वमात्रस्यान्वयितावच्छेदकत्वेन घटत्वावच्छिन्नप्रतियोगित्वमेव। तथा। संयोगेन घटो न

घ

मू॰ साध्येति॰ साध्यवत्साध्यवदधिकरणानधिकरणत्वं साध्यं तत्त्वम्। शि॰ मू॰ विना॰ ~~साध्यसामानाधिकरण्य~~ ।

शि॰ जा॰ सीत्यादौ तु तृतीयाविभक्तेरवच्छिन्नत्वमर्थः। संसर्गीभूतप्रतियोगितायास्तदन्वयासंभवात्। किन्त्ववच्छिन्नप्रतियोगिताकत्वं प्रतियोगितामात्रं वा। अवच्छिन्नत्वं संसर्गेण संयोगादेस्तत्रान्वयादेवादिशिष्टलाभसं

४ भसंभवात्। न चैवं संयोगेन घटाभाववत्येव समवायेन घटवति विशिष्टद्रव्यत्वाभाववत्या समवायेन कपाले घटो नास्तीति व्यवहारापत्तिः। तृतीयान्तसमभिव्याहारस्थले तु घटस्थापि प्रतियोगित्वस्यैव संसर्गतया

व्युत्पन्नत्वात्। समवायावच्छिन्नघटप्रतियोगिताकाभावस्य च कपाले विरहात्। अस्तु वा घटत्वावच्छिन्नत्वस्यैव संयोगादिसंबन्धस्यापि प्रतियोगित्वांशे संसर्गमर्यादयैव भानम्। तृतीयान्तसमभिव्याहारस्य

नियामकत्वानुगमातिप्रसङ्गः। घटानधिकरणं भूतलमित्यादौ तत्र अपि यद्धिकरणपदमेव घटाधिकरणार्थकम्। घटपदं तु तात्पर्यग्राहकम्। अन्यथा नञधिकरणपदे नाधिकरणमात्रस्य भिन्नत्वोक्तौ अनुभूत

त्वेन स्वरूपाद्यन्वयानुपपत्तेः। न च घटान्वितस्यैवाधिकरणस्य भेदेन जातो धर्मी च। समासान्तर्गततया आदरपदार्थमात्रान्वयित्वव्युत्पत्तेः। अन्यथा नीलो घटो घट इत्यादौ नीलघटादेस्त्वापत्ते घट

त्वं नीलत्वमेव। घट इत्यादौ च नीलत्वमेवान्यस्य घटत्वं जातीयेत। वस्तुतः सम्बन्धिकपदस्थले व्युत्पत्तिवैचित्र्यात् प्रतियोगितानवच्छेदकस्य घटानधिकरणमित्यादौ च घटाद्यन्वितस्यैवाधिकरणस्याभ्युपगमे। अन्य

त्रापि पदान्तरानुगमेन घटस्यानधिकरणं प्रतियोगितावच्छेदकमित्यादावपि पदान्तरस्यैकाधिकरणविशिष्टस्याभावस्येति परमार्थः। मूले शङ्कते नास्तीत्यादिव्याख्याने धर्मस्य शङ्खत्वावच्छिन्नत्वप्रतियोगि

त्वमवगाहते। तत्त्वाभावस्यान्वयितानवच्छेदकत्वात्। शङ्खत्वावच्छिन्नप्रतियोगिताके धर्मिण्येव पितत्वप्रयोगात्। परं तु पीतशङ्खत्वावच्छिन्नप्रतियोगितात्वेन संसर्गमर्यादया प्रतियोगित्वमवगाहते। तत्रापि च

दानां यद्धर्मविशिष्टवैशिष्ट्यावगाहित्वोपस्थाप्याभावधर्मिकान्वयबोधजनकत्वं तद्धर्मावच्छिन्नप्रतियोगिताकत्वेन प्रतियोगितासंसर्गकान्वयबोधजनकत्वव्युत्पत्तेः। इत्यंशप्रविशेषो यद्घटो ना

सीत्यादिवाक्ये सांसर्गिकी प्रतियोगिता ~~[illegible]~~ प्रसिद्धेन घटत्वावच्छिन्नप्रतियोगितात्वेनैव निरूपिता। पीतः शङ्खो नास्तीत्यादौ तु पीतशङ्खत्वावच्छिन्नप्रतियोगितात्वेनाप्रसिद्धेनैवेत्यादि द्रष्टव्य

दुत्तरम् द्रष्टव्यम्॥ ॥जागदीशी पंचलक्षणी समाप्ता॥ ॥साध्यसामानाधिकरण्यपरस्य साध्यवद्भिन्नत्वे विशेषणार्थकत्वे साध्यवद्वृत्तिकरणत्वस्य हि द्वितीयलक्षणेन पौनरुक्त्यापत्तिरतो व्याचष्टे॥ शारदेश्वरी:

साध्यवत्त्वसामानाधिकरण्यस्येति। तत्त्वमिति परेणान्वयः। तद्दूषणस्यैव व्यधिकरणतत्त्वमसमानाधिकरणत्वाद्दूषणान्तरमादित्याह व्याप्तेरह। यदधिकरणेति। यदधिकरणमनधिकरणं यस्येति ४

२ अथ सिंहव्याघ्रलक्षणोपारम्भः २

मू०। साध्यनिष्ठासामानाधिकरण्यप्रतियोगित्वं साध्यनिष्ठाधेयत्वादिनिरूपकाधिकरणत्वमित्यभिप्रायेण तदनधिकरणत्वमर्थः साध्यवद्भिन्नत्वं च साध्यनिष्ठाधेयत्वानिरूपकत्वान्न क्वचिद्भातीत्यसंगः। साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकाभावप्र
मिथो
ति२

धूमसत्त्वायस्याधिकरणं साध्यासामान्यानधिकरणं तत्त्वमित्यर्थः। तत्र धूमाधिकरणस्तु न वह्निसामान्यानधिकरणमतो नाव्याप्तिरिति भावः। ननु घटादिस्वरूपं यद्धूमाद्यधिकरणं साध्यीभूतधूमाद्यनधिकरणं तथा च तत्त्वानधिकरणत्वव्याप्तेरप्यतो धूमवान्वह्नेरित्यादावतिव्याप्तिः। यद्यद्धूमाधिकरणं साध्यानधिकरणं तत्तद्भिन्नत्वानधिकरणत्वोक्तौ नुमतत्वगौरवमत आह। साध्यनिष्ठेति। साध्यनिष्ठाभावप्रतियोगित्वं च हेतोरप्यस्तीत्यत सामानाधिकरण्याभावेत्युक्तं। न च साध्यनिष्ठस्य सामानाधिकरण्याभावस्य प्रतियोगित्वं सामानाधिकरण्यस्य वर्तते न तु वह्न्यादाविति स्वरूपेतावद्व्याप्तिः। साध्यनिष्ठाभावप्रतियोगिवृत्तित्वानिरूपकाधिकरणवृत्तित्वस्यैव विवक्षितत्वात्। वस्तुतो सामानाधिकरण्यं सामानाधिकरण्यसंबन्धेनाभावः। सामानाधिकरण्याभाव इति परमार्थः। न चैवं द्रव्यं पृथिवीत्वादित्यादावव्याप्तिः सामानाधिकरण्याभावस्य व्याप्यवृत्तित्वेन साध्ये सत्त्वात्। एवमन्यत्रैव वाक्यान्तरमनुसरणीयम्। अन्येवमपि वह्निमान् धूमादित्यादावविभवव्याप्यहेतावव्याप्तिः। वह्निनिष्ठस्यापर्वतवृत्तित्वाद्यभावस्य प्रतियोगि धूमसंयोगाधेयत्वं तन्निरूपके पर्वतादौ धूमादेर्वर्तमानत्वात्। साध्यसामान्यनिष्ठाभावप्रतियोगिनाधेयत्वानिरूपकाधिकरणवृत्तित्वोक्तौ मतानुगौरवमत आह। साध्यनिष्ठाधेयत्वेति। अत्राधेयत्वं साध्यताघटकसंबन्धेन ग्राह्यम्। तेन रूपवान् महाकाशत्वादित्यादौ संबन्धसामान्येन रूपनिष्ठाधेयत्वानिरूपके गगनादौ हेतोर्वृत्तित्वेऽपि नातिव्याप्तिः। न हेतौ। साध्यवद्भिन्न इत्यत्र। ननु साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वं स्वरूपं हेतुतावच्छेदकसंबन्धेन वाच्यम्। अन्यथा वह्निनिष्ठाधेयत्वानिरूपके स्वावयवे समवायाद्धूमादेः सत्त्वादव्याप्त्यापत्तेः। तथा च सत्तावान् द्रव्यत्वाद्धूमात् क्वचिद्व्याप्तिः साध्यनिष्ठनिष्ठाधेयत्वानिरूपके ज्ञात्यादौ समवायेन संयोगेन वा वृत्तेरप्रसिद्धेः। किं च। द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिः। द्रव्यत्वनिष्ठाधेयत्वानिरूपकगुणादिवृत्तित्वस्य विशिष्टसत्तायां सत्त्वादित्यत आह। साध्यनिष्ठेति। द्रव्यनिष्ठाधेयत्वानिरूपके ज्ञात्यादौ वह्न्यधिकरणत्वाभावस्य सत्त्वादव्यभिचारिण्यतिव्याप्तिरतो व्यापकेति। व्यापकत्वं च प्रतियोगिवैयधिकरण्यघटितमेवस्त्रेयम्। तेन संयोगेन वह्न्यधिकरणत्वस्याव्याप्यवृत्तितयात्यन्ताभावस्य तत्साध्यः पिण्डवृत्तित्वेऽपि नातिव्याप्तिः। वह्न्यधिकरणत्वं गगनोभयत्वाद्यवच्छिन्नाभावस्य धूमनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वादतिव्याप्तिरतः सामान्यपदम्। तथा च हेतुतावच्छेदकसंबन्धावच्छिन्नयद्धर्मावच्छिन्नाधिकरणत्वसामान्याभावत्वेन साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वं तद्धर्मवत्त्वमर्थः। तेन वह्निनिष्ठाधेयत्वानिरूपकाधिकरणजलाशयादौ कालिकसंबन्धेन धूमाधिकरणतायाः सत्त्वेऽपि नाव्याप्तिः। न वा वह्न्यधिकरणत्वाभावस्यापि प्रमेयत्वादिनाप्रतिनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वेऽप्यतिव्याप्तिः। न च हेतुतावच्छेदकसंबन्धेन यद्धर्मावच्छिन्नाभावत्वेन तादृशाधिकरणत्वव्यापकत्वमित्यस्यैव सम्यक्त्वेऽधिकरणत्वप्रवेशो व्यर्थ इति वाच्यम्। वृत्त्यनियामकसंबन्धेन हेतुतायामव्याप्तिप्रसङ्गात् तादृशसंबन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धेः। अस्माकं तु तादृशसंबन्धेन यद्धेतुसंबन्धित्वं तस्य स्वरूपसंबन्धावच्छिन्नाभावमादाय लक्षणसंभवात्। किं चाधिकरणत्वाप्रवेशे धूमादेः साध्यत्वे संयोगादिसंबन्धेन रूपादिहेतावतिव्याप्त्यापत्तेः। संयोगेन रूपाद्यभावस्य केवलान्वयितया वह्निनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वादिति भावः॥

तियोग्यधिकरणतासामान्यकत्वमिति निष्कर्षः॥ श्रीः

मू.। तेन सत्त्वादावुव्यत्वात्तैनदेयः। साध्यवैयधिकरण्यं साध्यवद्भिन्नाधिकरणवृत्त्वं च साधिकरणवृत्त्वांशस्यानति ... कालान्तद्वयसायहृत्यमेको ... तदुभयमपीति। साध्येत्यादि साध्यं च इत्यधिकरणान्तराधिकरणवृत्त्वाभावः साध्यस्याधि
नधिकरणवृत्तित्वाभावश्चार्थः। तत्र केवलान्वयिनि साध्यनिष्ठाधेयत्वानिरूपकाधिकरणाप्रसिद्ध्या नाव्याप्तिः साध्यके च केसाध्यनिष्ठाधेयत्वानिरूपकेऽत्यन्ताभावाधिकरणवृत्त्यन्तर्देशे इत्यव्याप्तिः। अचिवाप्रिच्यापि ... लिवा। मुख्यार्थे। द्वितीये साध्य

अ·पं·सं·दी

५

साध्यवद्भिन्नेति। अत्रापि साध्यवद्भिन्नत्वव्यापकाभावप्रतियोग्यधिकरणतासामान्यकत्वं निष्कर्षो बोध्यः। तेन समवायावृत्त्यत्वादित्यादौ नाव्याप्तिः। न तु प्राग्रुक्तस्यार्थस्य शब्दान्तरेणाभिधानमनुवादः। स चात्रासंभवी। साध्यं यदधि
करणानधिकरणं तद्वृत्त्यनधिकरणत्वस्य साध्यवद्भिन्नवृत्तित्वानधिकरणत्वस्य च प्राग्रुक्तस्य साध्यानधिकरणानधिकरणत्वादेर्भेदाभावो ध्वनित आह। चरमेति। तत्त्वाधिकरणत्वाभावे तत्त्वाभावस्याप्रवेशाद्धेयपर्यवसानसंभवी
यत उक्तम्। अनतिप्रयोजनकतयेति। तथा च प्रकृतलक्षणवाक्यस्य साध्यं यदधिकरणानधिकरणं तत्त्वाभावे साध्यस्य यदनधिकरणं तद्वृत्तित्वाभाव एव तात्पर्यतया गमितेनार्थस्य शब्दान्तरेणाभिधानमेवानुवादः। स चात्रासंभ
वत्येवेति भावः। साध्यमित्यादि। साध्यानधिकरणेत्यादेर्मध्यमवर्त्तिनः प्रयुक्तस्यानेन तरसाधिकरणत्वांशेन सहान्वयाद्देवानुवादे तथा मन्यताशयः। केवलान्वयिनीति। अव्याप्तिरिति परेणान्वयः। अव्याप्तेर्हेतुमाह। साध्यनिष्ठे
ति। नानाव्यक्तिसाध्यके चेति। मूले कल्प्यमहेतुमभिप्रेत्य। तेन सत्त्वादावनागमनत्वादित्यादौ नानाव्यक्तिसाध्यकाव्याप्तिविरहेऽपि न क्षतिः। स्वनतान्वयीत्यादि। क्वचिदिति। विशिष्टसत्तावानाकाशादित्यादौ नाव्याप्तिसंस्पर्शः। विशिष्टधर्मा
वच्छिन्नाधिकरणत्वस्यैव न स्वावच्छिन्नाधेयत्वस्यानतिप्रसक्तत्वादित्याशयः। यत्किंचिदिति। साध्यवद्वाचिच्छिन्नत्वावच्छिन्नभेदस्यार्थः। नानाधिकरणसाध्य इति। यत्र साध्यतावच्छेदकावच्छिन्नाधिकरणं नाना तत्रेत्यर्थः। तेन
कस्यापि इत्यवावृत्यकेऽन्ताधिकरणवृत्तित्वविरहेऽपि न वह्निसाध्यकधूमादौ सद्धेतुः। सर्वत्र केवलान्वयिनि। तद्भिन्नेत्यादि। सार्वभौमस्य मतमुत्थापयति। केचित्त्विति। हेत्वधिकरण इति। समभ्यर्थविच्छेद्यान्वयः। तत्र साध्यव
द्वृत्तित्वाभावोऽन्वितम्। तेनैवेति। हेतुतावच्छेदकसम्बन्धेनैवेत्यर्थः। तस्य च साध्यवद्वृत्तित्वेन सहान्वयः। साध्यवत्त्वमपि येन संबन्धेन येन रूपेण साध्यता तत्संबन्धेन तद्रूपावच्छिन्नवत्त्वं बोध्यम्। तेन समवायेन वह्नेः साध्यत्वे
धूमे विशिष्टसत्त्वसाध्यके सत्त्वादौ च नातिव्याप्तिः। तदधिकरणभिन्नत्वमिति। तद्व्यक्त्यभाववत्योः द्रव्यं सत्त्वादित्यादावतिव्याप्तिः। गुणाद्यवच्छेदेन द्रव्यत्ववद्वृत्तित्वाभावस्यैव द्रव्यावच्छेदेन सत्तायामभावसत्त्वात्। तेनेति
स्वपर्यन्तानुसारणम्। भेदस्य नाव्याप्यवृत्तितया तत्त्वाभ्युपगमात् साध्यवद्भिन्नत्वाभावस्य यावतीव्यक्तिः तन्नाड्डीरतकूटवत्त्वं तत्र व्यक्तिमिति भावः। हेतुतावच्छेदकसंबन्धेन हेत्वधिकरणस्य स्वरूपस्य फलमाह। स्वावयवे संयोगेनेति। अव
यावीयत्वासितोऽन्वयः। तथा च महाकाशसंबन्धेन हेत्वधिकरणत्वाप्रवेशे स्वावयवावच्छेदेन धूमस्य वह्निमत्प्रयुक्तत्वाभाववत्त्वादतिव्याप्तिः स्यात् तत्र पक्षाविरेवस्याव्याप्तिः न तु पुनरसंभवः। इदं वा चां हेतुत्वादित्यादावेव सत्त्वशरणं संभवतीति
भावः। अत्रत्यौ स्वोत्पत्तिकालावच्छिन्ने घटे पृथिवीत्वे रूपवद्वृत्तित्वं नेति मतानुसारेण घटावच्छेदेन पृथिवीत्वादौ रूपवद्वृत्तित्वाभावाभ्युपगमे हेत्वधिकरणनिष्ठावच्छेदकत्वं निरवच्छिन्नं तदास्यम्। तेन रूपवान् पृथिवीत्वादित्यादौ
नाव्याप्तिः। तत्र घटनिष्ठावच्छेदकत्वस्य स्वोत्पत्तिकालेनावच्छेदादिति ध्येयम्। तेनैवेत्यस्य फलमाह। वह्निमानिति समवायेनेति। हेतुतावच्छेदकसम्बन्धेन साध्यवद्वृत्तित्वस्यान्योन्यसंबन्धसामान्यावच्छिन्ने हेत्वधिकरणावच्छेद्य साध्य
वद्वृत्तित्वसामान्याभावेन प्रवेशः। साधनाधिकरणावच्छेद्यतानिरूपकाभावस्याप्रसिद्धेः। किन्तु यत्किंचित्संबन्धेन साध्यवद्वृत्तित्वाभावः प्रवेशनीयस्तथा च हेत्वधिकरणपर्वताद्यवच्छेदेन धूमादौ वह्निमत्समवेतत्वाद्यभावसत्त्वा ग्रा·रे·ग·मी·दृ
दसंभव एव स्यात्। यदि तेनैव संबन्धेन साध्यवद्वृत्तित्वं प्रवेश्येत न स्यादिति भावः। ननु हेत्वधिकरणावच्छेद्यत्वविशिष्टस्य साध्यवद्वृत्तित्वाभावस्याधिकरणाप्रसिद्ध्या लक्षणमिदमसंभवि तदधिकरणस्यैव नास्ति तद्धर्मावच्छेदकतया

५

वैयधिकरण्यापेक्षया साध्यवत्त्वावच्छिन्नप्रतियोगितासकोऽत्यन्ताभावः केवलान्वयिनि यत्किंचिदभिसाध्यवद्वृत्तिभेदस्य तत्र नानाधिकरणसाध्यके सर्वत्राव्याप्तिः। केचित्तु साध्यनिष्ठसाध्यसामानाधिकरण्यं हेतुतावच्छेदकसंबन्धेन हेत्वधि
करणे तेनैव संबन्धेन साध्यवद्वृत्तित्वाभावः। तदधिकरणभिन्नत्वमित्यर्थः। तेन धूमस्य स्वावयवे संयोगेन वह्निमत्त्वसत्त्वेऽपि न नित्यत्वव्याप्तिः। इति शेजीः

म॰ तादृशाभावश्च तत्रैवेत्यंशः अन्तरेणावर्णनानेस्म्यनः। व्यभिचारिणमाह व्यभिचारिणस्तत्र साध्याधिकरणे एव नादृशाभावत्वं समानाधिकरणेन दुष्टत्वमात्रमाधिकरणत्वमिति न भवात्। न चैवं विशिष्टत्वेऽव्याप्तिः विशिष्टस्यातिरिक्तता ह॰

गगनत्वमत्वादौ वह्निमत्पर्वतसंयुक्ताभावस्य धूमवत्पर्वतावच्छेद्यत्वादत आह। तादृशाभावश्चेति। हेत्वधिकरणावच्छेदकसाध्यवद्वृत्तित्वाभाववच्चेत्यर्थः। संबन्धान्तरेण। हेतुतावच्छेदकसंबन्धान्यसंबन्धेन। तथाच हेतुमत्पर्वतावच्छेद्यत्वविशिष्टस्य वह्निमत्संयुक्ताभावस्याधिकरणपर्वतीयत्वात्तावेव प्रसिद्धिरिति भावः। यद्यपि रूपादौ वह्निमत्संयुक्तत्वाभावस्याव्याप्यवृत्तित्वात्तत्र पर्वतादिकालावच्छेदकम्। भावाभावयोरेकत्र दत्त्यर्थमेतावच्छेदकभेदस्वीकारादित्यप्रसिद्धिस्तादवस्थ्यम्। न च महानसादिसंयुक्ते कालिकादिसंबन्धेन पर्वतानिष्ठघटादौ वह्निमत्संयुक्तत्वाभावस्य पर्वतावच्छेद्यत्वप्रसिद्ध्या न दोष इति वाच्यम्। एतस्यापि ह तदुपदानेन दृष्टान्तादौ हेतुसाधिकरणावच्छेदकेन तद्रूपवत्समवेतत्वाभावस्याप्रसिद्धेर्वारत्वात्। तथापि पर्वतावच्छेदकेन हीयत्स्वरूपेण वह्निमत्संयुक्तत्वमित्यादिप्रतीत्या व्याप्यवृत्तिरेवच्छेदकत्वस्वीकारादित्यभिधानम्। हेतुतावच्छेदकसंबन्धेन साध्यवद्वृत्तित्वाभावविशिष्टस्य यस्याधिकरणं हेत्वधिकरणं तदन्यत्वे व्याग्रन्थतात्पर्यम्। तथा च व्याप्यवृत्तेरवच्छेदकत्वासत्त्वे भिन्नसाध्यवद्वृत्तित्वाभावविशिष्टस्य न स्याधिकरणत्वमायेवलक्षणसङ्गतिः। न च एवं गगनादिसाध्यवद्वृत्तित्वाभावविशिष्टस्य यस्याधिकरणत्वे हेतुमानसमन्यत्वेनोक्तौ वह्निमान्धूमादित्यादावव्याप्तिः। स्वावयवावच्छेदेन वह्निमत्संयुक्तत्वाभाववतो धूमस्याधिकरणतायाः साधनवत्पर्वतादौ सत्त्वात्। साध्यवद्वृत्तित्वाभावविशिष्टयच्छिन्नत्वावच्छिन्नाधिकरणत्वं हेतुमान्समन्यत्वोक्तौ वह्निमान्धूमात् इत्यादावव्याप्तेर्यत्वादित्यादौ सर्वत्रैवासंभवः। साध्यवत्संयुक्तत्वादिविशिष्टतत्तद्व्यक्तित्वस्य गुरुतया तदवच्छिन्नाधिकरणताया अप्रसिद्धेः। केवलस्यातिप्रसङ्गः एतद्विशिष्टधर्मस्याधिकरणतानिरूपकतावच्छेदकत्वकल्पनादिति वाच्यम्। सार्वभौमानां मते प्रतियोगितायादृश्याधिकरणता[illegible]सुधर्मावच्छेद्यत्वोपगमात्। अन्यथा समवेतत्वादिकमपि भूतसमवेतत्वस्य गुरुतया साध्यवद्वृत्तित्वावच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्या सत्तावान्द्रव्यत्वादित्यादावव्याप्तिप्रसङ्गात्। ननु साध्यसामानाधिकरण्यवतो गगनाभाववत्त्वमतो द्रव्यसत्त्वादित्यादौ व्यभिचारिण्यतिप्रसङ्ग इत्यत आह। व्यभिचारिणस्त्विति। तादृशेति। हेतुतावच्छेदकसंबन्धेन हेतुमतीत्यर्थः। तादृशाभाववत्त्वम्। साध्यवद्वृत्तित्वाभाववत्त्वम्। अत्रानुभवं प्रमाणयति। सत्तायामित्यादि। एवं सत्ताया अपि द्रव्यत्वसामानाधिकरण्यविरहे। विशिष्टसत्त्वे इति। विशिष्टसत्त्वबोधहेतावित्यर्थः। यथाश्रुते गुणकर्मान्यत्वविशिष्टसत्तायां सत्तावत्त्वाद्व्याप्त्याशङ्कायामुक्तरूपार्थेन तद्भिन्नसाद्दृसंगत्यापत्तेः। अतिरिक्तत्वादिति। विशेष्यविशेषणाभ्यां भिन्नत्वादित्यर्थः। तथा च गुणादिकं न हेत्वधिकरणमतो नाव्याप्तिः। उभयत्त्वमपि एकविशिष्टापरत्वमेव। तद्भिन्नत्वमेव। नातः स्वरूपश्रवणमनुन्नत्वमुक्तत्वोभयस्यादित्यादावव्याप्तिरिति भावः। यद्यपि हेतुतावच्छेदकविशिष्टहेत्वधिकरणावच्छेदेनैकत्वाविवक्षितविशिष्टसत्त्वादिहेतौ नाव्याप्तिः। न च धूमाधिकरणमहानसावच्छेदेन पर्वतीयधूमे वह्निमत्संयुक्तत्वाभावस्य वाच्यतायोग्येन सत्त्वादव्याप्तिः। महानसादेरपि कालिकादिसंबन्धेन पर्वतीयधूमाद्यधिकरणत्वात्तत्र साध्यवद्वृत्तित्वाभाववत्तायामवच्छेदकत्वादिति वाच्यम्। धात्वच्छिन्नाधिकरणावच्छेदेन साध्यवद्वृत्तित्वाभाववद्वृत्तित्वधर्म

म· अनीतिरिक्तत्वेनुविशेषणविशेष्यसंबन्धस्य परंपरया व्याप्यत्वात् केवलान्वयिनीनिच्चायाः प्रतिपाद्यतां द्वितीयलक्षणमिति प्रपञ्चेसोप्याह।। तद्भिन्नत्वम् इत्यादि।। गुणे नु द्रव्यत्व सामानाधिकरण्यमिति प्रतीतिर्द्रव्यत्वेन गुणेन पृथिवीत्वसामानाधिकर
ण्यमिति प्रतीतिवत्तत्तानिष्ठ द्रव्यत्वसामानाधिकरण्यावच्छेदकत्वस्य तस्य संबन्धेन सामानाधिकरण्यस्वाभाव्यं गोवत्त्वे सत्तायानेव द्रव्यत्वसिद्धाभावम्।।शि·

जा·शि·१· वत्त्वमित्यस्यैव फलितार्थस्य च तत्तद्धूमत्वधर्ममादायैव धूमादौ लक्षणासंभवेन धूमत्वस्य हेतुतानवच्छेदकत्वेपि क्षत्यभावात्।। तथापि विशिष्टस्यातिरिक्तत्वात्तत्र स्वाव्याप्तिवारणासंभवे हेतुतावच्छेदकावच्छिन्नाधिक
६ रणत्वप्रवेशे गौरवमसंभवो वा विशिष्टनिरूपकाधिकरणत्वाप्रसिद्धेः।। एवं धूमत्वादेर्व्याप्यतानवच्छेदकत्वेन द्रव्येणाकथायां हेतौ रूपमादायाप्यव्याप्तिर्नस्यादित्याशयः।। ननु विशिष्टस्यातिरिक्तत्वे मानाभावः। अत एव गुणे
विशिष्टसत्तावानिति प्रतीत्यभावस्य समाधानम्।। गुणस्य विशिष्टनिरूपिताधिकरणत्वविरहादेव नान्यथा प्रतीत्यसंभवात्।। न च विशिष्टस्य निरूपितमधिकरणत्वं यत् नातिरिक्तम् न तावविशिष्टमेवानीतिरे[illegible]।। विशिष्टा
धिकरणताया अन्याधिकरणत्वस्वरूपत्वाभ्युपगमात्।। किं च विशिष्टस्यातिरिक्तत्वे द्रव्यं विशिष्टसत्तावदिति दशायामपि द्रव्यं न सत्तावदिति प्रमाप्रसङ्गः।। एतन्नाभावबुद्धिं प्रति भानविशेषसत्त्वैव वि ग्राहक
शेषितयातत्सत्त्वात्।। स्यात्तन्मते विशेषितत्वाल्लक्षणे गौरवात्।। एवं विशेषणविशेष्योभयग्राहकसामग्रीविरहेपि विशिष्टग्रहप्रसङ्गः।। न तूभयसामग्र्या विशिष्टग्रहे हेतुत्वकल्पनेपि गौरवा
न्तरं स्यात् एवमेव स्पष्टमाह। अननिरेकेत्विति।। गुरवस्तु विशिष्टस्यातिरिक्तत्वादिति ग्रन्थस्य विशिष्टनिरूपिताधिकरणत्वस्यातिरिक्तत्वादित्यर्थः।। तथा च हेतुतावच्छेदकविशिष्टहेत्वधिकरणावच्छे
देन तादृशसत्त्वाभाववत्त्वमपि विवक्षितमतस्तेनाव्याप्तिरित्याशयः।। ननु विशिष्टाधिकरणत्वस्यातिरिक्तत्वे विशिष्टसत्तावानिति प्रतीतेः।। प्रत्येकनिरूपिताधिकरणताभ्यामुपपादनीये
अन्यथा विशेषणाभावदशायामपि विशिष्टसत्तावत्त्वाभावेन प्रतीत्यापत्तेः।। विशिष्टसत्त्वं हि विशेषणाभाववत्ता स्यात्तत्प्रतिबन्धकतायाः स्यात्तन्मते तदन्यतमाभावात्तदुच्यते तदाह
ह।। अननिरेकेत्विति प्राहुः विशेषणेति।। विशेषणं गुणकर्मान्यत्वं विशेष्यं सत्ता तयोः सामानाधिकरण्यात्मकसंबन्धस्यैवेत्यर्थः।। साक्षात्संबन्धेन स्वव्यभिचारित्वादाह। परम्परयेति। अ त
वच्छेदकताख्यस्वरूपसंबन्धेनेत्यर्थः।। सत्त्वगुणकर्मान्यत्वयोर्द्रव्ये एव सामानाधिकरण्यमिति प्रमा या अवच्छेदकतासंबन्धेन तदुभयसामानाधिकरण्यस्य द्रव्ये एव सत्त्वान्न व्यभिचार इ
त्याहुः।। न चैवं हेत्वधिकरणपदावच्छेदेन वाच्यत्ववद्वृत्तित्वाभावस्य पटीयरूपादौ सत्त्वात्तदधिकरणभिन्नत्वमलेयं हेत्वादौ केवलान्वयिन्यव्याप्तिप्रदर्शनमसङ्गतमाह।। केवलेति
द्वितीयेति।। तत्र साध्यवद्भिन्नत्वस्याप्रसिद्धत्वादिति भावः।। घटपदीयं वाच्यत्वमेयाद्यात्मनैव तादात्म्येन केवलान्वयिनि हेतौ प्रथममपि लक्षणासंभवात्संभवति।। प्रमेयावच्छेदेन वाच्यत्ववत्तादात्म्यावि
रहेणाप्रसिद्धेः।। न च घटावच्छेदेन वाच्यत्ववत्तादात्म्यविरहो घटत्वादौ सुलभः।। तथा सति घटत्वं घटेन वाच्यत्ववदित्यपि प्रतीत्यापत्तेः।। तथापि तत्त्वाधिकरणानिरूपितहेतुतावच्छेदकसंबन्धे शारदेयमीर
न साध्यवद्वृत्तित्वाभावोऽत्र घटादौ इत्यभिप्रायेणाभिधानम्।। तत्पदस्यार्थसाधनव्यक्तिपरत्वे तादात्म्येन घटात्मकहेत्वधिकरणीभूतपटव्यक्तिनिरूपिततादात्म्येन वाच्यत्व
वत्तादात्म्याभावस्य पटावच्छेदेन पटत्वादावेव प्रसिद्धेः।। वस्तुतस्तु केवलान्वयित्वं स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वमात्रं न त्ववच्छेदकगर्भम्।। तथा च तादात्म्ये किंचिदपि प्रमेयं न केवलान्व ६

मूसत्ता न द्रव्यवृत्तित्वाभाववती द्रव्यवृत्तित्वाभावो न सत्तावृत्तिरित्यादि सर्वजनीनप्रतीतिबाधितत्वात् । बाधकाभावे तु संयोगतदभावयोरवच्छेदकभेदेनैकत्र उभयोरेवाभिमतत्वे । अतीन्द्रियसाधके अतीन्द्रियव्यभिचारित्वापत्तिः । तत्र साध्याभा
वति

वीतीति द्वितीयलक्षणे एवमतादृशकेवलान्वयिन्यव्याप्तिसंभवात् । यथाश्रुतमेव सम्यगिति ध्येयम् । न व्याप्तेः केवलान्वयिनि वाऽव्याप्तेरिति । केवलान्वयिसाध्यके अव्याप्तेरभिधानं द्वितीयलक्षणाभिप्रायेणेत्यर्थः । प्रथमलक्षणे यत्किंचित्केवला । नाच्च
धिकिता तात्स्येन प्रसिद्धेरिहे तावव्याप्त्यापि न प्रसिद्धिरित्याह । सत्ताया गुणे न द्रव्यत्वसामानाधिकरण्यमिति प्रतीतिः । सत्ताविशिष्टद्रव्यत्वसामानाधिकरण्यस्यावच्छेदकत्वाभावं गुणेऽवगाहते इत्यस्य सत्तासमानाकालं प्रतीतिनिरूप्यत्वादीति । द्र
व्यत्वे गुणोऽप्यादिः । ननु कथं गुणे तेन गुणावच्छेदेन द्रव्यत्वे पार्थिवत्वसामानाधिकरण्याभावो विषयः । गुणस्य द्रव्यत्वसामानाधिकरण्यं यथा नाऽपि स पृथिवीत्वाभावावच्छेदकत्वासंभवात् । किन्तु द्रव्यत्वनिष्ठं यत्पृथिवीत्वसामानाधिकरण्यं तद
वच्छेदकत्वाभाव एव गुणे विषय इति न कदाचिदपीति भावः । अवच्छेदकत्वाभावमिति । प्रात्यक्षिकप्रत्ययाभिप्रायेणेदम् । सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमित्यादिज्ञानं तत्स्थलेऽवच्छेदकत्वोपस्थापकपदाभावेऽपि ताद
दभावस्य गुणेऽवगाहित्वमनुभवसिद्धत्वात् । किं तु द्रव्यत्वसामानाधिकरण्यं न गुणावच्छेदेनेत्याकारकतत्त्वबोधः । गुणादावित्यत्र सप्तम्यर्थस्य गुणावच्छेद्यत्वस्य न स्वीकारे अन्यथासिद्धिरिति ध्येयम् । न त्वेवं तादृशप्रतीतेः सामानाधिकरण्याभाव
विषयकत्वमनुभवसिद्धं किं तु तेन सामानाधिकरण्यस्य व्याप्यवृत्तित्वेन तदवच्छेदकत्वस्याप्रसिद्ध्या तादृशावच्छेदकत्वाभावविषयकप्रतीतेः प्रमात्वानुपपत्तिरित्यस्वरसादाह । परम्परासंबन्धेनेति । निरूपकतारूपस्वरूपसंबन्धेनेत्य
र्थः । न त्ववच्छेदकतारूपस्वरूपसंबन्धेनेत्यर्थः । सत्ताया गुणे द्रव्यत्वसामानाधिकरण्यमिति प्रतीतिप्रसंगात् । सामानाधिकरण्यस्य व्याप्यवृत्तितया गुणावच्छेदकतासंबन्धेन तस्यासत्त्वात् । नास्तीति । यथा च द्रव्यं सत्त्वक्रिया
दावतिव्याप्तिरिति भावः । ननु कथं तत्स्थले बाधकसत्त्वादवच्छेदकत्वाभावोऽनुप्रतीतेर्विषयः । प्रकृते तु साक्षात्सामानाधिकरण्याभावविषयकत्वे किं बाधकमस्तीत्यतो बाधकमाह । सत्तायामिति । तथा च सत्तायां द्रव्यवृत्तित्वा
वच्छिन्नाभावसत्त्वे द्रव्यवृत्तित्वाभाववती न धीस्तत्र न स्यादिति भावः । ननु द्रव्यवृत्तित्वाभाव एव तद्वृत्तेरव्याप्यवृत्तित्वे वाच्यः । तथा च द्रव्यगुणात्मकोभयवृत्तिच्छेदावच्छेदेन सत्तायां तयोर्निर्वाहात्कोऽपि दोष इत्यत आह । द्रव्यवृत्ति
त्वाभाव इति । नन्वेवं वृक्षो मूले संयोगी नेति प्रतीत्या वृक्षादौ संयोगाभावोऽपि न सिध्येत् । तत्रापि वृक्षनिष्ठसंयोगावच्छेदकत्वाभावस्य मूलेऽवगाहनसंभवादत आह । बाधकाभावादिति । संयोगाभावो न स्वरूपेणेति स्वीकारे प्रत्य
यस्य तु गासत्त्वादिति भावः । ननु द्रव्यवृत्तित्वाभावो न सत्तावृत्तिरित्यादिप्रतीतिरेवासिद्धा । द्रव्यवृत्तित्वाभावो गुणावच्छेदेन सत्तावृत्तिरित्यपि प्रत्ययात् । एवं च स्वरूपेण शक्यत्वादतो दोषान्तरमाह । अतीन्द्रियेति । तेन स्वत्व
दण्ड्यादिस्वसाध्यकत्वादिस्वार्थः । तत्र अतीन्द्रियासङ्केतौ । ननु प्रत्यक्षासंभवेऽप्यगुणत्वमस्तु सामानाधिकरण्याभाववत्सत्तान्तत्त्वाभाववद्वृत्तित्वात्पृथिवीत्ववदित्यनुमानादेव तत्र साध्यसामानाधिकरण्याभावः सेत्स्यतीत्यत आह । नवेति ।
नद्वृत्तीति । साध्यवद्वृत्तिमत्त्वस्येत्यर्थः । तथा चोक्तानुमाने कोऽपि भिन्नत्वमुपाधिः । तथा च साध्यव्यापकत्वं घटत्वादौ साध्याभावसाधनव्यापकत्वं द्रव्यत्वादौ हेत्वाद्ग्राह्यम् । भेदस्याव्याप्यवृत्तित्वे तु साध्यवद्वृत्तित्वाभाववत्त्वावच्छि
न्नत्वे हेतूपाधिर्वा ध्येयः । ननु कोऽपि धूमप्रतिसंधानदशायामनुमानादेव साध्यवद्वृत्तित्वाभावसिद्धिरत्र भविष्यति । अन्यथा व्याप्त्यन्तरस्यापि गतिरिति प्रसंगादित्यत आह । वस्त्वेति । इत्यपि स्यादिः । तथा च कालो गोमान्गोत्वा
दित्यादौ कालिकसंबन्धेन हेतावव्याप्तिः । कालिकसंबन्धेन हेतुमति महाकाले तेन संबन्धेन कालवृत्तित्वाभावस्य कुत्राप्यप्रसक्तत्वात् । न च कालावच्छेदेन गगनादावेव साध्यवद्वृत्तित्वाभावस्य प्रसिद्धिः । कालस्य
गगनाद्यधिकरणत्वेन नाशित्ववृत्तित्वाभावस्य कालावच्छेदासंभवात् । कालिकसंबन्धेन गगनादेर्वृत्तिमत्त्वस्वीकारात् । यद्यपि हेत्वधिकरणतानतिरिक्तक्षणावच्छेदेन कालवृत्तित्वाभावस्य तत्क्षणासमानका

धिकरणताभावस्य प्रत्यक्षासंभवेऽसिद्धेः । न च साध्याभाववद्वृत्तित्वेन तदनुमेयम् । तद्वृत्तिभिन्नस्योपाधित्वात् । किं च इदमिदानीं नास्तीति प्रतीतिसिद्धस्य कालविशेषणताविशेषसंबन्धेन हेतुतादात्म्ये हेतावव्याप्तिः । तेन संबन्धेनाधिकरणे काले

केयं

नतिष्ठ

न्व

गा॰सिं॰
७

लीनेन मन्मरणगोचरज्ञाने प्रसिद्धेः। न तस्य रागस्याभिविषयनयातन्निष्ठतादात्म्यनिष्ठाभाववत्तायामवच्छेदकत्वसंभवात्। तथापि महाकालवृत्त्वकालिकसंबन्धेनाधिकरणत्वम्। उपाधिमान् तद्धर्मिताया
मवच्छेदकत्वमात्रमिति प्राचीनमसिद्धान्तमनुसृत्येदम्। महाकालानिरूपितवृत्तितानिरूपकसावा हेतावव्याप्तिर्दुर्वारा। इदमिदानीमित्याकारकप्रतीतिविषयाविशेषणाभावयोर्विशिष्टः तेन हेतुताया
मितिव्याख्यानात्तद्वारणे प्रयत्नो वाच्यः प्राहुः। सामान्यत एवाविभिन्नकालीनघटोत्पत्त्यधिकरणीयभावहतिमतोऽनुपपत्तेः। गन्धोत्पत्तिक्षणावच्छिन्नस्यास्मन्मनःकालीनज्ञानस्य विषयतया व्याप्यताधिकरणतोऽवे
तदवच्छेदेन तादृशसाध्यवद्वृत्तित्वाभावप्रसिद्धिसंभवादिति ध्येयम्। अत्र हेतुतावच्छेदकसंबन्धेन स्वाधिकरणे स्वनिरूपितकालिकसंबन्धेन साध्यवद्वृत्तित्वस्याविवक्षायां न कोऽपि दोषः। साध्यधीम्
तयोत्त्वाधिकरणमहाकालावच्छेदेन गोत्वनिरूपितकालिकसंबन्धेन साध्यवद्वृत्तित्वाभावस्य घटादावप्रसिद्धत्वात्। साध्यसामानाधिकरण्यघटकत्वेनैव हेत्वधिकरणावच्छेदेन हेतुत्वे
निकालत्वेनाभावप्रतियोगितानवच्छेदकं तद्धर्मवत्त्वं व्याप्तिरितीत्यम्। इत्थं च गगनं प्रमेयादित्यादौ प्रमेयत्वस्य नानात्वेऽपि नव्यादिभेदे दृष्टान्तमस्कृत्य रणाः। केचित्तु सत्यन्तं यत्साध्यवद्वृत्तित्वं हेत्वधिकरणावच्छेद
नदभावाधिकरणनिरूपितत्वम्। यथा च तादृशाभावाधिकरणत्वस्य हेतुत्वेऽपि नव्यमतादेव प्रसिद्धमतो नाव्याप्तिरित्याहुः। साध्यवद्वृत्तित्वाभावाधिकरणत्वसामान्ये यन्निष्ठत्वं यद्धर्मिकरणावच्छेदकयो
भवाभाववत्त्वं व्याप्तिः। पर्वतीयरूपादिनिष्ठं यत्पर्वतावच्छेदेन वह्निमत्संयुक्तत्वाभावाधिकरणत्वं तन्तद्वृत्तिनिष्ठं न तद्वह्न्यधिकरणावच्छेदेनम्। अधिकरणभेदेनाधिकरणाभेदात्। अन्यथा पर्वतेन द्वीपस्य
ये मत्वह्निमत्संयुक्तत्वाभिन्नपदार्थस्य वह्निमत्संयुक्तत्वाभिन्नपादिप्रतीत्यापत्तेः। अतो वह्निमान्धूमादित्यादौ नाव्याप्तिः। साध्यवद्भेदावच्छेदकस्याश्रयत्वकालिकतादात्म्याभावाधिकरणसामान्ये यद्धर्मिकरणाव
च्छेद्यत्वसामान्याभावस्तत्त्वमित्येवं वाच्यमित्याशिक्यं पुनरुक्तत्वादुपेक्षितम्। वाच्यत्वादिसाध्यकेऽत्यन्ताभावान्यत्वेन हेतावव्याप्तिः। वाच्यत्ववत्तादात्म्याभावाप्रसिद्धेः। एतेन सत्तायाः कर्मभिन्नद्रव्यत्वसामानाधिकरण्य
मितिप्रतीतिकर्मणाऽद्वकर्मसत्त्वयोः समवायस्याप्यवच्छेदकत्वमापतेत्। अन्यथेदानीं सत्तायां न द्रव्यत्वसामानाधिकरण्यमित्यपि प्रतीत्यापत्तेः। एतत्कालस्य कर्मानतिरेकात्। एवं च यद्वेद्यमधिकरणीयहेतुता
वच्छेदकसंबन्धेन साध्यवद्वृत्तित्वाभावावच्छेदकत्वं नास्तीत्यर्थः। कालोऽगोमान् गोत्वादित्यादौ कालवृत्तित्वाभावावच्छेदकत्वस्य द्रव्यत्वव्यापकनिष्ठ आत्मसमवेतत्वादौ प्रसिद्धस्य गोत्वाधिकरणीयकालिकसंबन्धे गादिमासी २
निरहान्नाव्याप्तिरित्यपि निरस्तमिति सङ्क्षेपः॥ ॥ ननु ईश्वरेच्छारूपस्य वाच्यत्वस्येच्छात्वादिसमवायित्वात् समवायित्वं मतं ह्यधिकरणधर्मत्वमाह। वाच्यत्वमिति। अस्माकं कादयमर्थोऽवाच्यत्वमिति ईश्वरेच्छा ०
विषयत्वंपदार्थान्तरवाच्यत्वं न तु तादृशेच्छामात्रमतिप्रसक्तत्वात्। समवायित्वयोनिमूलस्य समवायिकारणत्वे तत्त्वार्थमित्यप्याहुः। नन्वित्यं वाच्यत्वहेत्वाद्यनिरूपितवृत्तित्वाभावप्रसङ्गे समवायितया वाच्यत्वाभावरूपस्य साध्याभावस्य
२। समवायित्ययोगि। वाच्यत्वं न यथा समवायि तथा वक्ष्यते। घटादिसमवायितयेत्यर्थ इत्यप्याहुः। वि

स्वस्ति श्रीगणेशाय नमः

स्वस्ति श्रीगणेशाय नमः। श्रीसरस्वत्यै नमः।

स्वस्ति श्री [illegible]

स्वस्ति श्रीगणेशाय नमः

स्वस्ति श्रीगणेशाय

१ साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकावच्छेदकावच्छिन्नप्रतियोग्यधिकरणसामान्याभावव्यापकतावच्छेदकप्रतियोगितावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यधिकरणयत्किञ्चिदवच्छिन्नाभाववत्ताकत्वं तत्त्वं व्याप्तिः॥ इति व्याप्तिलक्षणम्॥

ग्रहणम्। तथा च यादृशसाध्याभावाधिकरणानिरूपितवृत्तित्वाभावप्रतियोगिहेतौ व्याप्तिरित्यर्थः। धूमाद्यभाववद्वृत्तित्वाभावप्रतियोगित्वात् वह्न्यादेर्व्याप्तिनिया मेति। साध्याभाववद्वृत्तित्वविशेषणम्। साध्याभाव [illegible] वृत्तित्वेन तत्कुत्रचिद्भिन्नरूपेणायोवह्न्यादावभावस्यापि सत्त्वात् साध्याभावप्रत्येकदेशमात्रावृत्तिकरणमप्रसिद्धम् भवापत्तेः। न च द्रव्यं सत्त्वादित्यादौ द्रव्यत्वाभाववति गुणादौ सत्तादेर्विशिष्टाभावादिसत्त्वात् तत्र व्याप्तिरिति वाच्यम्। तादृशाभावप्रतियोगितावच्छेदकहेतुतावच्छेदकसम्बन्धावच्छिन्नत्व वृत्तित्वात्। प्रतियोगितावच्छेदकहेतुतावच्छेदकसम्बन्धावच्छिन्नाग्रहणा। तेन द्रव्यत्वाद्यभाववति गुणादौ सत्तादेः संयोगादिसम्बन्धावच्छिन्नाभावसत्त्वेऽपि नातिव्याप्तिः। साध्याभाववत्साध्यतावच्छेदकावच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकोऽभावः। अन्यथा पर्वतादेरपि वह्न्यादिविशिष्टाभावादिसत्त्वेन समवायसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यादिसामान्याभाववत्त्वेन धूमादौ संयोगेन तथात्वनिष्ठाभावप्रतियोगितानवच्छेदकत्वेन हेतुलक्षणत्वात्तस्याव्याप्तिः सम्भवतीति वाच्यम्। किञ्चिदवच्छिन्नाया अपि संयोगाधिकरणतायाः गुणादावेव सत्त्वेन तन्महेतोरभावसत्त्वात् [illegible] न च कपिसंयोगाभाववान् सत्त्वादित्यादौ साध्याभावस्य कपिसंयो

प्रतियोगिता। प्रतियोगितावच्छेदकस्तत्सम्बन्धावच्छिन्नप्रतिरूपकता का धिकरणतावच्छिन्नेति मिलः। साध्यवान्निष्ठाभाव

साध्यतावच्छेदकतावच्छिन्नप्रतियोगितावच्छेदकीयत्किञ्चित्तद्धर्मावच्छिन्नप्रतियोगिताकपर्याप्तिकावच्छेदकताका

[illegible] प्रतियोगिताकसामान्याभावाधिकरणतावच्छेदकसम्बन्धावच्छिन्नाजुआ प्रतियोगिता [illegible] प्रतियोगितावच्छेदक [illegible] प्रकारतापर्याप्त्यनुयोगितावच्छेदकीयत्किञ्चित्तद्धर्मावच्छिन्नत्व

[illegible] प्रतियोगितावच्छेदक [illegible] प्रतियोगितावच्छेदकीयत्किञ्चिद्धर्मावच्छिन्नप्रतियोगितावच्छे

साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताक तादृशाभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगितावच्छेदकं

साध्यतावच्छेदकावच्छिन्नप्रतियोगितानवच्छेदकधर्मावच्छिन्नप्रतियोगिताक साध्यत्वं

प्रतिविशे॥ ध्वंसानिरूपितप्रमीयप्रकारतासमानाधिकरणप्रकारतानिरूपितविशेष्यतानिरूपकप्रकारतानिरूपितविशेष्यताकं ५.
प्रमीयप्रकारतासमानाधिकरणप्रकारतानिरूपितप्रमीयविशेष्यतानिरूपक[illegible]निरूपितविशेष्यतानिरूपितप्रकाराश्रयः

सामान्याभावीयाप्रतियोगिताप्रतियोगितावच्छेदकस्वरूपा । १
व्यधिकरणधर्मावच्छिन्नाभावीयाप्रतियोगिताअतिरिक्ता । २
सामान्यरूपेणविशेषाभावीयाप्रतियोगिता[illegible]समानधर्मस्वरूपा । ३

साध्यतावच्छेदकसम्बन्ध[illegible]त्वकव्याप्यवृत्तिसाध्याव[illegible]तव्याप्तिः॥

परम्परया स्वसमवेतधर्मवत्त्वाधिकरणे कालत्वत्रयः । पर्वत[illegible]सिद्धत्वात्प्रत्यक्षसिद्धिः ।

व्याप्यता[illegible] ~~[illegible]~~ तादात्म्येनप्रतियोगितावच्छेदकधर्मसामान्यरूपेण[illegible]अभावः

प्रतियोगितासमानाधिकरण[illegible]परस्पर~~[illegible]~~वत्त्वम्[illegible]सिद्धान्ताभावः

(अवच्छेदकत्वम्. वि[illegible]स० १० [illegible]

अगलेशर्ये[illegible]

धर्मविरोधात्[illegible]वोरोधं[illegible]स्वर्गमानाधिकरण[illegible]त्वं स्वम[illegible]वच्छेदक[illegible]पर्याप्तिवृत्तिविषयता[illegible]व्याप्यत्वे भवत्यात् ।

४१३५

श्री ५ को सरकार
अभिलेख संरक्षण कार्यालय

श्रीगणेशाय नमः॥ ॥बुद्धिर्नाम कश्चिदात्मविशेषगुणः। तद्व्यवस्थितिः घटमहं जानामीत्याकारकाऽपा
मरसाधारणानुभवबलादेव। सा च सविषयिका। उक्तधर्मिग्राहकप्रतीत्या घटादिविषयकत्वेनैव तदवगाहना
त्। घटादिनिष्ठतादृशविषयत्वं च तत्प्रतियोगिकः सम्बन्धविशेषः। स च प्रतियोगित्वादिवत् स्वरूपादनतिरिक्त एव
क्लृप्तेन स्वरूपेणैवोपपत्तौ अतिरिक्तकल्पनाया अनवकाशात्। न च तादृशसम्बन्धस्य ज्ञानस्वरूपता विषयस्व
रूपता वा स्वीक्रियत इत्यत्र विनिगमनाविरहादुभयस्यैव सम्बन्धताकल्पने तत्तदपेक्षया लाघवात् सम्बन्धत्वेनाति
रिक्तैकविषयताकल्पनमेवोचितमिति वाच्यम्। विषयतायाः विषयस्वरूपत्वे विषयेण समं तस्या आधाराधेयभावा
नुपपत्तेः। ज्ञानस्वरूपाया एव तस्या उपगमात्। अभेदेप्याधाराधेयभावोपगमे घटे ज्ञानविषयतावानितिवद् घटो घट

वानित्यादिप्रतीत्यापत्तेः। नच विषयतात्वावच्छिन्ननिरूपिताधिकरणतैव घटादावुपेयते न घटत्वावच्छिन्नाधि
करणतेति नातिप्रसङ्ग इति वाच्यम्। तदवच्छिन्ननिरूपितत्वस्य तदाश्रयनिरूपितत्वविलक्षणस्य दुर्वचत्वात्। अस्तु
वा विनिगमनाविरहादुभयमेव विषयत्वं तथापि तादृशोभयस्य स्वरूपत्वादनतिरिक्तविषयतापातस्तत्र ज्ञानादिसम्बन्धता
याश्च कल्पनापेक्षया तदुभयस्य ज्ञानादिसम्बन्धत्वकल्पने गौरवानवकाश इति सिद्धान्तानुयायिनः। नव्यास्तु विषय
त्वं पदार्थान्तरमेव न तु स्वरूपसम्बन्धविशेषः। तथाहि। ज्ञानविषयतायाः ज्ञानात्मकत्वे ज्ञानाधिकरणकालस्यापि ज्ञान
काल२ विषयतापत्तिः कालिकनिष्ठतत्सम्बन्धस्यापि तत्स्वरूपानतिरिक्तत्वात्। एवं स्वाभावेन स्वसंप्रतियोग्यनुयो
गिभावरूपज्ञानस्यापि स्वरूपानतिरिक्ततया घटादिज्ञानस्य घटादिविषयकत्ववत्स्वाभावविषयकत्वस्याप

सम्बन्ध२

त्तिः।कालादौ ज्ञानादिसम्बन्धस्यातिरिक्तत्वे च विनिगमनाविरहाद्विषयनिष्ठतत्सम्बन्धस्याप्यतिरिक्तत्वसि
द्धिर्निष्प्रत्यूहैव। स्वविषयताया ज्ञानस्वरूपत्वे घटपटावित्यादिसमूहालम्बनात्मकेकज्ञानीयघटपटादिरूप
विषयनिष्ठविषयतात्मकेकतया तादृशज्ञानानां घटपटत्वाद्यवच्छिन्नघटपटादिनिष्ठविषयताकतया भ्रमत्वापत्तिः
तद्वृत्तिधर्मावच्छिन्नतन्निष्ठविषयताशालिबुद्धेरेव भ्रमत्वात्। तादृशज्ञानानां न तु घटत्वेन पटं जानामीत्याकार
कानुव्यवसायविषयत्वात्। न च तादृशसमूहालम्बनीयघटपटादिनिष्ठविषयतायास्सैक्येऽपि सा विषयता घटत्वाद्य
वच्छिन्नविषयतात्वेन घट एव वर्त्तते पटत्वाद्यवच्छिन्नविषयतात्वेन पट एव वर्त्तते ऽतो न तादृशधियो भ्रमत्वापत्तिः;
।तद्वृत्तिर्यो धर्मस्तदवच्छिन्नविषयतात्वेन तद्वृत्तिर्या विषयतानप्रतियोगिनस्वज्ञानस्य भ्रमत्वात्। न चा तादृशा

समूहालम्बनानन्तरमुक्तानुव्यवसायप्रसङ्गः। घटत्वाद्यवच्छिन्नविषयतात्वेन पटादिघटितविषयताप्रतियोगिनस्तु
ज्ञानस्य तादृशयत्वादिति वाच्यम्। यतः पटत्वाद्यवच्छिन्नविषयतात्वेन घटादिघटितत्वं हि तद्रूपावच्छिन्ननिरूपितत्वादि
निष्ठाधिकरणताकत्वं तादृश्यैचाधिकरणतायादिष्टु विषयतात्वावच्छिन्ननिरूपिताधिकरणतातो नातिरिक्तात
दा तादृशज्ञानीयघटादिनिष्ठविषयतायामपि तादृशाधिकरणताकत्वमक्षतमेव। अतिरिक्तत्वे तो हि किमपराद्ध
मतिरिक्तविषयतयेति। विषयताया विषयस्वरूपत्वे च घटत्वप्रकारकप्रमाविषयतायाः पटत्वप्रकारकभ्रमनिरू
पितायाश्च घटनिष्ठविषयताया ऐक्यप्रसङ्गेन पटत्वप्रकारकप्रमाया अपि भ्रमत्वापत्तिः। एवं घटवद्भूतलं घट
भूतलसंयोगा इति ज्ञानयोरविशेषप्रसङ्गश्च। विषयाणां तदात्मकविषयतानां चाविलक्षणत्वात्। न च प्रथमज्ञा
ने सम्बन्धविधया भासमानस्य संयोगस्य सम्बन्धोऽप्यधिको भासते न तु समूहालम्बनरूपे चरमज्ञाने इत्यतएवउ

मयोर्वैलक्षण्यमित्युपाध्यायमतं सम्यक् । संयोगादिप्रतियोगिकसंबन्धमात्रस्यापि समूहालम्बने सम्भवात् । न च संयोग
संसर्गकविशिष्टबुद्धौ संयोगः स्वरूपतस्तव भासते न तु संयोगत्वेन संसर्गतया पदार्थस्यापि सम्बन्धविधया स्वरूपतो
भानोपगमात् । उक्तसमूहालम्बने च संयोगत्वेन संयोगो भासत इति संयोगत्वरूपाधिकविषयभानाभानाभ्यामे
वनयोर्विशेष इति वाच्यम् । एवमपि घटवद्भूतलं संयोगश्च घटभूतलं संयोगा इति ज्ञानयोर्विशेषानिर्वाहात् ।
घटवद्भूतलमिति ज्ञानस्य घटप्रकारकत्वमेव घटविशेष्यकोक्तसमूहालम्बनाद्विशेष इति चेत् · घटप्रकारत्
वं हि घटनिष्ठप्रकारताप्रतियोगित्वं घटविशेष्यताकत्वं च घटनिष्ठविशेष्यताप्रतियोगित्वं तच्च ज्ञानी
यप्रकारताविशेष्यते यदि प्रकारविशेष्याभ्यामनतिरिक्ते तदोक्तविशिष्टबुद्धेरपि घटविशेष्यकत्वमुक्त
समूहालम्बनस्यापि घटप्रकारकत्वं दुर्वारमेव · घटात्मकयोस्तन्निष्ठप्रकारताविशेष्यतयोर्भेदमतेऽपि न

त्वात्। यदि चैते अतिरिक्ते तदा सिद्धान्तः सम्मोहितमप्रकारविशेष्यतयोर्विषयतात्मकत्वात्। यत्तु भासमानवैशिष्ट्यप्रतियोगि
त्वं प्रकारत्वं तादृशवैशिष्ट्यानुयोगित्वं विशेष्यत्वं न विषयतारूपमिति तदसत्। उक्तसमूहालम्बनस्यापि घटप्रतियोगिक
वैशिष्ट्याविषयकतया घटप्रकारकत्वापत्तेः। संयोगादिरूपव्याधिकरणसम्बन्धेन द्रव्यत्वादिभ्रमस्य द्रव्यत्वादिप्रका
रकत्वानुपपत्तेः। भूतले घट इत्यादिज्ञानस्य भूतलाद्यनुयोगिकसंयोगादिविषयकतया भूतलादिविशेष्यकतापत्तेः
गुणादौ संयोगादिसम्बन्धेन घटादिभ्रमस्य गुणादिविशेष्यकत्वानुपपत्तेश्च। अथ वास्तु न तादृशवैशिष्ट्यप्रतियोग्यनुयो
गित्वेन प्रकारता विशेष्यत्वे येनोक्तदोषाणामवसरः। अपि तु वैशिष्ट्यप्रतियोगितया तदनुयोगितया च भासमान
त्वमेव प्रकारत्वं विशेष्यत्वं चेति चेन्न। प्रतियोगितयेत्यादौ तृतीयार्थस्य दुर्वचत्वात्। भासमानत्वस्य ज्ञानविषय

तात्मकत्वयाप्रकारताविशेष्यतयोर्विषयतात्वसिद्धेश्च। यत्तु विषयत्वं न केवलज्ञानस्वरूपं नापि केवलविषयस्वरूपम्। अपि
तु ज्ञानविषयोभयस्वरूपम्। अतो न प्रागुक्तदोषाणामवसरः। तथाहि। घटपटादिविषयादिसमूहालम्बनीयघटादिनिष्ठतज्ज्ञा
नघटाद्युभयात्मकघटत्वावच्छिन्नविषयतायाः पटादिनिष्ठतज्ज्ञानपटाद्युभयात्मकपटत्वाद्यवच्छिन्नविषयतानात्म
मकत्वया न तादृशज्ञानस्य भ्रमत्वापत्तिः। नवोपदर्शितविशिष्टधीसमूहालम्बनयोरविशेषप्रसङ्गः। तादृशसमूहालम्ब
नस्य तथाविधविशिष्टबुद्धिनिरूपिततज्ज्ञानघटाद्यात्मकप्रकारतानिरूपकत्वेन विषयतावैलक्षण्यसत्वादिति
तद्व्यसत्। घटपटादिनिष्ठेतादृशसमूहालम्बनात्मकज्ञानस्य तज्ज्ञानपटोभयात्मकपटत्वावच्छिन्नपटनिष्ठविषय
ताघटकत्वेन घटत्वावच्छिन्नघटनिष्ठतज्ज्ञानघटोभयात्मकविषयताघटकत्वेन च घटनिष्ठया पटत्वावच्छिन्नतज्ज्ञा

नरूपा विषयता तन्निरूपकत्वेन भ्रमत्वापत्तेर्दुर्वारत्वात्। अथ तद्धर्मावच्छिन्नविषयताकत्वं न ज्ञानतन्निष्ठविषययोर्व्यास
ज्यवृत्त्युपेयते। एवं च तद्धर्मावच्छिन्नविषयताकत्वे न तद्धर्मानधिकरणवृत्तिर्या विषयता तद्वृत्तियोगित्वमेव भ्रमत्वम्। उ
पदर्शितसमूहालम्बने च परत्वाद्यवच्छिन्नविषयतात्वस्य ज्ञानपराद्युभयपर्याप्ततया तेन रूपेण तदुभयात्मकवि
षयताव्यपदिष्टेः। घटादेस्तद्रूपाश्रयपक्षताद्यात्मकविषयतासम्बन्धित्वात्। स्वाश्रयपर्याप्तिसम्बन्धेनैव व्या २८
सज्यवृत्तिधर्मप्रकारेण तदाश्रयत्वादिति न तस्य भ्रमत्वापत्तिरिति चेन्न। परत्वाद्यवच्छिन्नविषयताकत्वं स्वरू
पातिरिक्तं न वा। आद्ये किमपराद्धं तद्रूपावच्छिन्नातिरिक्तविषयतया। अन्त्ये च तस्य व्यासज्यवृत्तित्वानुपपत्तिः
। तत्तत्स्वरूपस्य प्रत्येकविश्रान्तत्वात्। एवं तद्रूपेण घटादिवृत्तित्वं विषयतात्वेन घटादिवृत्तित्वादतिरिक्तं न

वा। आद्ये किमपराद्धमतिरिक्तविषयतया। अन्येन रूपेण घटादिष्वनित्वं तादृशज्ञानीयस्वात्मकविषयताया अक्षतमेव.
एवं जातिमान्घटः इत्यादौ घटत्वाद्यंशकविषयव्यतिरेके ज्ञानीयविषयताया जातित्वाद्यवच्छिन्नत्वं नतु नवच्छिन्नत्वमन्यथा
द्वैविध्यमनुपपन्नम्। ज्ञानस्य विषयस्य च द्वैविध्याविरहात्। तथा च जातिमान्नित्याद्याकारकैकविधघटत्वादिवि
षयताशालिज्ञानात्तादृशज्ञानस्य विलक्षणविषयताशालित्वानुपपत्त्या विलक्षणाकारकतानुपपत्तिः। तद
स्माद्विषयत्वमतिरिक्तमेव। अथ विषयतावाद्विषयेऽनुयोगिताख्यस्तत्सम्बन्धो ज्ञाने प्रतियोगिताख्यस्तत्सम्बन्धश्च तु
ल्ययुक्त्यातिरिक्त एवोपगन्तव्यः। स्वरूपानतिरिक्तत्वे ज्ञानविषयनिष्ठयोस्तत्सम्बन्धयोरविलक्षणतापत्त्या
ज्ञानस्येव विषयस्यापि सविषयकत्वं विषयस्य ज्ञानस्यापि तद्विषयत्वमापद्येत। एवं विषयताया ज्ञान

कृ२ पटादिनिष्ठेन सम्बन्धेन समं कालाभावादिनिष्ठसम्बन्धस्याप्यनतिरिक्तत्वे वैलक्षण्यानुपपत्त्या कालाभावादीनामपि घटादि-
विषयकत्वापत्तिः। घटज्ञानादिविषयतायाश्च। एवं तुल्ययुक्त्या तादात्म्यसम्बन्धस्या [redacted] पि सम्बन्धादिरप्यतिरिक्तः
स्वीकरणीयस्त्वनवस्थितसम्बन्धधाराकल्पनप्रसङ्गः। एवं विषयतासम्बन्धेऽपि ज्ञानस्यनदीयतानियामके निरूप्यत्वाख्य स- सम्बन्ध४
म्बन्धविशेषस्तुल्ययुक्त्यातिरिक्तः स्वीकरणीयः। एवं तत्सम्बन्धादिरपीति तन्नापि धारायामनवस्थापत्तिरिति चेत्। का क्षतिः। न-
हि प्रामाणिकानवस्थाया दूषणावहत्वम्। विषयतावद्विषयित्वरूपज्ञानानुयोगिकविषयसम्बन्धोऽप्यतिरिक्त एव। ननु वि-
षयताप्रतियोगित्वमेव विषयित्वं विषयित्वमेवातिरिक्तं तत्प्रतियोगित्वमेव विषयत्वमित्यस्यापि वक्तुं शक्यतया द्वयोरे-
वातिरिक्ततासिद्धेरिति। विषयता च विषयभेदाद्भिद्यते। अन्यथा घटपटावित्यादिसमूहालम्बनीयघटपटादिनिष्ठविष-
ताया ऐक्ये पूर्वोक्तयुक्त्या नाद्यज्ञानस्य भ्रमत्वापत्तिः। पटघटैकैकविषयकज्ञानीयैकैकत्वे विषयतानां समूहालम्ब

न्तानां विषयद्वयातिरिक्तैकविषयताकल्पनप्रसक्तेः, तथैकत्वाद्यभ्युपगमे समूहालम्बने स्वप्रकसैकज्ञानीयविषयतानामेवोप
गमात्। ज्ञानभेदेन विषयताभेदे मानाभावात्। एतेन घट इत्यादिविशिष्टबुद्धेर्विशेष्यविशेषणाभावापत्तेः घटघटत्वादिद्वयकैकै
व विषयता। न तु विशेष्यनिष्ठा विशेषणनिष्ठा च विषयताभिन्नाभिन्नेति मतं हेयमेव। विशेष्यनिष्ठया विशेष्यतात्मकविषय
तया समं विशेषणनिष्ठप्रकारतात्मकविषयताया अभेदस्यासंभवदुक्तिकत्वात्। तथा सति तादृशबुद्धेर्घटप्रकारकत्वघटत्ववि
शेष्यकत्वयोरापत्तेः। न च प्रकारताविशेष्यतयोर्विषयतारूपतायामिवेयमनुपपत्तिः। सैव न। अपि तु पदार्थान्तरत्व एव। तयो
र्विषयतात्वे मानाभावादिति वाच्यम्। विषयेष्वतिरिक्तविषयतानां तत्र च विषयतात्वकल्पनापक्षस्य विषयद्वयभिन्नत्वेन
स्वप्नानां प्रकारताविशेष्यतानां विषयतात्वकल्पनस्यैव न्याय्यत्वात्। यत्तु निर्विकल्पकीयाप्रकारताविशेष्यताभिन्नत्वे
नोभयासिद्धया विषयताविशिष्टज्ञानस्यापि सैव विषयसम्बन्धः। तत एव च विशिष्टबुद्धेरपि सविषयकत्वनिर्वाहस्तु

किंप्रकारतादीनां विषयतात्वोपगमेन। प्रकारतादीनां विषयतानात्मकत्वेपि तद्वैलक्षण्यस्य स्वज्ञाने वैलक्षण्यसंपादकत्वेन कश्चिद्वि
शेषः स्यादपि हेयमेव। प्रकारताविशेष्यतयोर्विषयतात्वानुपगमे व्याप्यपक्षविशेष्यकपरामर्शीयो व्याप्यविषयतानिरूपितः कल् २
पक्षविषयताशालित्वेनानुगमय्यानुमितिहेतुत्वासंभवात् कारणताबाहुल्यापत्तेः।। निर्विपकीयविषयतायाः परस्परनिरू
पणनिरूपकभावविरहात् एवं संसर्गज्ञानस्याप पनायकतामते उपनीतभानं प्रति उपनायकज्ञानं तत्प्रकारकत्वेन ऽप
तोद्विशेष्यकत्वेन च हेतुताद्वयप्रसङ्गः। मन्मते तु प्रकारताविशेष्यतासंसर्गभिन्नविषयतात्वेनानुगमय्य एकहेतुता
कल्पनसंभवात्। एवं निर्विकल्पकीयविषयताया विशिष्ट्युपगमे घटत्वादिनिर्विकल्पकाद्विजातित्वादिना घ
टत्वादिज्ञानादपि स्वरूपतो घटत्वादिप्रकारकीयघटइत्याद्याकारकविशिष्टबुद्ध्यापत्तिः। न च स्वरूपतस्तद्विशि

बुद्ध २

घटज्ञाने तद्विशेष्यकत्वज्ञानत्वेन हेतुत्वान्नायं दोष इति वाच्यम्। तथा सति ज्ञाने घटश्चेत्यादिज्ञानात् घट इत्यादिविशिष्ट-
बुद्ध्यनुपपत्तेरिति। यत्तु विशिष्टबुद्धिविषयता विशेष्यमात्रवृत्तिः। ननु विशेषणेपि समानाभावात्। न च विनिगमना-
विरहः। घट इत्यादिज्ञानानन्तरं घटं जानामीत्याद्यनुव्यवसायेन घटरूपविशेष्ये समं ज्ञानस्य सम्बन्धावगाहना-
त्· घटादिरूपविशेष्ये ज्ञानस्य विषयतात्मकसम्बन्धस्यावश्योपेयत्वात्। घटत्वं जानामीत्यनुव्यवसायस्तु नत्रासि-
द्धएव तस्य घटत्वत्वविशिष्टवैशिष्ट्यावगाहित्वे न घटत्वत्वप्रकारकव्यवसायानन्तरमेव तत्संभवात्। घट इत्यादिव्य-
वसायस्य च स्वरूपत एव घटत्वादिप्रकारकतया घटत्वत्वाद्यप्रकारकत्वात्। ज्ञानांशे स्वरूपतो घटत्वादिविशेषणा-
कोनुव्यवसायोपि न तत्रतं भवति। ससंबन्धिकपदार्थप्रत्यक्षस्य किंचिद्विशिष्टसंबन्धिवैशिष्ट्यावगाहित्वनिय-

मात्। न चायं घटत्वादिव्यवसायानन्तरं घटत्वेनेमं जा॰नानीत्या प्रकारकानुव्यवसायेन घटत्वादिरूपविशेषणे नापि स
मंज्ञानस्य संबन्धावगाहनात्तत्रापि विशिष्टधीविषयताभ्युपगमआवश्यक इति वाच्यम्। यतस्तत्र तत्ता नान्वयिवैशिष्ट्यं न तृती
यार्थः। अपि तु द्वितीयार्थविषयतान्वयिघटत्वादिप्रकारकत्वम्। न च विषयतानिष्ठं घटत्वादिप्रकारकत्वं घटत्वादिनिष्ठप्रका
रतानिरूपकत्वं नत्वभ्युपगम एवं च विशेषणीभूतघटत्वादेर्विशिष्टधीविषयतासिद्धिर्निष्प्रत्यूहैव। प्रकारतायाविषयता
विशेषात्मकत्वादिति वाच्यम्। यतो विषयतानिष्ठघटत्वादिप्रकारकत्वं न घटत्वादिनिष्ठप्रकारताख्यविषयतानिरूपक
त्वम्। अपि तु घटत्वाद्यवच्छिन्नत्वम्। अवच्छिन्नत्वं च प्रतियोगित्वकारणत्वाधिकरणत्वादाविव विषयतादावपि घटत्वा
दे: सम्बन्धविशेषस वा तत्त्वातिरिक्तोऽनतिरिक्तो वेत्यन्यदेतत्। स्यास्तु विशेषः प्रतियोगित्वादावन्यूनानतिप्रसक्त

धि.वा.
क.२
८

त्वमवच्छेदकभावेनेत्यर्थः। ननु विषयतास्थलेऽप्यधिकरणधर्मस्यापि विषयतावच्छेदकत्वात् विशेषणनिरूपितत्वमेव वा
विषयतानिष्ठतत्प्रकारत्वम्। अस्तु वा विशेषणे विषयतानिरूपितः प्रकारताख्यविशेषः। तथापि तस्य विषयतात्वे ज्ञानप्र
तियोगित्वे च मानाभाव इति अतिरिक्तविषयतावादिनं प्राचीनैकदेशिनां मतम्। न दूष्यमनुपादेयमेव। विशेषणस्य विशिष्टज्ञा
नाविषयत्वेन धर्मे विशिष्टज्ञानानन्तरं धर्मविशिष्टज्ञानानुपपत्तेः। विशिष्टबुद्धौ विशेषणविषयकज्ञानस्य हेतुत्वात्.
भवन्मते तद्विशिष्टज्ञानस्य तद्विषयकज्ञानत्वाभावेन न तद्धेतुत्वात्। एवं विशिष्टज्ञानाद्विशेषणविषयकोपनीतभान
स्याप्यनुपपत्तिः। तदुपनीतभाने तद्विषयकज्ञानस्यैव हेतुत्वात्। एतादृशयुक्त्या विशेषणस्य विशिष्टधीविषयतायामाव
श्यकत्वे च उक्तन्यायबलात् तन्निष्ठप्रकारतायाः स्वविषयतात्वसिद्धिरिति ध्येयम्। अथ तद्विशिष्टबुद्धौ तदुपनीतभाने च स्व

धर्म

श्रीः
८

वृत्तित्वस्वप्रकारकत्वान्यतरसम्बन्धेन तद्विशिष्टाया विषयताशालिज्ञानत्वेनैव हेतुता वाच्या। इत्थं च विशेषणस्य विशिष्ट
ज्ञानाविषयत्वेऽपि तद्विशिष्टज्ञानात्तद्विशिष्टज्ञानात्तस्य तदुपनीतभानस्य चानुपपत्तिः। न चोपदर्शितकारणतावच्छेद
ककोटौ अन्यतरसम्बन्धेन तद्विशिष्टस्य विषयतायां निवेशे अन्यतरत्वघटकभेदयोर्मिथो विशेष्यविशेषणभावे विनिग
गी मनाविरहेण कारणताबाहुल्यमिति वाच्यम्। यतस्तादृशान्यतरस्यान्यतरत्वेन न सम्बन्धता अपि तु स्वरूपत एव। न चैवम्
प्यननुगमात्कारणताधिक्यं व्यभिचारश्चेति वाच्यम्। सम्बन्धाननुगमेऽपि तावन्निष्ठसम्बन्धतायाः एकस्योपगमेन तद्दो
षानवकाशात्। अत एव सम्बन्धाननुगमो न दोषायेति प्राचां प्रवादोऽपि। न चैवमपि स्वप्रकारकत्वस्ववृत्तित्वान्यतर
सम्बन्धेन तद्विशिष्टविषयतामपेक्ष्य स्ववृत्तित्वसम्बन्धेन तद्विशिष्टविषयताया लाघवेन तद्विशिष्टबुद्धावाद्यजन

कत्तावच्छेदकत्वसिद्धेर्निष्प्रत्यूहतया विशेषणस्यापि विशेष्यधीनिरूपत्वं दुर्वारमिति वाच्यम् । प्रकारतायां विषयतात्वोप
गमेऽपि घटत्वादिरूपेण घटादिविषयकस्मरणादौ तथाविधज्ञानस्य घटत्वादिप्रकारतानिरूपितघटादिनिष्ठविषयता
शालित्वेन घटादिनिष्ठविशेष्यतानिरूपितघटत्वादिप्रकारताशालिज्ञानत्वेन वा हेतुत्वे गौरवात् । अस्मन्मते च नै
तादृशविनिगमनाविरहावकाशः । विशेष्यतानिरूपितप्रकारतायास्तानप्रतियोगिकत्वाभावेन परम्परासम्बन्धेनैव
तस्या जनकतावच्छेदकत्वस्योपगन्तव्यतया तदपेक्षया प्रकारतानिरूपितविशेष्यतायाः प्रतियोगितासम्बन्धेन जन
कतावच्छेदकत्वे लाघवस्यैव विनिगमकत्वात् । मैवम् । उक्तविशेषणज्ञानादिकारणतावच्छेदकलाघवेन प्रकारता
यां विषयतात्वस्य ज्ञानप्रतियोगित्वस्य च सिद्धावेव दर्शितस्मरणादिहेतुतायां विनिगमनाविरहावतारे गौरवावतारः

त्तादृशगौरवस्य फलमुखत्वेनादोषत्वात् । प्रासिद्धिमुपजीव्य गौरवावतारस्तत्सिद्धोत्तरस्य विरोधित्वासम्भवात् । घटवद्भूतलमित्या
दिविशिष्टबुद्धौ [illegible] भूतलं जानामीत्यनुव्यवसायवद्घटं जानामीत्याद्याकारकस्य ज्ञानघटादिसम्बन्धावगाहिनोऽनुव्य
वसायस्यापि सर्वानुभवसिद्धतया विशेषणेऽपि विषयतात्मज्ञानसंबन्ध आवश्यकः । न च तत्र स्वप्रकारकविषयताकत्वरूपप
रंपरासंबन्ध एव ज्ञाने घटस्यानुव्यवसायेन गृह्यत इति वाच्यम् । विशेषणीभूतघटादेरेव तादृशविशिष्टबुद्धौ विषयः । ननु
भूतलादिरूपविशेष्यम् । भूतलं जानामीत्याद्यनुव्यवसायेन तु स्वविशेष्यकविषयताप्रतियोगित्वरूपभूतलादिनिरूपि
तपरंपरासंबन्ध एव गृह्यत इत्यस्यापि सुवचनतया विनिगमनाविरहेण विशेषणविशेष्ययोरुभयोरेव विशिष्टधीविष
यतासिद्धेर्निरवाधत्वादित्याहुः । विशेष्यताप्रकारतावत्संसर्गत्वस्यापि विषयताविशेषात्मकत्वात्संसर्गस्यापि विशिष्ट

धीविषयत्वम्। अन्ये तु खलाः। संसर्गस्य विशिष्टधीविषयत्वे मानाभावः। घटइत्यादिज्ञानानन्तरं समवायं जानामीत्याद्या
कारकानुव्यवसायस्यासिद्धत्वात्। नाज्ञानुव्यवसायस्य समवायत्वविशिष्टवैशिष्ट्यावगाहितया समवायत्वप्रकारक
ज्ञानानन्तरमेव तत्संभवात्। अथ विशिष्टबुद्धेः संसर्गानवगाहित्वे बाधबुद्धिप्रतिबन्धकतायाः संसर्गविशेषानियन्त्रितत्वा
संभवात् कपालत्वधर्मिकसंयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकघटाद्यभाववत्तानिश्चयस्य समानधर्मितावच्छेदककं
किंचिदेव घटादिप्रकारकं ज्ञानं प्रतिबध्नन्न तु सर्वमित्यनुभवव्याकोपः। न च बाधप्रतिबन्धकतायाः सम्बन्धविशेषानि
यन्त्रितत्वानुरोधेन तत्प्रतिबध्यस्य धर्मितावच्छेदकबुद्धेः सम्बन्धावगाहित्वसिद्धावपि धर्मितावच्छेदकबुद्धेस्तथात्वं
निर्युक्तिकमिति वाच्यम्। निर्धर्मितावच्छेदकविशिष्टबुद्धेरपि ग्राह्यधर्मिकाहार्येतरज्ञानप्रतिबध्यतया आहार्येतरज्ञा

तप्रतिबन्धकतायाः संबन्धविशेषानियन्त्रितत्वानुरोधेन तत्रापि संबन्धावगाहित्वस्यावश्यकत्वात्। एवं प्रमात्वभ्रमत्वयोः सं-
बन्धविशेषनियन्त्रितत्वानुरोधेनापि सकलविशिष्टबुद्धीनां संबन्धावगाहित्वमावश्यकम्। तयोस्तथात्वानुपगमे कपाल-
विशेष्यकं घटादिप्रकारकं किंचिद्वज्ज्ञानं प्रमा तथाविधं चाकिंचिद्वज्ज्ञानं भ्रम इति प्रतीतिर्न स्यात्। अपि तु कपालादेः सम-
वायेन घटादिमत्तया तथाविधसकलमेव ज्ञानं प्रमा स्यात्। संयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकघटाद्यभाववत्तया
च तथाविधं सकलमेव ज्ञानं भ्रमः स्यादिति चेन्न। विशिष्टबुद्धेः सम्बन्धाविषयकत्वानभ्युपगमेपितरस्येन संस-
र्गसमं प्रकारताया अवच्छेद्यावच्छेदकभावोपगमाद्बाधप्रतिबध्यतावच्छेदकस्य प्रमात्वभ्रमत्वयोश्च संबन्धविशे-
षावच्छिन्नप्रकारताघटितत्वादुक्तानुपपत्तिवारणसंभवात्। न च प्रकारतानिरुपितसांसर्गिकविषयताभ्यपत्व

वि. वा.
२२

मेवसंसर्गस्यप्रकारतावच्छेदकत्वमन्यस्यदुर्वचत्वादितिसंसर्गस्यविशिष्टधीविषयत्वसिद्धिर्निष्प्रत्यूहैवेतिवाच्यम् । प्रतियोगित्व
त्वादिनिरूपितायास्वप्रकारतानिरूपितायाअपिसंसर्गनिष्ठावच्छेदकतायाःस्वरूपसम्बन्धरूपत्वात्पदार्थान्तररूपत्वाद्वा
विषयताविशेषात्मकत्वेपितद्रूपतायास्तुल्यत्वात्तस्याविषयतात्वस्यनिर्युक्तिकत्वात् । तादृशावच्छेदकताविशेषएव
चसंसर्गतापदार्थः । ननुविलक्षणतोविशेषः । अथसंसर्गस्यविशिष्टबुद्धिविषयत्वेनसंसर्गघटितानांविशिष्टबुद्धितदुप
नीतभानानुदयप्रसङ्गः । नचननतस्तयोस्तत्स्वादस्यानुभविकत्वाभावादिष्टापत्तिः । तथात्वेनिस्वरूपतोमनस्त्वादिविशिष्टवा
चकमनःपदाद्यधानत्वाद्बोधानुपपत्तेः । तथाहि । मनःपदात्स्वरूपतोमनस्त्वप्रकारकशाब्दधीभविष्यतिनतुचस्वरूपत
स्त्वप्रकारकशाब्दज्ञानपदार्थोहि[illegible]पस्थित्यादिःकारणम् । ज्ञानित्वादिनातत्प्रकारकशाब्दे

श्रीः
१२

ज्ञानादिना जातित्वादिनैव तत्प्रकारकज्ञानाद्बोधोदयात्। अन्यथा कदाचिज्जातित्वादिना तत्प्रकारकः कदाचित्स्व
रूपतस्तत्प्रकारकस्माद्बोधस्तउत्पन्नत इत्यत्र नियामकाभावप्रसङ्गात्। स्वरूपतस्तत्प्रकारकशक्तिज्ञानपदार्थोप
स्थित्यादिकं च स्वरूपतस्तद्विषयकज्ञानं विना। न संभवति स्वरूपतस्तद्विशिष्टबुद्धौ स्वरूपतस्तद्विषयकज्ञान
स्य हेतुत्वात्। स्वरूपतो मनस्त्वादिविषयकं च निर्विकल्पकज्ञानं न संभवति। अतीन्द्रियस्य निर्विकावेद्यत्वात्।
निर्विकल्पकस्य लौकिकत्वनियमात्। स्वरूपतस्तत्प्रकारकज्ञानस्यापेक्षणे च तथापि तादृशज्ञानस्यापेक्षणीय
तया अनवस्थाप्रसङ्गात्। अस्मन्मते च स्वरूपतः संसर्गविधया किञ्चिज्ज्ञाने मनस्त्वादिभानं स्वीकृस्तन्मूलका

त्स्वरूपतस्तत्प्रकारकशाब्द्यादिज्ञानान्तथाविधशाब्दधिय उपपत्तेः। न चैवं स्वरूपतो निखिलजातिसंसर्गकज्ञाना
त्स्वरूपतो निखिलजातिमत्प्रकारकज्ञानसंभवेन सार्वज्ञापत्तिरिति वाच्यम्। फलबलात्कस्यचिदेव पदार्थस्य कदाचि
त्संसर्गविषयाभानोपगमेन स्वरूपतस्संसर्गतया निखिलजातिभानस्य कदाप्यनुगमादिति चेन्न। तत्संसर्गकज्ञा
नस्य तद्विशिष्टबुद्ध्याद्यजनकत्वेपि स्वरूपतोमनस्त्वप्रकारकस्मरणमूलकतथाविधशाब्द्यादिज्ञानान्तथा
विधशाब्दबोधनिर्वाहात्। न च स्वरूपतस्तत्प्रकारकस्मरणे स्वरूपतस्तत्प्रकारकानुभवस्यापेक्षिततया तदसंभवे
न तदसंभव इति वाच्यम्। भवान्तरप्रभवानभवाहितसंस्कारादेव तथाविधस्मरणोपपत्तेः। न च जन्मान्तरीयतथा
उभवेपि पर्यनुयोगतादवस्थ्यम्। तत्र तत्प्राक्तनजन्मजाततथाविधानुभवाहितसंस्कारमूलकस्मरणस्य गति

त्वात् । जन्मप्रवाहस्यानादितया तादृशानवस्थाया अकिञ्चित्करत्वात् । अथवा जातित्वादिना मनस्त्वप्रकारकेन द्वितीयानुभवप्रभवसंस्कारादेव स्वरूपतस्तत्प्रकारकस्मरणमुत्पद्यते । तस्मात् स्वरूपतस्तत्प्रकारकस्मरणे न तत्प्रकारकत्वेनैव ज्ञानसंस्कारयोः कारणत्वात् । स्वरूपतत्प्रकारकस्मृतौ स्वरूपतत्प्रकारकत्वेन तयोर्हेतुताया अप्रामाणिकत्वात् । नन्वेवं जातित्वादिना मनस्त्वादिप्रकारकस्मरणमात्रस्यैव स्वरूपतस्तत्प्रकारकत्वापत्तिरिति चेत् । न । जातिमानित्याकारकस्य स्मरणस्य विलोपप्रसङ्गादिति वाच्यम् । स्वरूपतस्तत्प्रकारकस्मरणोद्बोधकविशेषस्यैव नियामकत्वात् । मनस्त्वाद्यप्रकारकस्मरणपक्षानुभवसिद्धत्वञ्चैव तादृशोद्बोधकस्य फलबलेन कल्पनीयत्वात् । अन्यथा जातित्वेन स्वरूपतो मनस्त्वप्रकारकक्रमिकानुभवद्वयाहितसंस्कारवतः पुंसो भवन्मतेऽपि स्वरूपतो मनस्त्वप्रकारकजातिमानित्याकारकमनस्त्वप्रकारकस्मरणं संभवति तत्र

मनस्त्वांशे जातित्वभानेवाधकाभावादिति वाच्यम्। तदंशे जातित्वभानेपि जातिमन्मनश्चेत्याकारकस्य तदंशे द्वि
विधविषयताशालिनःस्मरणस्य संभवात्। वस्तुतस्तु जातित्वांशे मोषदशायां तथाविधसंस्कारान्मन इत्याका
रकं स्मरणं निरावाधमेव। तदंशे मोषश्च तत्प्रकारकोद्बोधकासमवधानम्। नच किञ्चिद्रूपेणातत्प्रकारकसं
स्कारादपि स्वरूपतस्तत्प्रकारकस्मरणस्य मोषवशादुत्पत्तौ जातित्वादिना सामान्यप्रत्यासत्तिजन्यतत्प्र
कारकनिखिलजातिविषयकभवाहितसंस्कारात् जातित्वांशे मोषदशायां स्वरूपतो निखिलजातिप्रकार
कस्मरणसंभवात् सार्वज्ञापत्तिरितिवाच्यम्। उद्बोधकस्य फलबलेन कल्पनीयतया जातित्वांशे मोषदशा
यां निखिलजातिभासकोद्बोधकस्याकल्पनेनापत्तिविरहादित्यलंपल्लवेन। इत्थं च विशिष्टसंविदस्संबन्धा

नवलम्बितानकथंचिदपि किञ्चिदनिर्वाहमावहतीति युक्तिः तच्चानुत्त असिद्धान्तविरोधः प्रतिरूपणाद्धु। किंचित्तु वि-
शिष्टसंसर्गकबुद्धेर्विशिष्टसंसर्गघटकविशेषणीयसंसर्गतायाप्रकारतात्वं तथाविधविशेष्यीयसंसर्गतायां वि-
शेष्यतात्वमावश्यकम्। अन्यथा कम्बुग्रीवादिमत्वाद्यवच्छिन्नत्वरूपेण प्रतियोगितासंसर्गककम्बुग्रीवादिमान्ना-
स्तीत्याद्याकारकबुद्धेर्भ्रमत्वानुपपत्तेः। तथाहि। तादृशज्ञाने अभावांशे प्रतियोगितासम्बन्धेन घटस्य भ्रमः। तेन स-
म्बन्धेनाभावस्य घटवत्वात्। नापि कम्बुग्रीवादिमत्वावच्छिन्नप्रतियोगितासम्बन्धेन तदंशे तस्य भ्रमः। विशिष्टसं-
म्बन्धाप्रसिद्धेः। नापि स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन तदंशे कम्बुग्रीवादिमत्वस्य भ्रमः। तदंशे तस्याप्रका-

रत्वात् । तथा सति तादृशधर्मविशिष्टत्वेनाभावो ध्येरवापत्तेः । अत एव प्रतियोगितावच्छेदकत्वसम्बन्धेन तादृशधर्मांशेऽभा
वस्य भ्रमत्वापत्तेः न तु धर्मांशेऽभावस्याप्रकारत्वात् । नापि प्रतियोगित्वांशे कम्बुग्रीवादिमत्त्वावच्छिन्नत्वस्य प्रतियोगिताव
घ्रत्वांशे कम्बुग्रीवादिमत्त्वस्य वा भ्रमः तस्य संसर्गघटकतया अंकारकत्वादिति तस्मात् संसर्गताविशेषप्रकारतात्वावि
शेष्यतात्वे स्वविष्टस्य पश्चात् प्रातिस्विकरूपेणैवापेक्षणीयतया तत्संसर्गस्यापि विशिष्टधीविषयतामाहुः । प्रकारतात्वादि
विषयतात्वव्याप्यत्वादित्याहुः । तदपि न शोभनं तथा प्रतिभाति । उक्तयुक्तेः प्रतियोगिविशेषणतापन्नस्य कम्बुग्रीवादि
मत्त्वादेरभावांशे प्रकारतोपगमे क्षतिविरहात् तदंशे तद्भ्रमत्वस्यैव सम्भवात् । स्वातन्त्र्येण प्रकारतास्थलेऽप्येव विशे
षणत्वेन विशेष्यो ध्येरवात् । अत एव दण्डी चैत्रः कुण्डलीत्यादिविशिष्टानुयोगिकवैशिष्ट्यबुद्धेः समानकाली

न त्वसम्बन्धेन विशेष्यतावच्छेदकदण्डादेर्विधेयकुण्डलांशे प्रकारत्वेऽपि न दण्डवत्कुण्डलीत्याकारकता। न च प्रका
रतायाः पारतन्त्र्यं दुर्निर्वचमिति वाच्यम्। उक्तस्थले प्रतियोगिनिरूपितविशेष्यतानिरूपितप्रकारतावच्छेदेनैवाभावां
शे कम्बुग्रीवादिमत्त्वादेः प्रकारत्वोपगमात्। विशेष्यतानिरूपितप्रकारतावच्छिन्नत्वस्यैव तत्पारतन्त्र्यपदा
र्थत्वात्। यत्तु तत्र प्रतियोगिविशेष्यतयाऽभावविशेष्यतया च निरूपिता एकैव प्रकारता स्वीक्रियते। स्वात
न्त्र्येण प्रकारतास्थले तु विशेष्यभेदेन प्रकारताभेदः। तादृशप्रकारताया ऐक्ये तु ज्ञानसाधारणत्वात्। एव
ञ्च तदीयविशेष्यतानिरूपितप्रकारताभिन्नत्वमेव तत्पारतन्त्र्यम्। न चैवं सति तादृशज्ञानस्याभावांशे घ
प्रतियोगित्वांशे स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन कम्बुग्रीवादिमत्त्वप्रकारकत्वापत्तिः अभावांशे वि

शेष्यतानिरूपितत्वसम्बन्धावच्छिन्नप्रकारताया एव भवन्मते प्रतियोगिविशेष्यतानिरूपितप्रकारतात्मकत्वात्. तथा च तादृशज्ञानं प्रतियोगित्वेनोपनीतस्य भ्रमत्वादिति वाच्यम्। तादृशाभावस्य हि प्रतियोगिनिष्ठविशेष्यतानिरूपितत्वसम्बन्धावच्छिन्नकम्बुग्रीवादिमत्प्रकारताशालित्वेपि प्रतियोगिनिष्ठविशेष्यतानिरूपितायास्तादृशसंसर्गनिष्ठसंसर्गता निरूपकतद्धर्मप्रकारकत्वं नास्ति तादृशसंसर्गनिष्ठसंसर्गताया अभावविशेष्यतायाश्च समं निरूप्यनिरूपकभावोपगमात्. इष्टं च तन्निष्ठविशेष्यतानिरूपितत्वसंसर्गनिष्ठसंसर्गतानिरूपकतद्धर्मप्रकारकत्वमेव तदंशे तत्सम्बन्धेन तद्धर्मप्रकारकत्वमतो न दर्शितातिप्रसङ्ग इति. तदसत्। तथा सति प्रतियोग्यंशे तादृशाभावीयकम्बुग्रीवादिमत्त्वप्रकारताया अपि अभावभासकत्वापत्तेः। तादृशस्थले बोधकशब्देन प्रतियोग्यनुल्लेखापत्तेः। अथ प्रतियोगिविशेषणीभूतधर्मस्या

भायांशो निरूढप्रकारताकल्पनापेक्षया संसर्गतायां प्रकारतात्वादिकल्पनमेवोचितं धर्मिकल्पनातो धर्मकल्पनाया लघुत्वात्·
न च भवन्मतेपि तद्धर्मावच्छिन्नत्वांशे प्रतियोगिसंसर्गीभूतप्रतियोगित्वविशेषणतया संसर्गतायाः कल्पनीयतया धर्मिकल्प
नमावश्यकमिति वाच्यम् भवन्मतेपि अवच्छिन्नप्रतियोगिताकत्वांशे तद्धर्मनिष्ठप्रकारतानिरूपितसंसर्गतायाः कल्पनीय
तया संसर्गताकल्पनस्य तुल्यत्वादिति व[illegible]भावांशे प्रतियोगित्वविशेषणतानिष्ठप्रकारतानिरूपिताया अवच्छिन्नत्वनि
ष्ठसंसर्गतातन्निरूपितापि एतावतैव तादृशधर्मस्य स्वावच्छिन्नप्रतियोगिताकत्वरूपसंसर्गभानानिर्वाहात्। एवञ्च तद्धर्मावच्छि
न्नत्वविशेषितप्रतियोगितानिरूपकत्वप्रतियोगिसंसर्गतावादिनस्तव मम चावच्छिन्नत्वप्रतियोगित्वनिरूपकत्वेष्वेकैक
संसर्गताकल्पनस्य तुल्यतया तावतादृशावच्छिन्नत्वनिष्ठसंसर्गतानिरूपिततद्धर्मनिष्ठसंसर्गताकल्पनेन च मममता

दृशावच्छिन्नत्वनिष्ठसंसर्गतानिरूपिततत्तद्धर्मनिष्ठप्रकारताकल्पनस्यतुल्यतयाभवतांसंसर्गतायांप्रकारतात्वादिकल्पनस्या
धिक्यात्।नचभवन्मतेपितादृशप्रकारतायाःपारतन्त्र्यनिर्वाहाद्धर्मनिष्ठप्रकारताविशेषात्मकसंसर्गतायाअवच्छिन्नत्वानुयो
गिकसंबन्धविशेषावच्छिन्नत्वस्याधिकस्यकल्पनीयतयासाम्यात्।अथवाकिमेतावतासूक्ष्मगवेषणयास्वेनास्तुसंसर्गतावि
शेषाणांप्रकारतादिविशेषरूपतानैतावतापिसंसर्गस्यविशिष्टधीविषयतासिद्धिः।ऽरितिनिविषयदितिनिर्युक्तिकसिद्धान्तानु
रोधनिरस्तप्रस्फुटखलानांविशेषात्तस्यप्रकारतात्वादिव्यापकताभङ्गभीरुतयाउरम्भिभवत्वादितिवदन्ति।संसर्गतायाञ्च
समंप्रकारतायाविशेष्यतायाश्चनिरूप्यनिरूपकभावाख्यस्सम्बन्धविशेषोऽभ्युपगन्तव्यः।सचसंबन्धःकार्यत्वकारणत्वाधेय
त्वाधारत्वप्रतियोगित्वानुयोगित्वादीनांमिथस्तादृशसम्बन्धश्चस्वरूपविशेषःपदार्थान्तरमेववा।अन्यथातत्रतेनसम्ब

न्धेन न तत्प्रकारकमित्येतदर्थस्य दुर्वचत्वात् नच तत्संसर्गकत्वे सति तन्निष्ठविशेष्यतानिरूपितततत्प्रकारकत्वमेवेति
न सम्बन्धेन तत्प्रकारकत्वमिति वाच्यम्। तथा सति भूतलादौ संयोगेन घटादिकं समवायेन च रूपादिकमवगाहमा
नाया धियो भूतलांशे संयोगेन रूपादिप्रकारकत्वस्य समवायेन च घटादिप्रकारकत्वस्यापत्तेः। एवं समवायेन क
पालांशे संयोगेन च भूतलांशे घटमवगाहमानाया बुद्धेः समवायेन भूतलांशे संयोगेन च कपालांशे घटप्रकारक
त्वापत्तेः। तत्स्वीकारे च तन्निष्ठविशेष्यतानिरूपिततदीयसंसर्गतानिरूपिता या तदीयप्रकारता तत्प्रतियोगित्वमे
व तदंशे तेन संबन्धेनन तत्प्रकारकत्वम्। यस्य यस्सम्बन्धो यत्र भासते तत्तदीयविशेष्यतातदीयप्रकारताभ्यामेव तदी
यसंसर्गताया निरूप्यनिरूपकभावान्नोक्तातिप्रसङ्गः। नच प्रकारतायाः संसर्गविशेषावच्छिन्नतया तत्संसर्गा

वि·वा·
७

वह्निमत्तदीयप्रकारतानिरूपिततदीयविशेष्यताकत्वमेव तेन सम्बन्धेन तद्देशे तत्प्रकारकत्वमस्तु किमुक्तनिरूप्यनिरूपकभावो
पगमेनेति वाच्यम्। संसर्गनिष्ठावच्छेदकतानिरूपकत्वरूपसंसर्गावच्छिन्नत्वस्य प्रकारतायास्वीकृतावेव संसर्गताप्रकारतयो
निरूप्यनिरूपकभावसिद्धेः। संसर्गतायास्संसर्गनिष्ठावच्छेदकतानिरूपकत्वात्। न चैवमपि प्रकारतयैव समं तस्या निरूप्यनिरू
पकभावोस्तु न तु विशेष्यतयापि सममुक्तवृत्तिनिरूपितायाः समवायनिष्ठसंसर्गतानिरूपितघटप्रकारतायाभूतलीयविशे
ष्यतानिरूपितत्वविरहात्। संयोगनिष्ठसंसर्गतानिरूपिततत्प्रकार[illegible]स्त्वकपात्व विशेष्यतानिरूपितत्वविरहादुक्तानि
प्रसङ्गवारणमिति वाच्यम्। विनिगमनाविरहेणैव विशेष्यतयापि समं तस्या निरूप्यनिरूपकभावसिद्धेर्निष्प्रत्यूहत्वा
त्। स्वस्वविशेष्यताप्रकारतयोस्साक्षान्निरूप्यनिरूपकभावोऽप्रामाणिकः। किन्तु प्रकारतायां विशेष्यतानिरूपितसंसर्ग

श्रीः
७७

तानिरूपितत्वमेव विशेष्यतानिरूपितत्वं विशेष्यतायां प्रकारतानिरूपितसंसर्गतानिरूपितत्वमेवं च प्रकारतानिरू-
पितत्वं कार्यकारणभावावच्छेदककोटौ यत्र प्रकारविशेष्यतयोर्निवेशस्तत्र संसर्गस्याप्यवश्यनिवेशात्। तयोर्निरू-
प्यनिरूपकभावानभ्युपगमेपि गौरवानवकाशादितिनुध्येयम्। प्रकारता च द्विविधा। निरवच्छिन्ना विशेषणताव-
च्छिन्ना च। तत्र निरवच्छिन्ना घट इत्याद्याकारकज्ञानीयघटत्वादिप्रकारता। तत्र स्वरूपत एव घटत्वादेर्भानात्। विशे-
षणतावच्छिन्ना च घटत्ववानिति ज्ञाने। तत्र घटत्वत्वरूपधर्मान्तरस्यापि विशेषणत्वात्। तादृशी च प्रकारता जा-
त्यखण्डोपाधिभिन्नेन स्वीक्रियते। सावच्छिन्ना च घटवदित्यादिज्ञानीयघटादिप्रकारता। तत्र घटत्वादेरवच्छेदक-
त्वात्। न च तादृशप्रकारतया घटत्वादिना सममवच्छेद्यावच्छेदकभावो निर्युक्तिकः। द्रव्यवदित्यादिज्ञाने तादृशा

ज्ञानस्य घटांशेऽपि भिन्नप्रकारकत्वेनैव वैलक्षण्योपपत्तेरिति वाच्यम्। तादृशज्ञानीयघटादिप्रकारताया घटत्वाद्यवच्छिन्नत्वानुपगमे द्रव्यवद्भूतलं घटश्चेत्याद्याकारकसमूहालम्बनात्मकज्ञानाद्द्रव्यघटवद्भूतलन्त्वस्येति समूहालम्बनस्यैव वैलक्षण्यानुपपत्तेः। उभयोरेव घटांशे द्रव्यत्वघटत्वोभयप्रकारकत्वाद्भूतलांशे घटप्रकारकत्वाच्च। मन्मते तु नाद्ये घटे द्रव्यत्वावच्छिन्ना या घटीया प्रकारता अन्त्ये च घटत्वावच्छिन्नासेति प्रकारतावैलक्षण्येन तयोर्वैलक्षण्यम्। वस्तुतस्तु घटत्वादिविशिष्टप्रकारतानिरूपितत्वमेव घटादिप्रकारताया घटत्वाद्यवच्छिन्नत्वम्। न च प्रकारताविशेष्यतयोरेव निरूप्यनिरूपकभावो न तु प्रकारतयोरपीति वाच्यम्। तत्र घटादिनिष्ठाया भूतलादिनिष्ठविशेष्यतानिरूपितप्रकारताया एव घटत्वादिप्रकारतानिरूपितविशेष्यतात्मकत्वात्। तादृशप्रकारतयोर्निरूप्यनिरूपकभावोपपत्तेः। केचित्तु घटत्वप्रकारतानिरूपितविशेष्यतावच्छेदे [illegible] भूतलां-

शे घटस्य प्रकारता घटत्वादिसे ताहशज्ञाने स्वीक्रियतेऽतएवोक्तज्ञानयोर्भेद इत्याहुः· तच्चिन्त्यम। परेतु घटवदित्याद्याकार
कं विशिष्टविशेषणकज्ञानं द्विविध विशिष्टवैशिष्ट्यबोधात्मकं केवलं विशेष्ये विशेषणम् तत्र च विशेषणान्तरमिति रीत्या
घटत्वाद्यवगाहि· तत्र प्रथमे घटत्वादेः प्रकारतावच्छेदकत्वम। द्वितीयेतु प्रकारतात्मकविशेष्यतानिरूपितप्रकारत्वं नतु प्रका
रतावच्छेदकत्वमपीत्याहुः· तन्न स्वविशिष्टवैशिष्ट्यबुद्धिविचारे स्फुटीभविष्यति· विशेष्यता च काचिन्निरवच्छिन्ना क्वचिद्
विशेषणान्तरावच्छिन्ना· तत्र निर्धर्मितावच्छेदके घट इत्याद्याकारकज्ञाने घटत्वादिप्रकारतानिरूपितविशेष्यता निरवच्छि
न्ना· अयं घट इत्याद्याकारकसधर्मितावच्छेदकघटत्वादिविशिष्टबुद्धौ च घटत्वादिप्रकारतानिरूपितविशेष्यता इदन्त्वाद्य
वच्छिन्ना अत एव इदन्त्वादिकं तत्र धर्मितावच्छेदकमित्युच्यते। विशेष्यतावच्छेदकताया एव धर्मितावच्छेदकतापदार्थ

त्वात्। विशेष्यतानिरूपितत्वमवच्छेदकत्वं च न तन्निरूपितप्रकारकत्वम् तथा सति घट इत्यादिज्ञाने अयं घट इत्यादिज्ञाने च घटत्व
स्य धर्मितावच्छेदकत्वापत्तेः। निर्धर्मितावच्छेदकविशिष्टबुद्धिविलोपप्रसङ्गाच्च। किन्तु प्रतियोगित्वादिनिरूपितावच्छेदक
त्ववत्स्वरूपविशेषः पदार्थान्तरमेव वा अथवा प्रकारताविशेष एव तत्। अन्यथास्य धर्मितावच्छेदकता तस्य धर्मितावच्छेद
कप्रकारकत्वापत्त्यपेक्षया तन्निष्ठज्ञानीयप्रकारतान्तरकल्पने गौरवात्। न च ज्ञानान्तरस्य तद्धर्मनिष्ठप्रकारतयैवोप
पत्तेनातिरिक्तप्रकारताकल्पनमिति वाच्यम्। एवमपि तद्धर्मितावच्छेदकसमानाधिकरण्यताकान्तज्ञानेषु तेष्वप्रका
रताप्रतियोगित्वकल्पनापेक्षया तावन्साधारणैकधर्मितावच्छेदकतायां प्रकारतात्वकल्पने लाघवात्। नन्वेवमयं
घट इत्यादिज्ञाने इदन्त्वादेरस्त्वस्यापि धर्मितावच्छेदकत्वापत्तेरिति न तोऽयमयमित्याद्याकारकस्मरणप्रसङ्ग इति वा

च्यम्। यत्तत्तदीयप्रकारतानिरूपितायाधर्मितावच्छेदकताया आश्रयस्तत्तदीयधर्मितावच्छेदकः· उक्तस्थले चेदन्त्वनिष्ठधर्मितावच्छे
दकतायास्स्वात्मकप्रकारतायां निरूप्यनिरूपकभावविरहान्नातिप्रसङ्गः। नन्वेवमपीदन्त्वादिकं घटत्वादेरपि धर्मितावच्छेदकं न स्या
त्· तन्निष्ठधर्मितावच्छेदकतया घटत्वादिप्रकारताया अपि निरूप्यनिरूपकभावेभानाभावात्· परस्परयोर्निरूप्यनिरूपकभा
वस्य च प्रकृतेपि सत्वादिति वाच्यम्। एतदनुरोधेनैव धर्मितावच्छेदकत्वविशेषणीयप्रकारत्वयोरपि निरूप्यनिरूपकभा
वोपगमात्· यत्प्रकारतानिरूपितत्वावच्छेदेन विशेष्यताया यदवच्छेद्यत्वं स एव धर्मितावच्छेदकः· उक्तस्थले च स्वप्रकार
तानिरूपितत्वावच्छेदेन न विशेष्यतायास्स्वावच्छेद्यत्वमतो न स्वांशे स्वस्य धर्मितावच्छेदकत्वापत्तिरित्याहुः· विशेष्यता च
समूहालम्बने प्रकारभेदाद्भिद्यते· समूहालम्बनस्य प्रत्येकप्रकारकज्ञानसामग्रीसमाजनियततया प्रत्येकप्रकारकज्ञा

नीयतानाविशेष्यताप्रतियोगित्वस्यैवतत्रसत्वात्।अयंघटोदण्डीकुण्डलीत्याकारकैकधर्मितावच्छेदककापरधर्मप्रकारक
ज्ञानेधर्मितावच्छेदकतायाःप्रकारताविशेष्यत्वमतेउभयप्रकारतानिरूपितैकैवविशेष्यता·धर्मितावच्छेदकेज्ञानाकार
साधारणप्रकारतास्वीकारेकल्पेतुप्रकारभेदेनविशेष्यताभेदः।यदिचसमूहालम्बनविलक्षणोविशेषणविशेष्यतावच्छे
दकभावानापन्नखड्गकुण्डलाद्युभयविशिष्टविषयकःखड्गीकुण्डलीचैत्रइत्याद्याकारकबोधोनुभवसिद्धस्तदातत्राप्यु
भयप्रकारतानिरूपितैकविशेष्यता·अन्यथासमूहालम्बनान्तद्वैलक्षण्यानुपपत्तेः।एवंमिथोविशेषणविशेष्यतावच्छे
दकभावानापन्नखड्गकुण्डलोभयादिकंयत्रशौर्यादिधर्मितावच्छेदकतयाभासतेखड्गीकुण्डलीचैत्रश्शूरइत्याद्याका
रकेतादृशबोधेचखड्गकुण्डलोभयादिप्रकारतानिरूपितैकविशेषणतातादृशविशेष्यताचतादृशोभयाद्यवच्छिन्नशौ

र्यादिप्रकारतानिरूपितविशेष्यतातो भिन्नाऽभिन्ना वेति तु पूर्वोक्तवदूहनीयम्। एवं खड्गाद्येकतरधर्मितावच्छेदकताप
न्नस्यैवापरस्य कुण्डलादेर्विधेयधर्मितावच्छेदकत्वं यत्र तत्र खड्गादिप्रकारतानिरूपितकुण्डलाद्यवच्छिन्नविशेष्य-
ताविधेयप्रकारतानिरूपितोभयधर्मावच्छिन्नविशेष्यतयोरभेदः। अन्यथा मिथो विशेषणविशेष्यतावच्छेदकभा
वानापन्नखड्गकुण्डलोभयधर्मावच्छिन्नविशेष्यकशौर्यादिविधेयकबोधस्य वपत्तेः स्यात उयेण कुण्डलस्यैव खड्ग-
धर्मितावच्छेदकतया भानं तादृशसमूहालम्बनात्तस्य वैलक्षण्यानुपपत्तेः। एवं च सति खड्गादेः खड्गादिप्रकार-
तानिरूपितविशेष्यताया अवच्छेदकत्वेऽपि यथा न तस्य स्वधर्मितावच्छेदकत्वं तथोपपादितं प्रागेव। न चोक्तवि-
शेष्यताभिन्नैव किञ्चैकविशेष्यतापरविशेष्यतावच्छेदकभावापन्नेति समूहालम्बनाद्विशेष इत्याहुः॥ ॥

इत्थम्प्रकारतादिविधेयत्वमपि विषयतान्तरं न तु प्रकारत्वमेव नद्धर्मितावच्छेदकस्यापि तथात्वापत्तेः अथ विशेष्य
तावच्छेदकताभिन्नमुख्यविशेष्यतानिरूपितप्रकारतैव विधेयता पर्वतो वह्निमानित्यादौ च पर्वतत्वादिरूपधर्मितावच्छेदक
निष्ठप्रकारताया धर्मितावच्छेदकतात्मिकैव धर्मितावच्छेदकतायाः प्रकारतात्वस्य व्यवस्थापितत्वात्· अतो न तत्र पर्वतत्वादेर्विधेयता
पत्तिः· तादृशज्ञानेन वह्न्यादेरिव वह्नित्वादेर्वह्निमत्पर्वतवान्देश इत्यादौ च वह्नेर्विधेयतावारणाय मुख्यविशेष्यतानिरूपितत्वविशे
षणम्· मुख्यत्वं च विशेष्यतायाः प्रकारतानवच्छिन्नत्वं प्रकारताभिन्नत्वं वा· न च विशेष्यतावच्छेदकताभिन्नत्वाद्युपस्थितिं
विनापि पर्वतो वह्निमानित्याद्यनुमित्यनन्तरं पर्वते वह्निमनुमिनोमीत्याद्याकारकस्य वह्न्यादिविधेयकत्वावगाहिनोऽनुव्यव
सायस्यात्यन्तानिरूढप्रकारतायां विधेयतात्मकत्वं नोपपद्यते इति वाच्यम्। वह्निप्रकारकानुमितित्वस्यैव तादृशानुव्यवसा

यविसयत्वोपगमात् नचैवं वह्निमान्पर्वतो धूमवानित्यनुमित्यनन्तरंमपि नाहंज्ञानुव्यवसायापत्तिरिति वाच्यम् · निरूक्तनान्निष्ठ
प्रकारताकत्वस्य नः प्रकारकानुमितित्वव्याप्यकतयानाहंज्ञापत्त्यसम्भवात्। भवन्मतेपि नद्विधेयकानुमितौ यथा कथञ्चि
द्रूपस्थितत्वाद्विधेयकत्वप्रहवारणाय तन्नमाद्विधेयकत्वहेतुताया आवश्यकत्वात् · नच नाहंज्ञानुव्यवसायेनान्निष्ठविन्नसा
णविषयतारूपाविधेयतायाः प्रतियोगितासम्बन्धेन हेतुत्वकल्पनापेक्षया निरूक्तनान्निष्ठप्रकारतायाः गुरुशरीरस्यास्त
सम्बन्धेन हेतुताकल्पने गौरवादिलक्षणाविषयतासिद्धिरिति वाच्यम् · कार्यकारणभावलाघवानुरोधेन ज्ञात्यतिरि
क्तपदार्थसिद्धेरसिद्धान्तविरुद्धत्वात्। अन्यथा धूमादिपरामर्शजन्यतावच्छेदकतया व्याप्यालोकादिलिङ्गकानुमितित्वा
वृत्तिविलक्षणाविषयतासिद्धिप्रसङ्गात् · नचानिरूक्तप्रकारतानोतिरिक्तैव विधेयताख्यविषयता · अन्यथा धर्मि

तावच्छेदकताभिन्नत्वाद्यनुपस्थितिदशायां वह्निमान् पर्वतो घटवानित्याद्यनुमित्यनन्तरं पर्वते घटमनुमिनोमि न वह्निमित्याद्या
कारकस्य वह्निविधेयकत्वाभावावगाहिनोऽनुव्यवसायस्यापलापप्रसङ्गात्· वह्न्यादिप्रकारकानुमितिविषयकस्य वह्नि
प्रकारकत्वसामान्याभावावलम्बनत्वासम्भवादिति वाच्यम्· धर्मितावच्छेदकताभिन्नत्वाद्यनुपस्थितिदशायां तादृशप्र
तीतेः प्रामाणिकत्वे निरुक्तप्रकारतायामेव विधेयताख्यधर्मविशेषं स्वीकृत्य तेन रूपेण निरुक्तप्रकारतायाः प्र
तियोगितासम्बन्धावच्छिन्नाभावस्यैव तादृशप्रतीतिविषयतायाः स्वीकरणीयत्वात् भवन्मतेपि सम्बन्धादिभेद
भिन्नविधेयतानामनुपगमय्य तादृशातिरिक्तधर्मस्वीकारस्यावश्यकत्वात्· अन्यथा विधेयतानामनतिप्रसक्तेः सा
मान्यधर्मावच्छिन्नाभावासम्भवेन तत्तद्धर्मिकत्वावच्छिन्नाभावकूटस्यैव तादृशप्रतीतिविषयतायाः स्वीकार

रणीयतदाऽभावकूटस्यविशिष्यग्रहसहस्रेणापिग्रहीतुमशक्यतयातादृशप्रतीतेरेवानुपपत्तेः।विधेयताप्रतियोगिकाभावत्वे
नतावदभावानांतद्विषयत्वोपगमेतादृशप्रतीतेःप्रतियोगितावच्छेदकतानवगाहितयावह्निमनुमिनोमीत्यादिप्रतीतिविरो
धित्वानुपपत्तेरितिचेन्न।निरुक्तप्रकारतायाःस्वविधेयतात्वेपृथिव्यांजलत्वादिभेदोद्देधूमाभावदसाध्याकारकसाध्याव
शेष्यकानुमितीनांतद्विधेयकत्वानुपपत्तेः।तथाविधानुमितिविशेष्यतायांविधेयतात्वोपगमान्नेयमनुपपत्तिरि
तिचेत्।तर्हितादृशानुमितिविशेष्यतायास्तत्समानप्रकारकसमानविशेष्यकपृथिव्यादिसाध्यकानुमितावपिसत्त्वे
नतस्याअपीतरभेदादिविधेयकत्वापत्तेः।अथपृथिव्यादिपक्षकतादृशानुमितितत्साध्यकतादृशानुमित्योर्भिन्न
भिन्नैवतादृशीविशेष्यता।एवञ्चसाध्यविशेष्यकानुमितिविशेष्यतायामेवविधेयताभ्युपेयतेइतिनोक्तातिः

घसङ्ग इति चेन्न· साध्यविशेष्यकानुमितावतिरिक्ताविधेयतात्मकविशेष्यतोपगमे इतरभेदः पृथिव्यामित्याद्याकारकपृथि
वीसाध्यकानुमितौ विधेयतानात्मकं विशेष्यत्वान्तरं तथाविधप्रत्यक्षे वाऽन्यादृशविशेष्यत्वमिति निरुक्तविशेष्यताकल्पनापे
क्षया प्रत्यक्षानुमितिसाधारणपारकविशेष्यतायास्साध्यविशेष्यकसाध्यविशेषणकानुमितिसाधारणपारकस्याविधेय
तायाश्च कल्पनस्यैवोचितत्वात्। न चास्मन्मतेऽनुमितौ या विधेयतात्मिका विशेष्यता सैव प्रत्यक्षेऽपीति न विशेष्यतान्तर
यकल्पनमिति वाच्यम्। प्रत्यक्षे विधेयतात्मिकतदनात्मिका वा विशेष्यताकल्पनेऽत्र विनिगमनाविरहात्। यत्तु सा
ध्यविशेषणकानुमितौ पूर्वनिरुक्तप्रकारतैव विधेयता· अतिरिक्ता विधेयता तु साध्यविशेष्यकानुमितावेव· अतो न साध्य
विशेषणकानुमितिव्यक्त्यतिरिक्तविधेयतासम्बन्धकल्पनापेक्षया तन्निरूपितत्वस्वत्वान्यतरनिरुक्तप्रकारतासु विधे

यतात्वकल्पने लाघवादिति तदपि न चारु तादृशाप्रकारताया विधेयतात्वोपगमे पर्वतो वह्निमान् पर्वतो निर्धूमः स्यादित्याका
रसमूहालम्बनापत्त्यात्मकज्ञानस्य वह्न्यादिविधेयकत्वापत्तेः न चेष्टापत्तिः तथा सति तादृशापत्त्यनन्तरं पर्वते धूमाभावमाः
पाद्यापत्तेः ननु वह्निमित्याकारकवह्निविधेयकत्वाभावप्रतीतेरनुपपत्तेः एतेन साध्याविशेष्यकानुमितिरेवाप्रामाणिकी
अप्रसिद्धसाध्यकस्थले विशेष्ये विशेषणमिति रीत्या साध्यविशेषणकानुमितिरेवोत्पद्यते विशिष्टबुद्धिसामान्ये वि
शेषणज्ञानहेतुताया निर्युक्तिकत्वात् तथा च निरुक्तप्रकारतैव विधेयता भावसाध्यकस्थले तु साध्याविशेष्यकानुमिते
रत्यन्ताप्रामाणिकतया तत्र सुतरामेवेत्यपि निरस्तम् यत्त्वनुमितावापत्तौ च तत्र आप्यवज्ञाज्ञानजन्यत्वमेव तद्विधेयकत्व
मिति तदसत् यतोऽतिरिक्तविधेयतानभ्युपगमेन आप्यवज्ञाज्ञानस्य स्वानन्तरोत्पन्नतत्प्रकारकानुमितित्वादिकमेव

जन्यतावच्छेदकं वाच्यम् · न तु तत्तद्विधेयतानिवेशसम्भवः आत्माश्रयप्रसङ्गात् · तथा च सिद्ध्यभावाद्यव्यतिरेकानिश्चयरूपका
रणासमवहितवह्निव्याप्यवत्ताज्ञानानन्तरोत्पन्नयोर्वह्निमत्पर्वतत्वावच्छिन्नपक्षकपर्वतादिविधेयकानुमित्यापत्योरपि तादृ
शज्ञानजन्यतया वह्निविधेयकत्वप्रसङ्गः पर्वतपक्षताविशेषादिजन्यत्वस्य विधेयताशरीरघटकत्वे पक्षताविशेषादिजन्यत्व
विशिष्टस्यापि वत्ताज्ञानजन्यत्वसम्बन्धेन वह्न्यादिमदन्यत्वमेव नाहत्वा प्रतीतिविषयोऽस्तु तच्च न पक्षताद्युपस्थितिरपे
क्षा · सम्बन्धज्ञानस्य विशिष्टबुद्धौ हेतुत्वादिति वाच्यम् अनन्तपदार्थघटितत्वादृशधर्मस्य सम्बन्धत्वे मानाभावात् । एवमे
तन्मते शाब्दबोधस्य साध्यविधेयकत्वानुपपत्तिस्तस्य व्याप्यवत्ताज्ञानाजन्यत्वात् · न च तत्रानिरूढप्रकारतैव विधेयतेति
वाच्यम् · पर्वतो वह्निमानित्यादिवाक्यजन्यशाब्दबोधे वह्न्यादेर्विधेयत्वानुपपत्तेः · न च तत्र वह्न्यंशे पर्वताधेयत्वमेव विधेयं
पक्षताद्युपस्थितिविरहकालेऽपि सर्वानुभवसिद्धाया वह्निमनुमिनोमीत्याद्याकारकप्रतीतेरपलापप्रसङ्गात् · न च ४५

नतुपर्वतो वह्निरितिवाच्यम्· शाब्दबोधे चरमनिर्दिष्टपदार्थस्यैव विधेयत्वात्· अतएवन्यप्रकारो ह्ययमेव मेयदरपइत्यादौ वि
धेयत्वेन तात्पर्यविषयस्यान्यप्रकारत्वे· प्रागुद्दिष्टपदोपस्थाप्यतयानुद्देश्यकान्वयबोधासम्भवात् आलङ्कारिका विधेयाविम
र्षदोषमुदाहरन्ति। अतएव गगनानां गुणत्वमित्यादौ गुणत्वस्यैवोद्देश्यतावच्छेदकतया विधेयतया चान्वयबोधानुपपत्ति
रित्याशङ्कितं वर्द्धमानोपाध्यायैः· विशेष्यस्य विधेयत्वे तत्र गुणत्वस्य तदनुपपत्त्या तादृशाशङ्काभासकत्वे· न च पदार्थानुमाने
गुणत्वलक्षणतावच्छेदकधर्मावच्छिन्ने इतरभेदसाधनाय प्रयुक्तादितरव्यापकीभूताभावप्रतियोगिगुणवानयमि
त्येतादृशोपनयावयवादन्वयबोधानुपपत्तिरेवं तेनाशङ्कितेति वाच्यम्· तत्र दण्डवान् रक्तदण्डवानित्यादाविव विधे
यांशेऽव्याप्तिभानाधिक्येन गुणत्वसम्बन्धिन एवाभेदसम्बन्धेन विधेयतया चान्वयबोधानुपपत्तिविरहात्· नन्वना

मार्थयोस्साक्षादन्वयस्याव्युत्पन्नतयापर्वतेवह्निरित्यादौपर्वताद्यंशेकथंविधेयतयान्वयइतिवाच्यम्।साक्षाद्वि
शेषणविशेष्यभावेनान्वयस्यैवनामार्थयोरनभ्युपगमात्·अन्यपरम्परयैवविशेष्यविशेषणभावोपगमात्·
अथवाद्बोधेचरमनिर्दिष्टपदार्थस्यविधेयत्ववपुर्विरूपाक्षमित्यादौअक्षणोवैरूप्यस्यविधेयत्वानुपपत्तिः
वैरूप्यविशिष्टस्याक्षणएवतत्रवपुरंशेविधेयत्वेअलक्ष्यजन्मतेत्यत्रापिअलक्ष्यजन्मतायाएवविधेयतया
तात्पर्यविषयत्वमित्यस्यवक्तुंशक्यतयाअलक्ष्य[redacted]स्यविधेयांशोदाहरणतायाअनुप
पत्तेः।यदिचतत्रसुरूपस्यजन्मनोविवक्षितमहादेवापकर्षसंपादकतयानविधेयत्वेनविवक्षितत्वम्।अपि

अन्मनोऽनस्थ्यतायाः एवेति मन्यते तदानुहसंप्रकृतेपीति चेन्न· समासानतिरिक्तस्थले वरमनिर्दिष्टस्य विधेय
तानियामकत्वात्। एवंनिरुक्तप्रकारताया विधेयतात्वे द्वितीयमोर्वाभिवेत्यादौ विधेयत्वेन विवाक्षितस्य समा
सघटकपूर्वपदेन प्रतिपादने विधेयाविमर्षः मोर्वीद्वितीयाभिवेत्यसमस्तपदेन प्रतिपादने दोषो[illegible]र
इत्यालङ्कारिकप्रवादविरोधश्चेति· विधेयतावन्निरूपितोद्देश्यतापि प्रकारताद्विभिन्नविषयताविशेष
एव· नचैवं विशेष्यितेवोद्देश्यतापर्वतेवह्निरित्यादिवाक्यजन्ये शाब्दबोधे साध्यविशेष्यकानुमितेः प्रामा
णिकत्वेन तत्रच पर्वतस्योद्देश्यतानुपपत्तेः· नचविधेयतानिरूपकत्वमुद्देश्यत्वं तत्वयदंशे विधेयस्य विवे

पत्वं तस्य विशेष्यत्वे प्रकारत्वे चासम्भवेनेति किमुद्देश्यतातिरिक्तविषयत्वोपगमेनेति वाच्यम्। उद्देश्यत्वमेवातिरिक्तं तन्निरूपकत्वमेव विधेयत्वमित्यस्यापि वक्तुं शक्यतया विनिगमनाविरहेणोभयस्यैवातिरिक्ततासिद्धेः द्रष्टव्यवदेवेयम्। अस्तु विधेयत्वमुद्देश्यत्वमतिरिक्तं तयोर्विषयतात्वेमानाभावः। पर्वतो वह्निमानित्यत्र प्रतो पर्वतवह्न्यादिषु तथाविधप्रत्यक्षसाधारणविशेष्यताप्रकारतास्वीकारस्यावश्यकतया तत एव तादृशज्ञानस्य तद्विषयकत्वोपपत्तेः प्रकारतादीनां तत्रानुपगमे तादृशानुमित्यादीनां बाधाद्यप्रतिबध्यत्वप्रसङ्गः। विरोधिज्ञाना यप्रतिबन्धकत्वप्रसङ्गश्च प्रकारतादीनामेव तादृशाप्रतिबध्यप्रतिबन्धकभावावच्छेदकत्वादित्यादिक्।। ।।इति गदाधरभट्टाचार्यकृतो विषयतावादस्समाप्तः।। ।।ॐ।। ।। श्रीशाके १७९७ अधिकज्येष्ठप्रतिपदिअम

श्रीः
२५

आत्रेयवंशोद्भवपद्मनाभहस्तेनेदम् लिखितंचतेनेव

४१४०

श्री ५ को सरकार
संस्कृत पाठशाला

॥ ❋ ॥ अथतर्कसंग्रहव्याख्यान्यायबोधिनीप्रारभ्यते ॥ ❋ ॥

तर्कसंग्रह व्याख्या · न्यायबोधिनी ·

न्या. बो.
१॥
ग्रन्थादे

श्रीसांबसदाशिवोजयतु॥ ॥अखिलागमसंचारि श्रीकृष्णाख्यंपरंमहः॥ ध्यात्वा गोवर्धनसुधीस्तनुते न्या-
यबोधिनीं॥१॥ चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थमिष्टदेवतानमस्कारात्मकं मंगलं शिष्यशि-
क्षार्थं निबध्नाति॥ निधायेति॥ अथ पदार्थान्विभजते॥ द्रव्येति॥ तत्र सप्तग्रहणं पदार्थत्वं द्रव्यादिसप्तान्य-
तमत्वव्याप्यमिति व्याप्तिलाभाय॥ ननु शक्तिपदार्थस्याष्टमस्य सत्त्वात्कथं सप्तैवेति॥ तथाहि वह्निसंयु-
क्तेंधनादौ सत्यपि मणिसंयोगे दाहो न जायते॥ तच्छून्ये तु जन्यते॥ अतो मणिसमवधाने शक्तिर्नश्य-
ति॥ मण्यभावदशायां दाहानुकूलाशक्तिरुत्पद्यत इति कल्प्यते॥ तस्माच्छक्तिरतिरिक्तपदार्थ इति चे-
न्न॥ मणेः प्रतिबन्धकत्वेन मण्यभावस्य कारणत्वेनैव निर्वाहे मणिसमवधानासमवधानाभ्यामन-
न्तशक्तितन्नाशध्वंसतत्प्रागभावकल्पनाया अन्याय्यत्वात्॥ तस्मात्सप्तैवेति सिद्धं॥ द्रव्याणि वि-
भजते पृथिवीति॥ नन्वंधकारस्य दशमद्रव्यस्य सत्त्वात्कथं नवैवेति॥ तथाहि॥ नीलं तमश्चलतीति प्र-
तीतेर्नीलरूपाश्रयत्वेन क्रियाश्रयत्वेन च द्रव्यत्वसिद्धं॥ न च क्लृप्तद्रव्येष्वंतर्भावात्कुतो दशमद्रव्यमिति वा-
च्यं॥ आकाशादिपंचकस्य नीरूपत्वात्वायोश्च नीरूपत्वान्न तेष्वंतर्भावः॥ तमसो निर्गंधत्वान्न पृथिव्या-

ह. स:
१

मन्तर्भावः॥ जलतेजसोः शीतोष्णस्पर्शविरहान्न तयोरन्तर्भावः॥ तस्मात्तमसो दशमद्रव्यत्वं सिद्धमिति चेन्न॥ तेजोभावेनैवोपपत्तौ अतिरिक्तकल्पनायां मानाभावात्॥ न चोविनिगमनाविरहात्तेजस एव तमोऽभावस्वरूपमास्त्विति वाच्यं॥ तेजसोऽभावस्वरूपत्वे सर्वानुभूतोष्णस्पर्शाश्रयद्रव्यान्तरकल्पने गौरवादुष्णस्पर्शरूपगुणाश्रयतया तेजसो द्रव्यत्वं सिद्धं॥ तमसि रूपप्रतीतिस्तु भ्रान्तिरेव॥ दीपापसरणक्रियाया एवात्र भानात्॥ गन्धवतीति॥ गन्धवत्त्वं पृथिव्या लक्षणम्॥ लक्ष्या पृथिवी॥ पृथिवीत्वं लक्ष्यतावच्छेदकं यद्धर्मावच्छिन्ने लक्ष्यं स धर्मो लक्ष्यतावच्छेदकः॥ यो धर्मो यस्यामवच्छेदकस्तद्धर्मावच्छिन्ना लक्ष्यता॥ तथा च लक्ष्यतावच्छेदकं पृथिवीत्वं चेल्लक्ष्यता पृथिवीत्वावच्छिन्ना॥ एवं शीतस्पर्शादिलक्षणेषु जलादीनां लक्ष्यतावच्छेदकत्वं बोध्यं॥ एवं पृथिव्यादित्रिकं निरूप्य वायुं निरूपयति॥ रूपरहितेति॥ रूपरहितत्वे सति स्पर्शवत्त्वं वायोर्लक्षणम्॥ सतिसप्तम्या विशिष्टार्थकतया रूपरहितत्वविशिष्टस्पर्शवत्त्वं वायोर्लक्षणम्॥ विशेषणानुपादाने स्पर्शवत्त्वमात्रस्य लक्षणत्वे पृथिव्यादित्रिकेऽतिव्याप्तिः॥ तत्रापि स्पर्शवत्त्वस्य सत्वादत उक्तं रूपरहितेति॥ विशेष्यानुपादाने आकाशादिपंचके चातिव्याप्तिरत उक्तं स्पर्शेति॥ अतिव्याप्तिना

म॥अलक्ष्येलक्षणागमनं॥यथागोः शृङ्गित्वंलक्षणमुक्तंचेदलक्ष्यभूतगोभिन्नमहिष्यादावतिव्याप्तिस्तत्रा
पिशृङ्गित्वस्यविद्यमानत्वात्॥अव्याप्तिर्नाम॥लक्ष्यैकदेशावृत्तित्वं॥यथागोर्नीलरूपत्वंलक्षणमुक्तंचेल्लक्ष्य
तावच्छेदकाश्रयीभूतश्वेतगविनीलरूपाभावात्॥असंभवोनाम॥लक्ष्यमात्रेकुत्रापिलक्षणाभावः॥यथा
गोरेकशफवत्त्वंगोसामान्यस्यद्विशफवत्त्वेनैकशफवत्त्वाभावात्॥अतिव्याप्त्यव्याप्त्यसंभवानांनिष्कृष्ट
लक्षणानि॥अतिव्याप्तिस्तु॥लक्ष्यतावच्छेदकावच्छिन्नप्रतियोगिताकभेदसामानाधिकरण्यं॥अव्याप्ति
स्तु॥लक्ष्यतावच्छेदकसामानाधिकरण्यात्यन्ताभावप्रतियोगित्वं॥असंभवस्तु॥लक्ष्यतावच्छेदकव्यापकी
भूताभावप्रतियोगित्वं॥आकाशंलक्षयति॥शब्दगुणकमिति॥गुणपदमाकाशेशब्दएवविशेषगुणइतिद्योत
नाय॥नत्वतिव्याप्तिवारणाय॥समवायेनशब्दवत्त्वमात्रस्यसम्यक्त्वात्॥तच्चैकमिति॥अनेकत्वेमानाभा
वादितिभावः॥विभ्विति॥सर्वमूर्तद्रव्यसंयोगित्वंविभुत्वं॥मूर्तत्वंचक्रियावत्त्वं पृथिव्यप्तेजोवायुमनांसिमू
र्तानि॥पृथिव्यप्तेजोवाय्वाकाशादिपंचकंभूतपदवाच्यं[illegible]तत्वंनामबहिरिन्द्रियग्राह्यविशेषगुणवत्त्वं॥का
लंलक्षयति॥अतीतेति॥व्यवहारहेतुत्वस्यलक्षणत्वेव्यवहारहेतुभूतघटादावतिव्याप्तिस्तद्वारणायातीतेति
विशेषणोपादानं॥

दिशो लक्षणमाह॥ प्राच्येति॥ उदयाचलसन्निहिता या दिक् सा प्राची॥ मेरोः सन्निहिता या दिक् सा उदीची॥ मेरोर्व्य
वहिता या दिक् साऽवाची॥ आत्मानं निरूपयति ज्ञानाधिकरणमिति॥ अधिकरणपदं समवायेन ज्ञानाश्रयत्वला
भार्थं॥ मनो निरूपयति सुखादीति॥ उपलब्धिर्नाम साक्षात्कारः॥ तथा च सुखदुःखादिसाक्षात्कारकारणत्वे स
ति इन्द्रियत्वं मनसो लक्षणम्॥ इन्द्रियमात्रोक्तौ चक्षुरादावतिव्याप्तिः॥ आत्मनो ज्ञानादिकं प्रति समवायिकारण
त्वात्॥ अत इन्द्रियत्वोपादानं॥ रूपं लक्षयति चक्षुरिति॥ चक्षुर्मात्रग्राह्यत्वविशिष्टगुणत्वं रूपस्य लक्षणम्॥ वि
शेष्यमात्रोपादाने रसादावतिव्याप्तिः॥ अतश्चक्षुर्मात्रग्राह्यत्वविशेषणं॥ तावन्मात्रोपादाने रूपत्वेऽतिव्याप्तिः॥
अतो गुणो यदिन्द्रियग्राह्यस्तन्निष्ठा जातिस्तदिन्द्रियग्राह्यइति नियमात्तद्वारणाय विशेष्योपादानं॥ चक्षुर्मात्रग्रा
ह्यत्वं नाम॥ चक्षुर्भिन्नेन्द्रियाग्राह्यत्वे सति चक्षुर्ग्राह्यत्वं॥ मात्रपदानुपादाने संख्यादिसामान्यगुणेऽतिव्याप्तिः॥
संख्यादावपि चक्षुर्ग्राह्यत्वविशिष्टगुणत्वस्य सत्वात्॥ अतस्तद्वारणाय मात्रपदं॥ संख्यादेश्चक्षुर्भिन्नत्वगिन्द्रिय
ग्राह्यत्वाच्चक्षुर्मात्रग्राह्यत्वं नास्ति। अतीन्द्रियगुरुत्वादावतिव्याप्तिवारणाय चक्षुर्ग्राह्येति॥ अत्र लक्षणे ग्राह्यत्वं
नाम प्रत्यक्षविषयत्वं॥ अग्राह्यत्वं नाम तदविषयत्वं॥ तथा च त्वक्साक्षात्काराविषयत्वे सति चाक्षुषप्रत्यक्ष

विषयत्वेसतिगुणत्वमितिफलितोर्थः॥ननुप्रभाभित्तिसंयोगेऽतिव्याप्तिः॥तस्यचक्षुर्मात्रग्राह्यगुणत्वादितिचेन्न॥गु
णपदस्यविशेषगुणपरत्वात्॥नचैवंविशेषगुणत्वघटितलक्षणेसंख्यादावतिव्याप्त्यभावान्मात्रपदवैयर्थ्य
मितिवाच्यं॥जलमात्रवृत्तिसांसिद्धिकद्रवत्वेऽतिव्याप्तिवारणायतदुपादानात्॥अथवाचक्षुर्मात्रग्राह्यजा
तिमद्गुणत्वस्यलक्षणत्वान्नप्रभाघटसंयोगेरूपलक्षणस्यातिव्याप्तिः॥संयोगत्वजातेश्चक्षुर्मात्रग्राह्यत्वा
त्॥घटपटसंयोगस्यत्वागिन्द्रियग्राह्यत्वात्तद्गतजातेरपित्वागिन्द्रियग्राह्यत्वात्॥अत्रजातिघटितलक्षणे
गुणत्वानुपादानेचक्षुर्मात्रग्राह्यजातिमतिसुवर्णादावतिव्याप्तिस्तद्वारणायतदुपादानं॥एवंरसादि
लक्षणेविशेषणानुपादानेलक्ष्यभिन्नगुणादावतिव्याप्तिः॥विशेष्यानुपादानेलक्ष्यमात्रवृत्तिरसत्वगंध
त्वादावतिव्याप्तिः॥अतोविशेषणविशेष्ययोरुपादानं॥स्पर्शलक्ष[illegible]यतित्वगिन्द्रियमात्रग्राह्येति॥अत्रापिमा
त्रपदंसंख्यादिसामान्यगुणादावतिव्याप्तिवारणायान्यविशेषणकृत्यंपूर्ववद्बोध्यं॥ग्राह्यत्वपदार्थोपिपू
र्ववदेवबोध्यः॥रूपादिचतुष्टयंपृथिव्यांपाकजमिति॥एतन्नात्वनिर्णयस्यार्थं॥पाकोनामविजातीयतेजः
संयोगः॥सचनानाजातीयः॥रूपजनकोविजातीयतेजःसंयोगः॥तदपेक्षयारसजनकोविजातीयः॥ए

वं गन्धजनकोपि एवं स्पर्शजनकोपि तथा ॥ एवं प्रकारेण भिन्नभिन्नजातीयाः पाकाः कार्यवैलक्षण्येन कल्पनीयाः ॥
तथा हि ॥ तृणपुंजनिक्षिप्ते आम्रादौ उष्मत्वलक्षणविजातीयतेजःसंयोगात् पूर्वहरितरूपनाशो रूपान्तरस्य पीता
देरुत्पत्तिः ॥ पूर्वरसस्याम्लस्यैवानुभवात् क्वचित् पूर्वहरितरूपसत्वेपि रसपरावृत्तिर्दृश्यते ॥ विजातीयतेजःसं
योगरूपपाकवशात् पूर्वतनाम्लरसनाशे मधुररसस्यानुभवात् ॥ तस्माद्रूपजनकापेक्षया रसजनको विलक्षण
एवाङ्गीकार्यः ॥ एवं गन्धजनको विलक्षण एव ॥ रूपरसयोः परावृत्तावपि पूर्वगन्धनाशे विजातीयपाकवशात्सु
रभिगन्धोपलब्धेः ॥ एवं स्पर्शजनकोपि पाकवशात् कठिनस्पर्शनाशे मृदुस्पर्शानुभवात्तस्माद्रूपादिजनका विजा
तीया एव पाकाः ॥ अत एव पार्थिवपरमाणूनां एकजातीयत्वेपि पाकमहिम्ना विजातीयद्रव्यान्तरानुभवः ॥ यथा
गोभुक्ततृणादीनामापरमाणवन्तं भंगे तृणारंभकपरमाणुषु विजातीयतेजःसंयोगात्पूर्वरूपादिचतुष्टयनाशो
तदनंतरं दुग्धे यादृशो रूपादिकं वर्तते तादृशरूपरसगंधस्पर्शजनकास्तेजःसंयोगा जायन्ते ॥ तदनंतरं तादृशरूपा
दय उत्पद्यन्ते ॥ तादृशरूपादिविशिष्टपरमाणुभिर्दुग्धद्व्यणुकमारभ्यते ॥ ततस्त्र्यणुकादिक्रमेण महद्दुग्धार
म्भकैः परमाणुभिरेव दध्यारभ्यते ॥ एवं दध्यारंभकैरेव परमाणुभिर्नवनीतादिकमिति दिक् ॥४॥ विभागल

क्षयति संयोगेति ॥ संयोगनाशकत्वविशिष्टगुणत्वं विभागस्य लक्षणम् ॥ विशेषमात्रोपादाने क्रियायामपि संयोगनाशकत्वसत्वान्नातिव्याप्तिवारणाय गुणत्वविशेष्योपादानं ॥ गुरुत्वं लक्षयति आद्येति ॥ द्वितीयादिपतनक्रियायां वेगस्यासमवायिकारणत्वान्नातिव्याप्तिवारणायाद्येति ॥ उत्तरत्र स्यन्दने आद्यविशेषणमपि पूर्ववदेव योजनीयं ॥ स्नेहं लक्षयति चूर्णादीति ॥ चूर्णादिपिंडीभावहेतुत्वे सति गुणत्वं स्नेहस्य लक्षणम् ॥ पिंडीभावो नाम चूर्णादेर्धारणाकर्षणहेतुर्यस्तो विलक्षणः संयोगः ॥ तादृशसंयोगे स्नेहस्यैवासाधारणकारणत्वं ॥ ननु जलादिगतद्रवत्वस्य ॥ तथा सति द्रुतसुवर्णादिसंयोगे चूर्णादेः पिंडीभावापत्तेः ॥ अतः स्नेहस्यैवासाधारणकारणत्वं ॥ विशेषणमात्रोपादाने कालादावतिव्याप्तिरतस्तद्वारणाय विशेष्योपादानं ॥ वस्तुतस्तु द्रुतजलसंयोगस्यैव पिंडीभावहेतुत्वं ॥ स्नेहस्यापि पिंडीभावहेतुत्वे मानाभावात् ॥ जले द्रुतत्वविशेषणात्करकादिव्यावृत्तिः ॥१२॥ शब्दं लक्षयति श्रोत्रेति ॥ शब्दत्वेऽतिव्याप्तिवारणाय गुणपदं रूपादावतिव्याप्तिवारणाय श्रोत्रेति ॥ स त्रिविधः ॥ संयोगजो विभागजः शब्दजश्चेति ॥ भेरीदंड संयोगजो मृदंगादिशब्दः ॥ वंशे पाट्यमाने दलद्वयविभागजश्चटचटशब्दः ॥ शब्दोत्पत्तिमारभ्य श्रोत्रदेशपर्यंतं निमित्तपवनेन शब्दधारा जायन्ते ॥ तत्रोत्तरशब्दे पूर्वशब्दः कारणम् ॥ बुद्धेर्लक्षणमाह सर्वव्य

वहारेति ॥ व्यवहारः शब्दप्रयोगः । ज्ञानं विना शब्दप्रयोगासंभवात् ॥ शब्दप्रयोगरूपव्यवहारहेतुत्वं ज्ञानस्य लक्ष-
णम् ॥ बुद्धिं विभजते ॥ सा द्विविधेति ॥ स्मृतिं लक्षयति संस्कारेति ॥ वहिरिन्द्रियाजन्यत्वविशिष्टसंस्कारजन्यत्व-
विशिष्टज्ञानत्वं स्मृतेर्लक्षणम् ॥ विशेष्यमात्रोपादाने प्रत्यक्षानुभवेऽतिव्याप्तिस्तद्वारणाय विशेषणोपादानं ॥
संस्कारध्वंसेऽतिव्याप्तिवारणाय विशेष्योपादानं ॥ ध्वंसप्रतिप्रतियोगिनः कारणत्वात् संस्कारध्वंसेऽपि संस्का-
रजन्यत्वस्य सत्वात् प्रत्यभिज्ञायामतिव्याप्तिवारणाय मात्रपद ॥ अनुभवं लक्षयति तद्भिन्नमिति ॥ तद्भिन्नत्वं
नाम स्मृतिभिन्नत्वं ॥ स्मृतिभिन्नत्वविशिष्टज्ञानत्वमनुभवस्य लक्षणम् ॥ तत्र विशेषणानुपादाने स्मृतावति-
व्याप्तिः ॥ विशेष्यानुपादाने घटादावतिव्याप्तिः ॥ अतस्तद्वारणाय विशेषणविशेष्ययोरुभयोरुपादानं ॥ अ-
नुभवं विभजते ॥ स द्विविध इति ॥ यथार्थानुभवं लक्षयति ॥ तद्वतीति ॥ तद्वतीत्यत्र सप्तम्यर्थो विशेष्यकत्वं ॥
तच्छब्देन प्रकारीभूतो धर्मो धर्तव्यः ॥ तथा च तद्विशेष्यकत्वे सति तत्प्रकारकत्वे सत्यनुभवत्वं यथार्थानुभ-
वस्य लक्षणम् ॥ उदाहरणं ॥ रजत इदं रजतमिति ज्ञानं ॥ रजतत्ववद्विशेष्यकत्वे सति रजतत्वप्रकारकत्वं ॥ तद्वन्नि-
ष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारतानिरूपितप्रकारिताशाल्यनुभवत्वमिति फलितोऽर्थः ॥ अन्यथा यथा-

शुक्तेरंगरजतयोरिमेरंजतरंगेइत्याकारकसमूहालंबनभ्रमेतिव्याप्तिः॥तत्रापिरजतत्ववद्विशेष्यकत्वरजतत्व
प्रकारकत्वयोःसत्त्वात्॥रंगविशेष्यकत्वरंगत्वप्रकारकत्वयोश्चसत्त्वात्॥उक्तनिष्कर्षेतुदर्शितभ्रमेनाति
व्याप्तिः॥समूहालंबनभ्रमस्यरंगांशेरजतत्वावगाहित्वेनरजतांशेरंगत्वावगाहित्वेनचरजतत्वप्रकारतायाः
रजतत्ववद्विशेष्यतानिरूपितत्वाभावात्॥एवंरंगत्वप्रकारतायारंगत्ववद्विशेष्यतानिरूपितत्वाभावाच्चेति॥
अयथार्थानुभवंलक्षयतितदभाववतीति॥अत्रापिपूर्ववत्तदभाववन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रका
रतानिरूपितप्रकारताशाल्यनुभवत्वंविवक्षणीयं॥अन्यथारंगरजतयोरिमेरंगरजतेइत्याकारकसमुहाल
बनप्रमायामतिव्याप्तिः॥एतत्समूहालंबनस्यरंगरजतोभयविशेष्यकत्वेनरजतत्वरंगत्वोभयप्रकारकत्वेन
रजतांशेरजतत्वावगाहित्वेनरंगांशेरंगत्वावगाहित्वेनरजतत्वप्रकारतायारजतत्वाभाववद्रंगविशेष्यतानिरू
पितत्वाभावात्॥एवंरंगत्वप्रकारतायारंगत्वाभाववद्रजतविशेष्यतानिरूपितत्वाभावान्नातिव्याप्तिः॥उदाहर
णम्॥यथाशुक्ताविदंरजतमितिज्ञानं॥यथार्थानुभवंविभजते॥यथार्थानुभवइति॥तत्करणमिति॥फलीभूतप्र
त्यक्षादिकरणंचतुर्विधमित्यर्थः॥प्रत्यक्षादिचतुर्विधप्रमाणानांप्रमाकरणत्वंसामान्यलक्षणम्॥एकैकप्रमा

णलक्षणन्तु वक्ष्यते प्रत्यक्षज्ञानेत्यादिना॥ करणलक्षणमाह असाधारणमिति॥ व्यापारवदसाधारणं करण
मित्यर्थः॥ असाधारणत्वं च कार्यत्वातिरिक्तधर्मावच्छिन्नकार्यतानिरूपितकारणताशालित्वमित्यर्थः॥ यथा
दंडादेर्घटादिकं प्रत्यसाधारणकारणत्वं॥ कार्यत्वातिरिक्तघटत्वादिरूपधर्मस्तदवच्छिन्नकार्यता घटे तन्निरू
पितकारणता दंडे॥ अतो घटं प्रति दंड असाधारणकारणं भवति॥ भ्रम्यादिरूपव्यापारवत्वाच्च करणं॥ साधार
ण णकारणत्वं कार्यत्वावच्छिन्नकार्यतानिरूपितकारणताशालित्वं॥ ईश्वरादृष्टादेः कार्यत्वावच्छिन्नं प्रत्येव कारण
त्वात्साधारणकारणत्वं॥ नियतत्वविशेषणानुपादाने पूर्ववर्त्तिनो रासभादेरपि घटादिकारणत्वं स्यात्॥ अतो नि
यतेति॥ नियतपूर्ववर्त्तिनो दंडरूपादेरपि घटकारणत्वं स्यात्॥ अतोऽनन्यथासिद्धपदमपि कारणलक्षणे निवेश
नीयं॥ दंडरूपादीनान्तु अन्यथासिद्धत्वात्॥ कार्यं लक्षयति कार्यमिति॥ प्रागभावप्रतियोगित्वं कार्यस्य लक्षणं॥ का
र्योत्पत्तेः पूर्वमिह घटो भविष्यतीति प्रतीतिर्जायते॥ तत्प्रतीतिविषयीभूतो योभावस्तत्प्रतियोगि घटादिरूपं कार्यं॥
कारणं विभजते॥ कारणं त्रिविधमिति॥ समवायिकारणं लक्षयति॥ यत्समवेतमिति॥ यस्मिन्समवेतं यत्समवाये
न संबद्धं सत्कार्यमुत्पद्यते तत्समवायिकारणमित्यर्थः॥ उदाहरणं यथा तंतव इति॥ तंतुषु समवायेन संबद्धः सन्पटः स

न्या· बो ॥
॥ ६ ॥

कं कार्यमुत्पद्यते तत्समवायिकारणमित्यर्थः॥ सामान्यलक्षणं तु समवायसंबंधावच्छिन्नकार्यतानिरूपिततादात्म्यसंबद्धावंधावच्छिन्नकारणत्वं समवायिकारणत्वं॥ समवायसंबंधेन घटाधिकरणे कपालादौ कपालादेस्तादात्म्यसंबंधेनैव सत्त्वात्॥ समवायसंबंधावच्छिन्नघटत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसंबंधावच्छिन्नकारणताया कपालादौ सत्त्वाल्लक्षणसमन्वयः॥ जन्यभावत्वावच्छिन्नं प्रति तादात्म्यसंबंधेन द्रव्यस्यैव हेतुत्वात्॥ जन्यभावेषु द्रव्यगुणकर्मसु त्रिषु द्रव्यमेव समवायिकारणं द्रव्ये अवयवाः समवायिकारणं॥ अतो गुणादावपि द्रव्यमेव समवायिकारणमित्याशयेनाह पटश्च स्वगतरूपादेरिति॥ समवायिकारणमित्यनुषज्यते॥ असमवायिकारणं लक्षयति कार्येणेति॥ असमवायिकारणं द्विविधं॥ कार्येण सहैकस्मिन्नर्थे समवेतं सत् यत्कारणं तदसमवायिकारणमित्यर्थः॥ कार्येण सहैकस्मिन्नर्थे समवेतं सत्कारणसमवायिकारणमित्यपरमित्यर्थः॥ अत्र कारणेनेत्यस्य स्वकार्यसमवायिकारणेनेत्यर्थः॥ जन्यद्रव्यमात्रेऽवयवसंयोगस्यैवासमवायिकारणत्वात्पटात्मककार्येण तदवयवतंतुसंयोगस्यैवासमवायिकारणत्वं दर्शयन्प्रथममुदाहरति॥ यथा तंतुसंयोगः पटस्येति॥ पटात्मककार्येण सहैकस्मिन्नर्थे तंतौ समवायसंबंधेन विद्यमान

॥ कृष्णः ॥
॥ ६ ॥

त्वेसतिकारणत्वात्पटात्मककार्यप्रतितंतुसंयोगोऽसमवायिकारणमित्यर्थः॥द्वितीयमुदाहरति॥तंतुरूपमिति॥
कारणेनस्वकार्यकारणीभूतपटेनसहैकस्मिन्नर्थेतंतौसमवेतंसत्समवायसंबंधेनवर्त्तमानंसत्तंतुरूपंपटग
तरूपप्रतिकारणंभवति अतोसमवायिकारणंतंतुरूपंपटगतरूपस्य॥सामान्यलक्षणंतुसमवायसंबंधाव
च्छिन्नकार्यतानिरूपितायासमवायित्वसमवायिसमवेतत्वान्यतरसंबंधावच्छिन्नाकारणतातदाश्रयत्वं॥
द्रव्यासमवायिकारणंभिन्नावयवसंबंधेतुसमवायसंबंधावच्छिन्नघटत्वावच्छिन्नकार्यतानिरूपि
तसमवायसंबंधावच्छिन्नाकपालद्वयसंयोगत्वावच्छिन्नाकारणताकपालद्वयसंयोगेवर्त्तते॥एवमाद्य
पतनक्रियायामाद्यस्पंदनक्रियायांचगुरुत्वद्रवत्वेऽसमवायिकारणेभवतः आद्यपतनक्रियांप्रतिआ
द्यस्पंदनक्रियांप्रतिचतयोःसमवायसंबंधेनैवकारणत्वात्॥अवयविगुणभूतघटपटरूपादौत्ववयवगु
णभूतकपालतंतुरूपादेःस्वपदग्राह्यकपालतंतुरूपादिसमवायिकपालतंत्वादिसमवेतत्वसंबंधे
नैवकारणत्वात्तत्संबंधावच्छिन्नकारणताश्रयत्वमवयवगुणभूतकपालरूपतंतुरूपादौवर्त्ततइति
लक्षणसंगतिः॥निमित्तकारणंलक्षयति तदुभयभिन्नमिति॥समवायिकारणभिन्नत्वेसति असम

वायिकारणभिन्नत्वेसतिकारणत्वंनिमित्तकारणस्यलक्षणमि[illegible]यर्थः॥ करणलक्षणमुपसंहरति॥ तदेत
दिति॥ यदसाधारणमिति॥ व्यापारवत्त्वेसतीत्यपिपूरणीयं॥ अन्यथा तंतुकपालसंयोगयोरतिव्याप्तिः॥
तंतुकपालसंयोगयोरपिकार्यत्वातिरिक्तपटत्वघटत्वावच्छिन्नंप्रतिकारणत्वमस्त्येवेति अतस्तत्रकर
णत्ववारणायव्यापारवत्त्वेसतीतिकरणलक्षणेविशेषणंदेयं॥ व्यापारवत्त्वंचतज्जन्यत्वेसतितज्जन्य
जनकत्वं॥ भवतिहिदंडजन्यत्वेसतिदंडजन्यघटजनकत्वाद्भ्रम्यादेरतोदंडव्यापारत्वं॥ एवंकपालतं
तुसंयोगादेरपिकपालतंतुव्यापारत्वं॥ कपालतंतुजन्यत्वेसतिकपालतंतुजन्यघटपटजनकत्वात्॥ क
रणलक्षणेऽसाधारणत्व[illegible]पादानेईश्वरादृष्टादेरपिव्यापारवत्त्वात्करणत्वंस्यात्॥ तत्रातिव्याप्तिवार
णायासाधारणेतिविशेषणं॥ षड्धेन्द्रियभूतप्रत्यक्षप्रमाणस्यलक्षणमाहतत्रेति॥ प्रमाभूतेषुप्रत्यक्षा
त्मकंज्ञानंचक्षुरादिप्रत्यक्षंतत्प्रतिव्यापारवदसाधारणंकारणमिन्द्रियंभवति॥ अतःप्रत्यक्षज्ञानकरणत्वं
प्रत्यक्षस्यलक्षणम्॥ आद्यसन्निकर्षातिरिक्तचतुर्विधसन्निकर्षाणांसमवायरूपत्वेनेन्द्रियजन्यत्वाभा
वाद्व्यापारत्वंनसंभवति॥ इन्द्रियमनःसंयोगस्यैवबाह्यप्रत्यक्षेजननीयेन्द्रियव्यापारतावोध्या॥ मानसप्र

त्यक्षेत्वात्मनः संयोगस्यैवसा बोध्या ॥ प्रत्यक्षप्रमाणलक्षणमुक्त्वा प्रत्यक्षप्रमालक्षणमाह ॥ ज्ञानाकरणमिति ॥ प्रत्यक्षप्रमालक्षणं ॥ व्याप्तिज्ञानंसादृश्यज्ञानंपदज्ञानंचतदेवकरणंयेषांते अनुमित्युपमितिशाब्दाः तद्भिन्नत्वं प्रत्यक्षस्य ॥ प्रत्यक्षो इन्द्रियस्यैवकरणत्वं ननु ज्ञानस्यकरणत्वं इदंलक्षणमीश्वरप्रत्यक्षसाधारणं ॥ ईश्वरप्रत्यक्षस्याजन्यत्वात् जन्यप्रत्यक्षस्यैवलक्षणाभिप्रायेणोतरमाह ॥ इन्द्रियार्थसन्निकर्षेति ॥ जन्यप्रत्यक्षस्यैवलक्षणत्वाभिप्रायेणेदंलक्षणंविभजते ॥ निर्विकल्पकमिति ॥ तल्लक्षयति ॥ निष्प्रकारकमिति ॥ प्रकारताशून्यज्ञानत्वमेवनिर्विकल्पकत्वमित्यर्थः ॥ निर्विकल्पके चतुर्थविषयतास्वीक्रियते ॥ त्रिविधविषयतामध्ये एकापितत्रनास्त्यतोविशेष्यताशून्यज्ञानत्वंसंसर्गताशून्यज्ञानत्वमित्यपिलक्षणं संभवति ॥ सविकल्पकंलक्षयति सप्रकारकमिति ॥ विषयतायाज्ञाननिरूपितत्वात् ज्ञानस्यविषयतानिरूपकत्वेनप्रकारतानिरूपकज्ञानत्वंसविकल्पस्यलक्षणं ॥ एवंविशेष्यतानिरूपकज्ञानत्वंसंसर्गतानिरूपकज्ञानत्वमित्यपिलक्षणंसंभवति ॥ उदाहरणंयथेति ॥ इदंत्वावच्छिन्नविशेष्यतानिरूपकंडित्थत्वप्रकारकज्ञानंसविकल्पकमित्यर्थः ॥ चाक्षुषादिप्रत्यक्षकारणीभूतान्षड्विधसन्निकर्षान्विभजते ॥ संयोग

इत्यादिना॥ द्रव्यवृत्तिलौकिकविषयतासंबंधेन चाक्षुषत्वावच्छिन्नं प्रति चक्षुःसंयोगं कारणं॥ द्रव्यसमवेतवृत्तिलौकिकविषयतासंबंधेन चाक्षुषत्वावच्छिन्नं प्रति चक्षुःसंयुक्तसमवायस्य हेतुत्वं॥ द्रव्यग्राहकाणीन्द्रियाणि त्रीण्येव॥ चक्षुस्त्वङ्मनांसि॥ अन्यानि घ्राणरसनश्रवणानि गुणग्राहकाणि॥ अतस्त्वगिन्द्रियस्थले द्रव्यवृत्तिलौकिकविषयतासंबंधेन त्वाचप्रत्यक्षत्वावच्छिन्नं प्रति त्वक्संयोगस्य हेतुता॥ एवं द्रव्यसमवेतत्वाचप्रत्यक्षत्वावच्छिन्नं प्रति त्वक्संयुक्तसमवायस्य हेतुता॥ द्रव्यसमवेतसमवेतोष्णत्वशीतत्वादिजातिस्पार्शनप्रत्यक्षे संयुक्तसमवेतसमवायस्य हेतुता॥ एवमात्ममानसप्रत्यक्षे मनःसंयोगस्य हेतुता॥ आत्मसमवेतसुखादिप्रत्यक्षे मनःसंयुक्तसमवायस्य हेतुता॥ आत्मसमवेतसमवेतसुखत्वादिप्रत्यक्षे मनःसंयुक्तसमवेतसमवायस्य हेतुता॥ रसनघ्राणयोस्तु रसगंधतद्गतजातिग्राहकत्वेनाद्वितीयप्रतीययोः सन्निकर्षयोरेव रसगंधादिहेतुता वाच्या॥ श्रवणेन्द्रियस्याकाशरूपत्वेन शब्दस्याकाशगुणत्वेन श्रवणेन्द्रियेण च समं शब्दस्य समवायः सन्निकर्षः॥ शब्दवृत्तिशब्दत्वकत्वादिजातिविषयकश्रावणप्रत्यक्षे समवेतसमवायस्य हेतुता॥ अभावप्रत्यक्ष इति विशेषणविशेष्यभावो नाम विशेषणतासन्निकर्षः॥ पंचसं

न्निकर्षेसुमध्येसंयोगस्थानेसंयुक्तपदंघटयित्वासमवायस्थानेसमवेतपदंघटयित्वाऽभावस्थलेनिर्वाह्यं॥ तथाहि॥द्रव्याधिकरणकाभावप्रत्यक्षेसंयुक्तविशेषणता॥द्रव्यसमवेताधिकरणकाभावप्रत्यक्षेइन्द्रियसंयुक्तसमवेतसमवेतविशेषणता॥तत्रघटेपटत्वाभावःसंयुक्तविशेषणतयागृह्यते॥घटसमवेतघटत्वादौपृथिवीत्वाभावःसंयुक्तसमवेतविशेषणतयागृह्यते॥घटसमवेतसमवेतरूपत्वादौनीलत्वाभावश्चसंयुक्तसमवेतसमवेतविशेषणतयागृह्यतइतिसंक्षेपः॥ ॥इतिप्रत्यक्षपरिच्छेदःसमाप्तः॥

॥अनुमानंलक्षयति॥अनुमितिकरणमिति॥अनुमितौव्याप्तिज्ञानंकरणं॥परामर्शोव्यापारः॥अनुमितिःफलं॥परामर्शस्यव्याप्तिज्ञानजन्यत्वेसतिव्याप्तिज्ञानजन्यानुमितिजनकत्वात्तज्जन्यत्वेसतितज्जन्यजनकत्वरूपव्यापारत्वमुपपन्नं॥अनुमितिकरणत्वमनुमानस्यलक्षणं॥अनुमानंव्याप्तिज्ञानंऽतस्यपरामर्शरूपव्यापारद्वाराऽनुमितिप्रत्यसाधारणकारणतयाऽनुमितिकरणत्वमुपपन्नं॥परामर्शजन्यमिति॥परामर्शजन्यत्वविशिष्टज्ञानत्वमनुमितेर्लक्षणं॥अत्रज्ञानत्वमात्रोपादानेप्रत्यक्षादावतिव्याप्तिरतस्तद्वारणायपरामर्शजन्यत्वेसतीतिविशेषणोपादानं॥परामर्शज

न्यत्वमात्रोक्तौ परामर्शध्वंसेऽतिव्याप्तिरतस्तद्वारणाय ज्ञानत्वोपादानं॥ अनुमितिलक्षणघटकीभूतप-
रामर्शलक्षणमाचष्टे॥ व्याप्तिविशिष्टेति॥ व्याप्तिविशिष्टं च तत्पक्षधर्मताज्ञानं चेति कर्मधारयः॥ अ
त्र विशिष्टस्य पदस्य प्रकारतानिरूपकपरत्वात्पक्षधर्मताया ज्ञानमित्यत्र षष्ठ्या विषयत्वबोधना
त्॥ धर्मतापदस्य संबंधार्थकत्वात्॥ कर्मधारयसमासेन समस्यमानपदार्थयोरभेदसंसर्गला
भाच्च व्याप्तिप्रकारकाभिन्नं यत्पक्षसंबंधविषयकज्ञानं तत्परामर्श इति लभ्यते॥ एवं सति धूमो वह्नि
व्याप्यः॥ आलोकवान्पर्वत इत्याकारकसमूहालंबनेऽप्युक्तपरामर्शलक्षणमस्तीत्यतिव्याप्तिस्तद्वा
रणाय पक्षतानिष्ठविशेष्यतानिरूपितहेतुनिष्ठप्रकारतानिरूपितव्याप्तिनिष्ठप्रकारतानिरूपितप्रका
रिताशालि ज्ञानं परामर्श इति निष्कर्षः कर्तव्यः॥ एतादृशपरामर्शजन्यत्वे सति ज्ञानत्वमनुमितेर्ल
क्षणम्॥ अनुमितिपरामर्शयोर्विशिष्यकार्यकारणभावश्चेत्थं॥ वह्नित्वावच्छिन्नसंयोगसंबंधा
वच्छिन्नविधेयतानिरूपितपर्वतत्वावच्छिन्नोद्देश्यताशाल्यनुमितित्वावच्छिन्नं प्रति वह्नित्वा
वच्छिन्नप्रकारतानिरूपितव्याप्तित्वावच्छिन्नप्रकारतानिरूपितधूमत्वावच्छिन्नप्रकारतानिरू

पितपर्वतत्वावच्छिन्नविशेष्यतानिरूपितविशेष्यिताशालिनिर्णयः कारणम्॥ वह्नित्वावच्छिन्नप्रकारतानिरूपितव्याप्तित्वावच्छिन्नाविशेष्यतायाः धूमत्वावच्छिन्नविशेष्यतानिरूपितव्याप्तित्वावच्छिन्नप्रकारतायाश्चाभेदानंगीकर्तृमते वह्नित्वावच्छिन्नप्रकारतानिरूपितविशेष्यत्वावच्छिन्नव्याप्तित्वावच्छिन्नप्रकारतानिरूपितविशेष्यत्वावच्छिन्नधूमत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतानिरूपितविशेष्यिताशालिनिर्णयः कारणमिति वाच्यं॥ स च निर्णयो वह्निव्याप्यधूमवान्पर्वत इत्याकारको बोध्यः यत्र यत्रेति॥ यत्रपदवीप्सा धूमाधिकरणे यावति वह्निमत्त्वलाभाय॥ यावत्त्वमहिम्ना वह्नेर्धूमव्यापकत्वं लब्धं॥ तथा च धूमव्यापकवह्निर्धूमवतीत्यर्थः॥ तदेव स्पष्टयति॥ साहचर्यनियम इति॥ नियतसाहचर्यं व्याप्तिरित्यर्थः॥ नियतत्वं व्यापकत्वं॥ साहचर्यं सामानाधिकरण्यं॥ तथा च धूमनियतवह्निसामानाधिकरण्यं व्याप्तिरित्यर्थः॥ वह्नेर्धूमव्यापकत्वं च धूमसामानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वं॥ तथा हि॥ धूमाधिकरणे चत्वरमहानसादौ वर्त्तते योऽभावः घटत्वाद्यवच्छिन्नप्रतियोगिताकाभावो न तु वह्नित्वावच्छिन्नप्रतियोगि

गकाभावः ॥ कुतः चत्वरमहानसादौ वह्नेः सत्वात् ॥ एवंसतिधूमाधिकरणेपर्वतेचत्वरादौवर्तमानस्य
घटाद्यभावस्यप्रतियोगितावच्छेदकंघटत्वादिकमेवनवच्छेदकंवह्नित्वंतद्वत्वंवह्नौवर्ततेऽतोधूमव्या
पकत्वंवह्नौवर्तते ॥ तथाचधूमव्यापकवह्निसामानाधिकरण्यंव्याप्तिरितिफलितं ॥ तृतीयमन्वय
व्याप्तिः सिद्धांतानुसारेण ॥ पूर्वपक्षव्याप्तिस्तुसाध्याभाववदवृत्तित्वं ॥ साध्यतावच्छेदकसंबंधाव
च्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकप्रतियोगितावच्छेदकसंबंधावच्छिन्नप्रतियोगि
तावच्छेदकावच्छिन्नवैयधिकरण्यावच्छिन्नोभाववान्निरूपितहेतुतावच्छेदकसंबंधावच्छिन्न
वृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावोव्याप्तिरित्यर्थः ॥ तच्चकेवलान्वयिन्यव्याप्तिमितिसिद्धांतानुसा
रेणं ॥ अनुमानंविभजते ॥ स्वार्थमिति ॥ स्वार्थानुमानंनामन्यायाप्रयोज्यमनुमानं ॥ तत्प्रयोज्यानु
मानंपरार्थानुमानं ॥ न्यायत्वंचप्रतिज्ञाद्यवयवपंचकसमुदायत्वं ॥ अवयवत्वंचप्रतिज्ञाद्यन्यतम
त्वं ॥ अन्वयेनेति ॥ साध्यसामानाधिकरण्यरूपान्वयव्याप्तिमानित्यर्थः ॥ व्यतिरेकेणेति ॥ व्यतिरेको
नामाभावः ॥ तथाचसाध्याभावहेत्वभावयोर्व्याप्तिर्व्यतिरेकव्याप्तिः ॥ अयंचहेतुर्यत्रयत्रवह्न्यभाव

तत्र धूमाभावइति ॥ यत्रपदवीप्सया यावद्वह्न्यभाववत्तौ यावति धूमाभावग्रहणे यावत्त्वस्य व्यापकत्वपरत
या धूमाभावे वह्न्यभावव्यापकत्वं लभ्यते ॥ वह्न्यभावे धूमाभावव्यापकत्वं लभ्यते वह्न्यभावनिष्ठव्याप्यत्वं च वस्तुत
स्तु पु वह्न्यभावव्यापकीभूताभावप्रतियोगित्वसत्त्वेन धूमनिष्ठतया गृह्यत इति ॥ व्यतिरेकव्याप्तिमत्त्वेनान्व
यव्याप्तिमत्त्वेन चान्वयव्यतिरेकित्वेन चगीयते ॥ व्यतिरेकपरामर्शाकारस्तु वह्न्यभावव्यापकीभूताभावप्रतियो
गि धूमवानिति ॥ केवलान्वयिनो लक्षणमाह ॥ अन्वयेति ॥ व्यतिरेकव्याप्तिशून्यत्वे सत्यन्वयव्याप्तिमत्त्वं
केवलान्वयित्वं ॥ अथवा केवलान्वयिसाध्यकत्वं तत् ॥ एतच्च लक्षणं हेतोर्व्यतिरेकित्वेपि संगच्छते ॥ साध्य
स्य केवलान्वयित्वादेवान्वयव्याप्तेरभावादन्वयमात्रव्याप्तिकं केवलान्वयीति मूलोक्तलक्षणमुपपन्नं ॥ अ
त्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वं ॥ न चैवमाकाशाभावे संयोगाभावे वाव्याप्तिरिति वाच्यं ॥ स्वविरोधि
वृत्तिमदत्यन्ताभावाप्रतियोगित्वस्यैव तदर्थत्वात् ॥ तथा च तयोरेकजातीयसत्त्वेन सर्वत्र विद्यमानत्वान्ना
व्याप्तिः ॥ केवलव्यतिरेकिणो लक्षणमाह ॥ व्यतिरेकेति ॥ निश्चितान्वयव्याप्तिशून्यत्वे सति व्यतिरेकव्याप्तिम
त्त्वं केवलव्यतिरेकित्वं ॥ यथेति ॥ अत्र पृथिवीत्वावच्छिन्नं पक्षः ॥ पृथिवीतरजलादिभेदः साध्यं ॥ गंधवत्त्वं
हेतुः ॥ अत्र यद्गंधवत्तदितरेभ्यो भिद्यते यथेत्यन्वयदृष्टान्ताभावाद्गंधव्यापकेतरभेदसामानाधिकरण्य

रूपान्वयव्याप्तिग्रहासंभवः॥ किंतु यत्र यत्र पृथिवीतरभेदाभावस्तत्र गंधाभावो यथा जलादिकमिति व्यतिरेकदृष्टांते जलादावितरभेदाभावरूपसाध्याभावव्यापकता गंधाभावे गृह्यते॥ इममेवार्थं मनसि निधाय यदितरेभ्यो न भिद्यते न तद्गंधवद्यथा जलमिति ग्रंथेन मूलकारो व्यतिव्याप्तिमेव प्रदर्शितवान्॥ एवंप्रकारेण व्यतिरेकव्याप्तिग्रहानंतरमितरभेदाभावव्यापकीभूताभावप्रतियोगिगंधवती पृथिवीत्याकारकव्यतिरेकपरामर्शात् पृथिवीत्वावच्छिन्नोद्देश्यतानिरूपितेतरभेदत्वावच्छिन्नविधेयताका पृथिवी इतरभेदवतीत्याकारकानुमितिर्जायत इति तत्त्वं॥ यथाश्रुतमूलार्थस्तु यज्जलमितरेभ्यो न भिद्यते इतरभेदाभाववत् न तद्गंधवज्जलमितरभेदाभावव्यापकगंधाभाववत्॥ न चेयं तथा॥ इयं पृथिवी॥ न तथा॥ गंधाभाववती न॥ किंतु तदभावात्मकगंधवती॥ तस्मान्न तथा॥ तस्मात्॥ गंधाभावाभाववत्त्वात् गंधवत्त्वात्॥ न तथा॥ इतरभेदाभाववती न॥ किंतु इतरभेदाभावाभाववती इतरभेदवतीति पर्यवसन्न इति॥ पक्षलक्षणमाह॥ संदिग्धेति॥ साध्यप्रकारकसंदेहविशेष्यत्वं पक्षत्वं॥ संदेहश्च पर्वतो वह्निमान्न वेत्याकारकः॥ इदं च लक्षणमनुमितेः पूर्वं साध्यसंदेहो नियमेन जायत इत्यभिप्रायेण प्राचीनैः कृतं॥ गगनविशेष्यकमेघप्रकारकसंदेहाभावदशायामपि गृहस्थस्य प्ररूपस्य घन गर्जितं श्रवतो न गग

नमेघवदित्याकारकगगनत्वावच्छिन्नोद्देश्यतानिरूपितमेघत्वावच्छिन्नविधेयताकानुमितिदर्शनात्प्राचीनलक्षणंविहायनवीनैरनुमित्युद्देश्यत्वंपक्षत्वमितिस्वीकृतं॥सपक्षलक्षणमाह॥निश्चितेति॥साध्यप्रकारकनिश्चयविशेष्यत्वंसपक्षत्वं॥निश्चयश्चमहानसंवह्निमानित्याकारकः॥विपक्षलक्षणमाह॥निश्चितसाध्याभाववानिति॥साध्याभावप्रकारकनिश्चयविशेष्यत्वंविपक्षत्वं॥निश्चयश्चह्रदोवह्न्यभाववानित्याकारकः॥सद्धेतून्निरूप्यहेत्वाभासान्निरूपयति॥सव्यभिचारेति॥हेतुवदाभासन्तइतिहेत्वाभासादुष्टहेतवः॥दोषाश्चव्यभिचारविरोधप्रतिपक्षासिद्धिबाधाः॥एकज्ञानविषयप्रकृतहेतुतावच्छेदकवत्त्वसंबन्धेनैतद्विशिष्टाहेतवदुष्टाइत्यर्थः॥यद्विषयकत्वेनज्ञानस्यानुमितितत्कारणान्यतरप्रतिबन्धकत्वंतत्त्वंदोषसामान्यस्यलक्षणं॥हेतोर्दोषज्ञानेसत्यनुमितिप्रतिबन्धस्तत्कारणप्रतिबन्धोवाजायतेऽतोवानिग्रहार्थंवादिनोद्भावितहेतौदोषोद्भावनार्थंदुष्टनिरूपणमितिभावः॥सव्यभिचारंविभज्यदर्शयति॥साधारणेति॥साधारणाद्यन्यतमत्वंसव्यभिचारसामान्यलक्षणं॥साधारणत्वंसाध्याभाववद्वृत्तित्वं॥पर्वतोवह्निमान्प्रमेयत्वादिति॥अत्रप्रमेयत्वहेतौवह्न्यभाववद्वृत्तित्व

रूपव्यभिचारे ज्ञाने वृत्त्यभाववद्वृत्तित्वरूपव्याप्तिज्ञानप्रतिबंधः फलं ॥ असाधारण इति ॥ सर्वसपक्षविप
क्षव्यावृत्तत्वं ॥ साध्यवद्वृत्तित्वावच्छिन्नप्रतियोगिताकाभावो हेतौ साध्यवद्वृत्तित्वेति स्थिते सा
ध्यवद्वृत्तित्वरूपव्याप्तिज्ञानप्रतिबंधः फलं ॥ अनुपसंहारिणं लक्षयति ॥ अन्वयेति ॥ उभयदृष्टां
ताभावादन्वयव्याप्तिज्ञानव्यतिरेकव्याप्तिज्ञानोभयसामग्री नास्तीत्यर्थः ॥ किंचिद्विशेष्यकनिश्चया
विषयसाध्यकत्वे सति किंचिद्विशेष्यकनिश्चयाविषयसाध्याभावकत्वमेवानुपसंहारित्वं ॥ एतज्ज्ञान
स्य व्याप्तिसंशयजननद्वारा व्याप्तिज्ञानप्रतिबंधः फलमिति भावः ॥ वस्तुतस्त्वत्यंताभावाप्रतियोगिसा
ध्यकत्वमेवानुपसंहारित्वमिति बोध्यं ॥ विरुद्धं लक्षयति ॥ साध्याभावव्याप्त इति ॥ साध्याभावव्याप्तिः सा
ध्याभावनिरूपितव्यतिरेकव्याप्तिः साध्यव्यापकीभूताभावप्रतियोगित्वं ॥ तथा च पक्षविशेष्यकसा
ध्याभावव्याप्यहेतुप्रकारकज्ञानात् पक्षविशेष्यकसाध्यप्रकारकानुमितिप्रतिबंधः फलं ॥ एवं सत्प्रति
पक्षोपि ॥ विरुद्धसत्प्रतिपक्षयोर्विशेषस्तु हेतोरेकत्वेन हेत्वोर्द्वित्वेन च ज्ञातव्यः ॥ साध्याभावव्याप्य
प्रकृतहेतुर्विरोधः ॥ साध्याभावव्याप्यप्रतिहेतुमान् पक्षः सत्प्रतिपक्ष इति यावत् ॥ विरुद्धे साध्याभा

वसाधको हेतुः साध्यसाधकत्वे नोपन्यस्त इत्यसामर्थ्यसूचनमपि ॥ आश्रयासिद्ध इति ॥ पक्षे पक्षतावच्छेदकविरह आश्रयासिद्धिः ॥ यथेति ॥ अत्रारविंदे गगनीयत्वाभावे निश्चिते गगनीयत्वविशिष्टारविन्दे सौरभ्यानुमितिप्रतिवंधः फलं ॥ स्वरूपासिद्ध इति ॥ स्वरूपासिद्धिर्नाम पक्षे हेत्वभावः ॥ तथा च हेत्वभावविशिष्टपक्षज्ञानात्पक्षविशेष्यकहेतुप्रकारकपरामर्शप्रतिवंधः फलं ॥ व्याप्यत्वासिद्ध इति ॥ प्रकृते धूमव्यापकत्वमार्द्रेन्धने गृहीतं चेद्धूमे आर्द्रेन्धनसंयोगव्याप्यत्वं गलेत ॥ एवं वह्नेर्व्यापकत्वमार्द्रेन्धनसंयोगे गृहीतं चेद्वह्नेतद्व्याप्यत्वं गलतेनदेवव्यभिचरितत्वं ॥ अर्थादुपाधिव्यभिचरितत्वं साधने गृहीतं चेदुपाधिभूतार्द्रेन्धनसंयोगव्याप्यधूमव्यभिचरितत्वं गलत एवा ॥ अनुमानप्रकारश्च पूर्वानुमाने हेतुं पक्षीकृत्य वह्निर्धूमव्यभिचारी धूमव्यापकार्द्रेन्धनसंयोगव्यभिचरितत्वात् घटत्वादिवत् यो यद्व्यापकव्यभिचारी सर्वोपि तद्व्यभिचारीति बोध्यः ॥ एवंप्रकारेण प्रकृतानुमानहेतुभूतपक्षे साध्यव्यभिचारो व्यापकतया दूषकत्वमुपाधेः फलं ॥ तथा च धूमाभाववद्वृत्तित्वाभावरूपधूमव्यभिचारे गृहीते वह्नौ धूमाभाववद्वृत्तित्वरूपव्याप्तिज्ञानप्र

निबंधः फलं॥ न च व्याप्यत्वासिद्धेर्व्यभिचाराभेद इति वाच्यं॥ धूमाभाववद्वृत्तित्वाभावाभावत्वेन व्याप्यत्वासि
द्धत्वं धूमाभाववद्वृत्तित्वेन व्यभिचारत्वमिति भेदात्॥ यस्येति॥ यस्य हेतोः साध्याभावः साध्यबाधः॥ प्र
माणान्तरेण प्रत्यक्षप्रमाणेन पक्षे निर्णीतः स बाधित इत्यर्थः॥ तथा च प्रात्यक्षिकसाध्यबाधनिश्चये जा
ते साध्यानुमितिप्रतिबंधः फलं॥ बाधितसाध्यकत्वाद्बाधितहेतुरित्युच्यते॥ ॥इत्यनुमानपरिच्छेदः स
माप्तः॥ ॥उपमानं लक्षयति॥ उपमितिकरणमिति॥ उपमितिं लक्षयति॥ संज्ञासंज्ञीति॥ संज्ञा नाम पदं॥ सं
ज्ञी अर्थः॥ तयोः संबन्धः शक्तिः॥ तथा च पदपदार्थसंबंधज्ञानमुपमितिरित्यर्थः॥ उपमानं सादृश्यातिदेशवा
क्यार्थज्ञानं॥ अतिदेशवाक्यार्थस्मरणं व्यापारः॥ उपमितिः फलं॥ गोसदृशो गवयपदवाच्य इत्याकारक
वाक्याद्गोसादृश्यावच्छिन्नविशेष्यकगवयपदवाच्यत्वप्रकारकं यज्ज्ञानं जायते तदेव करणं॥ ॥इत्युप
मानपरिच्छेदः समाप्तः॥ ॥शब्दं लक्षयति॥ आप्तेति॥ आप्तोच्चरितत्वे सति वाक्यत्वं लक्षणं॥ प्रमाणश
ब्दत्वं लक्ष्यतावच्छेदकं॥ वाक्यत्वमात्रोक्तावनाप्तोच्चरितवाक्येऽतिव्याप्तिरत आप्तोच्चरितत्वनिवेशः॥ ता

यन्मात्रोक्तौ जवगडदशादावतिव्याप्तिरतो वाक्यत्वं॥ आप्तत्वंच प्रयोगहेतुभूतयथार्थज्ञानवत्त्वं॥ तथा च प्रयोगहेतुभूतयथार्थज्ञानजन्यशाब्दत्वमिति पर्यवसन्नोर्थः॥ यस्य तस्य पदज्ञानं करणं॥ वृत्तिज्ञानसहकृतपदज्ञानजन्यपदार्थोपस्थितिर्व्यापारः॥ वाक्यार्थज्ञानं शाब्दबोधः फलं॥ वृत्तिर्नाम शक्तिलक्षणान्यतररूपा॥ शक्तिर्नाम घटादिपदजन्यबोधविषयत्वप्रकारकेश्वरसंकेतः॥ ईश्वरसंकेतो नाम ईश्वरेच्छा॥ सैव शक्तिरित्यर्थः॥ शक्तिनिरूपकत्वमेव पदे शक्तत्वं विषयतासंबंधेन शक्त्याश्रयत्वमर्थे शाक्यत्वं॥ शाक्यसंबंधो लक्षणा॥ सा द्विधा॥ गौणी शुद्धा चेति॥ गौणी नाम सादृश्यविशिष्टे लक्षणा· यथा सिंहो माणवक इत्यादौ॥ सिंहपदस्य सिंहसादृश्यविशिष्टे लक्षणा॥ शुद्धा त्रिविधा॥ जहल्लक्षणा॥ अजहल्लक्षणा॥ जहदजहल्लक्षणा चेति॥ लक्षतावच्छेदकरूपेण लक्ष्यमात्रबोधप्रयोजिका लक्षणा जहल्लक्षणा॥ यथा गंगायां घोष इत्यत्र गंगापदशाक्यप्रवाहसंबंधस्य तीरे सत्वात्तादृशशाक्यसंबंधरूपलक्षणाज्ञानाद्गंगापदात्तीरोपस्थितिः॥ लक्ष्यतावच्छेदकरूपेण लक्ष्यशाक्योभयबोधप्रयोजिका लक्षणाऽजहल्लक्षणा॥ यथा काकेभ्यो दधि रक्ष्यतामित्यत्र काकपदस्य दध्युपघातके लक्षणा॥ लक्ष्यतावच्छेदकं दध्युपघातकत्वं तेन रूपे

णादध्युपघातकानांसर्वेषांकाकविडालकुक्कुटादीनांशक्यलक्ष्याणांबोधात्॥शक्यतावच्छेदकपरित्यागे
नव्यक्तिमात्रबोधप्रयोजिकालक्षणाजहदजहल्लक्षणा॥यथातत्त्वमसीत्यत्रसर्वज्ञत्वकिंचिज्ज्ञत्वपरि
त्यागेनव्यक्तिमात्रबोधनाज्जहदजहल्लक्षणा॥इयंचलक्षणाजीवब्रह्मणोरैक्यंवदतांवेदान्तिनांसिद्धा
न्तरीत्या॥आकांक्षेति॥अव्यवहितोत्तरत्वादिसंबन्धेनयत्पदप्रकारकज्ञानव्यतिरेकप्रयुक्तोहियादृशशाब्द
बोधाभावस्तादृशशाब्दबोधेतत्पदवत्त्वमाकांक्षा॥यथाघटमित्यादिस्थलेऽव्यवहितोत्तरत्वादिसंब
न्धेनाम्पदघटपदवदित्याकारकाम्पदविशेष्यकघटपदप्रकारकज्ञानसत्त्वेघटीयकर्मत्वमितिबोधो
जायतेअम्घटइतिविपरीतोच्चारणेतुतादृशज्ञानाभावात्तादृशशाब्दबोधोनजायतेऽतस्मादाकां
क्षाज्ञानंशाब्दबोधेकारणं॥अर्थाबाधइति॥बाधाभावोयोग्यतेत्यर्थः॥अग्निनासिंचतीत्यत्रसेककरणत्व
स्यजलधर्मस्यवह्नौबाधनिश्चयसत्त्वान्नतादृशवाक्याच्छाब्दबोधः॥सान्निधिंनिरूपयति॥असहोच्चा
रितानीति॥असहोच्चरितानिविलंबोच्चरितानि॥वैदिकमिति॥वेदवाक्यमित्यर्थः॥इदमुपलक्षणं॥वे
दमूलकस्मृत्यादीन्यपिग्राह्याणि॥लौकिकेति॥वेदवाक्यभिन्नमित्यर्थः॥ ॥इतिशाब्दपरिच्छेदः॥

समाप्तः ॥ ॥ यथार्थानुभवन्निरूप्यायथार्थानुभवं विभजते ॥ संशयेत्यादिना ॥ एकेति ॥ एकधर्मावच्छिन्नविशेष्य
कभावाभावप्रकारकज्ञानं संशय इत्यर्थः ॥ भावद्वयकोटिकसंशयाप्रसिद्धेः स्थाणुर्वेत्यादेः स्थाणुत्वस्थाणुत्वाभावपु
रुषत्वपुरुषत्वाभावकोटिकसंशयपरत्वार्थः ॥ मिथ्याज्ञानमिति ॥ अयथार्थज्ञानमित्यर्थः ॥ विपर्ययो नाम भ्रमः ॥ व्याप्या
रोपेणेति ॥ तर्के व्याप्यस्य व्यापकस्य च बाधनिश्चयः कारणं ॥ अन्यथेष्टापत्तिदोषेणातर्कोनुपपत्तेः ॥ सुखं निरूपय
ति ॥ सर्वेषामिति ॥ इतरेच्छानधीनेच्छाविषयत्वमितिनिष्कर्षः ॥ यथा ऋने घटोनुकूल इत्याकारकानुकूलत्वप्रका
रकज्ञानविशेष्यत्वस्य घटादावपि सत्त्वात्तत्रातिव्याप्तिः ॥ सुखेच्छाधीने भोजनादावतिव्याप्तिवारणायेतरेच्छाधीनेती न
च्छाविशेषणम् ॥ सुखेच्छा तु सुखत्वप्रकारकज्ञानजन्यैव ॥ दुःखं निरूपयति ॥ प्रतिकूलेति ॥ अत्रापीतरद्वेषानधीनद्वेष
विषयत्वमितिनिष्कर्षः ॥ द्वेषविषयत्वमात्रोक्तौ सर्पादावतिव्याप्तिस्तत्रापि द्वेषविषयत्वसत्त्वादतस्तत्रातिव्याप्तिवार
णायेतरद्वेषानधीनेति द्वेषविशेषणम् ॥ सर्पजन्यदुःखादौ द्वेषात्सर्पद्वेष इति सर्पद्वेषस्य सर्पजन्यदुःखद्वेषजन्य
त्वादन्यद्वेषाजन्यद्वेषविषयत्वरूपलक्षणस्य सर्पादौ नातिव्याप्तिः ॥ फलेच्छा उपायेच्छां प्रति कारणमतः फलेच्छा
वशादुपायेच्छा भवत्येवं फलद्वेषादुपायद्वेषः ॥ धर्माधर्मौ निरूपयति ॥ विहितेत्यादिना ॥ वेदविहितेत्यर्थः ॥ निषि
द्धेति ॥ वेदनिषिद्धेत्यर्थः ॥ भावनां लक्षयति ॥ अनुभवेति ॥ अनुभवजन्यत्वे सति स्मृतिहेतुत्वं भावनाया लक्षणम् ॥

अत्रानुभवजन्यत्वे सतीति विशेषणानुपादाने आत्ममनःसंयोगेतिव्याप्तिरात्ममनःसंयोगस्य ज्ञानमात्रं प्रत्यसमवायिकारणत्वेन स्मृतिं प्रत्यपि कारणत्वादतस्तदुपादानं॥ आत्ममनःसंयोगस्यानुभवजन्यत्वाभावान्नातिव्याप्तिः॥ तावन्मात्रे कृतेऽनुभवध्वंसेतिव्याप्तिः॥ ध्वंसं प्रति प्रतियोगिनः कारणत्वेनानुभवध्वंसस्याप्यनुभवजन्यत्वादतःस्मृतिहेतुत्वोपादानं॥ अनुभवध्वंसे स्मृतिहेतुत्वाभावान्नातिव्याप्तिः॥ नन्वत्र विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य कारणता सकलतांत्रिकमतसिद्धा॥ यथा दंडविशिष्टबुद्धिं प्रति दंडज्ञानं कारणं दंडविशिष्टबुद्धिर्नाम दंडप्रकारकज्ञानं॥ तथा च दंडप्रकारकबुद्धित्वावच्छिन्नं प्रति दंडज्ञानत्वेन कारणत्वमित्यापतितं॥ दंडप्रकारकबुद्धिर्दंडीपुरुष इत्याकारकबुद्धिस्तत्र दंडज्ञानं कारणं न हि दंडमजानानः पुमान् दंडीपुरुष इति प्रत्येति॥ एवं च यत्रायं दंड इति प्रत्यक्षं जातं तदनन्तरं दंडीपुरुष इत्याकारकप्रत्यक्षमुत्पन्नं॥ तत्र दंडीपुरुष इत्याकारकप्रत्यक्षेतिव्याप्तिस्तद्धि स्वाव्यवहितपूर्वक्षणोत्पन्नदंडज्ञानात्मकानुभवजन्यं जनिष्यमाणो दंडीपुरुष इत्याकारकस्मरणे कारणं च स्मृतिं प्रत्यनुभवस्य कारणत्वात्॥ तथा चानुभवजन्यत्वे सति स्मृतिहेतुत्वरूपभावनालक्षणस्य यथोक्तदंडीपुरुष इत्याकारकानुभवे विद्यमानत्वादतिव्याप्तिरिति चेन्न॥ अत्र ब्रूमः॥ अनुभवजन्यत्वमनुभवनिष्ठकारणतानिरूपितकार्यताश्रयत्वं तत्र कारणतायामनुभवत्वावच्छिन्नत्वं निवेश्यते तथा चानुभवत्वावच्छिन्नकारणतानिरू

पितकार्यताश्रयत्वमनुभवजन्यत्वमितिफलितमतोनोक्तातिव्याप्तिः॥तथाहिदंऽप्रकारकबुद्धित्वावच्छिन्नकार्य
तानिरूपितदंऽज्ञाननिष्ठाकारणतातस्यांदंऽनुभवत्वमवच्छेदकंदंऽनुभवादंऽस्मरणादपिदंऽप्रकारकबुद्धेरु
त्पत्तेर्नोदंऽप्रकारकबुद्धित्वावच्छिन्नंप्रत्यनुभवस्मरणसाधारणदंऽज्ञानत्वेनैवदंऽज्ञानस्यकारणतायाःस्वीक
रणीयत्वेनदंऽज्ञानत्वस्यैवतदवच्छेदकत्वात्तथाचानुभवत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वस्ययथोक्त
प्रत्यक्षानुभवेऽभावान्नातिव्याप्तिः भावनायांलक्षणमिदंवर्त्तते॥तथाहि अनुभवेनैवभावनाख्यसंस्कारोत्प
त्त्याभावनात्वावच्छिन्नंप्रत्यनुभवस्यानुभवत्वेनैवकारणतयाभावनात्वावच्छिन्नकार्यतानिरूपितानुभव
निष्ठाकारणतातस्यामनुभवत्वमवच्छेदकमतोनुभवत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वंभावना
यांवर्त्ततइतिनासंभवः॥नन्वेवंस्मृतिहेतुत्वविशेषणवैयर्थ्यमापद्यतेतत्त्यनुभवध्वंसेतिव्याप्तिवारणायप्रा
गुपात्तंहियथोक्तानुभवजन्यत्वविवक्षायामनुभवध्वंसेतिव्याप्तिः प्रसज्यतेतथाहिध्वंसत्वावच्छिन्नंप्रतिप्र
तियोगिनःकारणत्वंप्रतियोगित्वेनरूपेणतत्तद्ध्वंसत्वावच्छिन्नंप्रतितत्प्रतियोगिव्यक्तेस्तद्धर्मित्वेनच
कारणत्वमित्येवध्वंसप्रतियोगिनोःकार्यकारणभावस्तथाचध्वंसनिष्ठकार्यतानिरूपितायानुभवनिष्ठाका

रणतातस्याः प्रतियोगित्वमवच्छेदकतया गर्भितत्वं चेन्नात्वनुभवत्वमपीति सिद्धांतादन्यत्र दूषितत्वात्तथा चानुभवत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वरूपानुभवजन्यत्वविरहेणैवातिव्याप्तिवारणसंभवात्कृतं स्मृतिहेतुत्वविशेषणेनेति चेन्न ॥ स्मृतावतिव्याप्तिवारणायैव तद्विशेषणप्रवेशात्तथाहि । स्मृतिं प्रत्यनुभवस्यैव कारणत्वान्न तु स्मृतेरप्यतो घटस्मृतित्वावच्छिन्नं प्रति घटानुभवस्य घटानुभवत्वेनैव कारणत्वं न तु घटज्ञानत्वेन । तथा च घटस्मृतिनिष्ठकार्यतानिरूपिता या घटानुभवनिष्ठकारणता तस्या घटानुभवत्वमवच्छेदकं तेनानुभवत्वावच्छिन्नकारणतानिरूपितकार्यताश्रयत्वस्य स्मृतौ विद्यमानत्वान्नहि स्मृतिः स्मृतिहेतुरतो न तत्रातिव्याप्तिरित्यलं ॥ सामान्यं निरूपयति ॥ नित्यमेकमिति ॥ नित्यत्वे सत्यनेकसमवेतत्वं सामान्यलक्षणं ॥ नित्यत्वानुपादाने संयोगादावतिव्याप्तिः आकाशादावतिव्याप्तिवारणायानेकसमवेतत्वं जलपरमाणुरूपादावतिव्याप्तिरतोऽनेकेति ॥ नित्यद्रव्यवृत्तय इति ॥ नित्यद्रव्येषु परमाण्वादिषु वर्तमाना इतरव्यावर्तका इतरभेदानुमितिहेतवः नित्यद्रव्यवृत्तित्वरूपपक्षधर्मताप्रयोज्येतरभेदानुमापकताशालिन इत्यर्थः ॥ नित्यद्रव्यनिष्ठविशेष्यतानिरूपितैकमात्रवृत्तिभेदानुमितिजनकतावच्छेदकप्रकारताश्रयत्वं विशेषाणां लक्षणमिति भावः ॥ पार्थिवपरमाणौ जलादिभेदानुमापकगन्धेऽतिव्याप्तिवारणायैकमात्रवृत्तित्वं भेदविशेषणं ॥ घटादौ तदितरभेदानुमापके तद्रूपादावतिव्याप्तिवारणाय

निरूपितांतंप्रकारताविशेषणं॥ एतेनव्यावर्तकइत्यस्यनित्यद्रव्यविशेष्यकेतरभेदानुमितिप्रयोजकइत्यर्थ
कतयालक्षणपरत्वेनसाफल्येपिनित्यद्रव्यवृत्तयइतिविफलमेवस्वरूपाख्यानस्यापिकृतत्वादितिप्राञ्चः॥ य
योर्मध्ये इति॥ यन्निष्ठकालनिरूपिताधेयताश्रयान्यंयदवच्छिन्नंतदुभयान्यतरत्वमयुतसिद्धत्वमित्यर्थः॥ त्रै
कालिकेति॥ प्रागभावाप्रतियोगित्वेसतिध्वंसाप्रतियोगित्वेसत्यन्योन्याभावभिन्नत्वेसत्यभावत्वमत्यन्ताभाव
स्यलक्षणं॥ ध्वंसप्रागभावान्योन्याभावाकाशाभावादीनांवारणाययथाक्रमंविशेषणोपादानं॥ वस्तुतस्तुसंसर्गा
भावत्वंतादात्म्यभिन्नसंबंधावच्छिन्नप्रतियोगिताकाभावत्वंध्वंसप्रागभावयोश्चनसंसर्गावच्छिन्नप्रतियोगि
ताकत्वमितितेनैवतद्वारणेत्रैकालिकेतिस्वरूपाख्यानमेवेतिबोध्यं॥ तादात्म्येति॥ अभावत्रयवारणायविशेष
णम्। घटाभाववान्नेतिप्रतीतिविषयघटादिवारणायविशेष्यं॥ ननुसादृश्यादीनामतिरिक्तपदार्थानामनिरूपणे
नन्यूनतेत्यतआह॥ सर्वेषामपीति॥ तद्भिन्नत्वविशिष्टतद्गतभूयोधर्मरूपसादृश्यस्यापिघटपटादिरूपत्वेन
नातिरिक्तत्वमेवमन्येषामप्यूह्यं॥ ॥ कृष्णावलंबिनोगाःप्रपोषगोवर्धनस्तमभ्यर्चयन्॥ विपुलाभीरसभाजन
नजनितनुधेन्दुस्तवापिरञ्चनोमि॥ ॥ इतितर्कसंग्रहव्याख्यान्यायबोधिन्याख्यासमाप्ता॥ ॥ ॥ ॥
वाणवह्निनवभूमितवर्षकेचोर्जमासरविसूनुसंचके॥ विश्वनाथमणिकर्णिकानिकेपद्मनाथव्यलिखत्प्रतिपत्तिथौ॥ १॥ आत्रेयवंशोद्भवःलिग्यालाःपदवाच्यः॥

॥ अथतर्कसंग्रहव्याख्यान्यायवोधिनीसमाप्ता ॥

4989

ॐ नमः श्रीपतये ॥ ॐ ॥ केवलान्वयिविभागपरमूलग्रन्थे केवलान्वयिपदस्य प्रसिद्धार्थपरत्वे ज्ञानकरणतापक्षे ज्ञानस्य केवलान्वयित्वासम्भवादसङ्गतिः· लिङ्गकरणतापक्षेपि केवलान्वयिसाध्यकव्यतिरेकिहेतोरसङ्ग्रहः।· अथान्वय
व्यतिरेकिलक्षणे व्यतिरेकिपदस्य यथाश्रुतार्थपरत्वे अगृहीतसाध्यसहचारकस्य व्यतिरेकप्रतियोगित्वमेवान्वयव्यतिरेकित्वमस्तु· तथा चोक्तहेत्वन्वयव्यतिरेकित्वेवान्तर्भवतु।· नचैवमसिद्धिपक्षं केवलान्वयीति मूलोक्तलक्षणविरोधः· वि
पक्षपदस्य साध्याभाववदर्थकतया प्रसिद्धेन साध्ये केवलान्वयित्वे तेनासम्भादिति वाच्यम्· तथाहि केवलान्वयिनोऽभिधेयत्वस्य नैवदक्षप्रीतलक्षणसङ्गवने विपक्षपदस्य साध्याभाववदर्थकत्वेऽभिधेयत्वस्यैव तन्न त्वयेन तेषां भाववत्सार्थक
तया आवश्यकतया अलक्षणस्य तत्त्वदस्यापि तदर्थतोक्तिवत्या मूः· नच साध्यास्थितकेवलान्वयिताया: केवलान्वय्यनुमानानन्तर्भावे तत्र साध्यसन्देहरूपपक्षताया: साध्याभावाप्रसिद्ध्याऽसम्भवादनुमित्यनिर्वाहप्रसङ्गात् अनुमानाया असङ्गतिरिति वाच्यम्·
हेतोः केवलान्वयित्वे साध्यस्यापि तथात्वमावश्यकम्· अन्यथाऽसद्धेतुतानिर्वाहादिति तदभङ्गप्रसङ्गेति वाच्यम्·।· तादृशहेतोरन्वयव्यतिरेकित्वे तादृशहेतुकानुमानस्य अर्थापत्त्यवकाशेऽभ्युपगन्तव्यतया तेषां साध्याभाववद्वृत्तित्वस्य व्याप्ति
लाभ्युपगमे विरोधादिति व्याख्ये·।· केवलान्वयीति·।· साध्यकादित्यादिपदत्यतिरेकि साध्यकयोः परिग्रहः॥ तत्र व्यतिरेकित्वस्य विशेषणतया साध्याना न्तर्भावे केवलान्वयिलक्षणे साध्याना न्तर्भावेण केवलान्वयिसाध्यकव्यति
रेकिहेतोः केवलान्वय्यनुमानतया तत्र साध्यसहचाराग्रहदशायां केवलव्यतिरेकिलक्षणं त[illegible]दृहदशायामन्वयव्यतिरेकिलक्षणमव्याप्तं स्यादिति तदुभयलक्षणेऽपि साध्यविशेषः·।· यद्यपि केवलान्वयिपदं केवलान्वयिसाध्य
कार्थकतया मूलस्थ च विवक्षणीयं मूलस्थासिद्धपक्षमत्यन्ताभावाप्रतियोगिसाध्यकमित्येतेन स्वर्गाख्येयसातत्यन्ताभावाप्रतियोगिसाध्यकत्वस्यैव केवलान्वयिसाध्यकत्वरूपत्वात् तेन तथा व्याख्यासमनुपपन्नम्· तत्र मूलस्थ तासम्भ
त्वभावादेरभावप्रतियोगितया केवलान्वयित्वासम्भव इत्याक्षिप्य वृत्तिमदत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वमित्यस्यास्सिद्धान्तप्रणयनं द्विधितौ केवलान्वयिपदस्य साध्यविशेषणत्व एवसङ्गच्छते इ
ति तदर्थं तादृशव्याख्यानमिति वाच्यम्· केवलान्वयिपदेन साध्यविशेषणप्रतिपादनस्य मूलानुपात्तत्वादिति शेषः पदार्थविवेचनस्य मूलकृतोऽसम्भवा[illegible]रदसङ्गतेर्दुष्परिहरतया तादृशासङ्गतिपरिहाराय पूर्वपक्षे न केवला
न्वयित्वस्य तु केवलान्वय्यनुमाने साध्यमित्यर्थकतया वृत्तिमदत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वमिति सिद्धान्तग्रन्थस्याश्च वृत्तिमदत्यन्ताभावाप्रतियोगित्वं साध्यविशेषणतया केवलान्वय्यनुमानलक्षणघट
कमित्यर्थपरतया व्याख्यातत्वात्· तथापि केवलान्वयिपदस्यात्र तथा व्याख्यार्थपरत्वं किन्तु मानस्येवोत्तमसुखवर्णितं केवलान्वयिसाध्यकत्वे तात्पर्यं लक्षणे तद[illegible]र्थव्याख्यानतः॥· तत्रेत्यस्य सप्तम्येकवचनान्तत्वे एकानुमानपरता
मर्थकत्वभूतेन वर्णनीयाः निर्णीतार्थकलानुपपत्तिप्रसङ्गात् निर्धारणस्य समुदायगर्भत्वादतो व्याचष्टे·।· तेष्विति·।· अथवा तत्रेति सप्तम्या आधारार्थकत्वाभावान्निर्धारणार्थकतामाह·।· तेष्वन्वयादि
[illegible] पदार्थताया निर्धारणीयस्य एकवचनार्थकत्वविरहेऽपि तद्विवक्षया साम्यमप्ययम्· अतएव यत्तदोरसमदुत्थापत्तिमायो

ति १

सत्येकवचनस्यानिर्धारणार्थकतया आचार्यव्याख्यानमपि सङ्गच्छते· तच्चानुमानमितिप्रकृतमूलेप्येकत्वाविवक्षयैव एकवचनसङ्गतिः· तथापि तच्चानुमानमित्यत्र सामान्ये हि तेन केवलान्वय्यादिपदेन प्रत्येकमुपस्था
पितस्यानुमानत्रयस्यैव तत्पदार्थकं तत्पदमित्याशयेन बहुवचनादरः· उद्देश्यतावच्छेदकमूलान्योऽसामान्यधर्मात्मकतत्रित्वत्वावच्छिन्ने केवलान्वयित्वरूपाविधेयस्य बोधकतयैव निर्धारणे सम्भवात् त्रित्वार्थकब
हुवचनं· विना तादृशसामान्यधर्मानुपस्थितेः· प्रत्येकपर्याप्तधर्मस्य सामान्यत्वाभावेन एकवचनासङ्गतेः· अतएव घटपटयोर्भेदघटे दण्डजन्य इत्यादौ निर्धारणान्वयबोधे न नियमतो द्विवचनाद्यपेक्षेति·।·
असाधूपक्षामेत्यत्र विपक्षेऽसत्त्वस्याप्रसिद्ध्या दर्शयितुमाह यथाश्रुतार्थे असिद्धिमाशङ्क्य व्याचष्टे ।· अत्यन्तेति ।· अत्यन्ताभावाप्रतियोगित्वस्य तत्साध्यकानुमितिकारणं तत्साध्यककेवलान्वय्यनुमानमित्यर्थः·।·
यदि विपक्षपदस्य साध्याभाववदर्थकतया तत्राभाववदधिकरणत्वप्रवेशेऽप्यतिप्रसङ्गः तदभावाप्रतियोगित्वमेव केवलान्वयित्वमिति लभ्यते· तथापि आकाशाभावादेः काशादिरूपाभावप्रतियोगितया केवलान्वयित्वानुपपत्तेः पूर्वपक्षे शङ्कीयतया त
द्वक्ष्यमाणं विपक्षपदस्य साध्याभावमात्रपरताभिप्रायेण मूलकृतयैव सङ्गमनीयतया तदाशयेनैवाह सत्त्वानन्तर्भाव· इति· सदत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वमिति ग्रन्थे मूलकृता तादृशाभिप्रायं निराकरिष्यते·।· अस
त्पक्षः· केवलव्यतिरेकीति व्यतिरेकिग्रन्थे वक्ष्यमाणकेवलव्यतिरेकिलक्षणस्य असत्सपक्षत्वे निश्चितसाध्यवान्तरस्य तथाश्रुतार्थे अप्रसिद्धिमाशङ्क्य प्रसङ्गादधस्त्वेव तद्विवृणोतीति ।· अग्रहीतेति ।· अग्रहीते सपक्षे निश्चितो हेतुसहचारो येनैवं
भूतं व्यतिरेकप्रतियोगि प्रकृतसाध्यं यत्र तत्कालावच्छिन्नप्रकृतहेतुसहचारनिश्चयविषयत्वाभाववत् व्यतिरेकप्रतियोगि प्रकृतसाध्यकानुमितिकरणमित्यर्थः।· अगोतानकयत्र वह्निप्रसिद्धिदशायां धूमादिहेतुकतदनुमा
नस्य सङ्ग्रहायानिश्चयेऽप्रकृतहेतुसहचारविषयत्वं विवक्षणीयम्· अन्वयसहचारदशायामपि कालान्तरीणतन्निश्चयविषयत्वाभावमादायातिप्रसङ्गवारणाय भावे तत्कालावच्छिन्नत्वविशेषणम्· तत्कालीनस्य हेतुसहचारविषयक
निश्चयस्य यो विषयस्तदन्यत्वस्य च न साध्यविशेषणत्वसम्भवः· यदा कुत्रापि तत्पुरुषस्य प्रकृतहेतुसहचारनिश्चयो नास्ति तदा तं पुरुषं प्रति तद्धेतोः केवलव्यतिरेक्यनुमानतानुपपत्तेः निश्चये पुरुषविशेषीयत्वमपि निवेशयम् तो व्यतिरेकि
तादृशायामपि अन्ततो भगवतः सहचारनिश्चयसत्त्वेऽपि तासम्भवः· कालविशेषसाध्यादिविशेषैरिव पुरुषविशेषैरपि नियन्त्रितं व्यतिरेकित्वमिष्यत एव ।· नन्वेवं यथासम्भवं प्रकृतहेतुसहचारनिश्चयः कदाचिदपि कदाचिदपि न
प्रसिद्ध्यति तं प्रति तद्धेतुकं किमप्यनुमानं व्यतिरेकि न स्यात् इति वाच्यम्· एवं सति तत्कालावच्छिन्नस्वविषयकतद्धेतुसहचारनिश्चयाभाववत्त्वघटकतया सर्वविशेषणत्वोपपत्तेः तादृशं यदनुमानं साध्यप्रसिद्धि
दशायां प्रकृतहेतुसहचारनिश्चयो न प्रसिद्ध्यति सर्वेषां साध्यानां अन्ततो भगवतः [illegible] प्रकृतहेतुसहचारनिश्चयविषयत्वस्यावश्यकत्वात्· एतत्कल्पे तत्कालीनतादृशनिश्चयवदन्यत्वेनापि विशेषणं सम्भवति तत्का
लीनतादृशनिश्चयस्यान्ततो भगवत्येव प्रसिद्धेः· साध्यव्यतिरेकप्रतियोगित्वनिवेशोऽन्वयसहचाराग्रहदशायामपि केवलान्वयिसाधकस्योक्तकेवलान्वय्यनुमानलक्षणाक्रान्ततया अव्याप्तिवारणाय· नन्वेवं यत्र व्यतिरेकसहचाराग्रहत्रेणया
पि ग्रहस्तत्र केवलव्यतिरेक्यनुमानं तदुक्तं मणिकृता यत्र व्यतिरेकसहचारेण व्याप्तिग्रह इति· एवञ्च यदन्वयव्यतिरेकसहचारयोरेवाग्रहस्तदापि हेतोस्तज्ज्ञानस्य वा केवलव्यतिरेकितापत्तिः उक्तलक्षणसत्त्वादिति वाच्यम्· अग्रहीतान्व
यो

केव. टी. मा. ६

१

4989.

न्वयव्यतिरेकिसाध्यके यत्नेनान्वयसहचारग्रहविषयव्यतिरेकिसाध्यकानुमितिफलोपहितकरणत्वस्य विवक्षणीयत्वात् दुष्टस्थले चानुमित्यनुत्पत्त्या फलोपधायकताविरहेणानतिप्रसङ्गात्। वस्तुतोऽनुमितावेवान्वयसहचारग्रहानधीनत्वं नि
वेशनं न तु साध्ये तदविषयत्वं। सहचारग्रहाधीनत्वं व्यापकताग्रहद्वारा विवक्षणीयं तथा च तद्ग्रहानधीनत्वं तद्ग्रहाधीनव्यापकताग्रहानधीनत्वं तेन केवलव्यतिरेकितादृशोत्पन्नाया अप्यनुमितेः प्रकृतसाध्यसाधनसहचाररूपान्वयसहचारगर्भव्याप्तिज्ञानप्रयो
ज्यत्वे तदा साध्यस्यान्वयसहचारग्रहविषयत्वनियमेऽपि अनुमितेः साक्षात्तदधीनत्वनियमेऽपि च न क्षतिः। अन्वयसहचारनिश्चयः सर्वत्र सर्वज्ञस्यैव प्रसिद्धः तदनधीनत्वं सामानाधिकरण्यप्रत्यासत्त्या व[illegible]जन्यताघटितत्वमतो जन्यज्ञानमात्रस्यैव
ईश्वरीयान्वयसहचारग्रहाधीनत्वेऽपि न क्षतिः। यत्र साधनसहचारो नास्मदादिज्ञानविषयस्तत्र परमेश्वरीयतत्सहचारज्ञाननिरूपितनिरुक्तजन्यत्वाप्रसिद्धावपि तत्र योगिज्ञानीयतादृशजन्यताया [illegible]विषयज्ञान एव प्रसिद्ध्या सामञ्जस्यम्। एवञ्च सह
चारग्रहे तत्कालीनत्वं नाविशेषणीयं। कालान्तरीयान्वयसहचारज्ञानस्य केवलव्यतिरेकितादृशानुमितावप्रयोजकत्वात् तादृशानुमितिमादाय लक्षणसमन्वयस्य कालानिवेशेऽपि सम्भवात्। अन्वयव्यतिरेकिसहचारज्ञानयोरनु
गतरूपेण व्याप्तिग्राहकतासम्बन्धे केवलव्यतिरेकसहचारज्ञानं यत्र व्याप्तिग्रहोपधायकं तत्र कालान्तरीयान्वयसहचारज्ञानस्य स्वरूपयोग्यत्वेऽपि न क्षतिः। फलोपधानरूपप्रयोज्यताया निवेशनीयत्वात्। यत्र नानालिङ्गकर
णतापक्षे अनुमितौ तत्पुरुषीयत्वं निवेशनीयम्। अन्यथा एकस्य पुंसोऽन्वयसहचारादन्यस्य व्यतिरेकसहचारमादाय तस्यैकलिङ्गकानुमितिस्तत्रालिङ्गस्य व्यतिरेकसहचारमात्राधीनानुमितिमादाय दोषाभावेऽपि तु हेतौ प्र
ति केवलव्यतिरेकितापत्तेः। केचित्तु अन्वयानुमाने तादृशहेतौ धूमादौ नान्वयसाध्यत्वे तत्साध्यकत्वेन तद्धेतुकत्वेन चानुमितिर्विशेषणीया। अत एव निर्धूमसहचारज्ञानालब्धेनान्यसाध्यकान्यहेतुकानुमितिकरणेऽन्व
यव्यानुमानेऽनतिव्याप्तिः। फलोपधानत्वस्य विशेषणत्वोपगमात् लिङ्गकरणतापक्षे कालान्तरीयानुमितिफलोपधानमादायान्वयितादृशपक्षसम्भवे तेन व्यतिरेकितापत्तेः। एवञ्च साध्यव्यतिरेकिताविशेषणं
यदा केवलान्वयिसाध्यकस्थलेऽभावांशे साध्यीयत्वावगाहि भ्रमात्मकव्यतिरेकसहचारग्रहादनुमित्युपधानं तदातिप्रसङ्गवारणाय विशेषणम्। अन्वयव्यतिरेकिलक्षणस्य मूलानुक्तत्वात्तल्लक्षणं तदाह। न हीतीति। पूर्ववद्विग्रहेण तत्कालीन
तत्पुरुषीयप्रकृतहेतुसहचारनिश्चयविषयव्यतिरेकप्रतियोगिप्रकृतसाध्यकानुमितिकरणत्वमिति फलितार्थः। प्रकृतहेतुसाध्यसहचारनिश्चयाधीनव्यापकताग्रहप्रयोज्यप्रकृतसाध्यानुमितिकरणत्वमिति तु निष्कर्षः। तथा च केवलान्वय्यनुमानेऽ
तिव्याप्तिवारणाय साध्ये व्यतिरेकप्रतियोगित्वविशेषणम्। ननु यत्र व्यतिरेकसहचारमात्रेण व्याप्तिग्रहस्तत्र केवलव्यतिरेकितुल्ययुक्त्या यत्रान्वयसहचारमात्रेण व्याप्तिग्रहस्तत्रैव केवलान्वयिसाध्यकस्य व्यतिरेकिसाध्यकस्य च
केवलान्वय्यनुमानेऽसामुचितमितिमूलोपदर्शितकेवलान्वयिलक्षणं तथाविधव्यतिरेकिसाध्यकेऽव्यापकमेवं साध्यस्य व्यतिरेकित्वघटितं केवलव्यतिरेक्यादिलक्षणमपि भ्रमात्मकव्यतिरेकसहचारग्रहदशायां केवलान्वयिसाध्य
कः केवलव्यतिरेक्यादावव्यापकं। तादृशव्यतिरेकप्रतियोगिसाध्यकानुमितिकरणत्वविरहात्। एवमन्वयव्यतिरेकिलक्षणमपि केवलव्यतिरेकिसाध्यकेऽन्वयसहचारमात्रग्रहदशायां केवलान्वयव्याप्तिव्यापकमित्यन्यथैव केवलान्वयित्वादिकं व
क्तुमुपक्रमते। व्याप्तिग्राहकेत्यादिना। सहचारभेदात इति। सहचारस्यान्वयव्यतिरेकभिन्नरूपेण लक्षणयोः तत्। भेदे अनुमानस्यान्वयित्वव्यतिरेकित्वरूपत्वे तल्लक्षणे। केवलान्वयिताया व्याप्तिग्राहकसहचारस्य व्याप्तेर्वान्वयनिरूप्य

व्याप्ति २ ५

साधीनत्वानुमापकताभिमतं साध्यस्य केवलान्वयित्वनिर्वचनविरोधादिति तस्मात्तथात्वाभिधानं स्यात् । ज्येष्ठो वेति ध्येयम् । अन्वयसहचारमात्रेति । लिङ्गकारणतापक्षे अन्वयसहचारमात्रज्ञानजन्यव्याप्तिग्रहाधीनतत्सुहृद्धीयानुमितिकरणत्वं विशिष्य त्वं तंपु
तसंप्राप्तेः केवलान्वयित्वमित्यर्थः । अन्वयव्यतिरेकिव्यक्तिव्याप्तिवारणाय मात्रपदम् । यत्र पदार्थान्तरीयसहचारविषयकसमूहालम्बनरूपप्रकृतसाध्यसाधनसहचारग्रहात् अन्यदीयव्याप्तिविषयकप्रकृतव्याप्तिग्रहे व्यतिरेकसहचारग्रहं विनैव तत्राव्याप्तिर्नाशङ्क्या.
व्याप्तिः प्रकृतसाध्यसाधनसहचारमात्रविषयताधीनविषयताप्रयोज्य तत्साध्यविधेयकताशालि न तत्सुहृद्धीयानुमितिकरणत्वं तत्साधककेवलान्वय्यनुमानत्वमित्यस्य विवक्षितत्वात् । तत्साध्यतदितरसाध्यविषयकसमूहालम्बनानुमितिकरणत्वं यथा तत्साधककेवला
न्वयिहेतौ तथान्यसाधकव्यतिरेकिणः केवलान्वयिसोपाधिहेतोरिति तस्य तत्साधककेवलान्वय्यनुमानतावारणाय तत्साध्यविषयत्वस्य करणत्वाभिरूपकतावच्छेदकतया प्रवेशः । अनुगमस्तु तत्साध्यीयत्वमिव तत्साधनीयत्वमपि सहचारे निवेश्यं [illegible]वत
त्साधनघटितलक्षणे करणत्वविशेष्यतयापि तत्साधनत्वप्रवेशात् उक्तातिप्रसङ्गवारणसम्भवे तत्साध्यकानुमानलक्षणे तत्साध्यविधेयतावदनुमितिकरणत्वमेव निवेशनीयम् । करणत्वविशेष्यतयास्य सहचारनिरूपकतावच्छेदकतया च तत्साधनत्वनिवेशात् अन्वयपदकः । अ
न्वयात् । अन्वयसहचारमात्रग्रहितव्याप्तिकेन हेतुना व्यतिरेकसहचारमात्रग्रहितव्याप्तिकेन हेत्वन्तरेण च यत्रैकसाध्यानुमितिर्जनिता तत्र तत्साध्यतिविषयकत्वावच्छिन्नतदनुमितिकरणत्वमादाय व्यतिरेकिहेतोरतिव्याप्त्यापत्तेः । व्याप्यवत्ताहितप्रयोज्यविधेयतायां
तत्साध्यीयत्वनिवेशात् यत्रान्वयसहचारमात्राधीनवह्निधूमव्याप्तिग्रहात् धूमेन वह्निव्याप्तिविशिष्टधूमस्यानुमितिर्न तु वह्नेस्तदनुमितौ व्याप्तिविशिष्टधूमविधेयतायाः साध्यतावच्छेदकव्याप्तिविषयताप्रयोज्यत्वेऽपि तत्कारणतामादाय तदानीं धूमस्य वह्निसाध्यकके
वलान्वय्यनुमानता । व्याप्तिज्ञानस्यानुमानतापक्षे तत्साध्यतत्साधनसहचारमात्रविषयताप्रयोज्या या तत्साध्यसाधनव्याप्तिविषयिता तद्वत्त्वे सति तत्साध्यकानुमितिकरणत्वं तत्साध्यवत्तत्साधनकेवलान्वय्यनुमानत्वमित्यर्थः । फलानुपहितव्याप्तिज्ञानवार
णाय विशेष्यदलम् । यत्र धूमधर्मिकवह्निसाधकव्याप्तिविषयकं यज्ज्ञानमन्यहेतुकान्यसाधकव्याप्तिविषयकसमूहालम्बनरूपं कारणान्तराभावेन न जन्यानुमितिमजीजनत् आवत्त्वस्यानुमितिमेव तत्र तस्य वह्निसाध्यककेवलान्वय्यनुमानतावारणाय तत्साध्यकत्व
मनुमितिविशेषणम् । नत्वेवमपि धूमालोकयोर्वह्निव्याप्तिविषयकेन यज्ज्ञानेन सहकारिविरहात् धूमलिङ्गकपरामर्शो न जनितः अपि त्वालोकपरामर्श एव तस्यालोकलिङ्गकत्वेनानुमितिकरणत्वमादाय धूमलिङ्गकानुमानत्वप्रसङ्गः धूमलिङ्गकपरामर्श
रूपव्यापारप्रधायकस्यैव धूमलिङ्गकानुमानव्यवहारविषयत्वे तस्यापत्तेरयोगादिति वाच्यम् । स्वकरणकानुमितिनिष्ठतत्साध्यविधेयत्वप्रयोजकप्रकृतहेतुनिष्ठतादृशव्याप्यवत्ताहितो या एवं विवक्षणीयत्वात् । एवं अनुमानत्वेनाभिमतं [illegible] अनुमितौ तत्साध्य
विषयकत्वप्रयोजकव्याप्त्यवगाहितादृशतदीयलिङ्गपरामर्शविशिष्टस्य स्वकरणकत्वमनुमितिविशेषणम् । ननु मात्रपदेन व्यतिरेकसहचारत्वावच्छिन्नो यदि व्यवच्छिद्यते तदा केवलान्वयिग्राह्यत्वसाध्यकानुमानासङ्ग्रहः व्यतिरेकाप्रसिद्धेः साध्यसाधनसहचारान्तरी
कसहचारत्वावच्छिन्नस्य व्यवच्छेदेऽपि प्रमेयवानभिधेयादित्याद्यनुमानाव्याप्तिर्दुर्वारैव । वस्तुमात्रसहचारस्यैव साध्यसाधनसहचारत्वात् । तत्र साध्यतावच्छेदकसम्बन्धघटितसाध्यसाधनसहचारातिरिक्तसहचारानधीनव्याप्तिग्रहकत्वं विवक्ष्यते न दोषः । स्वरूपादिस
म्बन्धेन प्रमेयादेः साध्यसाधनस्थले समवायादिना तत्सहचारस्यैव नियतसहचारातिरिक्तसहचाराप्रसिद्धेरिति वाच्यम् । एवमपि सम्बन्धसामान्येन प्रमेयादेः साध्यसाधनतास्थले ऽतिरिक्तसहचाराप्रसिद्धेर्दुर्वारत्वात् । अथ यावत्सम्बन्धसाधारणं सम्बन्धताव
च्छेदकं दुर्लभम् । अस्तु वा तावदन्यान्यत्वादिकं तथा । तथापि व्यतिरेकसहचारघटकपदार्थानां परस्परोपरागेण या विषयता तदनधीनत्वम् । यत्र प्रमेयाभावत्व राभिधेयाभाव इति भ्रमात्मिकैव तु साध्यतावच्छेदकतापर्याप्त्यधिकरणावच्छिन्नोपरागेण यः सहचा
विषयता तदन्यसहचारविषयतानधीनत्वस्यैव तदनुरोधेन विवक्षणीयतया नानुपपत्तिरिति । प्रमेयवानभिधेयादित्यादौ यत्र धूमस्तत्र वह्निरित्यादिज्ञानीयसहचारविषयताया एव निरुक्तसहचारविषयतातिरिक्तायाः प्रसिद्धेरिति चेदेवमपि यत्रापृथगेवान्वयसह

तद्

क८

हचारजन्यारेकव्याप्तिधीः अनन्तरं च सहचारान्तराविषयकज्ञानान्तराधीनाऽपरव्याप्तिधीस्ततोनुमितिस्तत्रान्वयसहचारज्ञानाधीनव्याप्तिधियमादायाऽनुमानस्य केवलान्वयित्वप्रसङ्गः। स्वप्रयोजकव्याप्त्यवगाहितात्वव्यापकतादृशसहचारविषयतातिरिक्तसहचारवि
षयत्वाप्रयोज्यताकानुमितिकारणत्वादिविवक्षणे न तत्स्थलीयानुमितिप्रयोजकद्वितीयज्ञाननिष्ठव्याप्त्यवगाहितायां व्यतिरेकसहचारविषयताप्रयोज्यत्वविरहेण तस्याः स्वपदेनोपादानासम्भवादतिव्याप्तिवारणे चायं गौरवमितिमात्रपदस्य तदतिरिक्तानधीनत्वार्थक
तां परित्यज्य व्यापकतान्तर्भावेण समुदितमन्यथा व्याचष्टे। तत्त्वमिति। स्वनिष्ठसाध्यविधेयकत्वप्रयोजकप्रकृतव्याप्तिविषयताप्रयोजकसहचारविषयतात्वव्यापकान्वयसहचारविषयतात्वकानुमितिकारणत्वमित्यर्थः। एवं अनुमितिः प्रकृतसाध्यसाधनादिसह
चारत्वेनान्यवस्तुज्ञानस्याव्याप्तिग्राहकत्वात् प्रमेयत्वादिना सहचारविषयकज्ञानस्य चातथात्वादन्वयसहचारादेर्विषयस्य न व्याप्तिज्ञानप्रयोजकत्वेति सहचारस्थले तद्विषयताप्रवेशः। साध्यादिसहचारत्वावच्छिन्नविषयतात्वेन प्रवेश्या। अन्यथा सहचारत्वेन
वत्त्वत्वेनावगाहिभ्रमाधीनव्याप्तिग्रहस्थले गोत्ववत्सहचारविषयतया व्याप्तिज्ञानप्रयोजकतयाऽव्याप्त्यापत्तेः। अन्वयसहचारविषयतात्वमपि साध्यताद्यवच्छेदकावच्छिन्नविषयतानिरूपितविषयतात्वरूपं बोध्यम्। अन्यथोक्तभ्रमस्थलस्यैवासङ्ग्रहाप
यत्र साध्यतावच्छेदकादिरूपेण साध्यादिभिन्नमप्यवगाहमानात्सहचारग्रहाद्व्याप्तिधीस्तत्सङ्ग्रहानुरोधेन वाऽतत्त्वसाध्यसाधनविषयतामुपेक्ष्य साध्यताद्यवच्छेदकावच्छिन्नविषयतापर्यन्तानिवेशः। अत एव सहचारघटकसम्बन्धविशेषानिवेशेपि समवायायावि
ज्ञेयत्वादिना प्रमेयाभिधेययोः साध्यहेतुभावस्थले व्यतिरेकसहचारे साध्यसाधनसहचारत्वस्यापि व्यतिरेकिणि नातिव्याप्तिसम्भवः। पानुभावसाधारणेन भावत्वेन यत्र संयोगसमवायाभ्यां हेतुसाध्यभावस्तत्र व्यतिरेकिणि व्यतिरेकसहचारविषयता
यामुक्तान्वयसहचारविषयतात्वसत्त्वेनातिव्याप्तिवारणायैव साध्यतावच्छेदकसम्बन्धहेतुतावच्छेदकसम्बन्धयोरप्यत्र प्रवेशनीयः। साध्यतावच्छेदकावच्छिन्नसाधनतावच्छेदकावच्छिन्नयोरेकतरोपरागेण सहचारविषयताया निवेशादेव व्यतिरेकसह
चारविषयतायाः प्राच्यमते वारणसम्भवेपि जन्यज्ञानविषयत्ववान् जन्यज्ञानविषयत्वाभावादित्यत्र यत्र जन्यज्ञानाविषयत्वाभावस्तत्र जन्यज्ञानविषयत्वाभावाभाव इति स्वाभावाभावरूपहेतुभावत्वेन सहचारप्रतियोगिसाध्यविषयकव्यतिरेक
सहचारग्रहाद्गृहीतव्याप्तिके कपिसंयोगाभाववान् कपिसंयोगादित्यत्र यत्र कपिसंयोगाभावाभावस्तत्र कपिसंयोगाभाव इति स्वाभावाभावरूपसाध्याभावत्वेन सहचारप्रतियोगिहेतुविषयकव्यतिरेकसहचारग्रहाद्गृहीतव्याप्तिके व्यतिरेकिण्य
तिव्याप्तिवारणाय उभयोपरक्तसहचारविषयतानिवेशः। उक्तातिव्याप्तिवारणमपि सहचारविषयतापर्यन्तफलम्। सहचारस्यानिरूपकतावच्छेदकभेदेप्यभेदात्। न च जन्यज्ञानविषयत्वाभावाभावत्वाद्यवच्छिन्ननिरूपितसहचारस्यापि जन्यज्ञानवि
षयत्वाभावाद्यवच्छिन्ननिरूपिततया यथाश्रुतसहचारनिवेशेनोक्तापत्तेर्दुर्वारत्वात्। अथ प्रतियोगिवैयधिकरण्यावच्छिन्नयोरेव व्यतिरेकयोः सहचारस्य व्यतिरेकव्याप्ताविवान्वयव्याप्तावपि ग्राहकत्वादुक्तस्थले च तादृशविशेषणावच्छिन्नव्यति
रेकसहचाराप्रसिद्धेर्न व्यतिरेकिण्यसम्भवः। न च प्रतियोगिवैयधिकरण्यावच्छिन्नव्यतिरेकयोरनुमित्यौपयिकव्यतिरेकव्याप्तिघटकतया तादृशयोः सहचारस्य ग्राहकोऽस्तु व्यतिरेकसहचारादन्वयव्याप्तिग्रहसम्भवे तु तादृशविशेषणावच्छिन्नयोरेव व्यति
रेकयोः सहचारस्य तद्ग्राहकत्वे निर्युक्तिकं [illegible] व्यतिरेकव्याप्तेर्गमकतापक्षे यादृशसहचारज्ञानस्यानुमितावपेक्षणीयता व्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यत इति फलस्यानुरोधेन तादृशसहचारज्ञानापेक्षाया आवश्यकत्वात्। अपि

करणविरोधे व्यभिचारज्ञानविरोधिनः सहचारज्ञानस्य व्याप्तिग्राहकतया प्रतियोग्यधिकरणे व्यतिरेकसहचारस्य तथाभूतस्य व्याप्तिग्राहकत्वासम्भवाच्चेति चेन्न॰ प्रतियोगिव्यधिकरणव्यतिरेकाप्रसिद्धावपि भ्रमात्मकव्यतिरेकसहचारज्ञानाधीनव्याप्तिग्राहकतया
व्यतिरेकित्वसम्भवात्॰ अत्र च साधननिष्ठसाध्यसहचारसाध्यनिष्ठसाधनसहचारान्यतरत्वस्य तदन्यतरविषयतात्वस्य वा व्यापकत्वं विवक्षणीयम्॰ एकविधसहचारमात्रोपादानेऽन्यतरसहचार [illegible] गृहीतव्याप्तिकेऽव्याप्तेः॥ यत्तु अन्वयव्याप्तिघटकसाध
ननिष्ठसाध्यसहचारस्यैवान्वयव्याप्तिग्राहकतोपेयते न तु साध्यनिष्ठसाधनसहचारस्य तथा च साधननिष्ठसाध्यसहचारत्वस्यैव व्यापकता विवक्षणीया॰ न च सहचारग्रहस्य व्यापकताग्रहे स्वातन्त्र्येण हेतुतामते एवेदं लक्षणम्॰ अन्यथा व्यतिरेकसहचारस्यान्व
९४ यव्याप्तिघटकतया तद्ग्रहस्य तद्ग्राहकत्वानुपपत्त्याऽतिव्याप्त्यापातात्॰ तथा च साधने साध्यसहचारज्ञानमिव साध्ये साधनसहचारज्ञानमप्यविशेषेण व्यापकतां ग्राहयेदिति साध्यप्रतियोगिकसाधनप्रतियोगिकसहचारद्वयमन्यतरत्वेनावश्यं निवेशनीयमि
ति वाच्यम्॰ उक्तसहचारयोरनुगमकरूपस्य गुरोर्दुर्वचतया लाघवात् साध्यप्रतियोगिकसहचारज्ञानत्वेनैव व्यापकताबुद्धिहेतुत्वोपगमात् साध्यधर्मिकसहचारज्ञानस्य व्यापकत्वाग्राहकतयाऽव्याप्त्यनवकाशात्॰ न च विनिगमनाविरहात्प्रत्येकमेनोभयसह
चारयोर्हेतुत्वे दुर्वारमिति वाच्यम्॰ व्याप्तिग्रहे तद्घटकसाध्यप्रतियोगिसहचारज्ञानस्यावश्यापेक्षणीयत्वेन साधनप्रतियोगिकसहचारबुद्धेर्व्यापकताग्राहकत्वेऽनुपेति पूर्वं नियमतो द्विविधसहचारकल्पनेन गौरवात् साध्यस्यैव साध्यप्रतियोगिकसहचारबुद्धेर्व्याप
कताग्राहकत्वेऽपि विनिगमकत्वादिति॰ तन्न॰ तादृशव्यापकताग्रहे साधनधर्मिकसहचारज्ञानस्यैव हेतुत्वेऽपि यत्र साधनत्वमात्राधिकरण्यविशिष्टस्य साध्यस्य कचिदैकाधिकरण्यावगाहिव्यापकताग्रहस्तत्र साधनधर्मिकसाध्यसहचारस्य कल्पनीयतया विनिगमना
विरहात्॰ न च व्याप्तिघटकाभावनिष्ठहेतुसहचारग्रहस्य तद्विशिष्टवैशिष्ट्यावगाहित्वं व्याप्तिबुद्धौ हेतुतया तादृशसहचारस्यापि व्याप्तिग्राहकतया तत्र प्रकृतसाध्यसाधनसहचारत्वाभावात् तस्य व्याप्तिग्राहकसहचारत्वे व्यापकता एवं यत्र साध्यताव
च्छेदकं साधनतावच्छेदकं पदार्थान्तरसहचारघटितं तत्र पदार्थान्तरसहचारस्यापि व्याप्तिग्राहकतया तत्साध्यसाधनसहचारे तत्साधारणव्याप्तिग्राहकसहचारत्वं व्यापकत्वं नान्वयसहचारत्वस्य तत्राऽभावान्निरुक्तसाधनसहचारसाधारणव्याप्तिघटकसहचारत्वे
नान्वयसहचारं निवेशयति लक्षणान्तरमाह॥ तादृशेति॥ यद्यपि पदार्थान्तरीयव्यापकताविषयकं प्रकृतव्यापकताज्ञानजनकग्रहविषयपदार्थान्तरीयसहचारवारणाय प्रकृतव्यापकत्वज्ञानप्रयोजकसहचारोऽवश्यं निवेशनीयः तत्र च प्रकृतव्याप
कत्वविषयकत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकविषयताकत्वम्॰ एवं व्याप्त्यभावादिनिष्ठहेतुसहचारादिसाधारणमोजकदोषावकाशः॰ तादृशसहचारनिविष्टवैशिष्ट्यावगाहित्वस्यैव तादृशसहचारज्ञानजन्यतावच्छेदकत्वात् प्रकृतव्यापकता
वगाहितायाः अनन्यथात्वात्॰ प्रकृतव्यापकत्वविशिष्ट्यसाध्यवैशिष्ट्यबोधादिनिष्ठप्रकृतव्यापकत्वविषयकत्वघटितधर्मावच्छिन्नकार्यतानिरूपितकारणतायां प्रकृतव्यापकत्वविषयकत्वावच्छिन्नायां तद्घटकाभावादिनिष्ठसहचारादिविषयतो
पाऽवच्छेदकत्वेऽपि जन्यतायां व्यापकताप्रत्यक्षत्वावच्छिन्नत्वं निवेश्य विशिष्टवैशिष्ट्यबोधत्वावच्छिन्ननिरूपितजनकतावच्छेदकविषयताको यः सहचारस्तद्वारणं सुकरमेव॰ तथापि कालान्तरीणव्याप्तिज्ञानजनकज्ञानीयव्यतिरेकसहचारविषय
ताया अपि इदानीन्तनीनानुमितिप्रयोजकव्यापकत्वविषयताशालिप्रत्यक्षत्वावच्छिन्ननिरूपितजनकतावच्छेदकत्वरूपं तत्प्रयोजकत्वं दुर्वारमेव॰ कालान्तरीणव्याप्तिज्ञानविषयतायाः इदानीन्तनव्याप्तिज्ञानविषयतातो भेदविरहात्॰ न च तद

३

नुमितिव्यक्त्युपधायकग्रहनेक्याया व्यापकत्वविषयताशालिप्रत्यक्षत्वावच्छिन्नकार्यतात त्प्रतियोगिककारणतावच्छेदकत्वविवक्षणान्नायं दोषः इदानींतनानुमित्युपधायकइदानींतनव्यापकत्वग्रहे ऽन्वयसहचारमात्रग्रहाधीने कालान्तरीणव्यतिरेकसहचारग्रहकार्यतायाः अस
त्वादिति वाच्यम्: अन्वयव्यतिरेकसहचारज्ञानयोः प्रत्येकं तत्तत्सहचारज्ञानाव्यवहितोत्तरत्वं कार्यतावच्छेदककोटौ निवेश्य हेतुताकल्पनस्य व्यतिरेकसहचारग्रहकार्यतायाः अन्वयसहचारमात्रग्रहाधीनव्याप्तिग्रहेऽप्रसक्तेरुपपत्तेः अव्यवहितोत्तरत्वानिवेशे च व्यभिचारावारक
व्यापकत्वविषयत्वादीनां कार्यतावच्छेदककोटौ निवेशस्याप्रामाणिकत्वात् व्यापकत्वविषयकप्रत्यक्षत्वावच्छिन्नकार्यतानिरूपितकारणताघटितलक्षणे, सम्भवात् कार्यतावच्छेदके ऽव्यवहितोत्तरत्वानिवेशे च व्यभिचारवारणायान्वयव्यतिरेकसहचारविषयताद्वयान्यतरत्वे
नसहचारज्ञानस्य व्यापकताग्राहकत्वे व्यतिरेकसहचारविषयताया अन्वयसहचारमात्रग्रहाधीनव्याप्तिग्रहनिष्ठकार्यताप्रतियोगिककारणतावच्छेदकतापादकत्वात् अतः स्वोपधान प्रयोजकस्य व्यापकत्वविषयतासम्बन्धस्य प्रयोजकं यादृश
सहचारविषयत्वं तादृशविषयतात्वं व्यापकान्वयसहचारविषयताकत्वस्यानुमितिनि[illegible]रूपणम्: एवञ्च कालान्तरीणतानतिरेके व्यतिरेकसहचारविषयताप्रयोज्यव्यापकत्वविषयत्वसम्बन्धेनेदानीन्तनानुमित्युपधानं प्रयोजकतेति सकलकेवलान्वयि
नुमाने उक्तलक्षणनिर्वाहः सच न सम्भवति व्यापकत्वविषयतान्तर्गतसाधनसहचारविशिष्टाभाववैशिष्ट्यविषयतासम्बन्धप्रयोजकाभावनिष्ठसहचारादिविषयतायाः अपि व्यापकत्वविषयतासम्बन्धप्रयोजकत्वादित्याशयेनान्वयसहचारत्वघटितलक्षणेऽनिर्भरः॥
तादृशसहचारः॥ प्रकृतव्याप्तिग्राहकज्ञानविषयसहचारः॥ यद्रूपावच्छिन्नप्रतियोग्यनुयोगिविषयतानिरूपिता सहचारविषयता प्रकृतव्याप्तिविशिष्टहेतुतावच्छेदकावच्छिन्नविषयतान्तःपातिनी तद्रूपावच्छिन्नप्रतियोग्यनुयोगिविषयतानिरूपितविष
यतात्वस्य प्रकृतव्याप्तिग्राहकसहचारत्वावच्छिन्नविषयतात्वव्यापकत्वं विवक्षणीयम्। अतो न पूर्वलक्षणोक्तदोषः केवलान्वयिन्यपि व्याप्तिग्राहकसहचारादिज्ञानीयसाध्याभावादिविषयतायां निरूढविषयत्वासत्त्वादसम्भव इति व्याप्त्यादिविशिष्टसहचारत्वांशे निवेशः:
यद्रूपावच्छिन्नसहचारविषयता व्याप्तिविषयतान्तःपातिनी तद्रूपावच्छिन्नविषयतात्वस्य व्यापकत्वोक्तौ व्याप्तिघटकतावच्छेदकसहचारत्वस्य व्यतिरेकसहचारज्ञानीयसहचारविषयतावच्छेदकत्वादतिप्रसङ्गः प्रतिव्यापकादिविशिष्टप्रतियोग्यनुयोगिनोर्विषयताविशेषणनिवेशः:
प्रतियोग्यनुयोगिनोर्वैशिष्ट्यमात्रनिवेशे जन्यज्ञानविषयत्वमानुजन्यज्ञानीयविषयसाध्याभावादित्यायुक्तव्यतिरेकिणि व्यतिरेकसहचारविषयतायाः साध्यतावच्छेदकेतरद्रूपावच्छिन्नविषयतानिरूपितत्वेनातिप्रसङ्गः स्यादिति उभयरूपावच्छिन्नविषयतानिवेशः।
हेतुतावच्छेदकावच्छिन्नविषयतानिरूपितसहचारविषयतात्वेन सामानाधिकरण्यान्न व्याप्तिविषयतान्तःपातिताविरहेऽपि न क्षतिः हेतुतावच्छेदकविशिष्टविशेषणतापन्नतादृशप्रकृतव्याप्तिविषयतान्तःपातितायाः एव तन्निवेशप्रयोजनत्वात् व्यापकादिविशिष्टसहचारनिवेशो न कार्यः:
प्रवेशे अनतिरहस्तु प्रतियोग्यादिनिष्ठविषयताविशेषानिरूपितविषयतात्वपर्यन्तनिवेशलाभायैव च तादृशसहचारपदम्॥ अथात्र लक्षणे धूमाभाववान् वन्ह्यभावादित्यत्र धूमप्रमाविषयत्वाभाववान् वन्हिप्रमाविषयत्वाभावादित्यत्र वा साध्याभाववत्त्वहेत्वभाववत्ताभ[illegible]
सहचारदर्शनगृहीतव्याप्तिकेऽतिव्याप्तिर्दुर्वारैव अन्वयव्याप्त्यामपि अभावत्वावच्छिन्नसहचारत्वेन सहचारस्य प्रवेशेनोक्तसहचरसाधारणीयविषयताया अपि तद्रूपावच्छिन्नत्वात् व्याप्तिघटकतानवच्छेदकरूपान[illegible]न्नप्रतियोग्यादिविषयतानिवेशे च महानसीय
वन्हित्वादिसहचारदर्शनगृहीतधूमवन्हित्वावच्छिन्नव्याप्तिके केवलान्वयिन्यव्याप्तिः सहचारप्रतियोगिन्यधिकमहानसीयत्वादिभानेऽप्युक्तसहचारदर्शनस्याधिकविषयत्वादिनाऽपि नोक्तव्याप्तिग्राहकतायां नाविवादात्। न च प्रकृतव्याप्तिग्राहकताप्रयोजकं यथा
व्याप्तिघटकतानवच्छेदकरूपावच्छिन्नत्वं तद्रूपविषयतानिरूपितविषयतासम्बन्धव्यापकत्वं विवक्षणीयं महानसीयवन्हित्वादिनावन्हादेः सहचारग्रहेऽप्युक्तवन्हित्वाद्यवच्छिन्नव्याप्तिग्रहस्थले प्रकृतव्याप्तिघटकतानवच्छेदकमहानसीय[illegible]त्वाद्यवच्छिन्न

लस्य व्याप्तिज्ञानप्रयोजकसहचारप्रतियोगिविषयतानिष्ठस्य व्याप्तिग्राहकतायामनुपयोगात् विशिष्टव्यतिरेकस्य तादृशविषयताया असत्तया ऽव्याप्त्यनवकाशात्· दर्शिताभावसाध्यकव्यतिरेकिणि च व्याप्तिज्ञानप्रयोजकसहचारविषयतानिष्ठस्याभावरूपसाध्यात्मकप्रति
योग्य[illegible]वच्छिन्नत्वस्य व्याप्तिग्राहकतायामपेक्षणीयतया तद्विषयतानां न विशिष्टव्यतिरेक इत्यव्याप्त्यनवकाशादिति वाच्यम्· यद्रूपावच्छिन्नसाध्यसाधनयोः केवलान्वयिनो व्यतिरेकसहचारभ्रमः कदाचित्कस्यापि न प्रसिद्धः तद्रूपावच्छिन्नसाध्यसाधनव्याप्तिग्राहकताप्र
योजकत्वव्याप्तिघटकतानवच्छेदकावच्छिन्नत्वाप्रसिद्ध्या तद्रूपावच्छिन्नसाध्यसाधनयोः केवलान्वयिन्यव्याप्तिरिति चेन्न· व्याप्तिघटकतानवच्छेदकरूपनिरूपितत्वव्याप्तिविषयताप्रयोजकत्वे भयाभाववत्त्वनिष्ठावच्छेदकतासा[illegible]कप्रतियोग्यनुयोगिविषयताया
व्यापकादिविशेषानिवेशने सामञ्जस्यात्· प्रकृतव्याप्तिग्रहसामान्यनिष्ठप्रतिबन्धकतावच्छेदकविषयतात्वव्यापकत्वं वा विवक्षणीयम्· तादृशप्रतिबन्धकता प्रतियोग्यनुयोग्युपरागेण सहचारविषयकज्ञानत्वस्तितेनापि निवेशनीया· तेन धूमाभाववान्वयस्य भावा
दित्यादौ यत्र धूमाभावाभावत्वत्र वह्न्यभावाभाव इत्यादि सानीयसहचारविषयताया अपि · · · भावाधिकरणीयमित्यादि तादृशकिञ्चित व्याप्तिज्ञानसामान्यनिष्ठप्रतिबन्धकतावच्छेदकत्वेपि नातिव्याप्तिः अभावाधिकरणत्वमिति भाव इति ज्ञानस्य साहच
र्यतया तत्प्रतिबन्धकतावच्छेदकत्वं व्यतिरेकसहचारविषयताया असम्भावितमेव·।· ननु व्यतिरेकिणि व्यतिरेकसहचारादेवान्वयव्याप्तिर्गृह्यते तदेव च व्यतिरेकित्वप्रयोजकमिति मतं न युक्तम्· व्यतिरेकसहचारस्य स्वातन्त्र्येणान्वयव्याप्तिग्राहकत्वे माना
भावात् अधिकरणविशेषे व्यभिचारशङ्कानिवर्तनद्वारैव क्वचिदुपयोगात्· अन्वयसहचारस्य ग्रहं विना तद्घटिताया अन्वयव्याप्तेर्दुर्ग्रहतया केवलव्यतिरेकित्वानुपपत्तेः· न च विशिष्टसहचारानुपस्थितावपि तद्घटकपदार्थानां विशृङ्खलानामुपस्थित्याऽन्वयव्या
प्तिधी विशेष्ये विशेषणमिति न्यायेन सम्भवत्येवेति वाच्यम्· एवं सति व्यतिरेकसहचारान्वयसहचारयोरुभयोरप्युपग्रहे उक्तरीत्या व्याप्तिग्रहसम्भवेन तत्रानुमानस्य तृतीयतापत्तेः· अस्तु वाऽन्वयसहचारस्य स्वातन्त्र्येणैव व्यापकताग्राहकत्वं तथापि प्रत्यक्षस्य
तद्धेतुतया शब्दादिना व्याप्तिग्रहे तदपेक्षाविरहात्· शब्दाद्यधीनप्रत्यक्षपदार्थोपस्थितिमूलकग्रहविषयव्याप्तिकानुमानस्य तृतीयतापत्तिर्दुर्वारैवेति व्यतिरेकिणि व्यतिरेकव्याप्तेरेव गमकता· व्याप्तेरन्वयानिरूप्यत्वमेवान्वयित्वादौ प्रयोजकमिति (मणिकार)
यतामेव साधनीयः· तन्मतमेवावलम्बमानः केवलान्वयित्वादिकं निर्वक्ति·।· ग्रहितेति·।· ग्रहितव्याप्तिभेदात्·।· तत्पुरुषीयानुमितौ पक्षीयव्याप्तेरन्वयादिनिरूप्यत्वरूपवैलक्षण्यात्·।· प्रकृतहेतुकेति·।· प्रकृतसाध्यतावच्छेदकावच्छिन्नविधेयस
घटित तद्धर्मावच्छिन्नस्वनिष्ठकार्यतानिरूपितकारणतायां यादृशरूपावच्छिन्नप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारताशालिनिश्चयत्वमवच्छेदकं तादृशरूपनिष्ठविषयतात्वव्यापकप्रकृतसाध्यव्याप्तित्वावच्छिन्नविषयताकानुमितिकरणत्वं तद्
पावच्छिन्नसाध्यकतद्रूपावच्छिन्नहेतुकः केवलान्वय्यनुमानत्वमित्यर्थः· यत्र व्यतिरेकिणि महानसीयवह्नित्वादिना विशिष्टस्य हेतुता तत्र साध्याभावव्यापकाभावप्रतियोगितावच्छेदकहेतुतावच्छेदकरूपव्याप्तेः धूमव्यापकवह्निमन्महानसाधिकरण[illegible]
पप्रकृतसाध्यव्याप्तित्वसत्त्वात् अतिव्याप्तिरतो विषयतापर्यन्तनिवेशः· हेतुतावच्छेदकावच्छिन्नस्य साध्याभावव्यापकाभावप्रतियोगित्वस्य हेतुतावच्छेदकावच्छिन्नविशेषणतापन्नस्य वा तस्य व्याप्तित्वमते एतद्व्याख्यानवकाशोऽपि अखण्डव्याप्तिप्र
सिद्धिस्थले केवलान्वय्यनुमानसङ्ग्रहाय विषयतानिवेशनं बोध्यम्· तदनुमानस्य प्रमात्मकव्याप्तिविशिष्टलिङ्गज्ञानरूपहेतौ लक्षणत्वे यथाश्रुतव्याप्तेरेव निवेश्यत्वात्·।· द्रव्यविशेषत्वादिनावच्छिन्ने व्यतिरेकव्याप्तेर्वह्नित्वादिना तस्यान्वयव्याप्तेर्ग्रहे उभयरूपेण यत्र
तदनुमितिस्तत्र केवलान्वयिनि वह्नित्वावच्छिन्नसाध्यकानुमाने यत्र च धूमत्वावच्छिन्नेऽन्वयव्याप्तेर्द्रव्यविशेषत्वावच्छिन्ने व्यतिरेकव्याप्तेर्ग्रहादनुमितिस्तत्र केवलान्वयिनि धूमत्वावच्छिन्नहेतुकानुमाने॰ व्याप्तेर्वारणाय प्रकृतसाध्यतावच्छेदकप्रकृतहेतुतावच्छे

३ निरूपितविषयता

लं ३

केवला. टी. गदा.

४

१८

त्रिवेशयते ५

दकयोर्निवेशः ।। ननु पृथिवीत्वव्यापकीभूताभावप्रतियोगित्वरूपहेतुतावच्छेदकधर्मेण गृहीतान्वयव्याप्तिके तद्रूपावच्छिन्नहेतुककेवलान्वय्यनुमानेऽव्याप्तिः हेतुतावच्छेदकव्यतिरेकव्याप्त्यावन्वयव्याप्तित्वविरहात् तादृशहेतुतावच्छेदकावच्छिन्नवत्तानिश्चयस्यापि तदानीन्तनानुमितिजन
कत्वात् तादृशहेतुतावच्छेदके निरुक्तप्रकृतसाध्यकानुमित्यौपयिकव्याप्तिसत्त्वाक्षतत्वाच्चेत्यत आह ।। अन्वयमिति ।। तद्विशिष्टपक्षधर्मताज्ञानेपि पक्षे तद्विशिष्टवत्तानिश्चयेपि ।। व्याप्त्यन्तरबोधं विना ।। तद्रूपावच्छिन्नविशेषणतया निर्गन्धत्वव्याप्तिज्ञानं विना ।। निर्गन्धत्वानुमित्यनुदयादिति ।। प्र
यमाणः निरुक्तनिश्चयत्वस्यावच्छेदकत्वं न स्वरूपसम्बन्धविशेषः व्याप्तित्वेन पदार्थान्तरावगाहिनिश्चयस्याप्यनुमितिजनकतया तदसंग्राहकस्य व्याप्तिविशिष्टवत्तानिश्चयत्वस्य तादृशावच्छेदकत्वासम्भवात् किन्त्वनतिरिक्तहानित्वरूपः एवञ्च निर्गन्धत्वव्याप्त्यनवगाहिज्ञान
साधारणस्य दर्शितहेतुतावच्छेदकविशिष्टवत्तानिश्चयत्वस्य निर्गन्धत्वानुमितिजनकतातिरिक्तवृत्तित्वात्तत्र न निरुक्तव्याप्तित्वमिति ।। यद्यपि धूमत्वाद्यवच्छिन्नवत्तानिश्चयत्वस्य स्वरूपसम्बन्धरूपावच्छेदकता अथ त्वमादाय धूमत्वाद्यवच्छिन्नहेतुकान्वयिन्यपि तल्लक्षणानुपपत्तेर्व्यति
रेकव्याप्त्यवच्छिन्नहेतुकानुमितिपर्यन्तानुसरणमनुचितं तथापि क्लिष्टकल्पकता घटितत्वरूपमन्वयव्यतिरेकव्याप्त्यन्यतरत्वं वा व्याप्तित्वं यद्विज्ञानकज्ञानविषये तदा धूमत्वादेस्तद्विरहेण तदवच्छिन्नहेतुकेनानुपपत्तिरिति व्यतिरेकव्याप्त्यवच्छिन्नहेतुकस्थले दर्शितरीत्या अनुपपत्त्युद्धारः
तदनुपपत्तावाहः प्रकृतसाध्यीयव्यतिरेकव्याप्त्यवच्छिन्नहेतुकस्थले केवलान्वयिन्यव्याप्तिवारणाय वक्ष्यमाणरीत्यापेक्षतद्धेतोरुद्धारो बोध्यः ।। ननु कृत्स्नस्या साध्यान्तेरीयव्यतिरेकव्याप्तिहेतुतावच्छेदककेवलान्वयिन्यव्याप्तिपरिहारेपि वन्ह्यभाववान्वन्हिव्यापकीभूताभा
वप्रतियोगिनऽत्वादौ केवलान्वयिन्यव्याप्तिर्दुर्वारैव तत्र हेतुतावच्छेदकरूपाया व्यतिरेकव्याप्तेरपि प्रकृतसाध्यानुमित्यौपयिकत्वात् तद्विशिष्टवत्ताज्ञानसत्त्वे व्याप्त्यन्तरबोधं विनापि प्रकृतसाध्यानुमित्युत्पत्तेरित्यत आह ।। वन्ह्यभाववानिति ।। नतु सैव ।। व्य
तिरेकव्याप्तिरेव प्रकृतसाध्यानुमित्यौपयिकीत्यनुबध्यते प्रकृतहेतुतावच्छेदकविशिष्टविशेषणतापन्नयद्धर्मविशिष्टज्ञानत्वं प्रकृतानुमितिजनकतावच्छेदकं तत्सत्त्वमनुमित्यौपयिकत्वं प्रकृते विवक्षणीयमिति भावः ।। अथ दर्शितव्यतिरेकव्याप्तिरूप
हेतुतावच्छेदकविशिष्टविशेषणतापन्नमेयत्वादिविशिष्टवत्तानिश्चयत्वस्यापि प्रकृतानुमितिजनकतानतिरिक्तवृत्तितया प्रकृतसाध्यव्याप्तित्वाभावादव्याप्तिर्दुर्वारैव अनुमितिप्रयोजकविषयताश्रयत्वेन धर्मविशेषणे च व्यतिरेकव्याप्त्यवच्छिन्ना
न्वयव्याप्तेरनुमित्यौपयिकत्वं दुर्घटम् तदनवगाहित्वेनापि व्यतिरेकव्याप्तिविशिष्टव्याप्यवत्ताज्ञानादनुमित्युत्पत्त्या तादृशविषयताया अनुमित्यप्रयोजकत्वात् अन्वयव्यतिरेकव्याप्त्यन्यतरत्वेन धर्मविशेषणे यत्र व्यतिरेकव्याप्तिरप्रसिद्धा तत्साध्यकाऽ
नुमानेऽव्याप्तिरिति चेन्न निरुक्तव्याप्तिविषयतात्वव्यापकव्यतिरेकव्याप्तिविषयताभावकत्वस्य विवक्षणीयत्वात् व्यतिरेकव्याप्तेर्गोचरत्वादिसाध्यकेऽप्रसिद्धावपि न क्षतिः प्रसिद्धानां तद्घटकपदार्थानां विषयताकूटस्य विवक्षणीयत्वात् ।। यत्तु
यद्रूपावच्छिन्नप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारकनिश्चयत्वम् अनुमितिकारणतानतिरिक्तवृत्ति तत्त्वमेवानुमित्यौपयिकव्याप्तित्वं मेयत्वादिकं न तथा मेयत्वाद्यवच्छिन्नवन्हिव्यापकाभावप्रतियोगित्वावच्छिन्नप्रकारकस्यापि व्याप्त्यन्तरानवगा
हितोऽनुमित्यजनकत्वात् यदवच्छिन्नाभावत्वेन व्यापकता व्यतिरेकव्याप्तिशरीरे प्रविष्टा प्रकारांशे तादृशहेतुतावच्छेदकप्रकारकस्यानुमित्यजनकत्वात् तादृशनिश्चयत्वस्यजनकत्वातिरिक्तवृत्तित्वविरहात् न हि व्यापकीभूताभावप्रतियोगित्वसाहित्यस्य
जलत्वत्वादेर्हेतुतावच्छेदकता यत्र तत्रान्वयव्याप्तेस्तदवच्छिन्नाभावे भानस्यानुपेक्षितावनुपयोगात्केवलान्वयितायाश्चानुपगमादपि तु जलत्वत्वाद्यवच्छिन्नलिङ्गकव्यतिरेकितायाश्चोपगमात् प्रकृतहेतुतावच्छेदकासाहित्यव्यापकाभावप्रतियोगित्वप्रकारक
निश्चयस्यानुमित्यजनकत्वमित्याशयेनैव वन्हिव्यापकाभावप्रतियोगित्वरूपहेतुतावच्छेदकस्याप्यनुमित्यौपयिकव्याप्तिनिराकरणम् नच धूमव्यापकवन्हिसमानाधिकरणरासभवानित्याहार्यज्ञानादनुमितिवारणाय हेतुतावच्छेदकसाहित्यस्यैव व्या

पक्षसामानाधिकरण्यस्य हेत्वंशे भानमनुमितावुपयुज्यतां साध्याभावव्यापकाभावप्रतियोगित्वस्य च केवलस्यैव भानमुपयुज्यतामिति वाच्यम्· तथासति द्रव्यत्वाभावव्यापकविशिष्टसत्ताभावावच्छिन्नाभावप्रतियोगिसत्तादिज्ञानाद्गुणादौ बाधानवतारा
दशनकाद्रव्यत्वाद्यनुमानापत्तेः हेतुतावच्छेदकस्य च व्याप्तिधर्मितावच्छेदकतया भानं यदि नोपयुज्यते तदा नोपयुज्यताम्। इत्येन केवलव्यतिरेकव्याप्तिरनुमितौपयिकी ननु सैव अन्वयव्याप्तेरेव एवकारोऽप्यर्थे एवञ्च तत्र केवलान्वयित्वं नाभ्युपेयत एव अन्वयव्याप्तिज्ञानस्याकिञ्चित्करत्वादित्य
लक्षणतयानाव्याप्तिरिति भावः इति व्याख्याने व्याकारेव· एवमेतन्मते कुत्रानुमानस्य वह्निव्यापकाभावप्रतियोगित्वावच्छिन्नहेतुकेकेवलान्वय्यनुमानत्ववत्तदवच्छिन्नहेतुकव्यतिरेक्यनुमानत्वमपि न सम्भवतीति तद्रूपावच्छिन्नव्यतिरेकव्याप्तेरग्रहेण तस्य हेतुतानवच्छेदकत्वात् अन्य
तादृशानुमानस्य व्यापकाभावप्रतियोगित्वावच्छिन्नलिङ्गकव्यतिरेकित्वासम्भवेऽपि तद्रूपघटिततद्रूपावच्छिन्नाभावत्वावच्छिन्नव्यापकत्वं निविष्टं तद्रूपावच्छिन्नहेतुकव्यतिरेकित्वमव्याहतमिति तदेवोपगन्तव्यमिति वाच्यम्· तथासति ग्रन्थकृतो वह्निव्यापकाभा
वप्रतियोगित्वादितिहेतुनिर्देशासङ्गतेरिति चिन्तनीयम्· साध्यव्यधिकरणजलं निर्गन्धमित्यादिके प्रकृतसाध्यके तादृशव्याप्तिप्रदर्शनपरं वन्हमभाववानित्यादिकं तु प्रकृतहेतुके तादृशव्याप्तिप्रदर्शनपरमिति दर्शयन्ति· तदसत्· जलं निर्गन्धमित्यादौ हेतुताव
च्छेदकीभूतपृथिवीत्वाभावानामेतौ पार्थिकव्याप्तेर्वन्हमभावसाध्यकहेतुतावच्छेदकीभूतवह्निव्यापकीभूताभावप्रतियोगित्वरूपव्याप्तेरिव प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुकव्याप्तित्वाभावादेव वारणे तत्र प्रकृतसाध्यकत्वनिवेशवैयर्थ्यापत्तेः· नच यद
वच्छिन्नाभावत्वेन हेत्वभावनिष्ठा साध्याभावव्यापकता तादृशाव्यतिरेकव्याप्तेर्विवक्षा सत्तद्धर्मावच्छिन्नहेतुकाव्याप्तिः· एवञ्च जलत्वावच्छिन्नाभावव्यापकताघटितव्याप्तेः पृथिवीत्वव्यापकाभावप्रतियोगित्वावच्छिन्नहेतुकत्वविरहेऽपि पृथिवीत्व
व्यापकाभावप्रतियोगित्वावच्छिन्नाभावत्वावच्छिन्नव्यापकताघटितव्याप्तेः तादृशाभावप्रतियोगित्वावच्छिन्नहेतुकतया तादृश्याः पृथिवीत्वव्यापकताघटितव्याप्तेर्विवक्षणान्न प्रकृतहेतुकत्वेन तद्व्यावृत्तिरिति वाच्यम्· एवं सति पृथि
त७ वीत्वव्यापकतावच्छेदकपृथिवीत्वव्यापकाभावप्रतियोगित्वावच्छिन्नाभावत्वप्रतियोगिसमेव प्रकृतहेतुतावच्छेदकेऽभावप्रतियोगितावच्छेदकतया तदनभ्युपगमे पृथिवीत्वव्यापकाभावप्रतियोगित्वञ्चानैतन्न एव रूपं स्वघटीरे स्वान्तर्भावासम्भवात्
तिपृथिवीत्वव्यापकतावच्छेदकजलत्वाद्यवच्छिन्नाभावत्वप्रतियोगित्वरूपमेव तद्वाच्यं तच्च निरुक्तप्रकृतहेतुतावच्छेदकादन्यदेवेति तदवच्छिन्नाभावत्वावच्छिन्नव्यापकताघटितं प्रकृतहेतुतावच्छेदकं न प्रकृतहेतुतावच्छेदकावच्छिन्नाभावत्वा
वच्छिन्नव्यापकताघटितमिति कथं हेतुतावच्छेदकीभूतव्याप्तेः प्रकृतहेतुतावच्छेदकावच्छिन्नव्याप्तित्वं· तथा च प्रकृतहेतुतावच्छेदकगर्भे तदवच्छिन्नाभावत्वावच्छिन्नव्यापकतायास्तद्रूपघटितत्वेन कथञ्चिदपि निवेशासम्भवात् प्रकृतहेतुतावच्छे
दकरूपव्याप्तेः प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुकत्वं दुर्घटमेव।· अन्यथा तु वन्हमभाववान्वह्निव्यापकीभूताभावप्रतियोगित्वादित्यादिना प्रकृतहेतुकव्याप्तिप्रदर्शनपरत्वं किं केवलप्रायमिकी तदुपरि जलं निर्गन्धं पृथिवीत्वव्यापकीभूताभावप्रति
योगित्वादित्यादिकं प्रकृतहेतुकेत्यस्य व्यावृत्तिस्थलं किमर्थमुपेक्षितमित्याकाङ्क्षायां चरमोत्पन्नं जलं निर्गन्धमित्यादौ हेतुतावच्छेदकव्याप्तेः प्रकृतसाध्यानुमित्यौपयिकत्वाभावादेव वारणे प्रकृतहेतुकेत्यस्य न तद्वारणप्रयोजकत्वमिति तदर्थमित्याह·।
तदविनाभावक· वह्निमान्धूमादित्यादौ केवलान्वय्यनुमानस्यैव तद्धूमेऽपि सत्त्वादिना धूमादेर्व्यतिरेकितादशायां सङ्ग्रहाय प्रकृतहेतुकेत्यस्यावश्योपादेयतया तद्वाक्यकृत्स्थलान्तरानुसरणानौचित्यात्·।। गृहीतव्याप्तिभेदाद्दुर्देशाच्चां सम्वादमाह·। आनाएवेति·।
यत्किञ्चिज्ज्ञानं। यद्रूपावच्छिन्नलिङ्गविषयता।।· प्रकृतसाध्यकानुमितिहेतुः।· प्रकृतसाध्यकानुमितिजनकतावच्छेदिका· तथा च इतरव्यापकाभावप्रतियोगित्वप्रकारतानिरूपितयद्रूपावच्छिन्नलिङ्गविषयतासामान्याभावप्रतियोगित्वप्रकारतानि

के.का.गा.टी.

५

ह्रूपितत्वरूपावच्छिन्नलिङ्गविषयतासामान्यं वा तत्कालीनतत्पुरुषीयप्रकृतसाध्यानुमितिजनकतावच्छेदकताशून्यं तद्रूपावच्छिन्नं तत्कालीनतत्पुरुषीयप्रकृतसाधककेवलान्वय्यनुमानमित्यर्थः। यद्यपि यत्र साध्याभावातिरिक्त किञ्चिद्व्यापकाभावप्रतियोगित्वस्यान्वयव्या
छेभ्य विशेष्यविषयतालिङ्गतावच्छेदकावच्छिन्नस्यैकाधिकरणे समूहालम्बनवैलक्षण्येन भानं तत्र केवलान्वयिन्यव्याप्तिः तत्र तादृशाभावप्रतियोगित्वप्रकारतानिरूपितविशेष्यतायाः एवमन्वयव्याप्तिप्रकारतानिरूपिततथाप्रकृतानुमित्यौपयिकत्वात् केवलान्वयिसाध्यके साध्याभावा
प्रतियोग्यप्रकृतसाध्याभावव्यापकीभूताभावप्रतियोगित्वप्रकारतापर्यन्तनिवेशासम्भवात्। तथापि तादृशप्रतियोगित्वप्रकारतानिरूपितलिङ्गविषयताश्रयत्वे लिङ्गविषयतानिरूपिततादृशप्रतियोगित्वप्रकारता[illegible]या विवक्षणान्न दोषः एवमभावप्रतियोगित्वप्रकारता
मात्रनिवेशेनाऽप्युपपत्तेरभावविशेषणव्यापकत्वनिवेशनमनर्थकमित्याशयेनाभावप्रतियोगित्वेनवेत्युक्तं व्यतिरेकव्याप्तेरिव साध्यसामानाधिकरण्यरूपाया अन्वयव्याप्तेरपि साध्यसम्बन्धिनिष्ठसम्बन्धप्रतियोगित्वरूपतया आसम्भव इत्यतोऽभावोभा
दानं केवलान्वयिमेयत्वादिहेतुकस्थले चाभावप्रतियोगित्वेन लिङ्गतावच्छेदकावच्छिन्नविषयता भ्रम एव प्रसिद्ध इति नाव्याप्तिः सर्वत्र भ्रमस्याप्रामाणिकतया स्वरूपमन्यथा केवलान्वयित्वनिरूक्तमिति बोध्यम्। एवं केवलव्यतिरेकित्वादिकमिति। यथाश्रुतं अन्वयसहचारा[illegible]न्वयव्याप्तिस्थानेऽव
तिरेकसहचारव्यतिरेकव्याप्तिनिवेशे केवलव्यतिरेकिहेतुं उभयसहचारमुभयव्याप्तिं निवेश्य चाऽन्वयव्यतिरेकिहेतुं निर्वाच्यमित्यर्थः। केवलान्वयिनोऽभिधेयत्वस्य न विपक्ष इत्यभिधेयत्वसाधककेवलान्वय्यनुमानलक्षणसङ्गमनपरे मूलग्रन्थेऽभिधेयत्वं शब्दवाच्यत्वरूपं
यदि विवक्षितं तदा यथाकाशपदाच्छब्दाश्रयत्वमनभिधेयमप्युपतिष्ठते इत्यग्रिमग्रन्थविरोधः प्राचीनमते शब्दाश्रयत्वस्याकाशस्य दाशरथेरिव शब्दबोध्यत्वरूपाभिधेयत्वेऽविवादात् अन्यथा शब्दादुपतिष्ठते इत्यस्यैव व्याघाता[illegible]दित्यतोऽभिधेयत्वं व्याचष्टे। अभिधेयत्वाभावेति
अनभिधानेऽभिधेयत्वशून्यत्वात्मकेऽभिधेयत्वशून्यत्वरूपाभिधेयत्वविपक्षताविरहप्रसञ्जकत्वरूपं तद्व्याघातकत्वरूपं न सम्भवतीति व्याघातपदमन्यथा व्याचष्टे। विपक्षत्वेति। विपक्षत्वाभावेनेति। विपक्षपदेन विपक्षतयाऽभिमततयाऽनभिधाने तत्र शब्दप्रमाणाप्रवृत्तेः
तद्ग्रहणेनैव न्यायवहाद्यर्थानुमानस्यानवकाशतः [illegible] परं प्रति तस्य विपक्षाप्रसिद्धेरसम्भव इति भावः। मूले, नाभिधेयमिति। तद्वदानभिधेयमित्यर्थः। उपतिष्ठत इति। ^ प्रकारांशे सम्बन्धग्रहस्यानपेक्षिततया शब्दाश्रयत्वस्याशक्यत्वेऽपि तत्प्रकारेण धर्मिणि शक्तिग्रहादेव तत्प्रकारेणोप
भिन्नत्वेन तद्धर्माश्रयद्रव्यत्वादिव्याप्तत्वानातिप्रसक्तत्वरूपशक्यतावच्छेदकत्वग्रहादेव तत्प्रकारकशब्दबोधस्य च सम्भवादिति भावः। एतच्चोपलक्षणम्। लक्षणयाऽनभिधेयस्योपस्थितेरपि दृष्टान्तसम्भवात् शब्दादनभिधेयस्य विपक्षस्योपस्थितावपि तत्र विपक्षत्वे

ट सम्बन्धिस्यते

मानाभावः शब्दस्य परं प्रत्याप्तोक्तत्वासिद्धेः अनुमानस्य साध्याप्रसिद्ध्या न सम्भवतीत्याशङ्क्याभिधेयत्वविपक्षत्वसिद्धिर्यं यस्मादिति साध्याप्रसिद्ध्या नाकाङ्क्षितमभिधेयत्वपक्षकानुमानमाह। एवञ्चेति। अनभिधेयत्वेऽपि शब्दादुपस्थितिसम्भवेत्यर्थः। एतेन विपक्षस्य ज्ञानानु
नानेऽपि सामान्यतः साध्यघटकतया शब्दात्तदनुपस्थितौ लाघवादिप्रतिपादनासम्भवात् परार्थानुमानासम्भवो निराकृतः। प्रकृतानुमानेनैव विपक्षत्वधर्मिपर्यवसितसिद्धेः [illegible] धर्मिणमन्तर्भावयति। कुत इति। इत्यनुमानात्। स्वपक्षसिद्धिरिति शेषः। अव्याप्तत्वेति। सार्वत्रिकत्वे। केवलान्वयिनः
व्याप्तत्वरूपसाध्यविरहे। एवमग्रेऽपि। व्याप्तत्वस्यात्यन्ताभावप्रतियोगित्वरूपत्वे एवमत्यन्ताभावप्रतियोगित्वस्येत्यादिना व्याप्यत्वस्येत्यादिपौनरुक्त्यमतो व्याप्तत्वमन्यथा व्याचक्षाण एव व्याप्तत्वस्येत्यादिना दर्शितं व्यभिचारमुद्धरति अत्यन्ताभावप्रतियोगित्वे व्य
भिचारपदार्थं न पामेवमित्यादिग्रन्थस्य तात्पर्यं दीधितौ। नन्विति। अन्योन्याभावप्रतियोगितानवच्छेदकत्वं केवलान्वयित्वमिति त्वाशयेन निरूक्तव्याप्तत्वप्रसाधनमित्याशयः। लघुरूपसमनियतगुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वे अन्योन्याभाव
प्रतियोगितानवच्छेदकत्वरूपव्याप्तत्वसाध्यकानुमाने कम्बुग्रीवादिमत्त्वादावेव धर्मत्वहेतौ व्यभिचार इत्युक्तत्वान्निरुक्तगुरोरप्यवच्छेदकत्वमङ्गीकरोति। लघ्विति। व्याप्तत्वं यतो व्याप्यं तस्य केवलान्वयित्वविवक्षणमुक्तव्यभिचारं निरस्यति। गग
नेति। इति न व्यभिचार इत्यत्र इतिना अत इत्यर्थकेन उक्तमुभयमेव परामृश्यते प्रथमे साध्यसत्त्वाद्गगनादौ च धर्मत्वहेतौ विरहाद्व्यभिचारनिरासो बोध्यः। मूले—केवलान्वयीति। अत्यन्ताभावाप्रतियोगीन अत्यन्ताभावप्रतियोगी तस्यान्योन्याभावप्रतियोगिताव

च्छेदकत्वरूपव्याप्तत्वाप्रसक्तेरितिभावः ।। नान्वेति ।। तथाचैकधर्मनिरुक्तव्याप्तत्वादिकं तद्रूपवद्धर्मान्तराघ्राततत्वं तस्य न केवलान्वयित्वसम्भव इत्यतो नव्यभिचार इति भावः। तयोरनुगतयोः अव्याप्यवृत्त्यभावादेः केवलान्वयित्वाकथनान्नानिराकरणं मूले ॥ गुरूणां यद्विपलक्ष्याप्रसिद्ध्यालक्षणासम्भ
वदर्शयितुं यस्य यस्य केवलान्वयित्वं सम्भावितं तस्यैव तथात्वं निराकर्तुमेव मुख्यमभावः अभावप्रतियोगित्वादेस्तथात्वस्य दर्शितत्वान्तदनिराकरणेन न्यूनत्वेत्यतोनन्वि प्रतियोगित्वादिकमपि त्यादिना ॥ न्योन्याभावप्रतियोगितावच्छेदकत्वपरिग्रहः। विशेषणतावच्छेदकमिति स चाधर्मोऽभावत्वा
दिकम्। एतन्नोक्तरीत्या अभावप्रतियोगित्वादिधर्मनिष्ठाभावप्रतियोगित्वं तस्य च न केवलान्वयित्वमितिभावः ।। एवन्त्वेति ।। अत्यन्ताभावप्रतियोगित्वादेः केवलान्वयित्वासम्भवेचेत्यर्थः ।। अभ्युपगमवादः ।। ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वाभ्युपगमेनोक्तेः तो
४ वादा दृशविरोधस्य स्वमतेनभ्युपगमात्। प्रकारान्तरेण द्रव्यान्यत्वगुणनाशात्यन्ताभावस्य केवलान्वयित्वं निराकरोति ।। वस्तुतस्त्विति ।। तुल्यत्वाच्चेत्यन्तेन नोक्ताभावः केवलान्वयीति पूरणीयम्। देशाः स्वप्रतियोगिसमवायिदेशास्तत्त्वाश्रयो वा ध्वंसः आश्रयसत्त्वदशायामु
त्पन्नस्य नाशस्य प्रतियोगिसमवायिनि वि आश्रयनाशाधीननाशस्य प्रतियोगिसमवायिनो ध्विकरणेप्रत्यक्षस्यानुभाविकत्वया तत्रवर्तमानतेतिभावः। तादृशप्रत्ययोगिवादसम्भवात्तन्मध्येचैकालिकविशेषणतायाएवसम्बन्धतयादैशिकलक्षणविशेषणतासम्बन्धेन तादृशा
नाशाभावस्य केवलान्वयित्वाक्षतेराह ।। अवसायाभावेति ।। यथाकाशाभावस्यावृत्तिप्रतियोगिकत्वेऽपिप्रतियोगित्वरूपाभावप्रतियोगित्वयानकेवलान्वयित्वं तथा तन्नाशस्यावृत्तित्वेऽपि तदभावस्य तदाकाशाभावप्रतियोगित्वान्न केवलान्वयित्वमित्यर्थः। प्रतियोगिनोऽ
भावाभावत्वनियममन्तरेणाकाशस्यप्रतियोगितयाऽभावाभावत्वव्यवस्थापनेनासम्भवतीत्यभावाभावस्येतिमूलसम्भवाविवाभावाभावस्यैवेत्यर्थकतयावर्णयति ।। अभावेति ।। वाच्यत्वादेः किञ्चिद्विशिष्टत्वाभावाभावत्वेऽपिभावत्वस्याभावाभावत्वव्याप्यत्वं निर्युक्तिकमतो
भावपदंप्रतियोगिपरत्वयाव्याचष्टे ।। भावत्वादिति ।। प्रतियोगित्वस्यचाभावाभावत्वनियतत्वं निष्प्रत्यूहमभावाभावत्वस्यैवप्रतियोगित्वरूपत्वात्। अत्रैवाचाव्यसम्वादमाह ।। यद्वाहेति ।। ननुध्वंसप्रागभावयोरत्यन्ताभावविरोधितामतेध्वंसप्रागभावदशायामपि
तदधिकरणेऽत्यन्ताभावविरहसत्त्वात्तस्य च प्रतियोगित्वसम्भवात्प्रागभावादेरपितद्रूपता तथाचात्यन्ताभावाभावः प्रतियोग्येवेतिमूलासङ्गतिरतआह ।। प्रागभावादेरिति ।। तदभावरूपतया ।। प्रागभावाद्यभावरूपतया ।। तत्त्वात्पि ।। प्रागभावादेरपि ।। प्रतियोगिता
ता ।। घटघटत्वसाधारणधर्मरूपादिविशेषकम्बुग्रीवादिमत्वादेर्घटादिभेदाभावत्वविरहात्। असाधारणो धर्म इति मूलस्य यथाश्रुतार्थासङ्गतेराह ।। प्रतियोगितावच्छेदक इति ।। प्रतियोगितावच्छेदकसम्बन्धावच्छिन्नोन्यान्यात्यन्ताभावसाधारणोऽभावाभाव इति योजना। अन्योन्यात्य
न्ताभावसाधारणम् अन्योन्यात्यन्ताभावयोः साधारणं रूपं ।। सम्बन्धविधयाअवच्छेदकः ।। काचित्तः ।। भेदप्रतियोगितायां ।। इत्यभावः ।। संसर्गाभावप्रतियोगितायां। प्रतियोगिसम्बन्धस्तवत्ताभानस्याभावत्वज्ञानाप्रतिबन्धकतया न प्रतियोगिसम्बन्धस्याभावाभावत्वं प्रति सम्ब
न्धते ।। यद्वा ल्हेनेति ।। तादृशरूपमन्तं प्रतीयतेव्यवहायते इत्युभयान्वयि। तथाच यदभावव्याप्यत्वादेर्नागृहीतधर्मवत्ताज्ञानं यत्प्रतीत्यनुत्पादेयदभावव्यवहारेवाप्रयोजकमित्यर्थः। यद्धिकरणेकदाचित्कस्यापि तदभावप्रमानजाततत्पदभावप्रतीतेःप्रतियो
गिमत्ताप्रतीत्यनुत्पादप्रयोजकत्वविरहात्तस्यैवतदभावात्मकत्वमितिनियमासम्भवःअतोऽभावव्यवहारस्यापि निवेशः।। व्यवहारश्च सर्वत्रैवसम्भवतीतिनव्यवहारविषयाभावेनियमभङ्ग इति वाच्यम् ।। नियतत्वात्त्वमिति ।। परस्पराप्रतीत्यनुत्पादप्रयोजकत्वं
परस्पराभावव्यवहारप्रयोजकत्वमित्यर्थः तथाचनप्रतियोग्यभावयोः परस्पराभावत्वानुपपत्तिरितिभावः ।। तत्सम्बन्धवत्त्वं ।। प्रतियोगिसम्बन्धवत्त्वं ।। तद्बुद्धयः ।। अभावप्रतीत्युत्पादादिप्रयोजकधीविषयः। ननु प्रतियोगिसम्बन्धप्रकारकबुद्धेसत्त्वे
विशिष्टाभावप्रत्ययानुत्पादस्यानुभाविकत्वेत्यत आह ।। क्वाचित्केति ।। विशेषदर्शनतया ।। व्यावर्तकधर्मदर्शनतया ।। न त्वत ।। व्यावर्तकधर्मदर्शनतामप्युपादेयत्व नतत्सम्भावविरोधित्वं किन्तु तत्सम्बन्धस्यैव विशेषः। तथाच तत्सम्बन्धएव तदभावाभावः विरो

के॰टी॰ ८८

छिन्नस्वाभावाभावत्वादिति भावः॰ प्रतियोगितावच्छेदकसम्बन्धस्य। घटसंयोगादेः। अभाववति कर्मादौ। सम्बन्धान्तरेण। कालिकादिना। तथात्वं। सम्बन्धसामान्येन विशेषितं। तुल्यमेव। प्रतियोगिसाधारणमेव. क्वचित्प्रतियोगिनः क्वचित्तदवच्छेदकस्याभावाभावत्वक
ल्पने कल्पनाभेद इति कल्पनेकानुरोधात्सम्बन्धस्याभावाभावत्वमित्युक्तं दूषयति। अनतिप्रसङ्गश्चेति। अनतिप्रसङ्गश्च घटसंयोगादेर्घटाद्यभावाभावत्ववारणाय। अनुगमकस्याभावेनापि। अनुगमकं कल्पनासम्भावनापि। स्वत्वानुगमो वा इति शेषः। स्वावच्छिन्नप्र
तियोगिताकत्वस्वात्मकाभावकत्वोभयसम्बन्धेनाभावस्य सम्बन्धत्वनियमे त्वाह। व्यधिकरणेति। तद्वति। गुणाद्यभावप्रतियोगितावच्छेदकसंयोगसम्बन्धवति। अभाववत्त्वप्रसङ्गः तदभावप्रसङ्गः। प्रतियोगिनिरूपिततादृशसम्बन्धेन वा भावाभावप्रति
यदुच्यते तत्राह। अभावत्वमिति। अभावानां प्रतियोगिरूपाभावप्रतियोगितया व्यधिकरणसम्बन्धावच्छिन्नाभावस्य केवलान्वयित्वं खण्डयतां। तदभावेति। अधिकरणसम्बन्धावच्छिन्नगगनाद्यभावाभावस्यार्थः। विलयप्रसङ्गादिति। प्रतियोगिनिरूपिततादृशसम्बन्धाप्रसिद्धेरिति भावः॥
आधेयत्वलक्षणम् तादृशगगनाद्यभावस्याभावप्रतियोगित्वं स्वमते विरुद्धमेवेति भवतामित्युक्तं॥ पूर्वपक्षिणा लक्षणाप्रसिद्ध्या लक्षणासम्भवस्योक्तत्वाल्लक्ष्यप्रदर्शनमेवोचितं न तु लक्षणाभिधानं लक्षणस्य प्रागेवोक्तत्वादत आह। लक्षणमिति। गगनाभावादिसाध्यकानुमानानां लक्ष्यतानि
र्वाहाय लक्षणे विशेषणान्तरं प्रक्षिपतीत्यर्थः। आकाशादेः स्वाभावाभावत्वस्य निर्युक्तिकतया आकाशाभावादिसङ्ग्रहाय अभावे वृत्तिमत्त्वविशेषणदानमयुक्तमित्यालोच्य तत्र मूलकृतोऽनिर्भरमाह। आकाशस्येति। घटादेरिवाकाशस्यापि स्वाभावाभावत्वसम्भवि
शेषात्स्यादित्याशङ्क्य तद्विशेषं दर्शयति। भाववतीति। भावो घटादिरूपप्रतियोगी। तदभावाभावस्य प्रतीत्या। तदभावा त्वप्रतीत्या। इत्यत्र च। असत्तिस्थले च। तथा न प्रतियोगिमत्यभावाभाववत्त्वप्रत्ययः सम्भवतीति शेषः। प्रतियोगिमतः स्वाप्रसिद्धेरि
ति भावः। अधिकरणविनिर्मोकेन नञ्पदोल्लेखी प्रत्ययो न सम्भवतीति। अभावादेर्व्यपदेशसम्भवेऽपि प्रकृतेऽसिद्धः। इति नाधिकरणानुपपत्त्या गगनाभावाभावप्रत्ययबलाद्गगनस्य तथात्वमिति शङ्कावकाशः। ननु गगनस्य स्वाभावाभावत्वानुपगमे
तस्य स्वाभावप्रतियोगित्वानुपपत्तेरित्याशङ्क्याह। अभावप्रतियोगित्वञ्चेति। स्वरूपसम्बन्धरूप। न स्वभावाभावत्वं। अन्यत्वात्। व्याप्त्यादौ। ननु प्रतियोगित्वमभावाभाववत्त्वानात्मकमपि तु व्याप्यतया तत्साध्यमेवेत्यत आह। अभावप्रतियोगित्वञ्चेति। आ
काशादेः स्वाभावाभावत्वविरहेऽपि प्राचां केवलान्वयिलक्षणे वृत्तिमत्पदोपादानं सम्बन्धविशेषनिवेशसूचकतया सङ्गमयति। स्वत्वञ्चेति। सम्बन्धविशेषनिवेशप्रयोजनमाह। अत एवेति। समवायेनेति। सम्बन्धेनाभावप्रतियोगित्वेऽपीत्यग्रिमे
णाऽन्वयः। विषयतया। ज्ञानस्य। पर्याप्तिसम्बन्धेन। स्वसमवायिविषयत्वरूपेण ज्ञानत्वस्य। स्वरूपसम्बन्धेन च ज्ञानविषयत्वादेः केवलान्वयित्वं तेषां केवलान्वयिताघटके सम्बन्धावच्छिन्नाभावप्रतियोगित्वादिति भावः। प्रतियोगिता
यां केवलान्वयिताघटक सम्बन्धावच्छिन्नत्वनिवेशनञ्च प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यसमानाधिकरणस्य निवेशाभिप्रायेण तन्न प्रकृतसम्बन्धानिवेशे न च प्रतियोगितायां च सम्बन्धावच्छिन्नत्वं निवेश्यम्। ननु प्रतियोग्य
समानाधिकरणं यदि स्वप्रतियोगिसमानाधिकरणं यत्तदन्यत्वं तदा संयोगादेरपि केवलान्वयितापत्तिः संयोगाभावस्य द्रव्ये प्रतियोगिसमानाधिकरणतया तदन्यत्वाभावात्। नापि तत्तदभावनिष्ठं यत्तत्तदभावप्रतियोगिसमानाधिकरणत्वं तद
त्यन्ताभाववत्त्वं तत्समानाधिकरण्यस्याव्याप्यवृत्तित्वानुपगमे तद्दोषस्य दुर्वारत्वात्। किन्तु स्वप्रतियोग्यनधिकरणवृत्तित्वसमेव। एवञ्च तद्विशेषण कस्याभावस्यैव स्वपदार्थत्वात् गगनाद्यभावप्रतियोग्यनधिकरणाप्रसिद्ध्या न तदभावस्य तथात्वमि
ति तथाविधाभावासत्त्वात्प्रतियोगित्वाप्रसिद्धगगनादेः केवलान्वयित्वापत्तिरित्यत आह। आकाशेति। अधस्तात्। व्याप्त्यादौ। केवलान्वयितावच्छेदकसम्बन्धसामान्ये यदसम्बद्धप्रतियोगि प्रतियोगिकत्वं किञ्चिदधिकरणानुयोगिकत्वोभयाभाववत्त्वं विवक्षणीयम्। यल्लिख्ये

वेदकत्वरूपव्याप्तत्वाप्रसक्तेरिति भावः ।। नानेति ।। तथाचैकधर्मनिरूपितव्याप्तत्वादिकं तद्रूपवत्कमील्लग्राह्यग्रहनं तस्य न केवलान्वयित्वसम्भवस्तथा तो न व्यभिचार इति भावः तयोरनुगतयोः अव्याप्यसत्यभावादेः केवलान्वयित्वाकथनान्न निराकरणं मूले तु उक्तं यद्विवलक्ष्याप्रसिद्ध्याल्लक्षणासम्भ
वं दर्शयितुं यस्य यस्य केवलान्वयित्वं सम्भावितं तस्यैव तथात्वं निराकर्तुमेव मूलमिति अभावप्रतियोगित्वादेस्तथात्वस्य दर्शितत्वान्नदनिराकरणेन न्यूनत्वेत्यतो नन्विति प्रतियोगित्वादिकमित्यादिना ऽन्योन्याभावप्रतियोगितावच्छेदकत्वपरिग्रहः विशेषणतावच्छेदकेति स चाधर्मो ऽभावत्वा
दिकम् । एवञ्चोक्तरीत्या अभावप्रतियोगित्वादिर्यन्निष्ठाभावप्रतियोगित्वं तस्य च न केवलान्वयित्वमिति भावः ।। एवञ्चेति ।। अत्यन्ताभावप्रतियोगित्वादेः केवलान्वयित्वासम्भवे चेत्यर्थः ।। अभ्युपगमवाद इति ।। ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वाभ्युपगमेनोक्तिः ता
४ नाप्र दृशविरोधस्य स्वयमनभ्युपगमात् प्रकारान्तरेण ध्वान्स्वयमन्यगुणत्वाद्यत्यन्ताभावस्य केवलान्वयित्वं निराकरोति ।। वस्तुतस्त्विति ।। तुल्यत्वाच्चेत्यनन्तरं नोक्ताभावः केवलान्वयीति पूरणीयम् । देशाः स्वप्रतियोगिसमवायिघटस्याश्रयो बोध्यः आश्रयसत्वदशायाम्
तन्नाशस्य नाशस्य प्रतियोगिसमवायित्वेऽपि आश्रयनाशाधीननाशस्य प्रतियोगिसमवायिनोऽधिकरणे प्रत्यक्षस्यानुभविकतया तत्र वर्तमानतेति भावः ।। तादृशाप्रत्ययोगिवादसम्भवात्समये चैककालिकविशेषणतया एवं सम्बन्धतयादैशिकलक्षणविशेषणतासम्बन्धेन तादृशा
नाशाभावस्य केवलान्वयित्वाद्दूतेराह ।। अत्यन्ताभावेति ।। यथा कार्याभावस्य वृत्तिप्रतियोगिकत्वेपि प्रतियोगित्वरूपाभावप्रतियोगित्वेन केवलान्वयित्वं तथा तन्नाशस्य वृत्तित्वेपि तदभावस्य तदात्मकाभावप्रतियोगित्वान्न केवलान्वयित्वमित्यर्थः ।। प्रतियोगिनो
भावाभावत्वनियममन्तरेणाकार्यस्य प्रतियोगितयाऽभावाभावत्वव्यवस्थापनं न सम्भवतीत्यभावाभावस्येति मूलमभावाभावस्यैवेत्यर्थकतया व्याख्येयमिति ।। अभावेति ।। वाच्यत्वादेः किञ्चिद्विशिष्टत्वाभावाभावत्वेपि भावत्वस्याभावाभावत्वव्याप्यत्वं निर्युक्तिकमतो
भावपदं प्रतियोगिपरतया व्याचष्टे ।। भावत्वादिति ।। प्रतियोगित्वस्य चाभावाभावत्वनियतत्वं निष्प्रत्यूहमभावाभावत्वस्यैव प्रतियोगित्वरूपत्वात् अत्रैवाचार्यसम्वादमाह ।। यदाहुरिति ।। ननु ध्वंसप्रागभावयोरत्यन्ताभावविरोधितामते ध्वंसप्रागभावदशायामपि
तदधिकरणे त्यन्ताभावविरहसत्त्वात्तस्य च प्रतियोगित्वरूपत्वासम्भवात्प्रागभावादेरपि तद्रूपता तथाचात्यन्ताभावाभावः प्रतियोग्येवेति मूलासङ्गतिरत आह ।। प्रागभावादेरिति ।। तदभावरूपतया ।। प्रागभावाद्यभावरूपतया ।। तत्वात्वे ।। प्रागभावादेरपि ।। प्रतियोगिता
वः । घटादिसाधारणधर्मरूपादिविशेषकम्बुग्रीवादिमत्त्वादेर्घटादिभेदाभावत्वविरहात् असाधारणो धर्म इति मूलस्य यथाश्रुतार्थासङ्गतेराह ।। प्रतियोगितावच्छेदक इति ।। प्रतियोगितावच्छेदकसम्बन्धस्य चान्योन्यात्यन्ताभावसाधारणोऽभावाभाव इति योजना । अन्योन्यात्य
न्ताभावसाधारणस्य अन्योन्यात्यन्ताभावयोः साधारणं ।। सम्बन्धविधया अवच्छेदकः ।। क्वचित् ।। भेदप्रतियोगितायां ।। क्वचिच्च ।। संसर्गाभावप्रतियोगितायां । प्रतियोगिसम्बन्धत्वं वस्तुमात्रभावत्व प्रतिबन्धकतया न प्रतियोगिसम्बन्धस्य स्याभावाभावत्वमाते समा
धत्ते ।। यद्वेति ।। तादृगित्यन्तं प्रतीयते व्यवह्रियते इत्युभयान्वयि । तथाच यदभावव्याप्यत्वादेनाऽगृहीतधर्मवन्ताज्ञानं यत्प्रतीत्यनुत्पादे यदभाववत्तव्यवहारे वा प्रयोजकमित्यर्थः ।। यद्विधिकरणे कदाचित्स्यापि तदभावप्रमा न जाता तदभावप्रतीतिः प्रतियो
गिमत्ताप्रतीत्यनुत्पादप्रयोजकत्वविरहात्स्यैव तदभावात्मकत्वमिति नियमासम्भवः अतो ऽभावव्यवहारस्यापि निवेशः व्यवहारश्च सर्वत्रैव सम्भवतीति न व्यवहाराविषयाभावे नियमभङ्ग इति शङ्कापि ।। निश्चलतथात्वमिति ।। परस्पराप्रतीत्यनुत्पादप्रयोजकत्वं
परस्पराभाववत्ताव्यवहारप्रयोजकत्वमित्यर्थः तथाच नप्रतियोग्यभावयोः परस्पराभावत्वानुपपत्तिरिति भावः ।। तत्सम्बन्धत्वं ।। प्रतियोगिसम्बन्धत्वं ।। तद्विषयः ।। अभावप्रतीत्यनुत्पादादिप्रयोजकधीविषयः । ननु प्रतियोगिसम्बन्धप्रकारकबुद्धित्वेऽ
पि अभावप्रत्ययानुत्पादस्यानुभविकत्वेत्यत आह ।। क्वचित्त्विति ।। विशेषदर्शनतया ।। व्यावर्तकधर्मदर्शनतया ।। न त्वत ।। व्यावर्तकधर्मदर्शनतामपुरस्कृत्य न तस्याभावविरोधित्वं किन्तु तत्सम्बन्धस्यैवेति विशेषः तथाच तत्सम्बन्ध एव तदभावाभावः विरो

केवल० टी० ४

धिन स्वाभावाभावत्वादिति भावः। प्रतियोगितावच्छेदकसम्बन्धस्य। घटसंयोगादेः। अभाववतीत्यत्र कर्मादौ। सम्बन्धान्तरेण। कालिकादिना। तथात्वं। सम्बन्धसामान्येन विशेषितत्वं। तुल्यमेव। प्रतियोगिसाधारणमेव। क्वचित्प्रतियोगिनः क्वचित्तत्तावच्छेदकस्याभावाभावत्वक
ल्पने कल्पनाभेद इति कल्पने कायुक्तेः धारा सम्बन्धस्याभावाभावत्वमित्युक्तं दूषयति। अन्यतिप्रसक्त्येचेति। अनतिप्रसक्त्ये। घटसंयोगादेर्घटाद्यभावाभावत्ववारणाय। अनुगमकसम्भावनापि। अनुगमककल्पनासम्भावनापि। स्ववृत्त्यभावादितिशेषः स्वावच्छिन्नप्र
तियोगिताकत्व स्वात्मकाभावकत्वोभयसम्बन्धेनाभावस्य सम्बन्धत्वनियमे त्वाह। व्यधिकरणेति। तद्धेति। गुणाद्यभावप्रतियोगितावच्छेदकसंयोगसम्बन्धवति। अभाववृत्तित्वप्रसङ्गः तदभावासत्वप्रसङ्गः। प्रतियोगिनिरूपितताद्दशसम्बन्धस्य स्वाभावाभावप्रति
यधुच्यते तत्राह। अभावत्वमिति। अभावत्वं प्रतियोगित्वाभावप्रतियोगितया व्यधिकरणसम्बन्धावच्छिन्नाभावस्य केवलान्वयित्वं खण्डयतो। तदभावेति। व्यधिकरणसम्बन्धावच्छिन्नगगनाद्यभावाभावे त्वर्थः। विलोपप्रसङ्ग इति। प्रतियोगिनिरूपितताद्दशसम्बन्धस्याप्रसिद्धेरिति भावः।
अथविरुद्धलक्षणम् ताद्दशगगनाद्यभावस्याभावप्रतियोगित्वस्वपतेत्विष्यमेवेति भवतामित्युक्तं। पूर्वपक्षिणा लक्षणप्रसिद्धिं लक्षणासम्भवस्योक्तत्वात् लक्ष्यप्रदर्शनमेवोचितं न तु लक्षणाभिधानं लक्षणस्य प्रागेवोक्तत्वादत आह। लक्षणमिति। गगनाभावादिसाध्यकानुमानानां लक्ष्यतानि
र्वाहाय लक्षणे विशेषणान्तरं प्रक्षिपति। तद्वर्थः। आकाशादेः स्वाभावाभावत्वस्यानिर्युक्तिकतया आकाशाभावादि सद्धेतुक अभावे वृत्तिमत्वविशेषणदानमयुक्तमित्याशङ्क्य तत्र मूलस्कृतो ऽनिर्भरमाह। आकाशस्येति। घटादेरिवाकाशस्यापि स्वाभावाभावत्वमवि
शेषात्स्यादित्याशङ्क्य तद्विशेषं दर्शयति। भाववतीति। भावो घटादिरूपप्रतियोगी। तदभावासत्वप्रतीत्या। तदभावा त्वप्रतीत्या। इहेव अस्मिन्स्थले च तथा न प्रतियोगिमत्यभावाभावत्वप्रत्ययः सम्भवतीति शेषः। प्रतियोगिमतः स्वाप्रसिद्धेरि
ति भावः। अधिकरणविनिर्मोकेनैव नभूप्रदेशे नै प्रत्ययो न सम्भवतीति। अभावादिपदोक्तेर्वा सम्भवन्नपि प्रकृते ऽसिद्धः इति नाधिकरणानुपरक्त गगनाभावाभावप्रत्ययवत्त्वात् गगनस्य तथात्वमिति शङ्कावकाशः। ननु गगनस्य स्वाभावाभावत्वानुपगमे
तस्य स्वाभावप्रतियोगित्वानुपपत्तेरित्याशङ्क्याह। अभावप्रतियोगित्वश्चेति। स्वरूपसम्बन्धस्य। नत्वभावाभावत्वं। अभावात्। व्याप्तिवादे। ननु प्रतियोगित्वमभावाभावत्वानात्मकं प्रतियोगितया तत्साधये देवेत्यत आह। अभावप्रतियोगित्वश्चेति। आ
काशादेः स्वाभावाभावत्वविरहेपि प्राचां केवलान्वयिलक्षणे क्षतिमत्सदोषादानं सम्बन्धविशेषानिवेश सूचकतया सङ्गमयति। एवश्चेति। सम्बन्धविशेषनिवेशप्रयोजनमाह। अतएवेति। स्वरूपवा येनेति। सम्बन्धेनाभावप्रतियोगित्वेपीत्यग्रेत्रे
णा। दृष्टान्तयः। विषयतया। ज्ञानस्य। परम्परासम्बन्धेन। स्वसमवायिविषयत्वरूपेण ज्ञानत्वस्य। स्वरूपसम्बन्धेनैव ज्ञानविषयत्वादेः केवलान्वयित्वं तेषां केवलान्वयितावच्छेदक सम्बन्धावच्छिन्नाभावप्रतियोगित्वादिति भावः। प्रतियोगिता
यां केवलान्वयितावच्छेदक सम्बन्धावच्छिन्नत्वनिवेशनञ्च प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिसामानाधिकरण्यस्य निवेशाभिप्रायेण तत्र प्रकृतसम्बन्धानिवेशे नञ्च प्रतियोगितायां न सम्बन्धावच्छिन्नत्वनिवेशः। ननु प्रतियोगि
समानाधिकरणत्वं यदि स्वप्रतियोगिसमानाधिकरणं यत्तदन्यत्वं तदा संयोगादेरपि केवलान्वयितापत्तिः संयोगाभावस्य द्रव्ये प्रतियोगिसमानाधिकरणतया तदन्यत्वाभावात्। नापि तत्तदभावनिष्ठं यत्तत्तदभावप्रतियोगिसमानाधिकरणत्वं तद
न्यताभाववत्वं तत्तत्सामानाधिकरण्यस्य व्याप्यवृत्तित्वानुपगमे तद्धेतु असदुर्वारत्वात्। किन्तु स्वप्रतियोग्यनधिकरणवृत्तित्वमेव। एवञ्च तद्विशेषणं कस्याभावस्यैव स्वपदार्थत्वात् गगनाद्यभावप्रतियोग्यनधिकरणाप्रसिद्धया न तदभावस्य तथात्वमि
ति तथाविधाभावासत्प्रतियोगित्वमादाय गगनादेः केवलान्वयितापत्तिरत आह। आकाशेति। अथ गगनादेः। व्याप्तिवादे। केवलान्वयितावच्छेदकसम्बन्धसामान्ये यदवच्छिन्नप्रतियोगि प्रतियोगिकत्व किञ्चिदधिकरणानुयोगिकत्वोभयाभावत्वं विलक्षणेति यत्किञ्चि

दधिकरण इति तानवच्छेदकधर्मावच्छिन्नप्रतियोगिताकत्वं वा प्रतियोगिवैयधिकरण्यं विवक्षणीयं· तच्चाकाशाभावसाधारणमिति भावः· मूलोपात्तवृत्तिमत्त्वस्य प्रतियोगिविशेषणतयैव गगनादिवारणे उभयाभावघटितप्रतियोगिवैयधिकरण्यप्रवेशो गौरवादयुक्त इ
त्याशयेनाह·। वृत्तिमत इति·। वृत्तिमत्त्वं प्रकृतसम्बन्धेन बोध्यं तेन संयोगादिना गुणादेर्न केवलान्वयिता·। गगनाभावेति·। प्रतियोग्यनधिकरणवृत्त्यभावेत्यर्थः· घटादिप्रतियोगिताश्रयानधिकरणं यत्किञ्चिद्वृत्तिमत्वे सति तद्वृत्त्यभावाप्रतियोगित्वं फलितार्थः· अत एव ज्ञातत्वादिके क्रि
देशकालादिवृत्तित्वविशिष्टतदभावाभावात्मकप्रतियोगिमत्तया स्वरूपसम्बन्धस्य केवलान्वयिता घटध्वंसस्थले प्रतियोगिवैयधिकरण्याप्रसिद्धिरिति दोषानवकाशः· प्रकारान्तरेण संयोगाद्यभावस्य केवलान्वयित्वमुपपादयति आकाशादिकमनुपादाय तो वृत्तिमत्वमपि
साधकं कुर्वतोऽन्यस्य मतमाह·। व्याप्यवृत्तिसाधकमिति·। अभावविशेषणं·। अभावविशेषणबोधकं· व्याप्य इत्यस्य इदं यद्यवच्छिन्नवृत्तिकान्यत्वं तदा संयोगाद्यभावस्यातथात्वात्संयोगादावतिप्रसङ्गः· यद्यनवच्छिन्नवृत्तिकत्वं तदैकालिकसम्बन्धावच्छिन्नप्रतियो
गिताकघटत्वाद्यभावस्य तद्वृत्तिकालेऽपि तद्वदधिकरणदेशावच्छेदेन वर्तमानतया केवलान्वयिनोऽसङ्ग्रहप्रसङ्गः· तदभावस्य घटत्वादेः समवायेन व्याप्यवृत्तित्वात् येन सम्बन्धेनाभाववत्ताज्ञानं यत्प्रतियोगिमत्ताज्ञानविरोधि तेन सम्बन्धेन व्याप्यवृत्त्यभावीयप्रति
योग्यन्यत्वनिवेशे च गौरवमित्यस्वरसः· ननु तादात्म्यसम्बन्धेन प्रतियोग्यधिकरणतायां वृत्तिमत्वस्य वाऽप्रसिद्धत्वात्तेन सम्बन्धेनाभिधेयत्वाद्यभावाप्रसिद्ध्या तस्य केवलान्वयित्वानुपपत्तिरित्यत आह·। तादात्म्येनेति·। अभिधेयस्य·। अभिधेयत्वावच्छिन्नस्य·। व्याप्यवृत्तीति·।
यथा व्याप्तिग्रहे हि आधिकरणत्वादिस्थले सम्बन्धित्वमात्रं निवेशितं तथात्रापि तन्निवेशनीयमित्याशयः· ननु प्रमातीयविषयतारूपत्वेऽपि प्रमेयत्वस्य केवलान्वयित्वानुपपत्तिर्दुर्वारैव अनुगतधर्मस्याभावप्रतियोगितानवच्छेदकत्वेऽपि तदवच्छिन्नव्यक्तीनां वि
शेषरूपेणाभावप्रतियोगिताश्रुते इतोऽनवच्छेदकत्वघटनया लक्षणं परिष्कार्यमिति मूलाशयं प्रकाशयति·। तथाचेति·। अनवच्छेदकं यद्रूपं तद्रूपेण केवलान्वयीति विवक्षणीयं तेन घटादेर्न घटत्वादिना केवलान्वयित्वं किन्तु मेयत्वादिनेति नि
यमोपपत्तिः·। द्रव्यत्वेति·। प्रतियोगित्वस्थले प्रतियोगितानवच्छेदकत्वनिवेशे च· अप्रतियोगित्वघटितलक्षणे द्रव्यगुणभेदयोः प्रतियोगिव्यधिकरणद्रव्यभेदत्वाद्यवच्छिन्नाभावप्रतियोगित्वेन केवलान्वयित्वापत्तिविरहात् प्रतियोगितावच्छेदकावच्छि
न्नासामानाधिकरण्यपर्यन्तनिवेशे वैयर्थ्यमित्युपष्टम्भसङ्गतिः·। द्वित्वादिना न केवलान्वयित्वमिति·। उभयत्वावच्छिन्नाभावस्य प्रतियोगिसमानाधिकरणत्वेऽपि तदवच्छिन्नासामानाधिकरण्येन लक्षणघटकत्वादिति भावः· अन्यतात्वेन केवलान्वयित्वस्य
घटत्वाद्वित्वादिनेत्यनुगमः· आदिना धर्मान्तरसाधारणत्रिसात्त्वादिपरिग्रहः· द्रव्यगुणलक्षणत्वम्· गगनाभावादेर्घटादिवृत्तित्वविशिष्टत्वेन न केवलान्वयित्वमित्यपि द्रष्टव्यम्·। तादृशधर्मावच्छिन्नस्य·। प्रतियोगितानवच्छेदकधर्मावच्छिन्नस्य·। अधिकरणवृत्तितायाः·।
अधिकरणसम्बद्धतायाः·। विवक्षितत्वादेति·। तथाच तादृशाभावप्रतियोगितानवच्छेदकं यत्किञ्चिदधिकरणनिष्ठकेवलान्वयिताघटकसम्बन्धप्रतियोगितावच्छेदकं यद्रूपं तद्रूपवत्त्वं तेन रूपेण केवलान्वयित्वमिति भावः·। तादृशाभावेति·। विरुद्धाभावेत्यर्थः·। तस्य तथात्वात्·।
४५ विरुद्धोभयत्वस्य सम्बन्धप्रतियोगितानवच्छेदकत्वात्·। सिद्ध्यभावपक्षतामते साध्यसन्देहस्यानपेक्षणात्तथाप्यत्याक्षेपासङ्गतेराह·। मानेत्यादीति·। मूले—न प्रमेयपक्षक·। न प्रमेयपक्षक·· तर्हि किं धर्मिक इत्याकाङ्क्षायामाह·। किन्त्विति·। भिन्नविषयकः·। प्रकृतानुमि
तिविषयताविलक्षणविषयतावान्· तथाच विलक्षणविषयताशालिसाध्यसन्देहस्यैवानुमितिहेतुतया सोऽनुपयुक्त इत्यभिमानः· प्रमेयत्वसाध्यकानुमितिस्थलेऽपि प्रमेयत्वपक्षकास्तित्वानुमानमेव केवलान्वय्यनुमाने निदर्शनमिति शङ्कां निरस्यति·। प्रमेयत्वसाध्यकेति·।
अभिन्नत्वस्य परपदार्थसाधर्म्यरूपस्य केवलान्वयितया तत्साध्यकानुमानस्यान्वयव्यतिरेकित्वाभिधानं न घटत इत्यत आह·। दीधितौ—अस्तित्वेति·। घटास्तित्वं·। घटास्तीति· केवलान्वयिनोऽस्तित्वस्य यत्र साध्यता तत्र सन्दिग्धानुपपत्त्याऽनुमित्यनिर्वाहस्तादवस्थ्यादि

केवला॰ टी॰
१

तिभाव: विषयतावैलक्षण्येन विषयतावैलक्षण्यमित्याशयेनाह कुत इति । मूले अथेति । समानविषयकत्वेनेति । तथा चैकस्यानुमितित्वविलक्षणविषयताकत्वे ऽन्यस्य तथात्वमावश्यकमिति प्रमेयस धर्मिकसंशयादपि तत्साध्यकानुमितिर्निष्प्रत्यूहैवेति भाव: अर्थभेदात् विष
यतावैलक्षण्यात् ग्राह्यसंशयस्याप्रतिबन्धकतया विरोधिपदं प्रतिबध्यपरतया व्याचष्टे । दीधितौ साध्यसिद्धिरिति । साध्यं पक्षतानिष्ठाभावप्रतियोगि न वेत्याकारकविशेषक: संशय: कथं साध्यवत्तानिश्चयप्रतिबन्धक इत्याशङ्क्याह । विरोधीति । विरोधिविषयतामात्रेणेति । ग्राह्यविरो
अ३ धिधर्मप्रकारत्वस्य धर्मिसम्बन्धविषयतामात्रप्रकारेणानुभवमेव द्रढयति । नहीति । तदभावप्रत्येत्यत्र तत्पदेन पक्षतानिष्ठाभावप्रतियोगित्वज्ञानपरामर्शधर्मप्रतियोगित्वज्ञानानां प्रतियोगित्वज्ञानान्तर्भावेण व्याचष्टे । पक्षेति । तज्ज्ञानप्रतिबन्धकत्वस्य तद्विरोधित्वमेवाप्रतियोगि
त्वमित्यत्र तत्त्वार्थ इति भाव: अपदार्थप्रतियोगित्वपदमेव प्रतियोगित्वज्ञानपरं प्रतिबन्धकत्वमेवमत्र धर्मो विरोध इत्याशय: अतएव तत्पदस्य नत्रर्थविरोधप्रविष्टज्ञानपरामर्शसम्भवेपि न दोष: । अबाधितत्वज्ञानस्यानुमित्यहेतुतया साधकपदस्य सिद्धिकारणतापरता
न सम्भवतीत्यतस्तद्व्याचष्टे । साध्येति । कथञ्चिन्नादृशबाधनिश्चयाभावसम्पादनेनासाधकपदस्य सिद्धिकारणपरत्वमुपपादयितुमन्यथा व्याचष्टे । पक्षानिष्ठ इत्यादि । तत्पदस्य विशेषणीभूताभावपरतया कर्मधारयोपगमे ऽभावपदवैयर्थ्यं पूर्वकल्पे पक्षानिष्ठा
भावप्रतियोगित्वज्ञानाभावस्य प्रकारतया सदसद्ग्रहश्च: अत: षष्ठीतत्पुरुषाभिप्रायेण व्याचष्टे । तदभावस्येति । तस्येति अग्रिमे ऽभावस्येत्यत्र सामानाधिकरण्येनान्वयि । तथा च पाकत्वाभिप्रायेण कर्मधारय एवावलम्बित: तदवच्छेदस्य विशेषणपरामर्शकतया अपि
वहुश्रुतदर्शनात्तदवच्छिन्ननिराकरणाय भावपदोपादानमित्यादि: । अभावप्रतियोगित्वप्रकारकज्ञानत्वेन तज्ज्ञानाभावस्य पक्षताघटकत्वे साध्याभाववान् पक्ष इति निश्चयदशायां पक्षताव्यवहारप्रसङ्ग इत्यतस्तत्साधारणप्रतियोगितावच्छेदकं दर्शयति । साध्य इति । साध्यविष
यितानिरूपिततादृशप्रतियोगिताविषयताशालिनिश्चयत्वेनेत्यर्थ: प्रतियोगित्वानुयोगित्वयोस्तुल्यविनिवेशत्वानुपगमे साध्याभाववान् पक्ष इति ज्ञानस्य न साध्यांशे प्रतियोगितावगाहित्वं किन्तु अभावांश एव तदनुयोगितावगाहित्वमतो नोक्तरूपेण तत्संग्रह: एवं सा
ध्यांशे कादिकादिसम्बन्धेन प्रतियोगित्वप्रकारकधीवारणाय साध्यांशे प्रतियोगित्वप्रकारकधिय: सम्बन्धविशेषावगाहित्वेनैव विशेषणीयतया प्रतियोगितासंसर्गावग्रहेपि च तदीयसंसर्गाभानादपि न तयोक्तरूपेणानुगमसम्भव: एवं अभावसाध्यकेप्राति
योगित्वावगाहि बाधबुद्धेरपि ग्रह इति प्रकृतपक्षधर्मिकप्रकृतसाध्यविशिष्टबुद्धिप्रतिबन्धकत्वेन तदुभयमनुगमयति । साध्यविशेषेति । तत्प्रतिबन्धकतावच्छेदकं चागत्या ऽननुगततया वाच्यमिति ध्येयम् । सपक्षसत्त्वादिरूपगमकतौपयिकत्वे व्यतिरेकपदेन
विपक्षासत्त्वस्याग्रहणनाद्व्यतिरेकिविकलत्वादित्यत्र व्यतिरेकश्चेत्यत्र च व्यतिरेकपदस्य तद्रूपार्थकतां स्फुटयति । व्यतिरेक इति । व्यतिरेकव्याप्तेरनुमित्युपयोजकतां व्यवस्थापयन् व्यतिरेकस्य सहचारविधया साक्षात्तादात्म्यग्राहकत्वेनानुमित्युपयोगित्वं व्यतिरेकोपासने
त्यन्तेनाभिहितमत: पुनर्विपक्षसत्त्वग्रहाशङ्कानिरासमात्रद्वारा व्यतिरेकव्याप्तिग्रहोपयोगित्वाभिधानं विरुध्यते व्यतिरेकव्याप्तेर्विशिष्योपादानेनान्वयव्याप्तिग्रहे शङ्कानिवर्तनद्वारा तदनपेक्षालाभात् केवलान्वयिन्यनाशङ्कनुदयेन तदनपेक्षाभिधानमप्रसङ्ग
तमतो व्यतिरेकव्याप्तावेति मूलस्यान्वयव्याप्त्यर्थकतामाह । व्यतिरेकेति । केवलान्वयानुमानं स्वातन्त्र्येण खण्डयितुमुपक्रमते । अत्र वदन्तीति । व्याप्तेरिति । अनुमित्यौपयिकमित्यर्थ: एवकारेण केवलान्वयिसाध्यकसाधारणव्यापकसामानाधि
करण्यस्यानुमित्यौपयिकत्वव्यवच्छेद: । लाघवादिति । व्यापकसामानाधिकरण्यापेक्षया लघुत्वात् लाघवादित्यर्थ: व्यापकताघटकव्याप्ते वह्नितादृशसाध्यतावच्छेदकविशेषणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकताभावस्य हेतुविशेषणस्याप्यसत्ता
वच्छेदकावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वाभावतुल्यशरीरत्वेपि अनवच्छेदकत्वधर्मितावच्छेदकवह्नित्वादे: साध्यसामानाधिकरण्यनिवेशेन गौरवं बोध्यम्: एवं तादृशविशिष्टहेतुमत्तानासहेतु अधिकरणविषयतायां द्विधा हेतुविन

यत्ताम्याश्च निवेशात् कारणतावच्छेदकगौरवान्नविनिगमनाविरहेण उभयव्याप्तेरनुमितिप्रयोजकतेति भावः । तन्मतेऽवच्छेदकलाघवमुक्त्वा कल्पनामाह । प्रायश इति । साधनभेदेपीति । साधनतावच्छेदकभेदेपीत्यर्थः । अभेदादिति । तथा च धूमत्वालोकत्वाद्यवच्छिन्नलिङ्गकबहुविधपरा-
मर्शानां वन्ह्याद्यभावव्यतिरेकाभाववत्त्वावच्छिन्नप्रकारकपक्षनिश्चयत्वेन एकमेव हेतुत्वं तन्मते व्यापकसामानाधिकरण्यरूपव्याप्तेर्हेतुतावच्छेदकविशेषघटितया तदवच्छिन्नप्रकारकज्ञानहेतुताया अश्च हेतुतावच्छेदकधूमत्वादिभेदेन भेद इति गौरवम् । न च व्यापकताया हेतुतावच्छेद-
कधूमत्वावच्छिन्नघटितत्वेपि व्यापकताघटकपदार्थानां विषयताकूटे निवेश्यमाने हेतुतावच्छेदकावच्छिन्नविषयतायाः सामान्यतः कुत्र धूमावच्छिन्नविषयतात्वेनैव कारणतावच्छेदककोटौ निवेशनीयतया व्यापकताज्ञाने हेतुतामतेपि न धूमत्वालोकत्वादिभेदात्तद्भेद इति वाच्यम् ।
धूमव्यापकवन्हिसामानाधिकरण्यवत्त्वान्निरुक्तादिज्ञानादनुमितिवारणाय तद्धर्मावच्छिन्नव्यापकसामानाधिकरण्येन तद्धर्मेण चावच्छिन्नाया प्रकारताया तद्धत्वेनैव हेतुतायाः कल्पनतयाऽनुगमासम्भवात् । त्वावच्छिन्नव्यापकसाध्यसामानाधिकरण्यावच्छिन्नत्वावच्छिन्नत्वोभयात्-
सम्बन्धेन सामान्यतो धर्मविशिष्टत्वेनानतिप्रसक्ते न धूमालोकादिनिरूपकारतानामनुगमः सम्भवतीति तु न सम्यक् तादृशपरम्परायाः सम्बन्धत्वे मानाभावात् जातिविशेषत्वादिना धूमत्वाद्यवगाहिनो जातिविशेषव्यापकवन्हिसमानाधिकरणधूमवानित्यादिज्ञानादनुमित्यापत्तेश्च
विधूमादेः समवायादिना वृत्तेर्हेतुतावच्छेदकीभूतसंयोगादिना वृत्तिसम्बन्धप्रवेशनीयतया एकसम्बन्धेन साध्याभाववदवृत्तित्वं सम्बन्धेन च पक्षधर्मत्वमवगाहमाना ज्ञानादनुमित्यापत्तेर्वारणाय विशिष्य सम्बन्धानां विशेषकसम्बन्धघटितव्याप्तिपक्षधर्मताविषयकज्ञानस्य हेतुतायाः कल्प-
नीयतया च विभिन्नसम्बन्धेन व्याप्येषु धूमरूपविशेषादिषु व्याप्तेर्भेदेन हेतुरूपकपरामर्शकारणताभेदस्यावश्यकत्वादिति प्रायश इत्युक्तम् । अथ हेतुतावच्छेदकमनिवेश्य व्याप्तिप्रकारकज्ञानत्वेन हेतुत्वे व्यभिचारज्ञानकालेपि निरुक्तितावच्छेदकव्याप्तिज्ञानोत्पत्त्याऽनुमित्युत्पत्तेरवश्यकतया
व्यभिचारस्य हेतुदोषतानुपपत्तिरिति चेन्न । पक्षवृत्तित्वसामानाधिकरण्येन धूमत्वे निश्चीयमाने धूमत्वाद्यवच्छेदेन व्यभिचारानिश्चयं विना पक्षवृत्तिसाध्यावच्छेदेन व्यभिचारसंशयस्यानिवृत्तेः पक्षे व्यभिचारिसामान्याभावकोटिकसंशयस्यैवोचितत्वात् तस्य सम्भवेन अव्यभिचारांश-
निर्धर्मितावच्छेदकस्यापि पक्षेऽव्यभिचारिनिश्चयस्यासम्भवेन धूमत्वादिविशिष्टे व्यभिचारग्रहस्यानुमित्युत्पत्तिविरोधित्वात् । अथ धूमालोकादिपरामर्शानामेकरूपेण हेतुत्वे धूमलिङ्गकेच्छाविरहविशिष्टसिद्ध्यभावरूपपक्षता धूमलिङ्गकपरामर्शस्यैव सहकारिणी न त्वालोकलिङ्गकप-
रामर्शस्येति सहकारिनियमानुपपत्तेः तथा च सिसाधयिषाकाले धूमलिङ्गकानुमितीच्छासत्त्वे धूमपरामर्शकाले च यद्यत्कारणतावच्छेदकावच्छिन्नकारणत्वोभयात्मिका सामग्री फलं जनयति तस्मात्तदानीमसति धूमपरामर्शे सति चालोकपरामर्शे व्यावश्यकतयाऽनुमितिर्दुर्वारैवेति चेन्न ।
एतन्मते पक्षताया लिङ्गविशेषनियन्त्रितात्वोपगमे अपि तेन तल्लिङ्गपरामर्शविशिष्टतत्तल्लिङ्गकानुमितीच्छाविरहकूटविशिष्टसिद्ध्यभावरूपा एकैव पक्षता नानालिङ्गपरामर्शसहकारिणी तत्र च नातिप्रसङ्गः इत्यपि । नन्वेवमेकत्रानन्तानां परामर्शविशिष्टेच्छाभावानां वि-
शेषे तेषां विशेष्यविशेषणभावविनिगमकविरहेण बहुतरकारणताधिक्यप्रसङ्ग इति वाच्यम् । सिषाधयिषाकाले विनापि धूमलिङ्गकानुमितीच्छामालोकलिङ्गकेच्छावत्त्वो धूमालोकोभयलिङ्गकसस्पृहालम्बनपरामर्शादनुमित्युत्पत्त्या व्यभिचारेण तल्लिङ्गकानुमितौ तल्लिङ्गकानु-
मितीच्छाविरहविशिष्टसिद्ध्यभावत्वेन हेतुत्वासम्भवात् अत्रानुमितेः सर्वैरेवादरणीयत्वात् तल्लिङ्गकपरामर्शविशिष्टतल्लिङ्गकानुमितीच्छानां स्वीयव्याप्तिपक्षधर्मत्वविषयतानिरूपितविषयतावच्छेदकधर्मावच्छिन्नलिङ्गकत्वप्रकारकत्वसम्बन्धेन परामर्शविशिष्टेच्छा-
त्वेनानुगमसम्भवे एकमेव हेतुतावच्छेदकं सिद्धौ निवेश्यमित्याहुः । वस्तुतस्तु यत्पक्षकयत्साध्यकस्थले सिषाधयिषाकाले कदापि नानुमितिर्नोत्पद्यते तत्रेच्छाविरहाविशेषितसिद्ध्यभावस्यैव पक्षतात्वात् यत्र वा सिषाधयिषाकाले एकलिङ्गकपरामर्शोत्पत्तौ नान्यलिङ्गकानुमितिस्तत्र साधारणत्व-
नेवेच्छाया उत्तेजकत्वसम्भवात् तल्लिङ्गभेदेन परामर्शभेद इति तत्रैव परामर्शस्य साधनाभेदेन न कारणताभेद इत्यभिप्रायेण प्रायश इत्यपि हि तथा अतएव विशेषणेनापीत्यादि पूर्वग्रन्थाविरोधः । ननु धूमालोकादिपरामर्शानामेकरूपेण हेतुत्वे तदवच्छेदकानिश्चयत्वशरीरे
धूमत्वालोकत्वाद्यवच्छिन्नाभावकोटिकनिश्चयत्वसंख्यानामननुगतेनाननुगतरूपेणाभेद एकत्र विशेषणीयतया वन्हिव्याप्यधूम★तानवन्हिव्याप्यालोकवान् न वेत्याकारकनिश्चये संशये यद् आलोकमनुमित्यनुदयापत्तिः । न चाहं प्राक् व्याप्यविषयताभिन्नत्वमनुमितिजन-

दी. प्र. टि. ८६

८

कतावच्छेदकव्याप्यविषयतायां निवेशयमित्युक्तज्ञानीयधूमादिविषयतायाः संशयत्वाघटकतया तत्सङ्ग्रह इति वाच्यम्। प्रत्येककोटिनिश्चयविषयतातिरिक्तविषयतायाः संशये प्रामाणिकत्वस्यानिश्चयीयव्याप्यविषयताया एव विपरीतकोटिसाहित्यायाः संशयत्वघ
टकत्वात् स्वनिष्ठसंशयत्वघटकीभूतविषयतान्यव्याप्यविषयताशून्यं यद्यत्सद्यत्तेन हेतुलोक्ष्यमेतत्तत्संशयत्वस्य जातीनां प्रातिस्विकरूपेण भेदकूटनिवेशापत्तौ वसाना तावतां भेदानां विशेष्यविशेषणभावविनिगमकविरहेण कारणताबाहुल्यप्रसङ्ग इति चेन्न।
व्याप्यत्वावच्छिन्नाभावकोटिकसंशयभेद एव निवेशनीयो न तु धूमत्वालोकत्वाद्यवच्छिन्नाभावकोटिकसंशयानां तत्तद्रूपेण भेदकूटः धूमत्वाद्यवच्छिन्नाभावकोटिके व्याप्यत्वानिश्चयात्मके व्याप्यत्वसंशये उपस्थितव्याप्यत्वावच्छिन्नाभावविषयकत्वस्याविकल्पते
भान ४ तादृशाभावविरोधितो व्याप्यवत्तानिश्चयस्य व्याप्यव्याप्यवत्तानिश्चयेऽस्याप्रामाण्यसत्त्वे तदुत्तरजायमानो धूमत्वाद्यवच्छिन्नाभावकोटिकोपि संशयो व्याप्यत्वस्यापि प्रकारतावच्छेदकताकनिश्चयरूप एव भवति तादृशनिश्चयसामग्र्याः सत्त्वादिति तत्। आयत एवान
मितिरिति न कश्चिद्दोष इति।। केचित्तु विरोधानुपस्थितिकालीनभावाभावसंशयत्व दुर्वचं समुच्चयत्वेनैव व्यवच्छेदनिर्वाहे नाविरोधाविषयकतया सम्भवति अनुपस्थितविरोधस्य प्रकारत्वासम्भवात् तत्संसर्गतायाश्चाप्रामाणिकत्वात् तदनुरोधेन तदुपगमे संशयकोटि
विषयताया एव विलक्षणाया उपगमस्योचितत्वात्। तथा च संशयत्वघटककविलक्षणकोटिविषयताभिन्नत्वमेवानुमितिजनकतावच्छेदकव्याप्तिविषयतायां निवेशनीयं वैलक्षण्यञ्च पदार्थान्तररूपं कृप्तान्तर्गतं वेत्यन्यदेतत्। न च विरोधानुपस्थितिदशायां
न भावाभावयोः संशयः अपि तु तदुभयसमुच्चय एवेति विरोधस्यानिवेशसंशयेऽप्रकारतयैव भानमिति वाच्यम्। भावाभावयोर्विशेष्यज्ञानानन्तरं तदुभयसमुच्चयस्यानुभवसिद्धत्वात्। न च तदानीं संशयसमुच्चयौ द्वावेव नाभ्युपगन्तव्याविति वाच्यम्
प्रत्येकसामग्रीभ्यां स्वस्वकार्यजनने बाधकाभावात् तुल्यबलसामग्र्याः परस्परफलप्रतिबन्धकत्वात् अन्यथा संशयोच्छेदात्। अन्ये तु संशये भावाभावयोः प्रकारतानिरूपिता एकविशेष्यता समुच्चयेपि तु प्रकारताभेदेन तद्भेद इत्यनयोर्वैलक्षण्यम्। एवञ्चाभावत्वावच्छिन्न
प्रकारतानिरूपितविशेष्यताकत्वमेव सर्वसाधारणव्याप्यवत्तानिश्चयत्वं। भावद्वयकोटिकः संशयश्च न प्रामाणिकः धूमवान् आलोकवान्वायमित्यत्राभावद्वयस्यापि भानोपगमात् तच्चतुष्कोटिकः अतस्तत्रापि व्याप्यप्रकारतानिरूपितविशेष्यताया अभावत्वावच्छिन्नप्र
कारतानिरूपितत्वात् सङ्ग्रहः। अभावभासकसामग्रीसत्त्वे विरोधाग्रहे समुच्चयस्योपगमात् विरोधग्रहदशायां तस्यैव विरोधिप्रकारकनिश्चयसामग्रीसहितस्य तत्प्रकारकालौकिकविषयताशालिज्ञानप्रतिबन्धकतया कृप्तपक्षादिज्ञानस्येव सामग्र्यभावात्। निश्चयसाम
ग्री च तदभावप्रकारकज्ञानसामग्र्यसमवहिततत्प्रकारकज्ञानसामग्री। तन्निश्चयत्वावच्छिन्नसामग्री निश्चयत्वस्य कार्यतावच्छेदकत्वाद्दसिद्धेः पीतसशङ्खत्वेन पीतविरोधित्वेन ज्ञायमानस्य योर्देषविशेषलौकिकज्ञानसामग्री यथा देकधर्मिणिकविषयतया
भावद्वयकोटिकज्ञाने संशयत्वासम्भवात्। आसत्तिदोषविशेषलौकिकसन्निकर्षादौ चाऽपनयवशादेकधर्मिणि तादृशयोर्निश्चयासम्भवेन च तादृशप्रतिबन्धप्रतिबन्धकभावस्य प्रामाणिकत्वादिति वदन्ति।। तदसत्। अभावत्वघटितधर्मावच्छिन्नहेतुमत्तापक्ष
धर्मव्याप्यत्वावच्छिन्नप्रकारतानिरूपितविशेष्यताया अभावत्वावच्छिन्नप्रकारतानिरूपितत्वस्य तत्त्वेन तादृशपरामर्शस्य निश्चयत्वानुपपत्तिः। न च व्याप्यत्वावच्छिन्नप्रकारताशालिनिरोधिकोटिप्रकारतानिवेशानायासेनैव सिद्ध इति वाच्यम्। अत्र विरोधिकोटेरपि
साध्यव्याप्यतयाभानं तत्र तादृशसंशयस्य दुर्वारत्वात्। एवं धूमपर्वतत्वावच्छेदेनाभावप्रकारकस्य नीलपर्वतत्वादिविशिष्टे व्याप्यवत्तावगाहिनः संशयस्य न्यूनाधिकधर्मावच्छिन्नभावाभावोभयप्रकारतानिरूपितविशेष्यतयोरैक्यासम्भवात्। नीलरूपवत्
वच्छेदेन वह्निव्याप्यवत्तानिश्चयदशायां पर्वतादृशसंशयोत्पत्त्या तत्र नीलपर्वतत्वावच्छिन्नविशेष्यताया वह्निव्याप्याभावप्रकारतानिरूपितत्वानुपगमासम्भवादतिप्रसङ्गः। न च तादृशसंशयस्य प्रसिद्धिः एकधर्ममपि द्विकोटिकधर्मितावच्छेदकताकत्वे

रेव संशयत्वादित्यिवाच्यम् । अयं प्रमाणपुष्कलं संशयत्वं तद्भूते धिकस्यैकतारकोटिधर्मितावच्छेदककोटौ भानेऽपि अधिकन्नु प्रविष्टमित्याहुः तार्थेनासंशयत्वस्यावश्यकत्वात्तुल्यबलसामग्रीभ्यां तादृशज्ञानजनने बाधकविरहेण तथाविधज्ञानमेव न जायत इत्युक्तेरसम्भवात्तन्संशये
कोटिद्वयप्रकारतानिरूपितविशेष्यतया वच्छेद्यावच्छेदकभावः सम्बन्धेन तथा । एवञ्चाभावप्रकारतानिरूपितविशेष्यतानवच्छेदकत्वप्रकारतानिरूपितविशेष्यताकत्वं तन्निश्चयत्वमित्यौचित्यमुक्तम् । अपि च तथा ज्ञायमानस्य द्वयोपस्थापितभावाभावोभयविशिष्ट
धर्मिविषयकज्ञाने विरोधस्य लधर्मिविषयताद्वयोपगमे ज्ञानस्य सम्बन्धालम्बनतया एकवाक्यताविरहेण समासानुपपत्त्याधर्मिविषयताद्वयस्यावच्छेद्यावच्छेदकभावधौव्ये तादृशज्ञानस्य निश्चयत्वानुपपत्तेरित्यतिदिक् ॥ भावद्वयमात्रकोटिकोऽपि संशयोऽभावमात्रमा
मप्रसक्तेऽनुभवसिद्धः समानबलसामग्रीसम्बलनक्लृप्तो केवलसामग्रीप्रतिबन्धकताया अप्रामाणिकत्वात् । संशयत्वं च कोट्यंशे लौकिकविषयताविरहस्य प्रयोजकं तथा कथितदोषजन्यनिश्चये तदभावनिर्वाहात् लौकिकविषयता च साक्षात्त्वजातिव्यञ्जकविषयता साच
दोषविशेषजन्यज्ञानेऽपि प्रागुक्तः परित इत्यादि प्रमाननर्ह प्रतिमान साक्षात्कारमीत्यनुव्यवसायोदयात् । एवञ्चाभावप्रकारतानिरूपितव्याप्यप्रकारतानिरूपितविषयताशालित्व निश्चयत्वघटकत्वे तिप्रमाद्रोहुर्वार इत्यपि वदन्ति ॥ इदन्तु बोध्यम् । संशयत्वस्यैव
योर्वैलक्षण्यात् कोटिद्वयप्रकारिताया अवच्छेद्यावच्छेदकभावविरहान्नैतत् प्रकारकत्वस्य तत्प्रकारतावच्छिन्नत्वरूपत्वात् ॥ संशयत्वं वा मानसत्वव्याप्यजातिर्व्याप्यवृत्तिः सर्वत्र संशयस्य मानसताया एवोपगमात् । चक्षुःसन्निकर्षादिसध्रुविकसंशयदशायां पर्वतप
श्यामीत्यनुव्यवसायः संशयस्यपूर्वं परतो जायमानताद्विषयक चाक्षुषादिकल्पनेन तद्विषयतयोपपादनीयः संशयत्वस्य चावच्छेदकं तत्र द्विधर्मिविषयकत्वावच्छिन्नतत्तत्कोटिविषयकत्वमेव । एवञ्च पक्षविशेष्यकत्वावच्छिन्नव्याप्यत्वावच्छिन्नप्रकारकत्वावच्छे
देन संशयत्वाभाववत्त्वमेव पक्षे व्याप्यवत्त्वनिश्चयत्वं वह्निव्याप्यधूमवान्पर्वतो वह्निव्याप्यालोकवान्न वा पर्वतो वह्निव्याप्यधूमवान्न वा आलोकवान्वह्निव्याप्यधूमवान्न वेत्यादि संशयेच पर्वतविशेष्यकत्वावच्छिन्नधूमप्रकारकत्वावच्छेदेन संशयत्वाभावोऽनुभवसि
द्ध एव पर्वते धूमं न सन्देहिमि इति प्रतीतेस्तत्र सर्वानुभवसिद्धत्वादिति नानुपपत्तिः । चाक्षुषादिज्ञानस्यापि संशयत्वे सध्रुव अयोनन्नानैव संशयत्वानिस्वीक्रियतो । तदभावकूटवत्त्वमेव निश्चयत्वघटकं मननन्तु हेतुतावच्छेदकभेदेनानन्तकारणत्वकल्पनापेक्षया कचित्प
संशयत्वाभावघटितनिश्चयत्वेन सर्वसाधारणकारणताकल्पने लाघवात् जातिर्व्याप्यवृत्तिताच मिश्रादिभिरपि स्वीक्रियत इति नापसिद्धान्तप्रतीतिः । भवतु वा संशयत्वं जातिर्व्याप्यवृत्तिरेव तद्विशिष्टनिरूपितत्वं संशयकोटिद्वयविषयतायामेवोपेयते । भवतु
च संशयनिश्चययोर्विषयताभेदः तं विना संशयसमुच्चययोर्वैलक्षण्यानुपपत्तेरुक्तत्वात् । एवञ्च संशयत्वविशिष्टानिरूपितत्वस्य पक्षादिविषयतानिरूपितव्याप्यविषयतायां निवेशात्सामञ्जस्यम् ॥ धूमत्वालोकत्वाद्यवच्छिन्नाभावघटितधूमत्वत्वानाभाववानादिनोप
थक्पृथक् ॥ विशेषणताया सहकारिताया वा अनुरोधात्साधनतावच्छेदकभेदेन प्रामाण्यकारणताभेदस्यानावश्यकत्वेऽपि इति केचिद्धितिकाराक्षिपन्ति । तत्र विषयताया सम्बन्धेन तन्मद्रूपत्वान्यत्र ज्ञानविशिष्टधूमादिप्रकारताभेदकूटविशिष्टत्वेन व्याप्यविषयतानां का
रणतावच्छेदकत्वं आलोकादिविषयताया धूमाभावादिघटितधूमत्वग्रहेत्वान्वत्येण भानेऽपि तादृशधूमत्वग्रहविशिष्टधूमादिविषयताभेदस्यावश्यकत्वादानीमालोकादिषयाणमर्थादनुमितिः । अप्रामाण्यग्रहास्कन्दितेचकालान्तरेण तदुहविषये तद्विशिष्टभेदोपगमात्
नानुपपत्तिरिति ॥ वस्तुतस्तु कारणतावच्छेदकव्याप्यप्रकारताया किञ्चिद्धर्मविशिष्टविषयताविशिष्टानात्वं निवेशनीयं । विषयताया धर्मवैशिष्ट्यञ्च स्वावच्छिन्नप्रकारतानिरूपितत्वस्वावच्छिन्नाभाववद्विशेष्यतानिरूपितत्वोभयसम्बन्धेन । विषयताया वैशिष्ट्यञ्च
स्वनिरूपकप्रकारतावच्छेदकावच्छिन्नत्वस्वनिरूपकज्ञानसमानाधिकरणनिरूपितत्वस्वनिरूपकज्ञानविशेष्यीभूतज्ञाननिरूपितत्वैतत्त्रितयसम्बन्धेनान्यतमः । इत्थञ्च विषयताधूमाद्यप्रामाण्यग्राह्यधूमादिप्रकारतानिरूपितज्ञानभेदेन विषयताभेदमतेन काश्चि

केवला. ग्र. ६

१८

तोधूमा८

दोष इति केचित्तन्मादधिते ।। परे तु जनकतावच्छेदकप्रकारतायां यद्धूमविषयकज्ञानत्वावच्छिन्नत्वं न पक्षतो स्याद्प्रयोजकं तद्वच्छिन्नाभावघटितभ्रमत्वज्ञानमकिंचित्करं इत्थं व्याप्यप्रकारतायामवच्छेदकतया धूमत्वाद्यभानेपि व्याप्यवानयमिति ज्ञानादनुमितेरुत्पत्त्या वह्निव्याप्यधूमवान
यमित्यादि ज्ञाने भाववत्ति धूमप्रकारताकमिदं ज्ञानमित्यप्रामाण्यज्ञानदशायां वह्निव्याप्यत्वावच्छिन्नाभावघटित ग्रहे नायमनुमानुमिति एतन्नानुमितित्वं तादृशभ्रमत्वग्रह एव कल्प्यते। व्याप्यधर्मानवगाहि निश्चयस्थले व्याप्यधूमादिनिश्चये प्रामाण्यग्रहत
ले व्याप्यत्वावच्छिन्नाभावस्य धर्मिणि संशयसंभवेन तद्धर्मिविशेष्यकज्ञाने साध्याभावघटितभ्रमत्वसंशयस्यैवोचितत्वात् अर्जिततया प्रायशः प्रसज्यात् व्याप्यप्रकारकज्ञानविशेष्यकस्य व्याप्यत्वावच्छिन्नाभाववत्तद्धर्मिविशेष्यकसंशयरूपभ्रमत्वग्रहत्वेन विशेषणविशेष्याभाव
वैपरीत्यमात्रेण तादृशविशेष्यतया भासमाने तद्धर्मिणि व्याप्यत्वावच्छिन्नाभावसंशयस्यापि तुल्यत्वेन तादृशसंशयकल्पनस्यैव नातिप्रसङ्गः एवं व्याप्यत्वावच्छिन्नाभावघटितभ्रमत्वज्ञानाभावः परामर्शस्य विशेषणं सहकारि ऽप्यर्थे न धूमत्वाद्यवच्छिन्नाभाव
घटितभ्रमत्वज्ञानाभाव इति न किंचिदनुपपन्नं। यत्र साध्यपक्षस्थले व्याप्यतावच्छेदकविशेषाभावघटितभ्रमत्वग्रहदशायामितरानुमितिकोत्पत्तिः व्याप्यत्वावच्छिन्नाभावघटितभ्रमत्वग्रहनिवृत्तस्य तत्पक्षस्थले भिन्नव्यापकमेवात्र लाघवाभिधानमिति वदन्ति। ननु
साध्यसामानाधिकरण्यघटितव्याप्तेः पक्षे सामानाधिकरण्यप्रविष्टसाध्यसम्बन्धस्यैवानुमितौ विधेयतावच्छेदकसम्बन्धताप्रयोजकं तद्घटितोक्तव्याप्तेरनुमितिहेतुत्वे च सम्बन्धभाननियामकदुर्लभतया प्रसङ्गो निरस्यति।। अतस्तत्सम्बन्धेनेति।। इत्थं चाव्याप्तिघटकसाध्याभावप्रतियोगितानिरूपिता
यामवच्छेदकतया सम्बन्धभानमेव विषयतावच्छेदकतया सम्बन्धभाननियामकमित्यर्थः। ननु व्याप्तेः साध्यसाधनसामानाधिकरण्याघटितत्वे पक्षे कदाचित् संयोगेन हेतुमत्ताज्ञानादेवानुमितिः कदाचित्समवायादिनेत्यत्र किंनियामकं व्याप्तेस्तद्घटितत्वेऽपि तादृशसामानाधिकरण्यघ
टकसाधनीयसम्बन्धेन पक्षे साधनवत्ताज्ञानस्यानुमितिहेतुतया तन्नियम इत्यत आह।। साध्याभाववतीति।। येन सम्बन्धेनावृत्तित्वमिति।। यत्सम्बन्धावच्छिन्नवृत्त्यभाव इत्यर्थः।। नातिप्रसङ्गः।। नाप्यन्यस्य समवायादिसम्बन्धेन धूमादिमति वह्न्याद्यनुमितिप्रसङ्गः नन्वन्ये
व्याप्तेः हन्ति साधारणतया तद्धेतुकाप्यनुमितिः स्यात्तत्रस्यादित्यत आह।। आकाशादेरिति।। तथात्वेपि।। साध्याभाववद्वृत्तित्वेपि।। अभ्रान्तस्य तत्र पक्षधर्मताज्ञानविरहान्नानुमितिः नन्वेवमप्येषधूमं विना नावृत्तिहेतुकानुमितिः स्यादनुभवो व्याहन्येत इत्यत आह।। निवि
शतांवेति।। वाकारोऽनास्थायां भूः ऽन्यानुभवस्य सविवादत्वात्।। तत्र।। तादृशव्याप्तावपि।। सामानाधिकरण्यमिति।। तथापि दर्शितलाघवाक्षतेरिति भावः। वृत्तिमत्त्वनिवेशेनैवोक्तातिप्रसङ्गवारणसम्भवे साध्याधिकरणावृत्तित्वनिवेशनिरर्थकः हेतोः साध्यसामानाधिकरण्यनिवेशदशा
यामनुमित्यापत्तेर्व्यापकतापत्तामर्थहेतुताविचारस्यापि दर्शितत्वान्निरासस्य प्रकृतेनाप्राप्त्यादित्याशयेनाह।। वृत्तिमत्त्वंचेति।। वृत्तिमत्त्वं व्याप्यतायाः घटकसम्बन्धेन सम्बन्धास्तित्वं मत्त्वादिति सम्बन्धेन आकाशादेरपि द्रव्यत्वादिव्याप्यतावृत्तिः। साध्याभाववद्वृत्तित्वाभावे
साध्याभाववद्वृत्तिभेदत्वस्य साध्याभाववद्वृत्तित्वस्य प्रत्येकं हेतुत्वे तत्तु गमः एकतरस्यैव हेतुत्वं विनिगमनाविरहः दुर्वचं साध्याभाववद्वृत्तिभिन्नलक्षणशरीरे एकस्य धर्मिणोऽधिकस्य निवेशे तदेव हेतुत्वेनानुभवविरोधः अनुमितेहेतुताप्रयोजकस्य व्याप्तेश्चाद्ज्ञानविरोधित्वस्यापि विशेषादिति
तादृशव्याप्ताहलादिविषयधियो वाऽनुगमे व्यापकसामानाधिकरण्यरूपस्य तद्घटकत्वं वा ऽनुगमकरूपस्वान्तत्वेन व्यापकसामानाधिकरण्यरूपव्याप्त्यनुमितिहेतुः स्यादेवेत्याशङ्कते।। अर्थेति।। व्यभिचारादेरिति।। साध्याभाववद्वृत्तित्वादेरित्यर्थः।। विरोधित्वविषयत्वेनेति।। तन्नद
लेन व्याप्तिग्रहमनुगमयत्तताविषयकत्वेन ज्ञानानुगमः विरोधे वच्छन्नेनाप्येति कार्यकारणेतुल्यमित्वा ज्ञानविरोधित्वेन ज्ञानानुगमरूपेण हेतुतामेव तात्पर्यं।। व्यभिचारबुद्धि।। साध्याभाववद्वृत्तित्वबुद्धि।। न चैवमिति।। व्यापकताधियः साध्याभावव
द्वृत्तित्वधीप्रतिबन्धकत्वमेवेत्यर्थः। मानाभावादिति भावः। ननु वन्ह्यभाववद्वृत्तिधूम इति ज्ञाने तुल्यवित्तिवेद्यतया वह्नित्वे धूमत्वधर्मीयभावप्रतियोगितावच्छेदकत्वभानानुवृत्तित्वं धर्मिकतादृशावच्छेदकत्वाभावरूपव्यापकतावच्छेदकतावगाहिनो ज्ञानस्य प्रा

भावत्वगाहितया विरोधित्वम विवादमेवेत्याशङ्क्य ग्राह्याभावावगाहिनोपि ज्ञानस्य विशेष्यांशे समानप्रकारकत्वेन विरोधिता जातित्वादिना भासमानेन वह्नित्वादौ अवच्छेदकादिबुद्धिं प्रति वह्नित्वाद्यवच्छिन्ने तन्नावच्छेदकत्वमिष्टो विरोधितात् एवं प्रतियोगितावच्छेदकत्वावगाहि
ज्ञानं विरोधि अन्यथा अतिप्रसङ्गादित्याशयेन प्रतिबन्धकभावाभिमतज्ञानयोः समानप्रकारकत्वे व्यभिचारज्ञाने ग्राह्याभावावच्छेदकत्वस्य सम्बन्धताप्रदर्शनेन तत्सम्बन्धावगाहित्वेऽत्रभासते इत्यभिप्रेणान्वयः एवं रूपेण भानं वह्नित्ववदभाववति धूम इति वह्नित्वत्वाद्यवच्छिन्नविषयकधी
विरोधित्वेनानुगमेन स्वरूपतो वह्नित्वावगाहिनो वह्न्यभाववद्वृत्तिधूम इति ज्ञानात् सङ्ग्रहे बोध्यः. सम्बन्धमर्थादित्येत्यनेन तदंशे निष्प्रकारकत्वमपि दर्शितम्।। विषयाविरोधविरहादिति।। विरोधिताप्रयोजकविषयताविरहादित्यर्थः अवच्छेदकत्व तदभावरूपविषययोर्विरोधस्फूर्ति
विवादतया यथाश्रुतासङ्गतेः।। विशिष्टस्य।। महानसीयत्वादिरूपविशेषणानवधर्मितावच्छेदकतापन्नस्य।। अवच्छेदकत्वेन।। धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वेन. तादृशप्रतियोगितावच्छेदकतानुपपत्त्या इति शेषः।। प्रकारान्तरानुसरणे।। प्रतियोगिता
नवच्छेदकसाध्यताकत्वेनेत्यादृशधर्मे साध्यतावच्छेदकतापर्याप्तिस्तादृशधर्मे प्रतियोगितावच्छेदकतापर्याप्त्यवच्छिन्नाकिञ्चिद्धर्मपर्याप्तिमत्त्वविवक्षणे वह्नित्वादिरूपसाध्यतावच्छेदकतदितरावच्छिन्नभिन्नप्रतियोगिताविशेषवेत्यर्थः महानसीयत्वसहितवह्नित्वपर्याप्तावच्छेदक
तायाः पर्याप्त्यवच्छेदको न शुद्धवह्नित्वमात्रमतिधर्मः न्यूनवृत्तित्वात् तथाच तादृशधर्मानवच्छिन्नो बुद्धिविशेषविषयतावच्छेदकत्वादिधर्मस्य पर्याप्तिमादाय वह्नित्वादेर्धूमत्वादिव्यापकतावच्छेदकत्वमिति भावः. न च विशिष्टपर्याप्त्यवच्छेदकतायाः प्रत्येकं द्वित्वपदमाचष्टे लभ्य
नयथाश्रुतमेव साधीयतिवाच्यम्. एवं सति महानसीयवह्निभिन्नवह्निमान् धूमादित्यादावतिव्याप्तिः. साध्यतावच्छेदकघटकयोर्महानसीयवह्निभिन्नत्ववह्नित्वयोः प्रत्येकमवच्छेदकत्वपर्याप्तिविरहेण तदन्तर्निवेशस्य व्याप्यनवच्छेदकतायां दुर्वारत्वात्।। कुतश्चिदिति।। विषय
विरोधाविरहादित्यनुषज्यते. निरुक्तव्यभिचारज्ञानदर्शितरीत्या परिष्करणीयव्यापकताप्रविष्टाभावस्य धर्मिणि सत्प्रतियोगितावच्छेदकावच्छिन्नत्वाभावनादितिभावः. ननु व्यभिचारज्ञानव्यापकताज्ञानयोर्मणिमन्त्रादिन्यायेन परस्परविरोधिता न तु ग्राह्याभावावगाहित्वेनेति समा
नप्रकारकमनपेक्षितमत आह।। मणीति।। इदमुपलक्षणम्. व्यापकताज्ञानस्य व्यभिचारधीविरोधित्वेपि सामानाधिकरण्यविषयताया विषयतायाश्च प्रतिबन्धकतानवच्छेदकतया पक्षविषयतानिरूपितहेतुविषयताया अपि तादृशप्रतिबन्धकतानवच्छेदकत्वेन परामर्श
कारणतावच्छेदके निवेशासम्भवात् वह्निव्याप्यधूमो धूमवान्पर्वत इत्यादिसमूहालम्बनरूपाव्यभिचारधीविरोधिज्ञानादनुमित्यापत्तिर्दुर्वारैवापि बोध्यम्. ननु केवलान्वयिसाध्यकानुमितिप्रसङ्गविलोपापादनायानुसृतापि व्यापकतासामानाधिकरण्यरूपव्याप्तिरेवानुमितिप्र
योजिकेत्यत आह।। व्यापकेति।। ज्ञानादिमानित्याद्यनुमिताविति।। स्वरूपतो ज्ञानत्वादिविषयतावच्छेदकावगाह्यनुमितेरित्यर्थः।। अयोगादिति।। यद्धर्मावच्छिन्ने साध्यतावच्छेदके व्यापकतावच्छेदकत्वग्रहस्तेन रूपेणैव साध्यतावच्छेदकमनुमितिविषय इति नियमस्याभ्युपगन्तव्यत्वा
दितिभावः. व्यतिरेकिसाध्यकस्थले साध्याभाववद्वृत्तित्वज्ञानं केवलान्वयिस्थले व्यापकसामानाधिकरण्यज्ञानं हेतुरित्युक्तौ वह्न्यभाववद्वृत्तित्वज्ञानात् स्वरूपतो वह्नित्वादिविषयिण्या वह्निमानित्याद्यनुमितेर्निर्वाहः तद्विषयतया केवलान्वयिनो ज्ञानस्य साध्यतानुसरणम्. वा
च्यत्वादेरखण्डधर्मत्वाभावेन स्वरूपतोऽभानात्तदवच्छिन्नसाध्यकोपेक्षा. निधर्मितावच्छेदकव्यापकतावच्छेदकत्वग्रहस्य व्यभिचारग्रहप्रतिबध्यतया सधर्मितावच्छेदकस्य स्वरूपतो ज्ञानत्वानवगाहितया च न तस्य ज्ञानवानयमित्यनुमितिहेतुतासम्भव इति बोध्यम्. एवं च
हेण व्यापकतावच्छेदकत्वावगाहिपरामर्शस्य स्वरूपतो विधेयतानवच्छेदकत्वग्रहान्नातिप्रसङ्ग इत्याशयेनाह।। अनुभवत्वव्यापकेति।। प्रत्यक्षत्वानुभवत्वादिसाधारण्यवारणायानुभवत्वव्यापकेति. अनुभवतदन्यवृत्तीत्यर्थकम्. स्मृतिव्यावर्तनायानुभवपदनिवेशः. सत्वगुण
त्वव्यावर्तनाय गुणत्वव्याप्येति. किञ्चिद्गुणावृत्तीत्यर्थकं।। तथात्वग्रहेपि।। व्यापकतावच्छेदकत्वग्रहेपि।। तत्प्रसङ्गात्।। स्वरूपतो ज्ञानत्वविषयकानुमितिप्रसङ्गात्. न च तेन रूपेण व्यापकतावच्छेदकत्वग्रहस्यत्वरूपतो ज्ञानत्वादिप्रकारकज्ञानानुमित्यजनकत्वेपि ज्ञानसत्वेन

तद्रूपस्य तादृशानुमितिजनकत्वमविरुद्धमिति वाच्यम्: तथा सत्यसतिसिद्धिविरोध्यादिरूपतादृशानुमितिप्रतिबन्धके ज्ञानत्ववत्ता ··· मित्यत्रैतावन्मात्राकारानुमितेर्विलोपप्रसङ्गात्·।: यत्तु स्वरूपतो यत्र ज्ञानत्वादिकं सामानाधिकरण्यनिरूपकतावच्छेदकतया भासते तादृशव्यापकतावच्छेदकज्ञानत्वव
ज्ज्ञानसमानाधिकरणहेतुमानयमित्यादिपरामर्शोऽज्ञानवानयमित्यनुमितिर्यत्र ज्ञानत्वत्वादिनैव तत्तथा भासते तादृशव्यापकतावच्छेदकज्ञानत्ववत्समानाधिकरणहेतुमानयमिति ज्ञानाऽज्ञानत्ववत्वानयमित्याकारानुमितिरिति केश्चिदुच्यते· तदसत्· व्यापकतावच्छेदकजातिविशेषवद्ज्ञानासमानाधि
करणहेतुमानयमित्यतोपि ज्ञानवानित्यनुमितेरयोगात्· तादृशपरामर्शयोरविशेषेण एकस्मादेव तादृशानुमितिर्नान्यस्मादिति फलबलेन कल्प्यस्यानुभवविरुद्धत्वात्· अन्यथा वै ··· यस्यापि सुवचत्वात्· ज्ञानत्ववऽज्ञानेवानयमित्याकारानुमितिर्द्विधा ज्ञानत्वविषयिणी कदाचित्कदाचित् ज्ञानवानय
मित्यनुमितिरितिनियमस्य तावत्याप्यनिर्वाहश्च· तद्धर्मावच्छिन्ने तत्राप्तनित्वेन व्यापकतावच्छेदकत्वे ज्ञानानां तद्धर्मप्रकारेण साध्यानुमितिस्तेन त्वप्रतियोगितावच्छेदकतया तद्धर्मस्य यादृशं भानं अनुमितावपि तादृशं प्रामाणि इति नियमः· अतो व्यापकतावच्छेदकज्ञानत्ववादेतराप्रसिद्धधर्मवत्स
मानाधिकरणहेतुमानयमिति ज्ञानाऽज्ञानत्ववत्वानयमित्यनुमिति· व्यापकतावच्छेदकज्ञानेतराप्रसिद्धधर्मवत्समानाधिकरणहेतुमानयमित्यादिपरामर्शाच्च ज्ञानवानयमित्यनुमिति: एवं व्यापकतावच्छेदकज्ञानत्वस्वऽज्ञानेतराप्रसिद्धधर्मवत्समानाधिकरणहेतुमानयमित्यादिपरामर्शाच्च ज्ञानवज्ज्ञानवान
यमित्यनुमितिरिति हृत्सम्दर्शितं·। प्रतियोगिताधर्मिकसाध्यतावच्छेदकावच्छिन्नत्वघटितोभयाभावज्ञानमनुमितिहेतुः तत्र साध्यतावच्छेदकस्य स्वरूपतो भानमुभयत्र तदीयसाध्यतावच्छेदकविषयतात्वावानुमितौ तद्विषयतेति नियमान्नकिं प्रदलुपपन्नमित्यपि वदन्ति·। तन्नव्यधिकरणरूपेण प्रतियोगिनोपि यद्विशेषरूपेण प्रति
योगिताभावमभ्युपगच्छतां प्राचां मते साध्यतावच्छेदकावच्छिन्नेऽप्रतियोगिकज्ञानमेवानुमितौ हेतुः तत्र स्वरूपतोपि साध्यतावच्छेदकभानसंभवात्सर्वं सामञ्जस्यमिति ध्येयम्·। साध्याभाववदस्ति त्वज्ञानमात्रस्यानुमितिहेतुत्वे भ्रमं विना केवलान्वयिसाध्यकानुमानेऽनुपगन्तव्यं तथा च केवलान्वयिसा
ध्यकेहेतुमत्ताप्रमायाः एवानुमितिहेतुत्वं व्यतिरेकिसाध्यके तु केवलान्वयिसाध्यकत्वभ्रमादेवानुमितिरिति विपरीतमेव युक्तमिति न स्यादित्यत आह·। अतएवेति·। ज्ञानत्वत्वाद्यवच्छिन्नेऽचैयत्तान्वयितावच्छेदकत्वभानात्स्वरूपतो ज्ञानत्वाद्यवच्छिन्नप्रकारकज्ञानानुमितेरनुपपद्यमानत्वादेवेत्यर्थः··5 ज्ञानत्वा
तदुपपत्तिप्रकारश्च दूषणान्तरमाह·। सर्वजनानुभवसिद्धेत्यादिना·। उक्तस्थाने व्यतिरेकव्यन्वयादिज्ञानमानस्य भ्रान्तिनियोगाय सर्वजनप्रसिद्धानुमितौ तत्कत्वकथनं· केवलान्वयित्वभ्रमात्मप्रमाणाभाव गृह्यमाणेत्यादिर्यात्येर्केति·। ··· व·।·केवलान्वयितया गृह्यमाणवाच्यत्वादेरनुमितौ तिद्धि
र्हेतापव्यापकताज्ञानहेतुताकल्पनमपि दुर्वारमेव· नच वाच्यत्वत्वमभावप्रतियोगितानवच्छेदकं भितिज्ञानकालेपि सर्वान्वाविधया भावेवाच्यत्वत्वावच्छिन्नप्रतियोगिताक सालगाहमानप्रकारक ··· ज्ञानस्य भवसेवेति न व्यापकताधीहेतुता ··· ति वाच्यम्· अभावत्वावच्छेदे
नेऽनुयोगितात्वावच्छेदेनवा स्वरूपसम्बन्धावच्छिन्नवाच्यत्वत्वावच्छिन्नप्रतियोगिताकत्वं तत्सामान्यावच्छिन्नवाच्यत्वत्वावच्छिन्नप्रतियोगिताभावज्ञानद साध्याभाववद्वृत्तित्वरूपव्याप्तिग्रहस्य दुरुपपादत्वात्· समानप्रकारकविरोधिज्ञानसत्त्वात्· स्वरूपसम्बन्धावच्छिन्नवाच्यत्वे
त्वावच्छिन्नप्रतियोगिताकत्वप्रसिद्धेरपि भ्रमात्मकबाधज्ञानसम्भवात्· अभावत्वप्रतियोगितावच्छेदकस्वरूपस्वावच्छिन्नप्रतियोगिताकसम्बन्धेन प्रकारत्वे तादृशव्याप्यिकरणतावस्थावच्छिन्नवाच्यत्वत्वाभावविषयकप्रमात्मकविरोधिज्ञानस्य सुलभत्वात्· एकत्र स्वरूपसम्बन्धेन
वच्छिन्नवाच्यत्वत्वावच्छिन्नप्रकारकज्ञानादिनिरुक्तवाच्यत्वाद्यविषयिता याभिव तादृशप्रतियोगिताकत्वप्रसिद्धिप्रकारता· स्वरूपस्वावच्छिन्नत्वेन तत्समप्रकारप्रतियोगितायाश्च स्वरूपसम्बन्धावच्छिन्नत्वात्· नचाविवादिता निरुक्तप्रतियोगिताकत्वमभावादिनिरुक्तोऽन्यजातीय
मितिवाच्यम्· मिथो वैलक्षण्यस्य प्रामाणिकतया एकजातीयतायां आवश्यकत्वात्· अतएव संयोगादिसाध्याणामपि सप्रतियोगिकत्वमभावत्वमित्यस्य ··· वक्ष्यति विरोध्यग्रे ··· निरूप्यकं साध्यरूपप्रकारत्वंशेऽनुद्धर्मितावच्छेदकं तद्धर्मितावैपरीत्यज्ञानाप्रतिबध्यं
साध्यीयवदहर्निशमानित्याकारकव्याप्तिज्ञानतदपि संभवतीति केचिदूचुः· तदसुन्दरं· तावतापि प्रामाण्यकेवलान्वयिसाध्यकानुमितेर्दुरुपपादत्वव्यापकताधीहेतुतामन्तरेण· एवं तत्र ज्ञानं प्रति सदोषत्वसहिताभावत्वेनाभाववविषयकं अन्यनिरूपकसोऽनन्वदीय
संहितानुयोगितावच्छेदकविशेषसंसर्गानुयोगिताविशेषरूपाभाववत्ताविषयकत्वात्·नास्ति तुल्याकारज्ञानस्य बाध्यविरोधित्वं विसायितादिसाधारणतत्कालिप्रसक्तेनकेवलतदीयत्वादिना· भावमनुयोगितावच्छेदकविशेषसंसर्गाश्च गाहमानतया हेतुमतिसाध्यनाशित्याकारके साध्यीयत्वाभा
वज्ञानाभ्यामभावविषयकं तदीयत्वानुयोगिताविशेषसम्बन्धेनानुयोगिताविषयकं वा व्यभिचारज्ञानस्य वानुमितिजनकज्ञानाविरोधित्वात्· समुदीयत्वादेः मात्रेणाभावादिविषयकं एवंचाभावत्वानवच्छिन्नानुयोगिताविशेषत्वानवच्छिन्नानुयोगिताया वा तदीयत्वाव

ग्राहिव्यभिचारज्ञानप्रतिबध्यं ज्ञानं कथं नानुमितिहेतुः संभवति· तदीयत्वमात्रेणाभावादिविषयकसाध्याभावे हेतुसामानाधिकरण्यज्ञानदशायामनुमित्युत्पत्तेः· न च तदानीं साध्याभावत्वेनाभावविषयकज्ञानादेवानुमितिप्रतिबन्धः साधारणरूपेणैवानुमितिहेतुत्वोपगमादिति वाच्यम्· तथाप्युक्तदशाया
मेवाभावोऽत्र साध्य इत्युपदर्शितकेवलान्वयिलिङ्गकेऽनुमितिदर्शनापत्तेः· एवं सत्यन्वयसाधारणसाध्याभावत्वमात्रेण विशेषे साध्यस्य वृत्तित्वमप्यतीतो तत्र साध्यीयवदवृत्तित्वमेव दुर्घटमित्यभाववत्ताव्यवहारेऽसिद्धे तस्य साध्याभावादेवाप्रसिद्धः कथं तत्सम्भवात् तदधिकरणमिलज्ञानस्य कथं कारणतेत्या
शङ्क्य तत्र केवलान्वयित्वज्ञानदशायां तत्साध्यकानुमितेरसम्भवेन तत्र पक्षसपक्षत्वेनानुमितित्वं हि चतत्कार्यस्य पक्षे तत्सत्त्वनिवृत्त्यादेः सम्भव इत्याशयेनाह·।· मेयत्वादेरिति·।· ननु केवलान्वयित्वग्रहे यत्वादावग्रहदशायां घटादौ तत्संशयनिवृत्तिकाऽनुमितिः कथमभ्रान्तस्य नुपपद्यत इत्यत
आह·।· कथंचिल्लक्ष्यवृत्तिधर्मव्यापकत्वेनेति·।· लिङ्गेनेति शेषः· ननु वाच्यत्वादावुक्तलिङ्गज्ञानस्यावश्यकत्वेपि तादृशलिङ्गे घटादिवृत्तित्वसहचारग्रहसत्वेन तत्तत्साध्यव्याप्तिग्रहे तथा तदनुमितेः संभवेन केवलान्वयिसाध्यकानुमितेरावश्यकत्वेत्यत आह· नन्वित्याद्युक्तम्· उक्तलिङ्गविशेष्यक
वृत्तित्वादिव्याप्तिग्रहस्य संभवेपि यद्यद्वृत्तितावच्छेदकावच्छिन्नव्यापकं तत्तद्वृत्तिरिति सामान्यव्याप्तिग्रहः सुलभः· घटवृत्तितावच्छेदकावच्छिन्नव्यापकमपि घटवृत्तिः स्यादिति व्यभिचारशङ्कया नोक्तलिङ्गे घटवृत्तित्वव्याप्तिग्रहश्चिन्ताशङ्कनीया घटवृत्ते घटवृत्तितावच्छेदकावच्छिन्नत्वाच्चि
करणघटनिष्ठाभावप्रतियोगिताया आवश्यकत्वेनोक्तहेतौ घटवृत्तिसाधारण्यरूपव्यभिचारव्यापकताया एव व्याघातादिति भावः·।· अथवा ननु यत्र स्थले यत्र घटवृत्तित्वमपि यत्वादि हेतुत्वमन्यत्र सामिलादौ सहचारग्रहाभावाद्घटवृत्तित्वावच्छिन्नव्यापकता मेयत्वादौ पूर्वं न गृहीता अपि तु
यत्र ज्ञेयत्वादिकं तत्र मेयत्वमित्यादिसहचारज्ञानाज्ज्ञेयत्वावच्छिन्ननिरूपितव्यापकतामात्रं तत्र सिद्धमिति मते घटादौ मेयत्वानुमितिः संभवति· न तु प्रमेयत्वादेर्घटादिवृत्तित्वानुमितिः निरुक्तलिङ्गग्रहादित्यत उक्तं कथंचिदादिति·।· व्यापकत्वनिरूपकतयाभासमाने ज्ञेयत्वे साध्यवृत्तित्व
पलक्षणाविधया घटादिवृत्तित्वग्रहः इति शेषः· अभावप्रतियोगिकोऽवृत्तित्वलक्षणविधया भानस्याप्रामाणिकत्वे विशिष्टव्यापकताग्रहे लेकयावत्पदार्थोपस्थितो विशिष्टव्यापकता स्याभावत्वेन विशेष्यव्यापकत्वे निश्चीयमाने विशिष्टस्य सहचारग्रहमनपेक्ष्यैवाविशिष्टव्यापकतानिश्चयसम्भ
संभवेन तद्वृत्तिधर्मव्यापकत्वरूपलिङ्गस्य प्रमेयत्वादौ निश्चयोपपत्त्यर्थः·।· इदमत्र बोध्यम्· केवलान्वयिसाधारणव्याप्तेः साध्यसामानाधिकरण्यरूपाभिधानाघटिततया गौरवेण तत्साध्यकानुमानानभ्युपगमोऽनुचितः पक्षधर्मतादिहेतुव्यापकं साध्यमिति ज्ञानादेवानुमितेः स्वीकर्तुमुचितत्वात्
यदि च व्यापकताज्ञाने प्रतियोगित्वादिकं प्रकारः साध्याभाववदवृत्तित्वज्ञाने संसर्ग इत्यतः किमपि लाघवं मन्यते तदा पक्षीयहेतुमत्तावच्छेदेन साध्यवत्त्वावगाहिनः साध्यांशे व्यापकतारूपसंसर्गावगाहित्वेन हेतुता किं नोपेयते· व्यापकताज्ञाने वह्नित्वसादिविषयतानिवेशेन गौरवाच्चेद्धेतुत्वेपि
तदा [illegible] प्रमादिरूपसाध्यतावच्छेदकांशे प्रमात्वादिरूपविशेषणावच्छिन्नव्यापकतावच्छेदकत्वावगाहिनः साध्यप्रमेयत्वादिसाध्यकानुमितेर्हेतुतां किं नोपेक्षसे प्रमात्वविषयतानिवेशस्योभयमतेऽपि तुल्यत्वात् एकतरकल्पेनावच्छेदकेऽप्यन्यरूपावच्छिन्नत्वावच्छेदकत्वाभावावगाहित्वे च ज्ञान
तत्पदार्थविषयकप्रामाण्यज्ञानान्तरघटितत्वेन हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वापि प्रमात्वाद्यवच्छिन्नव्यापकतावच्छेदकताया· एवं सत्वात् विशिष्य हेतुतावच्छेदकतामनभ्युपेत्य हेतुतावच्छेदकत्वेन व्यापकतावगाहित्वे विशेष्यहेतुतावादेनापि निराबाधमिति केवलान्वयिन्यनुमानसम्व्याप्तेः· साधनाभा
देऽप्यभेदेऽव्यधिकरणधर्मावच्छिन्नाभावच्छेदकताकाभावरूपप्रामाणिकत्वे साध्याभाववदवृत्तित्वज्ञानहेतुत्वमतेऽपि केवलान्वय्यनुमानं निराबाधमेव· साध्यतावच्छेदकविशिष्टसाध्याभावरूपप्रामाणिकत्वेऽपि व्यधिकरणसम्बन्धावच्छिन्नवाच्यत्वादिमद्भेदवद
व्यधिकरणवाच्यत्वत्वविशिष्टावच्छिन्नाभावमिति प्रतियोगितावच्छेदकताकाभावरूपव्याप्तेः प्रसिद्धिसम्भवात्· न च व्यधिकरणसाध्यावच्छिन्नाभाववदवृत्तित्वाभावस्य व्याप्तित्वे व्यभिचारिहेतावपि साध्याभावावच्छिन्नान्यदीयाभाववद्वृत्तित्वाभावसत्वात्साध्यसिद्धेः· परा
मर्शे सम्भवदिति वाच्यम्· साध्यतावच्छेदकविशिष्ट[illegible] सहिताभावसमानावच्छिन्नाभावनिष्ठावच्छेदकताया एव व्याप्तिघटकत्वात्· धूमीयत्वादिना घटाभावादिसद्वृत्तित्वाभावीयप्रतियोगितानिरूपिताया समभव्यानेन [illegible] वच्छेदकताया व्यधिकरणतया धूमादावेसम्भ
नाधिकरणतया घटादेरप्यवच्छेदकत्वात्· व्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितावच्छेदकताया व्यधिकरणस्वसमानाधिकरणोपेक्षाकारणत्वात्·।· अथ समवायित्वेन वाच्यत्वाभावस्यापि मित्यादिप्रतीतिबलाद्वृद एव व्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकताकः न च

के०व्या० ग० टी०

११

साभावोचितत्वा· अत एव दीधितिकृता प्रमेयत्वादिकेवलान्वयिधर्मावच्छिन्नहेतुकस्थले तद्रूपस्य व्यधिकरणतया प्रतियोगितावच्छेदकत्वासम्भवेन साध्याभावसजातीयतद्व्यापकाभावप्रतियोगितावच्छेदकत्वं निराकृत्य यथाश्रुतमिश्रलक्षणमपि सङ्गच्छते· अन्यथा समवायित्वा
दिना प्रमेयत्वादेरपि तादृशाभावप्रतियोगितावच्छेदकत्वसम्भवेन तल्लक्षणनिर्वाहात्· न च तादृशाभावो व्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकताक एव न तु तादृशप्रतियोगिताक इति तादृशप्रतियोगिताकत्वेन साध्याभावसजातीय इति न तल्लक्षणघटक इति वाच्यम्·
समनियताभावैक्येन व्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकताकाभावस्यापि स्वसमनियततादृशप्रतियोगिताकाभावरूपत्वादिति चेन्न· समवायितया वाच्यत्ववान्नायमिति प्रतीति समवायितया वाच्यत्वं वा नास्तीति प्रतीतेर्दुर्वारत्वात्· मा भूद्वा व्यधिकरणधर्मावच्छिन्नप्र
तियोगितावच्छेदकताकोऽप्यन्याभावः तथापि साध्यवदनिरूपितत्वावच्छिन्नाभाव एव व्याप्तिः केवलान्वयिनि साध्यवदनिरूपितत्वं किञ्चिदनिरूपितघटादेरप्रसिद्धं तदवच्छिन्नाधेयत्वाभावस्तत्र व्यधिकरणधर्मावच्छिन्नप्रतियोगिताक एवाप्रसिद्धः· व्यभिचारिणि व्यभिचारनि
रूपकाधिकरणाधेयत्वप्रतियोगिनि साध्यवदनिरूपितत्वसत्त्वेन तद्रूपावच्छिन्नाधेयत्वाभावसमानाधिकरणधर्मावच्छिन्नाभाव एव तस्य हेतावसत्त्वान्नातिव्याप्तिः सत्त्वादिनिष्ठद्रव्यगुणादिनिरूपिताधेयतायाः स्वस्वनिरूपकद्रव्यगुणादिरूपाधिकरणभेदाद्भिन्नत्वेन· द्रव्याधेयताया
गुणाद्यन्यत्वविशिष्टसत्तात्वावच्छिन्नत्वात्· गुणाद्याधेयतायाश्च तदनवच्छिन्नत्वात् तेन रूपेण सत्तादेर्गुणाद्यवृत्तित्वात्· अत सत्तानिष्ठगुणाद्याधेयत्वं द्रव्यत्वादिसाध्यवदनिरूपितमेव· यत्तु व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगमेऽपि हेतुनिष्ठसाध्यवन्निरूपिता
धेयताभिन्नाधेयताशून्यत्वरूपव्याप्तेः केवलान्वयिसाध्यकसाधारणी सम्भवति· हेतुभिन्नपदार्थनिष्ठसाध्यवदाधेयताया एव हेतुनिष्ठसाध्यवदाधेयतातो भिन्नायाः प्रसिद्धेरिति·।· तन्न सम्यक्· यत्र केवलान्वयिसाध्यके प्रमेयसामान्यस्यैव हेतुता तत्र तादृशाधेयत्वाप्र
सिद्धेः· सत्त्वादेः साध्यत्वे समवायसम्बन्धेन समवेतत्वादिना हेतुत्वे हेतुनिष्ठाधेयताभिन्नहेतुतावच्छेदकसम्बन्धावच्छिन्नाधेयत्वाप्रसिद्धेश्च· यदि स्वनिष्ठसाध्यवदाधेयत्वभिन्नतादृशाधेयताशून्यत्वं स्वस्य व्याप्तिः एकहेतुव्यक्तिनिष्ठतादृशाधेयत्वाभिन्नाधेयताहेतुत्वान्त
रप्रसिद्धत्वात् तदन्यत्वे तद्धेतुव्यक्तेर्घटभेदेत्युच्यते· तदा हेतुव्यक्तिभेदेन व्याप्तिभेदः स्यात् हेतुतावच्छेदकावच्छिन्नतादृशाधेयत्वभेदनिवेशने निर्वाहेऽपि विशेषधर्मावच्छिन्नाधेयताशून्यस्यैव सामान्यधर्मावच्छिन्नत्वेऽदूषकत्वादिति·।· अर्थापत्तेः प्रमाणान्तरत्वव्यवस्थापयिषयेत्य
तिरेकव्याप्तिकतायामप्यनुमित्युपयोगितां त्वण्याति·।· ए[illegible]मिति·।· गौरवादिति·।· साध्याभाववद्वृत्तित्वापेक्षयेत्यादिः· तादृशप्रतियोगित्वज्ञानस्य विजातीयप्रमितिहेतुतया भवतोऽप्यावश्यकत्वाद्गौरवमकिञ्चित्करमत आह·।· व्यभिचारज्ञानेति·।· व्यभिचा
रज्ञानविरोधिज्ञानाघटितसामग्र्या अप्यनुमितिप्रयोजकत्वे आकाङ्क्षादिज्ञानघटितसामग्र्या अपि तथात्वापत्तेः शब्दादीनामपि स्वतन्त्रप्रमाणत्वोच्छेदप्रसङ्ग इति भावः· ननु हेत्वभावाभावे हेतोः साध्याभावसामानाधिकरण्यग्रहरूपे व्यभिचारज्ञाने हेत्वभावसा
कमात्रव्यापकताग्राही विरोधित्वेन व्यापकाभिमतस्याभावे व्याप्यत्वाभिमतसामानाधिकरण्यग्रहे व्यापकताज्ञानस्य प्रतिबन्धकत्वादित्यत आह·।· वह्न्यभावेति·।· तत्र·।· धूमे कदाचित् चित्तद्वादिति·।· धूमाभावाभाववत्त्ववह्न्यभावसामानाधिकरण्यग्रहे तद्व्याप्तिनिवेशतया वह्न्यभावसमानाधि
कारणाभावप्रतियोगितया धूमाभावे भानेन तु हेतोर्धूमाभावाप्रतियोगित्वज्ञानस्य ग्राह्याभावावगाहित्वादिति भावः· प्रतियोगित्वस्य सम्बन्धविधया ज्ञाने प्रतियोगित्वाभावज्ञानस्य प्रतिबन्धकत्वे न वा स्वत्वविशिष्टाभावेनु कदाचिदित्युक्तम्·।· ननु धूमत्वेनेति·।· तत्र वह्न्यभावसामानाधिकरण्यनु
द्धिविरुद्धत्वाति विपरीतमनुभूयते·।· भिन्नप्रकारत्वादिति·।· धूमाभावाभाववत्त्वप्रकारकत्वेन तुल्यविषयकत्वे विरोधात् तथापि धूमाभावे प्रतियोगित्वानवगाहित्वादित्यर्थः· ननु व्यतिरेकव्याप्तिज्ञानादपक्षे साध्यनिर्णयो भवति· तस्य च प्रत्यक्षादिरूपत्वानन्तर्भावेनानुमितित्वमा
वश्यकमित्यत आह·।· व्यतिरेकेति·।· तत्त्वेन·।· अनुमितित्वेन·।· अननुभवादिति·।· अर्थापत्त्याभीत्यनुपपन्नसाध्यस्यैव तत्रोत्पत्तेरिति भावः· ननु तत्रानुमितित्वानुभवस्याप्रसिद्धत्वेऽपि अनुमितिसामग्रीजन्यतयाऽनुमितित्वमावश्यकमित्यत आह·।· कॢप्तेति·।·

साध्याभाववदवृत्तित्वज्ञानस्यैव लाघवेनानुमितिहेतुतायाः कॢप्तत्वादिति भावः। ननु व्यतिरेकव्याप्तिज्ञानघटितसामग्रीजन्यत्वमपि पृथगनुमितित्वे प्रयोजकं वाच्यमित्यत आह। सामग्रीभेदेति। विजातीयेति। अनुमितित्वविरुद्धजातीयेत्यर्थः अनुमिनोमीत्य
नुव्यवसायात्प्रत्यक्षाद्विजातीयानुमितिप्रमावद्बाधयामीति प्रतीतिबलाच्चाद्वा व्यवस्थितमनाव अर्थापत्त्यामीत्यनुभवबलादपि विजातीयप्रमासिद्धेर्द्वावेव तस्मादनुमितित्वानुभवे अनुमितित्वे शाब्दादिवृत्त्येव तथात्वप्रसङ्गात् व्यतिरेकव्याप्तिघटितायाः एव आकाङ्क्षात्रु
न्नादिघटितायाअपि सामग्र्याः अनुमितिप्रयोजकत्वे लाघवमनावत इति भावः। नन्वेवं तत्कारणसमप्रमाणान्तरतापत्तिः इत्यत्र आपत्तिमाह। तत्कारणमपीति। अर्थापत्तेः प्रमाणान्तरमेवेति योजना। अर्थापत्तेरनुपपद्यमानार्थस्य ज्ञानं वा। नन्वेवं सत्यन्वयव्याप्तिप्रकारेण साध्या
व्यापकाभावप्रकारकोणिकत्वेन अनुपक्षे हेतुमत्ताज्ञाने साध्यैव्यापकान्वयानुपगमे प्रमेयजातीयमेकज्ञानमेव स्वीकरणीयमिति जातिसङ्करप्रसङ्ग इत्यत आह। कॢप्तेति। कॢप्तप्रमाणद्वयसमाहारः। शाब्दानुमानादिरूपप्रमाणसम्भवनं। तत्समर्थितं युगपदन्वयव्यतिरेकि
धर्मद्वयप्रतिसन्धानं। अर्थापत्त्यनुमानयोः सम्बलनं। तथा च यथा तत्रैकसामग्र्या बलवत्त्वान्नैकदा मिथो विजातीयप्रमाद्वयसामग्रीसमावेश इति भावः त्वानुमितित्वादीनां सङ्करः। तथा प्रकृतेऽपि। सामग्र्या बलवत्त्वकल्पने चानुभवानुरोध एव विनिगमकः। फलसन्देह
या सामग्री गुरुशरीरतया स्याप्रबलबलं कल्प्यते तस्मादुर्बलत्वे स्वीयफलेच्छाविशिष्टत्वेन तत्प्रतिबन्धकतायाः कल्पनीयतया इच्छायास्तद्विरहेण च समं तत्प्रविष्टकारणानां विशेष्यविशेषणभावे विनिगमनाविरहेण गुरुसामग्र्याः प्रतिबन्धकतायां हत्वेन गौरवात्तन्नचो
भयादृष्टिसम्भले स्वभावबलवत्त्वात्सामग्र्यैव न फलजननं सा न दानीमुत्तेजकमलेन स्वभावदुर्बलसामग्रीफलजननाय स्वफले इच्छाविरहविशिष्टाया दुर्बलसामग्रीफलेच्छाया एव बलवत्त्वं सामग्र्या उत्तेजकत्वं वाच्यं। दुर्बलसामग्र्या स्वबलवत्सामग्रीफलेच्छाविरहविशिष्टस्वफले
च्छाविशेषणं वाच्यं तथा च दुर्बलसामग्र्यामधिकप्रवेश इति किं तस्यानेनेति वाच्यम्। इच्छाविरहविशिष्टाया इच्छाया यत्र विशेषणत्वं तत्रेच्छातद्विरहयोः मिथो विशेष्यविशेषणभावे प्रत्येकं तयोः कारणत्वे समं विशेष्यविशेषणभावे विनिगमनाविरहे प्रतिबन्धकताधिक्यं
यत्रेच्छाविशेषविरहविशिष्टाया उत्तेजकत्वं तस्यात्ममोव मिथस्त्याविनिगमनाविरह इति प्रतिबन्धकत्वस्या तत्रानुमितिगुरुसामग्र्या एव बलवत्त्वौचित्यात् वस्तुतो बलवत्त्याः सामग्र्याः प्रतिबन्धकतायामिच्छाविरहविशिष्टाया इच्छाया नोत्तेजकता किन्तु विनिगमनाविर
हभयेन इच्छायामुत्तेजकत्वमिति एवं प्रतिबन्धकत्वं स्वफलेच्छावैशिष्ट्यं निवेश्य चान्यप्रतिबन्धकत्वं कल्प्यते तावतैवोभयदिशि वृद्ध्या दुर्बलसामग्रीफलप्रतिबन्धकत्वोपपत्तेः इति दुर्बलसामग्र्यामपि कार्यतद्विरहयोरेकत्रविशेषणे प्रतिबन्धकताबाहुल्यमतिस्फुटमेव। प्रकृते च व्याति
रेकव्याप्तिज्ञानघटितसामग्रीगुरुशरीरा तादृशव्याप्तेरधिकपदार्थघटितत्वात् अधिकपदार्थांशे भ्रमत्वज्ञानाभावादेर्निवेशगौरवात्तेति दिक्। साध्यि। अन्यथानुपपत्तिज्ञानजन्यावधीति। अनुमितीति। तथा च न तत्करणं प्रमाणान्तरमित्यर्थः। ननु केवलान्वयिव्याप्तिज्ञानाजन्यस
तया प्रकृतज्ञानजन्याविशेषानकॢप्तानुमितिसामग्रीजन्यत्वे तत्रानुमितित्वप्रयोजकरूपसत्त्वमित्यत आह। लाघवेति। सामग्रीजन्यताप्रयोज्यादिः परामर्शजन्यत्वस्य व्यापकत्वपक्षधर्मविशिष्टप्रत्यक्षस्य धारणतया अनुमितित्वप्रयोजकस्यासम्भवात् प्रत्यक्षताजन्यत्वनिवेशात्
ध्यकत्वादिति भावः। एवं। पक्षताजन्यत्वमात्रस्य तथात्वे। तथात्वापत्तेः। अनुमितित्वापत्तेः। तत्रान्वयविषयतया पक्षतायास्तेतुत्वादिति भावः। पक्षताया प्रत्यक्षेऽपि सम्भवादित्यत आह। इच्छेति। एककालीनत्वादीति। एकक्षणावच्छिन्नसामानाधिकरण्यरूपा तीति
यानुमितीच्छाविरहसहकृतसिषाधयिषाविरहघटितप्रतियोगितावच्छेदकत्वेनेत्यर्थः। तस्मा। पक्षतायाः। अनुमितिहेतुत्वसम्भवेऽव्याप्तिसमनियतत्वमेव प्रयोजकत्वमित्याशयेन दूषयति। साध्यादीति। व्याप्यत्वादेः प्रयोजकत्वे तन्त्रमन्यथा सामग्र्याः अभ्युपगमे तदन्यत्वस्याप्रिप
योजकत्वसम्भवादित्याशयात्प्रयोजकत्वस्य दुर्वचतां परामर्शजन्यत्वं साधयति। प्रयोजकत्वश्चेति। एतेन। प्रयोजकताया दुर्वचत्वेन। व्याप्तिज्ञानजन्यत्वं। अनुभवत्वव्याप्यधर्मावच्छिन्नव्यापकताज्ञानजन्यत्वं। अनुभवत्वसाक्षाद्व्याप्यजातिधर्मावच्छिन्नत्वविशेषणात् द्वितीयविशेष्या
त्व

वगादिप्रत्यक्षादिव्युदासः॥ अन्वये व्यतिरेके च व्यापकतयोरनुगमासंभवादाह। आद्येति। तेनाभावज्ञानजन्यतालाभः। न चैवमप्यभावादिज्ञानानुव्यवसाये तद्विषयत्वघटितधर्मावच्छिन्ननिरूपितजन्यत्वविवक्षणे ...... अभावादिघटिताकाङ्क्षादिज्ञानजन्य[illegible]बोधे
तिप्रसङ्गो दुर्वार एवेति वाच्यम्। तज्जन्यत्वपदेन तत्करणकत्वविवक्षणात्। शाब्दबोधे च पदज्ञानत्वेनैव करणतयाऽतिप्रसङ्गविरहात्। व्यतिरेकिस्थले चान्वयव्याप्तिज्ञानादेव साध्यनिश्चयः। ननु व्यतिरेकव्याप्तिज्ञानात् अन्वयसहचारज्ञानाभावेनान्वयव्याप्तिप्रत्यक्षानुपपत्तावपि व्यतिरेकव्या
प्यात्तदनुमानसंभवादिति कृप्तानुमितिसामग्रीजन्यत्वेनासावनुमितिरेवेति न प्रमाणाधिक्यमिति सिद्धान्तं समर्थयितुं मतमुपन्यस्यति। साध्याभावेति। ननु साध्याप्रसिद्धिस्थले हेतौ साध्यव्यापकत्वानुमानसंभवेऽपि प्रसिद्धभावसाधकस्थले साध्यव्यापकत्वस्याप्रसिद्धभावेन सानु
मितिः संभवतीत्यत आह। प्रसिद्धसाध्यकेवेति। साध्याप्रसिद्धिस्थले प्रसिद्धसाध्यादीनां खण्डशः प्रसिद्धत्वादेः कल्पनादिति भावः। न चान्वयव्यतिरेकव्याप्त्योर्व्याप्यव्यापकभावाज्ञानदशायामपि व्यतिरेकिहेतुना साध्यनिश्चयस्यानुभविकत्वादनुपपत्तेः प्रमाणान्तरत्वमावश्यक
कमिति वाच्यम्। व्याप्यव्यापकभावघटकसकलपदार्थोपस्थितिसत्त्वेन मानसतज्ज्ञानस्य प्रकृतहेतुनिष्ठप्रकृतसाध्यान्वयव्याप्तिमानसस्यापि व्यतिरेकव्याप्तिज्ञानदशायां सर्वत्र संभवदुक्त्याश्रयात्। अनुमितिस्थले साध्यस्य मानसनिश्चयसंभवेऽपि अनुमिनोमीत्यनुव्यवसाये
बलादनुमानस्यैव साध्याभावव्यापकाभावप्रतियोगित्वरूपान्यथानुपपत्तिज्ञानेकालीननिश्चये अर्थापत्त्यामीत्यनुव्यवसायबलादर्थापत्तेः प्रमाणान्तरत्वं दुर्वारमित्यस्वरसः केचिदित्यनेन सूचितः। ननु साध्याभाववदवृत्तित्वस्य व्याप्तित्वे व्यतिरेकिसाध्यकस्थलेऽपि यत्र
हेतुतावच्छेदकसम्बन्धस्याधिकरणे साध्यव्यतिरेकप्रसिद्धिः तत्र साध्याभाववति हेतुतावच्छेदकसम्बन्धेन हेतोः प्रसिद्ध्याप्रसिद्धिं विनानुमितिर्विलीयेत इत्याक्षेपं प्रथमतो हेतुतावच्छेदकसम्बन्धेन व्याप्तौ निवेशयति। अथेति। विशिष्टैवाभावे॥ तत्तत्सम्बन्धावच्छिन्नसाध्या
भाववद्वृत्तित्वत्वेन रूपेणाभावः। वाच्यः। तत्तत्संबन्धावच्छिन्नव्याप्तिरूपतयाऽस्वीकार्यः। इत्यादिकं। संयोगसमवायादिना गुणघटादिहेतुकानुमाने। अप्रसिद्धेरिति। न च साध्याभाववदननुयोगिकत्वाभाववत्तत्सम्बन्धप्रतियोगित्वविवक्षणा नांशे इति वाच्यम्। वस्तुतस्तु
तद्वृत्त्यसत्त्वे घटादौ नाप्रसिद्धिः ...... यादिना वह्न्यादिव्याप्यतापत्तेः वह्न्यादिमदननुयोगिकतत्संयोगादौ वह्न्याद्यभाववदननुयोगिकत्वाभावसत्त्वात्। तादृशाभाववदननुयोगिकस्वप्रतियोगिकसंयोगादिसामान्यकत्वनिवेशे च सामान्यपदार्थस्य व्यापकताघटिततया
व्यापकसामानाधिकरण्यापेक्षया गौरवात्। सामानाधिकरण्यसंबन्धेन साध्याभावाभाव ...... व्याप्तिः। आत्यभावादेः समवायादिघटितसामानाधिकरण्यप्रसिद्धावपि तादृशाव्यावृत्तिकरणतासम्बन्धावच्छिन्नतदभावः सुलभ एवेति [illegible]नुसरणनियामकतया साम्प्रतमिक
रण्यस्याभावप्रतियोगितावच्छेदकसम्बन्धतानुपपत्त्याहेयमे। ...... रूपे। इत्यनुमानानुमाने। केवलान्वयिनः ...... मितेः। तथा च विशेषदर्शिनां तत्र आत्माद्यनुमितिर्नोपपद्यत एव। किन्तु आत्मादावेव ...... इत्यभावकेत्यादिना उत्पादिसमवेतत्वाद्यनुमितिः
साध्याभाववदसमवेतत्वादिग्रहविरोधिनोऽभाववति समवायादिविरहग्रहस्य सत्त्वेऽपि हेतोः सुग्रहत्वादिति भावः। स्वाधिकरणवृत्तिसाध्याभावकत्वमिति। तथा च साध्याभाववति समवायासत्त्वग्रहेऽपि साध्याभावे हेतुसमवायासत्त्वग्रहसम्भवान्नोक्तानुमा
नानुपपत्तिरिति भावः। न चात्राप्रसिद्धसत्ताभाववान् जातित्वादित्यादौ हेतुमति साध्यविरोधिताघटकसम्बन्धेन हेतोः प्रसिद्धिग्रहदशायामनुपपत्तिर्दुर्वारैवेति वाच्यम्। तत्र साध्याभाववदवृत्तित्वसज्ञानादेवानुमित्यभ्युपगमात् व्यापकतो ज्ञानहेतुतावादिनामपि भेदत्वावच्छेदे
नहेतुमद्वृत्तित्वग्रहदशायां [illegible] तादृशव्याप्तिज्ञानादेरनुमितिहेतुपरत्वस्य सत्त्वात्। प्रतियोग्यधिकरणाभेदत्वविशेषितहेत्वधिकरणवृत्तिताया व्यापकताया तद्दुर्ग्रहत्वात्। न च संयोगसम्बन्धावच्छिन्नप्रतियोगिताकाभावसाध्यके विषयितया घटादिहेतुकानुमाने का गतिः।
तत्र हेतुमतिज्ञानादौ साध्यवत्ताभावप्रतियोगितावच्छेदकसंयोगेन हेतोः प्रसिद्धेः साध्याभाववति च संयोगिनि विषयिता हेतुतावच्छेदकसम्बन्धाप्रसिद्धिरूपदोषेण व्याप्तेः प्रत्यासमवायादिति वाच्यम्। सत्यानियामकसम्बन्धेन व्याप्तेः प्रत्येतैरनभ्युपगमेन

तत्र विषयित्वादिहेतुकानुमानस्यैवोपगमात् । नन्वेवं स्वत्वाननुगमात्साधनतावच्छेदकभेदेन व्याप्तिभेदप्रसङ्ग इत्यत्रेष्टापत्तिमाह ।। स्वत्वेति ।। स्ववृत्तित्वादिति ।। स्वव्यापकसाध्यसामानाधिकरण्यरूपव्याप्तिमादिनापीत्यादि । तथाच्चेतन्मात्रे प्रतियोगितावच्छेदकत्वांशस्य सम्बन्धतया लाघवानपायादिति भावः । साध्याभाववद्वृत्तित्वरूपव्याप्तिपक्षे अनुपपद्यमानेत्या साध्यव्यभिचारिण्या विशेष्यव्यक्तेर्विशेषणतया विशिष्टत्वेन व्याप्यत्वानिर्वाहरूपदोषेतत्कल्पावलम्बनप्रयोजनं दर्शयति ।। एतेनेति ।। नीलरूपवत्त्वनीलरूपवान् समवेतत्वे सति द्रव्यत्वादित्यादिकं चित्ररूपवति व्यभिचारेण नसदनुमानम् अतो नीलरूपेतरसाधकनीलरूपवत्समवेतत्वविशिष्टगोत्वहेतुत्वन्न स्मरणं । गोत्वरूपविशेष्यप्रवेशाद् गुणकर्मविशेषणादेर्गगनादेश्च न व्यभिचारः । नीलान्यसमवेतत्वविशिष्टगोत्वस्थ्यूरूणोत्वानातिरिक्तिनीलेतररूपव्यभिचारस्य विरहस्य दर्शितत्वेपि समवेतत्वस्य समवेतादिभिन्नत्वे गोत्वविशिष्टत्वेन गुणादिव्यावृत्तेर्नीलोद्ध्वसमवेतत्वव्यक्तिव्यभिचारित्वेन विपरीतविशेष्यविशेषणभावापन्नहेतुकानुमानस्यासुपदमः तद्विशिष्टगोत्वज्ञानदशायां गोत्वविशिष्टे तज्ज्ञानस्याप्यसम्भवादिति विशिष्टगोत्वहेतुकानुमानविलोपे क्षतिविरह इत्यालोच्या स्वरूपनीलसमवेतत्वाभाव विशेषणतया पारतत्त्वान: न च साध्याभाववद्वृत्तितानवच्छेदकधर्म एव व्याप्तिर्वाच्या । नीलासमवेतत्वविशिष्टगोत्वत्वेन गोत्वस्य न नीरलगोवृत्तित्वमस्तु विशिष्टगोत्वत्वं तदनवच्छेदकमेवेति नायं व्याप्तिरिति वाच्यम् । विशिष्टस्यानतिरेके साध्याभाववद्वृत्तितानवच्छेदकविशेष्यीभूतगोत्वत्वे विशेषणनाऽविशिष्टेपि तदनवच्छेदकत्वासम्भवात् । एतदभिप्रायेणैव द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यत्राव्याप्तिर्दर्शिता । अत्र स्वाश्रयसमवेतत्वसम्बन्धेन गुणकर्मान्यत्वमेवविशिष्टसत्तात्वस्य साध्याभाववद्वृत्तितानवच्छेदकत्वात्तदादायेन विशिष्टसत्त्वस्य व्याप्यतोपपत्तेः नीलाद्यसमवेतत्वतादृशसम्बन्धेन वैशिष्ट्यस्य द्रव्यत्वान्निष्ठसाध्याभाववद्वृत्तितानवच्छेदकत्वमिति नतन्मात्रस्यादत्यादि विशिष्टगोत्वादेर्व्याप्यतोपपत्तिः ।। अथैतत्कल्पे द्रव्यान्यत्वविशिष्टसत्ताभाववान् द्रव्यत्वादित्यादावव्याप्तिः साध्याभावस्य विशिष्टसत्तायाः शुद्धसत्तानतिरेकेण हेत्वधिकरणसत्त्वादिति चेन्न । अनुयोगिताविशेषरूपसाध्याभावत्वे तादृश्वाधिकरणवृत्तितानवच्छेदकत्वस्य विवक्षणीयत्वात् अनुयोगितायाः प्रतियोगितावच्छेदकादिभेदेन भिन्नतया शुद्धसत्ताभावादिनिरूपिताभावत्वस्य द्रव्यादिवृत्तितावच्छेदकत्वेपि विशिष्टाभावनिरूपिताभावत्वे तदभावहेतोरल्पत्वात् । एतेन जात्यभाववान् द्रव्यत्वादित्यादौ साध्याभावस्य द्रव्यत्वादेर्हेत्वधिकरणगुणादिवृत्तितापि साध्याभावतायाममनिर्वच्याप्यप्रपत्तिः प्रतियोगितावच्छेदकभेदे, भावव्यक्तेर्भेदानुयोगितायां भेदानभ्युपगमात् गुणत्वादौ साध्याभावत्वं साध्यनिरूपिताभावत्वे हेत्वधिकरणवृत्तितानवच्छेदकस्यैवतः ।। अथैवमपि सत्ताभाववान्गुणकर्मान्यत्वे सति द्रव्यान्यत्वादित्यादावव्याप्तिरेव विशिष्टहेतुमति साध्यरूपाभावप्रतियोगितावच्छेदकसमवायेन सत्त्वेन प्रसिद्धेः साध्याभावत्वे तिर्गुणादौ हेतुघटकविशेष्यस्य सत्त्वे व्याप्तिरूपस्यैवानिर्वाहादिति चेत् । एतदभिप्रायेणैव विशिष्टहेतुकस्थले विशेष्यविशेषणसम्बन्धस्य हेतुत्वमनुसृतं प्राचीनैरित्यादिना ।। केचित्तु अभाव भावव्याप्याभावत्वेन वृत्तिविशेषणताविशेष्यतैव वा स्तीति प्रत्ययेन समवेत्वजातीयसम्बन्धविगाहितायाश्चानुभविकत्वादिति स्वाधिकरणे विशेषणताविशेषेणैव वृत्तित्वमभावस्य विलक्षणीयं । आकाशाभावादेरात्मादौ आकाशाभावत्वादिनैव दैशिकविशेषणतया वृत्तित्वं न तु कालिकसम्बन्धावच्छिन्नाभावाभावत्वेन काल एव आकाशाभावाभावस्य कालिकसम्बन्धावच्छिन्नाभावोभालीति प्रत्ययात् कालिकसम्बन्धावच्छिन्नाभावस्याभावरूपस्याकाशाभावस्यात्मनीत्याधाराधेयभावप्रत्ययेपि तादृशाभावाभावत्वस्यैवोपलक्षणतयैव भानोपगमादित्याकाशाभावादेः कालिकसम्बन्धावच्छिन्नाभावे साध्ये आत्मत्वादिहेतौ नाव्याप्तिरित्युक्तविशिष्टहेतुकस्थले स्वाधिकरणेत्यादिव्याप्तिरेव निर्वहतीत्याहुः ।।*।। श्री ।।*।। इति श्रीमन्महामहोपाध्याय श्रीगदाधरभट्टाचार्यविरचिता केवलान्वयिग्रन्थटीका समाप्ता ।। संवत् १८६२ पौषपूर्णिमायां बुधे लिखितं समाप्तम् ।। शुभम् ।।

युगाङ्गमितिभूमिते लसति वैक्रमे वत्सरे सुधांशुसुतवासरे प्रथितपौषपूर्णातिथौ ।। स्मरारिपुरि केवलान्वयि गदाधरे निर्मितं विलिख्य सुसमापयद्विबुधसोमनाथाद्विजः ।। १ ।।

केवला. ग. टी.

१३

4982

ॐ नमः श्रीलक्ष्मीवार्येभ्यः ॥ ॥ तर्कोधर्मानुमितेरौपाधिकव्याप्तिनिश्चयविरोधिशङ्कानिवृत्तिद्वारेयते तत्र तर्ककारणीभूतस्यापादकनिश्चयस्याप्यव्याप्यापादकविपक्षतावच्छेदकादीनां निश्चयस्य विरोधिनी या शङ्का तन्निवृत्त्यर्थमपि तर्कान्तरं तर्कान्तरमुपेयं तत्पूर्वमपि च तदन्त
नेकनिश्चयविरोधिशङ्कानवस्थितिरित्यर्थः तर्कान्तराभिसन्धानेऽवच्छिन्नतर्कधारास्वीकारप्रसङ्ग इत्याशङ्कते— मूले— तर्कस्येति ।· व्याप्तिमूलकत्वेनेति ।· व्याप्त्यादिनिश्चयजन्यत्वेन ।· यावदिति ।· यत्र यत्राशङ्का या तर्कोऽपेक्षितः निवृत्तिस्तत्रैव शङ्कानिवृत्त्यर्थं तर्कस्वीकारादित्यर्थः ।· यत्र
चेति ।· यादृशतर्के मूलव्याप्यज्ञाने इति भावः · [illegible] मूर्खमित्यर्थः ।· व्याघातेन शङ्केव तावत्तीति ।· प्रवृत्तिव्याघातेन शङ्कावतः कारणानादिभावप्रयुक्तो न स्थितस्यतीत्यर्थः · कोऽति [illegible] व्याघातेनेन तद्विरोधिनी शङ्का तावतैवेति तर्कान्तरस्य विरोधितयैव तादृशश
ङ्काविरह इति यावदिति वर्णयन्ति ।· तर्कविरोधिनीति ।· तर्कान्तरं विनैव तादृशतर्ककारणव्याप्त्यादिनिश्चयसम्भवो यत्रेत्यर्थः · तथा च तत्रैव विच्छेद इत्यानवस्थेति भावः · । कीदृशा[illegible] विरोधिनीनां कीदृशशङ्कानां तर्कान्यस्य कस्य प्रतिबन्धकतयानिवृत्तिरित्या
कीदृशानां तर्कविरोधविरोधिशङ्काविशेषे [illegible] प्रतिबन्धकताव्यवस्थापकं तेषां दर्पन्हव प्रवृत्तिविरोधानिर्वाहप्रसक्तं प्रयोगस्य उपादानस्य तत्प्रतिबन्धकत्वमभिधाने— [illegible]हीत्यादिना · तत्र दृपादानमेव शङ्काप्रतिबन्धकमित्यर्थेन ।· धूमोपदी
दि ।· तर्कस्यप्रकृतव्याप्तिग्रहानुपयोगित्वे तत्पूर्वं तर्कान्तरानपेक्षाव्युत्पादनस्यानवस्थया ५ न मित्तौपाधिकव्याप्तिग्रहासम्भवाक्षेपोदुरानुपयोगिता इत्याशङ्कां परिहरति [illegible]ति कारो व्याप्तिग्रहोपयोगेन मन्वयव्यतिरेकेण कार्यकारणभावग्रह प्रत्युप
योगितया मूलोक्ततर्कस्यप्रकृतोपयोगिता घटयितुं वह्नेर्धूमकारणताग्राहकान्वयव्यतिरेकं प्रदर्शयति— हताशनेत्यादिना ।· अन्वयव्यतिरेकग्रहविषयसमुदायमध्ये कारणसमुदायेऽभिमतं सामग्र्यकारणमात्रघटितसमुदायस्यान्वयव्यतिरेकग्र
हसम्भवे तादृशसमुदायत्वस्य प्रामाणिकत्वमात्रेण प्रथमं कारणत्वसन्देहेऽपि तत्समुदायान्तर्गतस्य कस्यापि व्यभिचारदर्शनासम्भवेन तत्समुदायव्यभिचारिधूमाकल्पने लाघवप्रतिसन्धानेन तत्समुदायत्वावच्छेदेन कारणतानिश्चयात्तर्कवैयर्थ्यं स्यादिति
तदन्यान्वयव्यावश्यकत्वमाविष्कर्तुं रासभोपादानम् ।· अवश्यमेतेषामिति ।· धूमसामग्री इतत्समुदायान्तर्गतेनेत्यनर्थार्थत्यर्थः · एतदवधारणं च धूमे वह्निसमवधानकालीनवह्नितत्समवधानेतरयावत्कारणकत्वस्य आपाद्यव्यतिरेकरूपस्यानि
श्चयमुपयोगि · तदनवधारणे वह्नितत्समवधानेतरयावद्धूमकारणवति वह्निसमवधानकाले तादृशयावद्धूमकारणवत्त्वस्य दुर्निश्चयत्वात् तत्समुदायान्तर्गतेषु वात्वन्येषु धूमकारणत्वसंशयसम्भवात् ।· केचित्तु अवश्यमेतेषामिति ।· धूमो ह
ताशन[illegible]समाद्यन्यतमकारणकत्वं निश्चित्येत्यर्थः · सामान्येन तु येन कारणतावगाहि[illegible] तादृशानिश्चयस्य अहेतुकत्वे [illegible]त्येतादृशशङ्कानिवर्तकतया धूमस्य वह्निकारणकत्वनिश्चायकतर्कसम्पादकत्वमित्यभिहितमित्याहुः · तच्चिन्त्यम् धूमस्य
कादाचित्कतया सकारणकत्वमात्रनिश्चयादेवाहेतुकत्वशङ्कानिवृत्तिसम्भवात् दृश्यसमुदायान्तर्गतकारणकत्वनिश्चयस्य [illegible]अनपेक्षणात् ।· सामग्र्य इति ।· अग्रिमेण इत्यनेनान्वयः ।· क्षिपेतानीति ।· धूमकारणत्वे हुताशनाद्यन्यतमत्वव्यापकत्वेन

नहन्तिवेत्यर्थः धूमकारणत्वरूपभावकोटेः कृत्स्नसमुदायत्वावच्छेदेन भानलाभाय सर्वानीति। सामानाधिकरण्यमात्रेण कोटिद्वयावगाहने संशयत्वायोगात् सामानाधिकरण्येन कारणत्वस्यावधारितत्वात् तदवच्छेदकावच्छेदेन विपरीतकोटिभानं न सम्भवतीति सामाना
धिकरण्यमात्रेण तदवगाहितालाभाय कान्तिच्छिन्नेत्यन्तम् सामानाधिकरण्येन विपरीतकोटिभाने सामानाधिकरण्येन भावकोटिनिश्चयो विरोधीत्येतल्लाभाय कानिच्चित्तथेत्यनेन भावकोटिसामानाधिकरण्यसम्बलनेन विपरीतकोटिसामानाधिकरण्यो क्रोडः अथ रा
सभादयो विशिष्य कारणतानिश्चये तत्कार्यप्रयोगितेति निर्वाहकस्य वह्निधूमजनकोऽनकेति विशेषरूपेण संशयस्य सम्भवात् अन्यत्वमत्वावच्छेदेन कारणतानिश्चये तादृशसंशयासम्भवादिति प्रदर्शितः नत्वेवं क्रमेण समूहालम्बनस्य वह्नेरिव रासभादेरपि कथं न धूमत्वाव
च्छिन्नं प्रति कारणतानिश्चयः व्याप्तिविशेषे वह्निसमवहिताजन्यत्वस्यैव रासभाद्यसमवहितजन्यत्वस्यापि सुनिश्चयतया धूमत्वसामानाधिकरण्येन वह्निजन्यतायाइव रासभादिजन्यताया अपि ग्राहकस्य तर्कस्य सम्भवात् धूमत्वसामानाधिकरण्येन वह्निजन्यत्वेन गृ
माणे वक्ष्यमाणरीत्या तदवच्छेदेन वह्निजन्यतायाइव धूमत्वसामानाधिकरण्येन रासभादिजन्यत्वेनाग्रहणात् तदवच्छेदेन रासभादिजन्यतायाः सुग्रहत्वात् धूमत्वावच्छेदेन वह्निसमवहिताजन्यत्वस्य च निश्चयतया वह्निजन्यताग्राहकस्यापि धूमसामान्यपक्षकतर्कस्याऽ
सम्भवात् यच्चेत् वह्निसमवधानकालीनवह्नितद्व्यापारेतरयावत्कारणकत्वस्य रासभाद्यसमवहिताजन्ये धूमेऽसत्त्वान्न तत्र रासभादिजन्यताग्राहकतर्कोऽसम्भवतीति अत एव च तत्त्वधूमत्वावच्छिन्नं प्र
त्यपि तेषां न हेतुताग्रह इत्युक्तमन्तेनापि धूमत्वावच्छिन्नं प्रति वह्नित्वाद्यवच्छिन्नस्यैव तन्न्यूनहेतिसमानसीमवह्नित्वाद्यवच्छिन्नस्यापि जन्यतानिश्चयो दुर्वार इत्येवाशङ्कां परिजिहीर्षुः वह्नित्वसमवधानेतरयावद्धूमकारणानां वह्निसमवधानकालीनत्वग्रहदशायां तत्र रासभाद
त्वेन रासभस्य धूमकारणतासन्देहे धूमे पारिभाषिकस्य वक्ष्यमाणजन्यत्वस्य निश्चयो न सम्भवति रासभः सत्यपि तथाविधस्य वका[illegible]लम्बितत्वेन सन्दिग्धतया तद्व्यवह्निसमवधानकालीनत्वादर्शनेन धूमे विशिष्टसंशयादित्याशङ्कानिराकरणाय इत्युक्तोद्य वे तोऽन्यसमुदाय
त्वावच्छेदेन धूमकारणतानिश्चयस्य सम्भवप्रदर्शनाय च व्यभिचारनिर्णये रासभत्वाद्यवच्छिन्नस्य कारणताविरहो निश्चीयत [illegible] अत्रेत्यत्र। यद्यपि धूमान्तो रासभादेर्व्यभिचारप्रदर्शनेऽपि न धूमत्वावच्छिन्नं प्रति रासभादेः कारणतासन्देहो नापैति तथापि यत्सामान्ये
यत्सामान्यस्य धूमोत्तरकत्वे अप्रामाणिकत्वेऽपि तदुभयोस्तद्धीमत्त्वस्य चेति नियमात्संसामान्यतः कारणताविरहावधारणादेव विशेषकारणताविरहस्यावधारणमित्याशयः धूमत्वावच्छिन्नं प्रति रासभत्वादेः वह्नित्वेन कारणताग्राहकतर्कावतारसम्भवेऽपि व्यभिचारनिश्चयादेवं न तदुहः
यावद्व्यभिचारेण निश्चीयते वक्ष्यमाणतर्कश्चावतरति तद्धूमत्वापेक्षया धूमत्वस्य जन्यतावच्छेदकत्वेन लाघवज्ञप्रवृत्तिसन्धाने लाघवं धूमत्वावच्छिन्नस्यापि जन्यतावच्छेदकतारूपावच्छिन्नस्यापि कारणतानिश्चितैत्वेव तदन्नेककालीनस्य व्यभिचारे प्रत्यक्षतो निश्चिते तादृश
कारणता [illegible] निश्चये धूमसंग्रहस्तत्त्विति भावः। यच्चेति। ग्रहणेतिके विशिष्य तन्नद्व्यापारीभिन्नस्य कलधूमकारणसमवधानकृत्ते तदधिकरणनिष्ठधूमोत्पत्त्यव्यवहितपूर्वत्वाभावं व्यपदिशति तदर्थः। तस्य कारणत्वसम्भवेति। धूमे स्वाधिकरणदेशावच्छिन्नतदभाववत्त्वाव्यवहितप्रा
के २ क्केक्षणत्वाभावरूपं तदसमवहिताजन्यत्वविशिष्टस्य तद्समवधानकालीनतद्व्यापारेतरयावत्कारणकत्वरूपं तत्कारणकत्वव्याप्यधर्मदर्शनेन तादृशधूमस्य तत्कारणकत्वाभावसाधकीकृत्य निश्चितं तादृशधर्माभावोपपादनसम्भवादिति भावः इत्थं क्रमेण कार्यकारण
भावग्रहे तर्कस्योपहेतुत्वे भानाभावात् प्रतिबन्धकशङ्काविघटनद्वारा तत्र तर्कोपयोगितां दर्शयति— तत्रचेत्ति। अकारणत्वसन्देहः। धूमे वह्निकारणकत्वाभावसन्देहः। निरोधितानाम्। इत्थं कैककालावच्छेदेनानुत्पद्यमानतां। निवर्तत इति। तथाच ग्राहकसंशयस्यप्रसक्ति

क

श्चयप्रतिबन्धकत्वमतस्तदवलम्ब्यैतदभिहितं॰ तत्प्रतिबन्धकत्वमतेच संशयसामग्रीविघटनेन तदभावज्ञानप्रतिबन्धकस्य तदभावापादकतर्कस्य तन्निश्चयोपयोगितेतिभावः ।॰ अथतर्केहेतुरापाद्यव्यतिरेकनिश्चयएवापादककोटिकशङ्कांनिवर्तयिष्यति आपादकस्यापाद्य
व्याप्यतया ।ऽऽपादकव्यतिरेकस्यापाद्यव्यतिरेकव्याप्यतया तन्निश्चयस्य विशेषदर्शनत्वादिति किंतर्केण॰ नचापाद्यव्यतिरेकस्यापादकव्यतिरेकव्याप्यत्वेपि तादृशव्याप्तिप्रतिसन्धाननियमेन तर्कस्योपयोग इतिवाच्यम्॰ आपाद्यापादक[illegible]व्यापकताज्ञानस्य तर्ककारणतया तादृशा
ज्ञाननियमेन आपाद्याभावे आपादकाभावज्ञानस्य किंचित्करत्वात् पुरुषत्वाभावेकराद्यभावव्याप्यत्वेपि करादिव्यापकत्वेन पुरुषत्वादिग्रहसहितपुरुषत्वाभावग्रहस्य करादिसंशयनिवर्तकत्वादितिचेन्न॰ तर्ककारणीभूतज्ञाननाशे तर्कस्य विपक्षानुसारानुरोधेन तर्क
स्योपयोगित्वात्॰ नचपूर्वजातस्यापाद्यव्यतिरेकज्ञानस्यनाशेपि तन्मूलकान्यानस्तादृशाज्ञानादापादकाभावज्ञानोत्पत्तौ तत्कालेपि शङ्कासत्त्वादनिर्वाहः तर्कस्य ऽकिंचित्करत्वेतिवाच्यम्॰ कुतश्चित्प्रतिबन्धकात्तादृशज्ञानानुत्पादेपि तर्केणाशङ्काप्रतिबन्धाभावेऽतर्कशङ्कायाविशेषदर्शनानि
वर्तनीयत्वात्तादृशाशङ्कायाअप्रतिबन्धकत्वेदिदूषणादिति तत्सामग्रीसत्वेनिश्चयोत्पत्त्यसम्भवात्तत्तत्सामग्रीविघटनाय तर्कोपेक्षितइत्याशयः ।॰ ननुकार्यकारणभावस्यैवकाप्रकृतोपयोगिता यत्तदर्थं तद्धेतुकतर्कविरोधिशङ्कासंव्याघातरूपदर्शितं इत्यतआह– अनुकूल
श्चेति ।॰ व्याप्तिग्राहार्थमपेक्षणीयइत्यर्थः ।॰ तदधीनत्वादिति ।॰ कार्यत्वस्य व्यभिचारविरोधित्वेन कार्यतानिश्चयस्य विशेषदर्शनतया स्वतःआपाद्यव्यतिरेकनिश्चयस्य धूमोयदिवह्निव्यभिचारीस्यात्तद्वह्निजन्योनस्यादित्येतादृशतर्कोस्थापकतयाचव्यभिचा
रशङ्कानिवर्तकत्वादितिभावः॰ नचकार्यतायाव्याप्तिघटितत्वात्कार्यताज्ञानस्येवव्याप्तिज्ञानत्वेनतदधीनत्वमितिवाच्यम्॰ कार्यतासाघटकव्याप्तेः कार्यव्यवहितप्राक्क्षणावच्छिन्नकार्याधिकरणवृत्त्यभावाप्रतियोगित्वरूपव्यापकताघटिततया प्रतियोगिव्यधि
करणहेतुसमानाधिकरणाभावाप्रतियोगित्वरूपव्यापकताघटिततन्मिस्थोपाधिकव्याप्तितोन्यत्वात्॰ कार्यकारणभावग्रहकालेपि व्यभिचारशङ्कानोत्पद्यते विशेषदर्शनाभावस्यकार्यस्य हेतुत्वाभावे तथाहेतुत्वादिति ग्राह्यसंशयस्य प्रतिबन्धकतामत
एवकार्यव्यभिचारशङ्कासत्वेपि व्याप्तिनिश्चयात्मकएवकार्यकारणभावनिश्चयः सम्भवतीत्यतोपि कार्यकारणभावग्रहः फलतर्कविरोधिशङ्काविरहोपपादनं प्रकृतोपयोगितामासादयतीत्याशयेनाह– सामानाधिकरण्येति ।॰ एकदेशसन्निवेशितोयो
ऽन्वयः॰ यत्राधिकरणेयदाकार्यं तत्रतदव्यवहितपूर्वक्षणेकारणसत्त्वरूपः॰ यश्चतादृशाव्यतिरेकः यत्राधिकरणेयदाकारणाभावस्तत्रतदुत्तरक्षणेकार्याभावरूप स्तदुभयात्मकस्सएवेत्यर्थः ।॰ तथैवहेतुहेतुमद्भावः ।॰ एकदेशानिष्ठोभयसंयोगादिरूपसामाना
धिकरण्यप्रत्यासत्त्यवच्छिन्नकार्यकारणभावः ।॰ गृहीतो ।॰ विषयीकृतः ।॰ तत्त्वेन ।॰ कार्यकारणभावत्वेन ।॰ व्याप्तिघटकत्वात् ।॰ व्याप्तिनिश्चयरूपत्वादित्यर्थः॰ यदाकार्यं तदव्यवहितप्राक्क्षणेकारणं यदाकारणाभावस्तदुत्तरक्षणेकार्याभा
वइत्येतादृशान्वयव्यतिरेकग्रहस्यप्रत्यासत्त्यवच्छिन्नकार्यतायाः व्याप्तिविरोधिव्यभिचारावर्तकतया कार्यकारणभावस्यसामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नत्वोत्कीर्तनं॰ ननु समवहितोत्पत्तिजन्यत्वविशिष्टवह्निसमवहितजन्यत्वमापाद
कं जन्यत्वाभावआपाद्यः॰ ननुसमवहितजन्यत्वविशिष्टेत्यसत्वपक्षतावच्छेदकं॰ घटादौव्यभिचारवारणायवह्निसमवहितजन्यत्वमापादकविशेषणमुपात्तम्॰ तादृशविशेषणाभावमादायपर्यवसानवारणाय तत्पक्षविशेषणं
तथोपादानम्॰ अतोवह्न्यादिसमवहितजन्यत्वविशिष्टोपाद्यापादकव्यतिरेकनिश्चयाविरोधित्वेपि विशिष्टपक्षग्रहणेविरोधित्वात्तर्कविरोधित्वादित्यपपाठप्रमत्तयोव्याचक्षते॰ तत्रवह्निसमवहितजन्यत्वसाधारणविशिष्टाभावरूप

दूष १

व्याप्ति ३

६

६ क १

४ अ

६ वा

कारणवन्हिसमवहितजन्यत्वरूपस्यापादकाभावस्य जन्यत्वरूपेणापाद्याभावेन सहिष्णुत्वापत्तेः क्षतिः ताद्दशाशिष्टसमानप्रकारकतया वन्हिसमवहितजन्यत्वत्वेन वन्हिसमवहितजन्यत्वाभावकोटिकशङ्काविरोधित्वविरहेपि तद्वच्छिन्नापादकापत्ते स्तद
क वच्छिन्नप्रकारकज्ञानविरोधित्वेन वन्हिसमवहिततज्जन्यत्वाभावत्वावच्छिन्नापादकस्य प्रकृततर्कस्य तादृशाशङ्काविघटकत्वात् वन्हिसमवहितजन्यत्वत्वावच्छिन्नविधेयकेत्वप्रसक्तावात् तदर्थं तस्य पक्षविधेयगुणमनर्थकं । तद्विहाय शुद्धतद्रूपावच्छिन्नापादकतर्क
स्यैव लक्षणावच्छिन्नविशिष्टज्ञानप्रतिबन्धकता· अन्यथा धूमस्यादिगुणान्यत्वविशिष्टसत्त्ववत्त्वादगोत्वस्यादित्यादितर्कावतारे मायां रूपे समवायेत्यादि ज्ञानानुदयप्रसङ्गादिति सोऽन्वविशिष्टापादकतर्कस्य वन्हिसमवहितजन्यत्वकोटिकशङ्काविरोधितेति मन्यते
तदा तादृशपक्षविशेषणोपादानेऽपि न तत्स्य तादृशाशङ्काविरोधितानिर्वहतीत्यतस्तादृशापूर्वविशेषणोपादानेनेत्याशङ्कानिरासस्ये तादृशविशेषणोपादानं सार्थकमपि - विपर्ययपर्यवसायिकोटिप्रसङ्गपर्यवसायित्वमिति ।· तत्कोटितावच्छेदकावच्छिन्नसाधकाबपय
पर्यवसायि तावच्छेदकावच्छिन्नापादकस्य तर्कः ।· तदपादनं तु अङ्गम् इति ।· तदवच्छिन्नाभावप्रसङ्गस्तर्कः तेनैव तेषां धूमजनकतेत्वास्वीकारेऽसि धूमः स्यादित्यापादने धूमजनकतेऽङ्गत्वादिना वन्हिमात्रपर्यवसायित्वेपि न वन्हिमत्त्वे स्यादिधर्मस्य विरोधित्वं विपर्ययादनाहार्यनिश्चयाशा
ज्ञानानि हनि तत्कोटिकं आहार्यज्ञानाभावस्याहार्यत्वाद्विपर्ययविशिष्टतर्कः अर्थः : ननु विशेषितविरोधितसाधारणतर्कस्य वन्हित्वावच्छिन्नपक्षकस्य तद्वच्छिन्नसकोटिकशङ्काविरोधित्वं तथा सत्यनुकूलतासिद्धप्रसङ्गापातात् नापि शुद्धतद्वच्छिन्नापादकमात्रस्य तथात्वं गुणक
र्मभिन्नत्वे सत्यात्वं यदि गुणकर्मान्यत्वविशिष्टसत्त्ववत्त्वं त्यादितर्कस्य धूमत्वावच्छिन्नापादकत्वविरहेऽपि सत्तात्वावच्छिन्नविरोधिविशिष्टविरोधित्वात् नभसादित्यवधारणतात्पर्यार्थः :· मानपदप्रयोजनमाह - अन्यथेति ।· येन केनापि रूपेण तत्कोटि
पर्यवसायित्वं तर्कस्यैव तदभावधीरूपनिवर्तकत्वे इत्यर्थः । व्यापकताऽवच्छेदकरूपेणानुमितौ साध्यः । तो न्यपगन्तव्यः प्राचीनमते तदभावव्यतिरेको हि मानपर्यवसायित्वे तद्गर्भप्रयासागविधेयकानुमितिप्रयोजकतापाद्याभावकत्वं तदवच्छिन्नाभावधीविरोधि
तावच्छेदकमिति यथाश्रुतविलक्षणस्य इत्याद्यर्थः । तस्मात्समानविषयकत्वेनैव विरोधिज्ञानस्य प्रतिबन्धकतया विशेषणवत्तानिश्चयकालीनविशिष्टाभावानुमिते विशेषाभावमात्रविषयकत्वानिर्वाहः । तथासति यत्र यत्र तदपि तत्कोटितदितरकोटिपर्यवसायि
तोपितर्कस्य तदभावधीविरोधित्व इत्यर्थः ।· वहितत्वयेति ।· वन्हिजन्यतदसमवहितजन्यत्वयोरनन्यथासिद्धत्वार्थः : आपाद्यप्रतियोगिकान्ययोऽप्यनिर्वयत्वं साधारणापि व्याप्तिकग्राह्यं तत्र वन्हिसमवहितजन्यघटेन व्यभिचारः - वन्हिपदं वा वन्हिसमवहितपदं अ
न्यतरत्वस्यानालिङ्गितोऽपेदः : एतेन वन्हिजन्यत्वपर्यवसायित्वं संभवात् । स्वप्रतियोगितावच्छेदकीभूततत्तद्रूपप्रतियोगितावच्छेदकतत्तद्धर्मस्वरूपमेवेत्याशयेनाह : अत एव धूमालोकान्यतरत्वस्य धूमत्वालोकत्वस्वरूपतापत्तेः तेन हेतुनैवाह व्याप्यत्वान्
मानं हीनमेदं चिन्तनेन गुरुधर्मस्य पर्याप्त्याधाराधूमत्वत्वावधापूर्वमर्पतमभावाद्धर्मस्य एवैतिहितिति क्रतामाधारणेति । न च वन्हिपदस्य वन्हिसमवहितपरत्वपक्षे वन्हिसमवहितजन्यभेदविशिष्टवन्हिसमवहितजन्यभेदस्य जन्यस्वसमानियतत्वे तथा तत्तोऽप्रतत्याच
२२ प्रतियोगितावच्छेदकत्वे तदवच्छिन्नस्य धूमत्वावच्छिन्नत्वस्याप्रसिद्धिरिति वाच्यम् : एकमेवविशिष्टापरमेदात्मनाभावस्यान्यतरत्वस्याविवक्षितत्वात् तुल्ययुक्त्या तस्यापि वन्हिसमवहितजन्यत्वादिरूपानतिरिक्तत्वात् समानाधिकरणावृत्तिलक्षणा
नन्तरोत्पन्नत्वरूपवन्हिसमवहितजन्यत्वस्य करणत्वावच्छिन्नवन्हिभाववत्क्षणानन्तरोत्पन्नत्वरूपतदसमवहितजन्यत्वसाधारणस्यान्यतरत्वस्यानुगतस्याभावे सततादृशान्यतरत्वत्वावच्छिन्नतदन्यतमभावस्यापादकाप्रसिद्धिः वन्हितद्धूम्यान्यतरजन्यो

तर्क.मा.टी. २

नत्वादिविषयाठेत्वंच्यपदं वह्नित्वधूमत्वपरं· वह्निवह्नित्वधूमान्यतरत्वस्य वह्निमद्वृत्तित्वे सति वह्नित्वधूमान्यतरनियतत्वकत्वं न तु तद्भिन्नभिन्नत्वं वह्निभिन्नत्वे सति वह्नित्वधूमान्यभिन्नत्वस्याऽप्रसिद्धेः· गुरुधर्मस्याभावप्रतियोगितावच्छेदकत्वोपगमान्नदन्यतरजन्यतात्वस्य जन्य
तात्वसमनियतत्वेपि न तदवच्छिन्नाभावाप्रसिद्धिः· आदिपदेन लिङ्गिनः अन्योन्याश्रयादुत्पन्नो न स्यादित्यादितर्कपरिग्रहः·। तथा चापत्तेः·। वह्निजन्यत्वाभावशङ्कानिवर्तकत्वापत्तेः· वह्निपदस्य वह्निसमवहितपरत्वपक्षे वह्निसमवहितजन्यत्वाभावशङ्कानिवर्तकत्वापत्तेरि
त्यर्थः· आस्वाधितर्कस्य वह्न्यसमवहितजन्यत्वसाधारणरूपेण वह्निजन्यत्वपर्यवसायित्वादिति भावः·। तथाप्यवधारिता·। निरुक्तकोटिमात्रपर्यवसायिता·। विशेषतो व्याप्ता·। आपाद्याभावनिष्ठया तद्रूपावच्छिन्ननिरूपितया तद्रूपवन्मात्रवृत्तिधर्माव
त४ च्छिन्ननिरूपितया व्याप्त्या व्याप्तत्वस्यार्थः· निर्वहतीति शेषः·। सामान्यतः इति·। व्याप्येत्वनुपपद्यते· तथा च तादृशधर्मावच्छिन्नव्यापकधर्मावच्छिन्ननिरूपितव्याप्त्याश्रयत्वस्यैव निर्वहतीत्यर्थः· पक्षधर्मताबलात्प्रकृतपक्षे तत्तद्रूपावच्छिन्नेतरव्यापकतावच्छेदकरूपाद्याना
त्व बाधबलादित्यर्थः· बाधादिसहकृतव्यापकतावच्छेदकेनापि विशेषरूपेण साध्यानुमितिजनकत्वमित्यर्थः·। तत्समानत्वे·। जन्यत्वव्यापकतावच्छेदकीभूतविशिष्टाभावत्वाक्रान्तस्य वह्न्यसमवहितजन्यत्वरूपविशेषणाभावस्य धूमत्वा
वच्छिन्नेबाधनिश्चयस्य सत्त्वात्·। पक्षः·। धूमत्वावच्छिन्नः·। विशेषणाभावस्य इति·। अन्यथा जन्यत्वस्य वह्निसमवहितजन्यत्वस्य धूमत्वावच्छिन्ने व्याप्यतया तद्रूपावच्छिन्नसाधकत्वेन प्रकृततर्कस्य तद्धर्मावच्छिन्नाभावशङ्कानिवर्तकत्वानुपपत्तेः·। नुपपद्यते·।
निष्ठिते·। विशेषाभावाद्·। विशिष्टाभावत्वावच्छिन्नानुमितेः·। विशेषाभावमात्रावलम्बिन्याः·। विशेषाभावस्य [illegible] धर्मावच्छिन्नप्रकारकत्वनियमात् तादृशधर्माश्रयमात्रविधेयकत्वनियमात्· विशेषणवत्तानिश्चयस्यैव विशिष्टा
भावव्याप्यत्वेन विशेषणाभाववत्त्वेन विशेष्यबाधरूपत्वादिति भावः· ननु तर्कस्य शङ्कानिवर्तकत्वे विपर्ययानुमितिप्रतिबन्धकत्वमते तत्र यत्किञ्चित्कारणविरहेण तदनुपधानस्थलेपि तस्य तथात्वात्· अतोऽपाद्याभावस्य तद्रूपावच्छिन्नत्वमिति
व्याप्यतैव तर्कस्य तद्रूपावच्छिन्नाभावशङ्कानिवर्तकतोपयोगिनी वाच्या· तथा च तादृशीत्यत्र बोधनिश्चयस्य [illegible] अव्याहतत्वात् तर्कस्य पक्षे तादृशानिश्चयसम्पादकविशेषणदानमप्रयोजकमिति वाच्यम्· पर्वतो निर्वह्निः स्यान्नि
धूमः स्यादित्यादितर्कस्य भौमवह्निबाधानवतारदशायां भौमवह्नित्वावच्छिन्नाभावशङ्कासम्पादकत्वात्· प्रकृतपक्षतावच्छेदकावच्छिन्नधर्मिकप्रकृततर्कोपयोगिव्याप्त्यवगाहि तद्रूपावच्छिन्नाभाववत्ताज्ञानाधीनापादकाभावानुमिते
रस्ति प्रतिबन्धके तत्कोटितावच्छेदकावच्छिन्नप्रकारतानियमात् तद्रूपावच्छिन्नापाद्यविषयकत्वस्यैव तर्के तत्कोटितावच्छेदकावच्छिन्नाभावशङ्काविरोधित्वप्रयोजकत्वात् पक्षतावच्छेदके वह्न्यसमवहितजन्यत्वे [illegible] निवेशस्यावश्यकत्वात् तद
मलिङ्गकद्रव्यत्वावच्छिन्नसाध्यकानुमितौ वह्नित्वाद्यवच्छिन्नप्रकारताविरहादुक्तनियमासम्भव इति प्रकृततर्के प्रयोजकव्याप्त्यवगाहित्वमापाद्याभाववत्त्वज्ञानविशेषणम्· यत्र धूमस्तत्र वह्निरित्युक्ततर्कप्रयोजक [illegible] व्यतिरेकव्याप्तिज्ञानजन्या
या वन्हेऽभावलिङ्गकधूमाभावानुमितौ वह्नित्वावच्छिन्नप्रकारताविरहान्नियमासम्भव इति प्रकृतापाद्याभाववत्ताहेतुव्याप्तिज्ञानविशेषणम्· धूमपर्वतत्वावच्छिन्नपक्षकस्य पर्वतो निर्वह्निः स्यान्निर्धूमः स्यादित्यादितर्कस्यापि अभौमवह्निधूमयोः प
र्वत इत्याकारकस्वतन्त्रविषयविधया पर्वतो भौमवह्निमानिति संशयनिवर्तकत्वे पुनरस्ति प्रतिबन्धके [illegible] तादृशानिश्चयसहकृततद्रूपावच्छिन्नाभाववत्ताज्ञानजन्यापादकाभावानुमितित्वकोटितावच्छेदकावच्छिन्नप्रकारतानियमः·
तादृशानिश्चयविशिष्टत्वेनेति तद्रूपावच्छिन्नापाद्यविषयकत्वमेव तादृशाशङ्काविरोधिप्रयोजकं वाच्यं· पक्षतावच्छेदके वह्न्यसमवहितजन्यत्वनिवेशप्रयोजनं विशेषणं च तादृशानिश्चयविशेषणविशिष्टत्वमिति बोध्यम्· स्वतन्त्रतादृशानिश्चयविशेषः· गुरुप

मत्वावच्छिन्नपक्षकतर्कोऽपि शङ्कानिवर्तक इति ध्येयम्. (धूमत्वसामानाधिकरण्यमात्रेण वह्निसमवहितजन्यत्वाभावनिश्चयसहकृतात धूमत्वावच्छिन्नपक्षकविशिष्टाभावव्याप्यवत्ताज्ञानान्न तादृशपक्षे वह्निसमवहितजन्यत्वत्वावच्छिन्नप्रकारिका
नुमितिः पक्षतावच्छेदकावच्छेदेन तद्बाधनिश्चयस्यैवापरविशेष्यप्रकारताप्रयोजकत्वात्. अन्यथा पृथिवीत्वसामानाधिकरण्येन नीलरूपबाधवत्ता पृथिवीत्वावच्छेदेन गन्धादिहेतुना नीलेतररूपानुमितिप्रसङ्गादिति तु नव्याः. सामानाधिकरण्यमा
त्रावगाहन्यनुमितौ तादृशविशेष्यबाधवत्ताया अपरविशेष्यप्रकारकत्वेऽविरोधात्) ननु विशिष्टाभावस्य विशेषणविशेष्याभावाभ्यामतिरिक्तत्वेनोक्ततर्कस्येतरबाधवत्तापि विशेष्याभावमात्रपर्यवसायितानिर्वाहेति. इतराबाधस्य व्यापकतावच्छेदकाता
वच्छिन्नधर्मस्याऽऽभासकत्वात् अनतिरिक्तत्वेऽपि वह्निसमवहितजन्यत्वत्वेन विशिष्टाभावपर्यवसानं प्रकृते दुर्घटं वह्निजन्यतात्वविरोधितद्रूपावच्छिन्नभिन्नत्वविशिष्टविशिष्टाभावत्वावच्छिन्नबाधाग्रहात्. न हि सोऽभेतरगन्धवह्निजातिविशेषावच्छिन्नबाध
ग्रहदशायां गन्धत्वावच्छिन्नसाध्यकानुमितौ सौरभत्वेन गन्धोऽभासते अपितु तादृशगन्धभिन्नगन्धत्वेनैव अतो वह्निसमवहितजन्यत्वभिन्नविशिष्टाभावत्वेनैव पर्यवसानं भवेत्. नन्वर्वह्निजन्यतात्वेनाविपर्ययपर्यवसानाय वह्निजन्य[illegible]त्वभिन्नविशिष्टा
भावत्वावच्छिन्नाभावत्वेन पक्षे विशेषणीय इति वाच्यम्. वह्निजन्यत्वभिन्नविशिष्टाभावत्वस्य वह्निसमवहितजन्यतात्वसमनियततया गौरवेण तादृशविशिष्टाभावत्वस्य प्रतियोगितानवच्छेदकतया तदवच्छिन्नाभावाप्रसिद्धेरित्यस्वरसात्स्वयं तमापाद्य
प्रतियोगिकोटौ निवेशयितुमुपक्रमते — वस्तुत इति. । तत्र वह्निसमवहितजन्यपदस्य यथाश्रुतार्थपरतां प्राचीनैर्वनिराकृतां प्रथमतो निराकरोति — वह्निजन्यमात्रमिति. । नान्तरीयकवह्निकेन्धनादेः स्वसमानाधिकरणवह्निसक्षणहेतुसामग्रीजन्यत्वरू
पस्य तादृशक्षणाव्यवहितोत्तरक्षणोत्पन्नत्वपर्यवसितस्य वह्निसमवहितजन्यत्वस्य पक्षधर्मस्य वह्निसमवहिताजन्यत्वस्य सत्त्वादिति भावः. वह्निजन्यत्वपर्यवसितं वह्निजन्यत्वस्वरूपं वह्निसमवहितजन्यपदार्थतावच्छेदकं वाच्यं अन्यथा यथाश्रुतवह्नि
समवहितजन्यत्वस्य धूमस्य वह्निसमवहिताजन्यत्वविशिष्टस्य च वह्निजन्यत्वाव्याप्यत्वेन प्रकृततर्को वह्निसमवहितजन्यत्वविशिष्टवह्निसमवहितजन्यत्वनिश्चयेऽपि तादृशनिश्चयस्य तत्संपादकतर्कस्य च वह्निजन्यत्वाभावशङ्कायामविरो
धितया तादृशशङ्काया बाधकविरहेण कार्यकारणभावनिश्चयानुपपत्तेः. नन्च वह्निसमवहितजन्यत्वस्य वह्निव्याप्यत्वनियततया तन्निश्चयादेव व्याप्तिनिश्चयनिर्वाहः कार्यकारणभावोऽकिञ्चित्कर इति वाच्यम्. अव्यवहितपूर्वक्षणावच्छिन्नवह्नि
मति तादृशवह्निशून्यत्वेन च यदुत्पद्यते तत्साधारण्येन वह्निसमवहितजन्यत्वस्य वह्निव्याप्यत्वाव्याप्यत्वात्. नन्वेवं वह्निसमवहिताजन्यत्वविशिष्टवह्निसमवहितजन्यत्वस्य वह्निव्याप्यत्वनियततया तन्निश्चयादेव व्याप्तिनिश्चयनिर्वाह इति वाच्यम्.
तादृशविशेषणविशिष्टकेवलजन्यत्वस्यापि वह्निव्याप्यत्वनियततया वह्निसमवहितजन्यत्वनिश्चायकतर्कवैफल्यात्. एवं धूमत्वावच्छेदेन वह्निसमवहिताजन्यत्वनिश्चये यासम्भवादुक्ततर्को धूमसामान्ये वह्निसमवहितजन्यत्वनिश्च
याऽसम्भवेन व्यक्तिविशेष एव तर्कस्य वह्निसमवहितजन्यत्वनिश्चायकतया तादृशनिश्चयस्य च तर्कं विनापि वह्निसमवहिताजन्यत्वनिश्चयतसम्भवेन तर्कवैफल्यात्. आपाद्यकोटिप्रतियोगिविशेषणमनर्थकमिति. । १. तथा च घटादिसा

धारणस्य केवलवह्निजन्यत्वाभावस्यापादकत्वेपि तत्र वह्निसमवहितजन्यत्वरूपविशेषणाभावान्नस्य तद्विशिष्टजन्यत्वाभावरूपापाद्यस्य तेन व्यभिचारः एवञ्च पक्षे वह्निसमवहिताजन्यत्वविशेषणानभावं विनापि विशिष्टाभावस्यातिरिक्तत्वेपि च वह्नि
जन्यत्वमात्रपर्यवसायितानिर्वहतीति भावः॥ वह्निसमवहितजन्यत्वं वह्निसमवहितसामग्रीकत्वं वह्निसमवहितत्वञ्च स्वाधिकरणदेशावच्छिन्नवह्निप्रागभाववत्क्षणवृत्तित्वम् एवञ्च स्वाधिकरणदेशावच्छिन्नवह्निप्रागभावत्वाव्यवहितपूर्वक्षणकत्वमेव पर्यवसितं वह्निसमव
हितजन्यत्वं सद्भावदृढजन्यत्वं वासैसस्यार्थः स्वाधिकरणदेशावच्छिन्नत्वस्याभावनिवेशात् अन्यथा तत्रैव किञ्चिद्देशावच्छिन्नवह्निप्रागभाववत्त्वाव्यवहितपूर्वक्षणकत्वमविशिष्टाभावस्यापाद्यत्वे प्रतियोग्यप्रसिद्धिः सत्यन्तार्थजन्यत्वयोरुभयाभावस्यापाद्यत्वे चैवापत्तिः
धूमे सत्यन्तार्थाभावेन उभयाभावस्याक्षतत्वादित्येतादृशानुपपत्तेर्नावकाश इति। केचित्तु स्वसमानाधिकरणवह्निमदन्यत्वाव्यवहितपूर्वक्षणकं यत्तदन्यत्वं वह्निसमवहिताजन्यत्वं वह्नेः स्वसमानाधिकरणत्वनिवेशाद् घटाद्यव्यवहितप्राक्क्षणस्यापि देशान्तरवृत्तिवह्निमत्त्वेन
नैतत्र व्यभिचारः एवञ्च यादृशघटादिव्यक्तेरधिकरणे कदाचिदपि वह्निर्नास्ति तत्र सत्यन्तसत्त्वेपि विशेष्यदलस्य स्वसमानाधिकरणवह्निमदन्यकालवृत्तित्वं तत्र तत्समवधानेसत् यावत्त्वकारणकत्वरूपस्य तत्रासत्त्वादेव विशिष्टाभावनिर्वाहान्न व्यभिचार इत्या
हुः तदसत्. तथा सति विवक्षणीयविशेष्यदलार्थनिवेशस्य वह्निव्यधिकरणघटादिकमुपेक्ष्य नान्तरीयकवह्निके व्यभिचारवारणरूपप्रयोजनविरहेण न्यूनतापातात् अजन्ये व्यभिचारस्य यथाश्रुतजन्यत्वनिवेशेनैव वारणसम्भवात् किं तदर्थविवक्षायाः प्रयोजनमद
र्शनायाह—जन्येति। नान्तरीयकवह्निक इति। नान्तरीयकः स्वोत्पत्त्यर्थमनपेक्षितोपि दैवात्स्वाव्यवहितप्राक्क्षणे स्वाश्रयवृत्तिर्वह्निर्यस्य स तथा। व्यभिचारवारणायेति। तत्र वह्निजन्यत्वाभावस्यापादकस्य वह्निसमवहिताजन्यत्वस्य च सत्त्वादिति भावः।
वह्निसमवधानकालीनेति। वह्निसमवधानकालीनानि स्वाधिकरणदेशावच्छिन्नवह्निसमवधानाभावक्षणवृत्तीनि वह्नितत्समवधानेतराणि यावन्ति स्वकारणानि त[illegible]ऽजन्यत्वमित्यर्थः तत्प्रसिद्धिश्च वह्निजन्ये धूमादौ द्रष्टव्या। अत्र च यावत्त्वविशिष्टेषु वह्नितत्समव
धानेतरकारणेषु वह्निसमवधानकालीनत्वं विधेयं तेन नान्तरीयकवह्निके घटादौ यावन्ति वह्निसमवधानकालीनानि स्वकारणानीति तदजन्यत्वस्याक्षतत्वेपि न क्षतिः यावत्सु वह्नितत्समवधानेतरेषु तादृशघटादिकारणेषु वह्निसमवधानकालीनत्वाभावात् छिन्नत्वेन वह्नि ४५
समवधानोत्पत्तिक्षणे सत्पूर्वं वा तादृशघटादेरुत्पादः वह्निसमवधानकालीनस्य तादृशकारणस्यापि यावत्तादृशसत्त्वलक्षणास्मर्गतत्वात् तद्दृष्टान्तमिमतो दृष्टपविधेयभावस्फुरणं चिन्त्य त्वन्ति सिद्धपूर्वपदार्थविषयकान्वयबोधजनकताकबहुव्रीहिनोक्तमेवार्थं विवृणोति—तथाविधेति।
केचित्तु जन्यत्वनिवेशात्क्षेपाधिकमलुत्स त्याह—तथाविधेतीति व्याचक्षुः तन्नशोभनं। एतन्मतेपि बहुव्रीहिलभ्यार्थस्य सम्बन्धस्य जन्यत्वस्य स्वरूपत्वात् एतादृशं यथाश्रुतत्वे जन्यत्वाभाववत्त्वस्य तत्तत्पदोपदर्शनस्य वा विशिष्टस्यैवापादनीयतया ऽऽपादकोदीतादृशभावस्य कारणजन्यत्वादेर
निवेशेन लाघवगौरवानवकाशाच्च। नान्तरीयकवह्निकस्यापि घटादेर्वह्निस्त्विकारणस्य तत्प्रागभावादेर्वह्निसमवधानकालीनत्वान्नदोषतादवस्थ्यमतो—यावदिति। ननु यादृशघटस्य यत्कारणं विलम्बेन पूर्वं नोत्पादितं तादृशचरमसंयोगादिरूपं कारणं व

न्हिसमवधानपूर्वमिन्नमासीन्तत्र व्यभिचार ईदृशविवक्षायामपि दुर्वार एव. नच वन्हेस्समवधानकालीनत्वं वन्हिसमवधानप्रागभावकालीनत्वं तादृशाच संसंयोगादीनामस्त्यतस्तथात्वान्न घटादौ व्यभिचार इति वाच्यम्. तद्व्यक्तिसमवधान [illegible] प्यापि भाविवन्हेस्तत्र समवधानप्रा
गभावकालतया तेषामपि तथात्वादिति चेन्न. स्वीययावत्कारणत्वावच्छेदेन स्वाधिकरणदेशावच्छिन्नवन्ह्यभाववत्क्षणवृत्तित्वस्य विवक्षणीयत्वात्. उक्तस्थले यावत्कारणानां पूर्वोक्ततथाविधक्षणवृत्तित्वेपि मिलितानां न तादृशक्षणवृत्तित्वं वन्हिसमवधानतदीयक्षणानां तथाविध
घटादियावत्कारणान्तर्गततत्प्रागभावानधिकरणत्वात्. वन्हिसमवधानप्रागभावक्षणानां च तदन्तर्गतचरमसंयोगाद्यनधिकरणत्वादिति तदीयकारणनिष्ठयावत्त्वस्य तादृशेन केनचिदपि क्षणेन निरूपितानां इत्तावच्छेदकत्वविरहेण तादृशघटादौ विशेषणदलासत्त्वव्याप्तत्वात्
तत्तद्वन्हिसमवहितान्यत्वविशिष्टस्य तत्तद्वन्हिसमवधानप्रागभावकालीनध्वंसे तत्समवधानेतरयावत्कारणकलाभाव आपादनीय इत्यतो न व्यभिचार इत्यपि केचित्. धूमादिजननयोग्यसमुदायस्य समानकालीनेन्धनादिव्यक्तिमादिसत्त्व यावत्त्वेन सकृन्मात्रापेक्षणवृत्तित्वा
पाद्यप्रसिद्धिः. अतः कारणपदं फलोपहितकारणपरं बोध्यम्. आवश्यकारणसमुदायान्तर्गतवन्हितत्समवधानयोर्धूमस्य समवधानकालीनत्वाभावाद्धूमोत्पत्तेस्तद्व्यक्तिसिद्धिसम्भव इत्यतो वन्हितत्समवधानेतरत्वं कारणविशेषणमुपात्तम्. अथ वन्हेर्वन्हिसमवधाना
भाववत्त्वोत्पत्तिक्षणवृत्तित्वाद्भूतिभेदस्य कारणविशेषणमनर्थकम्. नच वन्हिसंयोगाभावो न वन्हिसमवधानपदार्थः किन्तु कालिकसम्बन्धावच्छिन्नप्रतियोगिताकोवन्ह्यभाव एव. वन्ह्युत्पत्तिक्षणश्च न तादृशस्तस्य कालिकसम्बन्धेन वन्हिमत्त्वादिति वन्हेर्वन्हिसमवधानका
लीनत्वमतिरिक्तं वहतीति वन्हिभेदनिवेशानामावश्यकमिति वाच्यम्. वन्हिमत्तोपि वन्ह्युत्पत्तिक्षणस्य देशविशेषावच्छिन्नतदभाववत्त्वात्. नच वन्हिसमवहितजन्यघटादिसामग्र्यधिकरणक्षणस्यापि देशान्तरावच्छिन्नवन्ह्यभाववत्तया स्वाधिकरणदेशावच्छिन्नवन्ह्यभाववत्त्वस्य
विवक्षितत्वाद्वन्ह्युत्पत्तिक्षणस्य च धूमाधिकरणावच्छेदेन वन्ह्यभाववत्त्वविरहात् कुतो न वन्हिसमवधानकालीनत्वमिति वाच्यम्. यदा यत्र यस्याधिकरणतानियामकः संयोगादिः तदधिकरणत्वेन तदानीं तद्भावावच्छेदकं अन्यथा देशान्तरवृत्तौ दिनान्तरे चानेयामा
लोघटादि विहाय स घट इत्यादिप्रतीतिप्रसङ्गात्. एवञ्च वन्ह्यादेः स्वोत्पत्तिक्षणवृत्तौ तत्कालीनसम्बन्धेन तः स्वावयवसंयोगादे [illegible] त्वन्नतु स्वसंयोगिनो धूमवतः स दा तत्संयोगाभावादिति तत्र धूमवदवच्छेदेन वन्ह्यभाववत्त्वस्याक्षतत्वात् वन्हेरपि तत्समवधानका
लीनत्वस्य दुर्वारत्वात्. केचित्तु यत्र वन्हिसमवधानदशायां महाघटनाशः लघुनाशक्षणेच वन्हिसमवधानप्राक्कालीनैर्यवयवसंयोगादिभिर्वन्हिमति खण्डघटो जनितस्तादृशस्य च खण्डघटस्य सावलोद्यावयवसंयोगादिरूपकारणानां वन्हिसमवधानप्राक्कालीनत्वे तत्र वन्हिसमव
धानकालीनयावत्कारणकलसक्षतमेवेति व्यभिचारः. नच महाघटोत्पत्तिदशायामेव तादृशखण्डघटोत्पत्तिवारणाय महाघटनाशस्यापि तद्घटव्यक्तिहेतुताया आवश्यकत्वात्तद्घटितकारणसमुदायस्य च वन्हिसमवधानकालीनताविरहान्न व्यभिचार इति वाच्यम्. यद्येन
महाघटस्यात्मनाशसमवधानोत्तरं महाघटाधिकरणकपालसंयुक्तकपालान्तरेण लघ्वीयमहाघटनाश्यकपालेषु खण्डघटोत्पत्तिः तत्र पूर्वं तत्संयोगापत्तिविरहादेव तद्घटोत्पत्तिवारणसम्भवेन महाघटनाशस्य तद्धेतुताया मानाभावात्. नच तत्संयोगतन्नाशयोर्नाशो-
कस्य हेतुत्वमिति व्यन्तविनिगमनाविरहः. सामान्यलक्षणकृप्तहेतुताकत्वस्यैव संयोगव्यक्तिहेतुत्वे विनिगमकत्वात्. एवञ्चेतादृशव्यभिचारवारणाय स्वोत्पत्तिप्रयोजकक्वचिद्विशिष्टानां कारणानां वन्हिसमवधानक्षणवृत्तित्वं विवक्षणीयं तथा च सति तादृशघटजनकस्य तत्र

प्रत्यासत्ति १
५

४ तमु

दी. सि. प्र. तृ ४

नायसम्बन्धावच्छिन्नप्रतियोगिताकपृथ्व्यप्रतिबन्धकाभावस्य तद्घटोत्पत्तिप्रयोजकत्वात्कपालप्रत्यासत्तिविशिष्टस्य महाघटाधिकरणकाले ऽसत्वेन व्यभिचारवारणसम्भवात् । एवञ्च स्वोत्पत्तिक्षणे धूमोत्पादप्रयोजकसंयोगरूपप्रत्यासत्तिविशिष्टस्य वन्हेरसत्वात्तदुत्पन्न
वन्हिसमवधानकालीनत्वेति वन्हिभेदनिवेशनं नानर्थकम् ।। यत्तु वन्हिसमवधानकालीनत्वं स्वसमानाधिकरणवन्हिमदन्यवृत्तित्वरूपमेव विवक्षितं तथा च वन्ह्युत्पत्तिक्षणस्थायिधूमसमानाधिकरणवन्हिमत्तया वन्हिपदं सार्थकमिति कश्चित् तदसत् स्वाधिकर
४ णवृत्तित्वविशिष्टवन्हिमदन्यत्वस्य वन्ह्युत्पत्तिक्षणसाधारणतया तन्निवेशो वन्हौ तादृशस्वनिवेशनं विनानुपपत्तेः स्वाधिकरणवृत्तित्वोपलक्षितवन्हिमदन्यत्वं निवेशपदवन्हौ तादृशत्वनिवेशस्याप्युक्तत्वात् एवं स्वसमानाधिकरणवन्हिमदन्यवृत्तित्वं यदि वन्हिसम
वधानकालीनत्वं तदा स्वसमानाधिकरणवन्हिमत्त्वाव्यवहितप्राक्क्षणकत्वरूपवन्हिसमवहितजन्यत्वस्य विशेषणतयैव [illegible] वन्हिसमवहितान्यत्वरूपनिवेशद्वयघटितस्यास्यानुसरणमनर्थकं स्वाधिकरणदेशावच्छिन्नवन्हिसमवधानाभा
ववत्क्षणवृत्तित्वं यदि पुनर्वन्हिसमवधानकालीनत्वं तदा एकस्माद्घटव्यक्तेर्यत्र स्वाव्यवहितप्राक्क्षणावच्छिन्नवन्हिसमवधानवत्ति तादृशात्तत्समवधानाभाववत्ति चोत्पत्तिस्तादृशघटव्यक्तेर्वन्हिसमवहितजन्यतया स्वाधिकरणवृत्तिच्छिद्रदेशावच्छिन्नवन्ह्यभाववत्क्षणवृत्तित्व
४ स्याच्च तत्र व्यभिचारः स्यादिति सत्यं तन्निर्वचनद्वयोपादानं नानर्थकमिति ।। वन्हिसमवहितजन्यपदस्य वन्हिजन्यार्थकत्वे जन्यपदस्य च यथाश्रुतार्थपरत्वे सम्भवत्यपि नानन्तरीयकत्ववन्हिकेष्वकारान्तरेण व्यभिचारं वारयितुमभिमतं दूषयितुमुपन्यस्यति – यत्त्विति ।। आपा
ख९ दककोटौ वेत्यत्र वकारेण आपाद्यप्रतियोगिविशेषणव्यवच्छेदः विपर्ययपर्यवसायितानिर्वाहाय पक्षाभावेऽपि तस्य विशेषणत्वमावश्यकमेवेति ध्येयम् ।। वन्हिघटितसामग्रीजन्यत्वाभावेति ।। वन्हिसमवहितजन्यघटादौ च न तादृशसामग्रीजन्यत्वं वन्हेस्तद
कारणतया तदुत्पत्तिप्रयोजककारणसमूहात्मकतत्सामग्रीघटकत्वादिति न तत्र व्यभिचार इति भावः ।। प्राग्वदिति ।। वन्हेर्धूमजनकतानिश्चयादित्यूह्यमित्यर्थः ।। तदेवाह ।। धूमे वन्हिघटितसामग्रीजन्यत्वानिश्चयात् वन्हेर्धूमजनकत्वसन्देहे धूमसामग्री
वन्हिघटितत्वेऽप्यापाद्याद्यभावः ।। ननु वन्हिसमवहिताजन्यत्वस्यापाद्यप्रतियोगिविशेषणत्वे वन्हेर्व्यभिचारीत्यादिशङ्काहृदयस्य कथं तर्कविरोधिता तथात्वे तर्कस्य पक्षाविशेषणतया तादृशशङ्काया अपूर्वमतवद्विशेषपक्षसंग्रहविरो
धित्वासम्भवादित्यत आह – आदौ चेति ।। एतन्मते चेत्यर्थः ।। इत्यापन्निपर्यवसितेति ।। आपाद्यस्य विशिष्टाभावस्य दृश्यत्वपर्यवसायित इत्यर्थः ।। इष्टत्वं पक्षे ऽबाधितत्वं पक्षसत्वमिति यावत् ।। न च स्वजनकसमग्रीपर्यवसाने यो धूमः धूमे वन्हिस
मवहितजन्यत्वस्य सन्देहे तद्व्यापकस्य तदभावविशिष्टजन्यत्वाभावस्यापि संभाव्यादितिभावः इत्यापन्निशङ्कायाश्च कारणीभूताया व्याप्तेः केन निश्चयविघटकत्वात्तर्कविरोधित्वम् ।। नन्वेवमप्यहेतुकत्वोत्पत्तिरितितृतीयशङ्कायाः एतन्मते कथं तर्कावि
रोधिता तथा हि सम्प्रदायमते उत्पन्नत्वरूपजन्यत्वाभावस्यापाद्यतया उत्पन्नत्वरूपतदभाववत्त्वहेतुकत्वशङ्का मूलशैथिल्यपर्यवसायिनी यत्र तत्रास्यास्तत्र वन्हिसमवहिताहेतुकत्वसाहितवन्हिसमवहिताहेतुकत्वरूपापादककोटिकशङ्काया
ते तद्विरोधिनोयं घटवन्हिसमवहिताहेतुकत्वे सति वन्हिसमवहिताहेतुकः स्यादहेतुकः स्याद्वन्हिसमवहितान्तत्समवहिताव्यतिरिक्तस्याप्रसिद्धेरित्येतादृशतर्कस्यापर्यवसम्भवात् सा च मूलशैथिल्यशङ्केव व्यापकताभिमताभाववत्तिव्याप्याभिमतस

८ – न च धूमजनककदवयवद्वयसंयोगस्य वन्हितत्समवधाने – ता४ शङ्का२ – तद्वन्हिसमवधानकालीनत्वाभावाद्धूमेऽपि नाविशेष इति निर्वाह इति वाच्यम् । तत्समवधानपदेन धूमोत्पत्तिप्रयोजकवन्हि
व्यापारपरम्परायाविवक्षितत्वात् धूमावयवद्वयसंयोगादौ धूमावयवादिवन्हिसंयोगव्यापारत्वेन तत्समवधाने सत्वाविरहात् नचैवं वन्हिजन्ये वन्ह्यभिघातादिजन्यधूमावयवादिकर्म
णादिजधूमावयवकर्मादौ व्यभिचारः तत्रैव वन्हिसमवहिताजन्यताभाववन्हिसमवधानकालीनवन्हितत्समवधानेतरकारणकत्वरूपजन्यताभावसत्वेन आपाद्याभावत्वादिति वाच्यम् संयोगे स
न्तत्वेन स्वाधिकरणदेशस्य निरुक्तजन्यतावच्छेदकतयास्वपदेन कर्मादेरुपादानासम्भवेन निरुक्तजन्यताया अत्रासत्वात् । इत्यधिकः पाठः समीचीनः । ८

[illegible] विशेष [illegible]

३ इतिवाच्यम्· नहि आपाद्याभाववत्तया निश्चितेपि रूपान्तरेणापादकवत्ताज्ञाने व्यभिचारज्ञानविधया [illegible] किन्तु तादृशभाववत्त्वरूपेणैव· तादृशापादक
संभवः तेन रूपेणैव व्याप्यसंशय एव हेतुः नतु रूपान्तरेण भिन्नधर्मितावच्छेदकत्वात् तादृशश्च न संभवतीति प्रागेवावोचत।· इति पाठान्तरम् ५

वे क

णा व्यभिचारत्वादिति स्वतन्त्रतेचोत्पन्नत्वेनापाद्यव्यतिरेकः अपितु वन्हिसमसमवधानकालीनोत्पत्तिकः यावत्कारणत्वेन तादृशविशेषेचाकारणकत्वशङ्कानावसरस्त्येवेति नोक्तदिशाऽहेतुकत्वशङ्कया मूलग्रन्थौ शिल्पशङ्कापर्यवसानं· न चापाद्यव्यतिरेकवत्तया निश्चितेधूमेऽहेतुकत्व
शङ्का व्याप्यसंशयविधया आपादकीभूतवन्हिसहेतुकत्वशङ्कानादधातीति तादृशशङ्कासत्त्वे तादृशधूमे आपाद्यव्यतिरेकनिश्चये आपादके आपाद्यव्यभिचारज्ञानसत्त्वेति अत्राहेतुकत्वशङ्का मूलोपाध्यायस्य शङ्कायां पर्यवस्यतीति इष्टकमिश्रैर्व्याख्याने आपाद्याभावनिश्चय
सत्त्वेतत्राऽऽपादकशङ्काया आपादके आपाद्यव्यतिरेकस्य प्रसक्तेः पक्षे आपाद्याभावनिश्चयस्य तर्कपूर्वमनपेक्षितत्वात्· किं च अहेतुकत्वशङ्का यो यथा धूमे सकारणकत्वघटितापाद्यासत्त्वनिश्चयएव लक्षणव्यतीत्युच्यते तदा आपाद्यव्यतिरेकनिश्चयविघटक
तथा धूमेऽहेतुकत्वशङ्का इष्टापत्तिशङ्केवेति वाच्यम्· यतो धूमत्वावच्छिन्नेऽहेतुकत्वशङ्काऽतत्र द्वितीय एव वन्हेरहेतुकत्वशङ्काभावेऽपि तत्पक्षी नहि द्वितीयव्याप्यव्यतिरेकनिश्चयसत्त्वेपि तर्कानुदयात् व्यतिरेकनिश्चयस्य तादृशापाद्याभावापादकवत्त्वेन परस्परविरो वि
षयकत्वाद्व्यभिचारग्रहरूपतोऽस्त्येव धूमत्वादिरूपेण पक्षे वन्हेरहेतुकत्वसंशयश्च विनाप्यहेतुकत्वशङ्कां सुलभ एव· [illegible] तर्कानुसरणात्· सा च तर्केऽनुवृत्तिर्न्यायात् किं तर्हि तन्निरासकरणाशेन (यत्र शङ्कितं धूमेऽहेतुकत्वशङ्कितं धूमेऽहेतुकत्वशङ्का आपाद्यव्य
तिरेकनिश्चयविघटकतया इष्टापत्तिशङ्करूपेति· तदपि न· यद्युत्पन्नतया निश्चितेपि धूमेऽहेतुकत्वशङ्का स्यात्सदाऽनुत्पन्नमात्र एव सा स्यादिति तथा च सहेतुकत्वरूपेत्राप्रसिद्धे [illegible] एवासम्भव) इत्यत आह – [illegible] पुनरितीति·।· पुनः शब्देन [illegible] इष्ट
भासितत्वव्यवच्छेदः आपाद्याप्रसिद्धिस्थले इष्टापत्तेरयोगात्· सा च वा नो भविष्यत्यत्र·।· आपादकेति·।· आपादकमिह वन्हिसमानकालीनत्ववन्हिकारणकत्वाभावरूपं·।· तदप्रसिद्धिपर्यवसानं·।· तत्स्वरूपज्ञानविरोधः उत्पन्नमात्र एवाहेतुकत्वसंशये कञ्चिदपिस
हेतुकत्वघटितवन्हिहेतुकत्वरूपप्रतियोगितोऽनिश्चयेन तदभावज्ञानासंभवात्· न चाभाववुद्धौ प्रतियोगिनः कश्चिन्निर्णयो नापेक्ष्यते अपितु प्रतियोगिनिप्रतियोगितावच्छेदकं निश्चय एवेति वाच्यम्· सर्वत्राहेतुकत्वशङ्कादशायां हेतुतापादवन्ह्यादिप्रसिद्धत्वानि
श्चयासम्भवेन प्रतियोगितावच्छेदकप्रकारकनिश्चयस्यापि प्रकृते दुर्लभत्वात्· अहेतुकत्वसंशयश्चात्र तदीयनियतपूर्ववर्त्तिसामान्ये तत्प्रत्या न्यथासिद्धत्वसंशयः तत्प्र न्यथासिद्धसामान्ये च तदीयनियतपूर्ववर्त्तितासंशयः अतः प्रतियोग्यप्रसिद्ध्याऽहेतुकत्व
संशयानुपपत्तिर्नाशङ्कनीया· आदिपदादापाद्यपरिग्रहः· आपाद्यप्रतियोगिनः सहेतुकत्वघटितस्य वन्हिसमसमवधानकालीनोत्पत्ति [illegible] तावत्कारणकत्वस्य सहेतुकत्वाप्रसिद्ध्याऽप्रसिद्धिरितिभावः·।· अथ कार्यान्तरेऽहेतुकत्वप्रसिद्धदशायां धूमधर्मिका
हेतुकत्वशङ्काया आपाद्यशङ्काविधया धूमे तादृशयावत्कारणकत्वाभावरूपापाद्यकोटिकसंशयसम्पादकत्वाद्युपपत्तिशङ्कापर्यवसानं सम्भवति· तत्कथमहेतुक एवोत्पत्स्यत इति शङ्काया धूमपदानुषङ्गेन धूममात्रधर्मिकत्वोपगमेनेष्टापत्तिपर्यवसायितानं
व्याख्यातेति चेन्न· उत्पत्तिमत्तयाऽवधृतेपि धूमेऽहेतुकत्वसंशयदा संशयपत्ति कार्यान्तरेपि सत्त्वभावेन सहेतुकत्वप्रसिद्धेर्दुर्लभत्वात् न हुत्पन्नमिश्रसादन्यो [illegible] तादृशशङ्काविरोधिरूपं सम्भवतीति·।· अथ वन्हेरित्यत्र मूलेऽवन्हिपदस्य न वन्हिभिन्नार्थकत्वे वन्हिभिन्नजन्य
त्वं तन्मात्रजन्यत्वं वा कोटिः स्यात् तन्मात्रकोटिकशङ्कायाश्च न प्रकृते विरोधिता सम्भवति· प्रथमे पक्षसाधारण्यात् द्वितीये च तच्छङ्काया वन्हिजन्यत्वशङ्कापर्यवसितायास्तर्कात्पूर्वमुत्कटेच्छत्वात् तदभावस्यापाद्यप्रतियोगिकोटौ निवेशासम्भवात्तत्संशयसत्त्वे

५

आपाद्यव्यतिरेकनिश्चयासम्भवात् तदभावस्यापाद्यप्रतियोगिकोटौ निवेशाद्द्रवत्तद्रूपया विशिष्टाभावरूपापाद्यसंशयत्वापादकतया दृष्टत्वान्नि पर्यवसितत्वमिति) अतस्तद्व्याचष्टे – अवन्हेरिति ।। वन्हिशून्यात् ।। वन्ह्यसमवहितात् तथाच वन्ह्यसमवहितजन्यत्वकोटिकत्वं शङ्का
या रूपं· ताद्दृश्याश्चापाद्यप्रतियोगिकोटिप्रविष्टवन्ह्यसमवहिताजन्यत्वविरोधित्वप्रयुक्ता तर्कविरोधितोपपत्तिः ।। मूले – इत्यत्रेत्यादि ।। तर्केऽस्यघ्राने इति शेषः ।। इतिशङ्का स्यात् ।। इत्यादि शङ्का जायेत· सम्भावनार्थे लिङ्· सर्वत्र शङ्कायां स्वक्रियाव्याघातः धू
मादौ गृहीतवन्ह्याद्यन्वयव्यतिरेकानुविधानस्य धूमाद्यर्थितया वन्ह्यादौ प्रवृत्तेर्विरोधः तदभावापादकत्वाभिति यावत्· आपादनाकारमेवाह – यदि हीति ।। गृहीतान्वयव्यतिरेकौ हेतुर्वन्हिः स्तं विना कार्यो स्यन्ति· धूमेतदसमवहितजन्यत्वं कार्यसामान्येऽहेतुकत्वं
वेतिशेषः· उपादानं· समवधानं कथं कुर्यात् वन्ह्यादि समवधानेन प्रवर्तेतेति यावत् ।। तेन विनापि तत्सम्भवादिति ।। तदसमवहितादपि तत्सम्भवतीत्यादि प्रदानस्य पूर्वेतरकारणताग्राहकविरोधित्वसत्वादित्यर्थः तात्पर्यात् ।। तादृशापत्तिनिर्वाहानुरोधात् ।। तदुपादाने
वन्ह्याद्युपादानं शङ्काप्रतिबन्धकं स्यात्स्थीयते इति शेषः· अगोपादानपदस्य भावव्युत्पत्त्या प्रसक्त्यादिपरत्वं न सम्भवति प्रसक्त्यादेः शङ्काविरोधित्वाविरहादितो व्याचष्टे – दीधितौ – तदुपादानमितीति ।। केवलव्युत्पत्त्युपलक्षणं तस्य उपादानं यस्मादिति बहुव्रीहि
समासादरे इत्यपि बोध्यम् तदीयं कार्यमिति ।। वन्ह्यादिकार्यधूमादीत्यर्थः· वन्ह्यादौ धूमादिप्रयोजकताज्ञानस्य धूमादौ वन्ह्यादिप्रयोजकत्वरूपवन्ह्यसमवहितजन्यत्वव्यावर्तकधर्मविषयकतया तच्छङ्काप्रतिबन्धकत्वोपपत्तिः एवं तत्प्रसक्त्यादिकार्यप्रत्ययस्यापि
प्रयोजनादौ तन्निष्ठत्वपूर्ववर्तित्वाभावव्यावर्तकस्य तत्प्रयोजकधर्मस्य कार्यसामान्येऽहेतुकत्वशङ्कानिवर्तकत्वं प्रयोजकत्वस्य कारणत्वादन्यत्वेन स्वव्यर्थविशेषः कारणाकारणसाधारणा इति पूर्वं न कारणताग्राहकतर्कवैकल्यं ।। ननु कारणत्वस्यैव प्रयोजकत्व
स्यापि प्रथमं दुर्निश्चयत्वात् कथं तन्निश्चयात् शङ्काप्रतिबन्ध इत्याशङ्काप्रकारान्तरमनुसरति – तादृशान्वयेति ।। धूमादिधर्मिकवन्ह्याद्यन्वयव्यतिरेकानुविधायित्वव्यतिरेकत्वनिश्चयपरं वेत्यर्थः तदन्वयव्यतिरेकानुविधायित्वनिश्चयश्च तर्कामूलमपि सम्भ
वति प्रत्यक्षतो यत्र न वन्हिस्तत्र न धूम इति निश्चयविरोधिशङ्कासम्भवश्चाशात् तादृशानिश्चयोऽनवन्ह्यजन्यत्वशङ्काविरोधी तदन्वयव्यतिरेकानुविधायित्वस्य तदजन्यताग्राहकतर्कसाधारणतया तदजन्यत्वाव्यावर्तकत्वात् इति न तर्कानवस्थेति भावः
अग्रे तन्नमपीत्यपिकारः· स्वक्रियापदप्रयुक्त्यन्तरं योज्यः उक्तरीत्या सर्वत्र स्वक्रियाव्याघात इति प्राक्तनस्वक्रियापदस्य प्रसक्तिपरतया अपि सम्भवादग्रेतनमित्युक्तं ।। केचित्तु स्वक्रियाव्याघात इति ग्रन्थस्य प्रसक्त्यभावप्रसञ्जनपरत्वे मिश्राणां त्वित्यादिना
वक्ष्यमाणमताभेद· स्यादिति ग्रन्थकारमते तादृशग्रन्थस्य सकलशङ्कानां स्वक्रियया प्रतिबन्ध इत्येवार्थः स्वक्रियायाः शङ्काप्रतिबन्धकत्वे प्रमाणाकाङ्क्षया यदि हीत्यादिना स्वक्रियायाः शङ्कायाम प्रतिबन्धकत्वे प्रसक्त्यनुपपत्तेरभिधानं तस्यास्तदुपादान
मितिग्रन्थेन स्वक्रियायाः शङ्काप्रतिबन्धकत्वोपसंहारः एवकारश्चाप्रतिबन्धकमित्यन्तं योज्यः इत्थञ्चाग्रेतनमपीत्यपिकारो यथास्थान एव प्राक्तनस्वक्रियापदसमुच्चायक इत्याहुः· तन्न मिश्रमते तादृशग्रन्थस्य परार्थानुमानस्थलाभिप्रायक
तयास्तन्मते च स्वार्थानुमानस्थलाभिप्रायकतयाविशेषात्· स्वक्रियापदस्य यथाश्रुतार्थपरित्यागे नौचित्यसपूर्त्वप्रसेवेति ।। तदुपादानपदं यत्परं तत्परमेवेत्यर्थः· उपादानपदस्येत्यादि परित्यागबीजं स्वयमेवाह – इत्यादेरिति ।। आदिपदात्क्षेपादिरूपव्या

पारदपरिग्रहः ।। मानाभावादिति ।। विरोधिनिश्चयस्यैव तथात्वादिति भावः ॥ ननु तत्तत्फलसाधनताज्ञानजन्यायाः कृतेरपि तत्तत्फलसाधनताविषयिकैव स्वीकरणीया तत्पूर्वे भोजनं करोमीत्याद्याकारकतदनुभवबलात् अत एव नैककफलगोचरेच्छासहितापरफलसाधनताज्ञानात्प्र
वृत्तिवारणाय विशिष्य तत्तत्फलगोचरेच्छात्वेन तत्तत्फलसाधनताज्ञानत्वेन प्रवृत्तिहेतुतायाः आवश्यकत्वादेकफलेच्छादिजन्यप्रवृत्तावेव फलेच्छादेर्व्यभिचारस्यानवकाशः तत्तत्फलेच्छादिजन्यतावच्छेदककोटौ तत्तत्फलसाधनतावगाहित्वस्य निवेशनात् न चोक्तकृतौ फलेच्छा
दिजन्यतावच्छेदककोटौ तत्तत्फलोद्देश्यकत्वनिवेशेनैव व्यभिचारवारणसम्भवात् साधनतायाः कृतिविषयत्वे मानाभाव इति वाच्यम् उद्देश्यत्वविषयतायाः अनुभवविरुद्धतया तत्फलसाधनत्वेन उपायान्तरविषयकेण फलान्तरसाधनत्वेनैव एतदुपायविषयकेन ज्ञानेन
जनितायां फलद्वयोपायद्वयविषयकप्रवृत्तौ व्यभिचारवारकतया उपायविषयतानिरूपितफलविषयतोपगमे उपायफलयोः सम्बन्धविधया कार्यकारणभावस्योपेयत्वात् नहि ययोः सम्बन्धो न भासते तद्विषयत्वयोर्निरूप्यनिरूपकभावो सम्भवः ॥ एवञ्च कृतेः कार्यका
रणभावविषयकतया तद्विषयकज्ञानस्यैव तस्या आपादकत्वाविरोधिसमव्याहृतमेव ज्ञानस्य मनन[illegible] संशयाद्यविरोधिप्रकारकत्वेन प्रतिबन्धकत्वात् त्रिविधमपि वा संस्कारापादकसामग्रीज्ञानत्वे किञ्चित्प्रयोजकजातिविशेषरूपावच्छिन्नकृतेः प्रवृत्तिहेतुत्वं प्रकारान्तरेणा
पि निराकरोति - कारणताग्रह इति ।। तथा च यद्गुणनिष्ठतर्कोपनायके सति कार्यकारणभावग्रहः कार्यकारणभावग्रहे च सति अनुगतिरित्येव स्यादिति भावः परीक्षाकथनं तु लाघवतर्कस्य कार्यकारणभावानिश्चायकत्वोपगमो मानाभावे न मन्यते किन्तु प्रयत्नसामानाधि
करण्यप्रत्यासत्तिमनन्तर्भाव्य कार्यकारणभावे निश्चिते तन्नाधारत्वेन तत्र समवधानाभावस्य प्रमाजनकत्वे चावच्छेदे लक्षणविकल्पेण तर्कानुसारितर्कस्य शङ्का अव्याप्यत्वगोचरस्यैव व्याप्तिग्रहे न सम्भवतीति वह्न्यधिकरणदेशोत्पत्तिकत्वनिश्चयार्थम्
यतते इत्याह ॥ दीधितिकृतापि इदमेव च वाचोयुक्त्या प्रतिनामतमेतत्प्रदर्शयिष्यते ॥ तथा च सति प्रकृते कार्यकारणभावग्रहस्यापेक्षितत्वे नान्योन्याश्रयप्रयोजकमित्यपास्तो [illegible] नादिपदम् विपरीतपर्यवसानं चक्षुर्ज्ञानसामान्यसहितमेव च विवक्षते
शङ्काप्रतिबन्धकताप्रयोजकमपि चकार ॥ तत्रेदं चिन्तनीयम् विरोधिनिश्चयप्रतिबन्धकतावच्छेदकधर्मविशिष्टज्ञानत्वान्तर्भावे विरोधिविषयकानुबुद्धसंस्कारस्यापि प्रतिबन्धकत्वापत्तेः संस्काराणां संस्कारत्वजातिविशेषनिवेशे तु किमपराद्धं
ज्ञानत्वेन ॥ न च तादृशजातौ प्रमाणाभावः सत्वे विनिगमनाविरहात् तत्प्रकारेणापि प्रतिबन्धकत्वापत्तेरावश्यकत्वात् सदृशाहतमेव कृतेस्तथात्वमिति वाच्यम् ज्ञानत्वावच्छिन्नस्य निश्चितसाध्यव्यभिचारकत्वसम्भवे तथात्वं प्रमाणं व्याघातानुपपादेर्लिङ्गजन्मनश्च
तादृशजात्यवच्छिन्नत्वात् तथात्वमित्यस्यैव विनिगमकत्वमिति ।। ननु वह्निशून्ये तत्र धूमत्वावच्छिन्नानुत्पाददर्शनेऽपि धूमत्वावच्छेदेन वह्निजन्यत्वानवधारणे धूमेन वह्न्यनुमानानुपपत्तिः धूमाभावस्य वह्न्यधिकरणे वह्न्यभावव्याप्यत्वग्रहदशायामुक्तदोषेऽत्रापि
तथा च सामान्यतो धूमत्ववह्नित्वाभ्यां कार्यकारणभावावधारणे एतत्कोटिमनुमितिर्भवति तथा वह्निजन्यतया धूमत्वावच्छेदेनैव वह्निसमानाधिकरणतावच्छेदकमिति जन्यत्वाभावात् उपपत्तिरिहोत्पद्यते तादृशापत्तेर्धूमत्वसामानाधिकरण्येन वह्निजन्य
त्वसंशयानिवर्तकत्वात् तादृशसंशयदशायां धूमत्वस्य जन्यतावच्छेदकत्वनिश्चयासम्भवात् नहि पक्षतावच्छेदकावच्छेदेनोपपत्तिस्तत्सामानाधिकरण्यमात्रेणापादकज्ञाननिवर्तयितुमर्हति यतो यादृशमापादकज्ञानं यादृशमाप

निं जनयति सा तादृशज्ञाने ऽनिष्टसाधनत्वमुपनयन्ती इच्छाविघटनद्वारा प्रणिधि-आदिवत्स्वत एव वा तन्निवर्तयति अवच्छेदकावच्छेदेनापत्तौ तदवच्छेदेनैवापादकज्ञानं हेतुः तदेकदेशे ऽभ्युपगतस्य तत्सामान्ये ऽनिष्टप्रसञ्जकत्वात् न
चापक्षतावच्छेदकसामानाधिकरण्यमात्रेणापादनं निवर्तनक्षमः तत्सामानाधिकरण्यमात्रावगाही तर्कः प्रकृते सम्भवति धूमत्वसामानाधिकरण्यमात्रावगाहि वह्निसमवहितजन्यत्वाभावाङ्गीकारे ऽन्वयव्यतिरेकानुविधान
निश्चयानिवर्तनीयतया आगत्याज्ञानस्य तादृशतर्के हेतौ धूमत्वावच्छेदेनापत्तिः घ्यव्यतिरेकनिश्चयस्यानुदयात् न चापत्तौ सामान्यधर्मावच्छेदकतापाद्यव्यतिरेकनिश्चयमात्रमपेक्षितं न चावच्छेदकावच्छेदेन तत्सामानाधिकरण्यमात्रेण वा व्यति
रेकमवगाहतामिति वाच्यम् विरोधिविषयकत्वेन निश्चयस्य तर्कहेतुत्वोपगमात् तथा च तद्व्यतिरेकसामानाधिकरण्यमात्रस्य तत्सामानाधिकरण्याविरोधित्वात् तद्व्यतिरेकावच्छेदकस्यैव च तथात्वात् अत एव तर्कस्याहार्यत्वोप
पत्तिः अत एव च प्रमेयत्वादिसामानाधिकरण्येन गुणत्वाद्यादिव्यतिरेकनिश्चयेपि द्रव्यत्वादिना तत्सामानाधिकरण्येन न गुणवत्ताद्यापत्तिः कदेति तथा चाहार्यज्ञानस्यापि निश्चयानुदये धूमत्वसामानाधिकरण्येन तज्जन्यत्वसंशयानिवर्त
कधूमानुदयेन सामान्यतः कार्यकारणभावानिश्चयेपि वह्नित्वे धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वसामान्याभावग्रहविरोधितादृशावच्छेदकत्वलक्षणव्यभिचारशङ्कायाः कथं निवृत्तिः धूमत्वसमानाधिकरणजन्यताप्र
तियोगिकजनकतायाः सामानाधिकरण्यस्यावच्छेदकत्वे सम्बन्धतादृशाप्रतियोगितावच्छेदकत्वाविरोधित्वादित्याशङ्क्यते - यद्यपीति । नाप्यति - नास्त्येवेति - ननु धूमत्वसमानाधिकरणजन्यताया धूमादिनिष्ठधर्मावच्छिन्नत्व
बाधसहकृतादवच्छिन्नत्वग्राहकजन्यत्वादिहेतोः धूमत्वावच्छिन्नाविषयकत्वमापत्तेरित्यत आह - गवीति । यथा तृणादीनां वह्नित्वसमानाधिकरणजन्यतानिरूपितजनकत्वेपि न तदवच्छिन्नजन्यतानिरूपितजनकत्वं अपि तु तद्वृत्तितत्तद्धर्मावच्छिन्नजन्य
ताकत्वमेव तथा प्रकृतेपि यावन्तो धर्मास्तदवच्छेदकत्वेपि जन्यतायां धूमत्वसामानाधिकरण्योपपत्तेरित्यर्थः तथा च यावत्तद्धर्मस्यावच्छेदकत्वसम्भावनया न जन्यतायां धूमत्वव्याप्यावच्छेदकत्वबाधनिश्चयः । विशेषाणां का
र्यकारणभावग्रह इति । विशेषधर्मावच्छेदेनान्वयव्यतिरेकदर्शनेऽनायासात् सामान्यधर्मसामानाधिकरण्येन कार्यकारणभावग्रह इत्यर्थः । सामान्यतश्च । सामान्यधर्मावच्छेदेनैव । तस्य । कार्यकारणभावं । द्विविति ।
त्रिविधविषयीकरोतीत्यग्रिमेणान्वयः एवकारेण विशेषधर्माणामवच्छेदकानवगाहितायामवच्छेदः विरोधिशङ्कासत्वे सामान्यधर्मसामानाधिकरण्येनापि न कार्यकारणभावग्राहकसामग्री सम्भवतीत्यत आह - तर्केणेति ।
उक्ततर्केणेत्यर्थः तद्विरोधिशङ्कायां तादृशकार्यकारणभावग्रहविरोधिन्यां सामान्यधर्मावच्छेदेन कार्यकारणभावशङ्कायामनपनीतायां सत्यामायसात् नन्वेवं कस्यचित्सामान्यधर्मस्योपाधेः स्थितौ तदवान्तरधर्मावच्छेदेन
क्वचिदपि कार्यकारणभावग्रहो न स्यात् अपि तु सामान्यधर्मावच्छेदेन इत्याशङ्कामपाकरोति मुः सामान्यधर्मसामानाधिकरण्येन कार्यकारणभावग्राहकसामग्र्या तन्मात्रावच्छेदेन तदग्रहजनने ऽपेक्षणीयान्तरमाह - सा

ख

मान्यव्यभिचारनिर्णयेति ।। सामान्यधर्मावच्छिन्नविशेष्यताकप्रकृतकार्यत्वाभावाविष्क्रियते इत्यर्थः । एतेन वह्नित्वलाघवच्छेदेन तृणादौ संयोगविभागादिविशेषसाधारणगुणत्वाघवच्छेदेन च कर्मादेर्जन्यताग्रहप्रसङ्गो वाधितः तृणादिकं विनापि वह्न्या
घुत्पत्तिदर्शनेन वह्नित्वादिसामानाधिकरण्येन तृणाद्यजन्यत्वनिश्चयात् तुल्यैकं तृणघटान्वयव्यतिरेकानुविधायित्वं अवह्नि तु अनुगतागृहीतविशेषसाधारणस्य जातित्वप्रसक्त्या प्रामाणिके ।। किं चान्वयव्यतिरेकानुविधायि संयोगविभागादिषु संयोगत्वादिना सङ्ग्र
हणे दनुगततादौ सामान्यं । तत्र द्वितीयप्रयोजकसत्त्वमव्याहतमेवेति ध्येयम् । प्रकृते सामान्यधर्मेण धूमसामानाधिकरण्येन वह्न्यजन्यत्वस्य व्यत्यये सत्त्वानिश्चयमनुभावतः । अस्य च वाधनिश्चयाभावे हेतुत्वस्य कारणत्वेनैवोपयोगितावोधा । नच
गन्धप्रागभावसामानाधिकरण्येन गन्धवत्तानिश्चयकोऽपि तदवच्छेदेन गन्धात्यन्ताभावग्रहः भूमितावच्छेदकांशे नतिरिक्तमित्येव तु पावच्छेदकत्वावगाहित्वात् स एव विषयीभूतसामानाधिकरण्यमात्रावगाहि वाधनिश्चयो विरोधी ननु स्व
रूपसम्बन्धरूपतदवगाहित्वात् इति वह्नित्वादौ स्वरूपसम्बन्धरूपावच्छेदकत्वग्रहे कथं तत्सामानाधिकरण्यमात्रेण तृणाद्यजन्यत्वनिश्चयो विरोधीति वाच्यम् । अनुभवानुरोधेन तादृशानतिरिक्तनियतविलक्षणस्वरूपसम्बन्धरूपावच्छेदक
त्वावगाहित्वादपि तु सामानाधिकरण्यमात्रावगाहिग्राह्याभावनिश्चयस्य प्रतिबन्धकत्वोपगमात् । गन्धप्रागभावादौ एवावच्छेदकत्वमव्याहतमेव ।। केचित्तु इह व्यभिचारानिश्चयपदं सर्वावच्छेदावच्छेदकभावविरहनिश्चयपरतया व्याकुर्वते । तन्न
अवच्छेदावच्छेदकभावस्य संसर्गविधया भाने तद्विरहनिश्चयस्याविरोधित्वात् । नच वह्नित्वादिधर्मिकावच्छेदकतासम्बन्धावच्छिन्नजन्यत्वाभावप्रत्ययस्य तत्त्वमितिवाच्यम् । वह्नित्वावच्छेदेन जन्यतावगाहिनः स्वरूपतो वह्नित्वाद्यात्मकधर्मि
तावच्छेदकावगाहित्वात् नस्य तादृशाभावग्रहधर्मितावच्छेदकप्रकारकत्वेन वह्नित्वाघविषयकत्वतया प्रतिवध्यत्वासम्भवात् ।। अनुगतागृहीतविशेषत्वानानुपस्थितीति ।। यावत् अन्वयव्यतिरेकानुविधायित्वे गृहीते तावत् साधारणस्य सामान्य
धर्मापेक्षया ऽगुरोः ऽन्यूनानतिरिक्तधर्मस्यानुपस्थितीत्यर्थः । एतेन विशिष्टानुभवत्वाद्युपस्थितिदशायां विशिष्टज्ञानत्वाघवच्छेदेन विशेषणज्ञानादिजन्यत्वाग्रहेऽपि तत्र तः । नहि तत्र स्मरणे व्यभिचारनिर्णयः सम्भावितः प्रत्यक्षस्यैव स्मरणस्या
भिन्नविकल्पकल्पस्य सम्भवात् प्रकृते भूम्नि विशिष्टधावस्तु व तूत्स्वन्वयव्यतिरेकानुविधायित्वस्य ग्रहः । तावद्दृशान्यतमसत्त्वस्य द्रव्यत्वादेश्चोपस्थितिसम्भवात् [illegible] तदुपस्थितिसत्त्वे च तदग्रहोपपत्तये । नगरवत्त्वाग्रहत्वन्यूनवृत्तित्वानां वि
शेषणतयानुसरणं ।। सा च ग्राह्यत्वोपस्थितिसत्त्वे च नरत्वपेक्षया ऽधिकवृत्तिधर्मस्यावच्छेदकसङ्ग्रहः । स्मर्याणि सामान्यधर्मस्यावच्छेदकत्वे अवच्छेद्यजन्यतायां तदधिकरणीभूतताधिकदेशावृत्तित्वकल्पने गौरवं । विशेषधर्मस्य तथात्वेन
तदवच्छेदकत्वेन लाघवमिति प्रतिसन्धानेन प्रतिवन्धाद्यदि तादृशोपस्थितिविरहेऽपेक्षा इत्यादृशलाघवमपि एवं धर्मान्तरस्यान्यूनवृत्तित्वमुपयुज्यते इति तदभिहितम् । एवं धर्मान्तरस्य धारणे गौरवे च तदघटिततत्तदवच्छेदकता
या कल्पनीयतया गृहीतान्वयव्यतिरेककार्यतारतम्यत्वे च कार्यतायां ऽन्यधर्मावच्छेदेन कार्यत्वावान्तरस्य कल्पनीयतया नोक्तलाघवावकाशः इत्यतो तुल्यतागुरुधारीरत्वेऽपि तादृशलाघवज्ञानमुपयुज्यते इति ध्येयम् ।। लाघवप

तिसन्धानेति ।। तत्र धूमत्वतत्तद्वह्नित्वानां कार्यकारणभावावच्छेदकत्वेन नानाकार्यकारणभावकल्पने गौरवं । धूमत्ववह्नित्वयोस्तदवच्छेदकत्वे पुनस्तदैक्येन लाघवमित्यर्थः ईदृशलाघवप्रतिसन्धानमेव कारणमन्ये विशेषधर्मावच्छेदेन कार्यकारणभाव
ग्रहे उपयुज्यते । आदिपदात्समनियतधर्मान्तरापेक्षया गौरवप्रतिसन्धानाभावपरिग्रहः । तेन धूमत्वापेक्षया गुरुणा धूमत्वादिसमनियतधूमत्वप्रकारकप्रमाविषयत्वादिरूपेण वह्निजन्यत्वनिरासः ।। ननु सामान्यधर्मसामानाधिकरण्यमात्रे
णान्वयव्यतिरेकग्रहस्य सामान्यव्यभिचारानिर्णयादिसहकारेण सामान्यधर्मावच्छेदेन कार्यकारणभावग्राहकमास्तु इत्यत आह — प्रामाणिकी चेति ।। अनुभवसिद्धत्वे वेत्यर्थः ।। तथैव ।। सामान्यधर्मावच्छिन्नकार्यकारणभावग्राहकत्वेनैव ।। अन्वयव्यति
रेकाविति ।। विशेषाणामिति शेषः । ननु जन्यत्वाभावशङ्कारूपप्रतिबन्धकसत्त्वान्न कस्मिन्नपि सामान्यधर्मावच्छेदेन कार्यकारणभावग्रहः सम्भवतीत्यत आह — फलबलेनेति ।। अनुभवसिद्धफलान्यथानुपपत्त्येत्यर्थः ।। लाघवज्ञानादिसहकारेणेति ।।
कस्यचिद्धूमस्य वह्निजन्यत्वे धूमत्वापेक्षया गुरुधर्माः कश्चनसम्भवो नानाविशेषधर्मा वा जन्यतावच्छेदकाः स्युरिति गौरवं धूमत्वावच्छेदेन जन्यत्वे च न तथेति ।। लाघवमित्यादि ।। लाघवज्ञानाद्यभावविशिष्टबाधादित्यर्थः ।। आदिपदाद्विशेषदर्शनपरि
ग्रहः सामान्यतो व्यभिचारशङ्कायाः धूमत्वादिसामानाधिकरण्येन वह्न्याद्यजन्यत्वशङ्कायाः प्रतिबन्धकत्वमित्यस्य धूमत्वावच्छेदेन वह्न्यादिजन्यत्वग्रह इत्यादिः न चैवं लाघवज्ञानस्य स्वग्राह्याभावनिश्चयदशायामपि प्रत्यक्षनिश्चयापत्तिः संश
यस्य विपरीतनिश्चयस्य वा रणविपरीतज्ञानत्वेनैव प्रतिबन्धकतया तस्य प्रतिबन्धकत्वानुपपत्तेरभावादिति वाच्यम् । विपरीतनिश्चयानन्तरं संशयादिवारणाय संशयादिसाधारणग्रहस्य ज्ञानत्वावच्छिन्नं प्रति विपरीतनिश्चयत्वेन स्वतन्त्रप्रति
बन्धकताकल्पनस्यावश्यकतया तत्र च लाघवज्ञानाद्यभाववैशिष्ट्याविवक्षणात् तादृशप्रतिबन्धकतावच्छेदकाक्रान्तत्वस्य तस्यैवोपपत्त्ययोगात् । भूमान्तरे विशेषदर्शने जातेऽपि धूमत्वावच्छिन्नस्यैव प्रत्यक्षनिश्चयोपगमेन निश्चयप्रतिब
ध्यतावच्छेदककोटौ प्रत्यक्षनिश्चयभेदानिवेशात् ।। इदं च प्रत्यक्षनिश्चये ग्राह्यसंशयस्य प्रतिबन्धकतामभ्युपेत्याभिहितम् । स्वमते तु विशेषदर्शने लाघवज्ञानस्यापि विपरीतकोटिभाननिवर्तकत्वेन निश्चयोपयोगिता बोध्या ।। इदमत्रा
वधेयम् । यत्रोपपादितरीत्या तर्कावतारात् पूर्वमेव धूमत्वसामानाधिकरण्येन वह्न्यसमवहितजन्यत्वशङ्काजनकसाधारणधर्मदर्शनात्मकदोषादिसमवधानं दैवगत्या दृश्यते तत्र तादृशशङ्काविरहप्रयोजकस्य दुर्लभतया धूमत्वावच्छेदेनापाद्यव्यतिरेकानि
श्चयात्मकाभावात् सामानाधिकरण्यमात्रावगाहितर्को नावतारितुमीष्टे इति तादृशस्थले नाभिप्रायकोऽयं सामान्यधर्मावच्छेदेन जन्यताग्रहोपायप्रकारः । अत्र च तर्कात्पूर्वं दोषादिविरहात्तादृशशङ्कानुदये तत्र धूमत्वावच्छेदेन वह्न्यसमवहिता
जन्यत्वनिश्चयात् सामानाधिकरण्यमात्रेणापत्त्यर्थकस्य आहार्यसहितात् सामानाधिकरण्यमात्रेणापादनेः मूलभूतितर्कस्य सामान्यकार्यकारणभावग्रह इत्यर्थात्तावतापर्याप्तेः तदभिप्रायेणैव च क्वचिद्धूमं विनापि भवितव्यमित्याकारकोऽप्यत्र
इत्यापत्तिशङ्काया तर्कविरोधित्वाभिमानसङ्गतिः । अन्यथा पक्षतावच्छेदकावच्छेदेनापत्तौ तादृशशङ्काया आपाद्यविरोधित्वात्तदसङ्गतमापद्येत । न चैवमन्वयव्यतिरेकानुविधायित्वज्ञानस्योपादानपदार्थस्य ताद्रूप्यशङ्काविरोधित्वाभिमानसङ्

१-पा· वस्तुतस्तु क्वचिद्वह्निं विनापीति शङ्काविधूमत्वावच्छेदेन वह्निजन्यत्वकोटी विशेषिण्यैव पूर्वशङ्कायां स्वाव्यवहितप्राक्कालावच्छिन्नवह्न्यभाववत्साध्यो स्वनिरूपकत्वं क्षितीयाऽत्र मात्रानन्तर्भावेन ताद्दशाभावबद्धत्वनिरूपकत्वं कोटिरित्यतस्तद्भङ्गः यो ऽयं दत्तसमाधिरिति तु पाध्यायास्तु-
सत्वेनान्वयव्यतिरेकदर्शनेऽतीतानागतधूमे वह्न्यसमवहितजन्यत्वशङ्कासंभवान्न धूमत्वावच्छेदेन जन्यत्वनिश्चयः संभवतीति न सामानाधिकरण्येनापादकशङ्काविरोधिन्याः सामानाधिकरण्येनापन्नेः संभवः इत्याशङ्क्य धूमत्वावच्छेदेन तन्निश्चयमुपपाद्य सामानाधिकरण्येनापि निश्चयमुपपादयितुं प्रकारान्तरेण ताद्दशशङ्काविरहमुपपादयति तदर्थः
तत्रैव· ताद्दशाशङ्काविरोधिनोऽवच्छेदकावच्छेदेनान्वयव्यतिरेकग्रहस्याशक्यत्वादिति वाच्यम्· तद्दुणादानपदेनान्वयव्यतिरेकग्रहवत् शङ्काविरहप्रयोजककारणान्तरस्यापि विवक्षितत्वादिति सर्वं समञ्जसम्·। वस्तुतस्तु पक्षतावच्छेदकनिष्ठावच्छेदकताभिन्नाप-
क्षतावच्छेदेन गृहीतधर्मनिष्ठावच्छेदकताभिन्नाच याऽवच्छेदकता तन्निरूपितपक्षविशेष्यताशालितर्कस्यापि अनुमानानुरोधेन तन्निवर्तकत्वमित्युपाध्यायमतपरिष्कारो बोध्यः·- अतएव स्वपगमेपि वह्न्यसमवहितजन्यत्वस्यापादकविशेषणत्वमुपेक्ष्य आपाद्यकोटौ तन्नि-
वेशोपि च वह्न्यसमवहितजन्यत्वादिपदस्य वह्निजन्यत्वादिपरतया च तदेवमतं परिष्कृत्य दर्शयति- अपरे त्विति·। धूमत्वावच्छिन्नस्य·। वह्न्यसमवहिताजन्यत्वस्य एतेनान्वयः· तथा च धूमत्वावच्छेदेन निश्चितस्य वह्न्यसमवहिताजन्यत्वस्य व्यतिरेको धूमत्वसामानाधिकरण्ये-
नापादनीय इत्यर्थः· तथा चोक्तप्रकारान्तरेणैव ताद्दशतर्काद्धूमत्वावच्छेदेन वह्निजन्यत्वं सुनिश्चितमिति भावः·। ननु धूमत्वावच्छिन्नस्य वह्निजन्यत्वेनेत्यनया धूमत्वावच्छेदेन निश्चितेन वह्निजन्यत्वेनापादनीय इति धूमत्वावच्छिन्नस्यापादनीय इत्यन्वयेन वा धू-
मत्वावच्छेदेनापादनीय इत्यर्थः· न धूमत्वावच्छेदेनापन्नस्य सामानाधिकरण्यमात्रविषयकापादकसंशयविरोधिताया· प्रागव्यवस्थापनेन ताद्दशापत्तेः किंफलं स्यात्·। जन्यत्वविशिष्टस्येति·। तेनाजन्येन व्यभिचार इति भावः·- नान्तरीयकवह्नेर्व्याप्ति-
बाधवारणाय वह्न्यसमवहिताजन्यपदस्य वह्न्यघटितसामग्र्यजन्यार्थकता नाश्रुपेया· अपि तु जन्यत्वमेव प्रागवत् जातिविशेषः निर्वचनीयमित्येतत्सूचितं वह्न्यसमवहिताजन्यत्वस्य यथाश्रुतत्वमभिहितं· अग्रेतनतच्चेत्यस्य वह्न्यसमवहिताजन्यत्वपरामर्शो
कतात्स्मिन्निति तत्र विशेष्यविधया प्रवेशे तु विशेष्यविशेषणभावविपर्यये क्षतिविरहात् द्वैरोधिशङ्कानिराकरणप्रकारं दर्शयन् धूमत्वावच्छेदेन वह्न्यसमवहिताजन्यत्वनिश्चयस्य सुघटतामाह- तर्कोति·। वह्न्यसमवहिताजन्यत्वस्येत्यर्थः· मन्नते सोव सुग्रहमित्य-
स्तदुपनयसहकृतेत्यादिः· एतावता वह्न्यसमवहितजन्यत्वसामान्याभावस्यायोग्यपिशाचादिजन्यत्वघटितत्वेनायोग्यतया प्रत्यक्षासंभव इति त्वावभीमासाभिहितदूषणमुद्धृतम्·। उक्तन्यायेनेति·। हलाद्यानयनादिषु उक्तप्रणाल्येत्यर्थः· वह्निघुक्तकार-
णकत्वाप्रजन्यत्वग्रहेण धूमोत्पादकसामग्र्यां वह्निसमवहितत्वग्रहेण तद्व्यतिरेकजन्यत्वशङ्कानिरासादिति धूमसामग्रीत्वावच्छेदेन वह्न्यसमवहितत्वशङ्काया अनुदयादित्यर्थः·- तथा च ताद्दशाशङ्काधीनाया धूमत्वावच्छेदेन वह्न्यसमवहितसामग्रीक-
त्वशङ्काया अनवकाशात्·- तदवच्छेदेन ताद्दशसामग्रीकान्यत्वनिश्चयात् स्वाधिकरणदेशावच्छिन्नवह्न्यभाववत्त्वाव्यवहितप्राक्क्षणकत्वशङ्कानिरूप्या ताद्दशक्षणकान्यत्वरूपवह्न्यसमवहिताजन्यत्वनिश्चयः· न चोक्तसामग्रीवैशिष्ट्यस्य
त्वसामानाधिकरण्येन वह्न्यसमवहितत्वशङ्कासंभवात् तदधीनधूमत्वसामानाधिकरण्येन वह्न्यसमवहितसामग्रीकत्वशङ्कासंभवेदेवेति कथं धूमत्वावच्छेदेन वह्न्यसमवहिताजन्यत्वनिश्चयः·· न चैवमनन्तलाघवविच्छिन्नसमूहे धूमोत्पादकसामग्री-
त्वस्यान्वयव्यतिरेकेण निश्चयदशायां ताद्दशसमूहस्य वह्न्यसमवहितस्य धूमोत्पादकत्वसंशयो धूमोत्पादकसामग्रीकत्वरूपेण वह्न्यसमवहितत्वसंशयोऽभविष्यति· स च वह्निविरहे तथाविधधूमानुत्पादप्रदर्शनेन वह्न्यसमवहितताद्दशसमूहे धू-
मोत्पत्त्यप्रयोजकत्वनिश्चयाद्वा निवर्तते इत्युपाध्यायोक्तं सम्यक् इति वाच्यम्· क्वचिद्वह्निं विनापि तथाविधसमूहाद्धूमानुत्पादप्रदर्शनेपि वह्न्यसमवहितादेव क्वचित्सहकार्यन्तरसमवहिताद्धीरघोससमूहाद्धूमो भविष्यतीत्याशङ्कानपायेन वह्न्यसमव-
हितताद्दशसमूहत्वावच्छेदेन धूमोत्पत्त्यप्रयोजकत्वस्य दुर्निश्चयत्वादित्याशयवह्न्यसमवहितताद्दशसमूहे इतरानपेक्षया धूमोत्पादकत्वाभावस्य इतरापेक्षया धूमोत्पादकत्वाभावस्य च मिलितत्वाद्धूमोत्पादकत्वसामान्याभाव[illegible]व्याप्यस्यानि

भिमुपपादयितुं प्रकारा-
न्तरेण ताद्दशशङ्काविर-
हमुपपादयति तदर्थः
कार्यं च वह्न्यसमवहि-
ताजन्यत्वस्य पक्षविशे-
षणत्वे धूमत्वावच्छेदेन
तन्निश्चयोपि
नोक्ततर्क
धूमत्वसामा-
नाधिकरण्येन
वह्निजन्यत्वे
शङ्कानिरासः
संभवतीति
यद्यपि धूमत्वावच्छिन्नपक्ष-
कतर्कस्यैव तन्निवर्तक-
त्वादित्यपास्तं यथार्थत्व-
अनन्तत्वस्य० इति पाठान्तरम्-१

व्या·टि·७५·

८

अथ विरोधित्वाःशङ्कायानिरस्तिप्रकारमाह– वह्निविरहेपीति ।। तादृशासमूहस्येत्यनेनाखिलं वह्न्यसमवहित तादृशासमूहस्येत्यर्थः निरतिशयस्यैव धूमजनकत्वसन्देहस्यायोग्यादित्यन्वयः अतिशयः सहकार्यन्तरसमवधानरूपो विशेषः तथाच सह
कार्यन्तरसापेक्षस्यैव धूमोत्पत्तिप्रयोजकतायाः सन्देहस्यानुदयादितिपर्यवसितार्थः ।। तथाविधाद्वह्न्यसमवहितात्तादृशासमूहाद्धूमानुत्पादस्य दर्शनेति ।। तथाविधसमूहे धूमानुत्पादाव्यवहितप्राक्क्षणावच्छेदेन तदधिकरणस्थत्वस्य दर्शने इत्यर्थः
तस्येतरानपेक्षस्य धूमोत्पादकत्वव्यावर्तकत्वादितिभावः ।। तादृशस्यैव ।। आर्द्रेन्धनसमूहस्यैवेत्यर्थः आपाद्य सहकारिरित्यर्थस्य ।। उत्पत्तिप्रयोजकत्वस्य तत्वार्थस्यजनकत्वार्थेऽन्वयः ननु सम्भावनायामिति स्फुटीकर्तुं प्रसमासेन लिखितं सम्भा
वनाया अपलयादित्यन्वयः ।। क्वचिदिति ।। यत्र वह्निं विना इन्धनादिसमूहाद्धूमानुत्पादो दृष्टस्तत्रेत्यर्थः ।। अवधृतस्य ।। निश्चितस्य इत्येनेन वह्निविरहस्य तादृशासमूहकालीनधूमानुत्पादप्रयोजकत्वं कॢप्तं इतरविरहस्य च तथात्वमकॢप्तमिति तदवकल्प
नरूपं लाघवबीजं स्फुटीकृतं ।। वह्निविरहस्यैवेत्यादि ।। तादृशासमूहसमवधानानन्तरं धूमसामान्यानुत्पादस्य वह्नित्वावच्छिन्नविरहमात्रप्रयोजकत्वनिर्णयेनेत्यर्थः तद्धूमत्वावच्छिन्नानुत्पादे तदवच्छिन्नहेतुतावच्छेदकतत्तदिन्धनत्वावच्छिन्नाभा
वस्यापिप्रयोजकत्वसम्भवात्सामान्यपदोपादानं तादृशानिश्चये च सतीतरघटिते वह्न्यसमवहितेन्धनादिसमूहे धूमोत्पत्तिप्रयोजकत्वे तादृशासमूहानन्तरधूमानुत्पादे वह्निविरहेतरसहकार्यन्तरविरहप्रयोज्यत्वप्रसञ्जकतया न शङ्कापदं (प्रसञ्जको
प्रसञ्जकस्य प्रसञ्जने वैयधिकरण्यपरिहारः स्वयमूह्यते) इतिभावः तदुपादानपदेन वह्निसमवहितमात्रोपादानं विवक्षणीयं तत्र तयो वह्निसमवहितत्वपरामर्शकत्वे ऽनवसम्भवति तदर्थं वह्नेरुपादानमित्यत्र वह्निपदं वह्निसमवहितपरं तथा
व्याचष्टे– वह्नेरिति ।। (उपादानं कथं कुर्यादितिमूलं वह्निसमवहितनिरूपितानियमार्थकान्नियमधीः विशेषणतृतीयान्ततसिप्रत्ययेन वह्निसमवहितनियतप्रवृत्तिमान् कथं भवेदित्यर्थकं नियतत्वं विषयताविशेषेण व्याप्यत्वं वह्निसमवहित
भिन्नविषयकत्वस्याभावरूपं तदुपादानपदस्यैवशङ्काप्रतिबन्धकमित्यत्रोपादानमेतन्मतेऽपि करणव्युत्पत्त्या प्रयोजकपरं प्रवृत्तेः शङ्कायाम विरोधित्वात् तथा चाप्रवृत्तिः वह्निसमवहितोपादाने वह्निसमवहितजन्यत्वज्ञानस्यैव वह्निसम
वहितात्मकोपायधूमरूपफलजनकत्वावगाहनेन जलकलसस्य च वह्न्यसमवहित[illegible] शङ्काविरोधितानुपपत्तेः तत्समवहितजन्यत्वतदसमवहितजन्यत्वयोरविरोधित्वादित्याशङ्कासमपनेतुं) तदुपादानपदस्य वह्न्यसमव
हिताजन्यत्वपरतामाह– अत्रचेति ।। नियमव्यवच्छेद्यस्येति ।। अत्राभावे सत्यप्रत्ययः तथा च तन्नियमात्मकतयात्र सम्बन्धव्यवच्छेद्यरूपस्येत्यर्थः ।। वह्न्यसमवहितानुपादानस्येति ।। उपादानेऽवह्न्यसमवहितविषयकत्वस्येत्यर्थः
प्रयोजक इति ।। वह्न्यसमवहितविषयकत्वप्रयोजकवह्न्यसमवहितजन्यत्वज्ञानविरोधि सद्या तदजन्यत्वज्ञानं प्रवृत्तिरूपोपादाने तदविषयकत्वप्रयोजकमित्यवधेयम् यद्यपि प्रवृत्तिविशेषस्य वह्निसमवहितोपादानस्यैव प्रयोजक

कत्वं तत्प्रकृतिकत्वप्रत्ययेन वोधयितुं शक्यते न तु नियम इत्यनुसन्धातः· नियमविशेषितोपादानस्यैव लक्षणया धात्वर्थत्वोपगमात्· अस्यार्थोपादानांशे विशेषणतया भासमानस्य निरुक्तनियमस्य प्रयोजकत्वं· तथापि नियमरूपविशेषण
प्रयोजकमपि विशिष्टप्रयोजकं भवतीति   विशिष्टप्रयोजकत्वलाभेऽपि विशेषणीभवन्नियमप्रयोजकत्वलाभसम्भवादित्यभिसन्धिः· वन्हिसमवहिताजन्यत्वज्ञानस्य तद्वाधविधया जन्यत्ववोधकप्रमाणसहकारीभूय वन्हिसमवहितजन्यत्वरूपवि
शेषणसम्प्रदानेन वन्हिसमवहितोपादानधात्वर्थप्रयोजकत्वमपि सम्भवतीत्युक्तप्रयासवैयर्थ्यमित्याशयेनाह— परम्परयेति·।· केचित्तु· नियमस्यावच्छेदकत्वात्· तस्यैव· वन्हिसमवहितस्यैव· उपादानं यस्मादिति   एषपदे बहुव्रीहिराश्रयणीयतया एवका
रत्वस्यावच्छेदकत्वपरस्येत्यर्थः· वन्हिसमवहितानुपादानस्य वन्हिसमवहितगोचरधूमार्थिप्रवृत्त्यभावस्य प्रयोजकं इति तादृशप्रवृत्तिजनकवन्हिसमवहितधर्मिकधूमजनकताग्रहे विघटयन्निर्वाहकत्वस्येत्यर्थः· एवकारान्तर्भावप्रयासं विनैवमुपपाद
यति- परम्परयेतीति व्याचक्षते· तच्चिन्त्यम्· तदजन्यत्वज्ञाने वन्हिसमवहितत्वोत्पादकसामग्रीकान्यत्वनिश्चये आपाद्यप्रतियोगिकोऽपि प्रविष्टं वन्हिसमवहिताजन्यत्वं तु नोपकरं अपितु स्वाधिकरणदेशावच्छिन्नवन्हिभाववत्स्वाव्यवहितप्रा
क्क्षणकान्यत्वमेव· एतेन वन्हिसमवहितजन्यत्वशङ्कानिवृत्तिं तर्ककारणं वन्हिसमवहिताजन्यत्वनिश्चयार्थमपेक्षते न तु साक्षादेव तर्कार्थः· शङ्कानिवृत्तिनिश्चयं यदि तादृशनिश्चयमपेक्षेत तदाऽन्योन्याश्रयः· एवं तच्चोक्तन्यायेनेत्यादावन्य
त्येव शङ्कानिवर्तकत्वाभिधानात्सन्दर्भविरोधश्चेति दूषणं सम्यक्कार्यं वेदितव्यम्· तर्ककारणीभूते धूमधर्मिकस्वाधिकरणदेशावच्छिन्नवन्हिभाववत्स्वाव्यवहितप्राक्क्षणकान्यत्वनिश्चये वन्हिसमवहितसामग्रीकत्वस्यापेक्षितायां शङ्काविघ्न
नो वक्तोऽन्यस्यैव वन्हिसमवहितधर्मिकधूमसामग्रीत्वाभावस्यापेक्षितत्वाभिधानात् प्रागपि तन्निश्चयस्यैव शङ्कानिवर्तकत्वमभिहितमिति सन्दर्भविरोधाविरहाच्च· तत्र निरुक्तवन्हिसमवहिताजन्यत्वज्ञाने एतन्मतमात्रस्याभिश्रा
यमुपगतमन्वयव्यतिरेकानुविधायित्वज्ञानस्य शङ्कानिवर्तकत्वमाक्षेपमुपन्यस्यति— यद्वेति·।· अन्वयव्यतिरेकानुविधायित्वस्य वन्हिसत्त्वेऽग्रिमक्षणोत्पन्नत्वे सति पूर्वक्षणे वन्हिव्यतिरेकेनुत्पद्यमानत्वस्येत्यर्थः·· विशेष्यदलस्य
अनुत्पन्नगगनादिसाधारण्येन वन्हिसमवहिताजन्यत्वं विशिष्टजन्यत्वव्योमचारित्वान तदभावरूपापाद्यकोटिशङ्कानिवर्तकत्वेति अत्यन्तो निवेशः· ज्ञानं· धूमधर्मिकनिश्चयः· विशेषदर्शनं तया·। ग्राह्याभावव्याप्यदर्शनतया·। शङ्काप्र
तिवन्धकं·।· धूमधर्मिकवन्हिसमवहितजन्यत्वशङ्काप्रतिवन्धकं वन्हन्वयव्यतिरेकानुविधायित्वस्य जन्यत्वविशिष्टवन्हिसमवहिताजन्यत्वव्याप्यत्वादिति भावः· नन्वेवं वन्हन्वयव्यतिरेकानुविधायित्वनिश्चय एव धूमे वन्हिजन्यत्वशङ्का
मपि निवर्तयिष्यतीति विशेषदर्शनतया· किं तर्कस्य प्रतिवन्धकत्वकल्पनेनेत्यत आह— तदेवेति·।· एवकारोऽप्यर्थः· अन्वयव्यतिरेकानुविधानमपीत्यर्थः· तर्कघटकं· प्रयोजकीभूतविषयतया तर्कनिर्वाहकं· सर्वात्मके मानसज्ञाने प्रागुपस्थित
पदार्थान्तराणामुपनयमर्यादया भानेवाधकाभावात् तदुपन्यासावन्हिविधानमप्यक्रमिति·। तर्कस्य स्वातन्त्र्येण शङ्काप्रतिवन्धकत्वविरहेऽपि विशेषदर्शनतयैव तथात्वसापेक्षतया शङ्कानिवर्तकत्वाभिप्रायेण मूले तदुपन्यासस्यनासङ्गतिः· तत्र स्वात

न्वयेण शङ्कानिवर्तकत्वेनास्यार्थानुपगमादित्याशयः। एतच्च तर्कस्यैवान्वयव्यतिरेकानुविधायित्वज्ञानत्वादित्यादि विभ्रमसाधारणमनुसृत्य तदन्वयाद्यनुविधानज्ञानस्य तज्जन्यत्वशङ्काप्रतिबन्धकत्वाभ्युपगमे नाभिहितम्। वस्तुतस्तु तदन्वयाद्यनुविधानस्य नान्तरीयक
तत्साधारणस्य तज्जन्यत्वाव्यावर्तकत्वात् ज्ञानस्य तज्जन्यत्वशङ्कानिवर्तकत्वसम्प्रयुक्तमेवेति परमार्थः। दर्शितमिमं ग्रन्थे तर्कपदं तर्कमूलीभूतज्ञानपरतया व्याख्याय तर्ककारणीभूतान्वयाद्यनुविधानत्वज्ञानस्य तर्कोपादेयत्वपवाद इति हरिदासभट्टाचार्याणां
मिश्राभिप्रायवर्णनमनुसृत्य कश्चित्पुनरेव तर्कघटकमिति दीधितिग्रन्थमन्वयाद्यनुविधानज्ञानमेव शङ्काविघटनद्वारा तर्कसम्पादकमित्यर्थपरतया व्याख्याय दीधितिकृतोपि तादृशमेवाभिप्रायं वर्णयति। तदसत्। तर्कवैयर्थ्यशङ्कायां तर्कोस्य नै
बाधकविरहाभिधानस्यानुपयुक्तत्वात्। न च तर्कात्पूर्वमन्वयाद्यनुविधानग्रहस्यावश्यकत्वेपि तर्कदशायां तत्सत्त्वनियमाभावात्तत्प्रतिबन्धकतया सर्वत्र तादृशतर्कानन्तरं शङ्कावारणासम्भवात् तर्कस्यापि प्रतिबन्धकत्वकल्पनमावश्यकमिति
वाच्यम्। एवं सति मूलस्यैतादृशस्थलशङ्कानिवृत्त्युपयोगितोऽभिप्रायकत्वासम्भवात् तदुपरि तर्कवैयर्थ्यशङ्काया एवानवतारात्। तत्र च कारणान्तरविरहादेव शङ्कानवतारः। तस्य स्वतःसिद्धशङ्काविरहस्थलकतया मूलस्य च तदन्यस्थल एव तर्कस्य शङ्कानिवर्तकत्वपर
उभयसम्भवेदस्थले तर्कसार्थक्यप्रदर्शनस्यात्यन्तासङ्गतत्वात्। एवञ्च मिश्रग्रन्थस्यापि दर्शितदिशा यथाश्रुतपरत्वमेव सम्यगित्यवधेयम्।। अन्वयव्यतिरेकानुविधानेनाबाधस्य शङ्काविरोधित्वे मूलस्यापि स्वरस इत्याह- तदिदमुक्तमिति।। यदि हि
त्यादेत्यादृशबोधस्य शङ्काविरोधितापरत्वाभावे गृहीतान्वयव्यतिरेकत्वाभिधानवैयर्थ्यादिति भावः। व्यतिरेकानुविधायित्वं तद्व्यतिरेकसमानाधिकरणव्यतिरेकविधानबोधस्य शङ्काविरोधित्वे मूलस्यापि प्रतियोगित्वं तद्व्यतिरेकव्यापकव्यतिरेकप्रतियोगि
त्ववात्तत्र धूमत्वावच्छिन्नाभावे वह्न्यभावसामानाधिकरण्यस्य प्रत्यक्षासम्भवेन आद्यं धूमत्वावच्छेदेन सङ्ग्रहमपि घटादिसाधारणतया वह्निसमवहितजन्यत्वाव्यावर्तकमिति तन्निश्चयस्य तच्छङ्कानिवर्तकत्वमित्याह- यादृच्छिकस्येति।। निय
मगर्भस्यैवोक्ते क्वचिदधिकरणेऽन्वयव्यतिरेकानुविधानस्येत्यर्थः।। व्यभिचारित्वात्।। वह्निसमवहितजन्यत्वव्यभिचारित्वात्। द्वितीयं घटादिव्यावर्तकत्वेन वह्निसमवहितजन्यत्वविरोध्यपि धूमत्वावच्छेदेन दुर्ग्रहं धूमत्वसामाना
धिकरण्येन वह्निव्यभिचारसन्देहदशायां धूमत्वावच्छिन्नाभावे वह्न्यभावव्यापकत्वग्रहसम्भवात् घटादावज्ञानादिवत्त्वात् कथञ्चित्तन्निश्चयेऽनुक्तजन्यताग्राहकतर्कवैयर्थ्यम्। नियतान्वयव्यतिरेकानुविधायित्वस्यैव तज्जन्यतात्मकत्वात्प्रागेव तत्
निश्चयात्। न चान्यथासिद्धिनिरूपकत्वाविशेषितमेव तज्जन्यतावच्छेदकं तत्तु प्राग्निश्चितमिति तन्निश्चायकतया तर्कसार्थक्यमिति वाच्यम्। अन्यथासिद्धिनिरूपकत्वाविशेषितस्यापि नियतान्वयव्यतिरेकानुविधायित्वस्य व्यभिचारवा
वर्तकतया तन्निश्चयस्यैव व्याप्तिनिश्चयसम्पादकत्वेन तादृशाविशेषणघटितजन्यतापदार्थनिश्चयस्याकिञ्चित्करत्वादित्याशयवानाह- नियतस्येति।। नियमगर्भस्येत्यर्थः।। उक्तभेदसम्पादकत्वात्।। प्रकृतोपयुक्तजन्यत्वा
शङ्कापि न स्यादित्यर्थः।। अन्वयव्यतिरेकानुविधायित्वज्ञानस्य शङ्काविघटनद्वारा धूमत्वावच्छेदेन वह्निसमवहिताजन्यत्वनिश्चायकत्ववादे नाभिदूषणमित्यवधेयम्।। दीधितिकारमते तु तत्र धूमत्वावच्छेदेन वह्निसमवहिताजन्यत्व

निश्चयविरोधिशङ्कानिवर्तकं तज्ज्ञाने तन्निवर्तकत्वञ्च धूमत्वावच्छेदेनान्वयव्यतिरेकानुविधायित्वेपि तत्तद्धूमत्वावच्छिन्नविशेष्यकत्वज्ञानस्याक्षतं तत्तद्धूमत्वावच्छिन्नाभावे च वह्न्यभावव्यापकतायाः सुग्रहत्वेन तत्तद्धूमत्वावच्छिन्ने नियतान्वयव्यतिरेकानुविधायित्वं सुग्रहमेव । तादृ
शग्रहणजन्यताग्राहकतर्कवैयर्थ्यमित्यपि नाशङ्कनीयं तर्कं विना धूमत्वावच्छेदेन व्याप्तिनिश्चयसम्पादकस्य धूमत्वावच्छेदेन जन्यतानिश्चयस्यानिर्वाहात् । न च तत्तद्धूमत्वावच्छिन्नधर्मिकान्वयव्यतिरेकानुविधानबोधमूलतर्कस्य लाघवज्ञानसहकारेणैव धूमत्वावच्छेदेन जन्यताग्राह
कत्वं इत्थञ्च धूमत्वसामानाधिकरण्येन तदन्वयानुविधानरूपजन्यताग्राहकप्रमाणेनापि लाघवज्ञानसहकारेण धूमत्वावच्छेदेन जन्यतानिश्चयजननसम्भवात् । तत एव च धूमत्वावच्छेदेन व्याप्तिनिश्चयस्योपपत्तेः तर्कवैयर्थ्यं दुर्वारमेवेति वाच्यम् । यतस्तत्तद्धूमत्वा
वच्छेदेन वह्निजन्यत्वकल्पनापेक्षया धूमत्वावच्छेदेन तत्कल्पने लाघवमिति लाघवज्ञानमूलतर्केण धूमत्वावच्छिन्नस्य वह्निजन्यताग्रहसहकारितादृशलाघवज्ञानमन्यथासिद्धत्वघटितकार्यकारणभावकल्पनामात्रेणोपपद्यते न तु नियतपौर्वापर्यमात्रकल्पने । तेन त
मत्वरूपविशेषधर्माणां नियतान्वयव्यतिरेकानुविधायित्वावच्छेदकत्वस्य दुर्ग्रहमप्रसिद्धत्वादिति ।। तन्निरूपणमिति ।। धूमत्वावच्छेदेनापाद्यव्यतिरेकनिश्चये लाघवज्ञानापेक्षाया आवश्यकत्वे धूमत्वसामानाधिकरण्येनापाद्यव्यतिरेकज्ञानमूलकादेव तर्काल्लाघवज्ञा
नवृत्तेन सामान्यधर्मावच्छेदेन जन्यताग्रहो लघुकिमुत प्रकाशेनेति चिन्तामणीयं बोध्यम् ।। केचित्तु प्रथमान्तपदं यथाश्रुतपूर्वनिप्रसङ्गेन । न च प्रकृते कार्यकारणभावनिश्चयसापेक्षतया तदधीनशङ्कानिवृत्तेः कार्यकारणभावनिश्चयापेक्षणीयत्वेनान्योन्याश्रयः
कार्यकारणभावनिश्चयस्य शङ्कानिवृत्त्यधीनतर्कमूलत्वादित्याशङ्कनीयम् । अन्वयव्यतिरेकदर्शनेन विनापि तर्कं कार्यकारणभावनिश्चयसम्भवात् तद्विरोधिशङ्काया अन्वयव्यतिरेकनिश्चयेनापि निवर्तनसम्भवात् । न चान्यथासिद्धत्वशङ्कासत्त्व
यव्यतिरेकधीर्न निवर्तयितुं प्रभवतीति तन्निरासाय तर्कमपेक्षते इति वाच्यम् । तर्कं विनापि कदाचित्कारणताविरहेऽन्यथासिद्धत्वशङ्काविरहसम्भवात् । एतेन धूमत्वावच्छेदेनान्वयानुविधानस्य निश्चेतुमशक्यतया तत्सामानाधिकरण्येन वह्नि
जन्यत्वशङ्कानियम एव जायते तत्कथं धूमत्वावच्छेदेन वह्निजन्यतानिश्चय इत्यपि परास्तम् । कोट्युपस्थित्यादिविरहेण लाघवज्ञानेन तादृशशङ्काया अपि निवृत्तिसम्भवात् । अथ तर्कं विनैव कार्यकारणभावनिश्चयस्य तर्कविरोधिशङ्कानिरासार्थमु
पगमे तर्कवैयर्थ्यं तन्निश्चयार्थमेव तर्कानुसरणादिति चेन्न । कार्यकारणभावे निश्चितेपि सामानाधिकरण्यप्रत्यासत्त्या वह्निजन्यत्वनिश्चयं विना धूमे व्याप्तिनिश्चयासम्भवात् । सामान्यतो वह्निजन्यत्वस्य वह्निसमवेतरूपादिसाधारणस्य वह्न्यभा
ववद्वृत्तित्वरूपव्यभिचारवारकत्वादिति सामानाधिकरण्यप्रत्यासत्त्या वह्निजन्यत्वनिश्चयार्थं दर्शिततर्कस्यापेक्षितत्वात् । प्रत्यासत्तिविशेषावच्छिन्नत्वाभिप्रायेणैव तादृशप्रत्यासत्त्यवच्छिन्नत्वनिश्चितस्यापि जन्यत्वस्य प्रकारान्तरेण निश्च
यसम्भवेपि यत्र धूमत्वावच्छेदेन तन्निश्चयविरोधिशङ्काविरहप्रयोजकान्वयसमवधानं नास्ति तत्रैवोक्ततर्कसार्थक्यसम्भवात् । इत्थञ्च वह्निसमवहितजन्यपदं सामानाधिकरण्यप्रत्यासत्त्या वह्निजन्यपरं । अत एव समवहितपदस्यापार्थकत्वं वक्ष्यमाणसम
वहितजन्यपदञ्च सामानाधिकरण्यातिरिक्तप्रत्यासत्त्या वह्निजन्यपरं । जन्यत्वेन स्यादित्यस्य च वह्निजन्यो न स्यादित्यर्थः । अवह्नेरेवेत्यस्य वह्निभिन्नादेवेत्यर्थः । तथाच तादृशाशङ्काद्वितीयशङ्का च वह्निजन्यत्वकोटिकैव । तस्याश्च प्रकृततर्के इष्टापत्तिशा
ङ्काविधया विरोधितशङ्काया भेदः । पूर्वमेव तत् । तच्च कार्यकारणभावनिश्चयस्य ग्राह्याभावज्ञानमुद्रया एव विरोधित्वात् कार्यकारणभावविषयकप्रकृततर्कोपि विरोधित्वं । न च कार्यकारणभावनिश्चयाधीनायाः प्रकृते शङ्कानिवर्तकत्वकथनमसङ्ग

दी. अनु. टी. १०

तत्र· कार्यकारणभावनिश्चयार्थमेवान्वयव्यतिरेकदर्शनादितशङ्कानिरस्तेरावश्यकत्वादितिवाच्यम्· यत्रान्वयव्यतिरेकदर्शनाद्यभावशङ्कानिवृत्तिसम्पाद्य कार्यकारणभावनिश्चयस्तत्र सहकार्यन्तरविरहान्न को न जनितः तदधीनप्रवृत्त्युत्तरमेव सहकार्यन्तरस
मवधानं तदव्यवहितप्राक्क्षणे चान्वयव्यतिरेकदर्शनादिकं तत्पूर्वोत्पन्नं कार्यकारणभावनिश्चयाधीनप्रवृत्तिनिश्चयशङ्कानिवृत्तिमन्तरेण पुनः कार्यकारणभावनिश्चयः सम्भवतीति तर्कानुपपत्तेरिति तादृशाध्यथताभिप्रायेण कार्यकारणभावनिश्चयाधीनप्रवृत्तेः
शङ्कानिरोधिताभिप्रायोत्तरसङ्गतेरिति सर्वसामञ्जस्यमित्याहुः· तेषां मतमुपन्यस्यति· केचिदिति·।· यत्र एतन्मतेपि पूर्वोक्तान्वयमन्वयव्यतिरेकानुविधानज्ञानप्रयासेन· तदधीनशङ्कानिवृत्तिमूलकः· कार्यकारणभावनिश्चयस्तु शङ्कानिवर्तकप्रवर्तकतयाना
२६४ भिहितः अपितु आपाद्यव्यतिरेकनिश्चयविधया साक्षान्नैवोपयोगित्वेनैदृशप्रयासः· समवहितपदस्यार्थस्यैव· आपाद्यजन्यत्वस्य पूर्वोक्तपरासापेक्षया वह्निजन्यत्वपरतोचित्येति· तदसत्· सार्वभौमेन उपादानपदस्यप्रसक्तिपरत्वे कार्यकारण
भावनिश्चयस्य तर्कपूर्वमपेक्षणीयतया सहेतुमर्थमित्याक्षेपे एतन्मतस्य हृदयमुपपादकतयोपन्यस्तत्वात्· एतन्मते तस्य तदुपादानपदस्याविग्रहे दीधितिकृतोपि तर्कव्याख्यानावसरे एतन्मतमनुपन्यस्य तदुपादानमेवेति ग्रन्थव्याख्यानावसरे एतदुपन्या
सस्यानौचित्यापाताच्च·।· व्याप्तिग्रहोपायेति·।·यत्र संयोगेन धूमस्तत्र संयोगेन वह्निरिति व्याप्तिनिश्चयोपायेत्यर्थः·।·अधिकरणस्य जनकत्वशङ्कानिरासार्थमिति·।· अधिकरणो वा वह्निर्धूमं न जनयिष्यतीति शङ्कानिरासाय धूमे सामानाधिकरण्यप्रत्यासत्त्य
वच्छिन्नवह्निजन्यत्वाभावशङ्का तत्प्रतिवन्धार्थमित्यर्थः· लोकपाकइतिवत्क्रियाविशेषणत्वाद्द्वितीया·।· सामानाधिकरण्यातिरिक्तेति·।· संयोगान्यसम्बन्धावच्छिन्नवह्निनिष्ठजनकतानिरूपकत्वेपि वह्निनिरूपितसंयोगान्यसम्बन्धावच्छिन्न
जन्यताशून्यत्वे च सति संयोगसम्बन्धावच्छिन्नवह्निनिष्ठजनकत्वप्रतियोगिकसंयोगसम्बन्धावच्छिन्नजन्यताशून्यः स्याद्वह्निजन्यो न स्यादित्यर्थः· सत्यन्त्वापादककोटौ वापाद्यप्रतियोगिकोटावेव वा निवेशनीयं संयोगातिरिक्तसम्बन्धेन
धूमं प्रत्येव संयोगेन वह्निः कारणं संयोगसम्बन्धेन धूमं प्रति संयोगातिरिक्तेन सम्बन्धेन न वह्निः कारणमित्येतादृशशङ्काप्रभावीयां संयोगेन धूमं प्रति संयोगेन वह्नेर्व्यापकत्वनिश्चयोपयोगाद्विभावदत्ते जन्यताञ्जनकतायाञ्च संयोगसम्बन्धा
वच्छिन्नत्वनिवेशनं· तादृशजन्यताप्रसिद्धिर्वह्निजन्ये लोकादौ· संयोगसम्बन्धावच्छिन्नवह्निनिष्ठजनकतानिरूपितसंयोगसम्बन्धावच्छिन्नतज्जन्यताशून्यस्यापि वह्निसमवेतरूपादेः पाकजपार्थिवरूपादेर्वह्निजन्यत्वाद्व्यभिचार इति चरमसत
त्यनोपादानं· वह्निनिष्ठतादृशजनकतानिरूपिततादृशजन्यताशून्यस्यापि संयोगान्यसम्बन्धावच्छिन्नवह्निनिष्ठजनकतानिरूपितसंयोगसम्बन्धावच्छिन्नजन्यताश्रयत्वसिद्धेरिति अप्रयोजकत्वशङ्कानिरासाय प्रथमसत्यन्तम्· मयैव मयिवा
त्वव्यभिचारवारकतया तस्यवैयर्थ्यं दुर्वारमेवेति वाच्यम्· तथासति व्याप्तिग्रहे प्रयोजकतया सार्थक्यात्· अत एव साधारण्यवारकस्य मिश्रमते सार्थक्यम्·।·वस्तुतो अर्थविशेषणतास्थलेव्याप्तिसत्त्वेन परार्थानुमान एव तस्याधिक्यरूपनिग्रह
स्थानसम्पादकतयादोषत्वेनतु स्वार्थानुमानदूष्यकिञ्चिदलमेवतत्· अनुमानं संयोगान्यसम्बन्धावच्छिन्नवह्निनिष्ठजनकताप्रतियोगिकसंयोगसम्बन्धावच्छिन्नतोभयाभाववद्वह्निजन्यताशून्यत्वमेव सत्यन्तार्थः· आवश्यकोभयाभा

वहस्य निवेशान्तवैयर्थ्य[illegible] शङ्का सम्भावनाऽपि हि जन्यो न स्यादित्यनन्तरं मिति।। पूर्वं वा सिततर्कोऽवतार इति पूरणीयम् सामानाधिकरण्यादिति न प्रत्यक्षसत्या सामानाधिकरण्यप्रत्यासत्त्याच वह्निजन्यत्वाभावेऽपि वह्निजन्यत्वसामान्याभावो न वर्तत इत्यप्रयोजकत्वशङ्कासम्भवात् कथमयं तर्क इत्यत आह— प्रत्यासन्नत्वादिति।। तथा च जन्यजनकभावस्य प्रत्यासत्त्यावच्छिन्नत्वनियमानुधावनेनाभिलितोऽस्य विशेषाभावस्य सामान्याभावव्याप्तिनिश्चयः सुघट एवेति भावः न तु धूमेनलस्य दुर्निश्चयतया नायं तर्कः सम्भवतीत्यत आह— प्रत्यासत्त्यन्तरघटितवह्निसम्बन्धेऽपीति।। तादात्म्यादिना वह्निसम्बन्धिनीत्यर्थः।। धूमानुत्पादादिनेति।। धूमानुत्पादादिदर्शनेनेत्यर्थः आदिपदेन सम्बन्धान्तरघटितव्यतिरेकव्यभिचारपरिग्रहः।। सा[illegible] समाक्षिपति— इदमेव चेति।। अव्यवहितमेवेत्यर्थः।। आलोभङ्ग इति।। तथा चेदृशाद्विशेषकार्यकारणभावस्य सत्कारपूर्वं निश्चितत्वेऽपि तर्कस्यावैयर्थ्यमुपपादितवन्तो न तु स्वातन्त्र्येणेत्याक्षेपः॰ एतस्मात्तेऽपि यथाश्रुतमुपादानपदार्थः कार्यकारणभावनिश्चयाधीना प्रवृत्तिरनेन शङ्का विरोधिनी· कार्यकारणभावनिश्चयः पूर्वमत इत्यन्वयव्यतिरेकनिश्चयाधीन एव तत्तु तर्कमपेक्षते अतो नान्योन्याश्रयः अवन्हेरेव भविष्यतीत्याशङ्काहृदं वन्ह्यनधिकरणदेशोत्पत्तिकत्वकोटिकं वन्ह्यनधिकरणदेशानुत्पत्तिकत्वरूपस्य तत्त्वदलनिश्चयविघटनेन तर्कविरोधि· तत्र च कार्यकारणभावविषयिणी प्रवृत्तिर्धूमानुत्पत्तेर्वन्ह्याधारताविरहयोः प्रयोज्यप्रयोजकभावनिश्चयं सम्पाद्य विरोधिनी· वन्ह्याधारताविरहप्रयोज्यानुत्पत्तिकत्वस्य वन्ह्याधारोत्पत्तिकत्वव्यावर्तकतया तन्निश्चयस्य तत्संशयविरोधित्वात् तत्कारणकत्वस्य च तत्समवधानविरहप्रयोज्यानुत्पत्तिकत्वव्यावर्तकतया संशयाधायकतद्विघटकस्य तच्छङ्काविघटनद्वारा प्रयोज्यप्रयोजकभावनिश्चायकत्वात् एवं प्रयोज्यप्रयोजकभावनिश्चयविरोधितया किञ्चित्प्रयोज्याभावप्रतियोग्युत्पत्तिकत्वरूपाहेतुकसकोटिकतृतीयशङ्काऽपि तर्कविरोधिनी· न च वन्ह्यनधिकरणदेशानुत्पत्तिकत्वनिश्चयस्यैवोत्पत्त्याश्रयवृत्तित्वाविशिष्टोत्पत्तिमत्त्वच्छेदेन धूमेन वा वन्हिव्यभिचारसंशयाविघटनया व्याप्तिनिश्चायकत्वसम्भवेन तु तर्कवैयर्थ्यमिति वाच्यम्· व्यभिचारशङ्कानिवृत्तावपि धूमे वन्ह्यधिकरणोत्पत्तिकत्वसन्देहानिवृत्त्याऽनुत्पत्त्याश्रयवृत्तित्वानिविशिष्टोत्पत्तिविशेषणसम्बन्धेन धूमेन वा धूमसामान्य (विशेषाद

वन्हिसामान्यनिश्चयासम्भवेन तादृशसामानाधिकरण्यघटितव्याप्तेर्दुर्निश्चयतया वन्ह्यधिकरणदेशानुत्पत्तिकत्वसंशयनिवर्तकप्रकृततर्कस्य तादृशव्याप्तिनिश्चयोपयोगित्वात् न तु कृततर्कं विना धूमात्परे वन्ह्यधिकरणदेशानुत्पत्तिकत्वसंशयान्यतोऽपि निवृत्तिः सम्भवति· नित्यसाधारण्यवन्ह्यधिकरणदेशानुत्पत्तिकत्वादेतद्व्यावर्तकत्वात् एतत्सहितस्योत्पन्नत्वस्य तद्विरोधित्वेऽपि विशिष्टस्य धूमेऽग्रहदशायां तर्कसार्थक्यात्· न चापाद्यव्यतिरेकनिश्चयविषयधूमे विशिष्टोत्पन्नत्वग्रहस्य तत्कारणतया सदावश्यकतेति वाच्यम्· उत्पन्नत्वस्यापादकविशेषणतापक्षे विशिष्टाभावस्यानापाद्यत्वतया विशिष्टनिश्चयस्यानावश्यकत्वात्· आपाद्यव्यतिरेकनिश्चयस्य शङ्काविरोधितया तर्कवैयर्थ्यस्य विशिष्टाभावापाद्यत्वादिना दीधितिकृतां समस्तवद[illegible]त्वात्· न च सत्पन्नत्वस्यापादकविशेषणतापक्षेऽपि विपर्यये तस्मात्रपर्यवसायितानिर्वाहाय पक्षविशेषणताया आवश्यकत्वेन पक्षे तत्सहितस्योत्पन्नत्वस्य निश्चय आवश्यक इति वाच्यम्· तावता पक्षे तुभयानिश्चयध्रौव्येऽपि विरोधिताव[illegible]दकैकविशेषापरहेतन्निश्चयस्य तथात्वात्· एवमेतन्मते विशिष्टैव वन्ह्यधिकरणदेशानुत्पत्तिकत्वविरहग्रहस्यानावश्यकतया तदुहदशायामपि तर्कस्य सार्थक्यमवगन्तव्यम्।। वन्ह्यधिकरणेति।। उभयथाधिकरणेऽनुत्पत्तिनिश्चयसंयोगेन· प्रयो

जलंकयमूलम्॥ ननु वह्निकारणकत्वसामान्यतो वह्निसमवधानविरहप्रयोज्यानुत्पत्तिकत्वस्य व्याप्यं. ननु संयोगरूपतत्समवधानविरहप्रयोज्यानुत्पत्तिकत्वस्यापि वह्निसमवेतरूपादिसाधारणत्वादिति कथं तद्विपर्ययेण प्रकृतिर्वह्निसंयोगविरहप्रयोज्यानुत्पत्तिकत्वं संयोगेन वह्न्यधिकरणदेशोत्पत्तिकत्वव्यावर्तकं निश्चेतव्यमिति. न च संयोगघटितसामानाधिकरण्यप्रत्यासत्त्या वह्निकारणकत्वं संयोगेन वह्न्यधिकरणत्वविरहप्रयोज्यानुत्पत्तिकत्वनियतमिति तद्विपर्ययकमुपादानमेव तत्तर्कापाद्यमिति वाच्यम्. संयोगघटितसामानाधिकरण्यप्रत्यासत्त्या वह्निकारणत्वस्य प्राग्निश्चये तस्यैव विशेषणतया संयोगेन वह्न्यधिकरणदेशोत्पत्तिकत्वनिश्चायकतासम्भवेन प्रकृततर्कवैयर्थ्यप्रसङ्गेन यत्र सम्बन्धविशेषमनन्तर्भाव्यैव स्वरूपसम्बन्धविशेषरूपकार्यकारणभावः प्रागवगतस्तत्रैव तर्कोपयोगितायाः स्वीकरणीयतया न तु संयोगविरहप्रयोज्यानुत्पत्तिकत्वस्य च प्रकृते तत्र दुर्निश्चयतया प्रकृततर्कानुपपत्तेस्तत्राशङ्कासमाधानसम्भवादित्यत आह— तादृशानुपपत्तिकत्वेति। संयोगेन वह्न्यधिकरणदेशानुत्पत्तिकत्वनिश्चयपर्यवसित इत्यर्थः। वह्निसम्बन्धाभावस्य। वह्निसंयोगप्रतियोगिकाभावस्य। ग्राहे। वह्निधूमयोर्हेतुहेतुमद्भावनिश्चयबलादूह्यमाने। लाघवात्। परम्परासम्बन्धापेक्षया लघुशरीरत्वात्। तादृशसम्बन्धाभावस्य। संयोगरूपसम्बन्धाभावस्य। तथा व्यवधारणात्। प्रयोजकत्वनिश्चयात्. अत्र चोपादानपदस्य यथाश्रुतार्थपरतोपपत्त्यर्थमेवेतानामनुग्रासः॥ अन्यथोक्तरीत्या धूमत्वावच्छेदेन व्याप्तिनिश्चयाविरोधिन्या धूमत्वसामानाधिकरण्येन व्यभिचारशङ्काया विरोधिनो धूमत्वावच्छेदेन वह्निजन्यत्वनिश्चयस्य जननेन तर्कस्यार्थवत्त्वसंभवे तदुपेक्षाया अनुचितत्वात्। एवं च न सङ्कुचते प्रकृते शङ्काविरोधित्वाभिप्रेतत्वे यदि हीत्यादिना उपादानं कथं कुर्यादित्यन्तेन शङ्कासम्भावनया तत्सत्त्वप्रसक्त्यनुत्पादप्रसञ्जनस्यासङ्गत्यापत्तेः नहि कार्यसत्त्वप्रतिबन्धकानुत्पादप्रसञ्जकं कार्यकारणभाव[illegible]निश्चयघटितप्रकृतितत्सामग्रीसत्त्वे तदुत्पत्तेर्बाधकाभावात्. न च कार्योत्पत्तिपूर्वं प्रतिबन्धकाभावस्यावश्यकतया शङ्कोत्पत्त्या तत्पूर्वमुपादानकृत्यत्र प्रतिबन्धकाभावस्य भ[illegible]व्यापादनतया तदुपपत्तिपरतया तद्ग्रन्थसङ्गतिरिति वाच्यम्. एवमपि तदुपादानस्य शङ्काप्रतिबन्धकतासिद्धिमन्तरेण तादृशाप्रयोगात्. ईदृशापत्त्याशङ्काविरहं प्रसाध्य तन्निर्वाहकतया उपादानस्य शङ्काप्रतिबन्धकस्याप्यवश्यापलपत्तया तद्व्यतिरेकेण तदुपादानमेवेत्यभिधानस्य दुःसङ्गतत्वात्. एवं धूमत्वावच्छेदेन वह्निमदुत्पत्तिकत्वनिश्चयोऽप्याकिञ्चित्करः। हेतुतावच्छेदकावच्छेदेन साध्यसामानाधिकरण्यज्ञानस्य अनुमितावनपेक्षितत्वात् तदपेक्षाया मत्कृतिसाधनस्याधारणद्रव्यत्वावच्छिन्नलिङ्गकानुमितिविलोपप्रसङ्गात्. धूमत्वसामानाधिकरण्येन वह्निमदुत्पत्तिकत्वस्य प्रागेव निश्चिते अन्वयव्यतिरेकग्रहस्य तद्विषयकत्वादिति तर्कवैयर्थ्यं पुनरस्त्येव एवं प्रकृते शङ्काविरोधित्वमपि प्राग्दर्शितमित्यादि चिन्तावीजं वोध्यम्॥ मिश्रास्तु उपादानपदस्य यथाश्रुतार्थकत्वेनोपपत्तावेव वर्णयन्ति— तर्कस्य व्याप्तिग्रहमूलकत्वेनानवस्थेति शङ्कानन्तरत्वार्थानुमानस्थलाभिप्रायिका क्वचित्कोऽनुपस्थितिरूपशङ्काकारणविरहेणापि मूलशैथिल्यशङ्काविरहसम्भवेन सर्वत्र तर्कानपेक्षयाऽनवस्थानिवृत्तेर्व्याघातोपदर्शनवैयर्थ्यम्. अपि तु प्रार्थ

स्थलेधूमादिकार्येण वन्ह्यादिसाधनावसरे प्रतिवादिनाऽनुमानाप्रामाण्यवादिना चार्वाकेण व्यभिचारशङ्कयाऽसम्यग्व्याप्तिग्रहो न जायते इत्युक्ते तं व्याप्तिग्रहं स्वीकारयितुं वादिना शङ्कानिवर्तकस्योद्भावने मया तर्कविरोधिमूलशैथिल्ये
शापस्योदिशङ्कासत्वात्तर्कस्य बलावत्तारतिति इति परेणोन्नायितं तदंतत्तच्छङ्काविरोधितर्कान्तरोपन्यासेपि तत्सत्वे निर्वोभिशङ्कान्तरं परेणोद्भावनीयमिति सर्वत्रैव परेषां शङ्कोद्भावनसम्भवात्तर्कोपन्यासानवस्थया परार्थानुमानोच्छेद
स्येव तर्कस्येत्यादिशङ्कार्थः । एवं यावदाशङ्कमित्यादेः अनवस्थासमाधानपरमूलस्य यावत्परेषां शङ्कोद्भावनं निराबाधं तावदेव तर्कोपन्यासः । यत्र शङ्कासत्वे परस्यैव प्रवृत्तिव्याघातस्तत्र प्रवृत्तिव्याघातोपदर्शनेनैव शङ्कोद्भावना
सम्भवान्न तर्कोपन्यास इति न तदुपन्यासानवस्थेत्यत्र तात्पर्यम् । एवञ्च तर्कानुसरणादित्यस्य तर्कोपन्यासादित्यर्थः । व्याघातेनेति प्रतिवादिनश्चार्वाकस्यैव प्रवृत्तेर्व्याघातोपन्यासेनेत्यर्थकं । शङ्कैव नावतरतीति परेण स्वशङ्कोद्भाव
नं न सम्भवतीत्यर्थकं । विनैव व्याप्तिग्रह इति तर्कान्तरमनुपन्यस्यापि परं प्रति व्याप्तिः स्वीकरणीया । सम्भवतीत्यर्थकं नतु व्याघातेनेत्यादेर्व्याप्तिग्रह इत्यस्य यत्र प्रमाणासिद्धप्रवृत्त्यन्यथानुपपत्त्या प्रवृत्तिमतः कारणान्तराभावाधीन
शङ्कानवतारोपि । तत्र तर्कानुयोगेन तं विनैव व्याप्तिग्रहसम्भवान्न तर्के व्याप्तिग्रहस्यानवस्थेत्यर्थः । व्याप्तिग्रहमूलकीभूततर्कोपन्यासानन्तरं तद्विरोधिकीदृशशङ्कायाः स्वप्रवृत्तिव्याघातेनोद्भावनासम्भव इत्याकाङ्क्षायां तथाहीत्या
दिग्रन्थः । इत्यत इति शङ्कास्यादिति तर्कमुत्थापयमान इति शङ्का न भवतीति परेणोद्भावनीयमित्यर्थकं । एवं यत्रैव स्वक्रियाव्याघातः शङ्कायाः । स्वक्रियाव्याघातकत्वं स्वक्रियाविरहप्रयोजकत्वमिति यावत् । यदि हीत्यादिना तादृशी
व्याघातस्फुटीकरणं । तेन विनापि तत्सम्भवादिति । ननु शङ्काविरोधेन धूमादीनां हेतुहेतुमद्भावनिश्चायकतर्कानवतारेण वन्ह्यादिकं विना धूमादिसम्भवशङ्का स्यादित्यर्थः । धूमादौ वन्ह्याद्यजन्यत्वशङ्कायाः अनिराकरणादितिया
पत्तः । तस्मात् शङ्कातः प्रवृत्तिविरोधः स्यात् । तदुपादानमेव धूमार्थिनः पोस्य वन्ह्यादिप्रवृत्तिरेव । शङ्काप्रतिबन्धकं । मम धूमो भवत्वित्यादीच्छया कथं न केवलोदितिशङ्काविरोधप्रवर्तमानस्य स्वप्रवृत्तिव्याघातकशङ्कादिस
त्वाशङ्कमानस्यैव निग्रहरूपो दोषः स्यादितिभावः । एतदेव दर्शयति । नहि सम्भवतीति । तस्य धूमादेः तदर्थं वन्ह्यादिकं इत्याशङ्कमान इति । तर्कविरोधिशङ्कासत्वेन कारणतानिश्चायकतर्कानवतारादेतादृशशङ्का जायते तेनाविचारदशा
यां शङ्कते चेत्यर्थः । तदेव तच्छङ्कत इति । विरुद्धाशयाभित्यादिः । यदि तन्नाशङ्कमान इति । आशङ्कमानस्य पुरुषस्य इत्यर्थः । स्वक्रियाव्याघातः । स्वप्रवृत्त्यनुपपत्तिः । ननु शङ्कायां शङ्काप्रवृत्त्योर्व्याघात इत्यतः प्रतिव
न्धकं इत्येव व्याघाते स्यादित्यादिनोक्तं । इत्यभिसन्धिनो मतमुपन्यस्यति । एतेनेत्यादिः । तत्राप्यनवस्थेति । शङ्कानिवृत्त्यर्थं तर्कान्तरापेक्षायामप्यनवस्थेत्यर्थः । नियमघटितविरोधिनिश्चयार्थमपि तद्विरोधिशङ्कानिवर्तकतर्का
नपेक्षणादितिभावः । स्वक्रिया एवेति वादिनाप्रवृत्तेरेव प्रतिवादिनः शङ्कोद्भावनप्रतिबन्धकत्वेनाभिधानात् । नतु विरोधग्रहस्येत्यर्थः । इत्याहुः । तदेव मतमुपन्यस्यति — मिश्रास्त्विति । । परं प्रतीति । व्यभिचारशङ्कयाव्याप्ति

क॰ दि॰ टि॰ १२

गृहोपायाभावेन मम व्याप्तिग्रहेन सम्भवतीति वादिनः प्रतीत्यर्थः ।। व्यभिचारशङ्कानिरासहेतुत्वेनेति ।। परोक्तविताशासदीयव्यभिचारशङ्काया निवर्तकत्वेनेत्यर्थः ।। तं प्रतीति ।। परं प्रति परेण मूलशैथिल्यादिशङ्कोद्भावनस्य निरूपण इति यावत् ।। व्या-
घातोपन्यसदर्शयतइति ।। सर्वत्र स्वक्रियाव्याघातादित्यादिनेति शेषः ।। व्याघातोपदर्शनाकारमाह - मैवं शङ्किष्ठा इति ।। शङ्कामुद्गमयेथाः ।। तथासतीति ।। सर्वत्र तर्कविरोधिशङ्कोत्पादे ।। तवैवेति ।। तवापीत्यर्थः आहत्य तर्कानवतारेण तवापि कारणतानिश्चया-
सम्भवादिति भावः ।। नहि सम्भवतीत्यादिनापि शङ्कास्थले चार्वाकप्रकृत्यसम्भवबीजं इत्याह - यदाहेति ।। यदीति व्याघातक्रियापदमर्थकं ।। प्राहरिति ।। प्रघट्टेनास्वरस्याभावो दर्शितः ।। स्वक्रियैवेति ।। यदीत्यादिक्रियापदस्यान्वय यदि स्वैका-
न्विधानेवाधपदत्वात स्वच विशेषदर्शनविधयैव विरोधित्वेन व्याप्तिग्रहापेक्षा तावदवस्थ्यमेव तथापि ~~[illegible]~~ कालान्तरगृहीतव्याप्यवच्छेदकधर्मप्रकारेण व्याप्यदर्शनस्यापि शङ्काविरोधितया अवच्छिन्नतर्कव्याप्तिग्रह-
योगाभ्युपगमस्यनावश्यकतेति ध्येयम् ।। इत्यकारेण व्याघातबोधत्ववेद्यः । इत्येव व्याघातेन शङ्केयं नावतरतीत्य[illegible]त्र व्याघातपदं न विरोधिरूपव्याघातपरं अपि तु तत्कौन्त्यस्मिष्ठशङ्काप्रतियोगितावच्छेदकधर्मपरं तृतीयार्थश्च प्रतियोगिरूपेण प्रतिबन्ध-
कत्वेनावस्थितप्रसक्तायीननिष्ठप्रतिबन्धकतावच्छेदकत्वस्यापि कार्यानुत्पादप्रयोजकत्वादिति नानवस्थाशङ्कास्यादिति भावः ।। शङ्काचेदनुमास्त्येव न चेच्छङ्का ततस्तराम् ।। व्याघातावधिराशङ्का तर्कः शङ्कावधिर्मतः ।। इति कारिकायाः शङ्कायाः कच्चिद्या-
घातप्रयोज्यानुत्पत्तिकत्वमहितं मा वार्यं इत्यभिमानेन तदुपरि खण्डनकृतां शङ्कालिङ्गः प्रकृतिप्रतियोगिन्यविरोधरूपव्याघातः आश्रयतासम्बन्धेन शङ्काप्रत्यासत्तीभूय तत्प्रतिबन्धकत्वमित्यनुमतं । तन्नेत्सम्भवति व्याघातस्य शङ्काश्रितत्वेन शङ्को-
त्पत्तावेव तत्र व्याघातरूपप्रतिबन्धकस्य व्यवधानेनैतत्त्वेन तदुत्पत्तेरावश्यकतया व्याघातस्य तत्प्रतिबन्धकत्वव्याघातादित्याशङ्कामुपपत्त्यसम्पादकत्वेति - अत एवेति ।। व्याघातोऽवधिरिति ।। शङ्काप्रत्यासत्ततया स्वीकृत इति शेषः ।। शङ्कास्तीति ।।
तदा शङ्कोत्पादोऽवश्यमङ्गीकार्य इत्यर्थः ।। नचेदिति ।। शङ्काप्रत्यासत्त्या व्याघातश्चेन्नास्ति तदा प्रतिबन्धकस्य व्यवधानाच्छङ्का जायेतैवेत्यर्थः अतो व्याघातावधिः अतो व्याघातप्रयोज्यानुत्पत्तिकाशङ्केति । उत्तरार्धं तर्कः शङ्कावधिः शङ्कानुत्पाद-
प्रयोजक इति वाक्तुत्तरार्धं विरोधिशङ्काया व्याघातानिवर्त्यत्वे अनवस्थया तर्कस्यैवानवतारादित्यर्थः अथवा तर्कः शङ्कावधिः शङ्कावधावधिकः यत्र व्याघाताच्छङ्काधाराविच्छेदः तत्र तर्कानुपयोगात्तद्धाराया आविच्छेद इति भावेऽस्तु इता
वान्तानवस्थावकाशादिति युक्तमित्यर्थः नहि व्याघातः शङ्काश्रितः प्रतिबन्धकविधया शङ्कानुत्पादप्रयोजक इत्युच्यते इति शेषः ।। किन्तु स्वक्रियैवेति ।। तथा चाचार्यकारिकायां व्याघातावधिराशङ्केत्यस्य यत्र शङ्क्यते ततो प्रमाणेतिकृतस्येन
पदवीत्यप तत्र व्याघातस्तदवधिकाशङ्केत्यर्थः ताद्दशस्थले स्वक्रियाप्रतिबन्धेनैव शङ्काया अनुत्पाद इति यावत् न तु तदर्थ इति भावः केचित्तु व्याघातावधिराशङ्केत्यत्र व्याघातपदं न शङ्कानिष्ठप्रकृतिविरोधिपरं अपि तु स्वक्रियानिकशङ्का-
प्रतिबन्धकतावच्छेदकधर्मपरं ताद्दशव्याघातस्य शङ्काविरोधित्वं शङ्कानुत्पादप्रयोजकत्वं चाभिमतं तदव्यवहितपूर्वकाले प्रतिबन्धकसमवधानस्यैव ताद्दशकालत्वेनो प्रतिबन्धकतावच्छेदकवत्त्वस्यापि तदा कार्यानुत्पादप्रयो-
जकत्वादिति भाव इत्याहुः ।। ननु क्रियाया अपि शङ्कानिवर्तकत्वं विचारसहं तस्याः शङ्काविरोधित्व एव तन्निवर्तकत्वसम्भवात् तच्च शङ्काप्रतियोगिकविरोधित्वे विरोधघटकशङ्कात्वस्य वत्त्वघटकतया शङ्कानिवर्तकतायां स्वव्याघातादित्यत

आह—नचेति।। क्वचिदपि विरोधिज्ञानाद्वङ्काति हन्तिरेव तस्यास्तर्वत्रैव ताद्दशतर्कसम्भवादित्यर्थः। तथाच सर्वानुभवसिद्धं करादिदर्शनस्य स्थाणुत्वादिसंशयनिवर्तकत्वमपि भज्येत। यदित्वविरोधिप्रतियोगिनः कदाचित्क्वचित्तत्त्वमेव तत्प्रतियोगिकविरोधस्तन्निवर्तकस्य निर्वहति न
तु यदि यत्र निर्वहति अभिमततद्व्याप्तस्तत्र विरोधप्रतियोगिनः सत्वमप्यपेक्षितमित्युच्यते तदा तुल्यप्रसङ्गतेपीति भावः। ननु व्यभिचारदर्शनसहकृतस्य सहचारदर्शनमात्रस्य व्याप्तिग्राहकत्वोपगमे भूयोदर्शनस्य व्याप्तिग्राहकत्वप्रवादो भज्येतेत्यत आह— नचैताद्दशीति।। तद
र्दे।। भूयोदर्शनस्य तर्कसम्पादनद्वारा व्याप्तिग्रहोपयोगितेत्यर्थः। यद्यप्यापाद्यव्याप्तिज्ञानादिसत्त्वे प्रथमदर्शनेपि ताद्दशतर्कप्रवृत्तिः सम्भवतीति तर्कोत्पत्तिसाध्यत्वं भूयः सहचारदर्शनमकिञ्चित्करमिति वाच्यम्। तथापि यत्र महानसे प्रथमं सहचारदर्शने
पि गोष्ठे वह्निं विनापि धूम उत्पत्स्यते इति शङ्काजाता गोष्ठे वह्निधूमयोः सहचारदर्शनेन च तन्निवृत्तौ कोनुपाधिरित्यादि विशेषणाच्चान्याधिकरणे न भावेण शङ्कानुदयेन तर्कावतारः तत्र द्वितीयदर्शनस्य एवं क्रमेण तृतीयादिदर्शनस्यापि क्वचिदपेक्षासम्भव इति
नासङ्गतिः। न चाधिकरणान्तरभावेण तथाशङ्कायामपि महानसीयधूमे वह्निसमवहितताजन्यत्वनिश्चयसम्भवेन धूमत्वावच्छेदेनोपपत्तिः सम्भवत्येवेति द्वितीयादिदर्शनमकिञ्चित्करमिति वाच्यम्। एवमपि क्वचिद्धूमस्य सामानाधिकरण्यनोपपत्तिनिवा
रकतया लाघवज्ञानासम्भवस्थले धूमत्वावच्छेदेन वह्निजन्यतानिश्चये द्वितीयादिदर्शनस्योपयोगित्वात्। न तु स्वत एव प्रयोजकमिति भूयः सहचारग्रहस्य कंमहाद्रिश्चये व व्याप्तिग्रहोपयोगीत्यर्थः। अत एव न तदा हितेति तर्कसहकारिकस्य व्याप्तिग्रहोपयोगि
त्वस्वीकार एव जन्यसंस्कारस्य व्याप्तिग्रहजनकताया आवश्यकत्वात् प्रमाणान्तरं स्यात्। तर्कद्वारा तस्य तथात्वे च तज्जन्यसंस्कारस्य हेतुताया मानाभावेन न तस्य प्रमाणान्तरताप्रसक्तिः हत्वापादकताभावादित्यर्थः। तर्कस्यापि शङ्कानिवृत्तिद्वारैव व्याप्तिग्रहे
पयोगितया व्याप्तिग्रहकारणत्वाभावात् न प्रमाणान्तरताप्रसक्तिरिति भावः। भूयोदर्शनजसंस्कारस्य तर्ककारणतया तस्य तर्कोपयोगित्वे त्वभिमानेन ताद्दशसंस्कारस्य प्रमाणान्तरत्वप्रसक्तिं ताद्दशसंस्कारस्य तर्ककारणत्वमभ्युपेत्यैव निराकरोति न तर्कस्येति।।
यत्रापाद्यव्याप्तिं बाधभ्रमोत्पत्तिस्तत्र जनकज्ञानविधया पाद्यव्यतिरेकावगाहित्वं स्वीक्रियते प्रमात्वमुपपादनीयमिति भावः।। तच्चेत्यादि मूलग्रन्थे तत्पदं यादिसहचारदर्शनपरं तदा सङ्गतिः सहचारज्ञानस्य विशेषणताविधया प्रत्यक्षइवयावदनुमा
नजन्यपि व्याप्तिज्ञाने हेतुत्वात् अतो व्यभिचारज्ञानविरह इत्यनेन पूर्वोक्तव्यभिचारज्ञानाभावपरतया व्याचष्टे— दीधितौ— तदिति।। व्यभिचारादर्शनं यदि व्यभिचारनिश्चयमूलदाप्यसङ्गतिः ग्राह्याभावनिश्चयस्य शङ्कादिव्याप्तिहेतुत्वादिति व्यभिचारादर्श
नस्य संशयसाधारणव्यभिचारज्ञानाभावरूपतां ज्ञाननिश्चयद्वयादिनामूलकत्वैव सूचितं समाश्रित्य व्याचष्टे— व्यभिचारज्ञानसामान्याभावश्चेति।। व्याप्तिग्रहविशेषोपादानव्यभिचारज्ञानाभावाभावेपीत्यर्थकं तदभावेपीति मूलं यदि व्यभिचारस्य
त्वपदं तदा सङ्गतिः तत्र व्याप्तिज्ञानानुत्पादादतः संशयस्य दभावपरतया ऽवतैवत व्याचष्टे— योग्यतादीति।। आदिना साध्यपरिग्रहः।। शङ्कापीति।। आदिना धूमानादिपरिग्रहः। यद्यपि संशयप्रति व्यञ्जकताया व्याप्यदर्शनस्योत्तेजकतया व्याप्यदर्शनानुमाने
तानिश्चयेन व्यभिचारावकाशस्तथापि सामान्यव्याप्यवत्ताज्ञानजन्यायां लाघवज्ञानादिविधया द्विधाधप्रकारिकायां ताद्दशसंशयात्मानुमितौ व्यभिचारो बोध्यः। तच्चेति तत्पदं तर्कपरतया वर्णयतां तथासत्यपि न मूलकत्वसङ्गतिः कथञ्चिदुपपादयतां मतमाह—
तदिति।। अत्रास्वरसो व्याघाताद्यङ्काविरहस्थले व्यभिचारेण तर्कस्याहेतुत्वात् हेतुपदस्य शङ्काविरहद्वारेण योनितापरत्वे तदपेक्षया तत्पदस्य शङ्काविरहपरतायां एवोचितत्वाद्बोध्यः। यथार्थस्थले व्यभिचारसन्देहानुकूलतर्कविरहप्रयोजकत्वान्नन्तरा

अ॰ दी॰ टी॰ ९३

नं विरोधीति तदभावयोर्ज्ञानस्यैव व्याप्तिग्राहकं· व्यभिचारनिश्चयाभाव एव च स्वरूपसत स्तथेत्यभिमानेन शङ्कते– मूले– नन्विति ।· व्यभिचारादर्शनवत इ ।· व्यभिचारानिश्चयवत इ ।· व्यभिचारसाधारणं ।· व्यभिचारदशासाधारणं· न ततो व्याप्तिनिश्चयः स
म्भवतीति शेषः· संशयनिवर्तकतर्कस्यैव निश्चायकत्वादिति भावः ।· स्वरूपसतोरिति ।· तथाच तथाविधयोः संशयविरोधिनोः सतोः संशयधायाव्यावर्तकतया व्याप्तिनिश्चायकत्वं सम्भवत्येवेति भावः· एवञ्च परार्थस्थले प्रतिवादिनः स्वव्यभिचार
सन्देहोद्भावनं तदुद्भावने व्यभिचाराव्यभिचारसहचरितव्यभिचारज्ञानाविषयत्वज्ञानान्मध्यस्थस्य व्यभिचारसन्देहो भवति· न तु व्याप्तिनिश्चय इत्यभिसन्धायैव न तु व्यभिचारज्ञानाज्ञाने तदभावज्ञानासम्भवात्कारणाभावाद्व्याप्तिनिश्चयो माभूदित्या
शयेन अनुकूलतर्कविरहोद्भावनमपि स्वकीयव्यभिचारसंशयज्ञापनायैव नतु अनुकूलतर्कविरह[illegible]· न व्यभिचारज्ञानाभावानुकूलतर्कयोर्ज्ञानहेतुता प्रामाणिकीत्याशयः ।· अथोक्तरीत्यानुकूलतर्कोद्भावनं सन्निहितं· स्वरूपसत एवानुकूलतर्कस्या
पादकत्वान्निवर्तकतया तदभावनिश्चायकत्वेन साध्यतद्व्याप्त्यादिनिश्चयार्थं वादिनोऽनुकूलतर्कोद्भावकस्तज्ज्ञानजनकस्तदुपन्यासः कथमुपपद्यतामिति चेत् इत्थम्· यद्ययं निर्वह्निः स्यात्तदा निर्धूमः स्यादित्याकारो हि तर्कोपन्यासः ।· क्रियते तत्र निर्वह्नि निर्धूमपद
समभिव्याहृत भवनार्थकासुधातुभ्यां निर्वह्नि निर्धूमयोः साधारणोऽभावः प्रत्याय्यते· सम्भावनार्थकयदितदापदाभ्याञ्च हेतुहेतुमद्भावापन्नतदारोपविषयताबोधः· आख्यातपदाभ्याञ्च तत्तत्तिथ्याश्रयत्वरूपकर्तृत्वं प्रथमान्तपदार्थे बोध्यते· अन्वयार्थ
दानां च क्रियान्वितस्य स्वार्थस्याख्यातेन बोधने व्युत्पत्तिविरोधविरहात्· अत एव गुरुमतेन कलञ्जं भक्षयेदित्यत्र कलञ्जभक्षणाभावविषयकं कार्यमित्यन्वयबोधः· न्यायमते च कलञ्जभक्षणं बलवदनुबन्धित्वविशिष्टेष्टसाधनताभाववदिति· तत्र
धात्वर्थाख्यातार्थयोरन्तरा नञर्थस्य भानात्· तथाच निर्वह्नित्वारोपविषयोऽयं तदारोपविषयताप्रयोज्यनिर्धूमत्वारोपविषयताश्रय इति बोधः· निर्वह्नित्वारोपस्तर्ककारणमापादकस्तत्र· निर्धूमत्वारोपस्तर्कस्वरूप· तयोरारोपत्वेनैव ज्ञानमुपेयते· ननु
ज्ञानत्वेन· अतो यदा तदा हार्यवह्न्यभावभ्रमवता धूमभ्रमसहकारेण धूमाभावापत्तिजनकोऽपि तत्तात्पर्यकस्य यद्ययं यदि निर्वह्निः स्यान्निर्धूमः स्यादिति वाक्यस्याप्रामाण्यं· एतादृशस्यैतदर्थबोधकवाक्यस्य तज्जन्यशाब्दबोधस्य च साक्षात्परकीयतर्कात्मकत्वाद्व्याप्तिज्ञा
नोऽजनकत्वेऽपि आपाद्यापादकयोर्व्याप्यव्यापकभावप्रयोजकव्याप्त्याकाङ्क्षासम्पादनद्वारा साक्षात्कारणव्याप्तिबोधजनकोदाहरणप्रयोजकतया परकीयतर्कस्याप्युपयोगः· अनुमानस्थले साध्यहेत्वोर्व्याप्यव्यापकभावबोधकहेत्वाभा
गस्य अनुमित्युपयोगात्· तत्रोदाहरणवाक्याद्व्याप्तिबोधोऽपि तर्ककारणाहार्यापादकवत्ताज्ञानस्य वाक्येन जननासम्भवात्परकीयतर्कस्याप्युपयोगासम्भव इति न वाच्यम्· पर्वतो न वह्निमानिति प्रतिवादिवाक्याद्वादिनः साध्यनिर्देशसहितात्संशयोत्पत्त्या
पोऽजन्यदुः तन्निवृत्तीच्छया एककोटिनिर्णये च ततो मध्यस्थस्याहार्यापादकवत्ताज्ञानसम्भवेन व्याप्तिशुश्रूषैव वादिना तस्य तर्कसम्पादनसम्भवात्· एवं सति व्यभिचारशङ्काव्युदसनं दीधितिकृता तूनाधिग्रन्थे समर्थयिष्यते· ।· ननु तर्कस्य स्वतन्त्रप्र
माणं तस्याप्रमाणत्वनियमात्· नापि प्रमात्वकाप्यव्यतिरेकनिश्चयजन्यत्वं व्याप्तिप्रमाजन्यत्वं वा· धूमस्याद्रव्यादिभूतदशायां उत्पन्नो धूमो यदि वह्निव्यभिचारी स्याद्धूमः स्यादित्यादितर्के व्याप्तिप्रमाया उत्पादस्य व्याप्तिप्रमानुत्पादस्य चाविनिगमादित्या
शङ्कानिराकरणपरतया समाधिसामान्यसूचकं विशेषादर्शनेत्यादिमूलोक्तं दर्शनं सङ्गमयति– लौकिकेति ।· प्रमेति ।· प्रमायामुत्पादिते धूमस्यैकस्य भावादित्यर्थः· व्यभिचारव्याप्तिप्रमायां सत्तर्कस्य व्यतिरेकव्यभिचारः तदुक्ते तर्काभासस्य चान्व

यच्चकिरे लिङ्गारद्यर्थः। यथायोगं हेत्वोरन्वयसमाधानं सुधीकरोति– तथाचेति।। बोध्येति।। बोध्यत्वं प्रकृतनिश्चयविषयत्वं ।। सखलामत्वस्येति।। ननु प्रमात्वमभ्रमत्व इति भावः॰ पुरुषेषु पुरुषत्वव्याप्यतया शशत्वादिप्रमात्स्वपुरुषत्वस्य प्रमाया उत्पादात्
पुरुषस्य चानूत्पादादिति भावः।। तर्कस्यापीति।। सत्यत्वासत्यत्वरूपस्वरूपमनुपजाते नतु प्राप्ति प्रमाजन्यत्वतदभावरूपे इति भावः॰ यथाश्रुतार्थेऽस्वरसस्य वक्ष्यमाणत्वात्तात्पर्यार्थमाह– अत्रचेति।। धर्मिण।। विशेष्यस्य॰ बोध्यादीत्यादिना बोध्याभा
वविवस्य फलीभूतज्ञानप्रमात्वप्रयोजकस्य परिग्रहः॰ तथाच विशेष्यतासम्बन्धेन तत्संसर्गक तत्प्रकारकप्रमा प्रमोत्पत्ति तत्संसर्गक विशेषणतावियोगाभ्यां तद्धर्म तत्संसर्गावच्छिन्नतदभावो हेतुः अतो न तदभाववति तत्प्रमायां तद्वृत्तिच तद्धर्मस्य प्रसङ्ग
इति भावः॰ विशेष्यविशेषणान्तर्भाव्य कालिकप्रत्यासत्त्या कार्यकारणभावो हेयः॰ विशेष्यतया ऽन्यपुरुषादौ एतत्पुरुषधर्मिक पुरुषत्वप्रमादेरनुत्पादस्य कारणाभावनिर्वाच्यत्वासम्भवात्।। अथ एतत्पुरुषधर्मिकपुरुषत्वप्रकारकत्वं विशिष्टप्र
मादेर्विशेष्यतया आपादनं पुरुषत्वप्रकारकत्वानिरूपितैतत्पुरुषादिनिष्ठविशेष्यतापादनं पर्यवसितं तच्चानन्तसम्भवति॰ पुरुषान्तरे एतत्पुरुषनिष्ठाया पुरुषत्वप्रकारतानिरूपितविशेष्यताया अभावे एतद्व्यक्ति,त्वाभावविशिष्टकारणतावच्छेदकसम्बन्धा
वच्छिन्नकारणाभावान्नसम्बन्धकस्यापि समवायादिनैतत्पुरुषवृत्तित्वविशिष्टपुरुषत्वाभावस्य प्रयोजकत्वादितिचेन्न॰ एवं सति पुनः कार्यकारणभावकल्पना या अपि निष्फलत्वात्॰ एतद्धारणीयानि प्रमा ज्ञानप्रसङ्गः॰ ननु अनित्यविशेषणतसम्बन्धा
वच्छिन्नप्रमायां विशेषणस्य तत्सम्बन्धस्य वा हेतुतानसम्भवति तस्याविद्यमानतादशायामपि प्रमाजन्यतदुत्पत्तिमानोदयात् एवमनित्यप्रतियोगिकतत्संसर्गकाभावप्रमे स्याव्यवहितपूर्वकालावृत्तिप्रतियोगिरूपतत्संसर्गवदतोध्वाभावस्य तत्सं
सर्गस्यैवा न हेतुतासम्भवः॰ न चानित्यघटादेर्घृतत्वप्रकृत्तित्वापि तदभावस्य तत्र सत्त्वान्न भ्रमसम्भव इति वाच्यम्॰ स्वविषयतद्धटाद्यधिकरणकालसमानाधिकरणत्वाद्यापि ज्ञानादेर्विषयतासम्बन्धावच्छिन्नघटाद्यभावस्य तेन सम्बन्धेन तद्धतो भेदस्य चासत्वात्
तादृशप्रमत्वविरोध्याभावादिहेतुत्वानुपपत्तेरिति तत्राप्यन्यत्कारणमाह– बोध्यादिमादिति।। वाकारोऽव्यवस्थितविकल्पपरः॰ नित्यप्रमाया लाघवेन विशेषणतयैव हेतुत्वौचित्यात्॰ प्रमात्वस्य विशेषणभेदभिन्नतया तद्भेदेन कार्यकारण
भावभेदस्यावश्यकत्वात्॰ सन्निकर्षस्य च तद्वद्विशेषत्वविशेष्यत्वेनैव हेतुतासामान्यतो आभ्रमत्वतदवच्छेदकसम्बन्धः अतः सन्निकर्षस्यानुगतस्य दुर्निर्वचत्वेपि न क्षतिः॰ ज्ञानरूपप्रत्यासत्ते विषयतानाश्रितत्वेपि न क्षतिः॰ तद्विषयत्वस्यैवोक्तरूपेण
हेतुत्वोपगमात् धर्मस्यैव धर्मिणामप्युपलक्ष्यतया कारणतावच्छेदकत्वं इतरे तद्विशेषणसतो नाविद्यमानधर्मिविशेष्यकप्रमानुपपत्तिः नवातिप्रसङ्गः॰ ननु तद्वद्वृत्तिविषयतासम्बन्धेन तर्कत्वेन हेतुत्वे सद्धितीयकल्पापेक्षया गौरवं॰ तर्कस्वरूपमा
नसत्वव्याप्यजातिविशेषः॰ असांधिकत्वेपि साध्यरूपविषयमात्रोपरागेण अनुमितित्वस्यैव लौकिकसन्निकर्षजन्यत्वविषयमात्रोपरागेण साक्षात्कारत्वस्यैव च आपाद्यमात्रोपरागेण तर्कत्वस्य गृहसिद्धावित्यतआह– स्वयमिति।। पुनश्चाभि
मानगौरवयोः परिहारमाशङ्कते– अर्थेति।। सन्निवर्तकत्वेन।। विपरीतज्ञानविरोधित्वेन।। तच्च।। निवर्तकत्वञ्च।। तर्कस्य।। विपरीतापादकतर्कस्य॰ तथाच पूर्वप्रकाणतयैवासिद्धिरिति भावः॰ स्वयं विशेषदर्शनहेतुत्वानुपगमात्– आपातत इति।। तृ
याच विशेषदर्शनसाधारणतर्कस्य भ्रमप्रमासाधारणनिश्चयाविशेषहेतुत्वं।। अन्यत्र।। विपरीतज्ञानानुत्पत्ति प्रत्यक्षादिस्थले।। तत्र।। विपरीतज्ञानोत्पत्त्यंशे।। तस्यापि।। तर्कस्यापि॰ अपि कारोविशेषदर्शनसमुच्चायकः॰ विशेषतो बोध्यादिसद्धि

१४

शेष्यकत्वविशिष्टेन विशेषणेन ।। कारणत्वं ।। विपरीतज्ञानोत्तर प्रमादिरूपप्रत्यक्षनिश्चयत्वावच्छिन्नं प्रति कारणत्वं ।। गौरवादिति ।। प्रमाप्रमासामान्यप्रयोजक प्रत्यक्षनिश्चयप्रयोजकसमाजादेव प्रमादिरूपप्रत्यक्षनिश्चयनिर्वाहादिति भावः ।। ननु किं प्रमादिसामान्यप्रयोजकं न तावद्दुष्टिर्गुणो विशेषणादिमत्त्वं अनित्यप्रमादिसाधारण्याभावस्योक्तत्वात् नापि बोध्यादिमद्धर्मिसन्निकर्षः अनुमित्यादौ तदहेतुत्वात् न च तादृशधर्मिधर्मिसत्त्वेनैव तद्धेतुता प्रागुक्तसादनुमित्यादिसाधारण्यसम्भव इति वाच्यं सर्वत्र कार्योत्पत्तौ कारणतावच्छेदकोपलक्षितप्राक्सत्तायाः प्रयोजकत्वमतेति प्रसङ्गात् न च वृत्तित्वेनैव तस्य हेतुता बोध्यादिमद्दृश्याश्रयत्वे प्रत्यासत्तिरिति वाच्यं वृत्तिमत्त्वस्य तादृशसम्बन्धेनानियतपूर्ववर्तिताया अवच्छेदकं यद्भावत्व विषयत्वादिरूपधर्मान्तरं तद्व्यापकत्वेनान्यथासिद्धिनिरूपकत्वादित्यत आह — उक्तश्चेति ।। कारणत्वमतङ्गति ।। कारणत्वबाधिता नैयायिकानां मते [illegible] त्यर्थः एतेन वक्ष्यमाणकारणताया निर्विकल्पकनिरूपता नानुपपत्तिः मीमांसकमते सम्भवेऽपि न क्षतिः तैः प्रमात्वस्य कार्यतावच्छेदकत्वानुपगमादिति ध्येयम् ।। विशेष्यसम्बन्धेति ।। विशेष्यवृत्तित्वेन स्वविषयत्वसाक्षिविशेषणवत्त्व तत्तद्विशेषणवदन्यत्वरूपसम्बन्धेन ज्ञानत्वावच्छिन्नं भवेत्यर्थः ।। प्रमाप्रमेति ।। विशेष्यतासम्बन्धेन प्रमात्वप्रत्वावच्छिन्नं प्रति हेतोरित्यर्थः तद्वद्वृत्तितद्वत्यावृत्तिविषयतासम्बन्धेनापि भावज्ञानसाधारणेन हेतुतासम्भवति विशेष्यविषयकस्यापि भ्रमत्वज्ञानस्यानियमतः प्राक्सत्त्वादिति अवधेयम् ।। तत्तद्विशेष्यकत्वावच्छिन्नं तत्तत्प्रकारकत्वरूपस्य प्रमात्वस्यार्थसमाजसिद्धत्वेऽपि तद्वद्वृत्तिविशेष्यत्वासम्बन्धेन ज्ञानत्वावच्छिन्नं प्रति तादृशसम्बन्धेन स्वविषयतद्वत्त्वसम्बन्धेन वा ज्ञानत्वेन हेतुताकल्पनमावश्यकमन्यथा दोषसम्बन्धान्नाविनाशित तद्वत इव तदभाववत तत्प्रकारकज्ञानविषयतापत्ते दुर्वारत्वात् प्रमास्थले विशेषसामग्र्यसत्त्वे भावेन तद्वतस्तत्प्रकारकज्ञानविषयत्वे प्रयोजकसन्निकर्षादितत्त्वप्रसक्तसाधारण्यात् न चैवमप्यनेकवृत्तिघटत्वादिप्रमाणां घटत्वादिज्ञानस्य दुष्टप्रत्यासत्त्या कारणत्वकल्पनमफलं तेन घटकविषयतासम्बन्धेन स्वाविषयघटसत्त्वाकि सम्बन्धेनेव ज्ञानत्वेनावश्यकल्पनीयहेतुतयैव पटादौ घटत्वादि [illegible] ग्रहातिप्रसङ्गवारणसम्भवादिति वाच्यं तादृशसम्बन्धावच्छिन्नप्रतियोगिताकानां पटादौ घटत्वादिग्रहाभावप्रयोजकत्वापेक्षया एकैकशो घटादिहानि विषयतासामान्यसम्बन्धावच्छिन्नज्ञानाभावानां स्वविषयघट[illegible]सम्बन्धावच्छिन्नानां तत्तत्वेन लाघवात्तादृशसम्बन्धेन विशेषणज्ञानहेतुत्वसिद्धेरित्यलं पल्लवितेन ।। मूले — तर्कान्तरापेक्षेति ।। तर्कमूलीभूतव्याप्त्यादिग्रहाय तर्कान्तरापेक्षेत्यर्थः पूर्वपक्षोपपादितं तर्कान्तरानपेक्ष्य जातमात्रबालकीयव्याप्तिज्ञाने तर्कस्य व्यभिचारसम्बन्धवदिति अस्ति चेति सम्भावितं चेत्यर्थः व्याप्तिस्मरणं तर्कं विनैवेति शेषः संस्कारोद्बोधजन्यतावच्छेदकतयोपेयप्रत्यक्षशून्यत्वादिति भावः ।। ननु तदपि ज्ञानं प्रत्यक्षादिरूपमेव अनुभवं विनाऽसंरणायोगात् इत्यत आह — तदानीमिति ।। अनुमानकस्य सहचारदर्शनादेरभावात् तथा चागत्या जन्मान्तरीयानुभवजनितसंस्कारोद्बोधकतया तथापि सा व्याप्तिस्मरणमुपपाद्यामिति भावः ।। ननु जातमात्रीयव्याप्तिज्ञाने तर्कान्तरापेक्षाविरहविनानिष्टात् तदुत्तरं सुषुप्त्यादिना प्रवाहविच्छेदेन तर्कावतारासम्भवेन वन्ह्यादिव्याप्तिप्रत्यक्षासम्भवादित्यत आह — तन्मूलेति ।। अनुभवमूला चेति ।। एतदुत्तरं प्रमवानुभवमूला चेत्यर्थः ।। अग्रेपीति ।। तर्कं विनैवेति शेषः ।। अनादि

सिद्धेति।। अनादिप्रसिद्धप्रवाहविषयेत्यर्थः- कार्यकारणभावो धूमवन्ह्यादिव्याप्तिग्राहकतर्कमूलं- विशेषश्च भेदाभेदग्राह्यतादात्म्यादिना वृक्षशिंशपादिग्राहके शिंशपा यदि वृक्षान्यतादात्म्यवती स्यात् वृक्षतादात्म्यवान्न स्यात् भेदाभे
दयोर्विरोधादित्यादितर्के। नादिसिद्धत्वस्य स्वरूपसतः शङ्काविरोधित्वे तज्ज्ञानप्रमाणानुयोगासम्भव इत्यतो दीधितौ- इदमिति।। अनादिसिद्धत्वज्ञानस्य।। वन्ह्यादावनादिसिद्धकारणताकत्वनिश्चयस्य प्रयोजकत्वं- विशेषदर्शनतया व
न्ह्यादिधर्मिकधूमकारणत्वादिविरहशङ्काविरहप्रयोजकत्वे तत्र ग्रहाभावनिश्चयतया- इत्थं निश्चये न वन्ह्यादेः कारणतया अनादिप्रसिद्धविशेष्यत्वस्यैवावगाहनात् न कारणतायाः परार्थाभिप्रायकत्वे स्वरूपसिद्धोपि विशेषिनासक्तिः- अनादिसिद्धत्वे
बाधकाभावेन च शङ्काविरोधितयोपन्यासस्यानाहार्यत्वादित्याशयेनाह- परेति।। नाकारोऽसाध्यायाम्- स्वरूपसिद्धेरपि तस्या अप्रामाणिकत्वात्- अन्वयव्यतिरेकग्रहितवतो वन्ह्यादौ धूमादिकारणत्वसन्देहस्य दुरपन्हवतया असम्भवाच्च- वस्तुतस्तु-
स्वरूपसिद्धेरपि विचारसंभवतु वा मभवतु मूलस्य परार्थाभिप्रायकत्वेन व्याघातेनानुमानप्रामाण्यस्य तदुपयोगिकव्याप्तिनिश्चयविषयतायाश्चावश्यकत्वेन तदन्यथानुपपत्त्यैव कार्यकारणभावादेरपि नासिद्धत्वसिद्धेरित्यग्रिमग्रन्थ
स्याप्यन्यथा सङ्गतेरित्यवधेयम्- मूले- तर्कस्य।। तर्कविषयस्य- वन्ह्यादेरनादिसिद्धव्याप्तिकत्वसत्वं तादृशकारणताकत्वादिनिश्चय अर्थापत्तेश्च पार्थक्योऽपि व्याप्तिग्राहकापेक्षया अनवस्थया दुरपन्हवतया अनुमानाभावावलम्बने
सङ्कलिताभिप्रायेणाचष्टे- अनुमानस्यादीति।। प्रकृतिप्रत्ययलोपधानं- तर्कस्य प्रमाणविषयस्य सोपाधिकत्वग्राहकत्वं स्वतो व्यभिचारशङ्कानिरासद्वारा वा सङ्गासंदूषयति- मूले- तर्कस्येति।। द्वितीयशङ्कते- व्यभिचारशङ्केति।। व्यभि
चारः सोपाधिकत्वं- अतोऽपि व्याप्तिपदमनौपाधिकत्वपरं- शङ्काविरहेण तर्कस्यानन्यथासिद्धत्वमाशङ्काह- दीधितौ- इष्टेति।। मूले व्यभिचारादिति।। तर्कस्य कारणत्वमस्येसामन्मतमित्याशयेनाह- शङ्केति।। शङ्कानिवर्तकतया प्रयोजकत्वस्य
तथात्वे व्याप्तिग्रहस्य तथात्वमितिभावः- अनौपाधिकत्वं हि तर्कं विनैव गृह्यते तत्र तद्वत्तर्कानपेक्षो व्याप्तिग्रह इति मतमाह- ग्रहेति।। साधनाद्यः प्रमाणान्तराणि निश्चयात् अभावग्रहः।। उपाधित्वाभावग्रह इति विरोधिशङ्कानिवृत्तौ अनौ
पाधिकत्वं मनसा सुग्रहं प्रमाणान्तरस्य तत्रासम्भवात् अनुमानभिन्नस्य प्रमाणस्य तत्राभावादित्यर्थः- व्यभिचारनिश्चयाभाव इव व्याप्तिग्रहे पेक्षितः तत्र च शङ्काविरहोपि- तथा च तर्कस्योपेक्षणीयतया नानवस्थेति नादिनमाक्षिपति- ये चोदि
अनुमानमात्रोच्छेदहेतुत्वं पूरयति- दीधितौ- अनिश्चितेति।। पक्षे साध्यानिश्चये यदि तत्रत्वे साध्यव्यापकत्वग्रहस्य सम्भवतीत्यत आशङ्कितसाध्यकानुसरणं।। सर्वाविन्यादिति।। पक्षतात्वग्रहस्येत्यादि- तन्मेवमपि नानुमानमात्रोच्छेदः निश्चि
तसाध्यक एव सिद्धसाधनेद्यातत्सम्भवादित्यत आह।। पक्षेति।। तथा चानुमानप्रामाण्योच्छेद इति मूलार्थ इति भावः- स्वप्रतिपक्षोपस्थापकत्वरूपोपाधित्वेन दूषकतायाः।। किञ्चित्यादि नासद्व्ययमपि वक्ष्यमाणतया नहि व्याप्यपाधित्वेनेति ग्रन्थासङ्गतिरिय
तथा- तो व्याचष्टे- उपाधित्वेनेति।। स्वव्यभिचारेणेत्यादेः साध्यव्यभिचारानुमापकव्यभिचारप्रतियोगित्वेनेत्यर्थः- इव व्यवत्नोपाधिरित्यनेन तदेवोपाधित्वं तत्र न्यायः- मूले- साध्यव्यापकत्वेन तद्व्यतिरेकादिति।। साध्यव्यापकत्वेनाविश्चीयमानस्य
तस्य पक्षे व्यतिरेकनिश्चय आदित्यर्थः- साध्यव्यापकत्वे कृतयसाध्यवत्त्वबुद्धिप्रयोजकतादृशानिश्चयस्यापि विपर्ययादिरोधित्वमित्याशङ्कामाह- व्यापकेति।। वस्तुतस्तेयस्तात आवश्यकत्वात्- तथा च व्यापकव्यतिरेकनिश्चयस्य तदभाववद्व्याप्य
वत्ताज्ञानमुद्रयैव तद्ग्रहनिरोधित्वमितिभावः- अनुमानमात्रोच्छेदकताज्ञानपक्षेतरत्वपक्षसाध्यव्यापकतापादकतर्करूपं परमतमेतेति- नैयायिकमतेनेदं प्रदुष्टानतदाहरिन्नत्वयरित तद्व्याप्ताप्रसिद्धेरितिभावः।। श्रीः।। इतिश्रीमहामहोपाध्यायग
दाधरभट्टाचार्यविरचिता तर्कटीका समाप्ता॥

तर्क॰ गा॰ टी॰
७५

४४४२

श्री॰ ॐ नमो गुरवे ॥ ॥ प्रतियोगितावच्छेदकावच्छिन्नं यत्र भवतीति यथाश्रुतमूलात् यस्य दर्थे साध्ये प्रतियोगितावच्छेदकावच्छिन्नत्वान्वये प्रतीयते. ततश्च वह्निमान् धूमादित्यादौ हेतुसमानाधिकरणमहानसीयवह्नित्वा
वच्छिन्नाभावमादाय दोषो दुर्वारः सर्वेषामेव वह्न्यादीनां तादृशाभावप्रतियोगितावच्छेदकविशिष्टतया तदन्यतमासम्भवात्. यत्तदस्य यद्रूपावच्छिन्नत्वपरतया यद्रूपावच्छिन्नस्य प्रतियोगितावच्छेदका ये धर्माः प्रत्येकं
तत्तद्धर्मावच्छिन्नान्यत्वमित्यर्थे साध्यतावच्छेदकस्य तत्तत्प्रतियोगितावच्छेदकधर्मावच्छिन्नभेदकूटेन प्रत्येकं सामानाधिकरण्यपर्यवसिते वह्न्यादिसाध्यकहेतौ वह्नित्वादेर्विभिन्नवह्न्यादिव्यक्त्यन्तर्भावेण महानसीयवह्नित्वा
द्यवच्छिन्नभेदैः प्रत्येकं सामानाधिकरण्यसत्त्वेऽप्येकव्यक्तिमत्त्वादिसाध्यके सत्तादौ हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकविशिष्टसत्तात्वाद्यवच्छिन्नभेदसामानाधिकरण्यासत्त्वादव्याप्तिः. यद्रूपावच्छिन्नं प्रतियो-
गितावच्छेदकावच्छिन्नाविषयकप्रतीतिविषय इत्यर्थे उक्तदोषवारेऽपि यद्रूपं प्रतियोगितावच्छेदकभिन्नं प्रतियोगितावच्छेदकाविषयकप्रतीतिविषयो नेयत एव सामान्ये प्रतियोगितावच्छेदकविशिष्टा
विषयकप्रतीतिविषयत्वस्य साध्यतावच्छेदकविशिष्टे निवेशनमनुचितम्. एवं स्वरूपसम्बन्धरूपावच्छिन्नत्वविवक्षया यद्रूपावच्छिन्नं प्रतियोगित्वं उक्ताभावप्रतियोगितावच्छेदकानवच्छिन्नमित्यर्थे
धूमवह्नित्वादिरूपसाध्यतावच्छेदकावच्छिन्नप्रतियोगिके महानसीयत्वादिविशिष्टवह्नित्वावच्छेदकं धूमाभावमेव. यद्रूपावच्छिन्नं प्रतियोगित्वं तादृशप्रतियोगिताभिन्नमित्युक्तौ समवायादिना घटादौ साध्ये
संयोगादिना घटादिहेतावतिव्याप्तिः संयोगावच्छिन्नघटत्वाद्यवच्छिन्नप्रतियोगिताकं हेतुमन्निष्ठाभावप्रतियोगिताभेदसत्त्वात्. इदं वाच्यं द्रव्यसादित्यादावव्याप्तिवारणाय हेतुमन्निष्ठाभावप्रतियोगि-
तायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य निवेशनीयतया व्यभिचारिमात्र एव सम्बन्धतावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताभेदसत्त्वेना-
तिव्याप्तिः स्यादिति यद्रूपावच्छिन्नप्रतियोगितावच्छेदकत्वेन हेतुमन्निष्ठाभावीयसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताभेदनिवेशे च व्यापकत्वघटनया महागौरवं स्यादिति प्रतियोगिताभेदमुपेक्ष्य प्र-
तियोगितावच्छेदकावच्छिन्नभेदोपादानम्. साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं भेदानुयोगितावच्छेदकावच्छिन्नप्रतियोगितायां निवेश्यातिव्याप्तिवारणे केवलान्वयिसाध्यके तादृशप्रतियोगिताप्रसि

ता २

ध्याऽव्याप्तेरिति रीत्या भिन्नव्यापकव्यापरिष्कारेपि गौरवमित्युपाध्यायोपदिष्टनञ्द्वयन्यासपक्षस्य बलम्व्याचष्टे. प्रतियोग्यसमानाधिकरणेति. नच नञ्द्वयन्यासेन साध्यतावच्छेदके प्रतियोगितावच्छेदकभेदनिवेशेपि धूमवान्वह्नेरित्यादौ महा
नसीयत्वादिविशिष्टवह्नित्वादिभेदसत्त्वात् साध्यतावच्छेदके प्रतियोगितावच्छेदकाविषयकप्रतीतिविषयत्वमेव विवक्षणीयम् तदपेक्षया साध्यतावच्छेदकावच्छिन्नप्रतियोगिकत्वे तादृशप्रतियोगितावच्छेदकानवच्छिन्नत्वनिवेशाप
क्षे न गौरवमिति वाच्यम्. प्रत्येकं घटादेः पटपटोभयत्वाद्यवच्छिन्नभेदवत्तथाभूतवह्नित्वादेर्महानसीयत्वान्तर्भावेण पर्याप्तिविशिष्टवह्न्यभावीयप्रतियोगितावच्छेदकत्वावच्छिन्नभेदस्य सुघटत्वात् अवच्छेदकाविषयकप्र
तीतिविषयत्वविवक्षामन्तरेणैव प्रतीकारात् अवच्छेदकत्वस्य वह्नित्वमहानसीयत्वनिष्ठस्य सत्त्वस्यापि भेदेन भिन्नत्वेपि तन्नप्रतियोगितावच्छेदकत्वाद्यनुगतरूपेण व्यासज्यवृत्तितायाश्चैकवर्तित्वलक्षणे वह्नित्वादेरवच्छेद
कत्वपर्याप्त्यनधिकरणत्वमुपपादितवतो दीधितिकारस्यानुमतत्वात्. सार्वभौमैस्तु विशेषधर्मावच्छिन्नप्रतियोगिताकत्वानतिरिक्तसामान्यधर्मावच्छिन्नप्रतियोगितासम्बन्धस्य विशेषरूपेण व्यासज्यत्वेपि सामान्यधर्मा
वच्छिन्नप्रतियोगितासम्बन्धस्य तेनानुगतरूपेण व्यासज्यवृत्तित्वमूरीकृतमिति कण्ठरवेणैवोक्तम्. एवं सति महानसीयवह्निभिन्नत्ववह्निमान्धूमादित्यादौ साध्यतावच्छेदकमहानसीयवह्निभिन्नत्ववह्नित्वयोः प्रत्येकं धूमादिसमा
नाधिकरणाभावप्रतियोगितावच्छेदकत्वपर्याप्त्यनधिकरणत्वेपि प्रकृतानुमितिविधेयतावच्छेदकतायास्तादृशोभयपर्याप्तावच्छिन्नपर्याप्ता तादृशरूपावच्छिन्नानुयोगिताकावच्छेदकत्वावच्छिन्नभेदसत्त्वे व्याप्तिघटकत्वोपगमे
न नातिव्याप्तिः. उक्तस्थलीयानुमितिविधेयतावच्छेदकतापर्याप्त्यवच्छेदकदर्शितधर्मद्वयनिष्ठद्वित्वाद्यवच्छिन्ने हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वपर्याप्तिमतिविरोधेन तदवच्छिन्नभेदासत्त्वात्. साध्यतावच्छे
दकवृत्तिवह्नित्वत्वादेरनुपस्थितिदशायां तदवच्छिन्नेऽनवच्छेदकत्वस्य दुर्ग्रहतया पर्वतो वह्निमानित्यनुमित्यनुत्पादवत् साध्यतावच्छेदकवृत्तिमहानसीयवह्निभिन्नत्ववह्नित्वोभयत्वाद्यनुपस्थितिकाले तदवच्छिन्नेऽ
नवच्छेदकत्वस्य दुर्ग्रहतया सल्लिङ्गकानुमितिविषयासल्लिङ्गकतादृशोभयावच्छिन्नविधेयताकानुमित्यनुत्पादे व्यापकताज्ञानकारणतावादिनामिष्टत्वात्. एवं तेन रूपेणानवच्छेदकत्वग्रहात्तद्रूपावच्छिन्नविधेयताव
च्छेदकताकानुमित्यनुपपत्तिः केवलान्वयिग्रन्थे ग्रन्थकृतैव वक्ष्यते ।· एतत्त्वेन हेतोर्निवेशे हेतुव्यक्तिभेदेन व्याप्तिर्भिन्नेति साच नानुमित्युपयोगिनी पक्षीयधूमादिव्यक्तिव्यापकतायाः पूर्ववत्सत्त्वादवगाहित

सि. व्या. टी. ९

त्वादिति यद्रूपविशिष्टेत्युक्तं तथा च धूमत्वादिरूपहेतुतावच्छेदकधर्मान्तर्विशिष्यनिवेशे तत्तद्रूपावच्छिन्नहेतुकानुमितौ औपयिकव्याप्तिर्निर्वाच्या। महानसादौ धूमवह्न्यादिसहचारग्रहदशायां तद्धूमत्वाद्यवच्छिन्ननिरूपिताया एव पक्षी
यधूमादिसाधारणधूमत्वाद्यवच्छिन्ननिरूपिताया अपि व्यापकताया ग्रहसम्भवात् तद्घटितव्याप्तेः पक्षधर्मधूमे ग्रहादनुमितिनिर्वाह इति भावः। न च सामानाधिकरण्यस्य व्याप्तित्वपक्षे हेतुव्यक्तिभेदेन व्याप्तिभेद आवश्यक एवेत्य
ननुगतरूपेण हेतुनिवेशो व्यर्थ इति वाच्यम्। हेतुव्यक्तिभेदेन व्याप्तिभेदेऽपि अनुगतरूपेण हेतुनिवेशे धूमव्यापकवह्निप्रतियोगिकधूमनिष्ठसामानाधिकरण्यत्वादिना धूमादिनिष्ठसकलसामानाधिकरण्यव्यक्तीनामनुगमात्
सामान्यप्रत्यासत्त्या पक्षीयहेतुनिष्ठव्याप्तेरपि पृथग्ग्रहसम्भवेनानुमित्युपपत्तेः तेन धर्मित्वेन हेतुनिवेशेऽननुगमात्। सामान्यप्रत्यासत्त्यापि पक्षीयहेतुनिष्ठव्याप्तेर्व्यक्तिविशेषेण दुर्ग्रहतयाऽनुमित्यनुपपत्तेः। हेतुतावच्छेदका
श्रयाधिकरणत्वमुपेक्ष्य तद्विशिष्टनिरूपिताधिकरणत्वप्रवेशनप्रयोजनमग्रे वक्ष्यते। प्रतियोगितानवच्छेदकत्वमात्रेण साध्यतावच्छेदकनिवेशे वह्नित्वत्वादिना वह्नित्वादिकमनवगाहमानात् प्रतियोगितानवच्छेद
कवत्समानाधिकरणवानित्यादिज्ञानात् द्रव्यमात्रे साध्यानुमित्यापत्तिः स्यात्। न चेष्टापत्तिसम्भवः। कदाचिद्वह्नित्वेन कदाचिच्च द्रव्यत्वादिना वह्न्यनुमितिनियमानुपपत्तेः। न चानवच्छेदकत्वेन तत्तद्धर्मावगाहित्वस्य
व्याप्तिग्रहस्यानुमितौ विधेयतावच्छेदकतत्तद्धर्मभाननियामकत्वमिति वाच्यम्। अनवच्छेदकत्वेन वह्नित्वादिभाने द्रव्यत्वादिभानस्य प्रायशः सम्भवात्। एवं तत्तत्साध्यतावच्छेदकावच्छिन्नव्यभिचारितया हेतु
ज्ञानस्य हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वमात्रेण तत्तत्साध्यतावच्छेदकावगाहिव्याप्तिज्ञानाविरोधितया विशिष्य साध्यतावच्छेदकानवगाहिव्याप्तिज्ञानस्य हेतुत्वे व्यभिचारस्य हेत्वाभासतानुप
पत्तिश्चेति विशिष्य साध्यतावच्छेदकस्य व्याप्तिघटकतालाभाय प्रतियोगितानवच्छेदकावच्छिन्नेनेत्यस्योक्तप्रतियोगितानवच्छेदको यो धर्मस्तद्धर्मावच्छिन्नत्वेनेत्युक्तम्। यत्र वह्नित्वत्वादिविशेषणावच्छिन्नस्य
तत्र२ साध्यतावच्छेदकता तेन रूपेणैव तद्धर्माणां व्याप्तिघटकता यत्र स्वरूपत एव वह्नित्वाद्यखण्डधर्माणां साध्यतावच्छेदकत्वं तत्रापि विशेषणानवच्छिन्नतत्तद्धर्मघटिततत्तद्धर्मवदितरावृत्तित्वरूपवह्नित्वत्वादिना त
न्निवेशो न तु स्वरूपत एवानवच्छेदकत्वरूपविशेषणपुरस्कारेण भाने निर्विशेषणकभानात्मकस्य स्वरूपतो भानस्यासम्भवात्। वह्न्यादितदाकृतित्वस्य वह्नित्वादिमात्रवृत्तिधर्मान्तरसाधारण्येऽपि तस्मात्र

ज्ञाऽ व्याप्तेरिति रीत्या मिश्रव्याख्यापरिष्कारेपि गौरवमित्युपाध्यायोपदिष्टं नसूच्यत्वात् मपक्षमवलम्ब्य व्याचष्टे. प्रतियोग्यसमानाधिकरणेति. तच्च तन्मूच्यत्वासेन साध्यतावच्छेदके प्रतियोगितावच्छेदकभेदनिवेशेपि धूमवन्हित्वादौ महा
नसीयत्वादिविशिष्टवन्हित्वादिभेदासत्वात् साध्यतावच्छेदके प्रतियोगितावच्छेदकाविषयकप्रतीतिविषयत्वमेव विवक्षणीयम्. तदपेक्षया साध्यतावच्छेदकावच्छिन्नप्रतियोगित्वे तादृशप्रतियोगितावच्छेदकानवच्छिन्नत्वनिवेशप
दैन गौरवमिति भावः. प्रत्येकं घटत्वपटत्वोभयत्वाद्यवच्छिन्नभेदवत्त्वधूमवन्हित्वादेर्महानसीयत्वाद्यन्तर्भावेण पर्याप्तविशिष्टवन्हमात्रीयप्रतियोगितावच्छेदकत्वाद्यवच्छिन्नभेदस्य सुघटत्वात् अवच्छेदकाविषयकप्र
तीतिविषयत्वविवक्षामन्तरेणैव प्रतीकारात्. अवच्छेदकत्वस्य वन्हित्वमहानसीयत्वादिनिष्ठस्य सम्बन्धादिभेदेन भिन्नत्वेपि तत्तत्प्रतियोगितावच्छेदकत्वाद्यनुगतरूपेण व्यासज्यवृत्तितायाश्चैकवर्तिलक्षणे वन्हित्वादेरवच्छेद
कत्वपर्याप्त्यधिकरणत्वमुपपादितवतो दीधितिकारस्याननुगतत्वात्. सार्वभौमैस्तु विशेषधर्मावच्छिन्नप्रतियोगिताकत्वानतिरिक्तसामान्यधर्मावच्छिन्नप्रतियोगितासम्बन्धस्य विशेषरूपेणाव्यासज्यवृत्तेरपि सामान्यधर्मा
वच्छिन्नप्रतियोगितासम्बन्धत्वेनानुगतरूपेण व्यासज्यवृत्तित्वमुररीकृत्यैवोक्तम्. एवं सति महानसीयवन्हिभिन्नत्ववन्हिमान् धूमादित्यादौ साध्यतावच्छेदकमहानसीयवन्हिभिन्नत्ववन्हित्वयोः प्रत्येकं धूमादिसमा
नाधिकरणाभावप्रतियोगितावच्छेदकत्वपर्याप्त्यधिकरणत्वेपि प्रकृतानुमितिविधेयतावच्छेदकतायास्तादृशपर्याप्त्यावच्छिन्नेपर्याप्ता तादृशरूपावच्छिन्नानुयोगिताकावच्छेदकत्वावच्छिन्नभेदस्यैव व्याप्तिघटकत्वोपगमे
ननातिव्याप्तिः. उक्तस्थलीयानुमितिविधेयतावच्छेदकतापर्याप्त्यवच्छेदकदर्शितधर्मद्वयनिष्ठद्वित्वावच्छिन्ने हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वपर्याप्तिमतिविरोधेन तदवच्छिन्नभेदस्य सत्वात्. साध्यतावच्छे
दकवृत्तिवन्हित्वादेरनुपस्थितिदशायां तदवच्छिन्नेऽनवच्छेदकत्वस्य दुर्ग्रहतया पर्वतो वन्हिमानित्यनुमित्यनुत्पादेव साध्यतावच्छेदकवृत्तिमहानसीयवन्हिभिन्नत्ववन्हित्वोभयस्यानुपस्थितिकाले तदवच्छिन्ने
नवच्छेदकत्वस्य दुर्ग्रहतया सन्निकृष्टप्रत्यक्षमविषयासन्निकृष्टत्वतादृशोभयावच्छिन्नविधेयताकानुमित्यनुत्पादेर्व्यापकताज्ञानकारणतावादिनामिष्टत्वे. एवं तेन रूपेणानवच्छेदकत्वग्रहात्तदवच्छिन्नविधेयताव
च्छेदकताकानुमित्यनुपपत्तिः केवलान्वयिग्रन्थे ग्रन्थकृतैव वक्ष्यते।. एतेन हेतोर्निवेशे हेतुव्यक्तिभेदेन व्याप्तिर्भिन्नेति सा च नानुमित्युपयोगिनी पक्षीयधूमादिव्यक्तिव्यापकतायाः पूर्वव[illegible]न्मादवगाहित

क. दी. टी. १

त्वादित्यत्र दूषणविशिष्टेत्युक्तं। तथाच धूमत्वादिरूपहेतुतावच्छेदकधर्मान्विशिष्य निवेश्य तत्तद्रूपावच्छिन्नहेतुकानुमितौ औपयिकव्याप्तिर्निर्वाच्या। महानसादौ धूमवत्त्वादिसहचारग्रहदशायां तद्धूमत्वाद्यवच्छिन्ननिरूपिताया एव पक्षीयधूमादिसाधारणधूमत्वाद्यवच्छिन्ननिरूपिताया अपि व्यापकताया ग्रहसम्भवात् तद्घटितव्याप्तेः पक्षधर्मे धूमे ग्रहादनुमितिनिर्वाह इति भावः।१। नच सामानाधिकरण्यस्य व्याप्तित्वपक्षे हेतुव्यक्तिभेदेन व्याप्तिभेद आवश्यक एवेत्यननुगतरूपेण हेतुनिवेशो व्यर्थ इति वाच्यम्। हेतुव्यक्तिभेदेन व्याप्तिभेदेपि अनुगतरूपेण हेतुनिवेशे धूमव्यापकवह्निप्रतियोगिकधूमनिष्ठसामानाधिकरण्यत्वादिना धूमादिनिष्ठसकलसामानाधिकरण्यव्यक्तीनामनुगमात् सामान्यप्रत्यासत्त्या पक्षीयहेतुनिष्ठव्याप्तेरपि प्रथमं ग्रहसम्भवेनानुमित्युपपत्तेः तत्तद्व्यक्तित्वेन हेतुनिवेशे ऽननुगमात्। सामान्यप्रत्यासत्त्यापि पक्षीयहेतुनिष्ठव्याप्तेर्व्यक्तित्वेन दुर्ग्रहतया ऽनुमित्यनुपपत्तेः। हेतुतावच्छेदकाश्रयाधिकरणत्वमुपेक्ष्य तद्विशिष्टनिरूपिताधिकरणत्वप्रवेशनप्रयोजनमग्रे वक्ष्यते।१। प्रतियोगितानवच्छेदकत्वमात्रेण साध्यतावच्छेदकनिवेशे वह्नित्वत्वादिना वह्नित्वादिकमनवगाहमानानुमितिप्रतियोगितानवच्छेदकवत्सामानाधिकरण्यवानित्यादिज्ञानाद्वह्निमानित्याद्यनुमित्यापत्तिः स्यात्। नचेष्टापत्तिसम्भवः। कदाचिद्वह्नित्वेन कदाचिद्द्रव्यत्वादिना वह्न्यनुमितिनियमानुपपत्तेः। नचानवच्छेदकत्वेन तत्तद्धर्मावगाहित्वस्यैव व्याप्तिग्रहस्यानुमितौ विधेयतावच्छेदकतत्तद्धर्मभाननियामकत्वमिति वाच्यम्। अनवच्छेदकत्वेन वह्नित्वादिभाने द्रव्यत्वादिभानस्य प्रायशः सम्भवात्। एवं तत्तत्साध्यतावच्छेदकावच्छिन्नव्यभिचारितया हेतुज्ञानस्य हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वमात्रेण तत्तत्साध्यतावच्छेदकावगाहिव्याप्तिज्ञानाविरोधितया विशिष्य साध्यतावच्छेदकानवगाहिव्याप्तिज्ञानस्य हेतुत्वे व्यभिचारस्य हेत्वाभासतानुपपत्तिश्चेति विशिष्य साध्यतावच्छेदकस्य व्याप्तिघटकतालाभाय प्रतियोगितानवच्छेदकावच्छिन्नेनेत्यनुक्त्वा प्रतियोगितानवच्छेदको यो धर्मस्तद्धर्मावच्छिन्नेनेत्युक्तम्। यत्र वह्नित्वत्वादिविशेषणावच्छिन्न एव तत्र२ साध्यतावच्छेदकता तेन रूपेणैव तद्धर्माणां व्याप्तिघटकता यत्र स्वरूपत एव वह्नित्वाद्यखण्डधर्माणां साध्यतावच्छेदकत्वं तत्रापि विशेषणानवच्छिन्नत्वे तत्तद्धर्मघटिततत्तद्धर्मवदितरावृत्तित्वरूपवह्नित्वत्वादिना तन्निवेशो न तु स्वरूपत एव। अनवच्छेदकत्वरूपविशेषणप्रकारेण भाने निर्विशेषणकभानात्मकस्य स्वरूपतो भानस्यासम्भवात्। वह्नित्वादितरावृत्तित्वस्य वह्न्यादिमात्रवृत्तिधर्मान्तरसाधारण्येपि तस्यात्र

पुरस्कारेण व्यापकतावच्छेदकत्वग्रहस्यापि वह्नित्वाद्यवच्छिन्नविधेयताकानुमितिहेतुत्वमुपगम्यते सकलवह्न्यादिवृत्तित्वविषयतानिवेशे गौरवात्· सकलवह्न्यादिवृत्तित्वस्य वह्न्यादितरवृत्तिसाधारणतया तस्मात्पुरस्कारेण व्यापकतावच्छेदकत्वग्रहस्य न हेतुतासम्भवः· तथा सति इन्धनादिहेतुनापि वह्नित्वाद्यवच्छिन्नानुमितिप्रसङ्गात्· सकलवह्न्यादिवृत्तिद्रव्यत्वादेरिन्धनादिव्यापकतावच्छेदकत्वसत्त्वात् वह्नित्वादिनिष्ठतत्तद्व्यक्तित्वधूमजनकतावच्छेदकजातित्वादेर्वह्नित्वादिमात्रवृत्तित्वेपि तेन रूपेण व्यापकतावच्छेदकत्वग्रहाद्वह्निमानित्याद्यनुमितेरनुभवविरुद्धा· तेन रूपेणोपस्थिते वह्न्यादौ तत्साधारण्यसंशयेन ज्ञायते तत्पुरस्कारेण व्यापकतावच्छेदकत्वग्रहादेवोक्तानुमित्यनुभवात्· अतएव ज्ञानत्वानुभवत्वव्यापकगुणत्वव्याप्यजातित्वस्य रविशेषेण ज्ञानत्वलक्षणेन व्यापकतावच्छेदकत्वग्रहादात्मा ज्ञानवानित्यनुमितिर्न सम्भवितुमर्हतीति दीधितिकारवक्ष्यमाणदूषणं प्रत्युक्तम्· अधिकमग्रे वक्ष्यामः ।· तत्तद्व्यक्तिसामानाधिकरण्यं न तत्तद्व्यक्तिगमकताप्रयोजकं· पर्वतीयधूमसमानाधिकरणमहानसीयवह्निसामानाधिकरण्याग्रहेपि ततः पर्वते लाघवज्ञानादिवशान्महानसीयवह्न्यनुमितिरिति दर्शयति ।· येन केनापीति [illegible] यावन्निरू ५ति पितेत्याभ्याम्· तत्तद्रूपविशिष्टस्य तत्तत्सर्ववह्नित्वस्य यावन्निरूपिता व्याप्तिरिति ।· तद्रूपावच्छिन्ननिष्ठा तद्धर्मावच्छिन्नयावद्व्यक्तिगमकताप्रयोजिका व्याप्तिरित्यर्थः· यथाश्रुते इन्धनव्यक्तिसामानाधिकरण्यस्यापूर्वव्यक्तिप्रतियोगिकत्वासम्भवेनासङ्गतेः ।· यत्रैकसाधनतावच्छेदकव्यक्तेः सकलहेतुवृत्तितावच्छेदिका तत्रानुगतरूपावच्छिन्नेनापि तेन रूपेण न हेतुव्यापकतासम्भवः· सकलसाध्यतावच्छेदकव्यक्तीनामेव चानतीन्यायेन हेतुसमानाधिकरणतत्तद्व्यक्त्यवच्छिन्नाभावप्रतियोगितावच्छेदकत्वादित्याशङ्काभिप्रायेणापरिहरति ।· दण्डत्वादीति ।· परम्परासम्बन्धेनेति ।· स्वसमवायिसंयोगादिसम्बन्धेन साध्यसम्बन्धित्वार्थः· एतच्च साध्यार्हितेतया दण्डत्वादेर्व्यापकतावच्छेदकत्वासम्भव इत्याशङ्कानिराकरणाय साध्यतावच्छेदकं दण्डिसंयोगादिरूपेण नाना हेतुव्यापकतावच्छेदकमित्यर्थः· एवकारेण दण्डादिहेप्रसक्तदण्डधर्मव्यवच्छेदः· तथा च तत्र प्रतियोगितावच्छेदकत्वस्य दुरुपपादत्वेपि न क्षतिः· दण्डत्वादिनैव प्रकारेण तद्धेतुकदण्डाद्यनुमितेरुपगमस्य सत्त्वात्· व्यापकतावच्छेदकमादेव दण्डादिप्रकारकदण्डानुमितेरुपगमात्· स्वाश्रयघटितपरम्परासम्बन्धेन यत्र धर्मे व्यापकतावच्छेदकत्वग्रहः· तद्विशिष्टधर्मप्रकारेण सामानाधिकरण्यप्रतियोगितया साध्यावगाहि व्याप्तिग्रहस्यैव वा तद्धर्मविशिष्टदण्डादि

तात्प्रयोजक १

रूपधर्मिविषयो बुद्धिरिति विषयतावच्छेदकत्वोपगमेन दण्डिमानित्याद्याकारकानुमितेर्भ्रमभ्रान्यदशायां निर्वाहत्वादिति भावः । अथ महानसीयत्वादिसहितवह्नित्वादेर्धूमादिमन्निष्ठाभावप्रतियोगितावच्छेदकत्वेपि शुद्धवह्नित्वादिरूपसाध्यतावच्छेदकस्य तादृशप्रतियोगितानवच्छेदकत्ववत् तन्त्वादिविशिष्टदण्डस्य तादृशप्रतियोगितावच्छेदकत्वेपि दण्डत्वाद्यवच्छिन्नस्य तादृशप्रतियोगितानवच्छेदकत्वसम्भवेन तथा तस्य व्यापकतावच्छेदकत्वानुपगमो न सङ्गच्छते. न च तद्दण्डी नास्तीति बुद्धौ तन्त्रोपलक्षितदण्डे प्रतियोगितावच्छेदकत्वपर्याप्तिर्भासते ननु तन्त्रासन्नभाव्यं तन्त्रोपलक्षितत्वस्यैवानतिप्रसक्ततया तन्त्रांशस्यावच्छेदकान्तर्भावे गौरवादतो निवेश्यमानवच्छेदकत्वपर्याप्त्यधिकरणतया दण्डत्वविशिष्टस्यानवच्छेदकत्वं दुर्घटम्. महानसीयवह्न्याद्यभावप्रतियोगितायां वह्नित्वादेरतिप्रसक्ततया तन्मात्रेऽवच्छेदकत्वपर्याप्त्यसम्भवेन महानसीयत्वादेरवच्छेदकान्तर्भावस्यावश्यकत्वात् इति शुद्धवह्नित्वादेस्तादृशप्रतियोगितानवच्छेदकत्वं सुघटमिति वाच्यम्. स्वरूपतो भासमानस्यैव स्वरूपतोऽवच्छेदकतायाः सिद्धान्तसिद्धतया समवायेन पदार्थस्य दण्डादेः स्वरूपतोवच्छेदकत्वासम्भवेन दण्डत्वादिविशिष्टस्य व्याप्तिप्रसक्तत्वेन तन्त्रादिरूपविशेषणमनन्तर्भाव्याऽव्यवच्छेदकत्वपर्याप्त्ययोगात्. अभावप्रतियोगितावच्छेदकतया भासमाने उपलक्षणीभूतधर्मान्तरभानोपगमे रूपलक्षणतया दण्डत्वमात्रं तन्त्र[illegible] दण्डावच्छिन्नाभावप्रतियोगितावच्छेदकतया भासमाने दण्डांशे विषयीकृत्य दण्डिमति दण्डी नास्तीति प्रत्ययस्य दुर्वारत्वात्. अत्र केचित् - उक्तानुभवेनैव दण्डत्वादाविव त्वादिपदोपादानम्. आदिपदात् पृथिवीत्वव्याप्यजातित्वादिना नुगतीकृतघटत्वपटत्वमृन्निकात्वपाषाणमयत्वादिमतः समवायादिना पृथिव्यादिहेतुकसाध्यस्य परिग्रहः. समवायेन हेतुभूतपृथिव्यादिमति तत्तत्कपालादौ विशेषणानवच्छिन्नघटत्वाद्यवच्छिन्नाभावस्य सत्त्वात्. सर्वात्मकैव साध्यतावच्छेदकजातिषु तथाविधाभावप्रतियोगितावच्छेदकत्वपर्याप्तेः तत्साध्यव्यापकतावच्छेदकत्वासम्भवेन तदनुगमकोऽन्यधर्मस्यैव परम्परासम्बन्धेन तथात्वोपगमस्यैवावश्यकत्वादित्याहुः । अन्ये तु - तद्दण्डवान्नास्तीत्यादौ प्रतियोगिविशेषणतया भासमाने दण्डादौ स्वावच्छिन्नप्रतियोगितानवच्छेदकत्वपर्याप्तिर्भासते तद्विशेषणत्वादेस्तु तदवच्छेदकत्वमेव प्रतियोगिताव्यधिकरणस्य तदवच्छेदकत्वासम्भवेन तदन्तर्भावेण तदवच्छेदकतापर्याप्त्यसम्भवेन तदन्तर्भावेणावच्छेदकतापर्याप्त्यभानात्. अन्यथा दण्डत्वमवच्छेदकत्वमेवञ्च स्वस

३.१ तत्तानवच्छिन्नावच्छेदकत्वं निवेशनीयमिति तत्तामः सावच्छिन्नभासमानतावच्छेदकव्यभिचारित्वमिति प्रसङ्गात्. १

दा-४

नु. ४ कम्बुग्रीवादिमान्नास्तीति प्रतीतिविषयावच्छेदकतांशे भ्रमत्वे वेलक्षण्ये तत्र परम्परया सामानाधिकरण्यसम्बन्धेन महानसीयत्वविशिष्टवह्नित्वादेः
प्रतियोगितावच्छेदकतात्तत्स्थलीयव्यभिचारिधूमादिहेतावतिव्याप्तेरिति स्वविशिष्टत्वादिना निर्वाच्यं पारिभाषिकमेवावच्छेदकत्वं निवेशनीयं तदभ्यलक्षणे यादृश

प्रतीतेर्वच्छेदकत्वं तत्तत्ववदेनास्त्येवातो दण्डादेरनवच्छेदकत्वं दुर्घटम्· महानसीयवह्निर्नास्तीत्यादौ महानसीयत्वादेः प्रतियोगित्वेन विशेषणतयाभानान्न तदभावेऽपि प्रतियोगितावच्छेदकत्वपर्याप्तिभासत प्रतीतिवि
षयः। अथ वह्नित्वादंशे सामानाधिकरण्यसम्बन्धेन विशेषणतया महानसीयत्वादिकमवगाहमाना महानसीयत्वविशिष्टवह्नित्ववान्नास्तीत्याद्याकारिकायाः प्रतीतेस्तत्र तुल्ययुक्त्या वह्नित्वादावेव
प्रतियोगितावच्छेदकत्वपर्याप्तिविषयतया वह्नित्वादेरप्यनवच्छेदकत्वं दुर्घटं स्यात् यदि च वह्नित्वादेः प्रतियोगितायां सामानाधिकरण्यसम्बन्धेन च महानसीयत्वादेस्तदवच्छेदकतायामवच्छेदकत्वेऽगो
वा महानसीयत्वादिसहितस्य वह्नित्वादेः प्रतियोगितायामेवावच्छेदकत्वं प्रतीतिसिद्धं तदवच्छिन्नत्वमेव शुद्धवह्नित्वादेरपि दुर्घटं· तथा चावच्छेदकं यादृशं स्वं तादृशाविषयकप्रतीतिविषयत्वमेवानवच्छे
दकपदेनाविवक्षणीयम्· तथासति सखण्डस्वदण्डादेः स्वरूपतोऽभासानान्नाविशेषणविशिष्टस्य यावच्छेदकलक्षणस्वपदेनोपादेयतया तन्निष्ठविषयताविषयकप्रतीतिविषयत्वस्य दण्डत्वादिवि
शिष्टस्य सुघटत्वात् व्यापकसमव्याहृते मैवोतन्नव्य· पारिभाषिकावच्छेदकत्वस्य स्वस्वघटितत्वेनानुगतस्याभावकूटज्ञानासम्भवेन प्रतियोगितायाः स्वरूपसम्बन्धरूपावच्छेदकत्वस्यागत्या ग्रहणम
साधारण्यभङ्गीत्यत्र व्याप्तिलक्षणे तदेव हि निवेशनीयम्· स्वत्वञ्च सामानाधिकरण्यसम्बन्धेन महानसीयत्वादिविशेषणावच्छिन्नस्य वह्नित्वादेर्हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वेऽपि महानसी
यत्वविशिष्टस्वरूपेऽपि न समवायादेरेष प्रतियोगितावच्छेदकताघटकसम्बन्धत्वं तत्रोपेयते शुद्धसमवायादिनो वह्नित्वादेः इत्ययमन्तसान· शुद्धसमवायादेस्तदवच्छेदकतावच्छेदकसम्बन्धत्वे
महानसीयत्वादिसामानाधिकरण्येनापत्तिक्षिप्तवह्नित्वाद्यवच्छिन्नाभावो न हि भिन्नवह्नित्वाद्यवच्छिन्नाभावस्यैव लक्षण्यमुपपत्तेश्च· तथा च साध्यतावच्छेदकताघटके शुद्धसमवाये नाऽखण्डवह्नि
त्वादेरनवच्छेदकत्वं न दूषणम्· तच्च महानसीयत्वादिसामानाधिकरण्यस्य यत्रोपलक्षणता तत्र तस्यावच्छेदककोटौ न प्रवेशः यत्र विशेषणत्वं तत्र तत्प्रवेशः दुस्त्यजवैलक्षण्यमितिवाच्यम्·
उपलक्षणीभवतानात्र्धर्मावच्छिन्नप्रतियोगिताभाववृत्तावपि तद्रूपस्य प्रतियोगितावच्छेदकांशे प्रकारतयाभानात् तत्रावच्छेदकतावच्छेदकत्वभानस्यावश्यकतयाऽवच्छेदकधारी
का

स्वरूपपदार्थस्य निवेशस्तादृशावच्छेदकं च महानसीयत्वविशिष्टस्य वह्नित्वादेस्तत्स्वरूपदेनोपादान समवायादिविशिष्टवह्नित्वादिकमेव पारिभाषिकावच्छेदकं नु. ४

सिद्धान्त. गा. ८४

१७

५१४

प्रा२

एप्रवेशहृत्योपलक्षणतया ऽपलक्षणविधया ऽवच्छेदके तत्रासम्भवात् यद्रूपलक्षितनिरूपितसमवायादेरवच्छेदकताघटकसम्बन्धत्वं तस्योपलक्षणतयावच्छेदकत्वं यद्विशिष्टनिरूपितसमवायादेरवच्छेदकताघटक
सम्बन्धत्वं तस्य विशेषणविधयावच्छेदकत्वमित्यस्यैव विवक्षितत्वात् एकत्वप्रागभावविशिष्टघटादेः संयोगादिसम्बन्धेनाभावस्य प्रतियोगितामप्रसिद्धतया विशिष्टनिरूपितसंयोगादेरवच्छेदकत्वासम्भवेनाग
त्या विशेषणविधया प्रतियोगितावच्छेदकत्वस्यान्यथैव वैलक्षण्यस्योपपादनीयतया शुद्धसमवायादेरेव विशिष्टसत्ताद्यभावप्रतियोगितावच्छेदकसम्बन्धतया तादृशाभावस्य तादृशसम्बन्धेन प्रति
योगिसमानाधिकरणतया दीधितिकृतां प्रतियोगितावच्छेदकविशिष्टसामानाधिकरण्यपर्यन्तनिवेशव्याकृतिसङ्गतिः आकृतविशिष्टनिरूपितसमवायत्वादिना प्रतियोगितावच्छेदकताघटकस
म्बन्धता तथापि महानसीयत्वादिसामानाधिकरण्योपलक्षितवह्नित्वादेः तद्विशिष्टवह्नित्वादेश्च प्रतियोगितयोः वैलक्षण्यम् आद्या तद्रूपावच्छिन्नविशेष्यतापर्याप्ता अन्या च विशेषणविशेष्य
भावापन्नयोर्धर्मधर्मिणोर्द्वयोः पर्याप्ता इत्येवं रीत्यैवोपपादनीयम् तावताप्यखण्डस्य शुद्धवह्नित्वादेर्धूमनिष्ठाभावप्रतियोगितावच्छेदकत्वमुपपद्यते धर्मान्तरोपलक्षितवह्नित्वा
द्यवच्छिन्नाभावस्य धूमादिमत्यवृत्तेः विशिष्टवह्नित्वाद्यवच्छिन्नाभावप्रतियोगितावच्छेदकतायाश्च विशेषणान्तर्भावेन विशेष्येव पर्याप्तेः तन्नोपलक्षितदण्डावच्छिन्नप्रतियोगिताव
हे धूमनिष्ठाभावप्रतियोगितावच्छेदकता सत्तावच्छिन्नाशुद्धविशेष्य एव पर्याप्ता साध्यतावच्छेदकताघटकशुद्धसंयोगावच्छिन्ना चेति तादृशसम्बन्धेन दण्डादेस्तादृशाभावप्रतियोगिता
नवच्छेदकत्वं दुरुपपादमिति [illegible] वस्तुतो गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वे पारिभाषिकेदानवच्छेदकत्वं तिरोभावनीयम् तच्छरीरे यादृशधर्मस्य निर्विषयं तादृशधर्मभेद इति
वेऽपि वह्नित्वादौ विशिष्टवह्नित्वादिभेदासत्त्वेन तादृशधर्मो विशिष्यकप्रतीतिविषयत्वं निवेशनीयमिति यो रवमतेः प्रतियोगितावच्छेदकं यादृशाभावादृशरूपं तत्तादृतीतिन्न हीनत्वं स्व
विशिष्टसम्बन्धेनाधिकस्याभावप्रतियोगितावच्छेदकतत्स्वरूपमेवानवच्छेदकान्तेन विवक्षणीयं तथाच सर्वासामेव दण्डादिव्यक्तीनां हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदक

व

६ न

९२

तथा कस्यचिद्दण्डादिव्यक्तेः [redacted] र्यावत्प्रतियोगितावच्छेदकानितिरिक्तवृत्तित्वं स्वस्य स्वानितिरिक्तवृत्तित्वविरहात् इत्यखण्डधर्मस्य व्यापकतावच्छेदकत्वानुसरणम्। एतन्मते कोऽप्यभिप्रा
येण यथाश्रुतमूललक्षणमुपपादयन्त्यार्वाचीनमपुष्टीतिमतमनुसरत्त्यैकोऽस्यनादरेऽप्यनुगतरूपेण नानाव्यक्तिविधेयतावच्छेदकानुमितौ पक्षिकव्याप्तिर्येद्रूपावच्छिन्नसमनवच्छेदकं यद्रूपं वच्छे म २
दकतानवच्छेदकं तद्रूपविशिष्टावच्छिन्नसामानाधिकरण्यं तद्रूपविशिष्टावच्छिन्ननिरूपितव्याप्तिरित्येवंरीत्या निर्वचनीया। तथा सति दण्डिसंयोगादिहेतुकापि दण्डिमानयमित्याकारकानु
मितिर्विशेषदर्शिनामपि निर्वहति। एवमेकोऽस्य प्रतियोगितावच्छेदकोऽप्यभावघटितताया ग्रन्थकारेण स्वयमुपदर्शितोऽयमव्याप्तेरपि दण्डत्वादिविशिष्टदण्डाद्यवच्छिन्ननिरूपितत्व
निर्वाहः। हेतुसमानाधिकरणविशेषाभावप्रतियोगितायां दण्डत्वपृथिवीत्वव्याप्यजातिमत्त्वादिविशिष्टावच्छेद्यत्वाभावस्याग्राहितत्वात् दण्डादिसामान्याभावप्रतियोगितायामेव तद्धर्मविशिष्ट
निरूपितविलक्षणावच्छेद्यत्वसत्त्वादित्यर्थः। इत्थञ्चेति। हेतुतावच्छेदकोपलक्षितहेतुसामानाधिकरण्यसाधारणरूपमुपेक्ष्य विशिष्टसामानाधिकरण्यत्वेन सामानाधिकरण्य
निवेशने तच्चेत्यर्थः। नाव्याप्तिरिति। न विशिष्टसत्ताद्यरूपहेतुतावच्छेदकविशिष्टवैशिष्ट्यावगाहिज्ञानजन्यानुमितौ पक्षिकव्याप्त्यनिर्वाहः। विशिष्टसत्तात्वाद्युपलक्षितहेतुमत्ता
ज्ञानजन्यानुमितौ पक्षिकव्याप्तौ तु तदुपलक्षितहेतुसामानाधिकरण्यमेव निवेश्यतेऽतो द्रव्यत्वाद्यभावे तादृशहेतुसामानाधिकरण्यसत्त्वात्तादृशहेतौ न द्रव्यत्वादिव्याप्तिरित्यधुनातनां गुणादौ विशिष्टांस
त्त्वाद्युपलक्षितहेतुमत्ताज्ञानसम्भवेऽपि न तत्तद्द्रव्यत्वाद्यनुमित्यापत्तिः। यत्र घटपटवृत्तिसंयोगत्वादिना हेतुता घटपटान्यतरत्वं साध्यं तत्रोभयवृत्तित्वविशिष्टाधिकरणाप्रसिद्ध्या हेतुता
वच्छेदकोपलक्षितहेतुसामानाधिकरण्यगर्भं व्याप्त्यन्तरमवश्यं स्वीकरणीयम्। अन्यथा तद्धेतुकतत्साध्यकानुमित्युच्छेदप्रसङ्गात्। एवं ईदृशव्याप्त्यन्तरानभ्युपगमे साध्यहेतुकानुमिति
त्पत्तिः स्येत। तद्धेतुसामानाधिकरण्यं तद्वृत्तित्वरूपसाध्यत्वविशिष्टाधिकरणाप्रसिद्ध्या विशिष्टाधिकरणतागर्भव्याप्त्यसम्भवात्। अथैवं विशिष्टवैशिष्ट्यावगाहिज्ञाने विशिष्टबुद्धि

सहित

रूपितसमवायादेः सम्बन्धतया तेन सम्बन्धेन व्याप्तिः। हेतुतावच्छेदकसम्बन्धेन हेतुमत्त्वस्याग्रे विवक्षणीयत्वान्निर्वहतीति कथमत्र विशिष्टपदोपादानम्। ननु विशिष्टवैशिष्ट्यबोधे विशिष्टनिरूपितसमवायत्वा
दितो न सम्बन्धता। अपि तु शुद्धस्यैव समवायादेर्विशेषणसम्बन्धः। स्वविशिष्टनिरूपितसमवायादिस्तु विशेषणतावच्छेदकसम्बन्ध इति मताभिप्रायेणेदमन्यथा चोक्तस्थलेऽपि हेतुतावच्छेदकसम्बन्धः
शुद्धसमवाय एवेति हेतुतावच्छेदकसम्बन्धस्यात्र विवक्षया न प्रतीकार इति वाच्यम्। हेतुतावच्छेदकविशिष्टवैशिष्ट्यज्ञाने हेतुतावच्छेदकस्य पक्षे परम्परासम्बन्धभानानियमे व्यापकताशरीरघट
काभावाधिकरणेऽपि तद्घटितादृशसम्बन्धस्य निवेशात्। तत्सम्बन्धहेतुतः पक्षे साध्यानुमितिर्निर्वाहे। विशिष्टसत्तात्वेन सत्त्वादेर्द्रव्यत्वादिव्याप्तिस्वीकारस्य निरर्थकतापातात्। ननु दर्शितरीत्या विशिष्ट
व्यापकताग्रहस्य विशेषणव्यापकतावगाहित्वेऽपि विशिष्टे पक्षधर्मताग्रहस्य विशेषणे तदवगाहित्वेऽपि च विशिष्टहेतुपरामर्शस्य विशेषणे साध्यसामानाधिकरण्यावगाहित्वानियमात्तु विशेषणहे
तुकानुमितिसामग्र्या विशिष्टहेतुकानुमितिपूर्वमावश्यकत्वेति वाच्यम्। साध्ये विशिष्टहेतोर्व्यापकताग्रहेऽपि विशिष्टहेतौ साध्यविरोधग्रहसत्त्वेऽनुमित्यनुत्पत्त्या विशिष्टहेतुकस्थले विशिष्टाधिकरणताघटि
तसाध्यहेतुसामानाधिकरण्यविषयकस्यैव परामर्शस्यानुमितिहेतुता वाच्या। अन्यथा विरोधस्य जनकज्ञानाविरोधितया हेत्वाभासतादृशत्वप्रसङ्गात्। तथा च साध्यवति विशिष्टहेत्वधिकरणत्वभाने विशेषणपर
म्परासम्बन्धस्यापि तत्रापि भानानियमे न विशिष्टहेतुपरामर्शस्य नियमतो विशेषणेऽपि साध्यसामानाधिकरण्यावगाहित्वात्। मैवं। विशिष्टनिरूपितव्यापकताशरीरे विशेषणस्य धर्मिपारतन्त्र्येणैव वि
शिष्टाधिकरणविशेषणतया प्रवेशः। न तु स्वातन्त्र्येणैव। तथा च तद्ग्रहे न विशेषणव्यापकतावगाहित्वनियमो निर्वहति। विशेषणनिरूपितव्यापकतायास्तु वह्निनिष्ठाभावप्रतियोगितावच्छेदकत्वल
घयोप्रप्रतियोगितावच्छेदकताकाभावघटितत्वात् विशिष्टवह्निनिष्ठाभावप्रतियोगितावच्छेदकत्वरूपप्रतियोग्युपरागेणाभावभाने च विशिष्टवत्त्वान्तर्गतविशेष्यापरित्यागेन विशेषणवह्निनिष्ठाभाव
प्रतियोगितावच्छेदकत्वेऽपि प्रतियोगितावच्छेदकत्वपर्याप्तिमात्रासम्भवात्। अभावप्रतियोगिप्रकारघटकस्योपलक्षणतया भानानुपगमात्। न च परम्परासम्बन्धेन विशेषणनिष्ठव्याप्त्यवगाहिपरा

मथनिष्ठकारणताया उभयवादिसिद्धत्वात् विशिष्टहेतुकपरामर्शान्तरकारणताकल्पनप्रयुक्तलाघवानुरोधेन विशिष्टस्य व्याप्तिग्रहस्थले अधिकरणेत्वात् तन्त्रेण विशेषणभानमुपगम्य विशेषणेऽपि व्याप्तिज्ञानं कल्पनीयमिति
वाच्यम्. श [illegible] ब्धीनां विशिष्टवत्व[illegible] गर्भव्याप्तिग्रहे स्वातन्त्र्येण विशेषणत्वागर्भव्याप्तिभानानियमात् तादृशव्याप्तिबोधकशब्दस्य स्वातन्त्र्येण विशेषणवत्त्वाभासकत्वात्. अथ तत्र तदुत्तरं विशेषणे मानसव्या
प्तिग्रह एवानुमित्यर्थं कल्प्यते तत्कारणतायाः क्लृप्तत्वादिति चेन्न. एवं सति दण्डाद्युपलक्षितधर्मिहेतुकानुमितिविलयप्रसङ्गात्. तद्धेतुकव्याप्तिग्रहस्थले पारम्परासम्बन्धेनोपस्थितदण्डादेर्व्याप्तिग्रहस्य कल्पनासम्भवात्.
स्वातन्त्र्येण परम्परासम्बन्धघटकसम्बन्धविशेषणतानाग्रहस्याप्रामाणिकतया विशेषणहेतुकपरामर्शस्य कारणतायाः क्लृप्तत्वासम्भवाच्च।। ननु वह्निप्रतियोगिकसंयोगिसंयोगात्मकसाध्यसामानाधिकरण्यस्य
व्याप्तित्वे एकैव हि सा व्याप्तिरिति मूलग्रन्थविरोधः महानसपर्वतादिनिष्ठधूमादिगतवह्निसंयोगिसंयोगादेरैक्यासम्भवादित्यत आह।। सामानाधिकरण्यघटकीभूतमिति।। भेदेऽपीति।। अधिकरणभेदेन धूमादिभेदे सत्येवेत्यादिः
निरूपकतावच्छेदकं वह्नित्वादि। प्रतियोगितावच्छेदकम्। अधिकरणतावच्छेदकं धूमत्वादिरूपहेतुतावच्छेदकं तदैक्यात् साध्यहेतुभेदेऽप्यभेदात् तदभेदतात्पर्येणैक्यव्यवहार इति भावः. ननु लक्षणघटकाहारसम
र्थेन सम्बन्धेन सामान्यप्रत्यासत्त्यभावपक्षे विशिष्टपरामर्शनिर्वाहार्थं व्याप्तेः कथमानदनिर्वाहः एव. सामानाधिकरण्यस्य व्याप्तित्वे धूमत्वादेरैक्येऽपि पक्षीयधूमा[illegible]दिनिष्ठसामानाधिकरण्यस्य सामान्यप्रत्यासत्तिं वि
नापूर्वं ग्रहासम्भवेन तत्स्मरणासम्भवात्. पक्षीयधूमे तदुपनयासम्भवेनायोगात्. अतोऽग्रेऽतिप्रसङ्गः न धूमादिव्यापकवह्न्यादिसामानाधिकरण्यमात्रस्य व्याप्तित्वासम्भवाद्धूमत्वादिरूपहेतुतावच्छेदकस्य द्विधा व्याप्तिग्र
हीरप्रवेशस्यावश्यकत्वं दर्शयन् व्याप्तेर्भेदमभेदं चावधारयति।। वस्तुतस्त्वित्यादिना।। प्रथमपक्षदर्शितं तत्पक्षे धूमसत्ताघटकत्वेनावबोधेन सामान्यप्रत्यासत्तिपक्षे तन्नऽज्ञानविषयानुमितौ हेतुत्वमिति सूचनाय।। रासभादि
साधारण्यादिति।। तत्साधारण्यं च धूमं विनापि रासभादिलिङ्गकवह्न्यनुमानापत्तेरिति भावः. अथ[illegible] व्यापकताप्रविष्टहेतुतावच्छेदकधर्मितावच्छेदकसामानाधिकरण्यप्रकारकज्ञानस्यैवानुमितिहेतुत्वेऽप
गमानाम्[illegible]यमतिप्रसङ्गः धूमत्वादिप्रकारेण भासमाने रासभादौ साध्यसामानाधिकरण्यग्रहस्य धूमत्वावच्छेदेन भ्रमत्वनियमात्. वक्ष्यमाणं धूमत्वादिमन्निष्ठवह्न्यादिसामानाधिकरण्यस्य व्याप्तित्वेऽपि धर्मिताव
च्छेदकतापन्नहेतुतावच्छेदकविशिष्टवत्ताज्ञानस्य हेतुताया अवश्योपेयत्वात्. अन्यथा हेतुतावच्छेदकविशिष्टतायाः कारणतावच्छेदकत्वे विशिष्टसत्त्वादिव्यापकद्रव्यत्वादिति कल्पितसत्त्वादिनिष्ठसामानाधिक

सि॰ कु॰ टी॰

५

रण्यस्योपलक्षितत्वत्ताज्ञानान् गुणादिपक्षे ऽभ्रान्तस्य द्रव्यत्वाद्यनुमानापत्तेः । सामानाधिकरण्यविशिष्टत्वस्य पक्षे साध्यनिश्चयं विना दुर्निश्चेयतया तदुपलक्षितत्वनिश्चयस्यापि अनुमितिहेतुताया उपगन्तव्यत्वात् । केवलसामानाधिकरण्यप्रकारेण पक्ष-
धर्मताज्ञानस्यानुमितिहेतुत्वे धूमाभाववान्पक्ष इत्याद्यसिद्धिज्ञानदशायामपि साध्ये धूमादिव्यापकताज्ञानादनुमित्यापत्तेश्च । असमानप्रकारतया धूमाभाववान्पक्ष इत्यादिबुद्धेः धूमवृत्तिसामानाधिकरण्यवान्पक्ष इत्यादिज्ञानाविरोधित्वादिति चेत्
सत्यम् । धूमत्वादिमति साध्यसामानाधिकरण्यमित्यस्य धूमत्वादिविशिष्टविशेषणतापन्नसामानाधिकरण्यमित्यर्थो न तु धूमादिवृत्तित्वविशेषितं सामानाधिकरण्यमिति । तथा चैकधर्मविशेषणतापन्नधूमत्वादिरूपहेतुतावच्छेदकसाध्य-
सामानाधिकरण्योभयं व्याप्तिरिति पर्यवसितम् । कारणञ्च धूमव्यापकवह्निसमानाधिकरणधूमवान्पर्वत इत्यादिरेव परामर्शः । तावतैवोक्तोभयस्य हेतुविशेषणतया अनुमितिजनकज्ञानविषयत्वरूपव्याप्तिनिर्वाहः । द्वितीयपक्षे च
धूमव्यापकवह्निसमानाधिकरणवृत्तिधूमत्ववद्धूमवान्पर्वत इति ज्ञानं हेतुर्न तु स्वरूपतो धूमत्वाप्रकारकं तादृशधूमत्ववान्पक्ष इत्याकारकं । तादृशज्ञानस्य धूमाभाववान्पक्ष इत्याकारकज्ञानाप्रतिबध्यत्वात् । एतन्मते च हेतुतावच्छे- त ४
दकरूपस्य साधारणधर्मावच्छिन्नस्य साध्यसमानाधिकरणवृत्तित्वमेव विरोधः न तु हेतुतावच्छेदकावच्छिन्ने साध्यसामानाधिकरण्यम् । उपदर्शितज्ञानस्य हेतुतावच्छेदकं धर्मितावच्छेदकीकृत्य साध्यसामानाधिकरण्यानव-
गाहितया तथाविधविरोधिज्ञानाप्रतिबध्यत्वात् । यदि विरोधस्यानुमितिं प्रति साक्षाद्विरोधितया हेत्वाभासत्वमुपपादयितुं शक्यते । तदा समानाधिकरणवृत्तित्वांशे निर्धर्मितावच्छेदके समानाधिकरणवृत्तिमद्धूमवान्पक्ष
इत्येतादृशस्यापि ज्ञानं हेतुरुपेयते । अन्यथा धूमत्वत्वादिविषयतायाः कारणतावच्छेदककुक्षिप्रवेशगौरवात् । सामानाधिकरण्यप्रकारत्वापेक्षया सामानाधिकरण्यवृत्तिप्रकारत्वस्य गुरुत्वेऽपि सामानाधिकरण्यप्रत्यासत्तेस्तत्वे
विशिष्टपरामर्शे भिन्नवीहेतुके येन तेन रूपेण हेतुताया अङ्गीकारात् । आद्या । हेतुतावच्छेदकधर्मे सहित सामानाधिकरण्यरूपा । भिन्नेति । प्रतिधूमादिकमित्यादि । द्वितीया । समानाधिकरणवृत्तिहेतुतावच्छे-
दकरूपा । अभिन्ना । सर्वधूमसाधारणी । अनुगतरूपावच्छिन्नतासामान्ये दण्डादिहेतुतावच्छेदकस्थलेऽपि परम्परासम्बन्धदण्डत्वाद्यखण्डधर्मस्यैव हेतुतावच्छेदकउपगन्तव्य इति भावः । यद्यपि साध्यसा-
मानाधिकरण्यावच्छेदकरूपवक्ष्यमाणव्याप्त्यभिप्रायेण एकैव हीत्यादिग्रन्थः सङ्गच्छते । तथापि तत्र स्वरूपसम्बन्धरूपावच्छेदकत्वप्रवेशस्य खण्डनीयतया स्वविशिष्टाधिकरणवृत्ति यावत्साध्यसमानाधिकरणकत्व

हत्पन्नाशिभाविकावच्छेदकत्वस्यैव विवक्षणीयतया इत्तदपेक्षया लाघवं व्याप्तिर्गृहीतेति कथञ्चिन्नादृशव्याप्तेरैक्योपपत्तिः सम्भवेदत । ज्ञानमनुमितिहेतुरिति इत्तादृशव्याप्तेरैक्यमुपपादितं॥ मिश्रादिमतमवलम्ब्य प्रतियोग्यसमाना
धिकरणपदप्रयोजनमाह ।। अयं कपीति ।। अथैतद्वृक्षत्वादेरपि अव्याप्यवृत्तिकपिसंयोगादिव्याप्यत्वापत्तेः कपिसंयोगाद्यनवच्छेदकमूलादेः पक्षतावच्छेदकत्वे तदवच्छेदेनाप्येतद्वृक्षत्वादेः कपिसंयोगादिसिद्धिप्रसङ्गः॥ नचे
ष्टापत्तिः॥ सविशेषपरामर्शस्यैव प्रमानुमितिजनकत्वनियमात् नच तदवच्छेदेन हेतुमत्ताज्ञानस्य तदवच्छेदेन साध्यानुमितिहेतुत्वादेतद्वृक्षत्वादिरूपव्याप्यवृत्तिहेतौ। किञ्चिदवच्छेदेनाक्षेपेनातिप्रसङ्ग इति वाच्यम् यदि ह्येवमुपस
म्बन्धरूपावच्छेदकतावगाहिन्यामनुमितावपि तादृशहेतुमत्ताज्ञानत्वेन हेतुत्वमुपेयते. तदापि तुल्ययुक्त्या एतद्वृक्षत्वादेरिव मूलावच्छिन्नसंयोगाभिधेयस्य साध्ये कपिसंयोगादिव्याप्यतया तेन हेतुना मूलाद्यवच्छेदेन कपिसं
योगाद्यनुमितेर्निष्प्रत्यूहत्वादिति चेन्न। अत्रोपाध्यायाः॥ साध्यस्य पक्षतावच्छेदकसामानाधिकरण्यं विना व्याप्यस्य पक्षधर्मत्वमनुपपन्नमिति पक्षधर्मतावलात्पक्षतावच्छेदकसामानाधिकरण्यमेव साध्यस्य सिध्यति न तु तदवच्छेद
त्वमपि प्रमाणाभावादिति तादृशानुमितेरप्रामाणिकतया तद्रूपपरामर्शहेतुताकल्पनमेव नास्तीति न तदापत्तिरिति समादधीरे॥ मिश्रास्तु बाधानवतारे मूलावच्छेदेन कपिसंयोगादिसिद्धिरिष्टैवेति वदन्ति ।। एतत्सर्वं ग्रन्थ
कृता हेत्वाभासे वक्ष्यते ।। प्राचीनसिद्ध[illegible]व्याप्तिस्थलं दर्शयितुमुपक्रमते ।। यत्रेति ।। तत्र असमानाधिकरणत्वम् । ननु द्रव्ये संयोगत्वावच्छिन्नाभावस्यैवावच्छेदकगर्भितलक्षणाव्याप्तिः प्रसज्यते न द्रव्यत्व
वृक्षादौ संयोगावच्छेदकभागाप्रसिद्ध्या तत्सामान्याभावावच्छेदकस्य दुर्लभत्वादित्यत आह ।। संयोगस्येति ।। वृक्षत्वावच्छेदेनेति ।। वृक्षत्वादेः प्रत्येकं सकलसंयोगातिप्रसक्तत्वात्तस्य संयोगावच्छेदकत्वासम्भवात् आ-
काशादिसंयोगस्यापि यावद्वृक्षेष्वनेकस्याभावाद्वृक्षत्वे तत्संयोगानतिप्रसक्तत्वासंभवादिति भावः॥ ननु वृक्षत्वावच्छेदेन वृक्षादिसंयोगसामान्याभावसत्त्वे (वृक्षे महद्द्रव्यत्वरूपवन्मात्रसमवेतसंयोगसामान्य) वृक्षे संयोगो
नास्तीति प्रत्यक्षापत्तिरित्यत आह ।। तत्रेति ।। अतीन्द्रियस्येति ।। अतीन्द्रियप्रतियोगिकतया संयोगसामान्याभावस्यातीन्द्रियत्वादिति भावः॥ ननु संयोगसामान्याभावस्य वृक्षेसत्त्वे महद्द्रव्यत्वरूपवन्मात्रसमवेतसंयोगसामान्याभावो
प्यावश्यकः तद्व्यापकधर्मावच्छिन्नाभावस्य तद्धर्मावच्छिन्नाभावनियमादिति योग्यमात्रप्रतियोगिकोयमभावः कथं न वृक्षे साक्षात्क्रियत इत्यत आह ।। पवित्र इति ।। प्रतियोग्युपलम्भेति ।। भिन्नावच्छेदेनाभावग्रहं

प्रतिविरोधिज्ञानमुद्रयाप्रतिवन्धकत्वेन सम्भवतीति तस्यादोषत्वकथनं दोषविषयाप्रतिवन्धकताला भाय ।। अथ संयोगाविषय[illegible]कत्वेवोपनीतभानात्मकं वृक्षादिरूपाधिकरणज्ञानं तदग्रिमक्षणे वृक्षादौ तादृशसंयोगसा
मान्याभावग्रहप्रसङ्गः तादृशदोषस्य प्रागसत्वात् एवं वृक्षे न संयोग इति लौकिकप्रत्यक्षस्यालीकतया तत्र तादृशदोषस्य प्रतिवन्धकत्वकल्पनमेव नावश्यकमिति चेन्न । वृक्षादौ संयोगसामान्याभावलौकिकप्रत्यक्षस्याप्रसि
द्धत्वेपि गुणादौ तत्प्रसिद्ध्या ऽधिकरणीयविषयतासम्बन्धेन संयोगाभावविषयकलौकिकप्रत्यक्षत्वावच्छिन्नं प्रति स्वविषयसंयोगवत्वसम्बन्धेन प्रत्यक्षत्वेनैव प्रतिवन्धकताकल्पनात् सर्वत्र द्रव्ये ऽन्तत ईश्वरीयप्रत्यक्षस्यैव स
त्वेदा तादृशसम्बन्धेनैव सत्वेनातिप्रसङ्गविरहात् ।। द्रव्यमापातत: ।। द्रव्यरूपाधिकरणविषयकसंयोगाभावविषयकप्रत्यक्षस्य कदाचिदप्यनुदयेन तादृशप्रत्यक्षसामग्र्या एवाकल्पनेनापादकाभावादेवातिप्रसङ्गवारणस
म्भवेन तादृशप्रतिवन्धकताकल्पनस्यायुक्तत्वात् कथञ्चिदापत्तिसम्भवे तादात्म्यसम्बन्धेन द्रव्यत्वेनैव तादृशसम्बन्धेन संयोगाभावलौकिकप्रत्यक्षं प्रति प्रतिवन्धकत्वौचित्यात् ।। मानाभावादिति ।। लौकिकप्रत्यक्षस्य यो
ग्यानुपलब्धिविरहेणासम्भवादुपपत्ती तस्मात्तस्य संयोगाभावो वृक्षावृत्तिरित्याकारकस्य विपरीतविषयकस्याप्युपनयवशेन संभवात् । विनिगमनाविरहेणैकतरस्यापि प्रामाण्यसिद्धेः शब्दस्य चाप्रामाण्यात्तासिद्धा
तद्व्यवस्थापकत्वात् अनुमानस्य च लिङ्गाभावेनासम्भवादिति भावः ।। ननु वृक्षादौ यावत्संयोगविशेषाभावानामनुभयवादिसिद्धतया तत एव हेतोस्तत्राप्रत्यक्षस्यापि तत्सामान्याभावस्य सिद्धिर्निष्प्रत्यूहैवेति भा
वं निरस्यति ।। न चेत्यादिना ।। यः संयोगी यावद्विशेषाभाववान् स संयोगसामान्याभाववानिति व्याप्तिग्रहे व्यर्थविशेषणाप्रयोजकत्वादिदोषेण निराकरणीयतया प्रथमत: सामान्यमुखी व्याप्तिमनुमानोप
[illegible]कतया दर्शयति ।। यावदीयेति ।। यद्धर्माश्रययावद्विशेषाभाववानय: स तद्धर्मावच्छिन्नाभाववानिति तात्पर्यं । संयोगत्वाश्रयविशेषधर्मावच्छिन्नाभावकूटो वृक्षादौ वर्तत इति ऽन्वयव्याप्तेस्तत्र संयोगत्वावच्छिन्नाभावसिद्धि: ।। प्रतियोगि
नो यत्तत्वेन निवेशे संयोगवृत्तिकपि संयोगत्वादिरूपसामान्यधर्मावच्छिन्नाभावमादाय सिद्धसाधनं स्यादिति धर्मस्य यत्त्वेनोपादानं । संयोगसम्बन्धावच्छिन्नसंयोगत्वावच्छिन्नाभावमादाय सिद्धसाधनवारणाय स
मवायसम्बन्धावच्छिन्नाभाव एव साधनीय: अन्यसम्बन्धावच्छिन्नविशेषाभावकूटस्य तत्सम्बन्धावच्छिन्नाभावव्यभिचारित्वे समवायसम्बन्धावच्छिन्नविशेषाभावकूटस्य तत्सम्बन्धावच्छिन्नसामान्याभावव्यभिचारित्वं
तुल्यन्यायेन संभवतीति प्रतियोगितावच्छेदकसम्बन्धानामपि यत्त्वेन व्याप्तावन्तर्भाव: ।। अत एव समवायसम्बन्धावच्छिन्नयावद्विशेषाभावहेतुना तत्सम्बन्धावच्छिन्नसंयोगसामान्याभावसिद्धि: ।। तद्धर्माश्रयविशेषा

भावश्च उभयावृत्तित्वसमानाधिकरणधर्मावच्छिन्नाभावः अतः संयोगत्वाद्यपेक्षया वृक्षवृत्तिसंयोगत्वादेर्विशेषधर्मत्वेपि संयोगसामान्याभावं वृक्षादावनभ्युपगच्छतामवयवविशेषरूपावच्छेदकदुर्निरूपेण वृक्षवृत्तिसंयोग
त्वावच्छिन्नाभावस्य वृक्षादावनभ्युपगमेपि च न सन्दिग्धासिद्धिः वृक्षवृत्तिसंयोगत्वादीनामुभयवृत्तित्वेन तदवच्छिन्नाभावस्याप्रवृत्तेः ननु हेतौ उभयावृत्तित्वविशेषणस्यासिद्धिवारकत्वेपि व्यभिचारवारकतया वैयर्थ्यम् यावत्त्वे
विशेषणस्याधीविशेष्यविषयत्वस्य परिचायकत्वमेव तादृशधर्मावच्छिन्नप्रतियोगिताकत्वं न तु हेतुप्रविष्टमिति तु न सत् तथा सति यत्पदार्थस्य हेतुशरीरप्रवेशेन सामान्यव्याप्तिलाभ उपपद्यते इति वाच्यम् यावत्पदस्य व्यापकत्वार्थक
तया तद्धर्मसमानाधिकरणो यः अभाववृत्तिधर्मावच्छिन्नाभाववृत्तिनिरूपिताया आधेयत्वसम्बन्धावच्छिन्नव्यापकताया एव हेतुता या विशेषधर्मे व्यापकत्वाघटकाभावान्तरस्यैव च सामान्यव्यापकताघटकतया वैयर्थ्यानवकाशात्
न च तादृशाभावत्वं व्यापकत्वं तादृशाभावनिष्ठभेदप्रतियोगितायां आधेयतासम्बन्धेनानवच्छेदकत्वम् एवञ्च संयोगविशेषाभावानां स्वैर्वाधिकरणवृत्तितया तन्निष्ठभेदप्रतियोगितासाधेयत्वसम्बन्धेनाव
च्छेदकमप्रसिद्धमिति तदनवच्छेदकत्वरूपहेत्वप्रसिद्धिरिति वाच्यम् आधेयत्वसम्बन्धावच्छिन्नावच्छेदकतासम्बन्धेन प्रतियोगिताया अभावस्यैव प्रतियोगितानवच्छेदकत्वस्य निवेशनीयत्वात् दण्डस्थले व्यधिकरणताद
शसम्बन्धावच्छिन्नाभावप्रसिद्धिः सोपलभ्यते यद्धर्मसमानाधिकरणेत्यत्र प्रतियोगितावच्छेदकत्वेन धर्मो विशेषणीयः तेन कम्बुग्रीवादिमत्त्वव्याप्यधर्मावच्छिन्नप्रतियोगिताकयावदभावे च तत्तद्धर्मावच्छिन्नाभा
वाप्रसिद्ध्या तादृशाभाववत्त्वासम्भवेपि न क्षतिः न च भेदप्रतियोगितावच्छेदकवाच्यत्वघटान्यतरत्वादिव्याप्यधर्मावच्छिन्नसंयोगाद्यवच्छिन्नप्रतियोगिताकयावदभाववत्तत्तद्रूपावच्छिन्ने तत्सम्बन्धावच्छिन्न
प्रतियोगिताकाभाववत्त्वासम्भवाद्व्यभिचारः वाच्यत्वादेः संयोगादिनावृत्तितया तेन सम्बन्धेन घटादेरेव तादृशाभावविरोधितया घटत्वादावेव तत्प्रतियोगितावच्छेदकत्वसम्भवेन गुरुधर्मस्य तादृशतत्प्रतियोगिता
नवच्छेदकत्वादिति वाच्यम् वाच्यत्वादिसाधारणस्यान्यतरादिनिरूपप्रतियोगित्वस्य न्यूनवृत्तिघटत्वादिनानवच्छेदादगत्या गुरुणाप्यन्यतरत्वादिनैव तदवच्छेदात् वस्तुतो यत्सम्बन्धावच्छिन्नाभावस्य साध्यहेतुघटक
ता तत्सम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वमेव सामान्यधर्मस्य विशेषणीयम् अतो न सामान्यधर्मस्य भेदप्रतियोगितावच्छेदकत्वेपि संयोगादिसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकतया तदवच्छिन्नाभावाप
सिद्ध्या वापि न व्यभिचारः अत एव भेदप्रतियोगितावच्छेदकजातित्वादिघटकनित्यत्वादेः समवायसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकगर्भनिवेशस्य गौरवेणासम्भवेपि न जातित्वादिसामान्यधर्मघटितहेतौ व्यभि

[illegible]

जातितया सामान्याव्याप्तिभङ्गः ॥ १ ॥ वस्तुतस्तु यद्धर्मप्रतियोगितावच्छेदकत्वविशेषणमनुपादेयमेव । कम्बुग्रीवादिमत्त्वसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नाभावनिरुक्तभेदप्रतियोगित्वस्य घटत्वादिघटितताद्दृशधर्मापेक्षया गुरुतया तदवच्छिन्नाभावरूप
व्यापकत्वाप्रसिद्धेः । यद्धर्मत्वमेव कम्बुग्रीवादिमत्त्वरूपधर्मोपादानस्य गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वपक्षेऽसम्भवेन व्यभिचारानवकाशात् । अभावे यावत्त्वादिविशेषणप्रवेशाद्यसिद्धिश्चऽज्ञात्यादिव्यक्त्यभाववति जातिसामान्या
भावासत्त्वेऽपि न सामान्याव्याप्तिभङ्गः ॥ यद्यपि यत्तदर्थसूचितसाध्यहेतूनामननुगमेन नैकव्याप्तिरिति संयोगसामान्याभावतदीयविशेषाभावकूटयोः व्यर्थे यावत्त्वादिविशेषणवैयर्थ्यमेव । तथाप्येतद्दोषस्य स्वयमग्रे वाच्यतया यथा
कथञ्चित्तच्छङ्कासङ्गतिः ॥ १ ॥ अथ वृक्षादौ यावत्संयोगविशेषाभाववत्त्वमुभयवाद्यप्रसिद्धं तत्र विभुसंयोगाभावावच्छेदकस्य यावत्त्वविशेषणस्य दिग्विशेषस्य वा दुर्वचत्वात् । ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वे कालविशेषावच्छेदेना
पि तदभावासम्भवात् । तयोस्तदविरोधितामते द्रव्यसंयोगादिसामान्याभावस्यापि दुरन्तिकालावच्छेदेन द्रव्यत्वाविरोधात् । न च मूलाग्राद्यवच्छिन्नविभुसंयोगव्यक्तीनां भेदादग्रमूलाद्यवच्छेदेनाभावः सुलभ इति वाच्यम् । एता
सां भेदस्याप्रामाणिकत्वात् । न च नानावयवावच्छिन्नसंयोगव्यक्तीनामभेदे तत्तत्संयोगव्यक्तौ तत्तदवच्छेदकव्यक्तीनां तादात्म्यसम्बन्धेन कारणतायां व्यभिचारः इत्यवच्छेदकभेदेन संयोगभेद आवश्यकः । आवश्यकश्चावच्छेद
कव्यक्तीनां विशिष्य तत्तदवच्छिन्नसंयोगव्यक्तिषु हेतुताभ्युपगमः । अन्यथा मूलादिमात्रावच्छिन्नमूलान्तरसंयोगानामग्राद्यवच्छेदेन वृक्षादिवृत्तिविभुसंयोगादीनाञ्च वृक्षान्तरावयवावच्छेदेनानुत्पत्तिप्रयोजकस्य दुर्लभत्वादिति वाच्यम् ।
व्याप्यवृत्तेरवच्छेदकत्वानभ्युपगमे विभुसंयोगस्य व्याप्यवृत्तितया मूलाद्यवच्छिन्नत्वविरहेण तत्र मूलादीनां हेतुत्वविरहात् । व्याप्यवृत्तेरवच्छेदकत्वोपगमे तत्तदवच्छेदकस्वरूप तत्तत्क्षणावच्छेदकत्वव्यक्तीनामेव तदवच्छेदक
अन्यतावच्छेदकसम्बन्धतया मूलाग्राद्यवच्छिन्नविभुसंयोगादीनामभेदेऽपि व्यभिचारानवकाशात् । अन्यथा मूलाद्यवच्छिन्नसंयोगस्य दिग्विशेषैरप्यवच्छिन्नतया तत्राप्यवच्छेदकतासम्बन्धेन तत्तत्संयोगव्यक्तीनामुत्पत्त्या मूलादे
घ३ स्तत्र व्यभिचारस्य दुर्वारत्वात् । न च मूलावच्छिन्नसंयोगानामग्रावच्छिन्नसंयोगादेरपि भेदः स्वीकर्तुं शक्यते मूले प्राच्यां शरीरवृक्षसंयोग इत्यादिप्रतीत्या एकसंयोगव्यक्तावेव मूलप्राच्याद्यवच्छिन्नत्वावगाहनात् । न चाग्रमूलयोः शा
रीरसंयोगा इत्यस्फुटैवैतादृशप्रतीतेरपि संयोगद्वयावगाहित्वमसुदृढमतमिति वाच्यम् । यत्र मूले प्रतीचीमात्रावच्छिन्न एकशरीरसंयोगः अग्रे प्राचीमात्रावच्छिन्नश्च शरीरान्तरसंयोगस्तत्र मूले प्राच्यां शरीरसंयोग इति
प्रत्ययापत्तेः । शरीरतरुसंयोगव्यक्तीनामेकैकाया एव शरीरावयवे वृक्षावयवेन चावच्छिन्नतया व्यभिचारस्यापि दर्शितसम्बन्धसङ्कोचमन्तरेण दुर्वारत्वाच्च । ^ तत्तदवच्छेदकावच्छिन्ननानासंयोगसाधारणं त ।-न्नदले स्वेदकाव

टि३ रिति प्राच्याद्यवच्छिन्नसंयोगादे

टि१ नहि तत्र शरीरावयवावच्छिन्नशरीरतरुसंयोगो न मूलावच्छिन्नतदुभयसंयोगयो
र्भेदसम्भवः तथासति मूलावच्छिन्नवृक्षसंयोगस्य शरीरे चरणावच्छिन्नशरीरसंयो
गस्य वृक्षे व्याप्यवृत्तितया तदभावासत्त्वप्रसङ्गात् ॥ १

छिन्नत्वमेव तत्तद्द्रव्यावच्छेदकजन्यतावच्छेदकं ननु संयोगनिष्ठतत्तद्व्यक्तित्वं अनन्तकार्यकारणभावप्रसङ्गात् तथाचैकावच्छिन्नसंयोगस्यापरावच्छेदकावच्छिन्नत्वेपि तदवच्छिन्नत्वविशिष्टस्य नान्यत्रोत्पत्तिरिति न व्यभिचारशङ्केत्यपि वदन्ति ।। ननु संयो
गमात्रस्याव्याप्यवृत्तितायाः सिद्धान्तानुरोधेन मूलाग्रावच्छेदेन तत्तद्विभुसंयोगादीनां भेदस्वीकार आवश्यक इति । तदपेक्षया [illegible] तादृशसंयोगव्यक्तीनां गगनादौ दिगाद्यविशेषस्य तत्पावच्छेदकनियमेनैव तादृशसिद्धान्तसङ्गतेः ।। अन्ये वदन्ति । द्रव्यमा
त्रे संयोगसामान्याभावस्याप्रामाणिकतया तेनेत्यादिनोक्तेः । न चेत्यादिना गगनादावेव संयोगसामान्याभावसाध्यकानुमानमाशङ्कितं विभुद्वयसंयोगानभ्युपगमेन तत्र यावत्संयोगव्यक्तीनामेव प्रतिनियतदिगाद्यवच्छिन्नतया तत्तद्व्यक्तित्वेन
तत्तदभाववत्त्वेऽविवाद एवेति नासिद्ध्यवकाशः । विभुमात्रे संयोगसामान्याभावसिद्धावपि संयोगिद्रव्यत्वादिस्तत्र व्यावृत्तिसङ्गतेः । वृक्षादावेतत्प्राप्तिबलात्संयोगसामान्याभावासिद्धावपि न क्षतिः प्रतियोग्यनवच्छेदकस्य तदभावावच्छेदकत्वाति
धर्मसत्वे च वृक्षत्वावच्छेदेन वृक्षादावपि संयोगसामान्याभावसिद्धेः समत्वेन तत्रापि तदभावसाध्यतायां तादृशनियमवादिनामाशङ्का न च प्रतियोग्यनवच्छेदकवृक्षत्वादेरभावावच्छेदकतामित्यादिना निराकरिष्यति । पूर्वमपि वृ
क्षत्वाद्यवच्छेदेन संयोगसामान्याभावहेतोर्विरोधमात्रेण प्रतियोग्यनवच्छेदकस्याभावावच्छेदकत्वनियमेन वाशङ्कुमर्हति इत्याशयेनैव वृक्षादौ संयोगसामान्याभावप्रतियोग्यवच्छेदकभेद उपपादितः । वृक्षे न संयोग इति प्रत्यक्षस्य
बाधितं ननु यो यदीयेत्यादिनियमस्य तत्साधकत्वाभावेनेति न सन्दर्भविरोधः । यत्र यस्मिन्किञ्चिदवयवतां प्राप्तस्य वृक्षस्य नाशानन्तरं खण्डवृक्षोत्पत्तिलक्षणे पूर्वस्मिन्क्रियातोऽवस्थितयावदवयवे गगनादिसंयोगानां विनाशः द्वितीयक्षणे च ख
ण्डवृक्षस्यापरावयवस्य नाशः तृतीयक्षणे च तन्नाशात्तत्र वृक्षे विभुसंयोगानुत्पत्त्या यावद्द्वितीयाभावसत्त्वम् । न चैवं तादृशवृक्षे मूर्त्तान्तरेणापि संयोगस्तदवयवसंयोगात्तत्कर्मणा वा न सम्भवति तदवयवगगनादिसंयोगनाशके
कर्मणा मूर्त्तान्तरतदवयवसंयोगानामप्युत्पत्तिकाले विनाशात् अवयवावयविनोश्च संयोगानभ्युपगमेन तदवयवे आरम्भकसंयोगसत्त्वेपि तेन तन्निष्ठसंयोगजननासम्भवात् उत्पत्तिकाले च द्रव्ये गुणवत्कर्मसत्त्वानुपपत्तेरि
ति संयोगसाधकद्रव्यत्वस्य सहेतुतैव न निर्वहतीति वाच्यम् । तादृशखण्डद्रव्यतदवयवसंयोगजन्यस्य तत्कर्मजन्यस्य संयोगस्यासम्भवेपि सर्वत्रैव सततं सदागतिशीलपवनादिपरमाणूनां कर्मभिः संयोगनाशे तत्तद्बाधकविरहे
लाद्द्रव्यस्य संयुक्तत्वनियमादित्यपि केचित् ।। यावत्संयोगाभाव एव मानमिति । प्राग्समानलिङ्गस्यानुमितिकरणत्वमताभिप्रायेण ।। यत्तत्पदयोरिति ।। साध्यहेतुघटकयत्तदोरर्थयोः संयोगत्वघटत्वाद्याश्रित्यर्थः । अनु
गतादिति ।। एकरूपेण निवेशासम्भवादित्यर्थः । एकव्याप्तिं निर्वाहयितुमशक्यत्वादिति शेषः । तथाच घटत्वावच्छिन्नाभावघटादिविशेषाभावकूटयोर्व्याप्तेः संयोगसामान्याभावसिद्ध्यनुपयोगित्वात् यावत्संयोगविशेषाभावे
संयोगसामान्याभावीयविशेषव्याप्तेश्चाग्रे निराकर्तव्यत्वान्नोक्तानुमानसम्भव इति भावः । ननु प्रकृतहेतौ प्रकृतसाध्यव्याप्ते ग्रहेपि यथा यो यत्र प्रवर्तते सत [illegible] कार्यतया आनाशीत्याकारकज्ञानस्यानादिप्रवृत्तेस्तद्विषयककार्य

दि॰ मा॰ टी॰

६

यावत्तादृशहेतुषु ४

ता ज्ञानयोर्व्याप्तिग्रहात् गवानयनादिप्रवृत्तिस्तल्लिङ्गेन गवानयनादिकार्यताज्ञानसिद्धिः तथाप्युक्ते संयोगीययावद्विशेषाभावे तत्सामान्याभावव्याप्तेर्व्यर्थविशेषणत्वादिनाऽग्रहेपि घटादिविशेषाभावकूटे तत्सामान्याभावव्याप्तिग्रहादेव संयोगीयया
वद्विशेषाभावेन हेतुनापक्षधर्मताज्ञानाद्गगनादौ संयोगसामान्याभावसिद्धेर्दुर्वारत्वं व्यतिरेकिहेतुकानुमिता विवक्षासामान्यव्याप्त्यधीनविशेषसिद्धौ व्याप्तिविशिष्टपक्षधर्मताज्ञानस्य हेतुत्वानभ्युपगमात् न च विशेषान्तराभावे सामान्याभावान्तरव्याप्ति
ग्रहात् संयोगविशेषाभावेन तत्सामान्याभावसिद्ध्युपगमे यावत्त्वाद्यविशेषितं तद्विसंयोगादिप्रतियोगिकाभावेन कपिसंयोगादिसामान्याभावव्याप्तिग्रहादेव संयोगप्रतियोगिकाभावेन तत्सामान्याभावसिद्धिसम्भवात् यावत्त्वादिविशेषणमनर्थकम्. प्र
कृतहेतुतुल्यत्वनिखिलहेत्वन्तरेषु तत्प्रविष्टत्वमर्थयति तत्प्रकृतसाध्यतुल्यसाध्यव्याप्तिग्रहापेक्षायाः स्वीकर्तुमशक्यत्वात् तादृशहेतुसकलसाध्यानां युगपद्ग्रहेणाप्यसर्वज्ञैर्ग्रहीतुमशक्यत्वात् इति वाच्यम् उपस्थिततादृशतत्साध्यव्याप्तिग्रहापेक्षायाः सामञ्जस्यात् तावत्साध्यापेक्षायो
ध्यस्य साधनधर्मिके तत्साध्यव्याप्तिग्रहासम्भवेऽपि तत्तत्साध्यसाधनोपस्थितेरसति प्रतिबन्धके तत्कल्पस्यास्फुटत्वात्. एवं सति आवश्यकविशेषणतयादाने ज्ञानादिविशेषगुणसाध्याभावे ज्ञात्यादिसामान्याभावव्यभिचारो प्रसक्तिदशायां संयोगादिसामान्याभावसाधनस्य
वेन तादृशविशेषणसार्थक्यात्. गगनाद्यवृत्तित्वस्य समवायेनाधिकरणनिरूपकधर्मावच्छिन्नप्रतियोगिताकयत्किञ्चिदभावकूटस्याद्यन्ताभावधर्मः संयोगगगनादित्रिकाभावप्रतियोगितावच्छेदकत्वेनैतादृशाद्दुष्कसामान्यव्याप्तिग्रहेऽप्यत्र भिन्नव्यापकत्वेनैव वा संयोगत्वावच्छेदेन गगनादि
निष्ठाभावप्रतियोगितावच्छेदकत्वं साधनीयं तत्र च नानात्वागमे द्विघटत्वाभावे ईदृक्कृतानुमानेऽनुपाधिसाह.। एकावच्छेदकेति ।। अनवच्छिन्नतदीययावद्विशेषाभावाधिकरणत्वस्यैतदुपाधित्वादिति भावः. यथाभूते गुणादिनिष्ठसामान्याया यावत्संयोगाभावाधिकरणताया व्याप्यह
त्तित्वाऽवच्छेदक विरहेण द्रव्यादौ साधनव्यापकत्वानिर्वाहात्. समवायेन गुणादिनिष्ठायाया यावत्संयोगाभावाधिकरणत्वं तथा व्याप्यवृत्तित्वेऽपि गुणत्वाद्यवच्छिन्नत्वस्वभावस्य कथं अन्यथाधिकरणनिष्ठैकावच्छेदकप्रकारकज्ञानासम्भवे गुणादौ तदभावग्रहासम्भवादिति वाच्यम्. द्रव्ययावत्सं
योगाभावाधिकरणताया अपि द्रव्यत्वादिरूपेणैकावच्छेदकावच्छिन्नतयाऽनुपाधेः साध्यसाधनव्यापकत्वनिर्वाहाय स प्रमितिर्निर्दिश्यत्वं द्रव्यव्यावृत्तितानियोगात् कथंचित् लक्षणास्य च कलस्यैव विवक्षणीयत्वे तथा गुणादिनिष्ठसंयोगाभावाधिकरणताया तादृशावच्छेदकत्वविरहेण सा
ध्यव्यापकताया यथाभूते द्रव्यपदादावात्. अथैवं कपिसंयोगादिसामान्यस्य मूलावच्छेदेनाभाववति कपिसंयोगादिमत्वृक्षादेरनवच्छिन्नतदीययावद्विशेषाभाववत्त्वविरहेण साध्योपाध्योर्व्यासामान्यव्याप्तिनिर्वाहः. अनवच्छिन्नेति. अवच्छिन्नत्वे सयाभावव यावद्विशेषा
भाववत्त्वस्य हेत्वधिकरणाभिमते गुणे यावद्विशेषाभाववत्त्वस्यावच्छिन्नत्वविरहेण मयाभावत् कपिसंयोगवति वृक्षे कपिसंयोगीययावद्विशेषाभाववत्त्वं मूलाद्येकावच्छेदकावच्छिन्नमिति तदवच्छिन्नस्याभावादुभयाभाववद्वृत्तितोऽपि साधनयोः सामान्यव्याप्तिः
अव्यक्तादिविशेषतो यावत्कपिसंयोगविशेषाभावाधिकरणतानां नैकावच्छेदकावच्छिन्नत्वसम्भवति वृक्षान्यवृत्तिकपिसंयोगादिव्यक्तीनां येऽभावास्तेषां वृक्षादौ व्याप्यवृत्तितया तन्निष्ठतदधिकरणताया अनवच्छिन्नत्वात्. तच्च व्याप्यवृत्त्यधिकरणतानामनवच्छिन्नतया
न्यासामान्येकावच्छेदकावच्छिन्नतया सर्वोपि ईवतासु भग्नाभावाऽक्षतवृत्तिवाच्यम्. एवं सति पक्षनिष्ठसंयोगव्यक्तीनां द्वित्वादिविशिष्टावच्छिन्नानां यावन्तोऽभावाः पक्षतिषु तावत्त्वेऽपि तदधिकरणतानां सर्वासामेकावच्छेदकविरहेपि द्वित्वादीनामवच्छेदकैका

द्रव्यता

एकावच्छेदकान
वच्छिन्नत्वा ४

नं२

हेत्व ५

व्याप्य ५

सम्भवेन सर्वासत्वेवतामुत्ताद्दशताद्दशावच्छेदकमादायैकावच्छिन्नत्वसम्भवात्तु भयाभावसत्त्वात् तद्वृत्तिसंयोगत्वावच्छिन्नाभावाः तेषां तन्निरूपिताधिकरणतासु चानवच्छिन्नत्वयोभयाभावसत्त्वात् तदुपाधेर्वह्निसंयोगाभावरूपसाधनव्यापकतापत्तेः
स्वसमानाधिकरणयावन्तोऽभावाधिकरणतावच्छेदकावच्छिन्नत्वस्य तुभयाभावघटकीभूतैकावच्छिन्नत्वरूपत्वेन वृक्षादिनिष्ठमूलाद्यवच्छिन्नकपिसंयोगाभावाधिकरणतायां तत्त्वेऽपि न तथात्वसम्भवः तत्समानाधिकरणव्याप्यवृत्तिकपिसं
योगाद्यभावाधिकरणतानामपि तादृशयावदधिकरणतान्तर्गतत्वात् तदवच्छेदकस्य चाप्रसिद्धत्वादिति चेन्न एकावच्छेदकावच्छिन्नत्वस्य स्वसमानाधिकरणकिञ्चिदवच्छिन्नयावदभावाधिकरणतावच्छेदकावच्छिन्नत्वरूपस्य विवक्षि
तत्वात्। अनवच्छिन्नाधिकरणतानामेकावच्छेदकावच्छिन्नत्वासम्भवेऽपि क्षतिविरहात्। अथवा यावद्विशेषाभावकूटस्य निरवच्छिन्न यावन्तो यद्विशेषाभावास्तदवच्छिन्ननिरूपितत्वमेकाधिकरणत्वे विवक्षितं न तु तत्समुदायः एकावच्छिन्नत्वस्य
एकमात्रवृत्तिधर्मा [illegible] च्छिन्नावच्छेदकावच्छिन्नत्वे नत्वभिन्नावच्छेदकत्वं वृत्तिकपिसंयोगाभावानां वृक्षत्वेनाभावाद्यवच्छिन्न व्याप्यवृत्तेरप्यन्यथा व्याप्यवृत्तिसाधारणयावत्त्वेन तेषामप्रसिद्धवृत्तित्वात् तत्साधारणयावत्त्वावच्छिन्ननिरूपिता
धिकरणता एकमात्रवृत्तित्वेन मूलत्वाद्यवच्छिन्नत्वं तन्मूलादि रूपावयवावच्छिन्नेति तन्नो न्येभयाभावोऽस्त इति न साध्याप्रसिद्धिः सामान्यतो वृक्षे वृक्षानिष्ठसंयोगसामान्यीययावद्विशेषाभावाधिकरणता चैव [illegible] कावयवावच्छि
न्ना वृक्षत्वेनावच्छिन्नतयाऽभावकालिकत्वादिप्रतीतिविरहात् अपि तु तत्तदवयवत्वादिरूपाननुगतधर्मावच्छिन्न [illegible] वयवावच्छिन्ना एवमुपदिश्य तत्संयोगाभावव्याप्यत्वात् प्रत्येकत्वादेकरूपावच्छिन्नस्य प्रतियोग्यभावाधिकरणताव
च्छेदकत्वविरोधात् एकस्यापि विशेषस्य सामान्यरूपव्याप्यभयावच्छेदकत्वेऽपगमात् तथा च वृक्षनिष्ठसंयोगविशेषाभावानां यावत्त्वावच्छिन्नाधिकरणतानिरूपितावच्छेदकावच्छिन्नत्वसत्त्वात् तत्स्वरूपोभयवत्त्वाद्युपाधेः
साधनताव्यापकत्वमिति वदन्ति। । ~~वस्तुतस्तु~~ अनवच्छिन्नयावद्विशेषाभाववत्त्वमेवोपाधिः तादृशोपाधिना साध्यस्य सामान्यव्याप्तिविरहेऽपि संयोगसामान्याभावरूपपक्षेवारितसाध्यव्यापकतया तादृशोपाधेः सत्प्रतिपक्षोत्थाप
कत्वमव्याहतं तादृशस्य च साध्यवतोऽप्युपाधे [illegible] प्यतया तादृशोपाध्यभावेन संयोगसामान्याभावरूपसाध्यवत्त्वे दोषः न्यत्र प्रसिद्धोऽपि साध्यसिद्धौ पाक्षतत एव अभावप्रसाध्यकव्यतिरेकिणि प्रतियोगिमात्रप्रसिद्धः स्विद्धितसा
त इत्याद्यभावेन साध्याभावसाधकस्य न सम्यक् संयोगरूपस्य साधने सिद्धसाधनतापक्षाद्वत्युपाधिसत्त्वे साध्यवत्पक्षादिति तत्साधनात् सत्प्रतिपक्षानिर्वाह इति [illegible] हि कृतसाधनादितः साध्याभावादिसाधनासम्भवेऽपि पू
तियोगिवैयधिकरण्यघटितसाध्यव्यापकतावच्छेदकतायाः प्रमाणाभावेऽपि नावच्छेदकावच्छिन्नाभावेन ज्ञानानन्तरं साध्याप्रसिद्धावपि प्रतियोगिधर्म्मवत्त्वेति [illegible]। अथवा प्रतियोग्यधिकरणतारूपसाध्यव्यापकतावच्छेदकावच्छे

ने भा

व्याप्य २

तुसारण

पक्षधर्मावच्छिन्नसाध्या[illegible]न्याभावरूप २

ग

कपिसंयोगादिमतः ।१

देनेत्यादेर्यथाश्रुतस्यैवोपपादितत्वान्निर्वाहः । यत्र प्रतियोगिमति तस्य सामान्याभावस्तत्रैकावच्छेदेन तत्स्यावद्विशेषाभाववत्त्वमिति सामान्यव्याप्तेः कपिसंयोगादिसामान्याभावाधिकरणवृक्षादेरेकावच्छेदेन कपिसंयोगादिविशेषाभाववत्त्वनियमेन संग्रहत्वा
त् गुणादेरेकावच्छेदेन यावद्विशेषाभावासत्त्वेपि तत्प्रतियोग्यसत्त्वेन अवच्छिन्नकाधव्यापकत्वाक्षतेः द्रव्ये च प्रतियोगिमत्त्वविशिष्टयावत्संयोगविशेषाभावाधिकरणे ~~[illegible]~~ एकावच्छेदेन तदीययावद्विशेषाभावासत्त्वात् प्रतियोगिमत्त्वेतद्यावच्छेदकत्वे
मिश्रसाधनासाधारणत्वे । तथा वृक्षादिकाले कपिसंयोगादिविशेषाभावाधिकरणतावच्छेदगतकालेपि यावदधिकरणतासामानाधिकरण्येपि तेन तस्य एकावच्छेदकावच्छिन्नत्वं पूर्ववदुपपादनीयम् ।१। अथवा द्रव्यत्वादौ व्यभिचारि साध्यकेन सत्प्रति
पक्षोन्नायकत्वेन न सम्भवति प्रकृतसाध्यव्यापकेरेकावच्छेदकावच्छिन्नसंयोगीय यावद्विशेषाभाववत्त्वस्याप्रसिद्धेः द्रव्ये तदीययावद्विशेषाभाववत्त्वस्यावच्छिन्नत्वेपि एकावच्छेदकावच्छिन्नत्वाभावात् गुणे च तस्यावच्छिन्नतायाः एवाभावात् प्रतियोगि
मत्त्वविशिष्टकपिसंयोगादिसामान्याभावव्यापकत्वस्य तदीयैकावच्छेदकावच्छिन्नयावद्विशेषाभाववत्त्वस्य प्रसिद्धत्वेपि तदभावेन प्रकृतसाध्यवद्भेदसाधनं न सम्भवति तस्य प्रकृतसाध्याव्यापकत्वात् प्रतियोगिमत्त्वविशिष्टकपिसंयोगादिसामा
न्याभाववद्भेदस्य कपिसंयोगादिरूपप्रतियोगिप्रत्येकत्वे हेतुमतिसाधनाभावे कपिसंयोगादिसामान्याभाववद्भेदपर्यवसायि प्रतियोगिमद्भेदस्याबाधितत्वात् प्रतियोगिमतिच एकावच्छिन्नतदीययावद्विशेषाभावसत्त्वेन तद्भेदसाध्याभावादिहेतो सत्प्रतिपक्षि
न व्यभिचारी सत्प्रतिपक्षनिर्वाहः इति ध्येयम् । कुचिद्द्रव्ये जलादिसंयोगवति तत्सामान्याभावस्य सत्त्वे एकावच्छेदकावच्छिन्नतदीययावद्विशेषाभावसत्त्वान्नदीयप्रतियोगिमत्त्वविशिष्टतत्सामान्याभावव्यापकएकावच्छेदकावच्छिन्नतदीययावद्
विशेषाभाववत्ते यत्र च द्रव्यसर्वावयवावच्छेदेन भिन्नाजलादिसंयोगवत्तेनैव विशेषाभावत्वहेतुमति एकावच्छेदकावच्छिन्नयावद्विशेषाभाववत्त्वे [illegible] पाक्षभावेन प्रतियोगिमत्त्वविशिष्टतत्सामान्याभावव्यापकत्वं स्यादिति बाधकाभावात् प्रतियो
गिमतित्वविशेषावृत्तिपर्यवसानेन व्यभिचारात् सिद्धसामान्यव्याप्तिप्रकृतः संयोगत्वेन जलादिविशेषाभावप्रतियोगितावच्छेदकत्वसामान्यलक्षणोत्पत्तिकदर्शितव्याप्त्यापि एकावच्छेदक तत्समानाधिकरणोभयाभाव [illegible] धर्मावच्छिन्नप्रतियो
गिताकयावद्भावाधिकरणताव्यापकत्वाधिकेयो [illegible] स्वोपाधित्वं बोध्यम् ।१। एतेनेति ।१। अनवाद्(?) यावद्विशेषाभाववत्त्वस्योपाधित्वेनेत्यर्थः । इति विशेषव्याप्तिपञ्चमपत्नमाकलनपर्यालम् । द्रवणात्साध्याइत्यपीति ।१। त्वेमतेति से
न सामान्याभावस्य केवलान्वयित्वात् भावसत्त्वैव तद्व्यापकतावच्छेदकेतेन इत्तरांशस्य अर्थत्वादित्यर्थः ॥ सत्वभावादित्यवहेतुर्दित्युपत्तआह ।१। अग्नाप्यदेव्यतादीनि ।१। आर्थिकग्राहकदतर्के रहितत्वादित्यर्थः विशेषव्याप्तावुपाधित्वत्तमपि
सत्त्वमपित्युतआह ।१। निर्गुणत्वादिति ।१। आदिमतिष्वीमाणत्वादित्यपि गृहः ॥ यद्यधूर्मिगयानवच्छेदकं तेन धर्मावच्छिन्नाभावावच्छेदकत्वमितिव्याप्तिमुपसर्व्य दृष्टान्तः संयोगसामान्याभावावच्छेदकत्वसाधकपञ्चमानमाधाष्टानेन
कृतेति ।१। अर्चनेति ।१। गुणाधर्मावच्छेदकानीति ।१। गुणत्वाभायानवच्छेदकद्रूपत्यर्थः ।१। तदभावेति ।१। गुणत्वावच्छिन्नाभावेत्यर्थः तथा च गुणत्वावच्छिन्नाभावस्याप्रसिद्ध्यासाध्यप्रसङ्ग इति भावः । घटादेर्द्रव्यत्वावच्छेदेन घटत्वाभावप्र

ग्राव

ख

सञ्जे घटत्वादेर्व्याप्यवृत्तितया तदवच्छेदकाप्रसिद्धा तदनवच्छेदकत्वस्यापादकाप्रसिद्धेरसम्भवतीति नाशङ्कितः गुणत्वाद्यभावस्य संयोगादिरवच्छेदकप्रसिद्धा न गुणत्वाद्यवच्छिन्नाभावावच्छेदकत्वापादकाप्रसिद्धिरिति भावः ननु यत्कुम्भाभावानवच्छेदक
मितस्मत्र यत्पदेन व्याप्यवृत्तियवृत्तिधर्मो विवक्षितः गुणत्वादेश्च व्याप्यवृत्तितयापादितया नवच्छेदकत्वस्य तदवच्छिन्नाभावावच्छेदकत्वापादकत्वेनाथाप्य ह्रदत्वादेः संयोगत्वाभयानवच्छेदकत्वात् संयोगत्वावच्छिन्नाभावावच्छेदकत्वसाधक
हेतोरसिद्धिमाह। यथाचेति। घटपूर्ववर्तित्वस्येति। दण्डनिष्ठघटकारणताघटकतदव्यवहितपूर्वकालसम्बन्धस्येत्यर्थः। प्रतिदण्डभिन्नस्येति दण्डत्वं तत्सामान्यावच्छेदकमित्यग्रिमेणान्वयः। प्रतिदण्डभिन्नत्वेपीत्यनेन च दण्डत्वं तत्पूर्व
कालीनप्रसक्तमिति सूचितं। एवमग्रेपि। तत्सामान्येति। घटपूर्ववर्तितावच्छिन्नत्वस्यार्थः प्रत्येकातिप्रसक्तत्वेपि अवच्छेदकतावच्छेदकानुगतरूपावच्छिन्नत्वान्नातिप्रसक्ततया तत्स्यावच्छेदकस्य अन्यथा घटकारणतावच्छेदकत्वमेव तस्य भज्येतेति भावः
ननु दण्डत्वस्य ... दविप्रतपूर्ववर्तितावच्छेदकत्वे न घटनियतपूर्ववर्तिताया स्वरूपसम्बन्धरूपावच्छेदकमपि तु तदव्यवहितपूर्वकालमिश्रपावच्छिन्नत्याभितायवच्छेदकत्वरूपपाशिआदिकमेव तत्रातिप्रसक्तपिनियावधिमेव स्वरूपसम्बन्धरूपा
वच्छेदकताका एवावच्छेदकत्वान्नातिप्रसक्तत्वान्नियतत्वादिति प्रत्येकातिप्रसक्तस्य सामान्यानतिप्रसक्तत्वेन सामान्यरूपावच्छिन्नावच्छेदकत्वे दृष्टान्तान्तरमाह। वह्निसामानाधिकरण्यस्येति। प्रतिधूमे भिन्नत्वेपि धूमत्वं तत्सामान्यावच्छेदकविषय
त्वयः तत्वादेनात्र वह्निसामानाधिकरण्यपरामर्शः धूमत्वस्य तदनवच्छेदकत्वे तस्य वह्निव्याप्यतावच्छेदकत्वं नोपपद्यते। नच व्यापकतावच्छेदकत्वसमर्पितविशिष्टव्यापकस्य [illegible] ध्यकत्वरूपं पारिभाषिकमेव तत्रातिप्रसक्तसाधारणमिति
नदृष्टान्तसङ्गतिरिति वाच्यम्। सामान्यसामानाधिकरण्यावच्छेदकरूपवत्त्वं व्याप्तिः तत्रावच्छेदकत्वं स्वरूपसम्बन्धविशेषः अतएव यत्र व्यर्थविशेषणघटितनीलधूमत्वादिना हेतुता तत्र व्याप्यत्वासिद्धिरिति प्राचीनमतानुसारेणैव तदपि
धानात्। अन्यथा पुनः स्वरूपसम्बन्धरूपकारणत्वप्रतियोगित्वादिनिरूपितमनुगतधर्ममितिं स्वरूपसम्बन्धरूपमवच्छेदकत्वं दृष्टान्तसम्पादनं बोध्यम्। संयोगसामान्येत्यस्य संयोगत्वावच्छेदकतापावच्छेदकतावच्छिन्नसम्बन्धस्याज्ञोते
प्रत्येकसंयोगादिव्यक्तीनामतिप्रसक्तत्वेपि द्रव्यत्वादिरूपावच्छिन्नानतिप्रसक्तत्वादिति भावः ● यत्र वनति प्रमेयत्वादेः संयोगसामान्यातिप्रसक्तत्वेन तत्सामान्यावच्छेदकत्वासम्भवात् व्याप्तिविवक्षा तदवच्छेदकसंयोगसामान्याभा
वसिद्धिर्न शक्यतेति तु तथा विप्रतियोगिकस्य कालस्यैव प्रतियोगितावच्छेदकतो भावावच्छेदकत्वनियमस्यैव तदनुभवान्न तु प्रतियोगितावच्छेदकमात्रवृत्त्यनाभावादित्यत्र तात्पर्यं द्रव्ये संयोगादिसामान्या
भाववत्कालभेदावच्छेदेन त्वयं तु पर्यवस्यापत्तीयतया सम्प्रदायदृष्टत्वेनेवास्वरसो दर्शितः। गुणस्य सामान्याभावो वर्तत इत्यन्वयः। ध्वंसप्रागभावयोः स्वत्वान्ताभावविरोधितायानियमतत्वादिति भावः। एतेन तदवच्छेदे
न संयोगादिसामान्याभावोपि धृतत्वं वर्तते व्याप्यकत्वं वह्निमाभाववत्ते व्याप्यकर्मी वह्निमाभाववत्त्वनियमादिति सूचितम्। नचोत्पत्तिकालावच्छेदेन घटादौ गुणस्य प्रागभाव एव न तु तत्सामान्यात्यन्ताभावोपि सामाभावा

दी॰ टि॰ गा॰

१०

दितिवाच्यम्: तदा तत्रजन्यैकत्वहेतुभूतस्यैकत्वत्वावच्छिन्नाभावस्याव्यापकतया तस्यैव स्वसमनियतगुणत्वावच्छिन्नाभावरूपतया विवादयोगात् संयोगादिसाध्यकनित्यद्रव्यमात्रवृत्तिहेतुकस्थले व्याप्तिर्नेदानमाह।। प्रलयेति।। प्रलयस्य जन्यभावानधिकरणतया
तदानीं संयोगाद्यसत्वादिति भावः। तदानीं च गगनादौ नित्यैकत्वपरिमाणादिसत्वेन गुणसामान्याभावासत्वात् संयोगस्यैवमुक्तम्। अत्र च प्रमाणं महाप्रलये गगने न संयोग इत्यादि प्रामाणिकव्यवहार एव तादृशव्यवहारस्य भ्रमावगाहित्वेऽतिप्रसङ्गात् व्यव
हारानादरेऽतीन्द्रियगगनादौ गोत्वाद्यभावस्याप्रामाणिकत्वापत्तेः प्रत्यक्षासम्भवादनुमानस्याप्रयोजकत्वात् वह्निमान् धूमादित्यत्रापि व्याप्तिदानमाह।। तथेति।। इदन्त्वस्य।। इदन्त्वावच्छिन्नस्य प्रतीतेरित्यन्तं द्रव्यस्याव्याप्यवृत्तित्वादित्यन्तं हेतुः प्रत्यक्ष
प्रमाणमुक्तानुमितिसम्भवमाह।। एतेनेति।। संयोगादृष्टस्वस्वरूपस्येत्यर्थः।। वृत्तिमतो व्याप्यवृत्तित्वस्य।। संयुक्तस्य तत्सम्बन्धेनैव व्याप्यवृत्तितया।। असम्भवादिति।। अयमाशयः सम्बन्धिभेदाधीनत्वात् सम्बन्धस्य पटत्वावच्छेदेन सम्बन्धो नास्ति तदवच्छेदेन
तत्सम्बन्धावच्छिन्नतदभावसत्वमावश्यकं संयोगादेः सम्बन्धस्य समवायस्य व्याप्यवृत्तित्वेऽपि न संयोगादेर्व्याप्यवृत्तिता गुणादेः समवायसत्वेऽपि संयोगाद्यसत्वात्। संयोगाद्यनवच्छेदकावच्छिन्ने संयोगादिमति तत्समवायसत्वेऽपि तदभावसत्वो
पपत्तेरिति। केचित्तु स्वस्य व्याप्यवृत्तित्वे वृत्तिमतोऽव्याप्यवृत्तित्वमनवच्छेदेऽव्याप्यवृत्तित्वे वृत्तिमतोऽपि व्याप्यवृत्तित्वं युक्तितोल्यात्। संयोगादिप्रतियोगिकत्वविशिष्टसमवायत्वेन समवायोऽपि न व्याप्यवृत्तिरित्याहुः। वह्निमान् धूमादित्यादौ कालविशेषावच्छे
देन हेतुमति वर्तमानसाध्याभावमादाय घटत्ववान् कालत्वादित्यादौ परावच्छेदेन काले वर्तमानकालिकसम्बन्धावच्छिन्नाभावमादाय च व्याप्तिर्नेदानमाह।। एवञ्चेति।। प्रतियोगिमतो देशस्य प्रतियोग्यनाधारकालावच्छेदेन प्रतियोगिमतः कालस्य
प्रतियोग्यनाधारदेशावच्छेदेनाभाववत्त्वमित्यर्थः।। तत्तत्साध्यकेति।। गुणत्वाद्यवच्छिन्नसाध्यकद्रव्यत्वादिहेतौ व्याप्तिवारणायेत्यर्थः।। ननु।। असमानाधिकरणान्तम्। अव्याप्यवृत्तिसाध्यके प्रतियोगिवैयधिकरण्याघटितव्याप्तिप्रवेशा
तद्घटितैव व्याप्तिः। व्याप्यवृत्तिसाध्यके प्रतियोगिवैयधिकरण्यानुपस्थितिदशायामपि हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वसामान्याभावग्रहादनुमित्युत्पत्त्या प्रतियोगिवैयधिकरण्याघटितापि व्याप्तिरस्ति। प्रतियोगिवैयधिकर
ण्यघटितव्याप्तिग्रहस्यैव प्रतिबन्धकता अनुमितिप्रयोजिका चेत्याशयेन मूलकृतेत्युपादानमित्याह।। नोपादेयमिति।। व्याप्यवृत्तिसाध्यके सार्वत्रिकमुपादानं प्रतिक्षिप्तम्। नन्वनुपादानस्य सार्वत्रिकत्वमुक्तं व्याप्यवृत्तेरपि साध्यस्या
प.२० व्याप्यवृत्तित्वग्रहदशायां प्रतियोगिवैयधिकरण्याघटितव्याप्तिज्ञानादेवानुमित्युपगमात् व्याप्यवृत्तिसाध्यके सर्वत्र तादृशविशेषणोपादानानियमः तदघटित

४१८४

जागदीश्याः अवयवः

श्रीः ॥ मूलोक्तन्यायलक्षणस्याऽग्रे दूष्यतया स्वयं न्यायलक्षणमाह उचितेति । व्युत्क्रमेणोक्तप्रतिज्ञादिपञ्चकातिव्याप्तिवारणार्थमानुपूर्वीकान्तं व्युत्क्रमोक्तप्रतिज्ञादिभिन्नार्थकम् । तेन क्रमोत्पन्नप्रतिज्ञाहेतूदाहरणोपनयनिगमनानां लाभः । प्रतिज्ञाहेतूदाहरणत्रिकाद्यतिव्याप्तिवारणाय पञ्चकपदम् । न चाऽसाधकसाधकानुमानस्थलीयन्यायाव्याप्तिः तत्र हेत्वाभासात्मकहेतोरसाधकताव्याप्यत्वस्योभयसम्मतत्वादुदाहरणाभावेन तादृशपञ्चकसमुदायत्वाभावादिति वाच्यम् । शिरोमणिमते तत्रापि वादिनः स्वकर्तव्यनिर्वाहार्थमुदाहरणस्याऽऽवश्यकत्वात् । अन्यथा सर्वत्रैवोपनयमात्रस्य उद्भाव्यतापत्तेः अनुमित्युपयुक्तव्याप्तिपक्षधर्मतायास्तत एव लाभसंभवात् । यत्तु साध्यादिभेदेन न्यायस्य विभिन्नत्वादुदाहरणविनाकृतं प्रतिज्ञादिचतुष्टयत्वमेव न्यायत्वं वाच्यमिति । तन्न । कदाचित्तत्रैव समयसम्बन्धवशेन पञ्चावयवप्रयोगेऽव्याप्त्यापत्तेः । समुदायपदन्तु तादृशपञ्चत्वस्य पर्याप्तिसम्बन्धेन यदधिकरणं तस्य क्रमिकत्वलाभार्थम् । तेन क्रमिकप्रतिज्ञाहेत्वादिमात्रे नातिव्याप्तितादवस्थ्यम् । क्रमेण पञ्चभिः पुरुषैः प्रतिज्ञादिपञ्चकाभिधाने न्यायव्यवहारविरहे त्वेकपुरुषप्रयुक्तत्वमप्यौचित्ये निवेश्यम् । तथा सिद्धसाधनस्थलीयप्रतिज्ञादिसमुदाये न्यायत्वाभावात् सिषाधयिषाकालीनत्वं साध्यसंशयकविप्रतिपत्तिकालीनत्वं वा प्रतिज्ञाविशेषणं वाच्यमित्यपि वदन्ति । ननु न्या-

तथा सति

यावयवत्वघटितस्य प्रतिज्ञात्वादेर्न्यायनिरुक्तौ प्रवेशादन्योन्याश्रयत्वमत आह प्रतिज्ञात्वादिकमिति ।। तथा च यादृशयादृशानुपूर्व्यवच्छिन्ने कथकानां प्रतिज्ञाव्यवहारस्तादृशतादृशानुपू-
र्वीकत्वमेवात्र प्रतिज्ञात्वम् एवं हेतुत्वोदाहरणत्वादिकमपि उत्क्रमेणैव निरुक्त्य न्यायलक्षणे निवेश्यम् । अन्यथा पर्वतादौ वह्न्यादिप्रतिज्ञाया पर्वतो वह्निमान् गिरिर्वह्निमानि-
त्यादिनानाविधानुपूर्वीकत्वेन तेषामेकाविधानुपूर्व्याः प्रकृते न्यायलक्षणघटकत्वेऽन्याविधानुपूर्वीके प्रतिज्ञागर्भन्यायाव्याप्तिः, पक्षधर्मिकसाध्यवत्ताबोधकवाक्यत्वेन कथञ्चित्तादृशसकल-
प्रतिज्ञानामनुगमसम्भवेऽपि यद्यद्धूमवत् तत्तद्वह्निमत् पक्षश्च महानसं यो यो धूमवान् सो सोऽग्निमान् यथा पाकदेश इत्याद्यनेकविधानुपूर्वीकस्य वह्निसाध्यकधूमोदाहरणस्य ए-
कोपादाने ऽन्यगर्भन्यायाव्याप्तिः, साधनधर्मिकसाध्यव्याप्यताबोधजनकवाक्यत्वेन उदाहरणानामनुगमे धूमो वह्निव्याप्य इत्यादिवाक्यस्यापि तादृशत्वेन तद्गर्भप्रतिज्ञादिपञ्चके अ-
तिप्रसङ्गादिति ध्येयम् ।। अत एव पर्वतो वह्निमान् तस्मादिति क्रमिकवाक्यपञ्चकेऽपि नातिव्याप्तिः, तस्मादित्यादिभागे कथकानां हेतुत्वव्यवहाराविरहेण प्रकृतन्यायान्तर्गतत्वेनाभिमतहेतु-
त्वाघटकत्वादिति वदन्ति ।। इदमुपलक्षणम् ।। न्यायावयवत्वघटितस्य प्रतिज्ञात्वादेः प्रवेशे उचितानुपूर्वीकत्वस्य वैयर्थ्यमपि स्यात्, उत्क्रमेणोक्तानां न्यायानन्तर्गतत्वेन प्रतिज्ञात्वा-

।नान्योन्येति ।। १

तादृशानुपूर्व्याः २

भावादेव तादृशसमुदायेऽतिव्याप्त्यसंभवादिति ध्येयम्। ननु न्यायघटितप्रतिज्ञात्वादेः प्रवेशे पर्वतो वह्निमान् धूमात् यो यो धूमवान् स स्पर्शवानित्यादिभिन्नसाध्यकक्रमिकवाक्यपञ्चकेऽतिव्याप्तिः, न च तस्य उक्तानुपूर्वीकत्वमेव नेति वाच्यम्, व्युत्क्रमोक्तप्रतिज्ञादिभिन्नत्वरूपस्योपसत्यस्य तत्रापि सत्त्वादित्यत आह साध्यादीति। तथा च यादृशयादृशानुपूर्व्यवच्छिन्ने तत्पक्षसाध्यकप्रतिज्ञाव्यवहारस्तादृशान्यतमानुपूर्वीकत्वमेव प्रकृते प्रतिज्ञात्वम्, एवं यादृशयादृशानुपूर्व्यवच्छिन्ने तत्पक्षकतद्धेतुकतत्साध्यकहेत्ववयवत्वव्यवहारस्तादृशान्यतमानुपूर्वीकत्वमेव प्रकृते हेतुत्वम्, उदाहरणत्वादिकमपि उक्तदिशैव निरुच्य निवेशनीयमिति भावः। न चैवं पर्वतस्तेजस्वी वह्निमत्त्वात् यो योऽग्निमान् स दीप्तिमान् हविर्व्याप्यहुताशनवांश्चायं तस्माद्द्युतिमानित्यादिसमुदायस्यापि तेजःसाध्यकन्यायत्वापत्तिः, इष्टत्वात्। साध्यादिवाचकपदानामेकानुपूर्वीकत्वस्य अतन्त्रत्वात्। अन्यथा घटो नेतराणीत्यादिप्रतिज्ञाघटितन्यायस्याव्याप्तिप्रसङ्गादिति ध्येयम्। ननु साध्यादिभेदेन न्यायनिरुक्तेरननुगमो दोष इत्यत आह व्याप्यादीति। तथा च लक्ष्यस्याप्यननुगतत्वेन लक्षणस्याप्यननुगतत्वाददोषः इति भावः। अत्र यद्यपि आनुपूर्व्याः क्रमिकतत्तद्वर्णविशिष्टचरमवर्णत्वपर्यवसन्नतया हेत्वाद्यानुपूर्व्यवच्छिन्नस्य तदीयचरमवर्णस्य प्रतिज्ञाघटकवर्णाव्यवहितोत्तरत्वासम्भवात् प्रतिज्ञादिपञ्चकस्यात्र क्रमिकत्वं दुर्घटम्, तथापि तत्तच्छाय पूर्वपूर्वव-

णाविशिष्टपूर्ववर्णत्वमपि तत्तदानुपूर्वी । विनिगमकाभावादित्याशयेनेदम् । यादृशयादृशानुपूर्व्यवच्छिन्ने तत्पक्षहेतुसाध्यकन्यायव्यवहारः कथकसम्प्रदायसिद्धः तादृशान्यतमानुपूर्वीमत्त्वं तत्पक्षहेतुसाध्यकन्यायत्वमित्यत्र तात्पर्यम् । इत्थञ्च यादृशयादृशानुपूर्व्यवच्छिन्ने सामान्यतो न्यायव्यवहारः साम्प्रदायिकः तादृशान्यतमानुपूर्वीमत्त्वरूपं न्यायसामान्यलक्षणमपि साध्यविशेषाद्यनियन्त्रितं सुवचमिति ध्येयम् । मूले न्यूनत्वप्रयोगे बीजमाह एतेनेति । समभिव्याहृतमित्यग्रेऽन्वयः । प्रतिज्ञानिगमनयोरिति । ननु प्रतिज्ञार्थधर्मिको निगमनार्थप्रकारको बोधः संभवत्येव वह्निमान् पर्वत इत्यस्माद्वह्निमानित्यन्वये बाधकाभावात् दण्डवान् इत्यदण्डवानित्यादिबोधानुरोधेन तद्विशेषे विशेषणान्तरावच्छिन्नस्य तस्यान्वये निराकाङ्क्षत्वाभावादत आह उदाहरणेति । प्रागेव सुतराम् । पञ्चानामिति । तथा च प्रतिज्ञादिभिरेकवाक्यतया स्वार्थविशिष्टज्ञानं जन्यते इति मूलस्य सङ्गतमिति भावः । एकविशेष्यनिषेधस्य विशेष्यान्तरविधिव्युत्पन्नत्वात् तमाह परान्वितेति । कथञ्चिदिति । उपनयस्थेदंपदस्य निगमनेऽनुषङ्गपक्षे तयोरपि प्राचां मतेऽभिव्यक्तसाकाङ्क्षतया परस्परमन्वयबोधासम्भवादिति भावः । यद्यपि धूमाद्वह्निमत्पर्वताभिन्नो यो यो धूमवान् धूमव्यापकवह्निमान् तदभिन्नो वह्निव्याप्यधूमवानयं तस्माद्वह्निमानिति क्रमेण पञ्चावयवानां सम्भूय विशिष्टवैशिष्ट्यबोधजनकत्वं वह्न्यादिसाध्यकन्यायस्थले सम्भवत्येव,

तथापि चैत्रः पचति चैत्रत्वात् यो ~~कः पचति~~ यश्चैत्रः स पचतीत्यादावुक्तक्रमेण पाककर्तृत्वादिविशिष्टविशेष्यकान्वयबोधासम्भवात् तादृशन्यायाव्याप्तौ तात्पर्यम्, कृत्यवच्छिन्नविशेष्यकशाब्दबोधं प्रति नाम-
जन्याया [illegible]त्ति ऽन्य पदजन्याया वा शक्त्युपस्थितेस्तन्त्रत्वात्।। पक्ता चैत्रो गच्छतीत्यादाविव पचति चैत्रो गच्छतीत्यादावपि पाककर्तृत्वावच्छिन्ने चैत्रे ज्ञातिमत्त्वस्याऽन्वयबोधापत्तेः।। यो यः पचति स ज्ञा-
ता इत्यादौ यत्पदेनैव लक्षणया पक्तृत्वावच्छिन्नः प्रत्याय्यत इति तद्धर्मिकपक्तृत्वव्यापकीभूतज्ञातृत्वान्वयो नाऽनुपपन्नः। वीप्सिता धर्मविधेयक न्वयबोधातिरिक्तस्थल एव उक्तव्युत्पत्त्यादरे तु तत्र पक्तृत्वस्य तिङर्थत्वे-
ऽपि न क्षतिः, फलानुरोधित्वात्कल्पनायाः।। वस्तुतो व्यतिरेक्युदाहरणगर्भन्यायस्थल एव उक्तक्रमेण विशिष्टवैशिष्ट्यबोधो दुर्घटः।[एवमुदाहरणमात्रस्योद्देश्यविधेयभावेन स्वार्थबोधं प्रति स्वरूप-
योग्यत्वे कस्यापि न्यायस्य न विशिष्टवैशिष्ट्यान्वयबोधजनकत्वमित्युक्तमेवेति स्मर्तव्यम्।] दृष्टान्तस्य न्यायघटकत्वपक्षे उदाहरणस्य विशिष्टवैशिष्ट्यान्वयो दुर्घटः यथा महानस इत्यादिदृष्टान्तस्य
कुत्राप्यनन्वितत्वादिति ध्येयम्।। नन्वेवं पञ्चावयववाक्यानामेकवाक्यताव्यवहारस्तान्त्रिकाणां कथं स्यादित्यत आह एकेति।। विशिष्टे ति स्वार्थे विशिष्टैक कार्थ प्रतीतीच्छाप्रयोज्यत्वमात्रेणेत्यर्थः।। मात्रपदेन तादृशप्रति-
पत्तिजनकत्वव्यवच्छेदः।। ननु प्रतिज्ञादिपञ्चवाक्यैरिति मूलस्य प्रतिज्ञादिभिरेकवाक्यतापन्नत्वज्ञानसहकारेण प्रत्येकं स्वस्वार्थविशिष्टज्ञानं जन्यते तेनाऽवान्तरवाक्यार्थज्ञानरूपेण प्रतिज्ञार्थहेत्वर्थस्य
उपनयार्थनिगमनार्थस्य विशिष्टवैशिष्ट्यावगाहि यन्मानं महा वाक्यार्थज्ञानं तदुत्पाद्यते जन्यते इत्यर्थकरणान्नासङ्गतिरतो मूलोक्तलक्षणे दोषमाह तादृशपरामर्शेति।। अनुमितिचरमकारणपरामर्शेत्यर्थः।

तद्विषयेति ।। परामर्शविषयेत्यर्थः ।। तत्तत्पदार्थस्मार्थौ व्याप्तिपक्षधर्मतेति ।। तदुपस्थापकतया तद्विषयकतयेत्यर्थः ।। तेन शाब्दबोधानिष्ठस्यैव प्रयोजकत्वस्य मूलेऽभिधानान्नासङ्गतिः ।। सर्वदा उदाहरस्य
परामर्शविषयीभूतपक्षानुपस्थापकत्वादुपनयपर्यन्तानुसरणम् ।। तदिति ।। मूलोक्त परामर्शजनकशाब्दधीजनकत्वमित्यर्थः ।। तथा चाऽसम्भव एव लक्षणस्य दोषः उदाहरणादावतिव्याप्तिर्वा इति भावः ।।
तदानुकूल्यमात्रेणेति ।। परामर्शविषयीभूतार्थविषयत्वमात्रेणेत्यर्थः ।। तादृशपरामर्शप्रयोजकत्वमिति । पूर्वेणान्वयः ।। इत्यादेरित्यादिना न्यायसमानार्थकस्य तावद्विसदृशवाक्यस्तोमस्य परिग्रहः ।
तथात्वं परामर्शप्रयोजकशाब्दधीजनकत्वम् ।। इत्यादिकमित्यादिना प्रतिज्ञाद्येकैकस्मिन्नतिप्रसङ्गोपग्रहः ।। मूलोक्तानयवलक्षणस्याप्युक्तदोषग्रस्तत्वात्स्वयं तल्लक्षणमाह अवयवत्वं त्विति ।। अत्र
प्रतिज्ञासमानानुपूर्वीकस्य उदासीनवाक्यस्य वारणाय सत्यन्तम् ।। न्यायान्तर्गतत्वगर्भप्रतिज्ञात्वादिकमुपादाय तदन्यतमत्वोक्तौ न्यायान्तर्गतत्वस्य पञ्चधा प्रवेशे गौरवं स्यादतः सकृदेव पा-
र्थक्येन निवेशितमिति ध्येयम् ।। न च प्रकृतपक्षहेतुसाध्यकैकविधन्यायान्तर्गतत्वस्योक्तावन्यानुपूर्वीकतादृशन्यायावयवेऽव्याप्तिरिति वाच्यम् ।। प्रकृतपक्षहेतुसाध्यकन्यायसामान्यं यद्घटितं
तदन्यत्वस्य विवक्षितत्वात् यादृशयादृशानुपूर्व्यवच्छिन्नस्य प्रकृतपक्षहेतुसाध्यकन्यायत्वं तादृशतादृशानुपूर्व्याः प्रत्येकानन्तर्गतत्वे यत्तदन्यत्वे सति इति तु फलितार्थः ।। यत्तु प्रकृतपक्षहेतुसा-
ध्यकयावन्न्यायविषयिताव्यापकविषयिताकत्वमेव प्रकृतन्यायान्तर्गतत्वमिति ।। तन्न ।। उदासीनवाक्यविषयकयावन्न्यायविषयकैकज्ञाने मानाभावेनाऽसम्भवापत्तेः ।। प्रतिज्ञाद्येकदेशेऽतिव्याप्ते-

वारणाय विशेष्यदलम्। तत्र प्रतिज्ञाद्यन्यतमत्वं प्रतिज्ञात्वादिस्वरूपमेव तद्भिन्नभेदस्य तदात्मकत्वात्। तथा च यद्दलात्मकं यत्र प्रतिज्ञाद्यन्यतमत्वं तस्य तादृप्येण न्यायावयवत्वं साध्यसम्बन्धितावच्छेदक-
यद्रूपवत्त्वं यस्य तस्य तादृप्येण साध्यव्याप्यतावत्। अन्यथा सत्ताया एकत्वाद्विशिष्टसत्ता द्रव्यत्वव्याप्येति वत् शुद्धसत्ताद्रव्यत्वव्याप्येति व्यवहारापत्तेः साध्यसम्बन्धितावच्छेदकीभूतविशिष्टसत्तात्वस्यै-
व शुद्धसत्तायां सत्त्वात्। एवञ्च क्रमिकतत्तद्वर्णविशिष्टचरमवर्णत्वपर्यवसितस्य प्रतिज्ञात्वादेरन्तिमवर्णध्वंसेऽपि न तन्मात्रेऽवयवव्यवहारः। यादृशयादृशानुपूर्व्यवच्छिन्ने तान्त्रिकाणां प्र-
कृतपक्षहेतुसाध्यकप्रतिज्ञाहेत्वादिव्यवहारः तादृशतादृशानुपूर्व्यन्यतमत्वे तात्पर्यम्। यत्तु यादृशयादृशवर्णस्तोमे तान्त्रिकाणां प्रतिज्ञादिव्यवहारः तादृशतादृशवर्णस्तोमान्यतमत्वमेव प्र-
तिज्ञाद्यन्यतमत्वं वाच्यमतो नैकवर्णेऽतिप्रसङ्गः इति। तत्तुच्छम्। तथासति प्रतिज्ञादिघटकेषु सर्वेष्वेव वर्णेषु प्रत्येकं क्रमिकतावद्वर्णसमुदायात्मकस्य प्रतिज्ञादेर्भेदसत्त्वात्तद्भिन्नभेद [redacted] त्मकस्य
प्रतिज्ञाद्यन्यतमत्वस्य प्रतिज्ञाद्यवयवमात्र एवाऽसम्भवापत्तेः। नन्वेवं माधवः पूज्यो माधवत्वादित्यादौ प्रतिज्ञाघटकस्य माधवः पूज्य इत्यस्य हेतुघटकस्य माधवत्वादित्यस्य च। निरुक्तप्रतिज्ञाद्य-
न्यतमत्वात्तमादायाऽतिव्याप्तिः। एवं पर्वतो धूमाद्गुणवान् धूमादित्यादौ धूमजगुणत्वेन साध्यतायां प्रतिज्ञादिपञ्चानामेवावयवानां घटिकायां धूमादित्यानुपूर्व्यामपि [redacted]। न चोक्तलक्ष-

ण एव प्रतिज्ञाद्यघटकत्वे सतीत्यपि विशेषणं देयमतो नैष दोषः, तथा सत्यपि प्रतिज्ञाद्यादिपर्यवसितेन प्रतिज्ञाद्यन्यतमत्वेनावयवानामितरभेदसाधने प्रतिज्ञात्वादेरेव गमकत्वसम्भवेऽन्यतमत्व-
शरीरस्य व्यर्थविशेषणत्वेन लक्षणत्वानुपपत्तेः।।[न चान्यतमत्वमत्र न प्रतिज्ञात्वादिरूपं किन्त्वातिरिक्तो भेद इति वाच्यम्।। तावताऽपि यत्र पर्वतत्वाद्यवच्छेदेन वह्नेः साध्यतायां तत्साध्यानाधिकरणे-
न यथाऽयं पर्वत इति दृष्टान्तोपन्यासः; तत्र पर्वतो वह्निव्याप्यधूमवानित्यन्तस्य उदाहरणोपनयघटकभागद्वयस्यापि पर्वतधर्मिकसाध्यव्याप्यवत्ताबोधकत्वेन प्रतिज्ञाद्यन्यतमत्वात् प्रतिज्ञाद्यघट-
कत्वाच्च· तत्राऽतिव्याप्तिः] इत्यस्वरसाल्लक्षणान्तरमाह प्रतिज्ञाद्यघटकत्वे सतीति।। प्रतिज्ञाद्येकदेशेऽतिव्याप्तिवारणार्थं सत्यन्तम्।। अत्र च स्वान्यप्रतिज्ञाविषयताव्यापकविषयताकत्वेन स्वविषयि-
ताशून्यतानाहृत्ति स्वान्यप्रतिज्ञाविषयताकत्वेन वा प्रतिज्ञाघटकत्वं निरुच्य तदन्यत्वं निवेश्यं प्रतिज्ञाविषयतायामपि तद्विषयिताव्यापकत्वादसम्भवः स्यादतः स्वान्येति प्रतिज्ञाविशेषणम्।। एवं
।दि हेत्वाद्यघटकत्वमपि निर्वाच्यम्।। यद्यपि सर्वेषामेव पदार्थानां प्रतिज्ञादिघटकत्वात्तदन्यत्वं न प्रतिज्ञादावपि, तथापि प्रतिज्ञात्वान्यतद्धर्मावच्छिन्नविषयित्वं प्रतिज्ञाविषयताव्यापकं तद्धर्मानवच्छिन्नत्या-
यान्तर्गतविषयितावत्त्वं वाच्यम्। एवं हेत्वाद्यघटकत्वमपि निर्वाच्यम्।। प्रतिज्ञाहेतुसमुदायादावतिव्याप्तिवारणार्थमुभयघटकभागद्वयाघटितत्वमिति।। ननु प्रतिज्ञादेरपि स्वीयदलद्वयघटकभाग-
द्वयघटितत्वादसम्भवोऽव्याप्तिर्वा इत्यत आह उभयत्वेति।। न चैवं निगमनेऽव्याप्तिः उपनयस्थायंपदघटितस्य अयं तस्माद्वह्निमानिति निगमनस्योपनयघटकायंपदेन निगमनघटकवह्न्यादिप-

देन च घटितत्वादिति वाच्यम्। अन्वयबोधार्थमपि पदस्यानुषङ्गेऽपि तदन्तर्भावेण निगमनत्वाभावात् तस्माद्वह्निमानित्येव निगमनाकारत्वात्। निगमनाघटकं सत् यदुपनयघटकं यच्चोपनयाघटकं सत्
निगमनघटकं तदुभयाघटितत्वं वा लक्षणे निवेश्यम्। तथा चायंपदस्य उपनय इव निगमनेऽपि घटकत्वाददोषः। न च प्रतिज्ञाघटकहेतुघटकोभयाघटितत्वादित्यादिना प्रवेशेऽपि प्रतिज्ञोपनयस-
मुदायेऽतिव्याप्तिस्तादृशोभयाघटितत्वादिति वाच्यम्। उदासीनवाक्यवारणार्थमवश्यमनुषञ्जनीयेन न्यायान्तर्गतत्वे सतीत्यनेनैव तादृशसमुदायस्य वारणात्। न्यायविषयिताव्यापकविषयि-
ताप्रतियोगिस्वरूपस्य प्रकृतपक्षहेतुसाध्यकन्यायसामान्यं यद्घटितं तदन्यत्वरूपस्य वा न्यायान्तर्गतत्वस्य प्रतिज्ञोपनयसमुदायस्य कुत्राप्यसत्त्वात्। केचित्तु प्रतिज्ञाहेत्वित्यत्र हेतुप-
दं प्रतिज्ञाघटकान्यपरं तथा च प्रतिज्ञाघटकप्रतिज्ञाघटकान्योभयाघटितत्वे सतीत्यर्थलाभान्नोक्तदोषः। एवं हेतूदाहरणे त्यादावपि उदाहरणाद्यन्तिमपदं हेत्वादिघटकान्यपरं नातो हेतू-
पनयसमुदायादावतिव्याप्तिरित्याहुः। तच्चिन्त्यम्। कस्यचिदवयवलक्षणमाह प्रतिज्ञादीति। तत्त्वाद्विशिष्टाविषयकेत्यादेस्तन्मात्राविषयकेत्यर्थः। तेन प्रतिज्ञाहेतुसमुदायस्य प्रतिज्ञार्थज्ञान-
जनकत्वेऽपि न तत्राऽतिव्याप्तिः। वाक्यत्वं न्यायान्तर्गतवाक्यत्वम्। तेन उदासीनवाक्ये नातिव्याप्तिः। अत्र तादृशान्यतमबोधजनकत्वं तत्स्वरूपयोग्यत्वमेव वाच्यम्। अन्यथा सभाक्षोभादिव-
शात्तादृशाजनकप्रतिज्ञादावव्याप्त्यापत्तेः, तथा च चैत्रभानुः प्रमेयो द्रव्यत्वादित्यादौ प्रतिज्ञैकदेशे भानुः प्रमेय इत्यत्रातिव्याप्तिः तस्यापि तादृशाविशिष्टार्थबोधस्वरूपयोग्यत्वादित्यस्वरसः। केचि-

ण एव प्रतिज्ञाद्यघटकत्वे सतीत्यपि विशेषणं देयमतो नैष दोषः, तथा सत्यपि प्रतिज्ञात्वादिपर्यवसितेन प्रतिज्ञाद्यन्यतमत्वेनावयवानामितरभेदसाधने प्रतिज्ञात्वादेरेव गमकत्वसम्भवेऽन्यतमत्वो-
शह्य व्यर्थविशेषणत्वेन लक्षणत्वानुपपत्तेः।। [न चान्यतमत्वमत्र न प्रतिज्ञात्वादिरूपं किन्त्वितरेतरो भेद इति वाच्यम्।। तावतापि यत्र पर्वतत्वाद्यवच्छेदेन वन्हेः साध्यतायां तत्साध्यतानाधिकरणे-
न यथाऽयं पर्वत इति दृष्टान्तोपन्यासः; तत्र पर्वतो वन्हिव्याप्यधूमवानित्यन्तस्य उदाहरणोपनयघटकभागद्वयस्यापि पर्वतधर्मिकसाध्यव्याप्यवत्ताबोधकत्वेन प्रतिज्ञाद्यन्यतमत्वात् प्रतिज्ञाद्यघट-
कत्वाद्व्याप्तिः] इत्यस्वरसाल्लक्षणान्तरमाह प्रतिज्ञाद्यघटकत्वे सतीति।। प्रतिज्ञाद्येकदेशे, तद्व्याप्तिवारणार्थं सत्यन्तम्।। अत्र च स्वान्यप्रतिज्ञाविषयताव्यापकविषयताकत्वेन स्वविषयि-
ताशून्यत्वान्नातिव्याप्तिः स्वान्यप्रतिज्ञाविषयताकत्वेन वा प्रतिज्ञाघटकत्वं निरुच्य तदन्यत्वं निवेश्यं प्रतिज्ञाविषयतायामपि तद्विषयिताव्यापकत्वादसम्भवः स्यादतः स्वान्येति प्रतिज्ञाविशेषणम्।। एवं
।दि हेत्वाद्यघटकत्वमपि निर्वाच्यम्।। यद्यपि सर्वेषामेव पदार्थानां प्रतिज्ञादिघटकत्वात्तदन्यत्वं न प्रतिज्ञादावपि, तथापि प्रतिज्ञात्वान्यतद्धर्मावच्छिन्नविषयित्वं प्रतिज्ञाविषयताव्यापकं तद्धर्मानवच्छिन्न्या-
यान्तर्गतविषयितावत्त्वं वाच्यम्।। एवं हेत्वाद्यघटकत्वमपि निर्वाच्यम्।। प्रतिज्ञाहेतुसमुदायादावतिव्याप्तिवारणार्थमुभयघटकभागद्वयाघटितत्वमिति।। ननु प्रतिज्ञादेरपि स्वीयदलद्वयघटकभाग-
द्वयघटितत्वादसम्भवोऽव्याप्तिर्वा इत्यत आह उभय[illegible]श्चेति।। न चैवं निगमनेऽव्याप्तिः उपनयस्थायंपदघटितस्य अयं तस्माद्वन्हिमानिति निगमनस्योपनयघटकायंपदेन निगमनघटकवन्ह्यादिप-

देन च घटितत्वादिति वाच्यम्। अन्वयबोधार्थमयंपदस्यानुषङ्गेऽपि तदन्तर्भावेण निगमनत्वाभावात् तस्माद्वह्निमानित्येव निगमनाकारत्वात्। निगमनाघटकं सत् यदुपनयघटकं यच्चोपनयाघटकं सत्
निगमनघटकं तदुभयाघटितत्वं वा लक्षणे निवेश्यम्। तथा चायंपदस्य उपनय इव निगमनेऽपि घटकत्वाददोषः। न च प्रतिज्ञाघटकहेतुघटकोभयाघटितत्वादित्यादिना प्रवेशेऽपि प्रतिज्ञोपनयस-
मुदायेऽतिव्याप्तिस्तादृशोभयाघटितत्वादिति वाच्यम्। उदासीनवाक्यवारणार्थमवश्यमनुषञ्जनीयेन न्यायान्तर्गतत्वे सतीत्यनेनैव तादृशसमुदायस्य वारणात्। न्यायविषयिताव्यापकविषयि-
ताप्रतियोगित्वरूपस्य प्रकृतपक्षहेतुसाध्यकन्यायसामान्यं यद्घटितं तदन्यत्वरूपस्य वा न्यायान्तर्गतत्वस्य प्रतिज्ञोपनयसमुदायस्य कुत्राप्यसत्त्वात्। केचित्तु प्रतिज्ञाहेत्वित्यत्र हेतुप-
दं प्रतिज्ञाघटकान्यपरं तथा च प्रतिज्ञाघटकप्रतिज्ञाघटकान्योभयाघटितत्वे सतीत्यर्थलाभान्नोक्तदोषः। एवं हेतूदाहरणेत्यादावपि उदाहरणाद्यन्तिमपदं हेत्वादिघटकान्यपरं नातो हेतू-
पनयसमुदायादावतिव्याप्तिरित्याहुः। तच्चिन्त्यम्। कस्यचिदवयवलक्षणमाह प्रतिज्ञादीति। तत्तद्विशिष्टाविषयकेत्यादेस्तन्मात्राविषयकेत्यर्थः। तेन प्रतिज्ञाहेतुसमुदायस्य प्रतिज्ञार्थज्ञान-
जनकत्वेऽपि न तत्राऽतिव्याप्तिः। वाक्यत्वं न्यायान्तर्गतवाक्यत्वम्। तेन उदासीनवाक्ये नातिव्याप्तिः। अत्र तादृशान्यतमबोधजनकत्वं तत्स्वरूपयोग्यत्वमेव वाच्यम्। अन्यथा सभाक्षोभादेव-
तादृशज्ञानजनकप्रतिज्ञादावव्याप्त्यापत्तेः, तथा च चित्रभानुः प्रमेयो द्रव्यत्वादित्यादौ प्रतिज्ञैकदेशे भानुः प्रमेय इत्यत्रातिव्याप्तिः तस्यापि तादृशाविशिष्टार्थबोधस्वरूपयोग्यत्वादित्यस्वरसः। केचि-

दित्यनेन सूचितः ।। नन्वेकलक्षणस्य लक्षणान्तरादूषकत्वात् तस्यैवेति मूलमसङ्गतमत आह तथा चेति ।। तादृशजाताविति ।। न्यायप्रयोज्यायां प्रतिज्ञादिप्रत्येकप्रयोज्यायाश्च जातावित्यर्थः ।। साधकाभा-
वइति ।। अन्यथा प्रतिज्ञाव्यवहारसम्भवाज्जातिसाधकाभाव इत्यर्थः ।। बाधकमिति ।। प्रतिज्ञादिप्रत्येकप्रयोज्यायां जाताविल्यादिः ।। न्यायप्रयोज्यजातेः प्रतिज्ञादिप्रयोज्यजातिव्याप्यत्वोपगमे साङ्कर्या-
सम्भवादिति ध्येयम् ।। पञ्चेति ।। जातय इत्यग्रेऽन्वयः ।। प्रतिज्ञादिपञ्चवाक्यैरेकबोधजननपक्षेपि साङ्कर्यमाह द्वित्रादीति ।। ननु द्वित्रादिजन्ये प्रत्येकजन्ये च शाब्दबोधे विरुद्धा एव नाना-
जातयो वाच्यास्तत्कुतः साङ्कर्यमत आह तत्रेति ।। सुतरामिति ।। प्रतिज्ञाव्यवहारानुरोधेन प्रत्येकजन्यबोधस्थले वैजात्यसत्त्वेपि द्वित्रादिजन्यबोधे तादृशजातेः कल्पकाभावादिति भावः ।। मि-
श्रमतमाह केचित्त्विति ।। मूलस्थमन्यथापदं व्याकरोति यदि चेति ।। कदाचिदिति साङ्कर्यसम्पत्तये ।। ननु नियामकाभावान्मिथो व्यभिचार एव नास्ति कुतः सङ्कर इत्यत आह एवमिति ।। ननु स-
मानियतनानाजातेरङ्गीकारात् सर्वजातीयत्वमसङ्गतमत आह एकजातीयत्वं चेति ।। तथा च सर्वमेव लक्षणमवयवान्तरेऽतिव्याप्तमिति भावः ।। सङ्करपदस्य मुख्यार्थयोगोऽत्रास्वरसः ।। वक्ष्यमाणार्थ-
स्य शाब्दाद्याभार्थमाह साध्य इति ।। अत्र जनकत्वेन हेत्वादेरवयव इत्यनेनोदासीनवाक्यस्य व्युदासः ।। न च पर्वतो वह्निमानितिप्रतिज्ञायां वह्निमत एव तादात्म्येन प्रकारत्वान्न पक्षे साध्यतावच्छेदकी-

भूतवह्नित्वविशिष्टवैशिष्ट्यावगाहिधीजनकत्वं नामार्थयोर्भेदान्वयस्याऽव्युत्पन्नतया पर्वते वह्नेः संयोगेन प्रकारत्वाभावादिति वाच्यम्।। भेदार्थकविभक्तीनामिव तदर्थकमतुबादीनामपि सम-
भिव्याहारवशेन नामार्थयोर्भेदान्वयस्य प्राच्यैरुपगमात् तन्मत एवैतल्लक्षणकरणादिति भावः।। पक्षतावच्छेदकविशिष्टे त्यस्य व्यावृत्तिमाह उदाहरणाच्चेति।। न च यत्र पर्वतत्वावच्छे-
देन साध्यासिद्धेरुद्देश्यत्वे तत्सामानाधिकरण्येन पर्वतस्य दृष्टान्तता तत्र उदाहरणेऽतिव्याप्तिरिति वाच्यम्।। पक्षतावच्छेदकनिष्ठावच्छेदकत्वावगाहितया अपि विशेष्ये प्रवेशनीयत्वा-
दिति भावः।। साध्यतावच्छेदके त्यस्य फलमाह उपनयाच्चेति।। द्रव्यव्याप्यधूमवान्पर्वत इत्युपनयाच्चेत्यर्थः।। यत्र येन सम्बन्धेन साध्यता तत्र तेनैव साध्यवैशिष्ट्यावगाहित्वं बोध्यम्।। तेन
यत्र विषयतासम्बन्धेन ज्ञानस्य साध्यतायां समवायेनैव ज्ञानं हेतुः तत्र ज्ञानव्याप्यज्ञानवानयमित्युपनये नातिप्रसङ्गः, सत्साधार्यसा च न न्यायप्रयोग इति भावः।। तयोः उदाहरणोपनययोः स-
वह्निदुमाप्यातत:।। प्रतिज्ञासहकारेण हेत्ववयवस्यापि प्रकृतपक्षधर्मिकत्वार्थविशिष्टप्रकृतसाध्यबोधकतया तत्रातिप्रसङ्गस्य दुर्वारतापत्तेः। परन्तु तत्कारणाय प्रकृतपक्षधर्मिकप्रकृ-
तसाध्यान्वयबोधत्वावच्छिन्नं प्रति जनकत्वमेव लक्षणं वाच्यम्, अत्र च प्रकृतपक्षसाध्ययोरेकमात्रस्योपादाने प्रतिज्ञामात्रेऽसम्भवापत्तिरतो द्वयमुपात्तमित्येव तत्त्वम्।। ननु प्रकृतपक्षधर्मि-

दित्यनेन सूचितः।। नन्वेकलक्षणस्य लक्षणान्तरादूषकत्वात् तस्यैवेति मूलमसङ्गतमत आह तथा चेति।। तादृशजाताविति।। न्यायप्रयोज्यायां प्रतिज्ञादिप्रत्येकप्रयोज्यायाश्च जातावित्यर्थः।। साधकाभावइति।। अन्यथा प्रतिज्ञाव्यवहारसम्भवाऽज्जातिसाधकाभाव इत्यर्थः।। बाधकमिति।। प्रतिज्ञादिप्रत्येकप्रयोज्यायां जातावित्यादिः।। न्यायप्रयोज्यजातेः प्रतिज्ञादिप्रयोज्यजातिव्याप्यत्वोपगमे साङ्कर्यासम्भवादिति ध्येयम्।। पञ्चेति।। जातय इत्यग्रेऽन्वयः।। प्रतिज्ञादिपञ्चवाक्यैरेकबोधजननपक्षेपि साङ्कर्यार्थमाह द्वित्रादीति।। ननु द्वित्रादिजन्ये प्रत्येकजन्ये च शाब्दबोधे विरुद्धा एव नानाजातयो वाच्यास्तत्कुतः साङ्कर्यमत आह तत्रेति।। सुतरामिति।। प्रतिज्ञाव्यवहारानुरोधेन प्रत्येकजन्यबोधवृत्तिवैजात्यसत्त्वेपि द्वित्रादिजन्यबोधे तादृशजातेः कल्पकाभावादिति भावः।। मिश्रमतमाह केचित्त्विति।। मूलस्थमन्यथापदं व्याकरोति यदि चेति।। कदाचिदिति साङ्कर्यसम्पत्तये।। ननु नियामकाभावान्मिथो व्यभिचार एव नास्ति कुतः सङ्कर इत्यत आह एवमिति।। ननु समानियतनानाजातेरङ्गीकारात्सर्वजातीयत्वमसङ्गतमत आह एकजातीयत्वं वेति।। तथा च सर्वमेव लक्षणमवयवान्तरेऽतिव्याप्तमिति भावः।। सङ्करपदस्य मुख्यार्थयोगोऽत्र स्वरसः।। वक्ष्यमाणार्थस्य शब्दाक्षमाभार्थमाह साध्य इति।। अत्र जनकान्तेन हेत्वादेरवयवत्व इत्यनेनोदासीनवाक्यस्य व्युदासः।। न च पर्वतो वह्निमानिति प्रतिज्ञायां वह्निमत एव तादात्म्येन प्रकारत्वान्न पक्षे साध्यतावच्छेदकी-

भूतवन्हित्वावच्छिन्नवैशिष्ट्यावगाहिधीजनकत्वं नामार्थयोर्भेदान्वयस्याऽव्युत्पन्नतया पर्वते वन्हेः संयोगेन प्रकारत्वाभावादिति वाच्यम्।। भेदार्थकविभक्तीनामिव तदर्थकमत्वादीनामपि समभिव्याहारवशेन नामार्थयोर्भेदान्वयस्य प्राचैरुपगमात तन्मत एवैतल्लक्षणकरणादिति भावः।। पक्षतावच्छेदकविशिष्टे त्यस्य व्यावृत्तिमाह उदाहरणाश्चेति।। न च यत्र पर्वतत्वावच्छेदेन साध्यासिद्धे उद्देश्यत्वे तत्सामानाधिकरण्येन पर्वतस्य दृष्टान्तता तत्र उदाहरणेऽतिव्याप्तिरिति वाच्यम्।। पक्षतावच्छेदकनिष्ठावच्छेदकत्वावगाहिताया अपि विशेष्य प्रवेशनीयत्वादिति भावः।। साध्यतावच्छेदके त्यस्य फलमाह उपनयाश्चेति।। द्रव्यव्याप्यधूमवान्पर्वत इत्युपनयाश्चेत्यर्थः।। यत्र येन सम्बन्धेन साध्यता तत्र तेनैव साध्यवैशिष्ट्यावगाहित्वं बोध्यम्।। तेन यत्र विषयतासम्बन्धेन ज्ञानस्य, साध्यतायां समवायेनैव ज्ञानं हेतुः तत्र ज्ञानव्याप्यज्ञानवानयमित्युपनये नातिप्रसङ्गः, सिषाधयिषा च न न्यायप्रयोग इति भावः।। तयोः उदाहरणोपनययोः सवन्हिर्द्रुमाप्यात ततः।। प्रतिज्ञासहकारेण हेत्ववयवस्यापि प्रकृतपक्षधर्मिकत्वार्थविशिष्टप्रकृतसाध्यबोधकतया तत्रातिप्रसङ्गस्य दुर्वारतापत्तेः। परन्तु तद्वारणाय प्रकृतपक्षधर्मिकप्रकृतसाध्यान्वयबोधत्वावच्छिन्नं प्रति जनकत्वमेव लक्षणं वाच्यम्, अत्र च प्रकृतपक्षसाध्ययोरेकमात्रस्योपादाने प्रतिज्ञामात्रेऽसम्भवापत्तिरतो द्वयमुपात्तमित्येव तत्त्वम्।। ननु प्रकृतपक्षधर्मि-

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

कयत्किञ्चित्प्रकारकशाब्दत्वावच्छिन्नं प्रति यत्किञ्चिद्धर्मिकप्रकृतसाध्यप्रकारकशाब्दत्वावच्छिन्नं प्रति वा जनकत्वं कुतो न निवेशितमित्याशङ्कयैव उदाहरणत्रयेत्यादिको ग्रन्थ इति न कश्चिद्दोषः।। व-
ह्निभूतवाक्यस्येति।। प्रतिज्ञासमानार्थकस्येति शेषः।। तस्यापि कथञ्चित्परामर्शप्रयोजकशाब्दधीजनकत्वात् यथाश्रुते सत्यन्तदलेन वारणासम्भवादाह प्रकृतन्यायेति।। साध्यव्याप्यवत्ता-
नुमितेरपि कदाचिदुद्देश्यत्वादुपनयेतिव्याप्तिरतो व्याचष्टे प्रकृतेत्यर्थ इति।। वह्निसाध्यकेत्यादिः।। न्यायावयवत्वे सति प्रकृतानुमित्यन्यूनानतिरिक्तविषयकशाब्दधीजनकत्वोक्तौ
न्यायावयवत्वात्
वह्निव्याप्यधूमसाध्यकप्रतिज्ञालक्षणस्य वह्निसाध्यकोपनयेऽतिव्याप्तिः तथापि, वह्निव्याप्यधूमसाध्यकानुमितिसमानाकारकबोधजनकत्वात् चा अतः प्रकृतद्वयमित्यर्थः।। इदन्तु चिन्त्य-
ते।। वह्निसाध्यकोपनयस्य व्यावृत्तये प्रकृतद्वयमित्यसङ्गतं साध्यादिभेदेन प्रतिज्ञाया विभिन्नतया वह्निसाध्यकप्रतिज्ञालक्षणे यत्किञ्चिन्न्यायावयवत्वे सति वह्निसाध्यकानुमि-
त्यन्यूनानतिरिक्तविषयकबोधजनकत्वमात्रस्यैव सम्यक्त्वेन तत्र प्रकृतन्यायावयवत्वपर्यन्तप्रवेशे वैयर्थ्यात्।। किन्तु वह्निव्याप्यधूमसाध्यकप्रतिज्ञालक्षणस्य वह्निसाध्यकोपनयेऽतिव्या-
प्तिवारणार्थमेव प्रथमं प्रकृतपदम्, ~~किन्तु~~ द्वितीयन्तु तस्यैव लक्षणस्य वह्निव्याप्यधूमसाध्यकोपनयेऽतिव्याप्तिवारणार्थम्, तादृशोपनयस्यापि यत्किञ्चिदनुमितिसमानाकारबोधकत्वात्।।

प्रकृतन्यायावयवत्वे सति अनुमित्यन्यूनानतिरिक्तविषयकशाब्दधीजनकत्वोक्तौ च वह्निसाध्यकप्रतिज्ञालक्षणस्य
तत्साध्यकोपनयेऽतिव्याप्तिः तस्यापि वह्निव्याप्यधूमसाध्यकानुमितिसमानाकारकबोधजनकत्वात् ४

~~न च प्रति~~ न च वह्निसाध्यकप्रतिज्ञालक्षणे अनुमित्यंशे यत्पक्षकत्वं यच्च वह्निव्याप्यसाध्यकप्रतिज्ञालक्षणे न्यायावयवांशे प्रकृतत्वं तदुभयं वाह्निसाध्यकोपनयस्य वारणाय इत्यर्थकरणान्नाऽसङ्गतिरिति वाच्यम्।। तथाप्येकलक्षणस्थप्रकृतद्वयस्य व्यावृत्तावननुधावने सन्दर्भविरोधितापत्तेरिति ध्येयम्।। प्रकृते त्वस्यार्थं व्याकरोति यादृशपक्षसाध्यकेति।। यद्धर्मावच्छिन्नसाध्यपक्षकेत्यर्थः।। न च तद्धर्मावच्छिन्नसाध्यकन्यायावयवत्वे सति तद्धर्मावच्छिन्नसाध्यकानुमित्यन्यूनानतिरिक्तविषयकशाब्दधीजनकत्वमेव तद्धर्मावच्छिन्नसाध्यकप्रतिज्ञात्वमस्तु तद्धर्मावच्छिन्नपक्षप्रवेशो व्यर्थ इति वाच्यम्।। तद्धर्मावच्छिन्नसाध्यकानुमितिविषयत्वसमनियतविषयताकत्वपर्यवसितस्य तद्धर्मावच्छिन्नसाध्यकानुमित्यन्यूनानतिरिक्तविषयकत्वस्याऽप्रसिद्ध्या प्रतिज्ञामात्र एवाऽसम्भवापत्तेः।। प्राञ्चस्तु बुद्धिविषयत्वं धूमज्ञानजन्यज्ञानीयं धूमादित्यादिन्यायस्थलीयहेत्ववयवे विषयत्वमात्रपक्षक धूमज्ञानजन्यज्ञानीयत्वसाध्यकप्रतिज्ञालक्षणस्याऽतिव्याप्तिवारणार्थमवश्यं तद्धर्मावच्छिन्नपक्षकत्वेन न्यायावयवो विशेषणीयः।। अन्यथा तत्रापि धूमज्ञानजन्यज्ञानत्वावच्छिन्नसाध्यकन्यायावयवत्वस्य विषयत्वत्वावच्छिन्नपक्षक~~न्यायावयवत्वाभावादेव व्युदासम्भवात्।। इत्थं चानुमित्यंशेऽपि~~ धूमज्ञानजन्यज्ञानीयत्वत्वावच्छिन्नसाध्यकानुमितिसमानाकारकशाब्दधीजनकत्वस्य च द्वयोः सत्त्वेनातिव्याप्त्यापत्तेः।। बुद्धिविषयत्वत्वावच्छिन्नपक्षकन्यायावयवत्वस्य हेतोर्विषयत्वत्वावच्छिन्नपक्षकन्यायावयवत्वाभावादेव व्युदासात्।। इत्थं चानुमित्यंशेऽपि तद्धर्मावच्छिन्नपक्षकत्वं देयम्। अन्यथा वह्निविषयत्वत्वावच्छिन्नपक्षकोपदर्शितप्रतिज्ञालक्षणस्य तत्र हेत्ववयवेऽतिव्याप्त्यापत्तेः तस्यापि विषयत्वत्वावच्छिन्नपक्षकप्रकृतानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकत्वादित्याहुः।।

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

तच्चिन्त्यम्। हेतोरिति। न चोक्तस्थले अनुमितावालोकनिष्ठमेव धूमज्ञानज्ञाप्यत्वं विषयः हेत्ववयवजन्ये च बोधे वह्निनिष्ठमपि धूमज्ञानज्ञाप्यत्वं भासत इत्यतिरिक्तविषयकत्वादेव उक्तहेतावतिव्याप्त्यसम्भवः इति वाच्यम्। अत एवाऽस्वरसादादिपदेन ज्ञेयाद्वाच्यवत्सर्वं प्रमेयं ज्ञेयादित्यादिस्थलीयहेतोरुपग्रहात् प्रकृतानुमितिविषयताबहिर्भूतविषयताशून्यत्वरूपस्य प्रकृतसाध्यव्याप्तिविषयकत्वरूपस्य वा वक्ष्यमाणानतिरिक्तविषयत्वस्य धूमादालोकवान् पर्वतो वह्निमान् धूमादित्यादिस्थलीयहेतावप्यनपायात्। केचित्तु हेत्ववयवजन्यबोधस्य धूमज्ञानजन्यज्ञानविषय इत्याकारकस्य आलोकेतरस्मिन् बाधदशायामुक्तस्थलेऽप्यन्यूनपदस्य व्यावृत्तिरिति व्याचक्षते। यत्तु धूमात्तेजस्वी पर्वतो वह्निमान् धूमादित्यादिस्थलीयहेतावतिव्याप्तिवारणार्थमेव अन्यूनपदम्, तत्र वह्निनिष्ठस्यैव धूमज्ञानज्ञाप्यत्वस्याऽनुमितौ हेतुजन्यबोधे च भानादिति। तत्तुच्छम्। तथापि प्राथमिकेन हेतुजन्यबोधेनाकाङ्क्षादिसाम्याद्धूमज्ञानज्ञाप्यत्वत्वेन द्रव्यत्वादिनिष्ठस्य धूमज्ञानज्ञाप्यत्वस्य विषयीकरणादनतिरिक्तविषयकत्वासम्भवात्। ननु निगमनस्य पक्षतावच्छेदकरूपेण पक्षबोधकत्वादन्यूनपदेनैव तद्वारणं सम्भवतीत्यत आह यद्यपीति। सम्बन्धित्वप्रकारेण पक्षबोधकं सत्त्वादिकमेव निगमनेऽस्तीत्यतः साक्षादिति। पक्षतावच्छेदकरूपेणेत्यर्थः। न्यूनतेति। निगमनस्य प्रतिज्ञासमानाकारबोधजनकतायामेव पुनरुक्तप्रतिसन्धानादबाधितत्वादिरूपबोधकत्वं तस्य लभ्यते नान्यथा इति भावः। अयमादीत्यादिपदादियमिति स्त्रीलिङ्गे नपुंसकलिङ्गे चेदमित्यस्य परिग्रहः। तथेति। अन्यूनविषयकत्वमित्यर्थः।

इत्थंमेव चेति ।। अयमादिपदादनुमित्यादन्यूनविषयकज्ञानजनकत्वेनैवेत्यर्थः ।। ननु निगमनस्य कथञ्चित्परामर्शप्रयोजकत्वान्न परामर्शहेतुरिति मूलासङ्गतिरित्यत आह तदर्थश्चेति ।। न परामर्श-
हेतुरिति ।। इदञ्च सत्यन्तमूलस्य यथाश्रुतार्थमभिप्रेत्य ।। वस्तुतः परामर्शपदस्य ज्ञानवाचकतया निगमनं नान्यूनानतिरिक्तविषयकज्ञानहेतुरित्येवार्थो बोध्य इति ध्येयम् ।। येनेति ।। सत्यन्त-
स्य प्रकृतन्यायावयवार्थकतया व्याख्यातत्वादिति भावः ।। निष्कृष्टेति ।। प्रकृतानुमित्यन्यूनानतिरिक्तविषयकज्ञानजनकत्वे सति प्रकृतन्यायावयवत्वरूपमित्यर्थः ।। तदपि निगमनमपि ।। अबा-
धितत्वादेरित्यादिपदात्सत्प्रतिपक्षस्य सङ्ग्रहः ।। अबाधितत्वादेरपदार्थतया निगमनबोध्यत्वासम्भवादाह तद्बोधेति ।। विशिष्टेति ।। व्याप्तिविशिष्टपक्षधर्मताविशिष्टहेतोर्यः साध्ये ज्ञान-
वाप्यत्वलक्षणः सम्बन्धस्तद्बोधकतयेत्यर्थः ।। अत्र च निगमनस्यानुवादकत्वप्रतिसन्धानोत्तरमेवाऽबाधितत्वादेर्मानसग्रहोत्पत्त्या कथञ्चित्तद्बोधौपयिकत्वं बोध्यम् ।। मिश्रमतमुपन्यस्यति
यत्त्विति ।। तादीति ।। अनतिरिक्तपदमित्यर्थः ।। तेनोक्तोदाहरणे न । पृथिव्यामिति । पार्थिवीतरत्वावच्छिन्नभेदाभावस्यैव तेनाऽबोधनात् ।। तथा चानुमितिन्यूनविषयकत्वादन्यूनपदेनैव वारणं सम्भ-
वतीति भावः ।। ननूक्तस्थलेपि तात्पर्यभ्रमेण पृथिव्यामितरभेदप्रकारकबोधः सम्भवत्येवेत्यत आह तात्पर्येति ।। तादृशबोधेति ।। अनुमित्यन्यूनविषयकबोधेत्यर्थः ।। अतिप्रसक्तत्वात् अव-
यवान्तरेपि सत्त्वात् ।। नन्ववयवान्तरे तत्सत्त्वेपि न क्षतिः, तस्यातिरिक्तविषयकबोधजनकतया अनतिरिक्तपदेनैव तद्वारणसम्भवादत आह न चेति ।। तावतापीति ।। तात्पर्यभ्रमेणापीत्यर्थः ।।

तथात्वस्य अन्यूनविषयकबोधजनकत्वस्य सम्भवः।। यत्रेत्यादेरिति।। तात्पर्यं प्रमादप्येकदेशस्यैवानुमित्यन्यूनविषयकज्ञानजनकत्वं न तु समुदितोदाहरणस्य, तस्य च न्यायावयवार्थकेन सत्यन्तदलके-
नैव वारणं सम्भवतीति भावः।। नायमादीति।। तथा चान्यूनविषयकत्वाभावादेव निगमनव्युदासात्तद्वारणार्थमनतिरिक्तपदं व्यर्थमिति भावः।। नन्वेवं न्यूनतातादवस्थ्यमत आह वाक्येति।।
उपनयनिगमनस्वरूपवाक्यघटितैकवाक्यतावलाद्द्विविशेषवैशिष्ट्यावगाहिबोधवत्वादेव विशिष्टस्य प्रकृतसाध्यविशिष्टप्रकृतपक्षस्य लाभादित्यर्थः।। तथा च विनाप्यनुषङ्गमबाधितत्वादिबोधकस्य
पुनरुक्तत्वस्य लाभान्न न्यूनत्वमिति भावः।। यत्र पक्षतावच्छेदकधर्मावच्छेदेन साध्यसिद्धिरुद्देश्या तत्र तदवच्छेदेनैव साध्यस्य पुनरुक्तत्वज्ञानमबाधितत्वादिग्रहोपयोगि, तच्च वाक्यैकवाक्यतया
बोधान्न सम्भवति वह्निव्याप्यधूमवत्पर्वतत्वावच्छेदेन वह्निमत्त्वग्रहेऽपि पर्वतत्वावच्छेदेन वह्निमत्त्वाग्रहादन्वयितावच्छेदकधर्मावच्छेदेनैवान्वयस्य व्युत्पन्नत्वादित्यनुषङ्गपक्षस्यैव सम्यक्त्वमित्या-
वेदयितुं यदि चेत्युक्तम्।। सामान्यतस्त्वधिकरणत्वप्रकारेण उपनयस्य वारणादित्यग्रेऽन्वयः।। न च पक्षतावच्छेदकविशिष्टसाध्यवैशिष्ट्यावगाहित्वरूपमेवाऽन्यूनविषयत्वं निरुच्य उपनयवारणसम्भ-
वादेदमसङ्गतमिति वाच्यम्।। यत्राधिकरणं प्रमेयं ज्ञेयत्वादित्यादिक्रमेण न्यायस्तत्रोपनयस्य पक्षतावच्छेदकविशिष्टसाध्यवैशिष्ट्यावगाहित्वनियमादधिकरणत्वावच्छेदेन प्रमेयत्वासिद्धेरुद्देश्यत्वादेव
सिद्धसाधनायोगादिति भावः।। अथानुमित्यन्यूनविषयत्वमेवाऽवश्यं पक्षविशेष्यकसाध्यप्रकारकत्वं वाच्यं तथा च तत्रैव पक्षनिष्ठमुख्यविशेष्यकत्वनिवेशेनोपनयवारणसम्भवात्तदर्थं विशेष-

णान्तरमयुक्तम्, स्वव्यापकसाध्यकत्वस्य साध्यवदन्यावृत्तित्वस्यैव वाऽनुमितिहेतुत्वमते साध्यसामानाधिकरण्यांशस्य उपनयाविषयतया तत्राऽतिव्याप्त्ययोगश्चेत्यत आह यत्र चेति।। ताद्रूप्येणेति।।
पक्षतावच्छेदकसाध्यतावच्छेदकरूपाभ्यामित्यर्थः।। तथा च पर्वतो वह्निमान् धूमात् यो यो धूमवान् स स वह्निमान् यथा पर्वत इत्यादिस्थलीयोदाहरणस्य पर्वतो वह्निमान् वह्नेरित्यादिस्थलीयस्य
वह्निव्याप्यवह्निमांश्चायमित्युपनयस्य च वारणायाऽनतिरिक्तपदम्।। तत्रापि यद्रूपेण पक्षत्वं तदन्यरूपेणैव दृष्टान्तमते निरुक्तोदाहरणेऽतिव्याप्त्यसम्भवादुपनयपर्यन्तानुसरणम्।। यत्तु दृष्टान्तस्यो-
दाहरणाघटकत्वपक्षे तत्राऽतिव्याप्त्यसम्भवादुपनयपर्यन्तानुधावन[illegible]मिति।। तत्तुच्छम्।। तथासत्यग्रे सामानाधिकरण्येन दृष्टान्तमुपादाय उदाहरणेऽतिव्याप्तिप्रदर्शनस्य सन्दर्भविरोधापत्तेः।।
न च साध्यहेतुतुल्यन्याय एवाऽसम्भवीति कुतस्त[illegible]दुपनयेऽतिव्याप्तिः उद्देश्यतावच्छेदकविधेययोरैक्येन यो यो वह्निमान् [illegible] स वह्निमानित्युदाहरणस्य निराकाङ्क्षत्वेनासम्भवादिति वाच्यम्।। यद्यो-
गात्साध्यतावच्छेदकस्य वह्निव्यापकत्वविशिष्टवह्नेरेव विधेयतया दण्डवान् रक्तदण्डवानित्यादेरिवोक्तोदाहरणस्यापि साकाङ्क्षत्वसम्भवात् व्यापकत्वस्य तत्र संसर्गमर्यादया भानमतेऽपि संयोगमा-
त्रेण वह्निमति व्यापकत्वविशिष्टसंयोगेन वह्निमत्त्वान्वयबोधकाभावा[illegible]त्, एकसम्बन्धेनैवोद्देश्यतावच्छेदकस्य विधेयतायां निराकाङ्क्षत्वादिति ध्येयम्।। नन्वुक्तस्थले पक्षे साध्यसन्देह-
विरहान्न्यायप्रयोग एव नास्ति कुत्रोदाहरणातिव्याप्तिरत आह सिषाधयिषेति।। ननु सिषाधयिषया न्यायप्रयोगो विवादग्रस्त इत्यत आह यत्र चेति।। पर्वतत्वसामानाधिकरण्येन साध्यासिद्धे-

६

द्देश्यत्वे सिद्धसाधनापत्तेः पर्वतत्वावच्छेदेनेत्युक्तम्।। यद्रूपेण पक्षत्वं तद्रूपेणैव दृष्टान्तवचनमिति प्रवादरक्षार्थमेतत्पदम्।। उदाहरणस्येति।। यद्यपि यत्र पर्वतत्वावच्छेदेन जातिमत्त्वस्योद्देश्यतायां जातिमत्पर्वतस्य तादात्म्येन हेतुत्वं तत्रावयवमात्रेऽतिव्याप्तिसम्भवादुदाहरणमात्रोक्तिरसङ्गता, तथापि पक्षमुख्यविशेष्यकसाध्यवत्तावगाहित्वरूपस्याऽन्यूनविषयकत्वस्य प्रवेशेऽवयवान्तरातिव्याप्त्यसम्भवात्तन्मात्रानुसरणमिति भावः।। ननु यन्मते दृष्टान्तमनन्तर्भाव्यैवोदाहरणशरीरं तन्मते नोदाहरणेऽतिव्याप्तिः सम्भवतीत्यत आह सत्यन्तस्य वेति।। ननूक्तदृष्टान्तस्य पर्वतत्वसामानाधिकरण्येन वह्निमत्त्वबोधकत्वेऽप्यनुमितिविषयीभूतस्य पर्वतत्वावच्छेदेन वह्निमत्त्वस्याऽबोधकत्वादन्यूनपदेनैव तद्वारणं सम्भवतीत्यत उक्तं सत्यन्तस्य वेत्यपि वदन्ति।। परमेश्वरो देवः सौदामिनी द्युम्नमित्यादिप्रतिज्ञैकदेशस्य मेश्वरो देवः दामिनी द्युम्नमित्यादेरपि प्रकृतानुमितिसमानाकारबोधजनकत्वात्तत्रातिव्याप्तिरत उक्तमवयवाघटकेति।। अवयवाघटकत्वे सति यन्न्यायान्तर्गतं तत्त्वे सतीत्यर्थः।। हेत्वन्तस्य प्रतिज्ञादिहेत्वन्तभागस्य। न्यायस्य पूर्वप्रतीकं व्याप्तिमुक्त्वा परप्रतीकोपि तामाह अयमादीति।। हेतुघटितत्वोक्त्यापि हेत्वन्तभागस्य वारणसम्भवादाह अयमादीत्यपि काश्चित्।। न चोपनयादिनिगमनान्तभागेऽप्यतिव्याप्तिसम्भवादयमादिपर्यन्तानुसरणं व्यर्थमिति वाच्यम्।। पक्षतावच्छेदकमात्रावच्छिन्नविशेष्यकसाध्यप्रकारत्वरूपान्यूनवि-

षयकत्वविवक्षयापि तद्वारणसम्भवादिति भावः ।। तत अनतिरिक्तपदम् ।। न च साध्यतावच्छेदकधर्ममात्रावच्छिन्नविधेयताकत्वरूपमन्यूनविषयकत्वं निरुच्यैव प्रतिज्ञादिहेत्वन्तभागादेर्वारणसम्भवादनतिरिक्तपदं व्यर्थं तत्र धूमज्ञानज्ञाप्यवह्नित्वावच्छिन्नस्यैव विधेयत्वादिति वाच्यम् ।। विशिष्टवैशिष्ट्यविषयतातिरिक्तशाब्दधीविषयत्वस्याऽनङ्गीकारात्तादृशविषयतायाः प्रकृतेपि सत्त्वादनतिरिक्तपदस्यार्थकत्वार्थमेव तावद्दूरविवक्षणाच्च ।। वस्तुतः प्रतिज्ञासहकारेण हेत्ववयवस्य उपनयसहकारेण निगमनस्य अनुमित्यन्यूनविषयकत्वात्, सत्यन्तस्यावयवार्थकत्वेपि हेतुनिगमनयोर्वारणार्थमेवाऽनतिरिक्तपदं देयम् । न ह्यन्यूनविषयकशाब्दत्वावच्छिन्नजन्यतानिरूपितं जनकत्वं निरुक्तौ निविष्टं येन केवले हेतौ निगमने चातिव्याप्तिर्न स्यादिति युक्तमुत्पश्यामः ।। यद्यपीति ।। सर्वस्य पक्षत्वे व्यतिरेकिणः साध्यस्यांशतो बाधितत्वात्तत्साध्यको न सन्न्यायः इति केवलान्वयिनः साध्यतयोक्तेरेव ।। अभिधेयपदं सम्पातायातम् ।। सर्वत्वावच्छिन्नस्यैव पक्षत्वे प्रकृते दोषसम्भवादतिरिक्तेति ।। प्रकृतानुमितिविषयतातिरिक्तेत्यर्थः ।। तद्विषयतायाः केवलान्वयित्वादिति भावः ।। न चोक्तेति ।। वाच्यमित्यग्रेऽन्वयः ।। कोटीति ।। प्रमेयत्वाभावरूपेत्यादिः ।। सन्दिग्ध एव न्यायप्रवृत्तेर्विप्रतिपत्तेरनावश्यकत्वादाह संशयस्य चेति ।। सन्दिग्धसाध्यके धर्मिण्येव न्यायप्रवृत्तेरिति भावः ।। ननु खण्डशः प्रत्येकपदार्थप्रसिद्ध्यैव सर्वं प्रमेयं न वा इत्याकारकसंशयः सम्भवत्येव सर्वसदृशः पर्वतो वह्निमान् इत्यादिप्रतिज्ञान्तरेऽव्याप्तितादवस्थ्यञ्च तत्र कोट्यप्रसिद्धेर्वक्तुमशक्यत्वादत आह प्रकृतेति ।। प्रकृतानुमितिविषयतासमव्यापकविषयताकत्वमित्यर्थः ।। सामानाधिकरण्यांशस्य वैयर्थ्येनाऽप्रविष्टत्वादिति ध्येयम् ।। सर्वपक्षोपनयमात्रे तिव्याप्तिरतः कल्पान्तरमाह प्रकृतानुमितीति ।। वक्तव्यमित्यस्यान्यू-

नानातिरिक्तत्वेनेत्यादिः। सकलाभिधेयवृत्तिधर्मवादिदं द्रव्यमिति योजना। आभिधेयेति सम्पातायातम्। संशयकोटिप्राप्त्यर्थं द्रव्यत्वस्य व्यतिरेकेण साध्यतयोक्तेरवः। अत्रानुमिताविव उपनयेऽपि वस्तुमात्रस्यैव प्रकारत्वात्तत्रातिव्याप्तिरिति भावः। ननु निरवच्छिन्नप्रकृतानुमितिप्रकारत्वसमव्यापकनिरवच्छिन्नप्रकारताकत्वं वाच्यं तथा चानुमितौ स्वरूपतोऽप्रकाराणामभावत्वप्रतियोगित्वादीनामुक्तस्थलीयोपनये व्याप्तिघटकतया स्वरूपतः प्रकारत्वान्न तत्रातिव्याप्तिरत आह सकलाभिधेयानिष्ठेति। तथा च सकलाभिधेयनिष्ठाभावप्रतियोग्याकाशाभाववदिदं द्रव्यमाकाशादित्यादितादात्म्यसम्बन्धावच्छिन्नहेतुकस्थलीयोपनयेऽतिव्याप्तिः तत्रानुमितावुपनये च स्वरूपतः प्रकाराणां तुल्यत्वादिति भावः। समव्याप्तत्वं विहाय समसंख्यप्रकारत्वोक्तौ न कोऽपि दोष इति ध्येयम्। प्रकृतपक्षकेत्यादि। पक्षतावच्छेदकधर्मावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकधर्मावच्छिन्नप्रकारकत्वमित्यर्थः। तदन्यूनविषयकत्वं प्रकृतानुमित्यन्यूनविषयकत्वम्। अत्र यदि निरूढविषयताविलक्षणविषयताशून्यत्वरूपमतातिरिक्तविषयकत्वं निवेश्यते, तदा पक्षादेशि प्रकृतत्वानुक्तौ वह्निमद्द्रव्यं तेऽस्त्वी पर्वतो वह्निमान् वह्निमद्द्रव्यादित्यादिस्थलीये तादात्म्येन हेत्ववयवेऽतिव्याप्तिः तस्यापि द्रव्यत्वेनैव पक्षे प्रकृतसाध्यवैशिष्ट्यावगाहित्वात्। यदि तु प्रकृतव्याप्यविषयकत्वरूपमेवाऽनतिरिक्तविषयकत्वं निवेश्यते, तदा पर्वतो वह्निमान् वह्निमद्द्रव्यादित्यादिस्थलीयहेतावतिव्याप्तिवारणार्थं तद्ध्येयम्। साध्यीयप्रकृतत्वस्य व्याहतिं स्वयमेवाह प्रकृतपञ्चम्यर्थेति। ज्ञापकत्वादिरूपो यः पञ्चम्यर्थः तत्पक्षकेत्यर्थः। तथा च हेतुत्वं वाच्यवत् प्रमेयत्वादित्यादौ हेत्ववयवस्य पञ्चम्यर्थहेतुत्वे प्रकृतपक्षे वाच्य-

विशेषे मेयत्वत्वरूपसाध्यस्य वैशिष्ट्यावगाहित्वेपि साध्यतावच्छेदकीभूतवाच्यत्वप्रकारेणैव तद्वैशिष्ट्यानवगाहनान्नातिव्याप्तिः, हेतुत्वं वाच्यवत् वाच्यादित्यादिकन्तु न न्यायः सिद्धसाधनादिति भावः।
इदञ्च व्याप्यविषयत्वरूपमनतिरिक्तविषयकत्वं लक्षणे प्रविष्टमित्यभिप्रेत्योक्तम्। प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहिताविलक्षणविषयताशून्यत्वरूपस्य तस्य प्रवेशे तु ज्ञापकं प्रमेयत्वात्
वाच्यत्ववान्निष्ठधर्मवत् प्रमेयत्वादित्यादौ पर्वतो वह्निमत्पर्वतात्तेजस्वी वह्निमत्पर्वतादित्यादौ च हेत्ववयवस्य वारणाय साध्यस्य प्रकृतत्वं वाच्यमिति ध्येयम्। अत्र च प्रकृतसाध्यवैशिष्ट्यविष-
यकत्वं साध्यतावच्छेदकधर्मावच्छिन्नविधेयताकत्वपर्यवसितं ग्राह्यम्। तेन नव्यमते ज्ञानज्ञाप्यत्वस्यैव हेतुपञ्चम्यर्थत्वाद्विषयत्वं धूमज्ञानजन्यज्ञानीयं धूमादित्यादौ हेत्ववयवस्य प्रकृत-
पक्षे प्रकृतसाध्यवैशिष्ट्यावगाहिबोधजनकत्वेपि न तत्रातिव्याप्तिः। ज्ञानज्ञाप्यत्वरूपपञ्चम्यर्थैकदेशस्य ज्ञानजन्यज्ञानस्य तदर्थविषयतायां विधेयत्वेनान्वयात् हेतुद्वयोपस्थाप्ययोरे-
णोद्देश्यविधेयभावेनान्वयस्य व्युत्पन्नत्वादिति वदन्ति। तादृशेति। प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यविषयताविलक्षणविषयताशून्यत्वमर्थः। तादृशविषयताविलक्षणविषयत्वमत्र
न तादृशविषयताभिन्नत्वं सर्वस्यैव प्रतिज्ञाजन्यबोधस्य तादृशविशिष्टविषयताभिन्नसाध्यादिप्रत्येकविषयतावत्त्वेन प्रतिज्ञामात्र एवाऽसम्भवापत्तेः किन्तु तादृशविषयताव्यापकत्वम्,

तथा च तत्र साध्यपक्षयोः प्रकृतत्वानुक्तौ प्रतिज्ञायामसम्भवः स्यात् तज्जन्यबोधविषयतामात्रस्यैव सामान्यतः साध्यतत्पक्षावगाहित्वाव्यापकत्वात् अत स्तदुपात्तम्।। ननु ज्ञानभेदेन स्वरूपसम्बन्धात्मिकानां प्रतियोगिताव्यक्तीनां भेदात् प्रतिज्ञाजन्यबोधानामपि न तादृशविषयताव्यापकविषयताशून्यत्वमित्यसम्भवः समानाकारस्थानीयविषयतानामैक्यस्य विवादग्रस्तत्वात् अतः प्रकारान्तरमाह प्रकृतहेतुकेति।। अन्वयव्याप्तित्वेन प्रवेशे व्यतिरेकिनिगमनेऽतिव्याप्तिरतः सिद्ध्यौपयिकानाम्। प्रकृतहेतुमत्तानिश्चयोत्तरप्रकृतसाध्यानुमितित्वघटितधर्मावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकीभूतविषयिताशून्यत्वमर्थः।। तेन वह्निव्याप्यधूमवान्निरूपितसंयोगेन पर्वते वह्नेः साध्यतायां पर्वतो वह्निमान् धूमादित्यादिस्थलीयप्रतिज्ञायां सम्बन्धमर्यादया वह्निधूमयोर्व्याप्यावगाहित्वेपि न तत्राव्याप्तिः।। यद्यपि विवक्षेयं न्यायावयवत्वगर्भनिरुक्तावेवान्यथा तद्धानेपि हेत्वन्तभागेतिव्याप्तिरिति वक्ष्यते तथा च निगमनस्यायमादिपदाघटितत्वकल्पने अन्यूनपदेनैव तद्वारणसम्भवः, तथापि अन्वयव्याप्तीनामपि नानात्वादेकोपादानेऽन्यामनन्तर्भाव्य पक्षतावच्छेदकसामानाधिकरण्येन दृष्टान्तवत्युदाहरणेऽतिव्याप्तिवारणार्थमुक्तानुगमस्यावश्यकत्वादिति भावः।। प्रकृतहेतुप्रवेशस्य फलमाह वह्निव्याप्येति।। वह्निव्याप्यालोकवत्पर्वतत्वेन पक्षत्वे तद्रूपावच्छिन्ने वह्नेः संशयासम्भवान्न्याय एव नावतरतीत्यतः

सधर्मेति ।। यत्तु वन्हिव्याप्यालोकवत्तया गृहीते पर्वते वन्हिसाध्यकहेत्वाकाङ्क्षा न सम्भवत्यतः सधर्मपदमिति । तन्तुच्छम् । पर्वतधर्मिकवन्हिसिद्धौपयिकहेत्वाकाङ्क्षानुपपत्तावपि वन्हिव्याप्यालोकवत्पर्वत-
त्वावच्छिन्नधर्मिकवन्ह्यनुमित्युपयुक्तहेत्वाकाङ्क्षायां बाधकाभावात् प्रकृतपक्षे प्रकृतसाध्यवत्त्वं कुत इत्याकाङ्क्षयैव हेतुप्रयोगात् इति । प्रकृतत्वेन साध्यप्रवेशस्य फलमाह इन्धनव्याप्येति । तस्याः प्रतिज्ञा-
याः । इदन्तु बोध्यम् । सत्यन्तस्य न्यायावयवार्थकत्वपक्ष एवायं कल्पोऽभिहितः, तेन अवयवाघटकन्यायान्तर्गतस्य हेत्वन्तभागस्य प्रकृतव्याप्तिविषयकत्वेपि न तत्रातिव्याप्तिः । न चैवमनतिरिक्तपदवैयर्थ्य-
म् अन्यूनानियतविषयकत्वाभावेनैवावयवान्तरव्युदासादिति वाच्यम् । पर्वतत्वावच्छेदेन वन्हेः साध्यतायामेतत्पर्वतत्वेन दृष्टान्तवत्युदाहरणेतिव्याप्तिवारकत्वात् । न च तथापि पर्वतो वन्हिमान् वन्हिमत्पर्वता-
दित्यादौ हेत्ववयवेतिव्याप्तिः तस्यापि व्याप्तिविषयकत्वेनाऽनतिरिक्तविषयकत्वात् पक्षे साध्यवैशिष्ट्यावगाहित्वेनाऽन्यूनविषयकत्वाच्च, पर्वतत्वावच्छेदेन साध्यसिद्धेरुद्देश्यत्वादेव सिद्धसाधनासम्भवा-
दिति वाच्यम् । पक्षमुख्यविशेष्यकसाध्यवैशिष्ट्यावगाहित्वरूपान्यूनविषयकत्वविवक्षयैव तद्वारणात् पञ्चम्यर्थहेतुत्वस्यैव तन्मुख्यविशेष्यत्वादिति दिक् । केचित्तु सत्यन्तस्यावयवाघटकन्यायान्त-
र्गतत्वार्थकत्वेपि हेत्वन्तभागेतिव्याप्तिः तत्रावयवाघटक इत्यत्रावयवाघटको यस्यावयवस्याघटकमित्येकसमासद्वयाश्रयेणाऽवयवद्वयाघटितत्वे सत्येवावयवाघटकत्वस्य लाभात् प्रथमेन हेत्व-
न्तस्य द्वितीयेन च चित्रभानुः प्रमेय इत्यादिप्रतिज्ञैकदेशे भानुः प्रमेय इत्यादावतिव्याप्तिवारणादित्याहुः । नन्वेवं वन्हिव्याप्यधूमवत्पर्वतो वन्हिमान् धूमादित्यादौ प्रतिज्ञायामव्याप्तिः स्यात्

प्रकृतव्याप्तिविषयकत्वात्, पक्षतावच्छेदकीभूतव्याप्तिभिन्नाया एव व्याप्तेर्विधेयकोटिनिविष्टतया उपनयस्योद्देश्यतावच्छेदकविधेययोरैक्यासम्भवेन निराकाङ्क्षत्वायोगादत आह वह्निव्याप्येति।। संयोगे-
न साध्यतास्थलेऽव्याप्तिमुक्त्वा समवायेन साध्यतास्थले तामाह सत्त्वादीति।। अन्यथा विनाव्याकाङ्क्षामभिधाने।। अतिप्रसङ्गादिति।। हेत्ववयवद्वयस्याप्युद्भावनप्रसङ्गादित्यर्थः।। अत एव आकाङ्-
क्षाविरहादेव।। नैकदेति।। समयबन्धं विनेत्यादिः।। तेनाऽन्वयव्यतिरेकोभयव्याप्तिबोधकोदाहरणाकाङ्क्षाप्रयोज[illegible]कावयवत्वेन माणीकृता वक्ष्यमाणस्य अन्वयव्यतिरेकिहेत्ववयवलक्षणस्य नासङ्गतिः॥
समयबन्धानुरोधेन व्याप्तिद्वयबोधकोदाहरणसम्भवादिति ध्येयम्।। उभयव्याप्तीत्यत्र व्याप्तिपदमेकजातीयव्याप्तिपरमतो नाऽसङ्गतिरिति परमार्थः।। यदि मीमांसकमतेनैव मया पक्षे साध्यं साध-
नीयमित्यादिसमयबन्धवशाद्धूमलिङ्गान्वयव्याप्तिं पक्षतावच्छेदककोटौ निवेश्य व्यतिरेकव्याप्त्या धूमहेतोरुदाहरणोत्थानसम्भवस्तदा तत्रत्यप्रतिज्ञायामव्याप्तिरिति तु चिन्तनीयम्।। यदि चेति।। सूक्ष्म-
मीक्ष्यत इत्यन्वयः।। खले कपोते न्यायेनैव शाब्दधीस्वीकारे पचतीत्यादेः पाककृतिमत्त्वावच्छिन्नसाध्यबोधकत्वासम्भवात् वैयाकरणमते पाककर्तुरेव तादात्म्यसम्बन्धेन तत्र साध्यत्वाच्चाह अ-
यं गौरीति।। आदिना घटो नेतराणि इत्यादेः सङ्ग्रहः।। ननु व्युत्पत्तिविशेषादयं गौरित्यादिप्रतिज्ञायाः पक्षे साध्यीभूतगोत्वविशिष्टज्ञानाजनकत्वात् कथं तत्रोपदर्शितज्ञानजनकत्वमत आह तादा-
त्म्येनेति।। गोत्वादेः साध्यतायां स्वयं बाधकमाह गोत्वत्वादीति।। अनुपस्थित्येति।। गवादिपदादनुपस्थित्येत्यर्थः।। तथा च साध्यतावच्छेदकरूपेण साध्यवत्त्वबोधकस्यैव वाक्यस्य प्रतिज्ञा-

त्वान्न तस्य गोत्वसाध्यकप्रतिज्ञात्वसम्भवः इति ।। ननु शुद्धगोत्वादेः साध्यतायां निरवच्छिन्नतद्बोधकवाक्यस्यैव प्रतिज्ञात्वं स्थास्यतीत्यत आह पदार्थतावच्छेदकेति ।। घटादन्य इत्यादावेकदेशेऽपि
पञ्चम्यर्थान्वयाऽज्ञातावित्युक्तम् ।। ननु पर्वतो वह्निमानित्यादिस्थलेऽनुमितौ तादात्म्येन वह्निमानेव साध्यमित्यत आह तथैवेति ।। वह्नौ साध्यतायामित्यर्थः ।। अन्यथा वह्निमद्व्याप्य-
वांश्चायमित्येवोपनयः स्यादिति भावः ।। अभेद इति ।। भासत इति पूर्वेणान्वयः ।। तथा च वह्न्यादिसाध्यकप्रतिज्ञाया वह्न्यादिसाध्यकानुमित्यन्यूनाविषयकज्ञानाजनकत्वात्तत्राव्याप्ति-
रिति भावः ।। ननु साध्यपक्षभेदेन प्रतिज्ञाया भिन्नत्वाद्वह्न्यादिस्थले साध्यवद्भेदबोधकत्वमेवाऽन्यूनाविषयकत्वं वाच्यमत आह एवमिति ।। तथा च भिद्यत इत्यत्र भेदाश्रयत्वप्रकारकस्य
भिन्नमित्यत्र च तादात्म्येन भेदाश्रयप्रकारकस्य बोधस्य जनिकायां भेदसाध्यकप्रतिज्ञायामेकविधबोधस्य उपादानेऽन्यादृशबोधजनिकायां तस्यामव्याप्तिरिति भावः ।। यादृशपक्षसाध्यकेति ।। ब-
हुवचनं तथाविधयावत्प्रतिज्ञालाभार्थम् ।। अन्यथा पृथिवीपक्षकेतरभेदसाध्यकप्रतिज्ञाया तादृशप्रतिज्ञास्थलीयकतिपयबोधानिवर्तनीयसंशयनिवर्तकत्वेन तत्राव्याप्तिप्रसङ्गात् ।। ए-
वञ्च यत्पक्षिका यत्साध्यिका यावत्यः प्रतिज्ञाः प्रकृतपक्षे यादृशयादृशबोधजनकत्वेन सम्प्रदायसिद्धा इत्युक्तावसम्भवः स्यादतो यादृशपक्षसाध्यकेति यादृशत्वेन पक्षसाध्ययोर्द्वयोरुपादान-

मिति ध्येयम्।। पक्ष इति।। प्रकृतपक्षतावच्छेदकाविशिष्टधर्मिणीत्यर्थः।। तेन रूपान्तरावच्छिन्ने पक्ष एव साध्यस्य यादृशो बोधस्तदनिवर्तनीयसंशयानिवर्तकत्वेऽपि प्रतिज्ञासु नाऽसम्भवः।।
वस्तुतः पक्षतावच्छेदकाविशिष्ट इत्यपहायात्रापि यादृशधर्मावच्छिन्नधर्मिणीत्येव वक्तुमुचितम्, अन्यथा संयोगेन वन्ह्यवच्छिन्न एव पर्वते द्रव्यत्वस्य साध्यतायां वन्हिमत्पर्वतो द्रव्यमित्या-
दिप्रतिज्ञायां वन्हिमदभिन्न एव द्रव्यत्वबोधजनकत्वेनाऽव्याप्तेरिति ध्येयम्।। तादृशानामिति।। प्रकृतपक्षविशेष्यकतद्धर्मावच्छिन्नविधेयताकबोधानामित्यर्थः।। तावद्बोधानिवर्त्यत्वं नक-
स्यापि संशयस्य अत उक्तमन्यतमेनेति।। अपिशब्दः सामान्याभावार्थः।। तेन कृतेः साध्यतायां कृतिप्रकारकबोधानिवर्त्यस्य कर्तृसंशयस्य निवर्तको यः कर्तृप्रकारको बोधस्तज्जनकत्वेऽपि
चैत्रः कर्ता इति प्रतिज्ञायां नाव्याप्तिः।। अनिवर्तकेत्यन्तेन अनतिरिक्तविषयकत्वं व्युत्पादितम्।। तत्प्रयोजनञ्च हेत्वन्तभागस्य वारणमित्युक्तमेव;* तावद्बोधानिवर्त्यो यो वन्हिधूमज्ञान-
ज्ञाप्यो न वा इति संशयस्तन्निवर्तकत्वात् हेत्वन्तभागस्य।। यद्यपि हेत्वन्तभागजनितस्य पर्वतो धूमज्ञानज्ञाप्यवन्हिमानित्याकारकबोधस्यापि तावदन्यतमबोधान्तर्गतत्वात् वन्हिधूमज्ञान-
ज्ञाप्यो न वेति संशयस्यापि तावदन्यतमबोधानिवर्त्यत्वादित्यव्याप्तेः तादवस्थ्यम्, तथापि केवलप्रतिज्ञावाक्यानां यादृशयादृशशाब्दधीजनकत्वं तादृशतादृशशाब्दसामान्यं यत्र यत्र प्रतिबन्धकं

तदन्यसंशयानिवर्तकत्वं विवक्षितम् ।। तथा च वह्निधूमज्ञानज्ञाप्यो न वेति संशयस्य केवलप्रतिज्ञाजन्यबोधेनाऽप्रतिबन्धान्न हेत्वन्तभागेऽतिप्रसङ्गः ।। इदन्तु चिन्त्यते ।। यद्यप्येवमपि संशयपदं व्यर्थं प्रस्तुतपक्षसाध्यकप्रतिज्ञाव्यक्तीनां यादृशयादृशशाब्दधीजनकत्वं तादृशतादृशशाब्दसामान्यं यत्र यत्र प्रतिबन्धकं तदन्यानिवर्तकत्वमात्रस्यैव सम्यक्त्वात् । न चैतत्कालीनं वह्निमत्तया पर्वतस्य शाब्दज्ञानं जायतामितीच्छयाऽपि प्रतिज्ञाजन्यशाब्दसामान्याप्रतिबध्यत्वात्तन्निवर्तकं यदेतत्कालीनं वह्निमत्तया पर्वतस्य शाब्दज्ञानं तज्जनिकायामिदानीन्तनप्रतिज्ञायामव्याप्तिवारणार्थं संशयपदमिति वाच्यम् ।। ज्ञानपदेनापि उक्तेच्छामादायाव्याप्तिवारणसम्भवे संशयत्वप्रवेशस्य तथाप्यनौचित्यात् ।। किञ्चैतत्कालीनस्य प्रतिज्ञाजन्यतादृशशाब्दस्य । निरुक्तेच्छानिवर्तकत्वेऽपि तदनिवर्तकस्य कालान्तरोत्पन्नस्यैव वह्निमत्तया पर्वते शाब्दस्य स्वरूपयोग्यतया इदानीन्तनप्रतिज्ञायां लक्षणसम्भवान्नाव्याप्तिशङ्कापि, यत्र चेत्यादिना ग्रन्थकृतैवाग्रे तादृशशाब्दस्वरूपयोग्यताया निवेशनीयत्वात् ।। एतेन प्रतिज्ञाजन्यशाब्दमात्रस्य न समानाकारशाब्दं प्रति विरोधित्वं बुभुत्सासत्त्वे शाब्दज्ञानान्तरोत्पादेन बुभुत्साविरहविशिष्टसमानाकारशाब्दत्वेनैव शाब्दधीविरोधित्वात्, तथा च प्रतिज्ञाजन्यशाब्दसामान्यं यत्र यत्र प्रतिबन्धकं तदन्यस्य समानाकारशाब्दस्यैव निवर्तकत्वं प्रतिज्ञाजन्यबोधस्येत्यसंभवापत्तिरतः संशयपदमित्यपास्तम् ।। तत्रापि बुभुत्साकालीनशाब्द~~स्यैव~~

१४ बोधस्यैव तादृशशाब्दसामान्यानिवर्तनीयबोधानिवर्तकतया तत्त्वरूपयोग्यतयैव प्रतिज्ञामात्रे लक्षणसम्भवादिति दिक्।। धूमादालोकवान्पर्वतो वह्निमान् धूमादित्यादौ हेत्ववयवस्य वारणाय लक्षणोपात्तस्यान्यूनविषयकत्वदलस्य निष्कर्षमाह तावतां बोधानां चान्यतमबोधेति।। वक्तव्यमिति।। अन्यूनानतिरिक्तविषयकत्वदलेनेत्यादिः।। अत्र कत्वे सत्यन्तस्य न्यायान्तर्गतत्वमेवार्थो न तु न्यायावयवबोधः, तावदन्यतमबोधानिवर्त्यसंशयानिवर्तकत्वदलस्य वैयर्थ्यापत्तेः। अवयवान्तरस्य तावद्बोधान्यतमबोधजनकत्वविरहाद्विशेष्यदलेनैव वारणसम्भवात्।। न च यत्रानुमितस्या पर्वतो वह्निमान् वह्नेरित्यादिकन्यायस्तत्र उपनयादिवारकतया निवर्तकान्तसार्थक्यम्, अनुमितस्या न्यायप्रयोगानभ्युपगमात्।। अन्यथा हेतुत्वं प्रमेयवत् प्रमेयादित्यादौ हेत्ववयवातिव्याप्तेर्दुर्वारतापत्तेरिति ध्येयम्।। यादृशतादृशत्वयोरनुगतयोरभावाद्विशेषतः पर्यवसन्नं लक्षणमाह इदन्त्वेति।। पक्षे इदन्त्वादिविशिष्टे।। गवाभेदस्येति।। अभेदसम्बन्धेन गोरित्यर्थः।। बोधा विशिष्य वक्तव्या इत्यग्रेणान्वयः।। तथा च तादात्म्येन गोप्रकारकेदंधर्मिकशाब्दसामान्यानिवर्तनीयसंशयानिवर्तकबोधजनकत्वे सत्यवयवाघटकप्रकृतन्यायान्तर्गतत्वं प्रकृतन्यायावयवत्वं वा तादात्म्येन गोसाध्यकेदंपक्षकप्रतिज्ञात्वे निर्वाच्यम्। इदंधर्मिकतादृशगोप्रकारकत्वपर्यवसितमन्यूनविषयकत्वं तु बोधस्य न देयं। विशेषणं वैयर्थ्यात्, धूमादालोकवान्पर्वतो वह्निमान् धूमादित्या-

दिस्यकीयनिरुक्तावेव हेतुवारणार्थं तस्य प्रवेश्यत्वात्.। न चायं गौरिति प्रतिज्ञाजन्यबोधस्य तादृशशाब्दसामान्यानिवर्तनीयेदन्त्वधर्मिकैकत्वसंशयं प्रति निवर्तकत्वादव्याप्तिरिति वाच्यम्.। एकत्वाविषयकप्रतिज्ञाजन्यबोधमादाय लक्षणसङ्गमादिति भावः.। समवायेनेति.। संयोगान्यवृत्तिनियामकसम्बन्धेनेत्यर्थः.। तेन कालिकसम्बन्धेन वह्नेः साध्यत्वे कालो वह्निमानिति प्रतिज्ञाया अपि वह्निमदभेदमादायैव निर्वाच्यत्वान्न न्यूनतेति ध्येयम्.। वह्नाविति। साध्य इति पूर्वेणान्वयः.। एवमग्रेपि.। वह्निमदभेदस्येति.। तथा च पर्वतधर्मिकवह्निमत्प्रकारकशाब्दसामान्यानिवर्तनीयसंशयानिवर्तकबोधजनकत्वमन्तर्भाव्यैव संयोगादिसम्बन्धेन वह्निसाधकपर्वतपक्षकप्रतिज्ञात्वं निर्वाच्यम्.। न च तादात्म्येन वह्निमत्साध्यकप्रतिज्ञायामतिव्याप्तिः तत्रापि पर्वतो वह्निमानित्येव प्रतिज्ञाशरीरत्वादिति वाच्यम्.। प्रकृतन्यायावयवार्थकेन मूलोक्तसत्यन्तदलेनैव तद्वारणादिति भावः.। पाककृतेः साध्यतायां चैत्रः पचति चैत्रः पक्तेत्येवं प्रतिज्ञाद्वैविध्याद्बोधद्वयं दर्शयति समवायेत्यादिना.। कृतिमत्त्वस्येति.। चैत्रः पचतीत्यत्र आख्यातार्थकृतेरेव चैत्रेप्रकारत्वात्.। पाककर्तृभेदस्येति.। चैत्रः पक्तेत्यत्र कृदर्थस्य कर्तुरेव चैत्रे तादात्म्येन प्रकारत्वात्.। तथा च चैत्रधर्मिको यः पाककृतिप्रकारको यश्च तादात्म्येन पक्तृप्रकारको बोधस्तदन्यतरानिवर्तनीयसंशयानिवर्तकतदन्यतरबोधजनकत्वमन्तर्भाव्य चैत्रपक्षकपाककृतिसाधकप्रतिज्ञात्वं वाच्यमिति भावः।

९५ अत्र चैत्रः पाककृतिमानित्येवं कृतीयस्यापि प्रतिज्ञाप्रकारस्यासम्भवाद्बोधद्वयोपादानमसङ्गतम्। न च तादृशवाक्यस्य साध्यतावच्छेदकीभूतपाककृतित्वेन साध्यस्यानुपस्थापकत्वान्न पाककृति-
साध्यकप्रतिज्ञात्वसम्भवः पाकपदस्य पाकसम्बन्धिनि लाक्षणिकत्वादिति वाच्यम्। तादृप्येणानुपस्थापकत्वेपि तदवच्छिन्नसाध्यकप्रतिज्ञात्वे बाधकाभावात्।। अन्यथा प्रतियोगितासम्बन्धेन
इतरतो भेदस्य साध्यतायामितरभिन्नेति प्रतिज्ञायाः पञ्चम्यादुपदर्शनानुपपत्तेः तत्रापि इतरपदस्येतरप्रतियोगिके लाक्षणिकत्वादिति चिन्तनीयम्।। पृथिव्यादावितरभेदस्य साध्यतायां चतुर्वि-
धस्यैव प्रतिज्ञाजन्यबोधस्य सम्भवात्तत्रान्यतमत्वेनोपादेया इत्याह विशेषणतयेत्यादिना।। इतरभेदवत्त्ववत्त्वस्येति।। पृथिवी इतराद्भिद्यते इत्यत्राख्यातार्थस्य आश्रयत्वस्यैव पृ-
थिव्यां प्रकारत्वादिति भावः।। इतरान्याभेदस्येति।। पृथिवी इतरान्या इत्यत्र अभेदसम्बन्धेन पृथिव्यामितरान्यस्यैव प्रकारत्वादिति भावः।। इतरभेदवत्त्वस्येति।। पृथिवी नेतराणीत्यत्र पृथि-
व्यामितरभेदस्य नञर्थस्य साक्षात्प्रकारत्वादिति भावः।। इतरभिन्नाभेदस्येति।। पृथिवी इतरभिन्नेति प्रतिज्ञामभिप्रेत्येदम्।। न च पृथिवी इतरान्येति प्रागुक्तक्रमेणैवास्य गतार्थकत्वं तत्रान्य-
त्वप्रकारेणैव भिन्नस्योपस्थानात् इह तु भिदधात्वर्थभिदाश्रयत्वस्यैव निष्ठार्थाश्रयस्यैवाश्रयत्वरूपेण पृथिव्यामभेदेन भानात्ततो वैलक्षण्यादिति भावः।। कस्यचिल्लक्षणमुपन्यस्यति ताव-

।इति।। यत्पक्षकयत्साध्यकप्रतिज्ञाव्यक्तयो याद्दृशयाद्दृशबोधजनकतया सम्प्रदायसिद्धास्तावद्बोधेत्यर्थः।। अत्रानिवर्तकानां चरमबोधस्य विशेषणं हेत्वन्तभागेऽतिव्याप्तिवारणार्थम्।। तत्रापि पृथिवी
इतरेभ्यो भिद्यते इति प्रतिज्ञाजन्यबोधस्य तावद्बोधानिवर्त्यस्वसमानाकारकानुमितिनिवर्तकत्वादतः संशयपदं प्रत्यक्षार्थकम्।। धूमादालोकवान्पर्वतो वह्निमानित्यादिस्थलीयहेतोर्वारणाय नि-
वर्तकान्तम्।। धूमादालोकवानित्यादिप्रतिज्ञाजन्यबोधनिवर्त्यस्य हेतुत्वं धूमीयं न वेत्याकारकसंशयस्य निवर्तकबोधजनकत्वं धूमादित्येवं तदीयहेतुवचनस्यापीत्यतो यावदिति।। तथा च तत्र
प्रतिज्ञाजन्यबोधनिवर्त्ययावत्संशयान्तर्गतस्यैव साध्यसंशयस्यैवानिवर्तकत्वान्न हेतोरतिव्याप्तिरिति पृथिवी इतरेभ्यो भिद्यते इति प्रतिज्ञाजन्यबोधस्य तावद्बोधस्य प्रत्येकनिवर्तनीययावदन्त
र्गतायाः पृथिवी इतरान्येत्येवमसमानाकारानुमितेः अप्रतिबन्धकत्वादव्याप्तिरतः संशयपदं पूर्ववदर्थकम्।। स्वसमानाकारस्य निश्चयस्यैव विरोधित्वादितरभेदादिसाध्यकस्थले तावद्बोध-
निवर्त्यो न कोपि संशय इत्यस्वरसात्कश्चिदित्युक्तम्।। ननु यद्रूपेण साध्यत्वं तदवच्छिन्नव्याप्यवत्ताबोधकस्य उपनयस्याऽसम्भवाच्चैत्रः पचतीत्यादिप्रतिज्ञैव नास्ति तत्र मूलोक्तानु[illegible]स-
न्यूनानतिरिक्तविषयकत्वस्य व्युत्पादनं प्रागुक्तं विफलमत आह चैत्रः पचती[illegible]त्यादि।। चैत्रः पचतीत्यत्र पाककृतित्वावच्छिन्नव्याप्यवत्ताबोधकपक्षत्व[illegible]व्याप्यचैत्रत्ववानयमित्या-
कारकोपनयसम्भवादाह घटो नेतराणीति।। विषय इति।। पचतीत्यत्र तिङर्थकृतौ पाकस्य विषयित्वं संसर्गस्तथा नेतराणीत्यत्र नञर्थभेदे इतरस्यानुयोगित्वं सम्बन्ध इति भावः।।

यथोपदर्शितेति । यद्रूपेण साध्यं प्रतिज्ञायामुपदर्शितं तदवच्छिन्नसाध्येत्यर्थः । उपनेयत्वात् उपनयेन दर्शयितुमुचितत्वात् । अन्यथा वह्नित्वेन साध्यतायां तेजोव्याप्यवत्त्वेन पक्षस्य उपनयप्रसङ्गादिति भावः । एवञ्च एवेति । यद्रूपेण साध्यत्वं तदवच्छिन्नव्याप्यवत्त्वस्यैव तथाशब्देन बोधयितुं शक्यत्वादिति भावः । यो यश्चैत्रः पचतीत्यादिक्रमेणोदाहरणसम्भवादुपनयपर्यन्तानुसरणम् । ननु तथापि मणिकारादीनां नव्यानां मते पाककृतिव्याप्यवांश्चायमित्युपनयस्यासङ्गतिरेव यादृशेन पाकीयकृतित्वादिना साध्यत्वं तदवच्छिन्नसाध्यव्याप्यवत्त्वस्य तेनानुपस्थापनादत आह नव्यानामिति । तद्व्याप्यहेतुमानित्यतो हेतौ व्याप्यस्याभेद एव भासते न तु व्याप्तिमत्त्वमनुमित्युपयुक्तश्च तदेव इत्यतः प्रकारान्तरमाह तद्धानेवेति । ननु क्रमेणाप्युपनये पूर्वोपस्थापितत्वाविशेषात् लक्षणादेरपि तच्छब्देन परामर्शः स्यादत आह योग्यतेति । प्रमेयं वाच्यमभिधेयत्वादित्यादिस्थले पक्षपरामर्शेऽपि योग्यतासम्भवादादिपदमुपात्तम् । तेन तात्पर्याद्युपग्रहः । तदा तच्छब्देन । साध्यस्येति, प्रथमे । तद्व्याप्येति, द्वितीये । अत्र पाककृतिव्याप्यचैत्रत्ववांश्चायमित्याद्युपनयेऽपि न क्षतिः कृतिपदेन लक्षणया साध्यतावच्छेदकीभूतपाकीयकृतित्वप्रकारेण साध्यस्योपस्थितिसम्भवादत्र लक्षणाया आवश्यकत्वात् । अन्यथा नामार्थस्य कृतेर्धात्वर्थव्याप्तौ भेदेनान्वयस्यासम्भवात् पाकपदस्य तात्पर्यग्राहकतयैवोपयोगात् । न च तथापि चैत्रत्वादित्यादिहेतौ व्याप्यस्याभेदान्वयात्तत्र व्याप्तिमत्त्वालाभः, तथापि तद्वानयमित्युपनयादनुमित्युपयुक्तस्य पक्षे हेतुमत्त्वस्यालाभेन तुल्यत्वात् पक्षे हेतुम-

दभेदस्यैव तेन बोधनादिति चिन्त्यम्।। तादात्म्येन वन्हिमतः साध्यतायामेव पर्वतो वन्हिमानित्याकारिका प्रतिज्ञा वन्हेः साध्यतायां तु पर्वतस्तथा इत्यादिरूपैव सा तथा च यादृशेत्यादिविवक्षां विना मूले कानुमित्यन्यूनानतिरिक्तविषयत्वेनैव सामञ्जस्यमित्येवं केषाञ्चिन्मतं सयुक्तिकमुपन्यस्यति के चित्त्विति।। विप्रतिपत्तिवाक्यस्य निर्विषयत्वात् वन्हिमत्पदेन तत्कोटिकत्वसंभवः शाब्दसंशयस्यापसिद्धान्तत्वेन व्यापारानुबन्धितत्कोटिकत्वस्याप्यभावादाह तदधीनसंशये चेति।। जिज्ञासितत्वात् तादृशसंशयाधीनजिज्ञासाविषयत्वात्।। न तु वन्हिरिति।। साधयितुमुचित इति पूर्वेणान्वयः।। न च विप्रतिपत्तिवाक्याद्वन्हिमत इव वन्हेरप्युपस्थितत्वाद्वन्हिवन्हिमद्भेदकोटिकसंशयोत्पत्त्या वन्हेरपि जिज्ञासितत्वसम्भवः इति वाच्यम्।। विप्रतिपत्तिवाक्यस्य यद्धर्माव-च्छिन्नविधेयताकबोधजनकत्वं तदवच्छिन्नस्यैव प्रतिज्ञायामपि विधेयत्वनियमात्।। अन्यथा वन्हिसामग्रीमान्न वेति विप्रतिपत्तिवाक्यस्थलेऽपि वन्हेः साध्यत्वप्रसङ्गात्।। अत एवादृशी सैव प्रतिज्ञा इति मूले वक्ष्यते इति भावः।। ननु वन्हिमतः साध्यत्वे वन्हेरुपनयप्रदर्शनविरोध इत्यतस्तदपि परित्यजन्नाह तथा चेति।। प्राचीननव्ययोर्मतभेदेन प्रकारद्वयम्।। अर्थान्तरादिति।। वन्हिव्याप्त्युपन्यासस्य वन्हिमत्सिद्ध्यनुपयुक्तत्वादिति भावः।। प्राहुरिति।। यादृशपक्षकेत्यादिविवक्षां विनापि मूलोक्तसामञ्जस्यं प्रकर्षः।। ननु यत्र सभाक्षोभादिवशात्प्रतिज्ञया बोधो न ज-

१७ नितमत्त्राव्याप्तिरत आह यत्र चेति। तादृशाकाङ्क्षा इति। तादृशबोधानुकूलाकाङ्क्षा इत्यर्थः। योग्यतादीत्यादिना आसत्यादेः परिग्रहः। न चैवं ह्रदो वह्निमानित्यादिप्रतिज्ञायामव्याप्तिः योग्यताविरहा[illegible]दिति वाच्यम्। सन्न्यायान्तर्गतप्रतिज्ञाया एव लक्ष्यतया तत्राऽव्याप्तेरदोषत्वादिति भावः। नन्वेवं शाब्दवाक्यपदयोर्वैयर्थ्यं योग्यताज्ञानादेस्तादृशबोधजनकत्वेपि आकाङ्क्षादिमत्त्वविरहेण वारणादत आह तथाभश्चेति। तथा चोक्तपदद्वयसान्निध्यादेव स्वरूपयोग्यत्वलाभान्न तयोर्व्यर्थत्वमिति भावः। ननु अन्यूनानतिरिक्तपदत्यागे उद्देश्यानुमितिविषयकशाब्दज्ञानजनकवाक्यत्वं लक्षणं भविष्यति तच्च न सम्भवति असम्भवात् प्रतिज्ञाजन्यबोधस्यानुमित्यविषयकत्वादित्यत आह उद्देश्येति। समानविषयकेति। अन्यूनानतिरिक्तपदत्यागाउद्देश्यानुमितिविषयकपदेन उद्देश्यानुमितिविषयो विषयो यस्येति व्युत्पत्त्या तत्समानविषयकत्वलाभादिति भावः। अत्र कल्पे सत्यन्तस्य अवयवाघटकन्यायान्तर्गतत्वं नार्थः तथा सति वह्निः शुक्लभास्वरस्तेजस्त्वाद्रूपवत्त्वादित्यादौ तेजस्त्वज्ञाप्यरूपवत्त्वहेतुकन्याये तेजस्त्वादित्यन्तस्य दुर्वारतापत्तेः, किन्तु न्यायावयवत्वमेवेत्याशयेन प्राग्व्याख्यातस्यापि सत्यन्तस्य अर्थो न्यायावयवत्वरूपः पुनरुदितः। समानविषयकान्तस्य फलमाह व्यतिरेकिणीति। यो यो निर्वह्निः स निर्धूमो यथा ह्रद इत्युदाहरणस्य लिङ्गाविषयत्वविरहादेव व्युदासाद्व्यतिरेकिण्युक्तम्। तथा च यो यो धूमवान् स वह्निमान् यथा ह्रदाभिन्नमित्युदाहरणस्य निर्वह्नित्वरूपलिङ्गाविषयकत्वमस्त्येवेति भावः। पक्षविषयकत्वं त्यक्त्वा पक्षविशेष्यकत्वपर्य-

तस्याग्रे विवक्षणीयस्य व्याप्तिमभिधातुं यथा पर्वत इत्यादि दृष्टान्तमुपेक्ष्य दृष्टान्तान्तरमाह यथा ह्रद[illegible]ति ।। दृष्टान्तवत इति ।। उदाहरणस्य इत्यग्रेऽन्वयः ।। तथा च प्रतियोगिविधयैव निरूप्योदाह-
रणस्यापि पक्षविषयकत्वात्पक्षविशेष्यकत्वं वाच्यमिति भावः ।। दृष्टान्तमनन्तर्भाव्यैव उदाहरणशरीरमिति मतेऽपि पक्षविशेष्यकत्वप्र[illegible] पर्यन्तप्रवेशार्थं स्थलान्तरमाह ह्रदादिर्नीत्यादि ।। ह्रदो
निर्धूमो ह्रदावृत्तिधर्मशून्यत्वादित्यादौ यो यो धूमवान् स ह्रदावृत्तिधर्मवानित्युदाहरणस्यापि लिङ्गविषयकस्य ह्रदात्मकपक्षविषयकत्वात्पक्षविशेष्यकत्वप्रवेशस्तद्वारणार्थमावश्यक इति
भावः ।। पक्षविशेष्यकेति ।। तन्मुख्यविशेष्यकेत्यर्थः ।। न च वृक्षस्तत्कपिसंयोगशून्यः तत्कपिविभागरहितत्वादित्यादिस्थलीयस्य यस्तत्कपिसंयोगवान् स तत्कपिविभागवानिति व्यतिरेक्युदा-
हरणस्य तत्कपिसंयोगवत्त्वप्रकारेणैव पक्षीभूतवृक्षविशेष्यकज्ञानजनकत्वात्तत्रातिव्याप्तिरिति वाच्यम् ।। कथितसाध्यसाधनयोः केवलान्वयितया व्यतिरेकव्याप्त्यसम्भवेन उदाहरणस्यैव
तादृशस्यासत्त्वात्तत्रातिव्याप्त्ययोगादिति भावः ।। उपनयेति ।। यद्यपि निगमनस्यापि पक्षविशेष्यकज्ञानजनकत्वादुपनयमात्रोक्तिरयुक्ता तस्माद्वह्निमानित्यादौ वह्निमत्त्वेन पर्वतस्यैव विशे-
ष्यत्वात् ।। न च पक्षतावच्छेदकधर्मावच्छिन्नविशेष्यकत्वप्रवेशेनैव तद्वारणसम्भवादुपनयपर्यन्तानुसरणमिति वाच्यम् ।। हेतुत्वं प्रमेयं ज्ञेयत्वादित्यादौ हेत्ववयवस्यापि वारणीयत्वसम्भवात् इत्थ-
मपि न्यूनतानुद्धारात् । तथापि निगमनादौ न सर्वत्रातिव्याप्तिसम्भवः तस्माद्धियत इत्यादावभावात् उपनये तु सर्वत्रैव पक्षधर्मिकज्ञानजनकत्वात्तन्मात्रोक्तिरिति भावः ।। वस्तुमात्रस्यैव लिङ्ग-

त्वात्सामान्यतस्तदविषयकत्वमसम्भवदुक्तिकमतः प्रकृतपदं प्रक्षिप्य शङ्कते यद्यपीति ।। ननु लिङ्गतावच्छेदकरूपेण यत्किञ्चिद्विशेषणकत्वं तद्भावो वाच्यः तथा चोक्तप्रतिज्ञायां पृथिवीत्वप्रकारेण पृथिवीत्वस्याप्रवेशान्नाव्याप्तिः विशेषणत्वनिवेशाच्चोक्तस्थल एव तादात्म्येन पृथिव्याः साधनत्वेपि नाप्रसङ्ग इत्यत आह गन्धवतीत्यादि ।। तथा इतरेभ्यो भिद्यते ।। अव्यापकमिति ।। लिङ्गतावच्छेदकीभूतं यद्गन्धवत्त्वं तद्रूपेणैव लिङ्गस्य प्रतिज्ञायां निविष्टत्वादिति भावः ।। ननूक्तस्थले न्यायासम्भवात्प्रतिज्ञैव नास्ति कुतो व्याप्तिरित्याशङ्क्य निराचष्टे न चेति ।। बाच्यमित्यग्रेऽन्वयः ।। गन्धवत्त्वान्वयीति ।। गन्धवत्त्वप्रकारेणाभेदान्वयबोधस्यायोगादित्यर्थः ।। उद्देश्यतावच्छेदकविधेययोरैक्याद्दण्डवान् रक्तदण्डवानित्यादिवन्निराकाङ्क्षत्वादिति भावः ।। साध्याभावेति ।। तथा चेतरभेदाभावव्यापकीभूतस्य गन्धाभावस्याभाववती चेयमित्याकारकोपनयशरीरमतो न निराकाङ्क्षत्वमिति भावः ।। अत एवेति ।। यद्रूपेण हेतुत्वं तदवच्छिन्नाभावाभावत्वप्रकारेणैव व्यतिरेक्युपनयस्य हेतुमत्त्वबोधकत्वादेवेत्यर्थः ।। न च नेयमिति ।। यद्यप्युक्तप्रयोगाद्व्याप्यत्वावच्छिन्नस्य हेतोर्न पक्षधर्मताबोधः, तथापि पक्षधर्मताबोधमात्रमुपनयस्य फलं व्याप्तिबोधस्य उदाहरणादेव लब्धत्वादतो व्याप्तिबोधार्थं न तत्र पदान्तरप्रक्षेप इति प्राचामाशयः ।। ननु व्याप्तस्य हेतोः पक्षसत्त्वं न वा इत्याकाङ्क्षायामभिधानीयस्योपनयस्यावश्यं हेतुतावच्छेदकावच्छिन्नहेतुमत्तया पक्षबोधकत्वम्, अन्यथा तादृशाकाङ्क्षाया अनिवृत्तेरत आह यदि चेति ।। शुद्धेति ।। विशेषणान्तरानवच्छिन्न इत्यर्थः ।।

तदेति । प्रकृतेपि गन्धविशेषव्यतिरेकव्याप्तिविशिष्टगन्धवत्त्वावच्छिन्नस्यैवाऽन्वयेन व्युत्पत्त्यभङ्गादिति भावः । प्राच्यैः खलेकपोतन्यायेनैव सर्वत्रान्वयबोधस्योपगमात् तन्मते च
दण्डवान् रक्तदण्डवानित्यत्रापि रक्तत्वविशिष्टदण्डत्वावच्छिन्नस्य न दण्डवत्यन्वयः किन्तु दण्डवति दण्डस्तत्र रक्तत्वं विशेष्ये विशेषणमिति न्यायेन युगपदेव भासत इत्यवश्यं तन्म-
ते निराकाङ्क्षत्वमित्याशयेन यदि चेत्युक्तम् । पक्षाविशेषणत्वेनेति । इदमत्र चिन्त्यते । किमिदं पक्षाविशेषणत्वेन लिङ्गविषयकत्वं न तावत्पक्षाविशेषणतान्यलिङ्गविषयत्वाभावः,
प्रागुक्तदोषतादवस्थ्यात् गन्धवती इतरेभ्यो भिद्यते इति प्रतिज्ञायामपि पक्षाविशेषणतान्यगन्धत्वांशे विशेष्यतारूपस्यैव गन्धात्मकहेतुविषयत्वस्य सत्त्वात् प्रकारत्वविशेष्यत्व-
योरिव विशेष्यतात्वयोर्मिथो निरूप्यनिरूपकत्वाभावेन पक्षनिष्ठविषयत्वानिरूपितलिङ्गविषयत्वाभावस्यापि वक्तुमशक्यत्वात् । न च पक्षाविशेषणतातिरिक्तं यद्धेतुतावच्छेदकध-
र्मावच्छिन्नविषयत्वं तदभावोऽर्थः प्रोक्तप्रतिज्ञायान्तु गन्धनिष्ठगन्धत्वांशे विशेष्यत्वस्य गन्धत्वानवच्छिन्नत्वान्नाव्याप्तिरिति वाच्यम् । सुरभि गन्धवती इतरेभ्यो भिद्यते गन्धादित्या-
दिप्रतिज्ञायामव्याप्तितादवस्थ्यात् तत्र सौरभांशे गन्धत्वावच्छिन्नस्य विशेष्यत्वस्य पक्षाविशेषणतातिरिक्तगन्धत्वावच्छिन्नविषयतारूपत्वात् । नापि प्रकृतपक्षविषयत्वानन्तर्गतलि-
ङ्गविषयत्वाभावोर्थः, तथा सति प्रमेयत्वनिष्ठहेतुत्वं वाच्यं प्रमेयत्वादित्यादौ हेतावतिव्याप्तिप्रसङ्गात् । एवं दधि द्रव्यमित्यादिप्रतिज्ञायां वक्ष्यमाणाव्याप्तेरसङ्गत्यापत्तेः तत्रापि पक्षवि-

षयत्वानन्तर्गतत्वे सति साध्यविषयत्वानन्तर्गतं यावल्लिङ्गविषयत्वं तदभाववत्त्वेनाऽव्याप्त्यसम्भवात्। साध्याविशेषणत्वेना[illegible] लिङ्गविषयत्वस्याप्युक्तक्रमेणैव निर्वाच्यत्वात्। अन्य-
थाऽयं वह्निसामग्रीमान् वह्नेरित्यादावप्युक्तदिशैवाव्याप्तितादवस्थ्यादिति सङ्क्षेपः। वन्हेरित्यादाविति। अव्यापकमित्यग्रेऽन्वयः। पक्षेत्यादि। तथा चोक्तप्रतिज्ञाद्वये पक्षसाध्य-
योर्विशेषणतयैव लिङ्गस्य विषयत्वान्नाव्याप्तिरिति भावः। दधि द्रव्यमित्यत्र प्रतिज्ञायां विशेष्यत्वेनैव लिङ्गस्य भानात् पक्षसाध्ययोरविशेषणत्वेन यावल्लिङ्गविषयत्वं तदभावविरहा-
दव्याप्तिरित्यर्थः। न चात्र समवायेन दध्नो हेतुत्वात्तदन्वयानुरोधाद्दध्यवयवभिन्नं दध्येव प्रतिज्ञायां बोध्यते, अन्यथा भागासिद्धिप्रसङ्गात्, तथा च पक्षसाध्ययोरविशेषणत्वेन
लिङ्गतावच्छेदकावच्छिन्नयावल्लिङ्गविषयकत्वविवक्षयैव नात्राव्याप्तिरिति वाच्यम्। तादात्म्यसम्बन्धेन तत्र दध्नो हेतुतया तथाप्यप्रतीकारात् इति भावः। व्यतिरेकिपक्षकप्रतिज्ञा-
यामव्याप्तिमुक्त्वा केवलान्वयिपक्षिकायां तामाह प्रमेयत्वमिति। न च केवलान्वयिसाध्यके विवादाभावात्प्रतिज्ञैव नास्ति कुत्राव्याप्तिरिति वाच्यम्। केवलान्वयित्वाग्रहदशायां विवा-
दसम्भवादिति भावः। ननु नीलधूमत्वेनेव प्रमेयत्वत्वेन हेतुकृतेऽपि न न्यायो व्यर्थविशेषणत्वात्। विषयतात्वस्यैव व्याप्यतावच्छेदकत्वादिति कुतस्तत्र तत्प्रतिज्ञायामव्याप्तिरत आह
गोत्वाभावेति। अत्र च गोत्वाभावस्य स्वरूपसम्बन्धेन स्वामिन्यपि सत्त्वान्न पक्षधर्मत्वहानिः। ननु पक्षसाध्ययोरविशेषणत्वेन यावल्लिङ्गप्रकारकत्वं तदभावो वाच्यः तथा चोक्तप्रतिज्ञाप्रमे-

विलिङ्गस्य प्रकारत्वाभावान्नाव्याप्तिरत आह अतिव्यापकश्चेति ।· सर्वत्रैवोपनये लिङ्गस्य पक्षविशेषणतयैव भानादतिव्याप्तिरित्यर्थः ।· न चोपनयमात्रस्यैव हेतुव्यापकत्वांशे पक्षविशेषणत्वेन लिङ्गप्रकारकत्वान्नातिव्याप्तिरिति वाच्यम् । साक्षात्परम्परासाधारणपक्षविशेषणत्वस्यैव प्रवेशतया व्याप्तिविशेषणतया भातस्याप्युपनये पक्षविशेषणत्वात् ।· अन्यथा धूमसधर्मा पर्वतो वह्निमान् धूमादित्यादिप्रतिज्ञायामव्याप्तितादवस्थ्यात् तत्र धूमस्य पक्षे साक्षादविशेषणत्वात् साध्यवदन्यावृत्तित्वादिव्याप्तेर्लिङ्गाघटकत्वात्तद्धर्मोपनयेऽतिप्रसक्तेस्तथाव्यवारणाच्चेति भावः ।· तथापीत्यादि· । गन्धवती इतरेभ्यो भिद्यते गन्धादित्यादौ पर्वतो वह्निसामग्रीमान् वह्नेरित्यादौ च प्रतिज्ञायाः सङ्ग्रहार्थमवच्छेदकत्वस्योपादानम् । अत्र च यत्र गन्धवत्त्वावच्छेदेन साध्यसिद्धेरुद्देश्यतायां गन्धादिकं हेतुस्तत्रत्यप्रतिज्ञायामव्याप्तिवारणार्थं यद्रूपेण पक्षत्वं तन्निष्ठावच्छेदकत्वादेरप्यवगाहितायाः क्वचिन्निवेशो बोध्यः । निरुक्तावगाहिताबहिर्भूतं यद्विषयित्वं तदभावस्योक्तौ प्रागुक्तस्य पक्षविशेष्यकत्वदलस्य वैयर्थ्यादत उक्तं लिङ्गविषयत्वस्येति· । अखण्डाभावघटकतया च लिङ्गपदस्य न वैयर्थ्यमिति भावः ।· अत्रापि यत्पक्षसाध्यकप्रतिज्ञाव्यक्तीनां यादृशयादृशविषयताकबोधजनकत्वं साम्प्रदायिकं तादृशविषयताबहिर्भूतलिङ्गविषयित्वाभावः फलितार्थो ग्राह्यः । तेन गन्धवती इतरेभ्यो भिद्यते गन्धादित्यादौ प्रतिज्ञायाः पक्षे साध्यवैशिष्ट्यावगाहिज्ञानाजनकतया तादृशविषयिताबहिर्भूतलिङ्गविषयिताकत्वस्य तत्र सत्त्वेऽपि नाव्याप्तिरिति ध्येयम् । ननूक्तविषयिताबहिर्भावो न तद्भिन्नत्वं तादृ-

श्रीं विषयिताभावादयैवोक्ताव्याप्तितादवस्थात्, अत एव न तद्विषयित्वाव्यापकत्वमपि न तद्बहिर्भावः, प्रतिज्ञाभेदेन स्वरूपसम्बन्धात्मनो लिङ्गविषयित्वस्य भेदादुक्तदोषतादवस्थात् अत आह वस्तुत इति।। ननु लिङ्गत्वं व्याप्यत्वं तथा च व्याप्यवान्पर्वतो वह्निमान् धूमादित्यत्र प्रतिज्ञायामव्याप्तिरत आह तथा चेति।। तद्वेति।। तादृशव्याप्तिविषयकत्व एवेत्यर्थः।। हेतुभूतेति।। हेतुभूतो योऽभावस्तत्प्रतियोगितावच्छेदकं ~~तत्प्रतियोगितावच्छेदकं~~ यद्रूपत्वभावत्वं तदवच्छिन्नेत्यर्थः।। हेतौ साध्याभावव्यापकीभूताभावप्रतियोगित्वावगाहित्वमित्युक्तौ ह्रदो निर्धूमो निर्वह्नित्वादित्यादौ यो यो निर्धूमत्वाभाववान् स ~~निर्वह्निः~~ स वह्निमानिति व्यतिरेक्युदाहरणे,तिव्याप्तिः तस्य निरुक्तव्याप्तिविषयत्वादतो वक्रोक्तिः। तेन तत्रापि हेतुभूतं यन्निर्वह्नित्वं तत्प्रतियोगितावच्छेदकीभूतवन्हित्वावच्छिन्ने साध्याभावव्यापकत्वावगाहित्वान्नातिव्याप्तिः।। इदमुपलक्षणम्।। साध्याभावोपि साध्यीभूताभावप्रतियोगितावच्छेदकावच्छिन्नत्वेनोपादेयः, तेन धूमाभावाभावत्वेन साध्याभावाप्रवेशेपि नोक्तस्थलीयोदाहरणे,तिप्रसङ्गः।। वस्तुतो यावत्यो व्याप्तिविषयिताः प्रकृतसाध्यहेतुकानुमित्यौपयिकाः प्रत्येकं तत्तद्विषयित्वाभावकूटवत्त्वमेव प्रवेश्यम्।। तेन नानाविधानां व्याप्तिविषयितानामननुगतधर्माभावेपि नोपनयाप्राप्तिव्याप्तिरिति ध्येयम्।। प्रकृतहेतुतावच्छेदकेत्यस्य फलमाह द्रव्यत्वव्याप्येति।। अत्र हेतुतावच्छेदकीभूतं यद्गुणत्वं तदवच्छिन्ने द्रव्यत्वव्याप्यभावान्नाव्याप्तिरिति भावः।। द्रव्यत्वव्याप्यसंयोगवानयमित्युक्तौ विवादस्तु संशयाद्यसम्भवात्संयोगवद्वृत्तीत्युक्तम्।। प्रकृतसाध्यतावच्छेदकेत्यस्य फलमाह गुणव्याप्येति।। तथा चात्र

स्पर्शत्वावच्छिन्नं यत्प्रकृतसाध्यं तद्व्याप्यताभावान्नाव्याप्तिरिति भावः ।· नन्वेवं निरुक्तव्याप्तिविषयिताशून्यत्वदलेनैव व्यतिरेक्युदाहरणस्यापि वारणसम्भवात्पक्षविशेष्यकार्थकं समानविषयकत्वदलं व्यर्थमत तत्त्यागे मूलस्य तात्पर्यमाह अन्यूनेति ।· ननु तद्दलत्यागे धूमादिहेत्ववयवेऽतिव्याप्तिरत आह हेतुत्वमिति ।· वारणीयेति ।· तत्र हेत्ववयवस्य पक्षविशेष्यकत्वात्समानविषयकत्वदलेन तद्वारणायोगादिति भावः ।· ननु पञ्चम्याऽन्यत्वोक्तौ वह्निरन्यो धूमादित्यादिप्रतिज्ञायामव्याप्तिरत आह हेत्वन्यत्वस्य वेति ।· ननु हेतुत्वपक्षकस्य प्रमेयत्वादित्यादिहेतौ पक्षविशेष्यकज्ञानजनकत्वे सत्येव हेत्वन्यत्वविशेषणे वाच्यं तत्रैव किं मानमतस्तत्र प्रमाणमाह सङ्ख्येत्यादि ।· विभक्त्यर्थस्य संसर्गविधयैव भानसंभवादित्यत आह सङ्ख्यातिरिक्तेति ।· तथा चोक्तनियमबलादेव प्रकृतहेतोः पक्षविशेष्यकज्ञानजनकत्वमावश्यकमिति भावः । पञ्जे ननु सुबर्थमात्रस्य प्रकृत्यर्थविशेषणतयैव भानाप्रमेयत्वादित्यादिहेतुवाक्येन प्रमेयत्वं हेतुतावदित्येव बोधजनन~~कत्वा~~णात्पक्षविशेष्यकत्वदलेनैव तद्वारणं सम्भवत्यतः सङ्ख्यातिरिक्तेत्यादीति ।· तत्तुच्छम् ।· तादृशशङ्कया ग्रन्थावतारणे पर्वतो वह्निमान् पर्वतादित्यादौ हेत्ववयवे तथाप्यतिव्याप्तितादवस्थ्यात् तस्याप्युक्तक्रमेणाशङ्कया पक्षविशेष्यकज्ञानजनकत्वसम्भवादिति ध्येयम् ।· सुबर्थसङ्ख्यायाः प्रकृत्यर्थवि-

२१ शेषणतयैवान्वयात् तत्र व्यभिचारवारणार्थमतिरिक्तान्तम्।। जानातीत्यादौ तिङर्थवर्तमानत्वस्य यजेतेत्यादौ च तिङर्थकार्यत्वादेः प्रकृत्यर्थविशेषणतयैव भानाद्विभक्त्यर्थेत्यपहाय सुबर्थेत्युक्तम्।। ननु चैत्र गच्छेत्यादौ सुबर्थस्य सम्बोध्यत्वादेः प्रकृत्यर्थचैत्रादौ विशेषणत्वेनैव भानादुक्तनियमो व्यभिचारीत्यत आह प्रातिपदिकेति।। भेदेन तादात्म्यान्यसम्बन्धेन।। वक्ष्यमाणत्वादिति।। अन्यथा घटो रूपमोदनः पचतीत्यतोपि घटीयत्वेन रूपस्य ओदनीयत्वेन पाकस्य बोधापत्तेः, तथा च हेतुत्वमभिधेयं भिद्यते वा प्रमेयत्वादित्यादौ हेतुत्वसम्बन्धेन प्रमेयत्वस्य नामोपस्थाप्याभिधेयत्वे धातूपस्थाप्यभेदे वा अन्वयासम्भवादवश्यं हेत्ववयत्वस्य हेतुतारूपपक्षविशेष्यकान्वयबोधजनकत्वमिति भावः।। ननु कर्मत्वादिरूपभेदसंसर्गेण नामार्थस्यान्वयबोधे नाम्नः कर्मत्वाद्यर्थकविभक्त्यन्तस्य तन्त्रत्वादेवोक्तातिप्रसङ्गस्य वारणसम्भवात् पञ्चम्यर्थहेतुत्वादिविशेषस्य प्रमेयत्वादेर्हेतुत्वादिसम्बन्धेनैवाऽभिधेयत्वादावन्वये बाधकाभाव इत्यत आह चैत्रस्येत्यादि।। तथा च चैत्रस्येदं मैत्रस्वत्वाभाववदित्यन्वयबोधे विभक्त्यर्थस्य स्वत्वादेर्नामार्थविशेष्यतया भानमावश्यकं, न हि स्वत्वान्वितस्य मैत्रस्यैव स्वत्वसम्बन्धेनाभावस्तत्र धनादौ प्रतीयते, स्वत्वादेर्वृत्त्यनियामकतया तत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावस्याऽसम्भवात्, न वा स्वत्वविशिष्टमैत्र-

स्य संयोगादिसम्बन्धेनैवाभावस्तत्र भासते, नेदं चैत्रस्येत्यापि प्रसङ्गात् चैत्रस्वामिकेपि धने संयोगादिसम्बन्धेन चैत्रस्याभावसत्त्वात् एतदर्थमेव चैत्रस्येत्यभिधानादिति भावः।। ननु नञा चैत्रात्यन्ताभावस्य बोधने चैत्रात्मकनाम्नः प्रथमान्तत्वं तन्त्रमतः संयोगादिना चैत्रात्यन्ताभावस्य चैत्रीयधने सत्त्वेपि नेदं चैत्रस्येति न प्रयोग इत्यत आह मैत्रस्येदं न चैत्रस्येति।। तथा चोक्तस्थल एव चैत्रात्यन्ताभावबोधस्वीकारे प्रथमान्तताव्युत्पत्तौ व्यभिचार इत्यवश्यं चैत्रादिस्वत्वाभाव एव बोधनीयः, अन्यथा उक्तक्रमेणाऽतिप्रसङ्गादिति भावः।। ननु नेदं चैत्रस्येत्यादिषष्ठ्या प्रतियोगित्वस्य नञा च भिन्नस्याभिधानान्मैत्रादिधने स्वत्वसम्बन्धेन चैत्रान्यत्ववत्त्वमेव प्रतीयेत इति यदि ब्रूयात्तदाह द्वयोरिदमिति।। नेदं चैत्रस्येत्यनुसञ्जनीयम्।। तथा चोक्तक्रमेण चैत्रमैत्रयोरिदं न चैत्रस्येति वाक्यस्यापि योग्यतापत्तिः उभयस्वामिकस्य सुतरां चैत्रभिन्नस्वामिकत्वादतस्तदयोग्यत्वार्थं चैत्रस्वत्वाभावबोधने विभक्त्यर्थविशेष्यकत्वमावश्यकमिति भावः।। उक्तक्रमेण शाब्दबुद्ध्युपगमे अयोग्यस्य वाक्यस्य योग्यतापत्तिं बाधिकामुक्त्वा योग्यस्यापि वाक्यस्याऽयोग्यतापत्तिं बाधिकामाह नेदमेकस्यापीति।। अत्रैकपदं प्राणिसामान्यपरं तथा च प्राणिभिन्नस्य स्वत्वसम्बन्धेन धनादौ असत्त्वान्नेदमेकस्यापीति वाक्यमयोग्यं स्यादतस्तदयोग्यत्वार्थं प्राणिस्वत्वाभावबोधने वि-

२२

भक्त्यर्थविशेष्यकत्वमावश्यमिति भावः।। नन्वेतावता बक्त्यर्थस्य प्रकृत्यर्थविशेष्यतया भानसिद्धावपि पञ्चम्यर्थ हेतुत्वस्य तथात्वं नायातमत आह इत्यादाविति।। तथा च
पर्वतो वह्निमान् धूमान्न तु जलादित्यादौ वह्न्यादेर्ज्ञानादिज्ञाप्यत्वाभावबोधानुरोधादेव तथात्वमिति भावः।। मैत्रादिसम्बन्धाभावबोधस्येति।। पाठः तस्यैव प्रागुक्तत्वात् चैत्रादिसम्बन्धा-
भावेति पाठे तु चैत्रादिसम्बन्धस्य सान्निध्यात्तदभावस्य च बोधो ग्राह्यः।। वस्तुतः चैत्रस्येदं न किन्तु मैत्रस्येति योजनया चैत्रादिसम्बन्धाभावस्यैव बोधः प्रक्रान्त इति नानुपपत्तिलेशोऽपि।।
ननु नेदं चैत्रस्येत्यादौ स्वत्वान्वितस्य चैत्रस्यैव स्वत्वसम्बन्धेनाभावो नञा बोध्यते इत्यनियामकसम्बन्धस्य प्रतियोगितानवच्छेदकत्वप्रवादस्य निर्युक्तत्वादित्यतः स्वत्वस्यैव चैत्रस्यात्य-
न्ताभावो बोधयितुमशक्य इत्याह चैत्रो न पचतीत्यादि।। तथा च विभक्त्यर्थात्यन्ताभावबोधने नञा सप्तम्यनपेक्षणात् अस्माकं मते चैत्रस्वत्वात्यन्ताभावस्य बोधो न दुर्घटः; प्रातिपदि-
कार्थस्य तु चैत्रादेः स्वत्वादिसम्बन्धेन धनादावभावस्य बोधो न सम्भवति, नामार्थस्यात्यन्ताभावबोधने नञा सप्तम्यपेक्षणात्, अन्यथा घटः पटो नेत्यादावपि पटादेरत्यन्ताभावप्रती-
तिप्रसङ्गादिति निगर्वः।। हेतुविषयकेत्यादि।। हेतुविषयकज्ञानजनकत्वव्याप्यं यदवयवत्तावच्छेदकं हेतुत्वोपनयत्वादि तच्छून्यत्वे सतीत्यर्थः। हेतुविषयकज्ञानजनकत्वस्य समानाधिकरणं

प्रतिज्ञात्वमादायाऽसम्भवः स्यादतो व्याप्यपदम्।। हेतुविषयकज्ञानजनकत्वव्याप्यं तत्तत्प्रतिज्ञाव्यक्तित्वमादाया व्याप्तेर्वारणाय अवयवतावच्छेदकेति।। ऽदाहरणत्वस्य हेतुविषयकज्ञानजनक-
नियतत्व। त्वॉत्तमादायोदाहरणेऽतिव्याप्तिरत ऽक्तमुदाहरणान्येति।। उदासीनव्युदासाय न्यायावयवेति।। अत्र हेतुविषयकत्वमवश्यं प्रकृतहेतुविषयकत्वं वाच्यम्, अन्यथा वह्निमात्रस्यैव हेतुत्व-
सम्भवात्प्रतिज्ञायामसम्भवापत्तेः तथा च सर्वसाधारणस्योपनयत्वादेरपि धूमादिप्रकृतहेतुविषयकज्ञानजनकत्वा नियतत्व त्तद्वत्यातिव्याप्तिः।। यदि च सर्वसाधारणमुपनयत्वादिकं नास्त्येवाऽ-
वयवविभाजकं परन्तु तत्तत्साध्यत्वादिघटितं तत्तथेति विभाव्यते, तदा प्रतिज्ञात्वमपि तत्तद्धेतुकतत्तत्साध्यकत्वादिनैव निर्वाच्यं तथा च यत्साध्यहेतुकप्रतिज्ञायां हेतुविषयकत्वनैय-
त्यं तत्राव्याप्तिरित्यस्वरसः काश्चिदित्युक्त्या सूचितः।। जिज्ञासानुपधायकप्रतिज्ञायामव्याप्तिरत आह तद्योग्यतेति।। योग्यता चात्र प्रकृतहेत्ववयवप्राग्वर्तिरूपा ग्राह्या।। ननु
प्रतिज्ञैकदेशादेरपि तादृशवाक्यत्वात्तत्रातिव्याप्तिरत आह न्यायावयवत्वमिति।। प्रकृतेत्यादिः।। गन्धवती भिद्यते गन्धादित्यादिस्थलीयप्रतिज्ञायामव्याप्तिमाशङ्क्याह पूर्वोपद-
र्शितेति।। प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यविषयताबहिर्भावेन यल्लिङ्गविषयत्वं तदभावार्थकमित्यर्थः।। तेन चोपनयादेर्व्युदासः।। भावहेतुकोदाहरणस्य लिङ्गाविषयत्वदलेनैव वार-

२३

णसम्भवादाह अभावहेतुक इति ।। तथा च ह्रदो निर्धूमो निर्वह्नित्वादित्यादिस्थलीयस्य यो यो धूमवान स वह्निमानित्युदाहरणस्य वारणायेत्यर्थः ।। लिङ्गिपदस्य पक्षपरत्वे पूर्वस्मा-
दभेदापत्तिरतो व्याचष्टे लिङ्गि साध्यमिति ।। यद्यपि लिङ्गिविषयकं लिङ्गवद्विशेष्यकमित्येव व्याख्यातुमुचितं [illegible] तावतैवाग्रिमदोषव्युदासात्, तथाप्यग्रिमव्याख्यायां लिङ्गिपदस्य
साध्यपरत्वार्थं ग्रन्थगौरवापत्तिभियैवात्र लिङ्गि साध्यमित्युक्तमिति ध्येयम् ।। तेनेति ।। साध्यवन्मुख्यविशेष्यकत्वपर्यन्तविवक्षणेनेत्यर्थः ।। अन्यथा इदं जलमित्यादिस्थलीयस्य यन्न जलं त-
न्निःस्नेहत्वप्रकारकप्रमाविषय इत्युदाहरणस्यापि जलत्वं साध्यं जलात्मकत्व साध्यवत्तामवगाहमानत्वात्तत्रातिप्रसङ्गापत्तेरिति भावः ।। स्नेहवत्त्वप्रकारकप्रमाविषयत्वस्य हेतुतायामुदाह-
रणस्य लिङ्गाविषयत्वदलेनैव वारणसम्भवान्निःस्नेहत्वप्रकारकप्रमाविषयत्वाभावो हेतूकृतः ।। शीतस्पर्शादिसमवायिकारणतावच्छेदकीभूतजलत्वजाते द्व्यणुकपर्यन्तस्थायित्वमते
जलारम्भकपरमाणावुक्तहेतोः साध्यव्यभिचारादाह इदं द्रव्यमिति ।। यत्तु ।। निःस्नेहत्वप्रकारकप्रमाविषयत्वाभावो जलत्वमेव स्नेहाभामनन्तत्वेन तथात्वायोगात् तथा च यन्न जल-
मित्युदाहरणस्य जलत्वरूपलिङ्गविषयकत्वादेव नातिप्रसङ्गः अतः स्थलान्तरमाह इदं द्रव्यमितीति ।। तन्न ।। निःस्नेहत्वप्रकारकप्रमाविषयत्वाभावस्याऽतिरिक्तत्वात् ।। अन्य-
था तुल्यन्यायेन जलान्यत्वप्रकारकप्रमाविषयत्वाभावस्यापि जलत्वस्वरूपत्वे यन्न द्रव्यं तड्जलान्यत्वप्रकारकप्रमाविषय इत्युदाहरणस्यापि जलत्वस्वरूपलिङ्गविषयकत्वेनैव

नाद्दण सम्भवादिति ध्येयम्।। जन्यजलस्य पक्षत्वे निःस्नेहत्वप्रकारकप्रमाविषयत्वशून्यत्वं स्वरूपासिद्धम् उत्पत्तिकालावच्छेदेन निःस्नेहत्वस्य तत्र सत्त्वादतो हेत्वन्तरमाह जला-
न्यत्वेति।। तथा चोक्तस्थलीयस्य यन्न द्रव्यं तज्जलान्यत्वप्रकारकप्रमाविषय इत्युदाहरणस्य द्रव्यत्वरूपसाध्यविषयकत्वेपि तन्मुख्यविशेष्यकत्वाभावान्नातिव्याप्तिरिति भावः।
ननु विषयत्वं प्रमेयत्वज्ञानजन्यज्ञानीयं प्रमेयत्वादित्यादिस्थलीयहेतावतिव्याप्तिः, तादृशानुपूर्व्याः सम्प्रदायविरोधेन न्यायाधारकतया कथञ्चिद्वारणे ह्रदो निर्धूमो निर्वन्हित्वादित्या-
दिस्थलीये यत्र धूमस्तत्र वन्हिरिति व्यतिरेक्युदाहरणेऽतिव्याप्तिः तस्य साध्यवन्मुख्यविशेष्यकत्वात् यत्र ~~वन्हि~~ धूमस्तत्र वन्हिरित्याकारकस्यैवोदाहरणस्य मिश्रैर्व्यवस्थापितत्वादित्यतः प्र-
कारान्तरमाह लिङ्गविषयेत्यस्येत्यादि।। पूर्वोक्तेति।। प्रकृतहेतुकप्रकृतसाध्यसिद्ध्यौपयिकेत्यर्थः।। ननु साध्यवद्विशेष्यकत्वरूपस्य प्रागुक्तलिङ्गविषयत्वस्य निवेशे घटः प्रमेयो द्रव्यत्वा-
दित्यादौ हेतावतिव्याप्तिः पञ्चम्यर्थस्यापि प्रमेयत्वेन साध्यवत्त्वादतः साध्यतावच्छेदकरूपेण साध्यविषयकत्वरूपं तद्वाच्यं तत्र वन्हिमान् वन्हिसामग्रीमत्त्वादित्यादिहेतावतिप्रसक्तमत
आह लिङ्गविषयत्वञ्चेति।। प्रकृतेत्यादि।। प्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारतानिरूपितहेतुत्वावच्छिन्नविशेष्यकत्वस्य बहिर्भूतमव्यापकं यत्साध्यविषयित्वं तादृशविशेष्यताबहिर्भूतविषयता-

२४ कत्वमिति यावत् साध्यप्रवेशो वैयर्थ्यादिति ध्येयम्।। हेतुतावच्छेदकावच्छिन्नेत्यस्य फलमाह वन्हिमानित्यादि।। वन्हिसामग्रीमत्वादित्यत्र हेतुप्रकारकहेतुत्वावच्छिन्नविशेष्यत्वाव्या-
पकसाध्याविषयिताकत्वेपि हेतुतावच्छेदकावच्छिन्नप्रकारित्वाव्यापकसाध्याविषयिताकत्वविरहान्नातिव्याप्तिरिति भावः।। हेतुत्वत्वावच्छिन्नविशेष्यताप्रवेशस्य फलमाह अयं हेतुरिति।। अ-
यं हेतुत्ववान् हेतुत्वेन प्रमीयमाणत्वादित्यादौ हेत्ववयवस्य पञ्चम्यर्थविधेयहेतुतावच्छेदकावच्छिन्नप्रकारित्वाव्यापकसाध्याविषयितावत्त्वेपि तादृशविषयित्वस्य हेतुत्वत्वावच्छिन्नविशेष्य-
त्वाव्यापकत्वविरहान्नातिव्याप्तिरिति भावः।। ननु पक्षांशे साध्यावगाहित्वविवक्षयैव उक्तहेतौ वारणसम्भवान्निरुक्तविषयिताबहिर्भावेण साध्याविषयितापर्यन्तानुधावनमफलमत
आह इदं चेति।। तथाचेदं हेतुत्वं हेतुतात्वेन प्रमीयमाणत्वादित्यादौ हेतुत्वत्वसाधकस्य हेत्ववयवस्य पक्षीभूतहेतुत्वांशे पञ्चम्यर्थतावच्छेदकीभूतहेतुतात्वरूपसाध्यावगाहित्वात्तत्राऽ-
तिव्याप्तिरेव स्यात् यदि नोक्तविवक्षा स्यादिति भावः।। नन्वेवमपि यत्रायं वन्हिमानित्यादौ विषयितासम्बन्धेन बुद्ध्यवच्छिन्नस्यैव समवायेन हेतुत्वं तत्र बुद्धिमत इत्यादौ हेत्ववयवेऽ-
तिव्याप्तिः तस्य मतुबर्थबुद्धिसम्बन्धित्वप्रकारेणैव हेतुत्वावगाहितया हेतुतावच्छेदकधर्मावच्छिन्नप्रकारतानिरूपितहेतुत्वविशेष्यताबहिर्भावेणैव साध्यावगाहित्वात् तथायमेको धूमादि-

त्यत्रापि हेतावतिव्याप्तिः तस्या निरुक्तविषयिताबहिर्भावेण प्रकृत्यर्थधूमे एकत्वरूपसाध्यावगाहित्वादिति चेन्न। यत्साध्यकहेत्ववयवानां यादृशयादृशविषयिताकबोधजनकत्वं सम्प्र-
दायसिद्धं तादृशतादृशविषयिताबहिर्भावेण साध्यावगाहित्वस्य विवक्षितत्वादुक्तहेतूनामतथात्वादिति भावः। लिङ्गेत्यादि। उपनयादिवारणार्थमनियतान्तं प्रकृतहेतुविषयकज्ञानज-
नकत्वाव्याप्यार्थकम्। प्रतिज्ञात्वस्यापि कांचिल्लिङ्गज्ञानजनकत्वसमानाधिकरणत्वादनियतत्वानुसरणम्। अप्रसिद्धहेतुकोदाहरणस्थले लिङ्गज्ञानजनकत्वानियतस्योदाहरणत्वस्य
वारणाय लिङ्गविषयिकेत्यादि। प्रकृतसाध्यविषयकज्ञाननियमकत्वानियतेति तदर्थः। इदं जलं निःस्नेहत्वाभावादित्यादौ यन्नजलं तन्निःस्नेहत्ववदित्याद्युदाहरणे तत्तदुदाहरणत्व-
मादायातिप्रसङ्गवारणार्थमवयवतावच्छेदकेत्युक्तम्। दुर्ग्रहत्वादित्याद्युपलक्षणम्। यत्साध्यकप्रतिज्ञायां लिङ्गविषयकत्वानियमस्तत्र प्रागुक्तरीत्या अव्याप्तेश्चेत्यपि द्रष्टव्यम्। न्यायाव-
यवार्थकमिति। न्यायान्तर्गतत्वमात्रं सम्यक् तावताप्युदासीनस्य धूमादित्यादिवाक्यस्य वारणासम्भवादिति वाच्यम्। निगमनैकदेशे तस्मादित्यत्रातिव्याप्त्यापत्तेरिति भावः। उपनया-
दीनां वक्ष्यमाणहेतुविभक्तिमत्त्वेनैव वारणसम्भवादाह निगमनेति। ननु वह्निमान् वह्निसामग्रीमत्वादित्यादौ हेतावव्याप्तिः तस्या साध्याविषयकज्ञानजनकत्वाभावादत आह साध्या-

२५

विषयत्वश्चेति।। प्रकृतेति।। तथा च हेतुतावच्छेदकावच्छिन्नप्रकारतानिरूपितहेतुत्वत्वावच्छिन्नविशेष्यतावहिर्भावेण यत्साध्यविषयकत्वं तच्छून्यज्ञानजनकत्वमर्थः।। न च तादृशविशेष्यतावहिर्भूतविषयताशून्यत्वस्यैव सम्यक्त्वे साध्यप्रवेशो व्यर्थ इति वाच्यम्।। अवच्छेदाभावत्वात्।। न च तथाप्यनतिप्रयोजकत्वम्, हेतुविभक्तिमत्त्वपदसार्थक्यस्यैवातिप्रयोजनकत्वात्।। अन्यथा तद्वारणीये व्यतिरेक्युदाहरणादौ निरुक्तविशेष्यतावहिर्भूतविशेष्यतावत्त्वादेवातिव्याप्तिविरहेण तद्वैयर्थ्यापत्तेः।। न चेदमेकं धूमादित्यादिहेतावव्याप्तिः तस्य हेतुविशिष्टैं हेतुत्वविषयतावहिर्भावेणैकत्वरूपसाध्यावगाहित्वादिति वाच्यम्।। धूमादावेकत्वादेरयोग्यतानिश्चयकालीनस्य केवलधूमादिहेतुताबोधस्य जनकताभावादेव तत्र लक्षणसम्भवादिति भावः।। नन्वेवमपि पत्रायं वह्निमानित्यादौ विषयितासम्बन्धेन बुद्ध्यवच्छिन्नस्यैव समवायेन हेतुत्वं तत्र वह्निमत इत्यादौ हेतावव्याप्तिः तस्य हेतुप्रकारकहेतुत्वविषयतावहिर्भावेण मतुबर्थसम्बन्धांशे बुद्धिरूपसाध्यावगाहित्वादत आह पूर्वोपदर्शितेति।। प्रतिज्ञालक्षणोपदर्शितेत्यर्थः।। तथा च यत्पक्षकयत्साध्यकप्रतिज्ञाव्यक्तीनां पक्षोद्देश्यकसाध्यनिष्ठयादृशयादृशविशेषणताकबोधजनकत्वं साध्यनिष्ठतादृशविशेषणताशून्यबोधजनकत्वमर्थः स चोक्तहेतावप्यस्तीति नाव्याप्तिः। तत्र साक्षात्पक्षाविशेषणतेन यत्साध्यविषयकत्वं तच्छून्यत्वमागोक्तौ तस्मादि-

धत इत्यादिनिगमनेऽतिव्याप्तिः तत्राख्यातार्थद्वारैव प्रतिज्ञायाः पक्षधर्मिकसाध्यविशेषणकज्ञानजनकत्वादतः परम्परेत्युक्तम्।। तन्मात्रोक्तौ च तस्मात्पचतीत्यादिनिगमनेऽतिव्याप्तिः तत्र साक्षादेव प्रतिज्ञायाः पक्षे साध्यप्रकारकज्ञानजनकत्वादतो द्वयमुपात्तम्।। न च साध्यनिष्ठतादृशविशेषणत्वानां प्रातिस्विकरूपेण प्रवेशादननुगमः, तादृशविशेषणत्वाभावकूटस्यानुगतत्वात् पक्षनिष्ठमुख्यविशेष्यतानिरूपितसाध्यनिष्ठविशेषणताकत्वेन कथञ्चिदनुगमयितुं शक्यत्वाच्च।। न चैवं तस्मात्पचतीत्यादिनिगमनेऽतिव्याप्तिरिति वाच्यम्।। स्वस्यापि स्वघटकतया साध्यनिष्ठविषयतायामपि तादृशविशेषणतात्वादिति भावः।। पूर्वोपदर्शितेति।। वन्हिमान् वन्हिसामग्रीमत्त्वादित्यादावित्यर्थः।। यद्यपि हेतुविभक्तिमत्त्वानुक्तौ ह्रदो निर्धूमो निर्वन्हित्वादित्यादौ व्यतिरेक्युदाहरण एवातिप्रसङ्गः, तथापि अग्रे विवक्षणीयतदर्थस्य व्यावृत्त्यर्थं स्थलान्तरमाह इदमिति।। दण्डसंयोगेति।। संयोगपदं साध्याविशेष्यस्य वारणाय।। द्रव्यपदञ्च दण्डगुणादौ व्यभिचारस्य वारणाय।। अजन्यत्वस्यैव हेतुत्वसम्भवोपि अखण्डाभावतया दण्डसंयोगाजन्यत्वे व्यर्थविशेषणत्वाभावः।। ननूक्तस्थलीयस्य यद्दण्डजातं तद्दण्डसंयोगाजन्यद्रव्य[illegible]त्वाभाववदित्युदाहरणस्य ज्ञापकत्वरूपहेतुत्वप्रतिपादकविभक्तिमत्त्वमात्रेणापि वारणसम्भवादग्रे साध्यान्वयिस्वार्थबोधकक्षणेत्यादिपर्यन्ताविवक्षा व्यर्थेत्यत आह अयं न धूमादि-

ति॥ अन्वय्युदाहरणस्य साध्याविषयकत्वदकेनैव वारणसम्भवादाह व्यतिरेकिणीति॥ न्याय इति विशेषः यद्यप्युक्तस्थलीयस्य धूमादालोकव्यापकीभूताभावप्रतियोग्यार्द्रेन्धनवत्त्वत्ववानयमित्याकारकोपनयस्यापि वारणसम्भवादुदाहरणमात्रानुसरणमयुक्तम्, तथापि अग्रे हेतुत्वपक्षकोपनयस्य वारणेनैव उपनयान्तरस्य वारणमर्थतः सिद्धमतो न तस्य पृथगुपन्यास इति ध्येयम्॥ ननु प्रकृतसाध्यान्वितस्वार्थोपस्थापकपदवत्त्वेनाप्युक्तोदाहरणस्य वारणसम्भवाद्विभक्तिपर्यन्तानुसरणं व्यर्थमत आह हेतुत्वपक्षक इति॥ घटादिपक्षकोपनयस्य विभक्तिपदाप्रवेशोपि प्रकृतसाध्यान्वितस्वार्थबोधकहेतुत्वार्थकपदवत्त्वविवक्षयापि वारणसम्भवात हेतुत्वपक्षकोपनयानुसरणम्॥ न चोपनयमात्रस्यैव प्रागुक्तसाध्याविषयकत्वदकेनैव वारणादिदमयुक्तम्, पूर्वोपदर्शितेत्यादिद्वितीयकल्पोक्तसाध्याविषयकत्वस्योपनयेपि सम्भवात्। प्रकृतहेतुविशेषहेतुत्वविषयिताबहिर्भावेण साध्याविषयकत्वकल्पे तु हेतुत्वं न रूपं गुणभिन्नत्वादित्यादिस्थलीयस्य रूपत्वव्यापकाभावप्रतियोगिगुणान्यत्ववदिदमित्येवं व्यतिरेक्युपनयस्य वारणार्थं विभक्तिपदम्, तस्यापि तस्मान्न रूपमित्याकारकनिगमनोपस्थापितसाध्यान्वितस्वार्थबोधकहेतुत्वार्थकेदंपदवत्त्वादिति वदन्ति॥ यथाश्रुतमूलेन वारयितुमशक्यत्वादाह तदर्थश्चेति। अयं धूमाद्वह्निमान आलोकादित्यादिस्थलीयस्य धूमाद्वह्निव्या-

व्यालोकवानयमित्युपनयस्यापि वह्निस्वरूपसाध्यान्वितस्वार्थबोधकपञ्चमीविभक्तिमत्त्वात्तन्नातिव्याप्तिरतः प्रकृतपदम्। तथा च तत्र धूमज्ञानज्ञाप्यवह्नित्वावच्छिन्ने पञ्चम्यर्थहेतुत्व-
स्यान्वयान्नातिव्याप्तिः। ननु प्रकृतहेतुविशिष्टहेतुत्वविषयताबहिर्भावेन साध्याविषयकत्वस्य प्रवेशकल्पे मूलोक्तहेतुपदं व्यर्थं प्रकृतसाध्यान्वितार्थोपस्थितिजनकविभक्तिमत्त्वस्यैव
सम्यक्त्वादत आह हेतुत्वेतीति। पूर्वोपदर्शितेत्यादिः। द्वितीयसाध्याविषयकत्वकल्पेतु हेतुत्वबोधकार्थकं हेतुपदं देयमेव। अन्यथा गुणाभावो गुणशून्यो द्रव्यभिन्नत्वादित्यादिस्थ-
लीयस्य गुणव्यापकीभूताभावप्रतियोगिद्रव्यान्यत्ववानयमित्याकारकव्यतिरेक्युपनयस्यापि पक्षीभूतप्रकृतसाध्यान्वितैकत्वोपस्थितिजनकप्रथमाविभक्तिमत्त्वात्तत्रातिव्याप्त्यापत्तेः।
वस्तुतः प्रथमकल्पेपि हेतुपदादेव प्रकृतसाध्यान्वितस्वार्थोपस्थितिहेतुत्वस्य लाभान्न तद्वैयर्थ्यं सामान्यशब्दस्य विशेषपरताया व्युत्पत्तिसिद्धत्वादिति परमार्थः। ननु पर्वतस्तत्पुरु-
षीयपर्वतभिन्नत्वप्रकारकनिश्चयस्य विशेष्यतया भाववान् तत्पुरुषीयतादृशनिश्चयाभावादित्यादिस्थलीयस्य यो यत्तत्पुरुषीयपर्वतभिन्नत्वप्रकारकनिश्चयवान् स तत्पुरुषीय-
तादृशनिश्चयवान् यथा तत्पुरुषीयतादृशनिश्चयाभावादुत्पन्नं ज्ञानमित्युदाहरणस्यापि प्रकृतहेतुविशिष्टहेतुविषयताबहिर्भावेनोत्पन्नज्ञानांशे प्रकारतावच्छेदकतया साध्याव-

Nepal Sanskrit University Valmeeki Campus, Kathmandu

२१

गाहित्वेपि पूर्वोपदर्शितसाक्षात्परम्परासाधारणसाध्याविषयकत्वात् प्रकृतसाध्यान्वितस्वार्थबोधकपञ्चमीविभक्तिमत्वाच्च द्वितीयकल्पे तत्रातिव्याप्तिरित्याशङ्कते यदि चेति।। पर्वत इति।
पक्ष इति शेषः।। पर्वतभिन्नत्वेति।। तत्पुरुषीयपर्वतभिन्नत्वप्रकारकनिश्चयस्येत्यर्थः।। यथाश्रुते तादृशज्ञानत्वावच्छिन्नाभावस्य ज्ञानानुत्पादकतया वक्ष्यमाणदृष्टान्तासङ्गते विशेष्यतासम्ब-
न्धेन तादृशनिश्चयत्वावच्छिन्नाभावादेव पर्वतत्वादिप्रकारकज्ञानस्योत्पादात्। अत एव वस्तुमात्रस्यैव सर्वं पर्वतभिन्नमित्याकारकभ्रमविशेष्यत्वात्साध्याप्रसिद्धिरित्यपि दूषणं समा-
हितम्, तादृशभ्रमशून्यपुरुषस्यैव साध्येऽन्तर्भावात् प्रमेयावच्छेदेन विशेष्यतया तादृशज्ञानाभावस्य पर्वते सम्भवाच्चेति ध्येयम्।। पर्वतत्वादिहेतुतायामुदाहरणस्य प्रकृतसाध्यान्वितस्वा-
र्थबोधकविभक्तिमत्वविरहादेव व्युदासः स्यादतः साध्यस्यैव हेतुत्वमुक्तम्।। ननु साध्यस्यैव हेतुत्वे विवादाङ्गसंशयाभावान्न्याय एव नास्ति कस्योदाहरणेतिव्याप्तिराशङ्क्यत इत्यत आह
सिषाधयिषेति।। इदञ्च स्वरूपसम्बन्धेनैव साध्यसाधनभावमभिप्रेत्योक्तं स्वरूपकालिकादिसम्बन्धाभ्यां तादृशज्ञानाभावस्य साध्यसाधनस्थलेऽनुमित्सां विनापि न्यायप्रयोगसम्भ-
वादिति ध्येयम्।। तादृशज्ञानाभावादिति।। तत्पुरुषीयपर्वताभिन्नत्वप्रकारकनिश्चयाभावादित्यर्थः।। अन्वय्युदाहरणस्य साक्षात्परम्परासाधारणपक्षविशेषणतया साध्याविषयकत्व-

दलेनैव वारणसम्भवादाह व्यतिरेकीति।। न चैतदुदाहरणवारणार्थमेव मूलोक्तं हेतुपदं ज्ञापकत्वहेतुत्वबोधकार्थकमस्तु प्रकृतस्थलीयपञ्चम्याः कारणत्वमात्रबोधकत्वादिति वाच्यम्।। यत्र पर्वत-
भिन्नत्वज्ञानाभावज्ञाप्यस्यैव ज्ञानस्य यथा पर्वतभिन्नत्वज्ञानाभावादिदं ज्ञानमित्येवं प्रकारेण दृष्टान्तता तादृशोदाहरणे तथाप्यतिव्याप्तितादवस्थ्यादिति भावः। दृष्टान्तस्योदाहरणघटकत्वं
न सर्वसम्मतमतो यदि वेत्युक्तम्।। यत्तु प्रकृतसाध्यविशेष्यकस्वार्थान्वयबोधजनकत्वविवक्षयैव कथितोदाहरणव्युदाससम्भवात् यदि वेत्युक्तमिति।। तत्तुच्छम्।। साध्यविशेष्यकान्व-
यबोधप्रवेशे। विभक्तिपदव्यर्थतापत्तेः।। उपनयस्थायंपदस्य साध्यप्रकारकान्वयबोधं प्रत्येव हेतुत्वेन तत्रातिप्रसङ्गाभावादिति ध्येयम्।। अवयवान्तरेति।। न च अवयवान्तरेण प्रति-
ज्ञादिना साध्यविधेयाव [illegible] स्योपस्थापितो यः पर्वतभिन्नत्वप्रकारकज्ञानाभाववत्तदन्वितस्यैव स्वार्थस्यान्वयबोधकत्वमुक्तोदाहरणस्थपञ्चम्या अप्यस्तीत्यतिव्याप्तितादवस्थ्यमिति
वाच्यम्।। अवयवान्तरस्थपदसाकाङ्क्षविभक्तिमत्त्वस्य विवक्षितत्वादिति भावः।। वक्तव्यमिति।। हेतुविभक्तिमत्त्वदलेनेति शेषः।। अवयवान्तरादिप्रवेशमपेक्ष्य लाघवादाह
उदाहरणेति।। साध्येत्यादि।। अत्र, नियतान्तं निगमनत्वस्य, नियतत्वान्तमुदाहरणत्वस्य, अवच्छेदकान्तञ्च व्यतिरेक्युदाहरणत्वस्य व्युदासाय बोध्यम्।। सर्वसाधारणस्य हेतुत्वलिङ्ग-

२८

मनत्वादेर्दुर्वचत्वान्नेदं युक्तमित्याशयेनाह तद्भिन्नत्यामीति।। अत्र निगमनादेरपि हेतुत्वप्रतिपादकविभक्तिमत्त्वान्नात्रातिव्याप्तिरतो व्याचष्टे विभक्त्यर्थेति।। विभक्त्यर्थीभूतं यद्धेतुत्वं तद्विशेष्यकान्वयबोधजनकेत्यर्थः।। हेतुत्वमित्यादि।। यद्यपि नामोपस्थाप्यस्यापि हेतुत्वस्य विभक्त्यर्थत्वान्न दोषस्तादवस्थ्यम्, तथापि विभक्तिजन्योपस्थितिसहकारेण हेतुत्वविशेष्यकबोधजनकत्वं विवक्षितम्।। न चेदं हेतुत्वमित्यादिस्थलीयस्य तस्माद्धेतुत्वमित्यादिनिगमनस्यैवमप्यवारणं तस्य पञ्चमीजन्यहेतुत्वोपस्थितिसहकारेणैव तादृशबोधजनकत्वादिति वाच्यम्। हेतुत्वविधेयकबोधजनकत्वेनापि विभक्तिजन्योपस्थितेर्विशेषणीयत्वात्, तथा च तस्माद्धेतुत्वमित्यादौ पञ्चम्यर्थहेतुत्वस्य साध्यीभूतहेत्वंशे विधेयतयैव भानान्न तद्वारणमिति भावः।। मिथत इत्यादिना तस्मात्पचतीत्यादिनिगमनस्यापि सङ्ग्रहः तस्यापि आख्यातविभक्त्यर्थ। विशेष्यकबोधजनकत्वादिति भावः।। ननु घटे दण्डादित्यादिप्रतिज्ञास्थलीयस्य तस्माद्दण्डादित्यादिनिगमनस्यापि पञ्चम्यर्थहेतुत्वविशेष्यकबोधजनकत्वान्नात्रातिव्याप्तिरत आह घटे दण्डादिति।। ननु घटे दण्डादित्यत्र जनकत्वमेव पञ्चम्यर्थः इति तत्रत्यलक्षणस्य ज्ञापकलक्षणहेतुत्वविशेष्यकबोधजनकत्वाभावादेव वारणं भविष्यतीत्यत आह वह्नेर्धूमादिति।। तद्धेतोरिति।। पञ्चम्यर्थहेतुताया दण्डादिहेतुत्वेन घटाद्यहेतोरिति भावः।। स्वारसे-

रपि स्वस्य तादात्म्येन स्वनिष्ठधर्मव्यापकत्वादाह अतदात्मन इति ।। तथा च तादात्म्येतर वृत्त्यनियामकसम्बन्धेन व्यापकत्वविरहादुक्तक्रमेण न्याय एव नास्ति कस्य । निगमनेतिव्याप्तिरि-
ति भावः ।। ननु वृत्त्यनियामकसंयोगादिनापि गगनादेः पृथिवीत्वादिव्यापकत्वस्य स्वयमेवोक्तत्वात् व्याप्यत्वस्य पञ्चम्यर्थत्वमते वन्ह्यादौ तादृशसाध्यस्य सत्त्वात्क्वेदं न युक्तमत आह संप्र-
दायेति ।। न च विवादाङ्कस्य संशयादेः शाब्दप्रमोपयुक्तस्य चाकाङ्क्षादेः सम्भवेऽपि वह्निर्धूमादित्यादिप्रतिज्ञानङ्गीकारः साम्प्रदायिकानां निर्बीजमिति वाच्यम् ।। एकसुवर्थेन समं सामा-
न्यत एव सुबर्थान्तराऽन्वयस्याऽव्युत्पन्नतया प्रतिज्ञानिविष्टपञ्चम्यर्थोपस्थापितधूमव्याप्यत्वादिसाध्ये हेत्ववयवान्तर्गतपञ्चम्यर्थान्वयस्यैव उपनयानङ्गीकारबीजत्वात् ।। अन्यथा गृहे
घटस्य इत्यादितोऽपि घटसम्बन्धी गृहवृत्तिरित्याकारबोधप्रसङ्गात् । अत एव धने चैत्रस्य इत्यादितोऽपि चैत्रस्वत्ववद्धने इत्येव बोधो न तु चैत्रस्वत्वं धनवृत्तिरित्याकारको बोधः सप्तम्यर्थाधे-
यत्वस्य षष्ठ्यर्थस्वत्वेऽन्वयस्याऽव्युत्पन्नत्वात् । न च क्रयाच्चैत्रस्य धनमित्यादितः क्रयजन्यचैत्रस्वत्वस्य धनादौ प्रतीत्यनुरोधात्सुवर्थेन समं स्वार्थमुख्यविशेष्यकान्वयबोधजनकत्वमेव
सुपामव्युत्पन्नं कल्प्यते तथा च वह्निर्धूमादिति प्रतिज्ञायां पञ्चम्यर्थस्य पक्षविशेषणतया मुख्यविशेष्यत्वाभावात् तत्र हेत्वन्तर्गतपञ्चम्यर्थस्याऽन्वये बाधकाभाव इति वाच्यम् ।

तावता तस्माद्धूमादित्येवं निगमनान्तर्गतयोः पञ्चम्यर्थयोः पारम्पर्यान्वयसम्भवेन सम्प्रदायविरोधस्यावश्यकत्वात् तत्र धूमज्ञाप्यत्वादि साध्यस्य मुख्यविशेष्यतयैव भानादिति भावः। तादृशायोग्य-
तासत्त्वादिति।। धूमादितिवाक्यात्मकेत्यादिः ॥ उदाहरणत्वञ्चेति।। न्यायगर्भोदाहरणत्वप्रवेशेऽपि अनुक्तोदाहरणस्थले तादृशायोग्यतासत्त्वेनातिव्याप्तेर्न्यायावयवत्वस्यावश्यकत्वादिति भावः।
वैयर्थ्यादिति।। प्रकृतव्याप्तितात्पर्यकत्वभागस्यैव सम्यक्त्वादिति भावः। प्रतिज्ञादीतरस्य हेतुपञ्चम्यन्तत्वेनैव वारणादाह अये न दण्डादित्यादि।। यथाश्रुतसाध्याविषयकत्वस्य वह्निमान् वह्नि-
सामग्रीमत्त्वादित्यादिहेतावव्याप्तेराह व्याख्यातार्थमिति।। तथा च प्रकृतहेतुविशिष्टहेतुत्वाविषयतावाह्यभावेण यत्साध्याविषयकत्वं तदभावो ग्राह्यः अन्वयुपनयस्य निरुक्तसाध्याविषयकत्व-
दकेनैव वारणादाह उपनयाविशेषेति।। तथा च ह्रदो निर्धूमो निर्वह्नित्वादित्यादिस्थलीयस्य धूमव्यापकीभूताभावप्रतियोगिनिर्वह्नित्ववानयमित्याकारकव्यतिरेक्युपनयस्य वारणायेत्यर्थः।
यद्यप्युक्तस्थलीयोदाहरणस्यापि हेतुपञ्चम्यन्तत्वेन वारणं सम्भवति, तथाप्यग्रे वक्ष्यमाणोदाहरणान्यत्वेनैव तद्वारणसम्भवादुपनयभागानुसरणम्।। ननु पञ्चम्यन्तत्वस्यैव सम्यक्त्वा-
द्धेतुपदं व्यर्थमत आह हेत्वितीति।। वैकाल्पिकमिति।। तथा च निरुक्तसाध्याविषयकत्वविशेषितं हेतुत्वप्रतिपादकान्यावयवत्वं पञ्चम्यन्तावयवत्वं वा लक्षणार्थः।। ननु हेतुत्वं निर्धूमं निर्व-

न्हित्वादित्यादिस्थलीयस्य व्यतिरेक्युपनयस्यापि हेतुत्वप्रतिपादकमिदं पदमन्तर्भूतमिति तत्रातिव्याप्तिरत आह उपनयस्य चेति ।। ननु घटो वाच्याभिन्नः शब्दान्यत्वादित्यादिस्थलीयस्य यद्य-
वाक्यं स शब्दो यथा दण्डादित्युदाहरणस्यापि पञ्चम्यन्तत्वात्तत्रातिव्याप्तिरत आह यथा दण्डादित्यादेरिति ।। दृष्टान्तस्येति ।। प्रथमैवाऽत्र इति पूर्वेणान्वयः ।। ननु यथा दण्डादिति दृष्टान्तस्य प-
ञ्चम्यन्तत्वे को दोष इत्यत आह पञ्चम्यन्तत्वे इति ।। अन्वयायोगादिति ।। समासातिरिक्तस्थले नामार्थयोरभेदान्वयबोधे नाम्नः समानविभक्तिकत्वस्य तन्त्रत्वादिति भावः ।। इदञ्च वस्तु-
गतिमनुसृत्योक्तम् ।। स्वपरदृष्टान्तस्य पञ्चम्यन्तत्वेऽपि वक्ष्यमाणोदाहरणान्यत्वे नैव तत्रातिव्याप्त्यसम्भवादिति ~~[illegible]~~ ध्येयम् ।। अथायं गोभिन्नो द्रव्यान्यत्वादित्यादिस्थलीयस्य यथा
गौस्तद्द्रव्यं यथा पशुः ककुद्मत्त्वादित्याद्युदाहरणस्यापि हेतुपञ्चम्यन्तत्वात्तत्रातिव्याप्तिरत आह कस्यचिदिति ।। उदाहरणस्य दृष्टान्तघटितत्वं न सर्वसम्मतमित्याशयेनाह सम्भवोऽति-
ति ।। पूर्ववदिति ।। उदाहरणाभिन्नत्वविवक्षयेत्यर्थः ।। ननु वह्निमान् वह्निप्रमातः इत्यादिहेतावव्याप्तिः तस्य तसिलन्तत्वेन पञ्चम्यन्तत्वविरहादत आह अत्र चेति ।। तथा च तसिलो निर-
र्थकतया ऽनुपूपञ्चम्यन्तभागस्यैवाऽर्थवत्त्वान्नाव्याप्तिः पञ्चम्यन्तपदेन पञ्चमीभिन्नस्वघटकयावत्स्वार्थकोत्तरपञ्चमीघटितस्योक्तत्वादिति भावः ।। पञ्चम्यास्तसिलिति सूत्रस्य पञ्च-

३०

म्याः स्थाने तसिलित्यर्थमभिप्रेत्याह पञ्चम्यादेरिति ।। आदिपदाभ्यां सप्तम्यादेस्त्राद्यादेशस्य परिग्रहः ।। नानुपपत्तीति ।। आदेशस्यारितायाः पञ्चम्या एव, तेनुसन्धीयमानत्वादिति-
भावः ।। न च सर्वेभ्य इत्यत्र पञ्चम्याः स्थाने तसिलादेशे बहुत्वे सुस्येकारप्रसङ्गे सर्वेत इत्येव प्रयोगः स्यान्नतु सर्वत इति वाच्यम् ।। तन्मते तसिलादिभिन्न एव बहुत्वे स्यादिति स्वतः पर-
तो वैकारस्यानुनासिकत्वादिति भावः ।। यथाश्रुतेन धूमादालोकवत्पर्वतो वन्हिमान् धूमादित्यादिस्थलीयप्रतिज्ञादेर्वारणासम्भवादाह पूर्ववादिति ।। प्रकृतसाध्यविशेषकप्रकृतहेतुविशिष्ट-
हेतुत्वप्रकारकान्वयबोधजनकपदवत्त्वमित्यर्थः ।। न च सर्वत्र प्रतिज्ञायामतिव्याप्तिः साध्यविशेषकप्रकृतहेतुविशिष्टहेतुत्वप्रकारकान्वयबोधजनकसाध्यवाचकपदवत्त्वादिति वाच्यम् ।।
साध्यवाचकपदान्यत्वस्य तादृशपदेन निवेशयत्वात् । न च साध्यस्य हेतुतास्थले हेतावव्याप्तिरिति वाच्यम् ।। तत्र साध्यवाचकपदान्यस्य तादृशान्वयबोध[illegible]जनकपञ्चमीपदस्यैव सत्त्वा-
दिति विभावनीयम् ।। न च प्रकृतहेतुविशिष्टदलं व्यर्थम्, आलोकाद्वन्हिमतः सधर्मा पर्वतो वन्हिमानित्यादिप्रतिज्ञायामतिव्याप्तिवारकत्वादिति भावः ।। इत्थञ्च धूमाद्वन्हिमतः सधर्मा पर्वतो वन्हि-
मानित्यादिप्रतिज्ञायास्तस्माद्वन्हिमानित्यादिनिगमनस्य वा व्युदासार्थमेव साध्याविषयकत्वदलम्, तच्च वन्हिमान् वन्हिसामग्रीमत्त्वादित्यादौ हेतावव्याप्तमतो व्याचष्टे साध्याविषयकेत्यादि ।

प्रतियोगितानवच्छेदकेत्यादौ मध्यस्थनयापि समुदितान्वयस्य व्युत्पत्तिसिद्धत्वादिति भावः।। इतरेत्यादि।। हेत्ववयवमात्रस्यैव प्रतिज्ञैकवाक्यतया हेतुत्वविशिष्टसाध्यज्ञानजनकत्वादसम्भवापत्तिरतो नैरपेक्ष्यान्तम्।। पर्वतो धूमज्ञानज्ञाप्यवह्निमान् धूमाद्वह्निसामग्र्या इत्यादिहेतावव्याप्तिः तस्यापि अवयवान्तरनैरपेक्ष्येण हेतुत्वविशिष्टसाध्यज्ञानजनकत्वादतः प्रकृतपदम्।। तथा च इतरनैरपेक्ष्येण प्रकृतहेतुविशिष्टहेतुत्वप्रकारकसाध्यधर्मिकज्ञानजनकत्वमर्थः स चोक्तहेतावस्त्येव तत्र हेतुभूतसामग्रीविशिष्टहेतुत्वस्य वह्न्यप्रकारत्वादिति भावः।। वैयर्थ्यादिति।। यद्यपि प्रकृतहेतुविशिष्टहेतुत्वप्रकारकसाध्यधर्मिकज्ञानजनकत्वाभावस्याऽखण्डत्वान्न वैयर्थ्यम्, तथाप्यसति प्रयोजनत्वे तात्पर्यम्।। अत्राऽदक्षत्वमेवाऽस्वरसः कश्चिदित्युक्त्या सूचितः।। ननु ऽदासीनस्यापि धूमादिति वाक्यस्याऽनुमित्यनुकूलत्वेन कथञ्चिदनुमितिपरत्वात् तत्रातिव्याप्तिरतो व्याचष्टे अवयवत्वमिति।। एतदन्तत्वमेव पञ्चम्यन्तेतीति पाठो युक्तः।। लक्षणद्वय एवानुमितिपरत्वस्य निविष्टत्वेन पूर्वत्रैव तस्य व्याख्यातुमौचित्यात्। तावतैवोत्तरत्र तदर्थलाभसम्भवादिति ध्येयम्।। ननु निगमनस्य पञ्चाद्विलक्षणीयलाक्षणिकपदवत्त्वाभावादेव व्युदाससम्भवे तद्वारणार्थं पञ्चम्यन्तपदं व्यर्थमतः पञ्चमीरूपं पदमादायैव निगमनस्य लाक्षणिकपदवत्त्वं व्यवस्थापयितुमाह हेतुत्वादाविति।। हेतुत्वं ज्ञापकत्वम्।। आदिना ज्ञाप्यत्वादेः परिग्रहः।। अवच्छिन्न इति।। तथा च लाक्षणिकं पदवच्छिन्नं निरूपकतासम्बन्धेन तद्धान्यो विभागस्तदाश्रयत्वमित्याकारान्वयबोधः।। ननु निरूपकतासम्बन्धेनावच्छिन्नस्य विभागेऽन्वये घटीयवि-

३१ भागेऽप्ययं विभागो न घटादिति प्रयोगः स्यात् संयोगादिसम्बन्धेनैव घटनिष्ठावधित्वस्य तत्राऽसत्वात्. निरूपकतासम्बन्धस्य वृत्त्यनियामकतया प्रतियोगितानवच्छेदकत्वादत
आह अवधिमत्त्वे वेति।। तथा च घटनिरूपितं यदवधिमत्त्वं स्वरूपसम्बन्धावच्छिन्नतदभावस्य घटीयविभागे विरहान्नोक्तप्रयोग इति भावः।। ननु विभागनिष्ठे अवधिमत्त्वे प्रमाणा-
भाव इत्यत आह प्रत्येत्यादि।। अवधित्वमिवेति।। इवार्थः सादृश्यं तच्चानुभूयमानत्वेन, तथा चानुभव एव तत्र प्रमाणमिति भावः।। सः सम्बन्धविशेषः।। अतिरिक्त इति।। विभा
गादित्यादि।। अनतिरिक्तो वेति।। न चैवं जनकत्वादेः स्वरूपसम्बन्धत्वमते तत्रापि पञ्चम्याः शक्तिः स्यादिति वाच्यम्।। तथात्वेपि क्षत्यभावात्।। अत एव हेतुमत्त्वे शक्त्याभावपीत्यादि स्व-
यमग्रे वक्ष्यते।। ननु ज्ञापकत्वादिरूपहेतुत्वादौ पञ्चम्याः शक्त्यभावे शक्यसम्बन्धाप्रतिसन्धानदशायां धूमाद्वह्निमानित्यादितस्तत्प्रतीतिः कथं स्यादत आह तत्सम्बन्धेति।। हेतुता-
दौ अवधिमत्त्वादिरूपशक्यस्य सम्बन्धस्य इत्यर्थः।। अवधितानिरूपकत्वातिरिक्तमवधिमत्त्वं यदि विभागनिष्ठं नानुभवसिद्धं तदा विभागापेक्षया गुरुत्वात्तस्य शक्यत्वं दुर्घट
मित्याशयेनाह वृक्षादपेतीति।। ननु विनापि पञ्चम्यन्तसमभिव्याहारमपेतिशब्दाद्विभागावच्छिन्नक्रियाप्रतीतेः वृक्षादपैतीत्यत्रापि विभागो धात्वर्थ एव पञ्चम्यास्तु विभा-
गान्वितमाधेयत्वमवधितानिरूपकत्वं वाऽर्थः इत्यतः स्थलान्तरमाह पततीत्यादि।। वृक्षादित्यर्थः।। अत्र गुरुत्वजन्यतावच्छेदिका पतनत्वजातिरेव पतेः शक्यतावच्छेदिका विभागाव-

च्छिन्नक्रियात्वस्य तदपेक्षया गुरुत्वादतो नोक्तक्रमावसरः। ननु वृक्षात्पततीत्यतो वृक्षनिष्ठविभागजनकपतनानुकूलकृतिमानिति बोधो जायते तत्र धात्वर्थपतनादौ विभागवत्त्वस्य बाधितत्वात् विभागजनकत्वमेव पञ्चम्यर्थो बोध्यः। कुतो ज्ञापकत्वाद्यपेक्षया लाघवमत आह तज्जनकत्वञ्चेति।। न चैवं वृक्षात्पतनेऽपि नेदं पतनं वृक्षादिति प्रयोगः स्यात् पतनस्य सम्बन्धान्तरेण वृक्षावधिकविभागाभाववत्त्वाऽजनकत्वस्य वृत्त्यनियामकतया तत्सम्बन्धेन विभागाभावस्य बोधयितुमशक्यत्वादिति वाच्यम्। तत्र नञ्समभिव्याहृते पञ्चम्या विभागजनकत्वेनालाक्षणिकत्वादिति भावः।। अत इति लाक्षणिकपञ्चमी।। विशिष्टनिगमनवारणाय पञ्चम्यन्तेतीति।। अन्यथा तस्माद्वह्निमानित्यादिनिगमनस्यापि पञ्चमीस्वरूपलाक्षणिकपदवत्त्वात्तत्राऽतिव्याप्तिः स्यादित्याशयः।। न च तस्माद्वह्निमानित्यादावपि ज्ञानजनकत्वलक्षणं हेतुत्वं अन्यज्ञानविषयत्वलक्षणं ज्ञाप्यत्वं वा न पञ्चम्यर्थः येन विभागाद्यपेक्षया गुरुत्वेन लक्षणा स्यात् किन्तु ज्ञानमात्रं तदर्थः तच्छब्दोपस्थापितस्य धूमादिज्ञानस्य जनकत्वादिसम्बन्धेन पञ्चम्यर्थज्ञानेऽन्वयादेव धूमज्ञानादौ ज्ञापकत्वादिलक्षणस्य हेतुत्वादेर्लाभसम्भवादिति वाच्यम्।। विभागत्वस्यैव ज्ञानत्वस्य लघुत्वेऽपि तदवच्छिन्ने पञ्चम्याः स्वारसिकभूरिप्रयोगाभावेन लक्षणायास्तत्राऽवश्यकत्वात्।। अन्यथा घटादिपदस्यापि पटादौ शक्त्यापत्तेः

परत्वस्यापि घटत्ववल्लघुत्वादिति भावः।। ननु पञ्चम्यन्तलाक्षणिकपदवत्त्वोक्तावपि निगमनेतिव्याप्तिरेव तान्निविष्टतच्छब्दस्य पञ्चम्यन्तत्वात् धूमादिज्ञानलाक्षणिकत्वाच्चेत्यत आह त-
स्मादिति।। शक्तो वेति।। यद्यपि धूमादिलक्ष्यार्थशक्तस्य तच्छब्दस्य धूमज्ञानत्वादिगुरुधर्मेण बोधने लक्षणैव युक्ता, तथापि प्रत्येकशक्त्या धूमस्य ज्ञानस्य तच्छब्दादुपस्थितौ व्युत्पत्तिवैचित्र्यादेवकार-
स्थलइव नामार्थयोरपि तयोर्मिथोऽन्वयादेव धूमज्ञानस्य लाभसम्भवान्न विशिष्टे तत्पदस्य लक्षणेत्याशयः।। नन्वेवं यत्र तस्मादित्येव हेतुः प्रयुज्यते तत्राव्याप्तिः तच्छब्दस्य पञ्चम्यन्तत्वेपि लाक्षणि-
कत्वाभावादत आह पर्वतो वह्निमानिति।।अत्र तच्छब्दस्य प्रकान्तपरामर्शकत्वनियमाद्वह्निपरामर्शे साध्याविशेषः स्यादतः साध्यान्तरमाह वह्निसामग्रीमान्वेति।। समुदायविरोधादिति।।
हेत्वादेरसाधारणशब्देनैव कथायामुल्लेखः, अन्यथाऽविज्ञातार्थनिग्रहस्थानापत्तेरित्याचार्यैरभिधानादिति भावः।। पञ्चम्यन्तपदानुक्तौ पर्वतो वह्निमानित्यादिप्रतिज्ञायामप्यतिव्याप्तिः
तत्रापि ज्ञेयवह्नित्वप्रकारेण लाक्षणिकस्य वह्निपदस्य सत्त्वात्, अन्यथा हेत्ववयवार्थस्य धूमज्ञानजन्यत्वादेर्वन्हानसत्त्वेन तत्र हेत्वर्थान्वयासम्भवादिति प्राचीनमतं निरस्यति यत्त्वि-
त्यादिना।। ज्ञानलक्षणेति।। ज्ञानप्रकारेण ज्ञेयवह्न्यादौ लक्षणेत्यर्थः। तेन लक्ष्यतावच्छेदके लक्षणाविरहेपि न क्षतिः।। ज्ञापकत्व इति प्राचां मतेन, ज्ञाप्यत्व इति स्वमतेन।। अनयोस्तत्त्वं
पुनरग्रे दर्शयिष्यते।। उपपत्ताविति।। हेत्वर्थान्वयस्येत्यादिः। तत्र प्रतिज्ञान्तर्गतसाध्यपदे मानाभावादिति।। जनकत्वादिबोधार्थं पञ्चम्या लक्षणाया आवश्यकत्वे तत्रैव ज्ञानजनकत्वा-

दिलक्षणौचित्यादिति भावः।। अत एवे[illegible] प्रतिज्ञासु साध्यपदेन लक्षणाविरहादेव।। आवृत्ताविति।। अन्यथा बोधितधर्मप्रकारेण बोधितार्थस्य प्रतिपत्तये पुनःपदानुसन्धानस्यैवावृत्तित्वं स्यात्
बोधितवन्हित्वरूपस्य पर्वतो वन्हिमान्न वेत्यादिविप्रतिपत्तिस्थवन्हिपदस्य ज्ञेयवन्हित्वप्रकारेण बोधने आवृत्तित्वाभावप्रसङ्गादिति भावः।। ननु सुब्विभक्तौ निरूढलक्षणान्यलक्षणाविरहात् पञ्चम्याः कु-
तो ज्ञापकत्वादौ लक्षणेत्यत आह अत एव चेति। व्याचक्षते प्रकाशकृतः। तथा च ज्ञापकत्वादावपि पञ्चम्या निरूढलक्षणेति भावः।। यथासम्भवमिति।। द्रव्यादावुत्पादकत्वं जात्यादौ च ज्ञापकत्वमेव
हेतुत्वमित्यर्थः।। ननु वाक्यार्थमर्यादया [illegible]लब्धस्यैव ज्ञापकत्वलक्षणहेतुत्वस्य उपदर्शितत्वेनापि प्रकाशव्याख्यानिर्वाहात् ज्ञापकत्वस्य पञ्चम्यर्थत्वे मानाभाव इत्यत आह अत एवेति।। ज्ञापक-
त्वस्य पञ्चम्यर्थत्वादेवेत्यर्थः।। जिज्ञासेति।। जिज्ञासावाक्यमित्यर्थः।। तथा च ज्ञापकत्वस्य पञ्चम्यर्थत्वाभावे कुतो वन्हिमानित्यतः किंनिष्ठज्ञापकताकवन्हिमानित्यन्वयबोधो न स्यादिति भावः।।
ननु वन्हेरुत्पादकत्वे एव जिज्ञासा न तु ज्ञापकत्वे ज्ञानाविषयत्वे यदि ब्रूयात्तदा बाधकमाह धूमवत्त्वादित्युत्तरञ्चेति।। तथा च वन्ह्युत्पादकत्वजिज्ञासायां धूमवत्त्वादित्युत्तरं न स्यात् वन्हित्व-
সর্বত্র যদি নাস্তি তদা স্বীকৃত্য ঘটনাত্বে যোগ্যাদিতি সামান্যাভাবাদিতি গ্রন্থস্য সিদ্ধিরিতি সিদ্ধান্তঃ এবং তত্ত্বাচ্চতৎ জাতি চেন্ন নিরূপকতাবচ্ছেদকতাবচ্ছিন্নপ্রতিযোগিতাকপর্যাপ্তত্বযোগিতাবচ্ছেদকত্বসম্বন্ধাবচ্ছিন্নাবচ্ছিন্নতাহৃত্বাধিকরণত্ব
নিষ্ঠপ্রকারতানিরূপিত ধূমত্বসমস্তকত্বনিষ্ঠবিশেষ্যতায়াস্তিত্বমিতি চেত্তন্মতে কতাপ্রতিযোগিকস্বরূপসম্বন্ধেন তদ্বৎ যোগিতাবাদিতি ব্যাখ্যেয়ম্ অথবা প্রবীয়াধিকরণতানিষ্ঠবিশেষ্যতায়াং ধূমত্বসমস্তকত্বনিষ্ঠতাবচ্ছেদকত্বসম্বন্ধাবচ্ছিন্নাধেয়তা সম্ব-

যাবচ্ছিন্নপ্রকারতানিরূপিতত্বাভাবাদিত্যর্থঃ। প্রকৃতস্তু প্রাচীনমতসিদ্ধসাধ্যবদ্ভিন্নমতেন ষষ্ঠীনমিমাং ব্যাচিখ্যাসুঃ সিদ্ধসাধ্যবত্তা দোষা-। নঞ্দ্বয়ঘটিতসিদ্ধিসত্ত্বাদিত্যিকারেয়াপ্তিঃ বাধনার্থং পুনরাহ কস্যাতর্কাপ্তিনিবেশনীয়ত্বাৎ। কথং বহ্নিমান্ধূমাদিত্যাদাবব্যাপ্তিঃ
ধূমত্বাতিকত্বাবচ্ছিন্নাবযোগিতাকপর্য্যাপ্তিকাবচ্ছেদকতাক প্রতিযোগ্যভাববত্ত্বাবচ্ছিন্নাধিকরণত্বস্য প্রসিদ্ধত্বাদিতি। চন্দ্র-বহ্নিজ্ঞানস্য সাধ্যবহ্নি হেতুক বহ্ন্যভাবস্য সাধ্য বহ্নি হেতুক চন্দ্রস্য জাতৌ হেত্বাবচ্ছেদকেনাদিবহ্নিত্বগতৌ কত্বাবচ্ছিন্নাবয়বো গিতাক পর্য্যাপ্তিকাবচ্ছেদকতা
কনিরূপকত্বাভাবাধিকরণীভূত মহানসীয় বহ্নিবিষয়কজ্ঞানস্য মহানসীয় বহ্ন্যভাবাপ্রকাধিকরণত্বাদ্যভাবপ্রতিযোগিতাবচ্ছেদকত্বস্য সাধ্যতাবচ্ছেদকেবহির্হতো হেত্বাবচ্ছেদকতাদি সম্বন্ধ প্রতিনিরূপ্ব কত্বাদ্যাভিব্যক্তস্য প্রতিযোগ্যসাধ্যকারি
সিদ্ধসত্ত্বপ্রতিযোগিক সমবায়েন সত্তা হেতৌ কবিশেষে ক্বচিৎ সত্তত্বগতৈক্যত্বাবচ্ছিন্নাধিকরণে তত্র বিশিষ্টসত্তাবাবচ্ছিন্না ~~[illegible]~~ অধিকরণ দ্রব্যত্বভাববৃত্তিযোগিতাবচ্ছেদকস্য সাধ্যতাবচ্ছেদক সম্বন্ধ প্রতিযোগিতীর্নিবেশ্যতথা চ তত্র হেতো
তাবচ্ছেদকসম্বন্ধাবচ্ছিন্নবৃত্তিতানিরূপকত্বাভাবাধিকরণস্য প্রসিদ্ধ্যাদত্রিব্যাপ্তিরিত্যাদেরথ বহ্নিমান্ধূমাদিত্যাদাবব্যাপ্তিদানসঙ্গতিঃ। হেত্বাবচ্ছেদকীভূতধর্ম্মে নাদিজগদীয়াঃ। হেত্বাবচ্ছেদকত্বাবর্তকসম্বন্ধেন যৎপ্রত্যেয়
হেত্বাবচ্ছেদকসম্বন্ধেন তদধিকরণত্বাৎ। অন্যথা কালিকেন ধূমসম্বন্ধীভূত মেরা নাদ্যাধিকরণং সমবায়েন ধূমত্বাশ্রয়স্য কালিকেনাধিকরণং যজ্জন্যাদিতি নিষ্ঠাধিকরণতাবচ্ছেদকত্বে অধিকরণতাবচ্ছেদকত্ববিরহেণোভয়াভাবসত্ত্বাৎ যামেদ
নজন্যধারাসত্ত্বাৎ প্রত্যাদমতে প্রতাধিকরণতাহরী হেত্বাবচ্ছেদকসম্বন্ধাবচ্ছিন্নত্বাহি অন্যথা জ্ঞানাভাবসাধ্যকে আশ্রয়াধিকরণীভূতজ্ঞানাভাববতোভয়বিষয়কজ্ঞানসিদ্ধপ্রতিযোগিকসম্বন্ধাবচ্ছিন্নজ্ঞানাভাবত্বাবচ্ছিন্নাধিকরণ
তাবচ্ছেদকত্বেনোভয়াভাবসত্ত্বেন জ্ঞানাভাব~~[illegible]~~বিষয়কজ্ঞান[illegible]সাধ্যকজ্ঞানাভাবহেতুকে হ্যব্যাপ্তেঃ তথ্য ধূমত্বেনাহত্যাধিকরণতা[illegible]বচ্ছেদকত্ববিষয়িত্বসম্বন্ধাবচ্ছিন্নাধিকরণতাবচ্ছেদকত্বযোসত্ত্বেনোভয়াভাববিরহাৎ
বহ্নিমান্ধূমাদিত্যাদাবব্যাপ্তেঃ। নচ দ্রব্যং বিশিষ্টসত্ত্বাদিত্যাদৌ বিশিষ্টসত্তাত্বেত্যাশ্রয়াধিকরণীভূতগুণনিষ্ঠাধিকরণতাবচ্ছেদকসত্তাত্মককত্বে নানাবচ্ছেদকত্বঘটিতোভয়াভাবসত্ত্বাদব্যাপ্তিরিতিবাচ্যং হেত্বাবচ্ছেদ

ডা৭

ওঁনমঃ

বিশেষব্যাপ্তিরহস্যম্—৩

কেনাদিরূপেণাশ্রয়াধিকরণীভূতযন্নিষ্ঠাধিকরণতানিরূপকতাবচ্ছেদকত্বমাশ্রয়ত্বৈলাদিনাবচ্ছেদকত্বাধিকরণতানিরূপকত্বেনোক্তাবচ্ছেদকত্বোভয়াভাববত্ত্বং নিবেশ্য তথাচ বিশিষ্টসত্তাগতসত্ত্বদ্বারা বৃত্তিগুণনিষ্ঠেনাবচ্ছেদকত্ববর্ষি তেন তেষাং নাব্যাপ্তিস্তথা যদি ষ্ঠাধিকরণতানিরূপকত্বেন হেতুতাবচ্ছেদকত্বযথাপ্রাপ্তিবিশেষণানি জ্ঞানাজ্ঞানবিষয়কজ্ঞানত্বসাধ্যকজ্ঞানত্বাবচ্ছেদকত্বং তজ্জ্ঞানাজ্ঞানত্বগতত্বেব্যাপ্যব্যাধিকরণীভূতজ্ঞানাজ্ঞানবৃত্তিত্বসত্ত্বং বিষয়কজ্ঞাননিষ্ঠাধিকরণতানিরূপিতত্বং চাবচ্ছিন্নং নিরূপকতাবচ্ছেদকতাপ্রতিযোগিকস্পর্শ্যাক্তবত্ত্বোমিগ নবচ্ছেদক[illegible]ত্ববিরহেণোভয়াভাবসত্ত্বাৎ তদ্বিশিষ্টসত্ত্বপ্রতিযোগিতাবচ্ছেদকস্যেব সাধ্যতাবচ্ছেদকমিত্যাদ্যাদ্য তথা চ সামান্যলক্ষণত্বমিতি ॥ ॥ নত্রযুগলক্ষণাভাববিশিষ্টসত্তাবান্দ্রব্যত্বাদিত্যাদৌ তত্রাপি বিশিষ্টসত্তাবচ্ছিন্নাধিকরণতাবৈবিষয়ক নত্রবিশিষ্টসত্তাবত্ত্বানবচ্ছিন্ননিরূপকতাকাধিকরণতা সত্তাধিকরণতা বর্ত্তিতে ইতি বিশিষ্টসত্তাবান্[illegible]গাদিবৃত্তীনাং তথাত্বে সমবায়সম্বন্ধাবচ্ছিন্নাদিবিশিষ্টসত্তাবচ্ছিন্নাধিকরণতায়াঃ সত্ত্বে তথাত্বস্বরূপসত্ত্বেদেনাগুণস্যাপি বৃত্তিসাধ্যত্বাৎ বিশিষ্টসত্তাবগতত্বি ত্রে গুণনিষ্ঠেনাবচ্ছেদকত্বেপি অধিকরণতেলাদৌনাবচ্ছেদকত্ববিরহেণোভয়াভাবসত্ত্বাৎ তত্তিত্র প্রাপ্তবাক্যবিরহায় প্রাপ্তছেদ্যপ্রযোগিতাকপর্য্যাপ্তিগাবচ্ছেদকতাকাধিকরণতাপ্রবেশে গুণবত্বাদিঘটিতত্বাৎ বিশিষ্টসত্তাবচ্ছিন্নাধিকরণতানবচ্ছেদকত্বাধিকরণতাবচ্ছেদকত্বঘটিতত্বোপস্থাপাদিতিত্র হ্যা মেদানিবেশ্য তথাচ তাদৃশাধিকরণস্য গুণেবিরহাদিতি—নচৈবং সত্তিভূর্দ্ধবিশিষ্টসত্তাদৌ তত্তাদৃশীহেত্বধিকরণতাক্ষমেন নতু গুণাদি-বিশিষ্টসত্তাবেতাদৃশাধিকরণতানবচ্ছেদকত্বাধিকরণতাবচ্ছেদকত্বঘটিতত্বাদিতি অবশিষ্টত্বে হেতুঃ তা সত্তাত্তি গুণসত্ত্বস্যাধিকরণতাবত্ববিরহেণোভয়াভাবসত্ত্বাৎ পর্য্যাপ্তাব্যাপ্তেরিত্যাদিতি তদৃত্তৃ হেতুসত্ত্বাদেবনাত্রযুক্তবৎ অধিকরণতানবচ্ছেদকত্বং নতু গুণাদি[illegible]হেতুহেতু অধিকরণতাবচ্ছেদকত্বঘটিতত্বমিত্যত্র হেতুঃ তা সাধ্যত্বাবচ্ছেদকাধিকরণতানিরূপকতাবচ্ছেদকতা প্রতিযোগিকপর্য্যাপ্ত্যাশ্রয়ত্বাভাবাবচ্ছেদকত্ববিশিষ্টসত্তাত্বপ্রকারেণ নতু গুণত্বেন তত্ত্বনিষ্ঠাধিকরণতানিরূপকতাবচ্ছেদকতোপপ্রতিযোগিকপর্য্যাপ্ত্যাশ্রয়ত্বোপিতাবচ্ছেদকত্বাশ্রয়তদভাবাধিকরণতানিরূপকতাবচ্ছেদকতা প্রতিযোগিকপর্য্যাপ্ত্যাশ্রয়ত্বোপিতাবচ্ছেদকত্ববিশিষ্টসত্তাত্বপ্রকারেণ নতু গুণত্বেন তত্ত্বনিষ্ঠাধিকরণতানিরূপকতাবচ্ছেদকতোপপ্রতিযোগিকপর্য্যাপ্ত্যাশ্রয়তাবচ্ছেদকত্বঞ্চ যত্তিভাবেনাদি তেনরূপ্যাবিত্তিভাবঃ প্রভিভাবঃ ॥ ॥ নন্বেবং হেতুতাদিরূপেণাবচ্ছিন্নাব্যাপিতি[illegible]নাদি অধিকরণতাবন্নিষ্ঠাধিকরণতাদি অবচ্ছেদকত্বসামান্যতাঃ অধিকরণতোদ্যিনবচ্ছেদকত্বাত্তরত্বং এবং হেতুবৃত্তিভাবেনাদি

শ্রীগণেশ—

তাদৃশবিশিষ্টহেত্বধিকরণ[illegible]বর্ত্তিনাং   নং ৪

নহ্যাদিনা দোষেণানেকান্তত্বমাদায়াচ্ছান্তেচ্ছায়াং প্রতিযোগিতাবিশিষ্টাধিকরণস্য সাধ্যতায়াং পৃথিবীত্বজলত্বাদের[illegible]তিরেকাভাবমাদায় বহ্নিত্ববিশিষ্টসাধ্যকস্থলে ব্যাপ্ত্যচ্ছন্নাহে অথ যোজনাদোষ ধূমাদ্যোজন্যসাধ্যতাবচ্ছেদকতাবচ্ছিন্নপ্রতিযো
গিতাকত্বস্যাপ্রতিযোগিতাবচ্ছেদকত্বাৎ কিঞ্চিৎ স্বরূপসম্বন্ধেন নিরূপিতসম্বন্ধিতাবচ্ছেদকত্বাৎ প্রতিযোগিতাকত্বস্যাপ্রতিযোগিতাবচ্ছেদকত্বে প্রাচীনমতে হেতুসম্বন্ধস্বরূপত্বাৎ তাবত্যা জবর্ত্তিরূপ তাৎ বৃত্তিতাবচ্ছেতি ন বহ্নিত্ববিশিষ্টসাধ্যকস্থলে অব্যাপ্তিরিতিরো
ধ্যম্—॥ ॥ ন চ বিশিষ্টসাধ্যতাবচ্ছেদকত্বং স্বসাধ্যতাবচ্ছেদকস্থলে নিরবচ্ছিন্নত্বমেব বচ্ছেদকত্বং যদাধেয়ম্ তথা সতি দণ্ডসাধ্যকস্থলে তদানীং সাধ্যতাবয়স্য তাদৃশতাবৎকর্ম্ম দণ্ডত্বাপত্তেঃ— যাদৃশহেত্বানবচ্ছেদকসাধ্যতানিরূপিতনির
বচ্ছিন্নাবচ্ছেদকত্ববত্ত্বস্যানবচ্ছিন্নসামান্যাধিকরণ্যম্ তদা [illegible] তত্রাপ্যেতাদৃশবিশিষ্টসাধ্যকসংশয়ে তাদৃশব্যাপ্তেরাহার্য্যত্বাদ্যনধ্যবসায়িকাদাতি—॥ ॥ সাধ্যতাবচ্ছেদকতাবিশিষ্টসাধ্যতাবচ্ছেদকনিষ্ঠাবচ্ছেদকত্বনিরূপিতত্বপ্রতিযো
গিতায়ানিরূপ্যত্ববর্ত্তিবাজনদোষস্য যাবচ্ছেদ[illegible]নক্ষাপয়ত্ত্বাকাবোবচ্ছিন্নমিতি বাচ্যম্ [illegible] তদীয়প্রতিযোগিতায়াং ডজরি[illegible]সম্বন্ধাৎ তদ্বাদণ্ডনিষ্ঠাবচ্ছেদকতা যা বিশিষ্টনিষ্ঠ ইতি হাৎ ব্যাপ্তা এতাদৃশাস্তুবৃত্তি—স্বানবচ্ছেদকা
নবচ্ছিন্নত্বে যেস্য স্বানিরূপিতাবচ্ছেদকতাবিশিষ্টস্যাবচ্ছেদকত্ব[illegible]কালো ইত্যাদি— বিশিষ্টস্যাস্থানবচ্ছেদকানবচ্ছিন্নত্ব[illegible]সম্বন্ধেন তথা চ বিশিষ্ট যত্র দণ্ড অবচ্ছিন্নাবচ্ছেদকতা যা সম্বন্ধের স্বনিরূপিতনিরবচ্ছিন্নত্বত্বত্ত্বী[illegible]নি
ষ্ঠাবচ্ছেদকতাবিশিষ্টা যত্র তত্ত্বাবিশিষ্টাবচ্ছিন্নত্বদণ্ডত্বনিষ্ঠাবচ্ছেদকতা যা স্বাবচ্ছেদকানবচ্ছিন্নত্ববিরহাৎ তথা চৈতদ্বিশিষ্টসম্বন্ধবিরহে হেতুত্ববিশিষ্টাধারতাবচ্ছেদকত্বানিরূপিতত্ববিরহাৎ নক্ষাপাদকেন্যন্নদোষঃ— এতদ্বৈশি
ষ্ট্যান্যত্ববৎকো বিশিষ্টস্বানবচ্ছেদকানবচ্ছিন্নত্বমাত্রেণ তেন প্রমেয়ত্বজ্ঞানরূপাদিমদ্দীনামাপত্তেঃ— তত্র নিরবচ্ছিন্নবৎত্বনিষ্ঠাবচ্ছেদকতাকপ্রতিযোগিতাকাভাবস্য নক্ষাপাদকত্বাৎ—॥ ॥ অথবা বাহ্যসাধ্যাদি
যাধস্মানবচ্ছিন্নসাধ্যতাবচ্ছেদকতা তত্র স্বানবচ্ছিন্নাবচ্ছেদকত্বানিরূপিতত্বমেব সুতরাং সাধ্যত্বং নক্ষণে মূলে নক্ষাপাদকত্বাৎ ন ভবতি তদা ইত্যাদিকম্ সাধ্যতাবচ্ছেদকত্বং হেতুত্বন্যাবচ্ছিন্নাবচ্ছেদকত্বানিরূপিতত্বম্
বারণতত্ত্বরূপদর্শিতোরাদ্যঃ— যস্যাপি নিরবচ্ছিন্নসাধ্যতাবচ্ছেদকতা সুতরাং সাধ্যতাবচ্ছেদকতা[illegible]যা অবচ্ছিন্নত্বসম্বন্ধেন ন ঘটাদৌ মাত্র যা সম্বন্ধেন সংসর্গাবচ্ছিন্নত্বনিরূপিত ইতি ন প্রসিদ্ধ্যা ২ ইতি ব্যাপ্তত্বলক্ষণসিদ্ধিরি

সর্ব্বাকারজ্ঞিন স্বাতারবর্ত্তং   শ্রী ২

শ্রীহরিঃ

[illegible] — ২৮

তত্রাপি স্বরূপাভিন্নত্বসম্বন্ধাবচ্ছিন্নত্বঘটিতদ্বিতীয়স্বরূপসম্বন্ধাবচ্ছিন্নসাধ্যতাবচ্ছেদকতানিরূপিতত্বঘটিতত্বং তস্য বিশেষিতত্বাৎ অথবা সাধ্যতাবচ্ছেদকতাঘটিতধর্ম্মানবচ্ছিন্নাবচ্ছেদকতানিরূপিতত্বস্য বিশেষিতত্বাৎ ঘ
টিতৎ চ স্বরূপাভিন্নত্বসম্বন্ধাবচ্ছিন্নস্বনিষ্ঠাবচ্ছেদকতাকপ্রতিযোগিতাকভেদবত্ত্বসম্বন্ধেন তথা চ নিরবচ্ছিন্নাবচ্ছেদকতায়াঃ স্বরূপাভিন্নত্বসম্বন্ধস্য চাধিকরণত্বাৎ এতাদৃশসম্বন্ধেন তৎপদার্থস্য বর্ত্তমানতয়া ন তত্সম্বন্ধাবচ্ছি
ন্নত্বঘটিতাপ্রসিদ্ধিঃ অতিব্যাপ্তিঃ — যত্রাপি মহানসীয়বহ্নিমান্ ধূমাদিত্যত্র প্রথমেন সাধ্যতাবচ্ছেদকতানিরূপিতত্বঘটিতাঞ্চ তিসাধ্যতাবচ্ছেদকতয়া নিবেশাৎ মহানসীয়বহ্নিত্বস্যাবচ্ছেদকত্বে ন নাতিব্যাপ্তিঃ পরন্তু
বহ্নিত্বনিষ্ঠসাধ্যতাবচ্ছেদকতা ঘটিতস্য মহানসীয়ত্বস্য তেন ভেদবচ্ছিন্নাবচ্ছেদকতানিরূপিতত্বস্য সাধ্যতাবচ্ছেদকতাপ্রতিযোগিতায়াং বিরহাদব্যাপ্তিঃ যস্মাৎ সাধ্যতাবচ্ছেদকতাঘটিতধর্ম্মানবচ্ছিন্নাবচ্ছেদকতাব
নিরূপিতত্বস্যৈব তদর্থত্বাৎ তথা চ তদনবচ্ছিন্নবহ্নিত্বনিষ্ঠাবচ্ছেদকতাকত্বাৎ নাতিব্যাপ্তিঃ — মহানসীয়ত্ববহ্নিত্বরূপধূমাদিত্যত্র সম্ভবাৎ মহানসীয়ত্বনিষ্ঠাবচ্ছেদকতাঘটিতত্বং বহ্নিত্বত্বাবচ্ছিন্নবহ্নিত্বনিষ্ঠাবচ্ছে
দকতাঘটিতং মহানসীয়ত্বাবচ্ছিন্নস্য সাধ্যতাবচ্ছেদকতাপ্রতিযোগিতানিরূপিতকার্য্যাবচ্ছেদকতায়াং ন তু অতিব্যাপ্তিঃ তদপি নতত্রাপি মহানসীয়ত্বস্য তাদৃশসাধ্যতাবচ্ছেদকত্বঘটিতত্বাৎ — বিষয়িতয়া মহানসীয়ত্ববহ্নিত্ববিশিষ্ট
স্য সাধ্যতা মহানসীয়বহ্নিত্ববিশিষ্টবিষয়কত্বং মহানসীয়বহ্নিবিষয়কত্বা ন মহানসীয়বহ্নিবিষয়কত্বানাং যতস্ত্বয়ৈতে সাধ্যতাবচ্ছেদকত্বেন স্বরূপসম্বন্ধাৎ তস্যাপ্যনুগমস্য নক্ষত্রবিবক্ষায়াং প্রতিব্যা
প্তিঃ তথাপি সাধ্যতাঘটিতাবচ্ছেদকতাধর্ম্মাবচ্ছিন্নাবচ্ছেদকতানিরূপিতত্বমেব : ঘটিতত্বস্থানে নিরূপিতাবচ্ছেদকতানিরূপিতত্বসম্বন্ধাবচ্ছিন্নস্বনিষ্ঠাবচ্ছেদকতাকপ্রতিযোগিতাকভেদবত্ত্বসম্বন্ধেন ত
থাচোক্তঘটিতাদিনি সাধ্যতাঘটিতমহানসীয়ত্বস্বনিষ্ঠাবচ্ছেদকতানবচ্ছিন্নস্বনিষ্ঠাবচ্ছেদকতেতি ন দোষঃ — অথাত্র ধর্ম্মে সাধ্যতাঘটিতাপ্রসিদ্ধিঃ যথা স্বসমবায়সাধ্যতাবচ্ছেদকস্থানে সাধ্যতাবচ্ছেদকতায়াঃ পদা
র্থমাত্রাবচ্ছিন্নত্বেন স্বাবচ্ছিন্নাবচ্ছেদকত্বসম্বন্ধেনাবচ্ছিন্নস্বনিষ্ঠাবচ্ছেদকতাকভেদবত্ত্বসম্বন্ধেন পদার্থমাত্রস্য ঘটিতত্বে বিবক্ষিতেহপি নিরবচ্ছিন্নত্বস্বনিষ্ঠাবচ্ছেদকতায়াঃ ঘটিতত্বে সাধ্যতায়াঃ সমবায়াবচ্ছি

কত্ৰ৷ ৭

শ্রীরামঃ শ্রীরাধাঃ

ন্যসকলপদার্থনিষ্ঠাবচ্ছেদকতানিরূপিতাবচ্ছেদকতানিরূপিতাবচ্ছে[illegible]দকতানিরূপিতত্বসম্বন্ধেন তন্নিরূপিতত্বসম্বন্ধীতি প্রতিযোগিতানুপ॰ এবঞ্চ ধর্ম্মান্তরস্য তেন সম্বন্ধেনাপ্রসিদ্ধ্যা বাহুল্যাবচ্ছেদকতায়া ভেদাচ্ছতির্ম্মত্বেবমিতি প্র
থমতায়ামাধর্ম্মাবচ্ছিন্নাবচ্ছেদকতানিরূপিতমহত্ত্বেনাৎ স্বরূপতীতদীয়মহানসীয়ত্ববচ্ছিন্নপ্রতিযোগিতা সর্ব্বথা ন ঘটসাধ্যকমহানসীয়বহ্নিত্বহেতৌ মহানসীয়ত্বজাতমাত্রব্যাপ্যবৃত্তিনবৈকাত্মতদীয়
প্রতিযোগিতায়াং সাধ্যতাহতি স্ববচ্ছেদকতা[illegible] মহানসীয়ত্বস্বরূপধর্ম্মাবচ্ছিন্নাবচ্ছেদকতানিরূপিতত্বরিত্যাহেতিততস্মাদবচ্ছিন্নবহ্নিত্বনিষ্ঠাবচ্ছেদকতানিরূপিতত্বেন ন তথাত্বা বক্তব্যমাশঙ্ক্যাহ তেতি ॥ ॥
ন তেন সাধ্যতাবচ্ছেদকতাবচ্ছেদকতাযাবচ্ছিন্নপ্রতিযোগিতাকত্বাদ্যন্যযোগিতাবচ্ছেদকসম্বন্ধেন বৃত্তি নপ্রতিযোগিতাকসাধ্যবতো বৃত্তেরিতি প্রতিযোগিতাদীয়তাবৃত্তাত্র
প্রত্যেকবৃত্ত্যা[illegible] সম্ভবাৎ প্রমেয়সাধ্যতাবচ্ছেদকত্বে লিঙ্গাদ্যনুপপত্তেঃ ঘটত্বগতিকত্বাদিতি দোষঃ প্রতীতি ঘটকত্বতি চ সম্বন্ধাবচ্ছেদকতাবচ্ছেদকতাবচ্ছিন্নপ্রতিযোগিতাকত্ব্যা
ন্যপ্রযোগিতাবচ্ছেদকত্বসম্বন্ধেন যদিচ্ছেন নিয়ামকসম্বন্ধস্য প্রতিযোগিতাবচ্ছেদকত্বান্নিবেশাযোগ্যস্যাতিরিক্তস্যাপ্রসিদ্ধেঃ তত্তৎসম্বন্ধাবচ্ছিন্নসাধ্যনিষ্ঠাবচ্ছেদকতাকপ্রতিযোগিতাকত্বেন স্বরূপবি
বক্ষিতত্বাৎ তন্নিয়ামকসম্বন্ধাবচ্ছিন্নাবচ্ছেদকতাকপ্রতিযোগিতাকত্বেনস্য সম্ভবমতসিদ্ধত্বাৎ প্রকৃতাধিকরণসম্বন্ধস্য প্রতিযোগিতাবচ্ছেদকত্বেপি প্রতিযোগিতাবচ্ছেদকাবচ্ছিন্নত্বানঙ্গীকারাৎ।
বহ্নিমান্ধূমাদিত্যাদাবব্যাপ্তিরিতি যদ্যপি তত্তৎসাধ্যত্বপ্রকারতানিরূপিতবিশেষ্যতাবত্ত্বেনাত্র প্রতিযোগিতাযাপি বিশেষপ্রকারতাত্বে সম্বন্ধাবচ্ছিন্নত্বপ্রকারত্বপ্রসিদ্ধিপ্রকারকপ্রতিযোগিক
স্বরূপসম্বন্ধাবচ্ছিন্নপ্রতিযোগিতাকত্বেনাভাবাদ্যেতন্নিয়ামকসম্বন্ধাবচ্ছিন্নত্বসম্ভবমতসিদ্ধত্বাৎ প্রমেয়প্রতিযোগিতাবচ্ছেদকত্বনিবেশাৎ সঙ্কীর্ণ সুতেন প্রমেয়বিশেষ্যতাবত্ত্বেনাসম্ভবঃ তথা

নিষ্ঠ॰২

নামক
জাগরী

দীঃ সিদ্ধান্তলক্ষণগা — ২৩

হ্যাদেরং স্বয়া· ম্মর্জিত্বসঙ্গী তাবত সম্বন্ধনিষ্ঠবিষয়তানিরূপিতাবচ্ছেদকত্বনিষ্ঠবিষয়তানিরূ নিরূপিতাবচ্ছেদকতানিষ্ঠবিষয়তানিরূপিত অবচ্ছিন্নত্বনিষ্ঠবিষয়তানিরূপিতত্বস্য যা ন্তি নিষ্ঠবিষয়তানিরূপিত প্রতিযোগিত্বনিষ্ঠবিষয়তানিরূপিত অবচ্ছেদ
কত্বনিষ্ঠবিষয়তানিরূপিতনিরূপকত্বনিষ্ঠবিষয়তানিরূপিত প্রমীতিবিষয়তত্বপ্রতিযোগিকস্বরূপেণ তদভাববত্ত্বং চেতি সম্যগ্‌বিবেক্তব্যং — অত্র কেচিৎ স্বপ্রতি তেদীয় মহানসীয়বহ্নিত্বাবচ্ছিন্নপ্রতিযোগিতা সম্বন্ধেন বহ্নিসাধ্যকমহানসীয়বহ্নিত্বহেতৌ মহা
নসীয়ে বহ্নিত্বেতর সামান্যাবনঞ্চাণেবং কেবলং তন্নিরূপিতপ্রতিযোগিত্বাসামান্যত্ব ইত্যাদ্যনমহানসীয়ত্বগত বহ্নিত্বগবিত্বং তদন্যতি ন বিরহাদব্যাপ্তিরিতি বদন্তি তন্মন্দং — অতান্যতদবৃত্তিত্বরূপং যং বিষয়তানিরবচ্ছিন্নত্বাবচ্ছেদকত্বানিরূপিতত্বস্যৈব তত্ত্বাৎ অন্যথা
প্রতিবাদ্যসিদ্ধে ব্যতিরেকবচ্ছিন্না নিরবচ্ছিন্না বহ্নিত্বনিষ্ঠাবচ্ছেদকতানিরূপিত সাধ্যাপ্তেরিতি অতঃ এবং কলশ্চ তত্ত্ব যোগি সমাদক্ষিপ্রসাদস্বরূপরণাৎ যত্তু ভবানুমানে কতবনঞ্চ সাবচ্ছিন্নবিষয়তাসামান্যাবামিতি কদা নিরবচ্ছিন্নবিষয়তাবাল্মীকিমিত্বেমি-
তিহিতিনিয়মোনস্যাৎ সঙ্ক্ষিদেবাভবমাহংকংপ্রামিতিয়াৎ মমত নঞ্চাৎ ব্যকস্যানিরবচ্ছিন্নবিষয়তাসা অসিতো নিরবচ্ছিন্নত্বাত্তাইত্যাপ্তিপ্ৰ যোজিকা সাবচ্ছিন্নবিষয়তাসা প্রবামিতৌ নিরবচ্ছিন্নত্বা [illegible]ব্যাপ্তিরিতি — ॥ ঃ ॥ ৪৪ — ॥ প্রমেয়বত্ত্বরাম্নাস্তীত্যাদিজ্ঞ
গদীবাৎ — নন্বত্র ভবতু বাঁ যতনঞ্চাণেদন্তবাবচ্ছিন্নাবচ্ছেদকতাকপ্রতিযোগিতাকাভাবত্বং তদন্তীনাস্তীতিপ্রতীতেঃ দেশকালং স্বমাভাবত্বমেতি তথাচ তাহ স্মাপ্রতীতেঃ সমানবিষয়কত্বাত্তদন্তিমতি দেশে তদন্তরা নাস্তীতিপ্রতীতৌ তৎস্বদেশাতে হতন্তু
তথা অবচ্ছেদকত্বঞ্চীকরণীয়মিতি চেন্নতত্রাজস্বরূপেণাভাবনামিত্যভিপ্রায় কোর্যগ্রন্থঃ তথাচ তদন্তীনাস্তীতিপ্রতীতৌ নিরবচ্ছিন্নদত্তনিষ্ঠাবচ্ছেদকতাকপ্রতিযোগিতাকত্বাভাবো বিষয়ঃ ॥ তত্রবদন্তসত্ত্বা ভূতলনঞ্চারাদিতি প্রতীতৌ লোচ্ছিদজাতিকে
যৌ — ঃ ॥ সাধ্যতাবচ্ছেদকতাবংকসম্বন্ধাবচ্ছিন্নাবচ্ছেদকতাযাজতিজাম্বী — অতঃ বহ্নিমান্‌ধূমাদিত্যত্র বিষয়িতয়া বহ্নিত্ব বিশিষ্টাভাবসাধ্যতাপ্তিসম্ভবে — দূষণান্তরং বহ্নিবাদিনস্ত্যকথমন্বধারণম্‌ সূতনীতি চেৎ তত্তদভাবব্যাপ্যসাধ্য-
ধ্যতাবচ্ছেদকসম্বন্ধেন প্রতিযোগিত্বাধিকরণত্বাভাবাদিতি — যথাশ্রুতগ্রন্থস্ত্বববোধিনঃ কোৎত বহ্নিসংযোগেন বহ্নিসাধ্যকধূমে অব্যাপ্তিবারণায় সাধ্যতাবচ্ছেদকতাবচ্ছে[illegible] ননঞ্চাণবংকত্বাদব্যাপ্তিরিতি· য

।বুভুক্ষকত্বকল্পনমিতি প্রলয়ে বলোধ্যকেশ্যাপ্তিবিরহেণ ছ্যাত্তিতাবচ্ছেদকতাবিশিষ্টপ্রতিযোগিতানিরূপণীয়া একত্বত্ববিষয়িতয়া বহ্নিত্ববিশিষ্টসাধ্যকত্বকল্পতাবমাদায়নাপ্রাপ্তিঃ প্রতীতিরিত্যাহুতে তদাপি হেত্বধি
করণপ্রইগাদিমিহপিগরাঘটেশাদিকাধীনবাহ্নিবাহ্নিত্বছ্যাত্তিতায়াশ্চছ্যাত্তিতায় ঘটাদিসংসর্গেন ঘটেনা ধিরাদ্ভিনছ্যাত্তিতায়াঃ প্রবচ্ছেদকত্বেন্নৈব ঘটত্বাদিষু সত্বেন বাহ্নিমানধূমাদিমলো নষ্কল্পাসম্ভবঃ ছত্তিশাস্ত্রাত্তানি
কৃতি তত্বস্যা বাবুভুক্ষকতাঁ সাধ্য তবরাবুভুক্ষকতাঘটৈক সম্বন্ধেনাবচ্ছিন্ন বৃত্ত্যপ্রাপ্যাঘাতি স্ববৃত্তিরত্বস্য সম্বন্ধেন বাহ্নিত্ববিশিষ্টসাধ্যক ধূমে হেত্বাপ্তি প্রতিযোগিতাবাবুভুক্ষকত্ব
ঘটৈকন ঘটেন বাবচ্ছিন্নবৃত্তিতাবাবুভুক্ষকত্বদিরিয্যাপ্যাকত বাহ্নিত্ব প্রতিযোগিকসম্বন্ধে বাহ্নিত্ববিশিষ্টসাধ্যক ত্বপ্রতিযোগিকত্বস্য ঘাঘেন বাহ্নিত্ববিশিষ্টতানিরূপিতত্বরিয়া
তয়া সাধ্যতাবচ্ছেদকানাদেহে ত্বমিকবানিকঁচিত্ত বৃত্তিতাত্মানিরূপিত প্রতিযোগিতারবুভুক্ষকতাবটৈকসম্বন্ধেনাবচ্ছিন্নাবুভুক্ষকত্বাপ্রসিদ্ধ্যা হেত্বাপ্তি বাহ্নিমানেতদজ্ঞান
শাহিনভুতাহ্যানবাবুভুক্ষকত্বরিতি সুতাহ্যাবাবুভুক্ষকত্বস্থলাপ্রসিদ্ধ্যা হেত্বাপ্তি বিত্তিতন্ন স্যাৎবাবুভুক্ষকতাবাবচ্ছিন্নপ্রতিযোগিতানবাবুভুক্ষকত্বকালিন
যাকিঞ্চিদেত্বমিকবনমিত্যনিত বৃত্তিতাবাবুভুক্ষকত্ব প্রতিযোগিকত্বস্যাস্য নাযায়ানিতবাবুভুক্ষকতাবাচ্ছিন্নসম্বন্ধেন সাধ্যতাবচ্ছেদকবৃত্তিত্বস্যবিরাহ্নিতত্বাত
সংক্তারিসমৃদ্ধিবাদীনাং সম্বন্ধত্বমিত্যনীনস্বীকরণীয়ং। কেবলে বিষয়িতাবচ্ছিন্নবিশিষ্টকল্পনস্য কার্যমিত্যস্মিন্ ব্যেদ্ধব্যতাপি। সমবসাসনজ্ঞে
সপ্রকারস্যাপি সমবায়ঘটাকোনাম বৃত্যাপি স্বপরস্য তাদৃশ্যাকিঞ্চিৎ। সাধ্যতাবাবুভুক্ষকত্বাবৃত্তি যাকিঞ্চিদেত্বমিকবননিত

নিরূপিতাধারতাবচ্ছেদকতাশ্রিতাধারতাবচ্ছেদকত্বানিরূপিতং সাংসর্গ্যং বৃত্তিতাসম্বন্ধনিরূপিতপ্রতিযোগিতানিরূপিতাবচ্ছেদকতারসম্বন্ধেনাবচ্ছেদকতাবচ্ছেদক
স্বসামানাধিকরণ্যসামানাধিকরণ্যোভয়সম্বন্ধেন নাবচ্ছিন্নত্বেন সামানাধিকরণ্যাবচ্ছেদকসম্বন্ধাবচ্ছিন্নদেশত্রিতয়সম্বন্ধেন তত্তাবচ্ছেদ
নস্য প্রত্যাবর্ত্তনাবচ্ছেদকতাবচ্ছেদকত্বেন উভয়সম্বন্ধেন বৃত্তিত্বসামান্যাভাব সাধ্যকত্বান্নাতিপ্রসক্তিঃ প্রতিযোগিতাবচ্ছেদকতয়া প্রকৃতে যৎকিঞ্চি
দ্বয়তাবচ্ছেদকত্ববৃত্তিত্বেনাভিমতত্বপ্রবিষ্টত্বাৎ তদ্ব্যাপকত্বং সামানাধিকরণ্যমাত্রাস্তি প্রমেয়ত্বাভাবকে স্বরূপাবচ্ছেদকতামাত্রসাধ্যতাবচ্ছেদক
তাবৃত্তিত্বেনাভিমতত্বং সামান্যপ্রত্যক্ষঃ নিরবচ্ছিন্নসাধ্যতাবচ্ছেদকতাবৃত্তিত্বেন প্রবেশনীয় অনিরবচ্ছিন্নাবচ্ছেদকতাকপ্রতিযোগিতাকত্বাদ্ব্যাপ্তা
সাধ্যতাবচ্ছেদকত্বসামানাধিকরণ্যাতিরিক্তাব্যাপ্যস্বসামান্যগোচরানাত্প্রমেয়াবচ্ছিন্নবৃত্তিত্বসামান্যপ্রসঃ পক্ষিতপক্ষতানিরূপিতসংযোগসম্বন্ধাবচ্ছি
ন্নবৃত্তিতানিরূপিতপ্রমেয়ত্বাবচ্ছিন্নাবচ্ছেদকতারূপদ্বিধাবৃত্তি দ্বিবিধত্বে তথাত্বেন তৎ ন্যূনা তৎপ্রতিযোগিকসমবায়সম্বন্ধাবচ্ছিন্নত্বে
ত্বনিষ্ঠাবচ্ছেদকতয়া দৈবাত্ত নিরূপিতসংযোগসম্বন্ধাবচ্ছিন্নবৃত্তিতাবচ্ছেদকতাবৈশিষ্ট্যসম্বন্ধাবচ্ছিন্নবৃত্তিরাহিত্যনিরূপকপ্রতিযোগিতানামন্য
নবৃত্তিসম্বন্ধে বিষয়ত্বসম্বন্ধেন স্বীকারে এব সামানাধিকরণ্যনিবেশসম্ভবাৎ স্বাবচ্ছেদকসম্বন্ধাবচ্ছিন্ন দণ্ডত্ববৃত্তিতাবচ্ছেদকসম্বন্ধাবচ্ছিন্ন
বৃত্তিতাবচ্ছেদকতানামন্যাসাম্বিতত্বাত্ প্রমেয়ত্বের সক্তিতেতি যুক্তমেব বিরহিণা প্রতিযোগিকতানিবেশে সাধ্যকত্বাপ্রবেশে সাধ্যতাবচ্ছেদকত্ববৈশিষ্ট্য
তত্র তৎপ্রতিযোগিতাঘটিতবৈশিষ্ট্যনিরূপিতত্বস্বভাবেবাবচ্ছিন্নবৃত্তিতাবচ্ছেদকতাপ্রতিযোগিকত্বে নরাভাবতাবচ্ছেদকত্বপ্রতিযোগিতাবচ্ছেদকত্বেন সম্বন্ধ

২৫

(নিরাকৃতি)

৭/

ন সাঃ

৪

ব্যাপ্যব্যক্তি স্বত্র ত্রিতিগ্রাগত্বাবচ্ছিন্নত্বশর্ত্তঃ ধূমগতিমত্ত্ব পূর্ব্বপূর্ব্বত্বম্ ধূমনিষ্ঠপ্রতিবন্ধকতাং সং ক্রিয়াপ্যবচ্ছে বহ্নিবিষয়তাকানবচ্ছিন্ননিরূপিতজনকতাং সাধ্যং
বহ্নিত্বপ্রকারাবচ্ছেদকীভূতত্বশর্ত্তঃ তাদৃশবিষয়তা স্বনিরূপিতবহ্নিত্বাবচ্ছিন্ন ধূমনিষ্ঠপ্রতিবন্ধকতাকত্বস্যান্বয়ঃ ধূমত্বাবচ্ছিন্নপ্রতিবন্ধকতাকত্ব ধূমসামান্য ইতি সম্যগন্বয়াৎ তর্হি
তদ্বহ্নিত্বাবচ্ছিন্ন ... তদ্বহ্নিবিষয়তাকানবচ্ছিন্ননিরূপিতজনকতাবচ্ছেদক ঘটে কাঞ্চনিতরান্বয়ঃ এবং সাধ্যতাবচ্ছেদকত্বাভাবেন তাদৃশানবচ্ছিন্নত্বস্য তদবচ্ছেদক
সাধ্যসম্বন্ধেন কতরপ্রতিরাবাসত্ত্বাত্তাদৃশাশ্রয়তাসম্বন্ধেনাশ্রয়তাৎ পর্য্যাপ্তিমত্ত্বেন বিষয়তাপ্রকারেণ বিষয়ত্বমিত্যর্থঃ আশ্রয়তাসম্বন্ধাবচ্ছিন্ন
।কীদৃশবিষয়তাৎ সাধ্যতাবচ্ছেদকাবচ্ছিন্ন বিষয়তাবচ্ছিন্ন সাধ্যতাবচ্ছেদকাবচ্ছিন্নপ্রতিবন্ধকতাকত্বাভাবেন তদবচ্ছিন্নত্বাভাবাৎ সমিত্যত্র কিন্তু নিরূপিতত্বো
বহ্নিত্বাদির্ন্যায়াঃ তদ্ধর্ম্মাবচ্ছিন্নপ্রতিবন্ধকতাক তদ্ধর্ম্মাবচ্ছিন্নবিষয়তাকানবচ্ছিন্ননিরূপিতজনকতাবচ্ছেদকত্বং পর্য্যাপ্তং তদ্ধর্ম্মাবচ্ছিন্ন সমা
নাধিকরণ্যতারতম্যাত্ প্রতিযোগিতাবচ্ছেদক তদ্ধর্ম্মাবচ্ছিন্নসমানাধিকরণ্যসত্ত্বেন তদ্ধর্ম্মাবচ্ছিন্নপ্রতিবন্ধকতাক তদ্ধর্ম্মাবচ্ছিন্নবিষয়তাকানবচ্ছিন্ননিরূপিতজনক
তাবচ্ছেদকত্বাদ্যর্থঃ সাধ্যাবচ্ছিন্নপ্রতিবন্ধকতাক সর্ব্বান্ত্যাবচ্ছিন্নবিষয়তাকানবচ্ছিন্ননিরূপিতজনকতাবচ্ছেদকত্বাদিরপ্রসক্তেঃ হেতুমত্তরত্বে
সাধনে ধূমস্যাপ্য নিষ্ঠপ্রতিবন্ধকতাকসাধ্যবত্ত্বাবচ্ছিন্নপ্রতিযোগী বহ্নিবাচ্যস্য নিষ্ঠবিষয়তাকসাধ্যতাবচ্ছেদকাবচ্ছিন্নস্যা

সাধনতাভিমতযত্তাবচ্ছেদকধর্ম্মদ্রব্যত্বাবচ্ছিন্ননিষ্ঠতাকপক্ষতাবচ্ছিন্নবিশেষ্যতাকানুমিতিজনকতাবচ্ছেদকধূমত্বাবচ্ছিন্ননিষ্ঠতাকত্ব
পক্ষতাবচ্ছিন্নবিশেষ্যতাকানুমিতিজনকতাবচ্ছেদকতাপি সত্ত্বাত্ তত্র সোঽস্যাবচ্ছেদকত্বে ধূমত্বাবচ্ছিন্নসমানাধিকরণাত্যন্তাভাবপ্রতিযো
গিতানবচ্ছেদকবহ্নিত্বাবচ্ছিন্নসমানাধিকরণবৃত্তিব্যাপ্যতাবচ্ছেদকত্বাসিদ্ধিসাধারণ্যেন ব্যাপ্যত্বাসিদ্ধিনিরূপিতো ব্যাপ্যতাবচ্ছেদকধর্মতদ্রূপ
চ্ছিন্নতাসাসিদ্ধিপ্রকাশঃ অন্যদ্ব্যাপ্যত্বাবচ্ছিন্ননিষ্ঠতাকপক্ষতাবচ্ছিন্নবিশেষ্যতাকানুমিতিজনকতাবচ্ছেদকধর্মত্ব
কত্বং তস্য ব্যাপ্যত্বাসিদ্ধিধূমবহ্ন্যোঃ সংযোগিকসংযোগরূপাপ্য অতএব হেতুতাবচ্ছেদকসম্বন্ধবহ্নিনিষ্ঠতাসংযোগত্বাবচ্ছিন্নাং তাদৃ
শানুমিতিজনকতাবচ্ছেদকধর্মপ্রসিদ্ধ্যাদিপি তন্মতসমানাধিকরণব্যাপ্তিজ্ঞানেন তাদাসিদ্ধ্যসম্ভবপ্রযুক্তিত্বেন দ্রব্যত্বনামাসা
বাধব্যাবৃত্তিবিষয়তাসম্বন্ধেন ব্যাপ্তিবিশিষ্টানিষ্ঠব্যাপ্তিকারণতাবচ্ছেদকনিরূপিতনিরূপকতাসম্বন্ধাবচ্ছিন্নবিষয়তাকানিষ্ঠ
ত্বেকারণানুমিতৌ বিষয়ত্বানবচ্ছিন্নাপি তত্র বিষয়তাবিশেষনিষ্ঠত্বেন কারণতাবচ্ছেদকত্বঃ অনুমিতৌ ব্যাপ্তিবিষয়তাকার
নকজ্ঞানতিরিক্তবৃত্তিবিষয়তানিরূপকতার্থঃ জ্ঞানতিরিক্তবৃত্তিত্বরূপব্যাপকতাকৃত্ত্বাবচ্ছেদকতাবচ্ছিন্নানুযোগিতাকত্ব

3

সত্ত্বাতিরিক্তধর্মাবচ্ছিন্নবৃত্তিতাবচ্ছেদকস্য প্রতিযোগিতাবচ্ছেদকত্বাদিতি। ননু দ্বিত্বাদিবিশিষ্টস্য সাধ্যতাবচ্ছেদকত্বে তত্ত্বমপি একস্মিন্ দ্বয়োস্তু
উভয়ং নাস্তীত্যুক্তেঃ নিরুক্তপ্রতিযোগিতাবচ্ছেদকত্বাভাবাৎ তাদৃশপ্রতিযোগিতায়াং বৃত্তিধর্মাতিরিক্তধর্মাবচ্ছিন্নত্ববিরহাত্ বৃত্তি
প্রতিযোগিনস্তু সাধ্যতা নিরুক্তানাং নিরুক্তানাং ব্যভিচারিত্বাত্ তাদৃশাভাবত্বেন তাদৃশপ্রতিযোগিতাশ্রয়ত্ব তাদৃশরূপাভাবা-
নামপ্রসিদ্ধিরিতি।। ৩।। কশ্চিত্তু সর্বত্রাপ্যেক রূপেণ সাধ্যতা।। ননু জাতিমান্ সাধ্যকস্যাহ বৃত্তিতারূপং সম্বন্ধিতারূপং সাধ্যাভাববৃত্তিরেব সাধ্যতাবচ্ছেদকতা-
বচ্ছিন্নপ্রতিযোগিতানবচ্ছেদক সাধ্যবৃত্তিবৃত্তিকত্বাবৃত্তিত্বঘটিতং তাদৃকপ্রতিযোগিতা। যথা কলান্যস্মাত্ এতাদৃশসাধ্য-
স্থলে সাধ্যকত্বাভাবস্য প্রত্যক্ষমান্যত্বাকুলবিঃ এতাদৃশকালে যোগসত্বাত্ত্ব।। ৩।। এতাদৃশ প্রসিদ্ধিরেতি উভয়সাধ্যকস্থলে
বচ্ছিন্নপ্রতিযোগিতাপ্রসিদ্ধির্বক্তব্য বহিতা তদানীং সাধ্যাসংসর্গকারচ্ছিন্নপ্রামাণ্যতত্বপ্রতিযোগিত্বস্য বিশিষ্টত্বে প্রামাণ্যবারণতার প্রতিযোগিতা দর্শন-
মাত্র প্রতিযোগিত্বস্য তাদৃশস্য প্রসিদ্ধে বক্তা বা প্রসিদ্ধি দর্শনানবধারণং তদ্যাব সাধ্যতাবচ্ছেদকসম্বন্ধেন প্রতিযোগিত্বাবচ্ছিন্নাত্ সা-
ধ্যতাবচ্ছেদকতাবচ্ছেদকসম্বন্ধ। বচ্ছিন্নাবচ্ছেদকতাকপ্রতিযোগিতাকস্য হেতুমদ্বৃত্ত্যাদিকল্পনাত্ত্বাত্তারসমান্যপ্রসিদ্ধিরিতি।। ৪।। দ্রব্যত্বাদি

४१६८

४१६५

श्री ५ को सरकार

शारीरक सूत्रम्

॥ब्र.सू.॥
॥ १ ॥
अ.प्र.॥

श्रीगणेशायनमः॥ अथातोब्रह्मजिज्ञासा॥ १॥ जन्माद्यस्ययतः॥ २॥ शास्त्रयोनित्वात्॥ ३॥ तत्तुस
मन्वयात्॥ ४॥ ईक्षतेर्नाशब्दम्॥ ५॥ गौणश्चेन्नात्मशब्दात्॥ ६॥ तन्निष्ठस्यमोक्षोपदेशात्॥ ७॥ हे
यत्वावचनाच्च॥ ८॥ स्वाप्ययात्॥ ९॥ गतिसामान्यात्॥ १०॥ श्रुतत्वाच्च॥ ११॥ आनन्दमयोभ्यासा-
त्॥ १२॥ विकारशब्दान्नेतिचेन्नप्राचुर्यात्॥ १३॥ तद्धेतुव्यपदेशाच्च॥ १४॥ मान्त्रवर्णिकमेवचगीयते
॥ १५॥ नेतरोनुपपत्तेः॥ १६॥ भेदव्यपदेशाच्च॥ १७॥ कामाच्चनानुमानापेक्षा॥ १८॥ अस्मिन्नस्यचतद्यो
गंशास्ति॥ १९॥ अन्तस्तद्धर्मोपदेशात्॥ २०॥ भेदव्यपदेशाच्चान्यः॥ २१॥ आकाशस्तल्लिंगात्॥ २२॥
अतएवप्राणः॥ २३॥ ज्योतिश्चरणाभिधानात्॥ २४॥ छन्दोभिधानान्नेतिचेन्नतथाचेतोर्पणनिगदा
त्तथाहिदर्शनम्॥ २५॥ भूतादिपादव्यपदेशोपपत्तेश्चैवम्॥ २६॥ उपदेशभेदान्नेतिचेन्नोभयस्मि
न्नप्यविरोधात्॥ २७॥ प्राणस्तथानुगमात्॥ २८॥ नवक्तुरात्मोपदेशादितिचेदध्यात्मसंबन्धभूमा-

॥व्यासः॥
॥१॥

स्मिन् ॥ २९ ॥ शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॥ ३० ॥ जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपा
सात्रैविध्यादाश्रितत्वादिह तद्योगात् ॥ ३१ ॥ ॥ इत्युत्तरमीमांसासूत्रे प्रथमाध्यायस्य प्रथमः
पादः ॥ ० ॥ सर्वत्र प्रसिद्धोपदेशात् ॥ १ ॥ विवक्षितगुणोपपत्तेश्च ॥ २ ॥ अनुपपत्तेस्तु न शारीरः
॥ ३ ॥ कर्मकर्तृव्यपदेशाच्च ॥ ४ ॥ शब्दविशेषात् ॥ ५ ॥ स्मृतेश्च ॥ ६ ॥ अर्भकौकस्त्वात्तद्व्य
पदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च ॥ ७ ॥ संभोगप्राप्तिरिति चेन्न वैशेष्यात् ॥ ८
॥ अत्ता चराचरग्रहणात् ॥ ९ ॥ प्रकरणाच्च ॥ १० ॥ गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥ ११ ॥
विशेषणाच्च ॥ १२ ॥ अन्तर उपपत्तेः ॥ १३ ॥ स्थानादिव्यपदेशाच्च ॥ १४ ॥ सुखविशिष्टाभिधाना
देव ॥ १५ ॥ श्रुतोपनिषत्कगत्यभिधानाच्च ॥ १६ ॥ अनवस्थितेरसंभवाच्च नेतरः ॥ १७ ॥ अंतर्या

म्याधिदेवादिषु तद्धर्मव्यपदेशात् ॥१८॥ न च स्मार्त्तमतद्धर्माभिधानात् ॥१९॥ शारीरश्चोभ-
येऽपि भेदेनैवमधीयते ॥२०॥ अदृश्यत्वादिगुणको धर्मोक्तेः ॥२१॥ विशेषणभेदव्यपदेशाभ्यां च
नेतरौ ॥२२॥ रूपोपन्यासाच्च ॥२३॥ वैश्वानरः साधारणशब्दविशेषात् ॥२४॥ स्मर्यमाणमनु-
मानं स्यादिति ॥२५॥ शब्दादिभ्योऽन्तःप्रतिष्ठानान्नेति चेन्न दृष्ट्युपदेशादसंभवात्पुरुषमपि चैन-
मधीयते ॥२६॥ अत एव न देवता भूतं च ॥२७॥ साक्षादप्यविरोधं जैमिनिः ॥२८॥ अभिव्यक्तेरि-
त्याश्मरथ्यः ॥२९॥ अनुस्मृतेर्बादरिः ॥३०॥ सम्पत्तेरिति जैमिनिस्तथा हि दर्शयति ॥३१॥
आमनन्ति चैनमस्मिन् ॥३२॥ इत्युत्तरमीमांसायां प्रथमाध्यायस्य द्वितीयः पादः ॥ ॥ द्युभ्वाद्या-
यतनं स्वशब्दात् ॥१॥ मुक्तोपसृप्यव्यपदेशात् ॥२॥ नानुमानमतच्छब्दात् ॥३॥ प्राणभृ-

च ॥ ४ ॥ भेदव्यपदेशात् ॥ ५ ॥ प्रकरणाच्च ॥ ६ ॥ स्थित्यदनाभ्यां च ॥ ७ ॥ भूमा संप्रसादादध्यु-
पदेशात् ॥ ८ ॥ धर्मोपपत्तेश्च ॥ ९ ॥ अक्षरमम्बरान्तधृते ॥ १० ॥ सा च प्रशासनात् ॥ ११ ॥ अन्यभा-
वव्यावृत्तेश्च ॥ १२ ॥ ईक्षतिकर्मव्यपदेशात्सः ॥ १३ ॥ दहर उत्तरेभ्यः ॥ १४ ॥ गतिशब्दाभ्यां तथा हि दृ-
ष्टं लिङ्गं च ॥ १५ ॥ धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः ॥ १६ ॥ प्रसिद्धेश्च ॥ १७ ॥ इतरपरामर्शा-
त्स इति चेन्नासंभवात् ॥ १८ ॥ उत्तराच्चेदाविर्भूतस्वरूपस्तु ॥ १९ ॥ अन्यार्थश्च परामर्शः ॥ २०
अल्पश्रुतेरिति चेत्तदुक्तम् ॥ २१ ॥ अनुकृतेस्तस्य च ॥ २२ ॥ अक्षरणास्तूपपन्नम् ॥ २३ ॥ अपि च
स्मर्यते ॥ २४ ॥ शब्दादेव प्रमितः ॥ २५ ॥ हृद्यपेक्षया तु मनुष्याधिकारत्वात् ॥ २६ ॥ तदुपर्यपि
बादरायणः सम्भवात् ॥ २७ ॥ विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् ॥ २८ ॥ शब्द इ

ति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम् ॥२९॥ अत एव च नित्यत्वम् ॥३०॥ समाननामरूप
त्वाच्चावृत्तावप्यविरोधो दर्शनात्स्मृतेश्च ॥३१॥ मध्वादिष्वसंभवादनधिकारं जैमिनिः ॥३२॥
ज्योतिषि भावाच्च ॥३३॥ भावं तु बादरायणोऽस्ति हि ॥३४॥ शुगस्य तदनादरश्रवणात्तदाद्रवणात्सू
च्यते हि ॥३५॥ क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् ॥३६॥ संस्कारपरामर्शात्तदभावा
भिलापाच्च ॥३७॥ तदभावनिर्धारणे च प्रवृत्तेः ॥३८॥ श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च ॥
३९॥ कंपनात् ॥४०॥ ज्योतिर्दर्शनात् ॥४१॥ आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॥४२॥ सुषुप्त्यु
त्क्रान्त्योर्भेदेन ॥४३॥ पत्यादिशब्देभ्यः ॥४४॥ इत्युत्तरमीमांसाशास्त्रे प्रथमाध्यायस्य तृतीयः पादः
॥ ॥आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ॥ १ ॥

सूक्ष्मंतुतदर्हत्वात्॥२॥तदधीनत्वादर्थवत्॥ ३॥ज्ञेयत्वावचनाच्च॥ ४ ॥वदतीतिचेन्नप्रा
ज्ञोहिप्रकरणात्॥५॥त्रयाणामेवचैवमुपन्यासःप्रश्नश्च॥ ६॥महद्वच्च॥ ७॥चमसव
दविशेषात्॥ ८ ॥ज्योतिरुपक्रमातुतथाह्यधीयतएके॥ ९॥कल्पनोपदेशाच्चमध्वादि
वदविरोधः॥ १०॥नसंख्योपसंग्रहादपिनानाभावादतिरेकात्॥ ११॥अतिरेकाच्च॥ १२
॥प्राणादयोवाक्यशेषात्॥ १३॥ज्योतिषैकेषामसत्यन्ने॥ १४॥कारणत्वेनचा
काशादिषुयथाव्यपदिष्टोक्तेः॥ १५॥जगद्वाचित्वात्॥ १६॥जीवमुख्यप्राणलिङ्गान्ने
तिचेन्नव्याख्यातम्॥ १७॥अन्यार्थंतुजैमिनिःप्रश्नव्याख्यानाभ्यामपिचैवमेके॥ १८॥वा
क्यान्वयात्॥ १९॥प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः॥ २०॥उत्क्रमिष्यतएवंभावादित्यौडु

॥ब्रा·सू·॥
॥प्र·च·॥
॥४॥

लोमिः ॥२१॥ अवस्थितेरिति काशकृत्स्नः ॥२२॥ प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥२३॥
अभिध्योपदेशाच्च ॥२४॥ साक्षाच्चोभयाम्नानात् ॥२५॥ आत्मकृतेः परिणामात् ॥२६॥ योनि
श्च हि गीयते ॥२७॥ एतेन सर्वे व्याख्याता व्याख्याताः ॥२८॥ इत्युत्तरमीमांसासूत्रे प्रथमाध्याय
स्य चतुर्थः पादोध्यायश्च समाप्तः ॥ ॥ स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवका
शदोषप्रसङ्गात् ॥१॥ इतरेषां चानुपलब्धेः ॥२॥ एतेन योगः प्रत्युक्तः ॥३॥ न विलक्षणत्वा
दस्य तथात्वं च शब्दात् ॥४॥ अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ॥५॥ दृश्यते तु ॥६॥
असदिति चेन्न प्रतिषेधमात्रत्वात् ॥७॥ अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् ॥८॥ न तु दृष्टान्त
भावात् ॥९॥ स्वपक्षदोषाच्च ॥१०॥ तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेदेवमप्यविमोक्षप्र

॥राम॥

सङ्गः॥११॥एतेनशिष्टापरिग्रहा अपिव्याख्याताः॥१२॥भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्
॥१३॥तदनन्यत्वमारम्भणशब्दादिभ्यः॥१४॥भावेचोपलब्धेः॥१५॥सत्वाच्चावरस्य॥१६॥असद्व्य
पदेशान्नेतिचेन्नधर्मान्तरेणवाक्यशेषात्॥१७॥युक्तेःशब्दान्तराच्च॥१८॥पटवच्च॥१९॥य
थाचप्राणादिः॥२०॥इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः॥२१॥अधिकन्तुभेदनिर्देशा
त्॥२२॥अश्मादिवच्चतदनुपपत्तिः॥२३॥उपसंहारदर्शनान्नेतिचेन्नक्षीरवद्धि॥२४॥देवादिवदपि
लोके॥२५॥कृत्स्नप्रसक्तिर्निरवयवशब्दकोपोवा॥२६॥श्रुतेस्तुशब्दमूलत्वात्॥२७॥आत्म
निचैवंविचित्राश्चहि॥२८॥स्वपक्षदोषाच्च॥२९॥सर्वोपेताचतद्दर्शनात्॥३०॥विकरणत्वा
न्नेतिचेन्नतदुक्तम्॥३१॥नप्रयोजनवत्त्वात्॥३२॥लोकवत्तुलीलाकैवल्यम्॥३३॥वैषम्यनैर्घृ

ण्येनसापेक्षत्वान्नतथाहिदर्शयति ॥ ३४ ॥ नकर्माविभागादितिचेन्नानादित्वात् ॥ ३५ ॥ उपप
द्यतेचाप्युपलभ्यतेच ॥ ३६ ॥ सर्वधर्मोपपत्तेश्च ॥ ३७ ॥ इत्युत्तरमीमांसासूत्रे द्वितीयाध्यायस्यप्र
थमः पादः ॥ ॥ रचनानुपपत्तेश्चनानुमानम् ॥ १ ॥ प्रवृत्तेः ॥ २ ॥ पयोम्बुवच्चेत्तत्रापि ॥ ३ ॥ व्यतिरे
कानवस्थितेश्चानपेक्षत्वात् ॥ ४ ॥ अन्यत्राभावाच्चनतृणादिवत् ॥ ५ ॥ अभ्युपगमेप्यर्थाभावा
त् ॥ ६ ॥ पुरुषाश्मवदितिचेत्तथापि ॥ ७ ॥ अङ्गित्वानुपपत्तेश्च ॥ ८ ॥ अन्यथानुमितौचज्ञ
शक्तिवियोगात् ॥ ९ ॥ विप्रतिषेधाच्चासमञ्जसम् ॥ १० ॥ महद्दीर्घवद्वाह्रस्वपरिमण्डलाभ्याम्
॥ ११ ॥ उभयथापिनकर्मातस्तदभावः ॥ १२ ॥ समवायाभ्युपगमाच्चसाम्यादनवस्थितेः ॥
१३ ॥ नित्यमेवचभावात् ॥ १४ ॥ रूपादिमत्त्वाच्चविपर्ययोदर्शनात् ॥ १५ ॥ उभयथाचदोषात्

॥१६॥ अपरिग्रहाच्चात्यन्तमनपेक्षा ॥१७॥ समुदायउभयहेतुकेपितदप्राप्तिः ॥१८॥ इतरेतरप्र
त्ययत्वादितिचेन्नोत्पत्तिमात्रनिमित्तत्वात् ॥१९॥ उत्तरोत्पादेच पूर्वनिरोधात् ॥२०॥ असतिप्रतिज्ञो
परोधोयौगपद्यमन्यथा ॥२१॥ प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात् ॥२२॥ उभयथा
च्चदोषात् ॥२३॥ आकाशेचाविशेषात् ॥२४॥ अनुस्मृतेश्च ॥२५॥ नासतोदृष्टत्वात् ॥२६॥
उदासीनानामपिचैवंसिद्धिः ॥२७॥ नाभावउपलब्धेः ॥२८॥ वैधर्म्याच्चनस्वप्नादिवत् ॥२९॥ न
भावोऽनुपलब्धेः ॥३०॥ क्षणिकत्वाच्च ॥३१॥ सर्वथाऽनुपपत्तेश्च ॥३२॥ नैकस्मिन्नसंभवात् ॥
३३ ॥ एवंचात्माकार्त्स्न्यम् ॥३४॥ नचपर्यायादप्यविरोधोविकारादिभ्यः ॥३५॥ अन्त्यावस्थितेश्चो
भयनित्यत्वादविशेषः ॥३६॥ पत्युरसामञ्जस्यात् ॥३७॥ संबन्धानुपपत्तेश्च ॥३८॥ अधिष्ठा

नानुपपत्तेश्च ॥ ३९ ॥ करणवच्चेन्नभोगादिभ्यः ॥ ४० ॥ अन्तवत्त्वमसर्वज्ञता वा ॥ ४१ ॥ उत्पत्त्यसंभवा
त् ॥ ४२ ॥ न च कर्तुः करणम् ॥ ४३ ॥ विज्ञानादिभावे वा तदप्रतिषेधः ॥ ४४ ॥ विप्रतिषेधाच्च ॥ ४५ ॥
इत्युत्तरमीमांसासूत्रे द्वितीयाध्यायस्य द्वितीयः पादः ॥ ॥ न वियदश्रुतेः ॥ १ ॥ अस्ति तु ॥ २ ॥
गौण्यसंभवात् ॥ ३ ॥ शब्दाच्च ॥ ४ ॥ स्याच्चैकस्य ब्रह्मशब्दवत् ॥ ५ ॥ प्रतिज्ञाहानिरव्यतिरेकाच्छ
ब्देभ्यः ॥ ६ ॥ यावद्विकारन्तु विभागो लोकवत् ॥ ७ ॥ एतेन मातरिश्वा व्याख्यातः ॥ ८ ॥ असंभवस्तु
सतोऽनुपपत्तेः ॥ ९ ॥ तेजोऽतस्तथा ह्याह ॥ १० ॥ आपः ॥ ११ ॥ पृथिव्यधिकाररूपशब्दान्तरेभ्यः ॥
१२ ॥ तदभिध्यानादेव तु तल्लिङ्गात्सः ॥ १३ ॥ विपर्ययेण तु क्रमोऽत उपपद्यते च ॥ १४ ॥ अन्तरा विज्ञा
नमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात् ॥ १५ ॥ चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्त

द्भावभावित्वात्॥ १६॥ नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः॥ १७॥ ज्ञोत एव॥ १८॥ उत्क्रान्तिगत्यागतीना
म्॥ १९॥ स्वात्मना चोत्तरयोः॥ २०॥ नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात्॥ २१॥ स्वशब्दोन्माना
भ्यां च॥ २२॥ अविरोधश्चन्दनवत्॥ २३॥ अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि॥
२४॥ गुणाद्वा लोकवत्॥ २५॥ व्यतिरेको गन्धवत्॥ २६॥ पृथगुपदेशात्॥ २७॥ तद्गुणसार
त्वात्तु तद्व्यपदेशः प्राज्ञवत्॥ २८॥ यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात्॥ २९॥ पुंस्त्वा
दिवत्त्वस्य सतोभिव्यक्तियोगात्॥ ३०॥ नित्योपलब्ध्यनुपलब्धिप्रसङ्गोन्यतरनियमो वान्य
था॥ ३१॥ कर्ता शास्त्रार्थवत्त्वात्॥ ३२॥ विहारोपदेशात्॥ ३३॥ उपादानात्॥ ३४॥ व्यप
देशाच्च क्रियायां न चेन्निर्देशविपर्ययः॥ ३५॥ उपलब्धिवदनियमः॥ ३६॥ शक्तिविपर्य

यात॥ ३७॥ समाध्यभावाच्च॥ ३८॥ यथा च तक्षोभयथा॥ ३९॥ परात्तु तच्छ्रुतेः॥ ४०॥ कृत
प्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः॥ ४१॥ अंशो नानाव्यपदेशादन्यथापि
दाशकितवादित्वमधीयत एके॥ ४२॥ मन्त्रवर्णाच्च॥ ४३॥ अपि च स्मर्यते॥ ४४॥ प्रकाशा
दिवन्नैवं परः॥ ४५॥ स्मरन्ति च॥ ४६॥ अनुज्ञापरिहारौ देहसंबन्धाज्ज्योतिरादिवत्॥ ४७॥
असंततेश्चाव्यतिकरः॥ ४८॥ आभास एव च॥ ४९॥ अदृष्टानियमात्॥ ५०॥ अभिसन्ध्या
दिष्वपि चैवम्॥ ५१॥ प्रदेशादिति चेन्नान्तर्भावात्॥ ५२॥ इत्युत्तरमीमांसासूत्रे द्वितीयाध्यायस्य
तृतीयः पादः॥ ॥तथा प्राणाः॥ १॥ गौण्यसंभवात्॥ २॥ तत्प्राक्छ्रुतेश्च॥ ३॥ तत्पूर्वक
त्वाद्वाचः॥ ४॥ सप्त गतेर्विशेषितत्वाच्च॥ ५॥ हस्तादयस्तु स्थितेऽतो नैवम्॥ ६॥ अणवश्च

॥७॥ श्रेष्ठश्च ॥ ८ ॥ न वायुक्रिये पृथगुपदेशात् ॥ ९ ॥ चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः
॥१०॥ अकरणत्वाच्च न दोषस्तथा हि दर्शयति ॥ ११ ॥ पंचवृत्तिर्मनोवद्व्यपदिश्यते ॥ १२ ॥
अणुश्च ॥ १३ ॥ ज्योतिराद्यधिष्ठानं तु तदामननात् ॥ १४ ॥ प्राणवता शब्दात् ॥ १५ ॥ तस्य च नि
त्यत्वात् ॥ १६ ॥ त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥ १७ ॥ भेदश्रुतेः ॥ १८ ॥ वैलक्षण्याच्च
॥ १९ ॥ संज्ञामूर्तिकॢप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॥ २० ॥ मांसादि भौमं यथाशब्दमितरयोश्च ॥ २१ ॥
वैशेष्यात्तु तद्वादस्तद्वादः ॥ २२ ॥ इत्युत्तरमीमांसासूत्रे द्वितीयाध्यायस्य चतुर्थः पादः ॥ समा
प्तः ॥ ॥ तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् ॥ १ ॥ त्र्यात्मकत्वात्तु भूयस्त्वात्
॥ २ ॥ प्राणगतेश्च ॥ ३ ॥ अग्न्यादिषु गतिश्रुतेरिति चेन्न भाक्तत्वात् ॥ ४ ॥ प्रथमेऽश्रवणादिति चे

॥ब्रा·सू·॥
॥तृ·प्र॥
॥८॥

न्नता एव ह्युपपत्तेः॥५॥अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः॥६॥भाक्तं वानात्मवित्त्वा-
त्तथा हि दर्शयति॥७॥कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवं च॥८॥चरणादिति चे-
न्नोपलक्षणार्थेति कार्ष्णाजिनिः॥९॥आनर्थक्यमिति चेन्न तदपेक्षत्वात्॥१०॥सुकृतदुष्कृते एव
तु बादरिः॥११॥अनिष्टादिकारिणामपि च श्रुतम्॥१२॥संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गति-
दर्शनात्॥१३॥स्मरन्ति च॥१४॥अपि च सप्त॥१५॥तत्रापि च तद्व्यापारादविरोधः॥१६॥विद्या-
कर्मणोरिति तु प्रकृतत्वात्॥१७॥न तृतीये तथोपलब्धेः॥१८॥स्मर्यतेऽपि च लोके॥१९॥दर्शना-
च्च॥२०॥तृतीयशब्दावरोधः संशोकजस्य॥२१॥तत्स्वाभाव्यापत्तिरुपपत्तेः॥२२॥नातिचिरे-
ण विशेषात्॥२३॥अन्याधिष्ठितेषु पूर्ववदभिलापात्॥२४॥अशुद्धमिति चेन्न शब्दात्॥२५॥

॥रामः॥
॥८॥

रेतःसिग्योगोथ ॥ २६ ॥ योनेः शरीरम् ॥ २७ ॥ इत्युत्तरमीमांसासूत्रे तृतीयाध्यायस्य प्रथमः पादः
॥ ॥ संध्ये सृष्टिराह हि ॥ १ ॥ निर्मातारं चैके पुत्रादयश्च ॥ २ ॥ मायामात्रं तु कार्त्स्न्येनानभिव्य
क्तस्वरूपत्वात् ॥ ३ ॥ सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॥ ४ ॥ पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बं
धविपर्ययौ ॥ ५ ॥ देहयोगाद्वा सोपि ॥ ६ ॥ तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥ ७ ॥ अतः प्रबोधोस्मात् ॥
८ ॥ स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥ ९ ॥ मुग्धेर्द्धसम्पत्तिः परिशेषात् ॥ १० ॥ न स्थानतोपि परस्योभयलि
ङ्गं सर्वत्र हि ॥ ११ ॥ न भेदादिति चेन्न प्रत्येकमतद्वचनात् ॥ १२ ॥ अपि चैवमेके ॥ १३ ॥ अरूपवदेव हि तत्प्र
धानत्वात् ॥ १४ ॥ प्रकाशवच्चावैयर्थ्यम् ॥ १५ ॥ आह च तन्मात्रम् ॥ १६ ॥ दर्शयति चाथो स्मर्यते ॥ १७ ॥ अत
एव चोपमा सूर्यकादिवत् ॥ १८ ॥ अम्बुवदग्रहणात्तु न तथात्वम् ॥ १९ ॥ वृद्धिह्रासभाक्त्वमन्तर्भावादुभ

यसामंजस्यात्॥ २०॥ दर्शनाच्च॥ २१॥ प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः॥ २२॥ तदव्यक्तमाह हि॥ २३॥ अपि संराधने प्रत्यक्षानुमानाभ्याम्॥ २४॥ प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात्॥ २५॥ अतोनन्तेन तथा हि लिङ्गम्॥ २६॥ उभयव्यपदेशात्त्वहिकुण्डलवत्॥ २७॥ प्रकाशाश्रयवद्वा तेजस्त्वात्॥ २८॥ पूर्ववद्वा॥ २९॥ प्रतिषेधाच्च॥ ३०॥ परमतः सेतून्मानसंबन्धव्यपदेशेभ्यः॥ ३१॥ सामान्यात्तु॥ ३२॥ बुद्ध्यर्थः पादवत्॥ ३३॥ स्थानविशेषात्प्रकाशादिवत्॥ ३४॥ उपपत्तेश्च॥ ३५॥ तथान्यप्रतिषेधात्॥ ३६॥ अनेन सर्वगतत्वमायामशब्दादिभ्यः॥ ३७॥ फलमत उपपत्तेः॥ ३८॥ श्रुतत्वाच्च॥ ३९॥ धर्मं जैमिनिरत एव॥ ४०॥ पूर्वं तु बादरायणो हेतुव्यपदेशात्॥ ४१॥ इत्युत्तरमीमांसाशास्त्रे तृतीयाध्यायस्य द्वितीयः पादः॥ ॥ सर्ववेदान्तप्रत्ययं चो

दनाद्यविशेषात्॥१॥भेदान्नेतिचेन्नैकस्यामपि॥२॥स्वाध्यायस्यतथात्वेनहिसमाचारेधिका
राच्चसववच्चतन्नियमः॥३॥तस्मात्सर्वंचविधेयेकांदर्शयतिच॥४॥उपसंहारोर्थाभेदाद्विधिशे
षवत्समानेच॥५॥अन्यथात्वंशब्दादितिचेन्नाविशेषात्॥६॥नवाप्रकरणभेदात्परोवरीय
स्त्वादिवत्॥७॥संज्ञातश्चेत्तदुक्तमस्तितुतदपि॥८॥व्याप्तेश्चसमंजसम्॥९॥सर्वाभेदादन्यत्रे
मे॥१०॥आनन्दादयःप्रधानस्य॥११॥प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौहिभेदे॥१२॥
इतरेत्वर्थसामान्यात्॥१३॥आध्यानायप्रयोजनाभावात्॥१४॥आत्मशब्दाच्च॥१५॥आत्मगृ
हीतिरितरवदुत्तरात्॥१६॥अन्वयादितिचेत्स्यादवधारणात्॥१७॥कार्याख्यानादपूर्वम्॥१८॥
समानएवंचाभेदात्॥१९॥संबंधादेवमन्यत्रापि॥२०॥नवाविशेषात्॥२१॥दर्शयतिच॥२२॥

॥ब्र॰सू॰॥
॥तृ॰छि॥
॥१०॥

संभृतिद्युव्याप्त्यपि चातः ॥२३॥ पुरुषविद्यायामिव चेतरेषामनाम्नानात् ॥२४॥ वेधाद्यर्थभेदात्
॥२५॥ हानौ तूपायनशब्दशेषत्वात्कुशाछन्दस्तुत्युपगानवत्तदुक्तम् ॥२६॥ सांपराये तर्त्तव्याभा-
वात्तथा ह्यन्ये ॥२७॥ छन्दत उभयाविरोधात् ॥२८॥ गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः ॥२९॥
उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥३०॥ अनियमः सर्वेषामविरोधः शब्दानुमानाभ्यां
॥३१॥ यावदधिकारमवस्थितिराधिकारिकाणाम् ॥३२॥ अक्षरधियां त्ववरोधः सामान्यत-
द्भावाभ्यामौपसदवत्तदुक्तम् ॥३३॥ इयदामननात् ॥३४॥ अन्तरा भूतग्रामवत्स्वात्मनः ॥३५
॥ अन्यथाभेदानुपपत्तिरिति चेन्नोपदेशान्तरवत् ॥३६॥ व्यतिहारो विशिंषन्ति हीतरवत् ॥
३७॥ सैव हि सत्यादयः ॥३८॥ कामादीतरत्र तत्र चायतनादिभ्यः ॥३९॥ आदरादलोपः ॥४०॥

रामः
१०

हृयस्थितेतस्तद्वचनम्॥४१॥तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम्॥४२॥
प्रदानवदेव तदुक्तम्॥४३॥ लिंगभूयस्त्वात्तद्धि बलीयस्तदपि॥४४॥पूर्वविकल्पः प्रकर-
णात्स्यात्क्रियामानसवत्॥४५॥अतिदेशाच्च॥४६॥विद्यैव तु निर्धारणात्॥४७॥दर्शनाच्च
॥४८॥ श्रुत्यादिबलीयस्त्वाच्च न बाधः॥४९॥अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्त-
म्॥५०॥ न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः॥ ५१॥परेण च शब्दस्य ताद्विध्यं भूय-
स्त्वात्त्वनुबन्धः॥५२॥एक आत्मनः शरीरे भावात्॥ ५३॥ व्यतिरेकस्तद्भावभावित्वान्न तूपलब्धिव-
त्॥५४॥अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम्॥ ५५॥मंत्रादिवद्वाविरोधः॥५६॥भूम्नः क्रतुव-
ज्ज्यायस्त्वं तथा हि दर्शयति॥५७॥नानाशब्दादिभेदात्॥ ५८॥विकल्पोऽविशिष्टफलत्वात्॥

५९ ॥ काम्यास्तुयथाकामंसमुच्चीयेरन्नवापूर्वहेत्वभावात् ॥ ६० ॥ अङ्गेषुयथाश्रयभावः ॥ ६१ ॥ अङ्गेषुयथाश्रयभावः ॥ ६२ ॥ शिष्टेश्च ॥ ६३ ॥ समाहारात् ॥ ६४ ॥ गुणसाधारण्यश्रुतेश्च ॥
६५ ॥ नवातत्सहभावाश्रुतेः ॥ ६६ ॥ इत्युत्तरमीमांसासूत्रेतृतीयाध्यायस्यतृतीयःपादः ॥ ॥
पुरुषार्थोतः शब्दादितिबादरायणः ॥ १ ॥ शेषत्वात्पुरुषार्थवादोयथान्येष्वितिजैमिनिः ॥ २
आचारदर्शनात् ॥ ३ ॥ तच्छ्रुतेः ॥ ४ ॥ समन्वारंभणात् ॥ ५ ॥ तद्वतोविधानात् ॥ ६ ॥ नियमाच्च ॥
७ ॥ अधिकोपदेशात्तुबादरायणस्यैवंतद्दर्शनात् ॥ ८ ॥ तुल्यंतुदर्शनम् ॥ ९ ॥ असार्वत्रिकी ॥ १०
विभागःशतवत् ॥ ११ ॥ अध्ययनमात्रवतः ॥ १२ ॥ नाविशेषात् ॥ १३ ॥ स्तुतयेनुमतिर्वा ॥ १४ ॥ काम-
कारेणचैके ॥ १५ ॥ उपमर्दंच ॥ १६ ॥ ऊर्ध्वरेतस्सुचशब्देहि ॥ १७ ॥ परामर्शंजैमिनिरचोदनापव

दतिहि॥१८॥अनुष्ठेयंबादरायणःसाम्यश्रुतेः॥१९॥विधिर्वाधारणवत्॥२०॥स्तुतिमा
त्रमुपादानादितिचेन्नापूर्वत्वात्॥२१॥भावशब्दाच्च॥२२॥पारिप्लवार्थाइतिचेन्नविशेषि
तत्वात्॥२३॥तथाचैकवाक्यतोपबंधात्॥२४॥अतएवचाग्नीन्धनाद्यपेक्षा॥२५॥सर्वापे
क्षाचयज्ञादिश्रुतेरश्ववत्॥२६॥शमदमाद्युपेतःस्यात्तथापितुतद्विधेस्तदङ्गतयातेषामा
वश्यानुष्ठेयत्वात्॥२७॥सर्वान्नानुमतिश्चप्राणात्ययेतद्दर्शनात्॥२८॥अबाधाच्च॥२९॥अ
पिचस्मर्यते॥३०॥शब्दश्चातोकामकारे॥३१॥विहितत्वाच्चाश्रमकर्मापि॥३२॥सहकारित्वे
नच॥३३॥सर्वथापितएवोभयलिङ्गात्॥३४॥अनभिभवंचदर्शयति॥३५॥अन्तराचा
पितुतद्दृष्टेः॥३६॥विशेषानुग्रहश्च॥३७॥तद्भूतस्यतुनातद्भावोजैमिनेरपिनियमात्तद्रूपा

भावेभ्यः ॥३८॥ न चाधिकारिकमपि पतनानुमानात्तदयोगात् ॥३९॥ उपपूर्वमपि त्वेके भावम
शनवत्तदुक्तम् ॥४०॥ बहिस्तूभयथा स्मृतेराचाराच्च ॥४१॥ स्वामिनः फलश्रुतेरित्यात्रेयः ॥४२॥
आर्त्विज्यमित्यौडुलोमिस्तस्मैपरिक्रियते ॥४३॥ सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो
विध्यादिवत् ॥४४॥ कृत्स्नभावात्तु गृहिणोपसंहारः ॥४५॥ मौनवदितरेषामप्युपदेशात्
॥४६॥ अनाविष्कुर्वन्नन्वयात् ॥४७॥ ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥४८॥ एवं
मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ॥४९॥ इत्युत्तरमीमांसाशास्त्रे तृतीया-
ध्यायस्य चतुर्थः पादोध्यायश्च समाप्तः ॥ ॥ आवृत्तिरसकृदुपदेशात् ॥१॥ लिङ्गाच्च ॥२
आत्मेति तूपगच्छन्ति ग्राहयन्ति ॥३॥ न प्रतीके न हि सः ॥४॥ ब्रह्मदृष्टिरुत्कर्षात् ॥५॥

आदित्यादिमतयश्चाङ्गउपपत्ते ।।६।। आसीनः संभवात् ।।७।। ध्यानाच्च ।।८।। अचलत्वंचा
पेक्ष्य ।।९।। स्मरन्ति च ।। १०।। यत्रैकाग्रता तत्राविशेषात् ।।११।। आप्रायणात्तत्रापि हि दृष्टम्
।।१२।। अनारब्धकार्ये एव तु तदवधेः ।।१३।। अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ।।१४।। अ
तोन्यापि ह्येकेषामुभयोः ।।१५।। यदेव विद्ययेति हि ।।१६।। भोगेन त्वितरे क्षपयित्वाथ संपद्य
ते ।।१७।। इत्युत्तरमीमांसासूत्रे चतुर्थाध्यायस्य प्रथमः पादः ।। ।। वाङ्मनसि तद्दर्शनाच्छब्दाच
।।१।। अत एव च सर्वाण्यनु ।।२।। तन्मनः प्राण उत्तरात् ।।३।। सोध्यक्षे तदुपगमादिभ्यः ।।
४ ।। भूतेषु तच्छ्रुतेः ।।५।। नैकस्मिन्दर्शयतो हि ।।६।। समाना चासृत्युपक्रमादमृतत्वं चानु
पोष्य ।।७।। तदापीतेः संसारव्यपदेशात् ।।८।। सूक्ष्मं परिमाणतश्च तथोपलब्धेः ।। ९ ।।

नोपमर्द्देनातः ॥ १० ॥ अस्यैव चोपपत्तेरेषऊष्मा ॥ ११ ॥ प्रतिषेधादितिचेन्नशारीरात्
१२ ॥ स्पष्टो ह्येकेषाम् ॥ १३ ॥ स्मर्यते च ॥ १४ ॥ तानिपरेतथाह्याह ॥ १५ ॥ अविभागोवचना
त् ॥ १६ ॥ तदोकोऽग्रज्वलनंतत्प्रकाशितद्वारोविद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्चहार्दा
नुगृहीतःशताधिकया ॥ १७ ॥ रश्म्यनुसारी ॥ १८ ॥ निशिनेतिचेन्नसंबन्धस्ययावद्देहभावित्वाद्द
र्शयति च ॥ १९ ॥ अतश्चायनेऽपिदक्षिणे ॥ २० ॥ योगिनःप्रतिचस्मर्यतेस्मार्तेचैते ॥ २१ ॥ इब्रह्म
मीमांसाशास्त्रेचतुर्थाध्यायस्यद्वितीयःपादः ॥ ॥ अर्चिरादिनातत्प्रथिते ॥ १ ॥ वायुमब्दादविशे
षविशेषाभ्याम् ॥ २ ॥ तडितोधिवरुणःसंबन्धात् ॥ ३ ॥ आतिवाहिकास्तल्लिङ्गात् ॥ ४ ॥ उभय
व्यामोहात्तत्सिद्धेः ॥ ४ ॥ वैद्युतेनैवततस्तच्छ्रुतेः ॥ ५ ॥ कार्यंबादरिरस्यगत्युपपत्तेः ॥ ६ ॥ विशेषि

तत्वाच्च ॥ ८ ॥ सामीप्यात्तु तद्व्यपदेशः ॥ ९ ॥ कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ॥ १० ॥
स्मृतेश्च ॥ ११ ॥ परं जैमिनिर्मुख्यत्वात् ॥ १२ ॥ दर्शनाच्च ॥ १३ ॥ न च कार्ये प्रत्यभिसन्धिः ॥ १४ ॥
अप्रतीकालंबनान्नयतीति बादरायण उभयथा दोषात्तत्क्रतुश्च ॥ १५ ॥ विशेषं च दर्शयति ॥
१६ ॥ इत्युत्तरमीमांसासूत्रे चतुर्थाध्यायस्य तृतीयः पादः ॥ ॥ संपद्याविर्भावः स्वेनशब्दात् ॥ १ ॥
मुक्तः प्रतिज्ञानात् ॥ २ ॥ आत्मा प्रकरणात् ॥ ३ ॥ अविभागेन दृष्टत्वात् ॥ ४ ॥ ब्राम्हेण जैमिनिरु
पन्यासादिभ्यः ॥ ५ ॥ चिति तन्मात्रेण तदात्मकत्वादित्यौडुलोमिः ॥ ६ ॥ एवमप्युपन्यासात्पूर्व
भावादविरोधं बादरायणः ॥ ७ ॥ संकल्पादेव तु तच्छ्रुतेः ॥ ८ ॥ अत एव चानन्याधिपतिः ॥ ९ ॥
अभावं बादरिराह ह्येवम् ॥ १० ॥ भावं जैमिनिर्विकल्पामननात् ॥ ११ ॥ द्वादशाहवदुभयविधं

४१५४

श्री ५ को सरकार

उपनिषदध्ययने आद्यन्ते
पठनीयः
शान्तिपाठः

अद्वैतसम्प्रदायसिद्धः

१ हरिः ॐ॥ शन्नो मित्रः शं वरुणः। शन्नो भवत्वर्यमा। शन्नु इन्द्रो वृहस्पतिः। शन्नो विष्णुरुरुक्रमः॥ नमो ब्रह्मणे। नमस्ते वायो। त्वमेव
प्रत्यक्षं ब्रह्मासि। त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु माम्।
अवतु वक्तारम्॥ ॐ शान्तिः शान्तिः शान्तिः॥ ॐ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्विनावधीतमस्तु मा वि-
द्विषावहै॥ ॐ शान्तिः शान्तिः शान्तिः॥ ॐ यश्छन्दसामृषभो विश्वरूपः। छन्दोभ्योऽध्यमृतात्सम्बभूव। स मेन्द्रो मेधया स्पृणोतु।
अमृतस्य देवधारणो भूयासम्। शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा। कर्णाभ्यां भूरि विश्रुवम्। ब्रह्मणः कोशोऽसि मेधया वि-
हितः। श्रुतं मे गोपाय॥ ॐ शान्तिः शान्तिः शान्तिः॥ अहं वृक्षस्य रेरिवा। कीर्तिः पृष्ठं गिरेरिव। ऊर्द्धपवित्रो वाजिनीव स्वमृतमस्मि।
द्रविणं सवर्चसम्। सुमेधा अमृतोक्षितः। इति त्रिशङ्कोर्वेदानुवचनम्॥ ॐ शान्तिः शान्तिः शान्तिः॥ ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्ण- १

मुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।। ॐ शान्तिः शान्तिः शान्तिः ।। ॐ आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो
बलमिन्द्रियाणि च सर्वाणि सर्वं ब्रह्मौपनिषदं माहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मेऽस्तु तदात्मनि नि-
रते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु ।। ॐ शान्तिः शान्तिः शान्तिः ।। वाङ् मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमावि-
रावीर्म एधि वेदस्य म आणीस्थः श्रुतं मे मा प्रहासीरनेनाधीतेना अहोरात्रान्सन्दधाम्यृतं वदिष्यामि सत्यं वदिष्यामि तन्मामवतु
तद्वक्तारमवत्ववतु मामवतु वक्तारमवतु वक्तारम् ।। ॐ शान्तिः शान्तिः शान्तिः ।। ॐ भद्रन्नो अपिवातय मनः ।। ॐ शान्तिः शान्तिः
शान्तिः ।। ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।। स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ।। स्वस्ति न
इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ।। ॐ शान्तिः शान्तिः शान्तिः ।। ॐ

यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ।। तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ।। ॐ शान्तिः शान्तिः शान्तिः ।।
ॐ नमो ब्रह्मादिभ्यो ब्रह्मविद्यासम्प्रदायकर्तृभ्यो वंशऋषिभ्यो नमो गुरुभ्यः ।। सर्वोपप्लवरहितः प्रज्ञानघनः प्रत्यगर्थो ब्रह्मैवाहमस्मि ।।
ॐ नारायणं पद्मभुवं वसिष्ठं शक्तिं च तत्पुत्र पराशरं च ।। व्यासं शुकं गौडपदं महान्तं गोविन्दयोगीन्द्रमथास्य शिष्यम् ।। श्रीशङ्कराचा-
र्यमथास्य पद्मपादं च हस्तामलकश्च शिष्यम् ।। तं त्रोटकं वार्तिककारमन्यानस्मद्गुरून्सन्ततमानतोस्मि ।। ॐ श्रुतिस्मृतिपुराणानामा-
लयं करुणालयम् ।। नमामि भगवत्पादशङ्करं लोकशङ्करम् ।। शङ्करं शङ्कराचार्यं केशवं बादरायणम् ।। सूत्रभाष्यकृतौ वन्दे भगव-
न्तौ पुनः पुनः ।। वेदान्तार्थविभासकाय गुरवे शान्ताय सन्यासिने नानावादिमृगेन्द्रसद्धपवये योगीन्द्रवन्द्याय च ।। मोहध्वान्तदिवा-
कराय भगवत्पादाभिधां विभ्रते तस्मै भाष्यकृते नमोस्तु सततं पूर्णाय बोधात्मने ।। ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने ।। व्योमवद्व्याप्-

३ देहाय दक्षिणामूर्तयेनमः॥ (ॐ स्मृते सकलकल्याणभाजनं यत्रजायते॥ पुरुषस्तमजं नित्यं व्रजामिशरणं हरिम्॥ विघ्नेश्वरं विघ्नशान्त्यै वाणीं वाचः प्रवृत्तये॥ गुरुं स्वरूपार्थभानाय प्रणमामि निरन्तरम्॥) अन्ते। ऋतं वदिष्यामी त्यादिस्थाने— ऋतमवादिषम्। सत्यमवादिषम्। तन्मामावीत्। तद्वक्तारमावीत्। आवीन्माम्। आवीद्वक्तारम्।—इत्येवं पठनीयः॥ परदिने अनध्याय प्राप्तौ पूर्वदिने अन्ते एवं पठनीयः—यथा। ॐ अशुभानि निराचष्टे तनोति शुभसन्ततिम्। स्मृतिमात्रेण यत्पुंसां ब्रह्म तन्मङ्गलं परम्॥ अतिकल्याणरूपत्वान्नित्यकल्याणसंश्रयात्। स्मर्तॄणां वरदत्वाच्च ब्रह्म तन्मङ्गलं विदुः॥ ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ॥ ॐ अथ। ॐ अथ। ॐ अथ॥ ॐ शान्तिः॥ - ॥ ॥ ॥ ॥ ॥ ॥

३

४१६२

रि·१
१

ओँ श्रीपरमात्मनेनमः॥ ॥श्रीगणेशायनमः॥ ॥नित्यनिजानंदसदद्वितीयंशुद्धंवि
भुंसत्यमनित्यनंतसूक्ष्मंनिरस्ताखिलदुःखमीशंप्रसन्नंपरमात्मानमहंभजामि॥ १ ॥शंक
रंशंकराचार्यंकेशवंबादरायणं॥सूत्रभाष्यकृतौवंदेभगवंतौपुनःपुनः॥ २ ॥समस्ता
नानेकात्मकमद्वितीयंब्रह्मैवशुद्धसत्वप्रधानमायोपाधिकंसदीश्वरभावं॥मलिनस
त्वप्रधानाविद्योपाधिकंसत्जीवभावंव्रजगाम॥जीवेशावाभासेनकरोतिमायाचावि
द्यावस्वमेवतीतितापनीयेश्रवणात्॥तत्रमायाप्रतिबिंबईश्वरः तांमायांवशीकृत्य
सर्वज्ञःसर्वशक्तिश्चजीवानांसर्वेषामभ्युदयापवर्गार्थंसंकल्पमात्रेणैवलीलयाजगतः
सर्गस्थितिविलयानाचरति॥तत्रचयेजीवाः स्वाज्ञारूपश्रुतिस्मृत्युक्तमार्गानतिलंघ
नेनस्वात्मानंभजंतेतेषामनुग्रहायोपासनार्थंशंखचक्रगदाश्मरमृगपरशुधरंनीलो
त्पलदलकालमेघपूर्णविंजस्फटिकसमानवर्णआनंदघनंसर्वांगसुंदरंमूर्तिद्वयं

वंश·
१

रुद्रमन्त्रमयवज्रलीलास्पदं विष्णुशंकराख्यं सर्वेभ्यो रोजग्राह ॥ तत्रमूर्तिद्वयं वैकुंठकै
लासादिभक्तानां हृदयेव नित्यं संनिहितं वर्तनेतत्रच भगवान् विष्णुः फलत्यागपूर्वकं
निरंतरगुरुहितनवेदगुरुवचनेन यज्ञदानतपोभिर्विमलीकृतस्वांतानां नित्यानित्यवस्तु
विवेकेनतत्त्वलीकेनकृतनष्टफललोकादिभोगानां शमदमादिमतां गुरुशुश्रूषणां वज्रविध्व
स्तनिःश्वासभूतवेदार्थविज्ञाततत्समयतानां पुरुषवराणां मोक्षसाधनीभूतब्रह्मात्मतत्त्व
बोधनाय स्वांशेन श्रीभगवद्वादरायणरूपेणावतीर्य वज्रविधस्यायोपेतैः ख्यापयद्बहु
पात्मकैस्त्रसूत्रैः सकलवेदांतवाक्यानि संग्रंथ्य ग्राममनानिव स्वाणि अतिगंभीराणि तत
याऽरवगमाभिप्रायाणि संतीति ॥ इदानीं कलौ दुष्टविप्रैर्भेदवादिभिरभेदवादिभिश्च कैश्चि
दन्यथाऽन्यथाव्यायोजितानि दुष्टपार्थपर्यवसायीनि नवभूवुः ॥ अथ भगवान् परमेश्वर

हरि·टी
२

सर्वज्ञः शंकरः करुणया लोकानुग्रहार्थं स्वांशेन श्रीसर्वज्ञभगवत्पादशंकराचार्यरूपेण
ब्रह्मांद्यंशैः शिष्यभूतैः सहावतीर्य ब्रह्मसूत्रव्याख्यानरूपश्रीमच्छारीरकभाष्यकरणेन
सकृछ्रवणमात्रेणाज्ञानतिमिरतिरस्कारपटीयसो मुख्याधिकारिणः पुरुषधौरेया
ननुजग्राह। अथेदानीं ब्रह्मसूत्रार्थमीमांसाऽसमर्थानलसाननायासेन कटिति ब्रह्मज्ञा
नं साक्षान्विदिषतां मंदाधिकारिणोनुग्रहीतुकामः श्रीभगवान्भाष्यकारः तेषां ब्रह्म
तत्त्वं करतलबिल्वफलीकारयितुं जपमात्रेणासकलपुरुषार्थसाधकं सर्ववेदान्तसार
भूतं श्रवणमनननिदिध्यासनात्मकं हरिस्तोत्रमारिप्सुः किंचित्प्रतिजानीते स्तोष्य
इति॥ स्तोष्ये भक्त्या विष्णुमनादिं जगदादिं यस्मिन्नेतत्संसृतिचक्रं भ्रमतीत्थं यस्मिन्दृ
ष्टे नश्यति तत्संसृतिचक्रं तं संसारध्वान्तविनाशं हरिमीडे॥ १ ॥ विष्णुव्यापनशीलं त्रि

शंभु·
२

विधपरिछेदशून्यंब्रह्मेत्यर्थः॥ श्लोकेआरोपितसकलाधिष्ठानत्वात्सर्वात्मकत्वेनअनंत
कत्वात्तासतानयोर्वस्तुतोनिर्विशेषचिन्मात्रस्वरूपतयावकीर्त्यपिब्धेइतिप्रतिज्ञा
ननुलक्षणप्रमाणाभ्यांवस्तुसिद्धिःकीर्त्तितस्यापिविष्णोःकिंलक्षणंकिंप्रमाणमित्याशं
क्यजगत्कारणत्वंयतोवाइमानिभूतानिजायंतेइत्यादिश्रुत्युक्तलक्षणमाह॥ जगत
दिमिति॥ जगतःविपदादिसर्वप्रपंचस्यआदिकारणंसकलजगदुपादानत्वेसतिनि
मित्तत्वमितिविवक्षितं॥ ननन्वस्याआक्रांतप्रधानपरमाण्वादीनटस्याप्येवरेवनातिव्या
प्तिः॥ ननुइदंअभिन्ननिमित्तोपादानत्वंकुत्राप्यप्रसिद्धंघटादिषुसर्वत्रउपादाननिमि
त्तयोर्भेदस्यैवदर्शनात्॥ सर्वोपादानत्वमप्यप्रसिद्धंमृत्तिकादेरेकैकोपादानत्वस्यैव
दर्शनात्॥ ततःकथमप्रसिद्धंलक्षणमुच्यते॥ प्रसिद्धस्यैवलोकेलक्षणत्वदर्शना

हरिःदी
३

दिति चेदुच्यते। पृथ्व्यप्तेजोवायवो विप्रतिपन्नाः उत्पत्तिमंतः पृथिवीत्वादेः मृदुत्पन्नघटवंद्रकांतोत्पन्नजलारण्युत्पन्नाग्निव्यजनपवनवदिति· कार्य्यत्वमनुमाय आकाशस्यापि भूतत्वहेतुना कार्य्यत्वानुमानांतरं पृथिव्यादीनि सदुपादानानि तदुपरक्ततया प्रतीयमानत्वात् यन्नियमेन यदुपरक्ततया प्रतीयते तत्तदुपादानं यथा घटादिर्मृदाद्युपादानमिति लाघवात्सर्वस्य जगतः एकसम्वकर्तृकत्वस्यानंतरमेव अभिन्ननिमित्तोपादानकत्वस्यापि सिद्धिः संभवति॥ परमते च घटे ईश्वरसंयोगादेर्जीवात्मगतज्ञानादेव अभिन्ननिमित्तोपादानत्वदर्शनात्॥ ततश्चानुमानसिद्धमभिन्ननिमित्तोपादानत्वमनूद्य तस्य ब्रह्मत्वबोधनं श्रुत्या संभवति॥ एवंच श्रुतेर्लक्षणापरत्वाभावेन॥ अनुमानसिद्धमभिन्ननिमित्तोपादानत्वमनूद्य तस्य ब्रह्मत्वबोधनमात्रेण न वाक्यभेदप्रसंगः तस्य च ब्र

शंकुः
३

लणास्वरूपमानं तदाग्रैव स्वल्लिमानि भूमानीति वाक्येन निर्णीयत्वे प्रमाणं तां स्वब्रह्मणो शा
स्त्रयोनित्वात् ॥ ननु समन्वयादिसूत्रन्यायेन सर्ववेदांना ॥ ननु ज्ञप्रमाणयोः लक्ष
णं सत्वेन ब्रह्मणोः ह्मोच कारणप्रतिज्ञा संघटतीति न किंचिदवद्यमिति भावः ॥ ननु यद्घटका
रणं तत्रदमतो जन्यमिति व्याप्तेरकाशादेर्दर्शनादेकाशादिकारणस्यापि ब्रह्मणोऽन्यज
न्यत्वानुमानेन जन्यसर्वोपादाननिमित्तत्वलक्षणं ॥ तस्मिन्नुपपन्नं स्यादित्याशंक्य
असंभवस्तु सतोऽनुपपत्तेरिति न्यायेन तस्याजन्यत्वमाह ॥ अनादिमिति ॥ आदिकार
णं न विद्यते यस्य सोऽनादिरजन्य इत्यर्थः ॥ अयं भावः ॥ किं ब्रह्मणो जडं कारणमुत चेत
नं नाद्यः ॥ जडस्याकाशादेर्ब्रह्मकार्यत्वात् ॥ नापि द्वितीयः ॥ स्वस्य स्वकारणत्वानुप
पत्तेः ॥ चेतनांतराभावाच्च सत्त्वे वा तस्यापि कारणत्वेनान्यजन्यत्वानुमानेन चेतनानव

हरि·ए
४

स्याप्रसंगात्॥ कस्यचिदजन्यत्वेवातद्वैवकारणत्वं हेतोर्यभिचारात्॥ तस्यैवब्रह्मत्वांगीकारात्
सवाएषमहानजआत्मेत्यजन्यत्वप्रतिपादकश्रुतिविरोधात्तन्नतस्यजन्यत्वमितिजगत्स
र्वोपादाननिमित्तत्वलक्षणात्तूपपत्तिमितिनेत्वेवमपिक्लोह्मार्भोनऽज्ञानेनस्यापिविषयत्वयो
जनयोरभावात्॥ ~~नचाहि~~॥ प्रसंगमित्वंब्रह्मैवविषयइतिभवतोऽभिमानः तन्नानुपपन्नः क
र्तृत्वभोक्तृत्वप्रमातृत्वेनप्रतीयमानस्यजीवः॥ नडहिजीवब्रह्मणोऽभेदानुपपत्तेः॥ नतत्प्र
तीच्यध्यस्ताहंकारएवकर्तृत्वोपगमात्तु ऽभ्यपगमेनतुप्रत्यगात्मेतिचेन्न॥ नअध्यासकारणाभावे
नकर्तृत्वस्यानुपपत्तेः किंजदेवस्कृनिकर्तृत्वस्याध्यासः ऽन्नस्यप्रकाशेनाय· कर्तृत्वभानप्रसंगा
त्·भवन्मतेजडस्यासर्वस्याप्रत्यक्षत्वेनअधिष्ठानत्वानुपपत्तेश्च॥ नद्वितीयः स्वप्रका
शकस्यवस्तुनः अज्ञानविषयत्वाभावेनाधिष्ठानत्वायोगात्नलोकेऽअंसतोऽज्ञानस्यैव·

शं·भ·
४

शुक्त्यादेरधिष्ठानत्वदर्शनात् ॥ अस्य वशात्मत्वान्नांगीकारस्तत्र न हि स्वप्रकाशमानस्याप्यज्ञा
नविषयत्वं संभवति प्रकाशाप्रकाशयोर्विरोधात् ॥ तादृशादेर्विषयदोषस्य स्वप्रकाश
विषयप्रमितेरसंभवेन तत्कारणप्रमाणदोषस्याप्यभावाच्च ॥ नन्वात्मकर्तृत्वाध्यास इति तस्य
चात्मत्वात्तस्य च दोषवतोऽन्तःकरणाभेदाध्यासाद्विषयः संभवति ॥ प्रयोजनमपि
न संभवति आत्मनि प्रतीयमानकर्तृत्वादेरनर्थस्य निवृत्तिर्हि प्रयोजनमिति वक्तव्यं ॥
तस्योक्तप्रकारेण जन्यसत्यस्य ज्ञानान्निवृत्त्ययोगादित्याशंक्य तदुभयं प्रतिपादयन् स्तु
तिमारभते ॥ यस्मिन्नित्यादिना ॥ यस्मिन्नज्ञाते विभौ अधिष्ठाने एतत् अनुभूयमानं
संसृतिचक्रं संसरणनया जीव इति संसृतिरहंकारादिप्रपंचः स एव चक्रं भ्रमति प्रमहः
चाविर्भावयतिरोभावाभ्यां पुनःपुनरावर्तते इदं कर्तृत्वादिप्रकारेण अथवा संसृति

वक्रं अहंकारादिप्रपंचजातं कमजीवो भ्रमनिष्ठां स्याग्गृह्णीनार्थः। अथ नामिलंबिः॥ आ
त्मा वा इदमेक एवाग्र आसीत्॥ सदेव सोम्येदमग्र आसीत् सत्यं ज्ञानमनंतं ब्रह्म॥ कस्मि
न्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति॥ अन्यत्र धर्मादन्यथाधर्मान्ब्रह्म नेववाणिय
त्साक्षादपरोक्षाद्ब्रह्म योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति॥ ब्रह्म तं परादाद्यो
न्यत्रात्मनो ब्रह्म वेद॥ अथ योऽन्यां देवतामुपास्ते मन्यो। समृत्युमाप्नोति य इह नानेव पश्य
ति॥ यदा ह्येवैष एतस्मिन्नुदरमंतरं कुरुते॥ अथ तस्य भयं भवति तत्त्वमसि अहं ब्रह्मास्मि
अयमात्मा ब्रह्म तदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यमित्याद्याम्नातयोहि उपक्रमो
पसंहारादिभिर्लिंगैस्तात्पर्यतः सत्यज्ञानात्मानमशनायाद्यतीतमपेतब्रह्मक्षत्रादिकं॥
सविदात्मकं निर्विशेषं ब्रह्म भेदनिंदापूर्वकं बोधयंति॥ तं च नाप्रत्यक्षादिभिर्वाधितं शक्यं

नैवरूपिधर्मलिंगोपेततयातत्परत्वे नप्रवरत्वात्॥ किंतु तत एवप्रत्यक्षादिनानित्यकांशानुपजी
वकत्वात्॥ श्रुक्तिस्थानवत्यश्चाज्ञातत्वात्स्व प्रमेयबोधने प्रत्यक्षानुपजीव्यस्वप्रकाशत्वेनम
विषयत्वात्॥ अनुमानापेक्षायाप्रत्यक्षवत् अव्यवहितवस्तुविषयत्वाच्च प्रत्यक्षादि
कंबाधित्वातात्त्विकांशात्प्रच्याव्य व्यावहारिकांशे व्यवस्थापयतीति ननु भवतादृशे आत्मनिक
र्त्रादिप्रपंचस्य परमार्थतोऽसंभवेन सोऽध्यस्त एव॥ न च स्वप्रकाशस्याज्ञानविषयत्वाभावे
नाधिष्ठानत्वायोगादध्यस्तत्वानुपपत्तिः॥ लोके घटमहं न जानामीति अज्ञानविशेषणता
तयाभासमानस्यैव तद्विषयत्वदर्शनात्॥ स्वरूपचैतन्यस्य मामहं न जानामिति अज्ञानविशे
षणतयाभासमानस्यैवतद्विषयत्वदर्शनात्॥ स्वरूपचैतन्यस्य मामहं न जानामीत्यज्ञान
साधकतया सिद्धस्य तद्विरोधित्वाद्वृत्त्यारूढस्यैव तस्य तद्विरोधित्वात्॥ आत्मन्यारोपितानां
सभेदसत्त्वात् साक्ष्यादेश्चात्मनि ब्रह्मरूपाध्यारोपे सविदनित्यत्वाध्यारोपे वा दर्शनात्॥

स्वप्रकाशत्वन्वस्वयमेवस्वस्मिन् प्रमाणत्वेन तन्निष्ठाविद्यायाः प्रमाणदोषस्य सत्वाद्वनत
श्वकर्तृत्वप्रसक्तत्वेन॥ अनात्मत्वादात्मनश्च कर्तृत्वादिसाक्षिणोत्र लक्षेवाधाभावात्॥ ब्र
ह्मात्मैक्यं विषयः संभवतीति॥ एवंच कर्तृत्वादेरनर्थस्यात्मन्यारोपितस्य समूलस्य निवृ
त्तिः प्रयोजनमपि संभवतीत्याह॥ यस्मिन्दृष्ट इति॥ यस्मिंस्तदानंदविग्र काशीपरि
पूर्णविश्वेश्वरे सांबादिसिद्धे निरंतरानुष्ठितश्रवणमनननिदिध्यासनैः सम्यक्सा
क्षात्कृते तत्संसृतिचक्रं समहं नश्यति लीयते॥ तं हरिं डे इति संबंधः॥ अत्रेउभयत्र
श्रुतिः यत्रहि द्वैतमिवभवति॥ तदितर इतरं पश्यति यत्रत्वस्य सर्वमात्मैवाभूत्तत्केनकं
पश्येदित्यादि॥ तत्र अहंकारादिप्रपंचमूलाज्ञानस्यापि निवृत्तिर्न संभवति तस्यानन्पमु
वान॰ त्वेनैवस्वस्याध्यासे आत्मश्रयात्॰ अज्ञानांतरांगिकारेवानवस्थापत्तेः लोके

अनध्यस्तस्य घटादेर्ज्ञानादिनिवृत्त्यदर्शनात् ॥ किंचभावरूपाज्ञानस्यानादिनोनिवृत्तिर्न
मं भवति। अनादिभावस्यात्मवनित्यत्वनियमात् ॥ परमात्मनिष्ठ्णमतायाश्चानादि
त्वस्योभयवादिमतेः संप्रतिपत्तेः। किंचकिंअज्ञाननिवृत्तिः सतिउतासतीउतसदस
ती सदसद्विलक्षणा वा ॥ आद्ये आत्मनोभिन्नाउताभिन्नाभिन्नाभिन्नाभिन्नाभिन्न
विलक्षणा वा ॥ नाद्यः द्वैतापत्तेः नद्वितीयः आत्मनोनादित्वेन अविद्यानिवृत्तेर्ज्ञान
साध्यत्वाउपपत्तेः ॥ नापितृतीयः विरोधात् ॥ अतएवनचतुर्थोपि भिन्नाभिन्नत्वव्यति
रेकैकप्रकारान्तराभावात् ॥ नचप्रथमद्वितीयः। असत्वे शशशृंगतुल्यायास्तस्याः सा
ध्यनातुपपत्तेः उभयपार्थ्याभावप्रसंगाच्च ॥ नापितृतीयः विरोधात् ॥ उक्तपक्षद्वयदू
षणायतेश्च नचतुर्थोपि सदसद्विलक्षणात्वेनतस्याः अज्ञानावस्थानप्रसंगात् ॥ अ

निर्वचनीयाज्ञाननिवृत्तेरनिर्वचनीयत्वानुपपत्तेश्च न हि घटनिवृत्तिघटो भवति॥ न
ननश्च सर्वथाप्यनुपपत्तेर्नाज्ञानस्यानिवृत्तिसंभवतीत्याशंक्य न तावदज्ञानस्य कल्पकाभा
वेनाकल्पितनयाज्ञाननिवृत्त्यसंभवतीत्याशंक्य न तावदज्ञानस्य कल्पकाभावेनाकल्पि
ततयाज्ञाननिवृत्त्यसंभवः दीपादिवत्तस्य स्वपरनिर्वाहकत्वात्तस्य स्वप्रकाशे आत्मनि
वस्तुतोऽसंभवे न कल्पितत्वस्यैववस्तुत्वविततत्वात् अनृतेन हि प्रत्यूढाः इमे सत्याः कामा
अनृतापिधानाः॥ नासदासिदित्यादिश्रुतेश्च। नाप्यनादिभावत्वेन तस्यानिवृत्त्यनु
पपत्तिः॥ अनादिभावस्यापि निवृत्तिरिति सामान्यव्याप्तेः। ज्ञानेनाज्ञाननाश इत्यनुभवसि
द्धविशेषणव्याप्तिविरोधेन तरति॥ शोकमात्मवित् भूयश्चांते विश्वमायानिवृत्तिः नि
चायतं मृत्युमुखात्प्रमुच्यते ते ब्रह्मलोके तु परान्तकाले इत्यादिश्रुत्या ज्ञानेन तज्जनदज्ञानं

येषांताश्रितमात्मनः मामेवयेप्रपद्यंतेमायामेतांतरंतिते ॥ अहमज्ञानजंतमोनाशया
मित्तस्थोविद्याविततोऽदीप्यस्मिल्लिवेशिनेयोगीमायाममेयायतस्मैज्ञानात्मनेन
मः ॥ इत्यादिस्मृत्यात्र ॥ अज्ञानव्यतिरिक्तस्थले संकोचस्यबोधितत्वात् ॥ तस्मात्स्मा रुपात्वादि
भिभावत्वान्नभिगीकारात् ॥ अभावविलक्षणात्स्वमात्रेणाभावत्वव्यपदेशोऽत्रैवाभिप्रे
त्याज्ञाननिवृत्तिःस्वरूपाआत्माभिव्यावेस्याह ॥ संसारध्वांतविनाशहरिमितिसंसारस्य
कर्तृत्वादिरूपस्यकारणम् यत्ध्वांतंअज्ञानंतस्यविनाशंनिवृत्तिरूपंहरिस्त्वात्
ठसत्अज्ञानविरोधित्वेनसिद्धमित्यर्थः ॥ नन्वात्माभिव्यायाअज्ञाननिवृत्तेर्ज्ञानसाध्यत्वा
नुपपत्तिः ॥ यस्मिन्सतियस्याग्रिमक्षणसंबंधः असतियस्मिन्नस्याभावः तत्तत्साध्य
मितिसाध्यलक्षणस्यज्ञानेसतिअज्ञाननिवृत्तिरूपात्मनः । अग्रिमक्षणसंबंधः

ज्ञानाभावे अज्ञाननिवृत्त्यभावो ज्ञानमिति अज्ञाननिवृत्तिर्न पाल्यमपि सम्भोपन्नेभि
न्नसमानकयोर्भावाभावयोर्विरोधाभावात् ॥ निमित्तानामपि अज्ञाननिवृत्तौ साध
नत्वं मावाप्तृक्तपत्रकृत् १५ नेष्वप्रपंचोपशमं शिवमित्यादिश्रुत्यानस्यानाभेदसि
द्धेश्च ॥ सर्वथाप्यज्ञाननिवृत्तिरूपप्रयोजनसंभवेन शास्त्रारंभो युज्यत इति भावः इदे
क्तोमित्यर्थः ॥ १ ॥ ननु ब्रह्म स्वस्मादन्यन्जगदारभते उत ब्रह्मैव जगज्जायते नाद्यः द्वै
तापत्तेः एकस्य निरवयवस्यारंभकत्वानुपपत्तेश्च ॥ द्वितीये तु ब्रह्म सर्वात्मना जगदा
कारं भवति ॥ एकदेशेन वा ॥ नाद्यः उक्तानां प्राप्यत्वाभावप्रसंगात् ॥ नित्यं परं ब्रह्म
ता एव मुक्तप्राप्यत्वात् ॥ न द्वितीयः ॥ ब्रह्मणो निरवयवत्वात् तस्मादवयवत्वे वा नित्यत्व
प्रसंगात् ॥ निष्कलमित्यादिश्रुतिविरोधाच्चेत्याशंक्य निरस्येष्वं शमारोप्यकृतो शोवेति

एकृतिः मज्जापयोत्तरं भूतेष्वकृतिः श्रोतृहितैषिणि इत्यादिन्यायेनोत्तरमाह। यस्येति॥ यस्यै
कांशादित्थमशेषंजगदेतत्प्रादुर्भूतंयेनपिनद्धंपुनरित्थंयेनव्याप्तंयेनविबुद्धंसुखदुः
खैः तंसंसारध्वान्तविनाशंहरिमीडे॥ २ ॥ यस्यपरमात्मनः एकांशात् एकदेशात्तु
ल्यात् मायावच्छिन्नात्॥ इत्थंभोक्तृभोग्याकारेण एतदनुभूयमानंजगत् प्रादुर्भूतंउत्प
न्नमित्यर्थः॥ ब्रह्मणोवस्तुतोनिरवयवत्वेपिमायावच्छिन्नेन अनिर्वचनीयसत्वात् एक
देशादेवेदंजगदुत्पन्नं तथाच श्रुतिः पादोस्यविश्वाभूतानि त्रिपादस्यामृतंदिवीति॥
अस्याश्चायमर्थः॥ विश्वाभूतानि ब्रह्माद्यात्मकंसकलमिदंजगदितियावत्। अस्यब्र
ह्मणः पादः अंसइत्यर्थः॥ त्रिपात् पादत्रयंअस्यब्रह्मणः प्रपंचसंबंधरहितप्रदेशः॥
श्रीबादरायणोनापिसूत्रितः॥ विकारावर्त्तिच तथाहि स्थितिमाहेति। विकाररूपेणाव

हृ॰टि॰
९

नैमानं ब्रह्मणो भागत्रयमस्ति ॥ तथाहि स्थितिमवस्थानं ब्रह्मण आह ॥ उक्ताकृतिरिति सूत्रा
र्थः ॥ तथा व उक्तप्रकारेण ब्रह्मणो जगदाकारेणावस्थानेपि न मुक्तप्राप्यस्थलाभावशंके
ति भावः ॥ एवं जगदुत्पत्तिं परमात्मन उक्त्वा तस्य जगत्स्थितिहेतुत्वमप्याह ॥ येन पिनद्धमि
ति ॥ पुनः पश्चाद्येन परमात्मना एतज्जगत् ॥ इत्थं वर्णाश्रमादिभेदेन पिनद्धं सुदृढं ब
द्धमित्यर्थः । तथा व श्रुतिः ॥ एष सेतुर्विधरण एषां लोकानामसंभेदायेति ॥ अस्याप्यय
मर्थः । एष सर्वा एषमतनजइत्युपक्रम्य सर्ववशित्वेन सर्वेश्वरत्वेन च उक्तः प्रकृतः पर
मात्मा सेतुरिव सेतुः सेतुसाम्यमेवाह एषां लोकानां भूरादिभेदेन देवमनुष्यतिर्यगा
दिभेदेन वर्णाश्रमादिभेदेन च भिन्नानां भुवनानां प्राणिनां चासंभेदयाऽसांकर्य
य विधरण ॥ विधारयिता यथा लौकिकसेतुः क्षेत्रसंपन्नानां तत्रत्याजलानां वासांक

शेजु॰
९

र्पाय विश्वरूपिणानन्तहृदिति ॥ येन व्याप्तमिति ॥ येनवाधिष्ठानभूतेन सर्वंजगदकाशेने
व व्याप्तं अंतर्वहिः स्थितमित्यर्थः ॥ तथा च श्रुतिः । यच्च किंचिजगत्सर्वं दृश्यते श्रूयतेपि वा
अंतर्वहिश्च तत्सर्वं व्याप्य नारायणः स्थित इति सर्वव्यापकत्वे हेतुः ॥ नारायण इति नरा
त्पुरुषात् उत्पन्नानि सर्वाणि जगंति नाराणि तेषां अयनं अधिष्ठानमित्यर्थः ॥ अनन्त
स्पष्टं । ननु ब्रह्मणो जगत्कारणत्वं न युज्यते वैषम्यनैर्घृण्यप्रसंगात् ॥ कांश्चित्सुखिनो
देवादीन् कांश्चिन् दुःखिनस्तिर्यगादीन् कांश्चिदुभयवतो मनुष्यान् ॥ सृजतो ईश्वरे
विषमं स्यात् ॥ तथा प्रलयकाले अविशेषेण सर्वान् जीवान् उपसंहरत् ॥ निर्घृणत्व
स्यादित्याशंक्येन स्वानुष्ठितकर्मापेक्षिपवैरूप्यस्वरस्य सृष्ट्यादेप्रवृत्तेन वैषम्याद्याप
त्तिरित्यभिप्रेत्याह ॥ येन क्लिष्टमिति ॥ उक्तं दुःखैः उक्तं पुत्रदारादिलाभादिजन्या

हि.टी.
१०

सत्वपरिणामरूपानुकूलचित्तवृत्तिः॥ऽः एवं रागादिजन्या रजोविकाररूपाप्रतिकूल
चित्तवृत्तिः तदुभयविशिष्टं सकलं जगत्॥ येन स्वप्रकाशचिद्रूपेण परमात्मना विश्व
वं प्रकाशितमित्यर्थः॥ अत्र श्रुतिः॥ तस्य भासा सर्वमिदं विभातीति॥ तस्य सू
र्याद्यविषयस्य ब्रह्मणः। भासा स्वरूपचैतन्येनेत्यर्थः॥ अयं भावः। एष ह्येव सा
धु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते एष एवासाधु कर्म कारयति तं यमधो नि
नीषते॥ एभ्यो लोकेभ्यः॥ नरकतिर्यगादिलोकेभ्य उन्निनीषते ऊर्ध्वगन्धर्वाद्युत्त
मानां पदं नेतुमिच्छति॥ अधस्तिर्यगादिस्थावरान्तं नेतुमिच्छतीति श्रुत्या हि जन्मा
न्तरानुष्ठितकर्मापेक्षयानन्तफलप्रदातृत्वं बोध्यते॥ नच उरूपपापे च स्वेच्छया प्रवर्तय
त ईश्वरस्य उतनश्च वैषम्याद्यापत्तिरिति वाच्यं॥ पूर्वपूर्वकर्मापेक्षयोन्नेतरस्मिन्

शांभ.
१०

प्रवर्तयन्तस्तदायस्य भावात्संसारस्यवानादित्वात्तत्कारेणव तस्य वैषम्याद्यभावः सू
त्रितः वैषम्ये नैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयति ॥ नकर्माविभागादिति चेन्नानादित्वा
त् ॥ ईश्वरस्य वैषम्यनैर्घृण्ये न संभवतः सृष्ट्यादिप्राणिकर्मापेक्षत्वात् ॥ तथा हि दर्श
येवेत्युक्ता श्रुति दर्शयतीति प्रथमसूत्रार्थः ननु सृष्टेः पूर्वं कर्म नास्ति तदविभागोस्त
वप्पि ब्रह्ममात्रत्वादिति चेन्न ॥ संसारस्यानादित्वात्सूक्ष्मतया प्रलयेस्थितिसंभवाच्चेति
द्वितीयसूत्रार्थः ॥ तथाच ॥ ब्रह्मणो जगत्कारणत्वेन कोपि दोष इति ॥ २ ॥ ननु सुख
दुःखमोहात्मकस्य विषयादिप्रपंचस्य जडस्य सुखदुःखमोहात्मकं सत्त्वरजस्तमोगुणा
त्मकं जडं प्रधानमेव कारणमनुमीयते चिन्मात्रस्य तु ब्रह्मणः नादृशजगत्कारणत्वानु
पपत्तेः कार्यकारणयोर्वैलक्षण्यानुपपत्तेः ॥ अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजा

हरि·टी
११

जनयंती सरूपा इति श्रुतेः। अजां अजन्मां लोहितशुक्लकृष्णां रजःसत्त्वतमोरूपां स्वसमा
नरूपा बह्वीः प्रजाः प्रकर्षेण जायन्त इति प्रजा विषयादिप्रपंचस्ता इत्यर्थः ।। इत्याशंक्याह =
सर्वज्ञो यो यश्च हि सर्वः सकलो यो यश्चानंदोनंतगुणो यो गुणधामा यश्चाव्यक्तो व्य
स्तसमस्तसदसद्यस्तं संसारध्वांतविनाशं हरिमीडे ।। ३ ।। यः सर्वज्ञ अत्र श्रुतिः यः
सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः ।। न तु जीवानामिव कृत्स्नं जायणादिरूपमिति
श्रुतेरर्थः ।। प्रधानस्य जडत्वेन विविधकर्मफलरूपविविधविन्यासदेहादिप्रपंच
रचनानुपपत्तेः किंबहुत्वादेर्वास्य स्यगणादिधर्मत्वासिद्धेरनंतरस्यैवश्रुतीतेः। अचेतनस्य
स्वतो लोके प्रवृत्त्यदर्शनादजामित्यादिमंत्रस्य लोहितशुक्लकृष्णगुणवत्तेजोबन्नकारणप
रमात्मात्मकताव्याकृतविषयत्वान्न प्रधानं जगत्कारणं वादरायणेनापि ।। इक्षतेर्नाशब्दं स्व

शंभु·
११

नानुपपत्तेश्च नानुमानमिति सूत्रादिना प्रधानस्य जगत्कारणत्वं प्रत्यषेधि तदैक्षत बहुस्यां
प्रजायेयेति श्रुत्या जगत्कारणस्य सतः॥ ईक्षतेरीक्षितृत्वस्य श्रवणादशब्दमशब्दाग
म्यं अनुमानगम्यं प्रधानं न कारणमिति प्रथमसूत्रार्थः॥ अनुमीयत इत्यनुमानं प्रधानं कार
णं न भवति तस्य जडत्वेन एव नानुपपत्ते देहादिषु पंचकर्तृत्वानुपपत्तेरिति द्वितीयसूत्रार्थः
श्रुतिसिद्धसर्वज्ञस्य तु ब्रह्मणस्तत्संभवतीति भावः॥ यदुक्तं विलक्षणयोर्न कार्यका
रणत्वेति तन्न जडऊर्णनाभेस्तंतोर्गोमयाद्वृश्चिकादेः पुरुषात्केशलोमादेश्च दर्शनादित्य
भिप्रेत्याह॥ यश्च हि सर्वशक्ति॥ सर्वत्वविशिष्टब्रह्मण इदं सर्वं यदयमात्मा इत्यादिश्रुतेर्घटः
सन्घटः स्फुरतीति सर्वस्य प्रपंचस्य सत्वेन स्फुरणत्वेन च ब्रह्मसालक्षण्यात्तु भवो न॥ यथो
र्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः संभवंति यथा सतः पुरुषात्केशलोमा

ह॰टि॰
१२

नित्याक्षरात्संभवतीह विश्वंइत्यादिश्रुत्या॥ विलक्षणकारणत्वे दृष्टांतप्रदर्शनाच्चेति
भावः॥ नन्वचेतनस्य प्रधानस्य स्वतः सृष्ट्यादिप्रवृत्त्यसंभवेपि ईश्वराधिष्ठितस्यत
स्य प्रवृत्त्याकारणत्वं भवतीति योगानां सेश्वरसांख्यानां वा मतमाशंक्याह॥ सकलोप
इति॥ सकलप्रकृतिरधिष्ठाता च स एवेत्यर्थः॥ सोकामयत बहु स्यां प्रजायेयेति स्व
स्यैव बहुभवनकामनादर्शनात्तदात्मानं स्वयमकुरुतेति स्वात्मनः जगद्रूपेणाकर
णत्वश्रवणात्कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीत्येनाश्रुतं श्रुतं भव
तीति स्वस्यैव बहुभवनकामनादर्शना·आत्मनि खल्वरे दृष्टे इदं सर्वं विज्ञातं भवतीत्या
दिश्रुतेरेकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया॥ प्रकृत्यधिष्ठातृभेदे प्रकृतिज्ञाने नाधि
ष्ठातृज्ञानासंभवेनउपरोधप्रसंगात्॥ श्रुतिसिद्धप्रकृत्यधिष्ठातृरूपस्येश्वरस्यत

शां॰भा॰
१२

ष्ठत्वमात्रत्वस्य लोकदृष्टसामान्यप्रसाधकेनानुमानेन क्षित्यसंभवाद्ब्रह्म एव प्रकृ
तिरधिष्ठानात्तु ब्रह्मकारेपि ॥ प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥ साक्षाच्चोभया
म्नानात् ॥ आत्मकृतेः परिणामात् ॥ पत्युरसामंजस्यात् ॥ ईश्वरस्य प्रकृत्यधिष्ठा
तृत्वरूपत्वं निमित्तमात्रेश्वरस्याभावं वाह सूत्राणामयमर्थः। प्रकृतिरुपादानं च का
रणमधिष्ठाता चेश्वर एवेति प्रतिज्ञादृष्टान्तयोरनुपरोधात् ॥ एकविज्ञानेन सर्वविज्ञा
नप्रतिज्ञायाः यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यादिति प्रकृतिविष
यदृष्टान्तस्य चानुपरोधादुपपत्तेरिति साक्षाच्छ्रवणेन एव बहु स्यां प्रजायेयेत्युभयाम्ना
नात् ॥ प्रकृतित्वस्याधिष्ठातृत्वस्य चाम्नानादिति ॥ आत्मकृतेः तदात्मानं स्वयमकु
रुतेति ॥ आत्मन एव जगदाकारेण कारणत्वश्रवणात् कथं कर्तृत्वेन पूर्वसिद्धस्याक्रि

यमायान्तं नुत्राह ॥ यदि त्वामादीति ॥ एवं सिद्धस्याविकारात्मनात्मनः परिणामयितृत्वा
त् ॥ यत्तु निमित्तमात्रमीश्वरस्यासामञ्जस्यादनुपपन्नमिति लोकदृष्टसामान्येनानुमित
स्य लोकवद्वेषरागद्वेषादिप्रसक्त्याईश्वरत्वानुपपत्तिरिति ॥ नन्वनीश्वरेश्वराधिष्ठितं प्रधान
मपि कारणमिति भावः । ननु स्वप्रयोजनरहिते जगत्सर्जनादौ प्रवृत्तस्येश्वरस्योन्म
त्तवत्प्रेक्षाकारित्वाभावप्रसंगात्स्वप्रयोजनोद्देशेन च प्रवृत्तस्य नित्यतृप्तत्वव्याहते
श्च नेश्वरो जगत्स्रष्टेत्याशंक्याह ॥ यश्चानंद इति ॥ निरंतरभासमानानवच्छिन्नप
रमानंदस्वरूपज्ञानं दो ब्रह्म विज्ञानमानंदं ब्रह्म एतस्यैवानंदस्यान्यानि भूतानि मा
त्रामुपजीवंतीत्यादिश्रुतेराप्तकामस्येश्वरस्याप्राप्तव्यवस्त्वभावात्तन्निमित्तप्रवृत्त्यहा
निरित्यर्थः ॥ लोके सार्वभौमादेः प्रेक्षाकारिणः प्रयोजनोद्देशं विनापि मृगयादौ प्रवृत्त

स्योन्मत्तस्यादर्शनात्स्वाभाविकमात्रेरोधे न जगत्सर्जनादौ प्रवृत्तेरीश्वरस्य भावत्वात्स्वभा
वेव पर्यन्तयोगाभावान्नोन्मत्त ईश्वरः वादरायणोपि।। न प्रयोजनवत्त्वादिति।। अने
नसूत्रेण प्रवृत्तेश्च लोके प्रयोजनवत्त्वादीश्वरस्य वतदभावात्।। न समष्ट्येत्याशं
क्यालोकवत्तु लीलाकैवल्यमित्यनेन लोके प्रयोजनवत्त्वादीश्वरस्य चतदभावात्
न समष्ट्येत्याशंक्य लोकवत्तु लीलाकैवल्यमित्यनेन लोके राजादिवदेवेश्वरस्यापि
लीलायाः जगत्सर्जनादिरूपायाः कैवल्यं प्रयोजनराहित्यमुपपद्यत इति समादधी
नस्यादीश्वरः स्वहैवेति भावः। ननु लोके कुलालादेस्वकुःशशरीरस्य प्राक्स्यघटादि
प्रयोजनपरिज्ञानिनः।। वास्यमद्दाश्रुपसंहारपूर्वकमेव सर्जने प्रवृत्तिदर्शनात्त्वल
लाश्च निर्विकल्पस्याशरीरस्यानएवासमेर्थस्य समष्टिप्रयोजनापरिज्ञानिनः।। स्व

व्यतिरिक्तोपसर्थाभावेन वाह्यसाधनरहितस्य कथं स्वतंत्रत्वमित्याशंक्याह॥ अनंतगुण
रिति॥ अनंता असंख्याताः सर्वशक्तित्वसर्वज्ञत्वादयो गुणा धर्मा यस्य सः। तत्र हेतुमाह॥ गु
णधामेति॥ शुद्धसत्त्वस्वरूपा मायागुणधामगृहं उपाधिर्यस्य स इत्यर्थः॥ वाह्यसाध
नाभावेपि क्षीरादेर्दध्यादिहेतुत्वदर्शनात्॥ देवानां योगिनां च वाह्यसाधनं विनापुरा
णासैयोगमहिम्ना सर्गादिदर्शनादस्माकं व शरीरं नरं विनापि शरीराधिष्ठानत्व
दर्शनात् परास्य शक्तिर्विविधैव श्रूयते मायांतु प्रकृतिं विद्यान्मायिनंतु महेश्वरमि
त्यादावीश्वरस्य सर्वसाधनपरीयस्याः मायाशक्तेः श्रवणात् सूत्रकारेणाउपसंहार
दर्शनान्नेति चेन्न॥ क्षीरवद्धि देवादिवदपि लोके तद्धर्मोपपत्तेश्चेति सूत्रैः॥ कुला
लादेः सदण्डोपसंहारदर्शनादीश्वरस्य च वाह्यसाधनोपसंहाराभावान्नदोषहेमा

शंकवास्यसाधनाभावेपिक्षीरस्यदधिहेतुत्ववत्लोकेदेवादिवच्चप्रपंचहेतुत्वोपपत्ते
र्मायावशादेवसर्वेषांसर्वकर्तृत्वादिधर्माणांमुपपत्तेश्चनकोपिदोषइतिसमाधा
नाश्चाशरीरस्यापितस्यमायागुणवशादेवसर्वमुपपद्यतइतिभावः॥ननुतर्हिब्रह्मि
ड्मायावीवकिमितिनगृह्यतइत्याशंक्याह॥यश्चाव्यक्तइति॥अनिंद्रियमग्राह्य
इत्यर्थः।अचिंत्यमव्यक्तमित्यादिश्रुतेःअशब्दमस्पर्शमरूपमव्ययंतथारसंनित्य
मगंधवच्चयदित्यादिश्रुत्यावरूपाद्यभावान्नेंद्रियग्राह्यःकिंतुमनसैकगम्यइति
भावः।ननुब्रह्मणएवसकलजगदाकारत्वेभोक्तृभोग्यविभागोनस्यात्सर्वस्यापिब्रह्म
कारणकत्वाविशेषादित्याशंक्याह॥पृत्तसमस्तइतिव्यस्तोभोक्तृभोग्यरूपेणावि
भक्तोयःसमस्तः।प्रपंचस्तद्रूपइत्यर्थः॥लोकेयथासमुद्रादेरेकस्यैवफेननरं

गत्ततुद्रूपेण विभक्तोनेककार्यहेतुत्वं न त्वेकस्यापि ब्रह्मणः विभक्तानेककार्य्यहेतु
त्वं संभवति ॥ अत्र सूत्रं ॥ भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवदिति ॥ अस्यायमर्थ
भोक्तृभोग्यत्वापत्तेर्भोग्यस्य च भोक्तृत्वापत्तेरविभागः विभागाभागः स्यादिति चेन्न वक्ष
लोकवत्समुद्रवत् विभागोपपत्तेरिति ननश्च ब्रह्मैव सर्वकारणमिति भावः ॥ ब्रह्मण
एव सत्यानन्तभोग्यरूपेणावस्थानमाह· सदसद्य इति ॥ सत्तंसंअसत्· असतं
सत्वं वा नृतं च सत्समभवदिति श्रुतेः ॥ एकं सत्पदं ब्रह्म परं अपरं व्यावहारिकं स
त्यं वियदादिपं अनन्तं भुक्तिजनादि ॥ ३ ॥ ननु कार्य्यस्य न्यूनपरिमाणद्रव्यार
ब्धं कार्य्यत्वात्पटादिवदित्यनुमानात्सर्वस्य कार्य्यस्य न्यूनपरिमाणद्रव्यारब्धत्वनि
यमात्परं परस्यापरमाणव एव जगदुपादानं न तु ब्रह्मणस्य विभुत्वादित्याशंक्याह· ॥ ॥

यस्मादन्यन्नास्त्यपि नैवं परमार्थं दृश्यादन्यो निर्विषयज्ञानमयत्वात्॥ ज्ञातृज्ञानज्ञे
यविहीनोपि सदाज्ञस्तं संसारध्वांतविनाशं हरिमीडे॥ ४ ॥ यस्मात्सच्चिदानंदस्वरू
पाद्विष्णोरन्यत्परमाण्वादि नास्ति एकमेवाद्वितीयं॥ यस्मात्परं नापरमस्ति किंचिदि
त्यादिश्रुतेरित्यर्थः॥ अनुमानस्य दीर्घविकल्पनश्चौ मरुध्यारध्वरज्वाप्यभिवा तदा
गमबाधितत्वाच्चेति भावः॥ ब्रह्म परमार्थतो जगदाकारेण परिणमत इति भास्क
रमतमाशंक्य निराकरोति॥ अपि नैवं परमार्थमिति॥ एवं वियदादिजगदाकारे
णावस्थानेन परमार्थं न वास्तवमित्यर्थः॥ निष्कलं निष्क्रियमित्यादिश्रुत्या निरव
यवब्रह्मणोंशतो जगद्रूपपरिणामानुपपत्तेः सर्वात्मनाव परिणामे ब्रह्माभावप्रसं
गात्पुनः प्रलयकाले सच्चिदानंदकालेन परिणामेव ब्रह्मणो नित्यत्वप्रसंगात्सृजा

हरि.७
१६

देश्चसावयवत्वेनाशत्मनः॥ फेनादिपरिणामेप्यवस्थितिसंभवाद्यन्नब्रह्मणोजगदाका
रेणावस्थानंवास्तवं।सूत्रकारोपिकृत्स्नप्रसक्तिनिरवयत्वशब्दकोपोवेतिपरिणामवाद
मङ्ङ्घदूस्यहोर्थः।तदनन्यत्वमारंभणशब्दादिभ्यइतिविवर्त्तवादंचांगीचकार॥त
दनन्यत्वंपरमार्थतःप्रपंचस्यनव्यतिरेकेणाभावएवआरंभणशब्दादिभ्यः॥वाचा
रंभणंविकारोनामधेयमित्यादिश्रुतिभ्यइति॥तस्यार्थः।ततोजगतोमिथ्यात्वा
न्नजगत्कारणत्वंब्रह्मणोवास्तवमितिभाव॥ननुसर्वैःपरिदृश्यमानस्यजगतःकथं
मिथ्यात्वंदृश्यत्वादेवशुक्तिरूप्यादिवज्जगतोमिथ्यात्वमितिचेन्नहिब्रह्मणोपिदृश्यत्वा
न्मिथ्यात्वापत्तिरित्याशंक्याह॥दृश्यादस इति॥दृश्याश्चैतस्याविषयादसोयोविभु
रितिशेषः अदृष्टोद्रष्टेत्यादिश्रुतेरित्यर्थः दृश्यादन्यत्वेहेतुमाह॥निर्विषज्ञानमयत्वा

शंभु.
१६

दिति विषयानपेक्षविज्ञानस्वभावत्वादित्यर्थः॥ विज्ञानघन इत्यादिश्रुतेः कूटस्थज्ञान
मात्ररूपस्य कथं सर्वज्ञत्वमित्याशंक्याह॥ ज्ञातृज्ञानेत्यादिना॥ ज्ञातृज्ञानज्ञेयवि
हीनोपि ज्ञाता ज्ञानाश्रयः ज्ञानमविद्याया अंतःकरणस्य वा परिणामविशेषः ज्ञेयं विषय
दादिवकल्पनरहितोपि। अविद्याद्युपहितः सन्सदा ज्ञः ज्ञाता सर्ववेत्ति वेद्यं न च तस्यास्ति
वेत्तेत्यादिश्रुतेरित्यर्थः। तस्माज्जगतो मिथ्यात्वाद्ब्रह्मणो जगत्कारणत्वमवास्तवं तट
स्थं तदुपलक्षणं न तु विशेषणमिति सिद्धं॥ ४ ॥ एवं केवलतार्किकानवग्राह्यं श्रौ
तं जगत्कारणं विमृश्योक्त्वा इदानीं भक्त्यादिसाधनसंपत्त्यै गुरुशुश्रुषापरायणैरेवाव
गम्यं तत्वं स्तोतुमारभते॥ आचार्य्यभ्योल्लब्धसूक्ष्मासुमतत्वा वैराग्येणाभ्यासबला
द्वैवदृष्ट्याभक्त्यैकाग्र्यध्यानपरपर्यं विऽरीशांतं संसारध्वांतविनाशं हरिमीडे॥ ५॥

हरि.ट
१७

यमीशं किं साक्षादनुभवंति तमिति संबंधः कीदृशाऽधिकारिणो विदुस्तत्राह ॥
आचार्येभ्य इति ॥ करतलामलकवत्सम्यक्प्रत्यक्षीकृतब्रह्मतत्त्वेभ्यः सर्वकर्मसं
न्यासेन समिदाद्युपहारपूर्वकं विधिवत्तैरुपसन्नेभ्यः शांतेभ्यः केवलं शिष्यानुकं
पयैव न तो धनेभ्योऽर्थिभ्यः सकाशाल्लब्धं प्रथमत्तातं तु सूक्ष्मं अश्रुतस्य श्रुतिर
हितस्य कृत्स्नस्यापि तस्य श्रीविष्णोस्तत्त्वं ये तेलब्धस्तु सूक्ष्मास्तु ततत्वा आचार्यवा
न्पुरुषो वेद तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं नेषा
तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठेत्यादिश्रुतेः ॥ हे प्रेष्ठ नचिके
तः ॥ एषा तु सद्विषया मतिस्तर्केण शुष्कतर्केणाल्पप्रमाणरहितेन नापनेया प्रा
पणीया न भवति ॥ किं तु अन्येन सर्वज्ञेन गुरुणा प्रोक्ता प्रवचनेनोक्तिदृष्टांतपूर्व

शं.भ.
१७

कडक्ताउपदिष्टामतिभ्र ज्ञानाय सम्यक्ब्रह्मविषया विद्याविद्यानिवृत्तये भवतीति
कठ·क्कमेरर्थः। तद्विद्धि प्रणिपातेनेत्यादिस्मृतेस्त्व प्रथमज्ञानेन साकल्येनासंभाव
नान्निम्नत्वसंभवपक्षे साधनान्तरमप्याह॥ वैराग्यरोत्यादिना·। वैराग्येण विषयदोष
विवेकेनोत्पन्नेन ब्रह्मलोकतृणीकारो वैराग्यस्यावधिर्मत इत्युक्तपराकाष्ठामा
पन्नेन विषयविक्षेपरहितक्तमो निरंतरं योभ्यासः श्रवणानुवृत्तिस्तेन यद्बलं मननं ते
नवनाल्येन निष्ठासेदित्यच्चनथैव व्याख्याताताभ्यांऽच्छिन्नाश्रुऽच्छया भक्त्या अहं ब्रह्मा
स्मित्येकत्वेन या भक्तिर्भजनं तया एकाग्र्यान पराः प्रत्यगभिन्नब्रह्मैक्यविषयध्या
न निष्ठाः संतोयं क्रिऽरित्यर्थः॥ नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन
यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वामायमात्मा बलहीनेन ल

भ्यस्ततस्तु तं पश्यति निष्कलं ध्यायमानः॥ इति मुंडकश्रुतेः॥ प्रवचनमध्यायनं मेधाग्रं
थार्थधारणासामर्थ्यं श्रुतमात्मविषयं बहुधा विवक्षितं एतैर्न लभ्यः किंतु एष
साधकोयं परमात्मानमेव श्रमणादिभिर्निरंतरं प्रार्थयते तेनायमात्मा लभ्यस्त
स्यैष आत्मा स्वां तनुं सच्चिदानंदात्मिकां विवृणुते प्रकाशयतीत्यर्थः बलहीने
न तद्विषयं मननमकुर्वाणेनेत्यर्थः॥ निष्कलं निरवयवं परमात्मानं निरंतरं ध्याय
मानः॥ प्रत्यक्षसंतत्वादिविषयीकुर्वन्पुरुषः॥ तत एवं ध्यानात्पश्यते ऽप्रतिबंधेन
साक्षात्करोतीत्यर्थः॥ तदुक्तं भगवतापि· अभ्यासेन तु कौंतेय वैराग्येन च गृह्यते·
भक्त्या मामाभिजानाति यावान्यश्चास्मि तत्त्वत इति॥ ५ ॥ एकाग्रध्यानपराविद्
रिपुः कं केन क्रमेण केन च प्रकारेण च तेविडरिमाकांक्षायामाह·॥ ज्ञाणानाय

मामिति चित्तं हृदि निरुध्य ध्यानान्यतस्य, त्यानन्तु नरवैवविलाप्य क्षीणेचीत्ते भाइशीरस्मिन्निवि

दुर्ष्यं तं स संसारध्वान्तविनाशं हरिमीडे ॥ ६ ॥ प्राणान्वागादीन्द्रियाणि आयम्य उपरमेत्

त्यानन्तरमोमिति जपन्नेव चित्तं अन्तःकरणं हृदयाकाशे ब्रह्मणि निरुध्यानित्यस्य ओमित्या

त्मानं गुणीतओमित्येवं प्राणापनआत्मानमितिकृते ॥ आत्मानं चि त्तं गुणीतनिनिरुध्यां

दित्यर्थः ॥ ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्नित्यादिस्मृतेश्च ॥ अथवा ओमि

त्युच्चार्य ओंकारवाच्ये हृदयाकाशे चित्तं रुध्वा अन्यद्रूपरसादितस्मृत्वा ग्राममपि वि

षयस्मृतिं विषयदोषदर्शनेन हित्वा संकल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः। मन

सैवेन्द्रियग्रामं विनियम्य समंततः ॥ शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया ॥ आत्मसंस्थं

मनः कृत्वा न किंचिदपि चिन्तयेत् ॥ यतोयतो निश्चरति मनश्चंचलमस्थिरं ततस्ततो

हृदि

हरि·गी
१९

नियम्यैतदात्मन्येव वशं नयेदिति भ्वरस्यते॥ पुनः पश्चात्तु तस्मिन्नभ्यासव
शं चित्तमत्रैवत्रात्मन्येव विलाप्य विलयं प्राप्य चित्ते क्षीणे विलीने सति ध्यानव्यापारा
दुपरते सति भाडमिरक्षीरास्मीति स्वप्रकाशचिद्रूपः परमात्मास्मीति यं विष्णुं विदुरि
त्यर्थः॥ तदुक्तं भारतीतीर्थैः निर्गुणोपासनं पक्वं समाधिः स्याच्छनैस्ततः परा यः समा
धिर्निरोधाख्यः सोऽनायासेन लभ्यते॥ निरोधलाभे पुंसोऽन्तरसंगं वस्तु शिष्यते पुनः पुनर्वा
सितेऽस्मिन्वाक्याज्जायेत तत्त्वधीरिति श्रुतिश्च यच्छेद्वाङ्मनसि प्राज्ञस्तद्यच्छेत् आत्मनि
ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छांतात्मनीति अस्यायमर्थः॥ प्राज्ञो विवे
की मुमुक्षुः पुरुषः वाक् वाचं मनसि नियच्छेन्निरुंध्यात् वाग्रहणं सर्वेषामिंद्रियाणा
मुपलक्षणार्थं प्रथमं वागादींद्रियव्यापारं विहाय मनोमात्रव्यापारेणावतिष्ठेतेत्यर्थः॥

शं·भु·
१९

तन्मनः ज्ञानआत्मनि देहेंद्रियादिव्यापारसाक्षिणि चित्प्रकाशे आत्मनि नियच्छेत्। मन
आदिबाह्यवृत्तिं विहाय तत्साक्षित्वेन तन्मयएव आत्मवृत्तिं कुर्य्यादित्यर्थः॥ तदुक्तमाचा
र्यैः। समानंदस्वरूपं धीसाक्षिणं ज्ञानविग्रहं। चिंतयात्मतया नित्यं त्यक्त्वा देहादिगां
धियमिति॥ ज्ञानं मनं तज्ज्ञादिसाक्षित्वेन तं च महति देशकालादिपरिच्छेदशून्ये आत्म
नि ब्रह्मणि नियच्छेत् निरस्यादेकीकुर्य्यादित्यर्थः॥ तं तं महान्तमात्मानं साक्षित्वब्रह्म
त्वविकल्पत्यागपूर्वकं शांते सर्वव्यापारातीते॥ अन्यत्र धर्मादन्यत्राधर्मादित्यादिना
प्रक्रांते आत्मनि यच्छेत् दहं ब्रह्मास्मीति वृत्तले खंतत्को स्वनः॥ प्रकाशमानपरिमानं
दपरिपूर्णब्रह्मात्मतयावतिष्ठतेत्यर्थः॥ तदुक्तं दर्शनादर्शने हित्वा स्वयं केवलरूपत
यातिष्ठति स तु ब्रह्मन् ब्रह्म न ब्रह्मवित्स्वयमिति पराशरेण॥ ६॥ तमेव धीरो विज्ञा

मि

हरि·टी
२०

यप्रज्ञां कुर्वीत ब्राह्मणः ॥ तं परमात्मानं विज्ञाय विशेषेण ज्ञात्वा धीरः ॥ धीमान्विषयाना
कृष्य चित्तेवा प्रज्ञां प्रत्ययसंततिं कुर्यात् ॥ अनन्याश्चिंतयंतो मां ये जनाः पर्युपासते ॥
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहं ॥ ध्यानेनात्मनि पश्यंति केचिदात्मानमात्म
ने ॥ त्यादिश्रुतिस्मृतयोपीममर्थं वदंतीत्याह ॥ यं ब्रह्माख्यं देवमनंतं परिपूर्णहृत्स्थं
भक्तैर्लभ्यमजं सूक्ष्ममतर्क्यं ॥ ध्यात्वात्मस्थं ब्रह्मविदो यं विदुरीशं ते न संसार०॥ ७ ॥
देवं स्वप्रकाशं अत्रायं पुरुषः स्वयंज्योतिरिति श्रुतेः ॥ अनंतं अंतवस्तुकृतं
यस्मात्परं नापरमिति श्रुतेः परिपूर्णं परतः ॥ सर्वेषु देशेषु कालेषु च वर्तमानं ब्रह्मै
वेदममृतं पुरस्तात्पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेण अधश्चोर्ध्वं च प्रसृतमिति श्रुते
स एवाधस्तश्च इत्यादिश्रुतेश्च ॥ अत एव ॥ त्रिविधपरिच्छेदशून्यतया ब्रह्माख्यं

शंभु·
२०

ब्रह्मेत्याख्या अभिधा यस्य तं भक्तो निरंतरं श्रवणादिना आत्मानं भजमानैर्गुरूपैर्लभ्यं प्राप
णीयं तं सर्वगतं सर्वतः प्राप्य धीरा युक्तात्मान इति श्रुतेः श्रवणादिभिर्युक्ता नियत आत्मा
चित्तं येषामित्यर्थः॥ अनंतं जन्मरहितं महानजरामादिश्रुतेः। सूक्ष्म इंद्रियाग्राह्यं सू
क्ष्मात्सूक्ष्मतरं इत्यादिश्रुतेः॥ अतर्क्यं केवलतर्कागम्यं किंतु उपनिषद्गम्यं तं त्वौपनिष
दमित्यादिश्रुतेः॥ आत्मस्थं आत्मनि कार्यकारणसंघाते जीवत्वेन प्रविश्य स्थितं॥
तदेवानुप्राविशत्॥ अनेन जीवेन आत्मनानुप्रविश्येति श्रुतेः॥ एवंभूतं विज्ञं ध्यात्वा
ब्रह्मविदो भवंति यं च हृत्स्थं सर्वप्राणिनां हृदये नयामितेयास्थितमीशं विष्णुं॥ तत्र
वक्ष्यति॥ अंगुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति ईशानो भूतभव्यस्येत्यादिना हृद
योपाधिना अंगुष्ठमात्रः पुरुषपूर्णः। मध्ये देहमध्ये आत्मनि हृदय इत्यर्थः॥ ७ ॥

एवंतावद्यज्ञादिसाधनसंपन्नैरेवावगम्यंतत्वंस्तुत्वाअधुनातत्वंपदार्थविवेकसंपन्नै
रेवावगम्यंविष्णोस्तत्त्वमुपक्रमतेमात्रातीतमिति॥ मात्रातीतंस्वात्मविकाशात्मविबो
धंज्ञेयातीतंज्ञानमयंहृद्युपलभ्यं॥भावग्राह्यानंदमनन्यंचविउर्यंतंसंसारध्वां०॥
॥ ८ ॥मीयंतेअर्थआभिरितिमात्राचक्षुरायोस्ताभ्योतीतंचक्षुराद्योमित्यर्थः॥अ
त्रश्रुतिः।नचक्षुषागृह्यतेनापिवाचानान्यैर्देवैस्तपसाकर्मणावाइति॥अन्यैर्वाचक्षु
र्भिरिंद्रियैस्तपसाकृच्छ्रचांद्रायणादिकर्मणांअग्निहोत्रादिनाचनगृह्यतेज्ञातुंन
शक्यतेरूपजात्यादिराहित्यादित्यर्थः॥नहिचक्षुरादीनाअग्रहणान॥नाल्पेवेति
नवाच्यमित्याह·स्वात्मविकाशात्मविबोधमिति॥स्वस्यप्रतीचःआत्मस्वरूपंतस्मा
द्विकाशोभिव्यक्तिर्यस्यतस्मिन्नात्मनिज्ञंतत्करणोविबोधोविशेषणाबोधोयस्यसत

थोक्तर्हि बुद्धिग्राह्यमिति प्राप्ते नेत्याह· ज्ञेयातीतमिति·॥ ज्ञेयं ज्ञानविषयं वस्तु अ
तीतवर्तमानं न हि ज्ञेयातीतं ज्ञेयं भवति अन्यदेव तद्विदितात् ॥ अप्रमेयमनादिवे
त्यादिश्रुतेः ॥ विदितात् वेदनविषयात् ।अप्रमेयप्रमाया बुद्धिवृत्ते विषयो न भ
वतीत्यर्थः ॥ अत्र हेतुमाह ॥ ज्ञानमयमिति ज्ञानस्वरूपत्वादित्यर्थः ॥ सत्यं ज्ञानम
नन्तं ब्रह्मेत्यादिश्रुतेः ॥ ननु तर्हि ज्ञेयातीतस्य कथमन्तःकरणे विशेषबोध इत्याशंक्या
ह ॥ स्वयमुपलभ्यमिति ॥ उदितुर्भोमात्मातीतस्यापि सूर्यस्य आदर्शे स्फुटं प्रतिबिंबि
तयाभानवत् ज्ञेयातीतस्यापि विलोबुद्धौ स्फुटं प्रतिबिंबिततया स्वतः स्फुरणं संभ
वति ॥ तथा च श्रुतिः ॥ मनसैवेदमाप्तव्यं एषोऽणुरात्मा चेतसा वेदितव्यः· दृश्यते त्व
ग्र्यया बुद्ध्येत्यादिना न चैषु वाक्येषु आत्मनो बुद्धिग्राह्यत्वं प्रतीयत इति वाच्यम्·॥

अत एव मनसा सह न मतेर्मतांतरं मन्वीथा न विज्ञातेर्विज्ञातारं विजानीयाः यन्मनसा न
मनुते येनाहुर्मनो मतमित्यादिश्रुतिविरोधप्रसंगा॥ कस्तर्हि श्रुतिद्वयस्य परस्परावि
रोधार्थ इति चेत्॥ अत्र मनसैवेदमाप्तव्यमित्यादेरात्मनो वृत्तिव्याप्यत्वं विवक्षितं।
अप्रमेयमित्यादिश्रुतिना फलव्याप्यत्वं निषिध्यते॥ आत्मनो वृत्तिव्याप्यत्वं नाम अंत
करणवृत्तौ प्रतिबिंबितया स्वत एव स्फुटं भासमानत्वं। फलव्याप्यत्वं फलेन तद्गतचि
दाभासेन भास्यत्वं तथा च न श्रुतिद्वयविरोधः। तदुक्तं भारतीतीर्थैः स्वप्रकाशोपि
साक्ष्येव धीवृत्त्याप्यते अन्यवत् फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितं अ
प्रमेयमनादिवेत्यत्र श्रुत्येदमीरिते। मनसैवेदमाप्तव्यमिति धीव्याप्तता श्रुतेति
अतो अविषयस्यापि बोधः संभवतीति भावः योयं विज्ञानमयः प्राणेषु हृद्यं

न्ज्योतिः पुरुष इत्याद्यवांतरवाक्येन देहादिव्यतिरिक्तत्वेन अत्रायं पुरुषः स्वयं
ज्योतिर्भवतीत्यादिना स्वयंज्योतिष्ट्वेन असंगो ह्ययं पुरुष इत्यादिना चासंगत्वेन
यद्वैतन्न पश्यतीत्यादिना च अलुप्तचित्त्वेन प्रतिपाद्यमाने त्वंपदार्थं ह्युपलक्ष्यं
यं विदुरिति संबंधः॥ तत्पदार्थमाह भावग्राह्यानंदमिति · भावनारूपेण ग्राह्यश्चासा
वानंदश्चासौ भावग्राह्यानंदस्तं युवा स्यात्साधुयुवाध्यापक इत्यादिना सार्वभौमम
उपक्रम्य मनुष्यगंधर्वादिस्थाने उत्कर्षेण श्रूयमाणः आनंदः पत्रकाष्ठतां प्रा
प्तः सोऽस्ति निरतिशयानंदः यतो वाचो निवर्तंते अप्राप्य मनसा सह॥ आनंदं ब्रह्म
णो विद्वान्विभेति कुतश्चनेति वाङ्मनसागोचरब्रह्मत्वेन श्रूयमाण इत्येवं भावग्रा
ह्यानंदमित्यर्थः॥ अनन्यं अन्यद्द्वितीयं यस्मान्न सोऽनन्यस्तं अद्वितीयं निरतिश

हरि॰ग
२३

पानंदं तत्पदार्थमित्यर्थः॥ ८ ॥ ननु ब्रह्मणोऽनन्यत्वं कथं द्वितीयस्यान्यघटपटादे
रनुभवादित्याशंक्य सर्वस्यापि द्वितीयस्याऽध्यस्तत्वेन शुक्तिरजतादिवत्तस्मिन्नारोपि
तत्वात् आरोपितस्य च परमार्थभूताधिष्ठानमात्रत्वात्॥ सर्वं खल्विदं ब्रह्म आत्मै
वेदं सर्वं। इदं सर्वं यदयमात्मा तदेतदेवेदं सर्वं विश्वमित्यादिश्रुतेश्च न ब्रह्मणो
अनन्यपदेनाद्वितीयत्वक्षतिरित्यभिप्रेत्याह॥ यद्यदिति॥ यद्यद्वेद्यं वस्तुसत्त्वं
विषयाख्यं तत्तद्ब्रह्मैवेति विदित्वा तदहं वा ध्यायन्नेवं यः सनकाद्यादनयोजितं तं सं
सारध्वांतं॥ ९ ॥ यद्यद्विषयाख्यं विषयोतिविशेषेणात्मरूपं बध्नातीति विषय
शब्दादि तद्विषयाख्यं वस्तुसत्त्वं वस्तुपरमार्थभूतं ब्रह्मैव सत्त्वं स्वरूपं यस्य तद्
वस्तुसत्त्वं तस्मिन्विषयाख्यस्य सर्वस्यारोपितत्वादित्यर्थः। तत्र हेतुमभिप्रायेणाह

शंकु·
२३

वेद्यमिति· वेद्यं दृश्यं दृश्यत्वात् तस्मिन्नारोपितत्वं न विषयात्वं वस्तुतस्तत्त्वमित्यर्थः
अनस्तदृश्यैव न ततोतिरि।क्तमिति विदित्वा ज्ञात्वा न तुस्ता हंवकाराध्यमस्येन अहं ब्र
ह्मेति च एवं उक्तप्रकारेणायमजं परमात्मानं हरिं सनकाद्याः सनकसनंदसनत्कु
मारसनातनप्रभृतयः मुनयमननशीलाः ध्यायंतितं हरिमीडे ॥ ९ ॥ नन्वहं प्र
त्ययविषय आत्मा प्रसिद्धः तस्य कथं ज्ञेयातीतत्वसंभावनेत्याशंक्याह ॥ वयद्वे
द्यमिति। यद्वेद्यं तदहं नेति विहाय स्वात्मज्योतिर्ज्ञानमयानंदमवाप्य तस्मि
न्नसीत्यात्माविदो यं विदुरीशं तं संसारध्वान्त०॥ १० ॥ देहाद्यहंकारपर्यंतं तन दहं
आत्मा न भवामीति विहाय त्यक्त्वा वेद्यत्वस्य च घटादिवदनात्मत्वेन व्याप्यत्वात् ॥
अहंकारादिवद्वेद्यत्वात्· आत्मा न भवतीति हित्वेत्यर्थः ॥ अयं भावः ॥ आत्मा अहं

प्रत्ययविषय इति वदन्वादिप्रष्टव्यः किमात्मस्वरूपाहं प्रत्ययविषय उत आत्मनि
ष्ठाहं प्रत्ययविषयः॥ नाद्यः॥ स्वस्य स्वकर्मत्वानुपपत्तेः॥ द्वितीयेपि किमात्मनिष्ठयप्रत्य
योजड उत स्वप्रकाशः॥ नाद्य॥ जडे नात्मभानानुपपत्तेः। न द्वितीयः॥ स्वप्रकाशप्रत्य
यविषयस्य घटादिवदात्मत्वायोगात्॥ न च स्वप्रकाशप्रत्ययस्याधारतयैव विषय
त्वमंतरेणात्माभावन इति वाच्यं प्रत्ययव्यतिरिक्तस्य प्रत्ययाधीनप्रकाशस्य प्रत्यय
विषयत्व· किंचयद्वेद्यं न तत्स्वविलक्षणावेद्यमिति व्याप्तिदर्शनात्स्वप्रकाश आ
त्मेति निश्चीयत इत्याह॥ स्वात्मेति॥ स्वात्मज्योतिर्ज्ञानमयानंदं स्वात्मज्योतिः स्वप्रका
शो ज्ञानमयः ज्ञानस्वरूपो य आनंदः॥ तं अवाप्य परब्रह्मास्पदत्वेन संभाव्य तस्मिन्संभा
विते अहंपदलक्ष्ये अस्मिन्नात्मविदः। अस्मिन्नात्मवेदनं कुर्वंतः पमीशां इशापदलक्ष्यं

ब्रह्मविदः साक्षात्तद्भवंतीत्यर्थः॥ त्वंपदलक्ष्यज्ञानं विना तस्य ब्रह्मत्वपरिज्ञानासंभ
वादितिभावः॥ तत्प्रावक्ष्यति॥ त्रिषुधामेषु यद्भोग्यं भोक्ता भोगश्च यद्भवेत्॥ तेभ्यो वि
लक्षणः साक्षि चिन्मात्रोहं सदाशिव इति॥ जाग्रदादिषु तैभोग्यं स्थूलप्रविविक्तानं
देभ्यो भोक्तृविश्वतैजससप्राज्ञेभ्यः उपाधिभूतेभ्यो विलक्षणः सर्वस्य भासको य
श्चिन्मात्रोहंपदलक्ष्य इत्यहंपदलक्ष्यं साक्षात्कृतमनूद्य तस्य सदाशिवशब्द
लक्ष्याद्वयानंदब्रह्मत्वबोधनेन त्वंपदलक्ष्यार्थमसार्थकुर्वन् तस्य ब्रह्मत्वसाक्षात्का
रासंभवात्॥ १० ॥ नन्वेवं देहादिविलक्षणमात्मानं तस्य ब्रह्मत्वं च जानतामपि के
षांचित्तत्त्वाभावतस्तैरपि देहादावात्मबुद्धिश्च दृश्यते· अतो देहादिव्यतिरिक्तात्म
ज्ञानं निष्फलमित्याशंक्य तेषामप्रतिबंधात्मज्ञानाभावादेव तत्त्वाभावादिति· ननुज्ञा

नस्य तदसाधनत्वेन प्रतिबंधकाः सप्रपंचानात्मदेहादिष्वसत्स्वात्मत्वबुद्धिः पूर्वपू
र्ववासनया प्रापिताः प्रपंचदेहादिषु। असत्स्वात्मत्वानात्मत्वभावनया आत्मनश्चिद्रूपत्व
भावनया च दीर्घकालनैरंतर्य्यसत्काराभ्यस्तनया निवृत्तेन क्षिन्नज्ञानेनाज्ञानेन नष्टेन
सर्वत्र सैव भवतीत्याशयेनाह॥ हित्वेति॥ हित्वा हित्वा दृश्यमशेषं सविकल्पं मत्वा शिष्टं
भादृशिमात्रं गगनाभं त्यक्त्वा देहं यं प्रविशंत्यच्युतभक्तास्तं संसारध्वांतविनाशं०॥ ११॥
दृश्यं दृशां गोचरं सविकल्पं घटत्वपटत्वग्रालतादिविकल्पसहितं सर्वमेव बाह्यमभ्यं
तरं च प्रपंचं हित्वाऽसत्यत्वेनानात्मत्वेन च भावनया निरस्य देहादेरनात्मत्वं जगतो
मिथ्यात्वं वासयित्वेत्यर्थः॥ नन्वत्र भारतीतीति चे· आत्मा देहादिभिन्नोऽयं मिथ्यात्वेदं ज
गतयोः देहयात्मत्वसत्यत्वधीविपर्य्ययभावना· तत्त्वभावनया नश्यत्यतो देहाति

रिक्तं तां· आत्मनो भावयेन हमिथ्यात्वं जगतो निशामिति· शिष्टं परिशिष्टं भाद्दृशि
मात्रं स्वप्रकाशचिन्मात्रं स्वरूपासंगत्व विभुत्वादिभिगगणोपमं मत्वा आत्मत्वेन
शीत्वा· नदुक्तं विचारणपत्रदभिः पंचकोशपरित्यागे साक्षिबोधो विशेषतः। स्वस्वरू
पं स एव स्यात् शून्यत्वं तस्य दुर्घटमिति॥ ननु देहंस्यो आत्मत्वेनानभिमन्यमानं यं वि
ष्णुं प्रविशंति· तत्र प्रवेशस्य तात्मनयावस्थानमेव मुख्यप्रवेशस्यासंभवात्॥ ब्रह्म
वेद ब्रह्मैवं भवतीत्यादि श्रुतेः अच्युतभक्ता· अच्युते च्युतरहिते अविनाशिनि ब्रह्मणि
आत्मत्वेन या भक्तिः भजनं तद्युक्ता इत्यर्थः॥ अथ यो न्या देवतामुपास्ते अन्योऽसावन्यो
ऽहमस्मीति न स वेद इत्यादि श्रुतेः॥ ११ ॥ अस्ति हि बृहदारण्यके पंचमाध्याये आपा
यिकाजनको ह वैदेहो वऽदक्षिणास्यापत्तमारभते· तत्र च नानादेशेभ्यो ब्राह्मणा

हरि॰७
२८

ब्रह्मविदो दिदृक्षया धनादिलिप्सया च समागता अभिसंगता बभूवुः॰ तत्र च ब्रह्मविन्मयद
र्शनेन जनकस्य जिज्ञासा बभूव समवनेषां ब्रह्मविदां ब्रह्मिष्ठं तु कथं ज्ञात्वा तं उपसंपद्य॰॥
न त्वं न नो ज्ञासामीति मत्वा यो गवां सहस्रं स्वर्णरत्नादिभिः सर्वतोलंकृतं ब्रह्मविन्मा
यामवरुध्य तानुवाच हे भगवंतो ब्राह्मणा यो वो ब्रह्मिष्ठस्तस्मा एतद्गोसहस्रं मया
दत्तमिति ते च भीता नानुत्तिष्ठिताः॥ अथ याज्ञवल्क्यः॰ तूष्णींभूतानां ब्राह्मणानां लक्षे स्वांते॰
वासिनमुवाच॥ एता गा अस्मद्गृहं नयेति स तथा चकार ततस्तद्दृष्ट्वा ब्राह्मणाश्चकारन
नद्वा ब्राह्मणाश्च क्रुद्धः क्रुद्धेषु च तेषु होता अश्वल॰ आर्तभागो भुज्युश्चाक्रायणिरुष
स्तः॰ कहोल इत्येते ब्रह्मविदो याज्ञवल्क्येन सह पराजिता अथोद्दालकेनर्षिणा
अंतर्यामिणं पृष्टो याज्ञवल्क्य॰ उद्दालकायान्तर्यामिणमुवाच सा च गार्गि रेषाय

शांकु॰
२८

पृथिव्यांतिष्ठन्पृथिव्या अंतरो यं पृथीवी न वेद यस्य पृथीवी शरीरं यः॥ पृथिवीमंतरो
यमयति एषत आत्मांतर्याम्यमृत इति एवमेव यो प्सु तिष्ठन् यो ग्नौ यों तरिक्षे यो दिवि य
आदित्ये इत्याद्यनेकपर्यायैः सर्वांतर्यामी विष्णुर्निरूपितस्तात्पर्यक्रतेरयमर्थः यः पृ
थिव्यांतिष्ठति सोन्तर्यामी किं घटपटादिनेत्याह· पृथिव्या अंतरः किमंतर्वर्तमाना पृ
थिवीदेवतानेत्याह॥ यं पृथिवीदेवता न वेद सोन्तर्यामि पृथिवीदेवता हि स्वात्मानं जा
नाति इयमहमस्मीति तस्मान्न सा किं शरीरमनेत्याह· यस्य पृथिवी शरीरमिति यस्य
पृथिव्येव शरीरं नियम्यशरीरातिरिक्तं शरीरं नास्तीत्यर्थः॥ स्वयं यः अंतरो वर्तमानः पृथि
वीं पृथिवीदेवतां यमयति स्वव्यापारे प्रेरयति· एषत आत्मामृतः कूटस्थनित्यः अंतर्यामि हे
उद्दालक ते आत्मेति· सर्वपर्यायेष्वर्थोऽयं द्रष्टव्यः एवं ब्रह्मविन्नमायां सर्वांतर्यामित्वेन

स्तिइंविग्रज्ञोतिसर्वज्ञेतिसर्वज्ञास्तेसर्वशरीरीनत्वसर्वःसर्वंवेत्तेवेहनयंवेत्तिहिसर्वःसर्व
ज्ञोन्तर्यामिनयेत्थंयमयन्तस्तेसंसारध्वां०॥ १२ ॥यसर्वज्ञपृथिव्यादिषुउपादानतयाआ
स्तेनतव·पटइवसर्वशरीरंयस्यसःसर्वशरीरीयश्चनसर्वःकिंतुअधिष्ठानतयास
र्वस्यांतरः·यश्चपृथिव्यादौस्थितःसर्वंवेत्तिजानातियत्वसर्वःपृथिव्यादिर्नवेदसर्ववेत्ति
वेयंनवनस्यास्तिवेताइत्यादिश्रुते॥ वेदाहंसमतीतानिवर्तमानानिचार्जुनभविष्याणि
चभूतानिमांतुवेदनकश्चनेतिस्मृतेश्च॥यःयमयन्पृथिव्यादिप्रेरयन्विहितप्रति
षिद्धेषुप्रवर्तयन्निवर्तयश्च॥इत्थंउक्तप्रकारेणसर्वज्ञोन्तर्यामिनयावर्ततेनमि
त्यर्थः॥तथाचोक्तंजानामिधर्मंनचमेप्रवृत्तिर्जानाम्यधर्मंनचमेनिवृत्तिःकेनापिदे
वेनहृदिस्थितेनयथानियुक्तोस्मितथाकरोमि॥ईश्वरसर्वभूतानांहृद्देशोर्जुनति

ष्ठति· भ्रामयन्सर्वभूतानि यंत्रारूढानि माययेति स्मृतिश्च॥ १२॥ सर्वहि वेदांता ब्रह्म
णो द्वितीय॥ त्वं प्रत्यगात्मनस्तद्रूपत्वं च बोधयंति अत्रैतरीयश्रुतिस्तावदात्मा वा इद
मेक एवाग्र आसीदित्यवांतरवाक्येन ब्रह्माद्वितीयमुक्त्वा प्रत्यगात्मनो द्वितीयब्रह्मत्वं
महावाक्येन बोधयति॥ प्रज्ञाप्रतिष्ठा प्रज्ञानं ब्रह्मेति तैतरीयश्रुतिश्च सत्यंज्ञानम
नंतं ब्रह्मेत्यवांतरवाक्येनाद्वितीयं ब्रह्मोक्त्वा स यश्चायं पुरुषे यश्चासावादित्ये स ए
क इत्यनेन महावाक्येन प्रतीचः॥ तादृक्ब्रह्मत्वं बोधयति तथा छांदोग्यश्रुतिश्च
सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयमीत्यनेन तादृशं ब्रह्मोक्त्वा तत्त्वमसी
त्यनेन महावचसा जीवब्रह्मणोरभेदो बोध्यते एवं प्रतिवेदांतं तेनेत्र न च द्रष्टव्यं॥
ननु न च कथं ब्रह्मणो द्वितीयत्वमाकाशादेर्द्वितीयस्य विद्यमानत्वात्कथं प्रतीचो

हरि·ती
२८

ब्रह्मत्वं तयोर्भेदस्यैवात्तमवादित्याशंकायामाह इक्षत लोकान्नु सृजा इति स इमान्लो
कानसृजत तस्माद्वा एतस्मादात्मन आकाशसंभूत॥ तदेक्षत बहु स्यां प्रजाये
येति तत्तेजोसृजतेत्यादः सृष्ट्यर्थवादरूपाः श्रुतयः आकाशादेः सर्वस्य जग
तो ब्रह्मण एवोत्पत्तिं तस्मिन्नेवावस्थानात्॥ पुनस्तत्रैव लयात् मृदुत्पत्तिस्थि
तिलयकस्य घटादेर्मृदभेदवत्॥ कारणस्य ब्रह्मणा च तयावांतरवाक्योक्तब्रह्म
णो द्वितीयत्वं संभावयामासुः· तथा स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्य
त तत्सृष्ट्वा तदेवानुप्राविशदनेन जीवेनात्मनानुप्रविश्येत्यादः श्रुतयो ब्रह्मण ए
व जीवरूपेण प्रवेशं ब्रुवंत्यो नुतत्र हि· स्थित्वाअंतरं गृहे प्रविष्टदेवदत्तवज्जीवब्रह्म
णोर्भेदं महावाक्यप्रतिपाद्यं संभावयामासुः। तथा नियमेनाकृतिश्वासांतनभेदेनि

शां·भु·
२८

यस्मान्नियामकभावात्तु पपन्ने । तयोरभेदमेव संभावयन्ति ॥ तथा नवाराषण्ठृषोनर
समयः । यदग्ने रोहितं तद्रूपमित्याद्याः । तत्त्वंपदार्थशोधनरूपाः श्रुतयः जीवेश्वरोभय
गतविरुद्धधर्मनिरासद्वारा तयोरैक्यमेव संभावयन्ति ॥ तथा ब्रह्मविदाप्नोति परं अमृतः
समभवदित्याद्याश्चाभेदज्ञानस्य निरतिशयफलप्रदर्शनेनाभेदस्याविवक्षितत्वं ज्ञा
पयन्त्यस्तमेव संभावयन्ति ॥ इमं सृष्टिस्थितिलयप्रवेशसंयमनतत्त्वंपदार्थफलप्रति
पादकैः । तत्रविधार्थवादैस्तु गृहीतं सत् महावाक्यमवान्तरवाक्यसहितं तत्त्वं प्रति
पादयन्ति ॥ तदिदानीं स्तौति । सर्वमिति ॥ सर्वं दृष्ट्वा स्वात्मनि युक्त्या जगदेतत् दृष्ट्वा
त्मानं चैवमजं सर्वजनेषु सर्वात्मैकोस्मीति विदुर्यं जनहृत्स्थं तं संसारध्वां०॥ १२ ॥
सर्वं वियदादिकं जगत् एतत् अनुभूयमानं स्वात्मनि स्वस्मिन् युक्त्याजस्य दृक्

हरि.टी
२९

कसंबंधमंतरेणाभानायोगात् दृक्दृश्यतेयोश्च संयोगादेरसंभवात् विषयवि
षयीभावस्य संयोगादिप्रत्यसंबंधपूर्वकत्वात्। सर्वस्य विपदाउजुउऐपंवस्य
भानान्यथानुपपत्त्या चिन्मध्यस्तत्वमेवेसंबध्यइत्यादि द्रष्टा दृष्टा सर्वजगत्स्वस्मिन्
कल्पितत्वेनज्ञात्वेत्यर्थः॥३९॥ त्रयेक्षीउतियश्च जीवस्तनस्तुजातं सकलं विचित्र
मितिश्रुतेः। पुरत्रयेजाग्रदाद्यवस्थात्रय इत्यर्थ अजंजनीरहितं अपरोक्षतयाऽनु
भूयमानमात्मानं सर्वजनेष्वजनिमत्सु अंतःकरणाद्युपाधिमत्सु प्रतिबिंबितत्व
यावर्तमानं द्रष्टा योयोनिं योनिमधितिष्ठत्येकः इंद्रो मायाभिः पुरुरूप ईयते अग्नि
र्यथैकोभुवनंप्रविष्टो रूपं रूपं प्रतिरूपो बभूव एकस्तथा सर्वभूतांतरात्मा रूपंरू
पं प्रतिरूपो बहिश्चेत्यादिश्रुतेः योनिमायानू पशब्दे अंतःकरणाद्युपाधिपदा इंद्रपरमेश्व

शं.भु.
२९

एवरूपः देवतिर्यगाद्यनेकरूपः इयनेलक्षणे प्रतिरूपः समानरूपः इतरत्स्पष्टं सर्वात्मास
र्वेषां विपन्नधीनामधिष्ठानत्वेन स्वस्यैव सर्वशरीरेषु जीवतया प्रविष्टत्वेन च सर्वात्मा सर्वरू
पः एतन एकोस्मीति यमद्वितीयं जनानां हृदि वुद्धौ स्थितं नित्यापरोक्षमित्यर्थः॥ यत्साक्षाद
परोक्षाद्ब्रह्मेति श्रुतेः॥ साक्षादिति व्यवधानं विना अपरोक्षमित्यर्थः अत्र च स्मृतिः सर्वभू
तस्थमात्मानं· सर्वभूतानि चात्मनि· संपश्यं ब्रह्म परमं याति नान्येन हेतुना·॥ मप्येवस
कलं जातमपि सर्वप्रतिष्ठितमपि सर्वलयं यांतिन ब्रह्माद्वयमस्म्यहमिति स्पष्टार्थः
॥ १३ ॥ एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा· कर्माध्यक्षः सर्वभू
ताधिवासः साक्षी चेता केवलो निर्गुणश्च॥ द्वा सुपर्णा सयुजा सखाया समानं वृक्षं
परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीतीमौ मंत्रौ आत्म

श्वे·उ

३०

नौ विषयाकर्तृत्वादिकं परमार्थतस्तदा हि त्वं च बोधयतः ॥ अनयोश्चैवमर्थं तु रागात्र सिद्धं
ब्रह्मविष्णुरुद्राणामभेदं वारयति· एक इति देवः स्वप्रकाशचिद्रूपः स कुत्रेत्याकांक्षायामा
ह ॥ सर्वभूतेष्विति ॥ ब्रह्मादिस्तंबांतेषु तर्हि किमिति नानुभूयत इत्यत आह ॥ गूढइ
ति ॥ अज्ञानेनावृतत्वात्सामान्यप्रज्ञैरनुभूयत इत्यर्थः ॥ तस्यात्रिविधपरिच्छेदरा
हित्यमाह ॥ सर्वव्यापीति ॥ देशकालौ जीवेश्वरौ जगदित्येतत्सर्वं व्याप्य स्थातुं शी
लमस्येति सर्वव्यापित्वं देवप्रतिपाद्यत्वात्प्रथमं चेतनप्रतियोगिकभेदाभावमा
ह ॥ सर्वभूतांतरात्मेति· चैतन्यमेकमेव सर्वेषु ब्रह्मादिस्थावरांतेषु प्रविश्यांतर्जी
वात्मतया वर्तत इत्यर्थः ॥ तदेव शुद्धसत्त्वमायाप्रतिबिंबितया ईश्वरः स सर्वेषां कर्म
फलं ददातीत्याह ॥ कर्माध्यक्ष इति ॥ कर्मणां पुण्यपापरूपाणामध्यक्षः अधिष्ठा

रा·भ·

३०

यफलदानेसमर्थःजडप्रतियोजिकभेदंवारयति·सर्वभूताधिवासइति·सर्वेषांपृथिव्यां
दीनांभूतानामधिवासःअधिष्ठानइत्यर्थःआरोपितस्याधिष्ठानाव्यतिरेकात्॥ननत्रि
रूपितोभेदइत्यर्थः॥जीवेश्वररूपेणावस्थानात्प्राप्तंप्ररणादिकर्तृत्वंजगत्स्रष्टृत्वादिकं
क्वारयति·।साक्षीति·स्वसंनिधौप्रवर्तमानकार्यकरणादेजगदाकारपरिणामिन्या
अविद्यायाश्चसाक्षीसाक्षादिक्षितासाक्षित्वेतुमाह॥चेतेति॥चैतन्यरूपइत्यर्थःवस्तु
नःसाक्षित्वादिराहित्यमाहकेवलइति॥सकलविशेषशून्यइत्यर्थः॥ज्ञानानंदयो
र्गुणत्वंकेचिद्वदंतितन्निवारयति॥निर्गुणइति·।विज्ञानमानंदंब्रह्मेतिश्रुतेः।ज्ञा
नानंदौस्वरूपमेवेत्यर्थःद्वासुपर्णासुपर्णाविवसुपर्णौसयुजौनित्यमवियुक्तौसखा
यौचिद्रूपौअंतःकरणोपहिताउपहितौसमानंवृक्षंव्याप्यतत्वज्ञानेनसफलम्

ष्वियत्तदितिवृक्षःकार्य्यकरणोपाधिःतंपरिषस्वजातेआश्रयेते।।यथालौकिकौतुपर्णौ
परस्परंसखायौएकमश्वत्थादिवृक्षमाश्रयेतेनद्वत्।।तयोर्मध्येएकःपिप्पलंक
र्मफलंस्वादुरसवत्उपलक्षणमेतत्तुस्वदुःस्वरूपमित्यर्थः।।अतिकर्तृत्वादिरूप
कार्य्यकरणविवेकात्।।मुक्तोऽन्यकार्य्यकरणाद्विविक्तःअभिचाकशीतिकर्तृत्व
भोक्तृत्वरूपंकार्य्यकरणंकेवलंपश्यतीत्यर्थः।।एवमेताभ्यामेत्राभ्यांअविद्यावृक्षा
यांकर्त्रादिरूपत्वेनस्वतःसाक्षीकूटस्थचिन्मात्रत्वेनपाणिपादिनंविलुंलौति·।सर्वत्रै
कःपश्यतिजिघ्रेतपभुंक्तेस्पृशश्रोत्राऽत्यतिवेमाऽरिमंयं।साक्षीवास्तेकर्तृत्वपश्यं
तीतिवान्येनंसंसारध्वांत०। १४ ।।सर्वज्ञत्वलाद्विस्मावरणेनैवकार्य्यकरणसंघा
तेषुप्रविष्टोवस्तुतः।।एकएवसन्नपिवज्जधात्रविभक्तःपश्यतिदर्शनव्यापारंकरो

ति जिघ्रति घ्राणेन गंधं गृह्णाति भुंक्ते भोजनं करोति स्पृशान्त्वचा शीतउष्णं च वेत्ति श्रोता श्रो
त्रेण शब्दं गृह्णाति · उष्यति केवलं अंतस्थया बुध्या मूढं भाविं च जानाति · चकारेणक्रसक
लेंद्रियव्यापारसमुच्चयार्थः॥ इति एवं बहुव्यापारवत्वेनयं इमं अपरोक्षतया अनु
भूयमानमविद्यावस्थायामाऊः॥ अस्मेविवेकिनः चात्मस्वरूपज्ञतिपादकमंचो च
कर्तृषु कार्यकरणोपाधिषु स्वपरे प्रवर्तमानेषु पश्यन् कर्तृणि कार्यकरणानि प
श्यन् भासयन् साक्षी केवलमास्ते परमार्थतो न किंचिदपि स्वयं करोतीति च यमाऊ
ममित्यर्थं॥ तदुक्तं वासिष्ठरामायणे कुर्वन्नपीह जगतां महतामनंतं नैहनाकिंचन
करोति कदाचनापि॥ स्वात्मन्यनंतसमयसंविदि निर्विकल्पे संक्षोदयस्थितिमत
ते स्थित एक एवेति॥ १४ ॥ नन्वेवमात्मनः कर्तृत्वादिरूपेण सहितत्वोभयप्र

तिपादकश्रुतिस्मृतिषु सतीषु अन्यतरस्मिथ्यात्वं किमित्यंगीक्रियते॥ स्वाभाविकत्वौ
पाधिकत्वाभ्यामुभयोरपि वास्तवत्वोपपत्तेः अन्यतरमिथ्यात्वे वा अकर्तृत्वादेरेव मिथ्या
त्वं किं न स्यादितिशंकां स्वतो विरुद्धद्वयस्य उपाधितोप्येकत्र घटनासंभवाधिवानःस्फ
टिके औपाधिकरक्तिम्नो वास्तवत्वादर्शनात् कर्तृत्वादेर्वास्तवत्वे च मोक्षाभाव
पिनप्रसंगात्॥ कर्तृत्वादेरेव कार्यकरणान्वयव्यतिरेकानुविधानदर्शनात् सूत्र
कारेणापि· यथा च तक्षोभयथेत्यनेन सूत्रेण यथा लोके तक्षा वास्यादिकरणहस्तः
कर्ता दुःखी भवति स एव विमुक्तवास्यादिकरणः स्वस्थः सुखी भवति एवमविद्याप्रत्यु
पस्थापितकार्यकरणोपाधिक आत्मा स्वप्नजागरितयोः कर्ता दुःखी भवति स तच्छ्र
मापनुत्तये स्वात्मानं परं प्रविश्य विमुक्तकार्यकरणसंघातोऽकर्ता सुखी भवतीति

कर्तृत्वस्यौपाधिकत्वोक्तेः औपाधिकस्य च सत्त्वानुपपत्तेः। अत्र भवस्य चन्तला रश्रुति
विरोधेन भ्रांतित्वात्कार्य्यकरणोपाधिकृतं भ्रांतिमेवात्मनः कर्तृत्वादि न पारमार्थि
कमित्यभिप्रेत्याह॥ पश्यन्निति॥ पश्यन्शृण्वन्तत्र विजानन्रसयन्सन्घ्रिघ्रन्विभ्र
देहमिमंजीवनथैष्यंइत्यात्मानं यं विदुरीशं विषयज्ञं· तं संसारध्वांतविना०॥१५॥
इमंदेहंकार्य्यकरणसंघातंजीवनयाप्रविश्यविभ्रनआत्माइत्यं चक्षुषोपाधिना
पश्यन्भवति॥ तथा श्रोत्रोपाधिना शृण्वन्सर्वग्राहकः। तथाविजानन्बुद्ध्युपाधि
नानिश्चिन्वन्॥ तथा रसयेन रसयन्रसं गृह्णन् तथा घ्राणेन गंधं जिघ्रन्भवति
न तु स्वतः। तथा च श्रुतिः आत्मेंद्रियमनोयुक्तंभोक्तेत्याहुर्मनीषिणः इति अस्यचा
यमर्थः॥ आत्मशब्देन बुद्धिरुच्यते बुद्ध्याद्युपाधियुक्तमात्मानं कर्मकर्ताभोक्तेत्या

ॐ अथवा आत्मा जीव इंद्रियमनोयुक्तं प्रथमार्थे द्वितीया त्वं देसी इंद्रियादियुक्तः सन्
भोक्ता इति एवं विषयज्ञमात्मानं य ईशमेव विदुः स्वेन व्यस्तवद्रूपेणात्मेत्यर्थः॥ १५॥
मांडूक्ये श्रूयते सोयमात्मा चतुष्पात्. जागरितस्थानो बहिः प्रजः सप्तान एकोनविंशतिमु
खः स्थूलभुक वैश्वानरः प्रथमः पादः स्वप्नस्थानोंतःप्रज्ञः सप्तांग एकोनविंशतिमुखः
प्रविविक्तभुक्तैजसो द्वितीयः पादः यत्र स्वप्नो न कंचन कामं कामयते न कंचन स्व
प्नं पश्यति तत्सुषुप्तं सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानंदमयो ह्यानंदभुक्चेतो
मुखः प्राज्ञस्तृतीयः पादः अदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिंत्यमपदेश्यं एका
त्मप्रत्ययसारं प्रपंशोमसमं शिवमद्वैतं चतुर्थं मंदन्यत इति॥ अयमर्थः सोयमो
कारप्रतिपाद्य आत्मा चतुष्पात्. चत्वारः. पादा विश्वादिरूपा यस्य स तथा तत्र प्रथम

पादं दर्शयति जागरितेत्यादिना जागरितं जागरावस्थानं विषयेणायोपलब्धिस्थानं यस्य
स तथा बहिर्देहाद्बहिर्विषयेषु प्रज्ञा यस्य स तथा द्यौर्मूर्द्धा चक्षुरादित्यः अग्निर्मुखं
प्राणो वायुर्देहमध्यमाकाशो वलिसमुद्रः पृथिव्येव पादावितिसप्तांगानि यस्य स
तथा एकोनविंशतिसमुखप्राणपंचकइंद्रियदशकं अंतकरणचतुष्टयं इत्येको
नविंशतिसंख्याकानि विषयोपलब्धिद्वाराणि यस्य स तथा स्थूलभुक् स्थूलानि पंची
कृतभूतकार्याणि घटपटादिना भुक्ते उपलक्षणमिति तथा वैश्वानरः वैश्वानरग्रहणं
अष्टिसमष्ट्यभिमानिनोर्भेदविवक्षया विश्व इत्यर्थः॥ अथ प्रथमः पादः स्वप्नः स्थानं
वासनामयभोगः स्थानं यस्य स तथा अंतः। देहांतः वासनामयप्रपंचविषया प्रज्ञा यस्य
स तथा प्रविविक्तं सूक्ष्मवासनामात्ररूपं विषयं भक्ते इति तथा तैजसः तेजसि लिंगे भ

हरि·दी वः॥तदभिमानीसर्वः॥सद्वितीयपादः।सुप्तपुरुषोयत्रयस्यामवस्थायांनकंचनकाम
३४ यतेनकंचनस्वप्नंपश्यतितत्सुषुप्तमितिसुषुप्तावस्थानिरूपिताकंचनेत्यत्रजाग
रितमपिस्वप्नमेवमनुतेभ्यति·सुषुप्तस्थानःपुमानेकीभूतःएकतांप्राप्तःवजथा
विभाजकवक्षराद्यौ नांतदालीनत्वात्अनप्रज्ञानघनएवनविकीर्णप्रज्ञानआ
नंदमयः।आनंदप्रचुरः।सुखहेतुलिंगस्थापगमात्·आनंदस्वरूपानंदमेवभुंक्ते
इतितथाआनंदभोगेसाधनमाह॥चेतोमुखइतिचेतश्चित्स्वतिविवसहिताज्ञान
वृत्तिरेवमुखमानंदभोजनेद्वारंयस्यसतथाप्राज्ञःप्रकर्षेणातवहिर्नजानातितथा शंभु·
एषतृतीयपादः।अवस्थात्रयात्स्थूलसूनंभुङ्वैनन्यमेवचतुर्थपादमाहअदृश्य ३४
ज्ञानेंद्रियाविषयंअव्यवहार्यंहानादिव्यवहारागोचरमग्राह्यंकर्मेंद्रियाविषयंव

अलक्षणांलिंगंतद्रहितमनुमानाविषयमित्यर्थ· अचिंत्यमंतःकरणागोचरंअव्य
पदेश्यंशब्दाविषयंतत्प्रवृत्तिनिमित्तजात्यादेरभावात्॥ किंचेनकात्मप्रत्ययसारं
एकोद्वितीयआत्मास्वरूपभूतप्रत्ययः प्रकाशएवसारोबलंस्वसत्तावेप्रमाणं
यस्यसतथा॥ प्रपंचोशमंवनिवृत्तिरूपमारोपितभावस्याधिष्ठानाभिन्नत्वात्·॥
शिवमानंदरूपमद्वैतंद्वैतरहितंत्रसैवचतुर्थपादंमन्यंतेविद्वासइति एवमन्य
त्रकैवल्योपनिषदादवपिआत्मनोऽविद्ययावस्थावंतोस्वतस्तद्रहितत्वंवक्ष्यंतेता
दशंश्रुतिसिद्धंविभुमिदानींस्तौतिजाग्रदितिजाग्रत्स्थास्थूलपदार्थानुपमायोदृ
ष्टास्वप्नेप्यापिसुगुप्तोसुखइनिद्रांइत्यात्मानवीक्ष्यमुदास्तेवतुरीयं· तंसंसारध्वां०॥
॥ १६ ॥ जाग्रज्जागरितेवर्तमानोयः स्थूलपदार्थान्·पंचीकृतभूतकार्यरूपान्·॥

ह॰टि॰ग
३५

दृष्ट्वाअनुभूय॰अथानंतरं स्वप्ने मायां मिथ्या रथगजादिरूपां वासनामयां दृष्ट्वानुभूय सौ
षुप्ते निद्रां स्वरूपसुखाभिव्यंजनकेवलाज्ञानमनुभूय विश्वादशायामिमेवं प्रकार
मात्मानं तुरीयेस्थाने समाध्यवस्थायां स्वरूपेण केवलं वीक्ष्य मुदास्ते स्वात्मानंदानु
भवजनितसंतोषेणाआस्तेनमिनर्थः॥ १८ ॥ नन्ववस्थात्रयविशिष्टः सुखीदुःखी
चात्माप्रतिदेहंभिन्न एव प्रकाशनेन तस्यैकत्वे सुखित्वदुःखित्वादिवैचित्र्यानुपपत्तेः
देवदत्तस्य यज्ञदत्तदुःखायनुसंधानप्रसंगाच्च कथमद्वितीयानंदरूपेणावेदांतः
वेद्यतेत्याशंक्याह स सर्वदेहेषु वर्त्तत एकत्वेप्यवच्छेदकोपाधिनोऽनिर्वचनीयभेदस्यां
गीकारात्॥ एकशरीरावच्छिन्नात्मनि पादेमे वेदनाशिरसि मे सुखमित्यनुभवानु
रोधेन तत्तदवयवावच्छेदेन सुखदुःखवैचित्र्यवदेकस्मिन्नपि तच्छरीरावच्छिन्नेन

शं॰भ॰
३५

डुपपत्ति॥ देहभेदेन जन्मानन्तरीयकत्वायननुसंधानवत् देवदत्तस्य यज्ञदत्तत्वा
यननुसंधानोपपत्तेश्चेत्याह॥ पश्यन्तीति॰ पश्यन्त्यज्ञोप्यक्षरमेको गुणभेदान्नाना
कारान्स्फाटिकवज्जातिविविचित्रभिन्नच्छिन्नश्चापमजः कर्मफलैर्यन्तं संसारध्वांतं॰
॥ ७ ॥ यः स्वतः शुद्धः शुद्धस्वरूपः स्वादिसंवेधशून्य अक्षरनाशरहितव्यापको वाअ
नः जनिरहितः एकोऽद्वितीयेऽपि गुणाभेदात्सत्वरजस्तमः परिणामभेदान्नानाकाशु
सुरनरतिर्यगाद्याकारभेदान्पश्यन्ति तच्चनाशात्माध्यात्मकर्मफलैः शुद्धस्वरूपःस्वै
विविचित्रः॥ नानारूपः भिन्नोऽनेकः परिच्छिन्नश्च भाति स्फाटिकवत् यथा स्फाटिकशि
लारक्तकाद्युपाधिभेदाद्विचित्रानेकाव भाति तथेत्यर्थः॥ अयं छिन्नदेहान्तरेऽज्ञाय
मानश्च भवति तथा वक्ष्यति॰ एक एव हि भूतात्मा भूते भूते व्यवस्थितः॥ एकधा

ऋ॰ १ बहुधा चैव दृश्यते जलचंद्रवत्॥ भूत परमार्थः आत्मा भूते भूते देहे एकधात्वेन रूपेण
३६ बहुधा उपाध्युपहितेन रूपेणार्थः॥ सूत्रकारोपि। असंततेश्चाव्यतिकर इति सूत्रेण
असंततेनोपाधिपरिच्छेदादव्यतिकरः॥ जीवानां सुखदुःखाद्यसांकर्य्यमिति सूत्रम
नेसुखादिवैचित्र्यमुपपाद्याऽदृष्टानियमात्॥ अभिसंध्यादिष्वपि चैवं॥ प्रदेशा
दिति चेन्नांतर्भावादित्यादिसूत्रत्रयेण सर्वगतवास्तवानेकात्मवादिमते सर्वेषु
शरीरेष्वपि सर्वेषामात्मनां सन्निधानात्सर्वसंनिधानुत्पाद्यमानादृष्टस्य साधार
णत्वात्सुखदुःखादिसांकर्य्यमापादयामासु तत आत्मैकत्वे दोषाभावात्तस्माद शं॰ सु॰
द्वयानंदरूपेण वेदांतवेद्यतोपपद्यत इति भावः॥ ७ ॥ इंद्रं मित्रं वरुणमग्नि ३६
माहुरथो दिव्यः स सुपर्णो गरुत्मान् एकं सद्विप्रा बहुधा वदंति अग्निं यमं मात

लिश्यानस्माजतदेवाग्निस्तद्वायुस्तत्सूर्य्यस्तच्चंद्रमाः॥ तदेवशुक्रममृतंतद्ब्रह्मतदाप
सप्रजापतिःसब्रह्मासशिवःसेन्द्रःसोक्षरःपरमःस्वराट्सएवविष्णुःसप्रमाणाःस
कालोग्निःसचेन्द्रमा इत्यादयोमंत्राब्रह्मणएवसकलदेवतात्मकतयावस्थान
माहुः॥ ॐ आंपोतिष्मतब्रह्मवेद॥ आपशब्देनतदधिष्ठानावरुणउच्यते प्राणाः॥ वा
युकालःप्रजासंहर्तापमः। एतैर्मंत्रैःसर्वदेवतात्मकत्वेनसिद्धंविष्णुंस्तौतिब्रह्मेति
ब्रह्माविष्णुरुद्रईशानोरविचंद्राविंद्रोवायुयज्ञइतीतित्थंपरिकल्प्यएकंसंतंयंबहुधा
ऊर्मीतिभेदानंसंसारध्वां०॥ १८ ॥ब्रह्मापंचीकृतभूतव्यतिरिक्तसकलस्रष्टाहिरण्य
गर्भः विष्णुःसत्वसाधनकःसकलजगत्पालकःपरमेश्वरःरुद्रःसत्वोपाधिकस्तम
साधनकःजगत्संहर्तापरमेश्वरःतस्यतमउपाधिकत्वेजीवेत्वाऐपाजीवत्वस्यव

ऽश्रुतिस्मृतीतिहासपुराणाविरुद्धत्वे ननवादिनपाखंडशिरोमणिव्यापत्तेः सत्वंदेवा
हरादय इति वसिष्ठवचनात् इत्यादिष्ठः सगुरुणा भगवान्नीशनीललोहितः सन्त्वाक्षि
तिस्वभावत्वात्सर्जात्मसमाप्रजा इति भागवतवचनाच्च चित्तुयमाणात्मनः संबंधस्य
कार्यार्थत्वेनाणुपत्ते· यत्ना इति भगवतोविलोमूर्तिनरं मतिभेदात्कुद्धिवैविध्यात मति
भेदा इति पाठे भिर्यं न इति भेदाः सत्याभेदाः भिन्नमतय इत्यर्थः॥ १८ ॥ तैत्तिरीयको
पनिषत् एवं ब्रह्मप्रतिपादयति॥ प्रथमं ब्रह्मविदाप्नोति परम् इति संहिताश्रुपास
नादिभिः एकाग्रचित्तामधिकारिणां प्रतिब्रह्मविद्यां सविद्यां सफलां स्वेच्छया मा
सवसेति विषयनिर्देशः विदिष्यनेन· विद्या निर्दिश्यते परमाप्नोतीति विद्या
फलं निर्दिश्यते परमाप्नोतीति विद्याफलं निर्दिश्यते इति विभागः॥ तदनन्तरं

सूत्रस्यार्थसंक्षेपनः सत्यंज्ञानमनंतरंब्रह्मयोवेदनिहितंगुहायांपरमेव्योमन्सोऽश्नुते सर्वान्कामान्सहब्रह्मणाविपश्चितेति अस्याऋचउदाहरणेनव्याचकारसत्यामित्यादि सूत्रस्यब्रह्मपदव्याख्यानंयोवेदेत्यादिविषदव्याख्यानंसोअश्नुते. इत्यादिआप्नोतिपरमितिपदद्वयव्याख्यानमितिविभागः॥ ऋचोयमर्थः॥ सत्यंकालत्रयबाधाभावोपलक्षितंज्ञानंस्वप्रकाशंअनंतंअंतपरिच्छेदः देशकालवस्तुकृतस्तत्त्रिविधपरिच्छेदाभावोपलक्षितंब्रह्मेतिलक्षणनिर्देशः सत्यादियदत्रयलक्षणंगुहायांबुद्धौयत्कारणत्वेनेवर्तते॥ परमंव्योमाव्याकृताकाशंतत्रनिहितंप्रतिबिंबतयावस्थितंयत्तचैतन्यंतद्ब्रह्मत्वेनयोसर्ववेदसर्वान्कामान्सर्वभोगादिहिरण्यगर्भांतान्सहयुगपदश्नुतेभुक्तेकेनप्रकारेणविपश्चितासर्वज्ञेनब्रह्मणा

सर्वज्ञस्वरूपेणानोपाधिपरिच्छिन्नस्वरूपेण ब्रह्मणां देस्वस्थानं स्थानामंतभावभौमादि-
हिरण्यगर्भांतगोभोगानां ब्रह्मविस्वस्वरूपभूतत्वाच्चैतन्याभासत्वाच्च ब्रह्मविदो
युगपत्सर्वभोक्तृत्वमित्यर्थः॥ अनंतरं ब्रह्मणः सूत्रव्याख्यानरूपयाऋचाउ-
दारितानंतसिद्धये॥ आकाशादेर्ब्रह्मण एवोत्पत्तिकथयामास ततो योवेदे-
त्याद्युक्तं ब्रह्मणः स्वरूपं प्रवक्तुं स वा एष पुरुषोन्नरसमय इत्यारभ्य देहादिपं-
चकोशात्मोपदेशक्रमेण ब्रह्मपुच्छं प्रतिष्ठेति पुनर्विस्तरेण प्रतिपादयांवभूव
ततब्रह्मणो नामरूपातीतस्य प्रत्यक्षाद्यविषयत्वेनाऽसत्वं शंकायां सोकामय-
तेति कामपितृत्वेन स्वर्गकामीवत् सतपोऽतप्यतेति आलोचकत्वेन मंत्रिवदि-
दं सर्वमसृजतेति स्रष्टृत्वेन कुलालवत्तदेवानुप्राविशदिति प्रवेष्टृत्वेन सपा-

दिवसनस्तुपपाद्यतेनक्ष्मकोह्येवान्यादित्यादिनासर्वप्राणिनांजीवनहेतुत्वेनयस्य
वैषइत्यादिनाविद्वज्जनावयहेतुत्वेननवनदेवसत्वेहठिवुकारस्त्रनंतरंचेसेषानंदस्ये
त्यादिनामंनंदमीमांसामारभ्यसार्वभूमादिहिरण्यगर्भांतानांमानंदस्युत्तरोत्तरशत
गुणोत्कर्षप्रदर्शनपूर्वकंब्रह्मविदुषोयतोवाचोनिवर्तंतेअप्राप्यमनसासहआ
नंदंब्रह्मणोविद्वान्नबिभेतिकुतश्चनेतिवाङ्मनसोगोचरनिरतिशयब्रह्मानंदप्राप्ति
निरतिशयानर्थनिवृत्तिंचप्रतिपाद्यपुनरेतंहवेत्यादिनानर्थनिवृत्तिंप्रपंच्यनि
रतिशयानंदब्रह्मापरोक्षज्ञानेसाधनाकांक्षायांभृगुवैर्वारुणिरित्यादिनाभृगुव
रुणसंवादमुपक्रम्ययतोवाइत्यादिनाब्रह्मणस्तटस्थलक्षणाकथनपूर्वकंत्रि
पायपुत्रायवरुणेनपित्रोपदिष्टंतपआलंब्यपुनःपुनर्विचारमेवब्रह्मापरोक्षाय

हरि·ग श्रवणं साधनमुपदिश्य ब्रह्मविदस्तल्लिगानं चांते प्रदर्श्य उपरामतेऽथोपनिषत्स्वयं
३९ नयामानत्वन्सर्वप्राणिहितैषिणा प्रतिपादितं विस्तरेणेति द्वाभ्यां समस्मिति· क्षेमं
ज्ञानं शुद्धमनंतं व्यतिरिक्तं स्थानं गूढं निष्कलमानंदमनन्तं संहृत्याहादो पंचवस्तुलोसौ
भगवेज्जंतं संसारध्वां० ॥ १९ ॥ सत्यमवाप्य ज्ञानजडविरोधिशुद्धमलासंस्पृष्टं·
अनंतं त्रिविधपरिच्छेदशून्यं व्यतिरिक्तं कोशपंचकभिन्नं तत्साक्षिणं स्थानं निर
स्तसमस्तोपप्लवं· ॥ अत्रे श्रुति ॥ यदाह्येवैष एतस्मिन्नदृश्ये नात्म्येऽनिरुक्तेनिल
यनेऽभयं प्रतिष्ठां विंदत इति ॥ अस्यार्थः यदैवयस्मिन्नेव काले एष साध शंभु·
क एतस्मिन्नित्यापरोक्षेऽदृश्ये दृश्यप्रपंचरहिते तत्पदलक्ष्य इत्यर्थः । अनात्म्ये स्थू ३९
लदेहरहिते ऽनिरुक्ते निरुक्तिः लिंगं तद्रहिते अनिलयने निलीयंते प्रपंचदेहालिं

गानि अस्मिन्निति निलयमन्नानंतंद्रहित्वे पदलक्ष्यइत्यर्थः प्रत्यगभिन्नेब्रह्मणीति पद
वत्त्वस्यार्थः। तस्मिन्नभयंभयरहितंयथाभवतितथा प्रतिष्ठां स्थितिं विंदतेलभतेऽ
कर्म्मरूपंब्रह्मात्मतयाजानातीत्यर्थः॥ अथसोभयंगतोभवति। अथानंतरमेवोक्तवे
दनानंतरकालएवसब्रह्मविद्भयंजन्ममरणप्रवाहनिमित्तभीतिराहित्यंगतः प्रा
प्तोभवतिगूढमनवग्राह्यंवाङ्मनसागोचरमित्यर्थः॥ यतोवाचइतिश्रुतेः निष्कलं
निरवयवंआनंदंपरप्रेमास्पदंब्रनमंश्रोत्रियस्वरूपमत्रश्रुतिः सर्वश्चायंपु
रुषेयश्चासावादित्येषसएकइतिउरुषेकार्य्यकारणसंघातेऽयमपरोक्षतया
अंतर्भूयमानोपश्चिमस्वात्मसाक्षितयाप्रवर्ततेपश्चादित्यंतर्यामितयाऽसोप
रोक्षत्वेनभासमानोवर्ततेतस्मडभयत्ववर्त्तमानस्त्रिकालात्मः एकएवनभिन्नइत्यर्थः

ऽनिरवमादावानंदवत्स्वांप्रतिपादितं यं विष्णुं अजं जन्मरहितं अक्षीवमृत्यो भट्ट गुनाम
कायमहर्षयेष्वाया होक्तवान्। यतोवेत्यादिना ननमिम र्यः॥ १९ ॥ कथं भट्ट गुर्वैदिका
कांक्षायांनहेदनप्रकारमाह कोशानिति ॥ कोशानेतान्पंचरसादीन निहाय यत्र स्वास्मी
तिस्वात्मानि निश्चीन्य हज्ञिस्पः पित्रादिष्टो वेदभट्ट पर्ययजरं नेनं संसारख्यां०॥ २०॥
रसादीनन्नरसविकाररूपस्थूलदेहादीनां पंचकोशानडति हाया नात्मत्वेन विहाय पं
चकोशत्वत्पत्रघनकाव विवेके विचारराप्य गुरुभिः प्रदर्शितं स्थात्मं पंचीकृतभूतो
त्थो देहः स्थूलोन्नसंज्ञकः लिंगं तु राजसैः प्राणैः प्राणाः कर्मेन्द्रियैः सहसात्विकैर्धीन्द्रि
यैः सार्कं विमर्शात्मा मनोमयः सैरेवं सार्कं विज्ञानमयो धीर्निश्चयात्मिकाकारणं
सत्वमानंदमयो मोदादिवृत्तिभिरिति ज्ञाने ज्ञियारागां संशय निश्चयो भयहेतुत्वेन

मनोमये विज्ञानमये च संबंधः ॥ द्रष्टुः कार्यकारणसंघाते साक्षित्वेन पश्यतस्तं
तद्रूपेन स्थितः स तस्यात्मैव स्वस्वरूप एव आनंदो ब्रह्मेति विजानादित्यादिनाय
तो वेत्यादिलक्षणायोजनपूर्वकं सर्वप्रतिष्ठाभूतं ब्रह्मनोऽश्वस्यापिच्छादिरूपेण गुः
पञ्जरं तैत्तिरीयोपनिषद्ब्रह्मास्मीति यं वेदनमित्यर्थः ॥ २० ॥ ननु नास्ति जीवाति
रिक्तः कश्चिदीश्वरो जगत्त्वस्थापालितानां भयाभयहेतुः ॥ जगतो नित्यत्वात्सुखदुः
खयोश्च पुण्यपापमूलत्वाद्देवतानां च कर्मशेषभूतत्वादित्तावकत्वेन प्रसक्ता
दिविस्तवाऽद्वितीयेश्वरे प्रमाणतात्वाभावादिति जैमिनिनो मतमाशंक्याह सर्वजग
तः सावयवत्वादिना कार्यत्वेनानुमितस्याधिष्ठातारं परमेश्वरं विनोत्पत्त्यनुप
पत्तेः जीवानां चैतादृशपजगदुत्पादने ज्ञानसामर्थ्ययोरसंभवात् । चेतनत्वेन स्व

नैयाणां च नैषां पारत्वेच रूपं विना स्वतोसुखदुखहेतुकर्मानुष्ठानेन तद्भोगासंभवात्क
र्मणां जडत्वेन जगत्सर्जने जीवानां सुखदुःखदानेच स्वतोधिष्ठातारं विनासमर्थ
त्वात्. वेदांतेश्च प्राणिकर्मानुरोधेन जगत्सृष्टेः तत्र कर्मफलदातुश्चेश्वरस्य
सिद्धिप्रकारस्य पूर्वमुक्तकत्वानन्तरश्रुतिविरोधेन प्रत्यक्षादाभासत्वात्क
र्मविरुद्धात्मप्रतिपादकवेदानां नानान्तद्वेषामकस्मावकत्वादुपपत्तेश्चास्तिका
र्य्यमंकुरादिकं सकर्तृकं घटादिवदिति कार्य्यलिंगादिना क्षेत्रज्ञायंकारयित्वा
नुपपत्तेश्चास्तिकार्य्यः कर्तृः कर्ताभोक्तामात्रं हि विधुताधिरूढः त्वंसंमाणा ॥२१॥
क्षेत्रज्ञोयेन परमेश्वरेणाविशेषोऽहंकारमपि कर्मक्ष विकरोति ग्रहाविष्टवत् ।आ
वेशान्निर्मुक्तश्च न शास्त्र निकर्तृलौकिकश्च परमेश्वर अर्जुनादाविश्वावेशेण

त्तत्रमोक्षइतरत्रैवबन्धइतिव्यवस्थामाचक्षते·परेतु·नष्टाम्व्यक्तिमिवजातिरुत्यन्तविषय
मज्ञानंत्यजतिसमुक्तइतरोबद्धइतिव्यवस्थांवदन्ति·इतरेतुप्रतिजीवमविद्याभेदंस्वीकृत्यत
दनुवृत्तिनिवृत्तिभ्यामेवबन्धमोक्षव्यवस्थासमर्थयन्ते·तत्रापिकेचिदनेकत्वपारव्यपरप

त्सर्वाज्ञाननिर्मितोयम्प्रपञ्चस्तत्रैकतन्मुनाज्ञेनतत्साधारणप्रपञ्चनारोपितन्चज्ञरार्थ्यपदस्थितिवदेकस्य
क्तौतदीयाज्ञाननाशेनतत्साधारणप्रपञ्चनाशेपितरात्ज्ञाननिर्मितप्रपञ्चसत्वादितरेषांबन्धइतिव्यवस्था
माहुः। परेतुतत्तदज्ञानकृतप्रातिभासिकरजतादिवत्समस्तेनेतत्सदपेक्षावाकृजन्यइत्वकृत्स्नतत्तदज्ञान
जन्यःप्रपञ्चः प्रतिपुरुषमन्यथानेनितत्वज्ञानेनैकस्याज्ञाननाशेनतत्कृतप्रपञ्चनाशेपितरप्रपञ्च
सत्वादितरेषांबन्धइतिव्यवस्थेत्याहुः। नन्वेवम्ब्रह्मणउपादानत्वेसिद्धेपिकर्तृत्वंकीदृशमितिचेद
त्रकेचिदाहुः। कार्यानुकूलज्ञानचिकीर्षाकृतिमत्वरूपमिति। कार्यानुकूलज्ञानवत्वमात्रमितिकेचि
त्। अपरेतु कार्यानुकूलस्रष्टव्यालोचनरूपज्ञानवत्वमित्याहुः। ननुब्रह्मणोजगत्कर्तृत्वसम
र्थनेन सर्वज्ञत्वंन कथंसम्भवतिजीववदन्तःकरणाद्यभावेनज्ञातृत्वस्यैवासम्भवादितिचे
न्न। सर्वप्राणिधीवासनोपहितत्वेनेश्वरस्यसर्वज्ञत्वस्यभारतीतीर्थैर्व्यवस्थापितत्वात्। प्रकटा
र्थकारास्तुचिच्छायापन्नायाहिमायायावृत्तिभिरीश्वरस्यत्रैकालिकवस्त्वपरोक्षसत्वात्सर्वज्ञ
त्वमित्याहुः। तत्वशुद्धिकृतस्तुक्षरीसाब्रह्मणोविषयमानाखिलसाक्षात्कारदृष्टृकाले

श्रीः
५

भूतस्यगाज्ञविनो मायायां सत्स्वरूपेणास्थितस्योऽनात्सर्वज्ञत्वमित्याहुः॥ कौमुदीकारास्तु भूतभविष्य
द्वर्तमानानामविद्यामितौविम्बाद्युन्मीलितोल्लितविचित्रसऽशानां स्वरूपज्ञानेनैव तुल्यलोःवभासकत्वात्स
र्वविषयकस्वरूपज्ञानस्यानित्यत्वेन तत्कर्तृत्वरूपं सर्वज्ञत्वं कथमिति वाच्यम्॥ सर्वविषयकज्ञानात्मक
त्वस्यैव सर्वज्ञपदेनाविवक्षितत्वादित्याहुः॥ ब्रह्मस्वरूपज्ञानस्य नित्यत्वेऽपि स्वरूपतोऽपावच्छिन्न
रूपेण ब्रह्मजन्यत्वा सर्वविषयकज्ञानजनकत्वरूपसर्वज्ञत्वेऽपि नविरोध इत्याचार्यवाचस्पतिमिश्रा
:॥ननीश्वर इव जीवोपि हृत्स्थनपेक्ष स्वरूपचैतन्येन विषयान्कुतोनाऽवध्यातीति चेदत्राहुर्विवरणा
चार्याः॥ जीवचैतन्यस्यासर्वगतत्वेप्यन्तःकरणाद्युपाधिव्यक्तिलभमानस्तत्सम्बन्धोव्यक्ताविवज्ञातेः॥ वि
षयैस्सम्बन्धश्चान्तःकरणवृत्तिद्वारैवेति· विषयेनविडुपरागार्था वृत्तिरिति· केचित्त्वन्तःकरणोपा
धिकत्वेन जीवस्य परिच्छिन्नत्वात्तदनवच्छिन्नब्रह्मचैतन्याभेदाभिव्यक्त्यर्था वृत्त्यपेक्षेत्याहुः॥ अ
न्ये तु जीवस्यसर्वगतत्वेप्यविद्यावृतत्वेन विषयावच्छिन्नस्वस्वरूपावरणाभङ्गार्था वृत्त्यपेक्षेत्या

ज्ञः॥ एतेन जीवस्य किंचिज्ज्ञत्वमप्युपपन्नम्॥ ननु निष्क्रियपयोर्विषयचैतन्ययोः संयोगादेरसम्भवा
त्प्रथमपक्षे सर्वगतजीवस्य इत्यधीनो विषयोपरागः कः इति चेद्विषयविषयिभावसंबन्ध एवेति
केचित्॥ अन्ये तु विषयविषयिभावस्यान्तरपि सम्भवाद्बहिर्निर्गमवैयर्थ्यं जीवस्य तत्तादा
त्म्यापन्नचैतन्यद्वारा विषयेणापरस्यामत्वन्य[illegible]ाचिदुपराग इति वदन्ति॥ परे तु स्तोर्विषयसंयो
गात् तदवच्छिन्नजीवस्यापि विषयेन सह हस्तपुस्तकसंयोगात्कायपुस्तकसंयोगवत्संयोग
जसंयोगश्चिदुपरागमित्याहुः॥ इति संसृष्टव्यापकजीवचैतन्यविषयावच्छिन्नब्रह्मचैतन्याभ
िव्यक्तिरेव चिदुपराग इत्येकदेशिनः॥ ननु द्वितीयपक्षे कथमभेदाभिव्यक्तिरिति चेदत्राहुः के
चित्॥ तडागकेदारसलिलयोरिव कुल्याद्वारा वृत्तिद्वारा विषयान्तःकरणावच्छिन्नचैतन्ययो
रेकीभावोऽभेदाभिव्यक्तिरिति। अन्ये तु ब्रह्मप्रतिबिम्बस्य जीवस्य। इत्याहठनयानिर्गतस्य
स्योपाधौ वृत्तौ विषयोपरागादागतेन विषयावच्छिन्नब्रह्मप्रतिबिम्बेनैकीभावोऽभेदाभि

व्यक्तिरित्याहुः॥ अपरे तु जीवस्य स्वविम्बभूतेन विषयावच्छिन्नब्रह्मणा वृत्तिद्वारैक्याभावोऽभेदा
भिव्यक्तिरिति मन्यन्ते। ननु तृतीयपक्षे को नामावरणाभङ्गः। न वाज्ञाननाश इति वाच्यम्। घटज्ञा
नेनैव मोक्षप्रसक्तेरिति चेदत्राहुः केचित् खद्योतप्रभया महान्धकारस्येव घटादिज्ञानैकदेशना
शः केवलं घटनं वा भीतघटवत्स्खलापनं वाऽऽवरणाभङ्गः इति। अन्ये त्वेकवारं ज्ञेयज्ञाने पुन
रज्ञानदर्शनात्तदाकारवृत्तिसंसृष्टविषयावच्छिन्नचैतन्यानावरकत्वस्वाभाव्यमेवावरणाभ
ङ्गः इत्याहुः॥ अपरे तु पुनरज्ञानतत्त्वांशोपपत्त्यर्थं यावन्ति ज्ञानानि तावन्त्यज्ञानानीति स्वीकृत्य
घटघटावच्छिन्नचैतन्यावरकमूलाज्ञानावस्थाविशेषस्तत्तदाकारवृत्त्या नाश्यावरणाभ
ङ्ग इत्याहुः। इमान्यवस्थाज्ञानानि मूलाज्ञानमिवानादीनीति केचित्। विक्षेपावरणशक्तिम
त्त्वघटबुद्धिजनकनिद्रारूपाज्ञानवत्सादीनीत्यन्ये। ननु नादित्वपक्षे घटज्ञानेन सर्वतज्ञा
ननाशे पुनरावरणानुपपत्तिरेकनाशेपि निगमनाविरहो विक्तिमनाविरहो विषयप्रकाशा

नुपपत्तिश्चेति चेदत्राहुः केचित्॥ यथामेकज्ञानप्रागभावसत्त्वेप्येकज्ञानेनैकस्यैवनाशस्त
थैकज्ञानेनैकाज्ञानमेवनिवर्त्तत इतिश्चन्येत्वितराज्ञानसत्त्वे विषयप्रकाशानुपपत्त्यायदज्ञा
नमावृणोति तदातनज्ञानेनतस्यैवनाशः सर्वेषु सर्वदानावृणोतिवैयर्थ्यादित्याहुः॥ सर्वमज्ञा
नंसर्वदावृणोति तथापियथासन्निपातहरमौषधमेकदोषनाशनेनेतराभिभावकमेव
मेकंज्ञानमेकमज्ञानंविनाश्येतराण्यपितिरस्करोतीति केचित्. नन्वेवम्प्रथमज्ञानेनैवसर्वा
वरणानिवृणोतीतिद्वितीयादिवृत्तियादिवृत्तिवैयर्थ्यमिति चेदत्राहुः केचित्. प्रदीपोपरमेत
मइववृत्तितिरस्कृतमप्यज्ञानम्पुनरावृणोतीति द्वितीयादिवृत्तिसाफल्यमिति. न्यायचन्द्रिकाका
रास्त्वेकज्ञानेनैकाज्ञानस्यनाशएवनेतराज्ञानतिरस्कारः इतिनतदज्ञाननाशेनधारावाहिकद्वि
तीयादिवृत्तिसाफल्यमित्याहुः॥ केचित्तु प्रथमज्ञानमेवाज्ञाननिवर्त्तकं द्वितीयादिज्ञानानितत्त
त्कालविशिष्टाज्ञाननिवर्त्तकानीति द्वितीयादिवृत्तिसाफल्यमित्याहुः॥ ननु नायमपिनियम

श्रीः

मः परोक्षवृत्तेरनिर्गमेनाज्ञानानिवर्त्तकत्वादिति चेदत्र केचित् ॥ द्विविधमावरणमुभयगतं विष-
यगतञ्च तत्र परोक्षवृत्त्या विषयगतावरणं निवृत्तावपि उभयगतावरणानिवृत्तेर्नियमोऽस्ति
इत्याहुः ॥ अन्ये तु उभयगतमेवाज्ञानं शक्तिद्वयवत्तत्र परोक्षवृत्त्या विक्षेपानिवृत्तावप्यावरणा-
निवृत्तेर्नियमोऽस्ति इत्याहुः। इतरे तु विषयगतमेवाज्ञानं तदावृतविषयस्य साक्षिसौवभानत्व-
परोक्षवृत्त्या अपरोक्षज्ञानस्यैवाज्ञाननिवर्त्तकत्वनियमाभ्युपगमादित्याहुः। ननु ज्ञानतन्नाशकत्व-
त्वादिनोवस्तसाक्षात्कारे व्यभिचारान्नायमपि नियम इति चेदन्योतिहत्रिहतिरूपापरोक्षज्ञान-
स्वतन्त्रनियमाभ्युपगमात् ॥ तुल्यादिपक्षस्य साक्षिरूपत्वेन नियमवहिर्भावात्· ननु जीवा-
तिरिक्तः कः साक्षीति चेदत्रोक्तं कूटस्थदीपे· देहद्वयाधिष्ठानकूटस्थचैतन्यं स्वावच्छेददेहद्वयस्य
साक्षादीक्षणात्साक्षीति· नाटकदीपे तु नृत्यशालास्थदीप इव साहंकारचिदाभासेन्द्रियबुद्ध्यादीना-
म्प्रकाशकं कूटस्थचैतन्यं साक्षीति प्रतिपादितं तदेव कूटस्थदीपे जीवब्रह्मकोटिस्तथोक्तयोः स्य

ष्ठजीवेश्वरविभागश्चैतन्यपि न्युक्तम्॰ तत्त्वप्रदीपिकायां प्रतिजीवेश्वरविभागमुक्त्वं शुद्धं पुसै
व साक्षीति प्रतिपादितम्॰ कौमुदीकारास्तु कारणान्वानाक्रान्त ईश्वरस्यैव रूपभेदो जीवातानादिभा
सकः प्राज्ञशब्दवाच्यस्साक्षीत्याहुः । तत्त्वशुद्धिकारास्त्वधिष्ठानकोपन्नगतेदमंशस्यारोप्यकोटौ प्र
भासवत्स्वकोटिरपि साक्षी प्रतिभासतो जीवकोटिरिष्यती हस्तोक्तपक्षमेव समर्थयाञ्चक्रुः । के
चित्त्वविद्योपाधिको जीवऽएव साक्षाद्द्रष्टृत्वात्साक्षीत्याहुः ॥ अन्येत्वन्तःकरणोपाधिको जीवस्तदु
पहितत्वात्साक्षीति प्रतिपुरुषं साक्षिभेद इत्याहुः ॥ ननु विम्बात्रावरकाणानाहेन साक्षिणा कथमन्य
स्य भानमिति चेदत्र केचित्॰ राहुभानकल्पवत्साक्षिणा स्यावकभासकत्वमित्याहुः ॥ साक्षिभा
स्ये घटादिषु संशयापदर्शनात्सातीन चैतन्यस्यावरकमतान्नतु साक्षिण इति वस्तुगतिः ॥ न
नु साक्षिणोऽनावृतत्वेन स्वरूपानन्दस्यापि भानापत्तिरिति चेन्नमास्पदन्वाऽवन्येव भानम् ॥ व
स्तर्हि वन्धमोक्षाविशेषः ॥ वन्धकाहितानन्दस्यपरिच्छिन्नत्वमिति ब्रूमः ॥ ननु साक्षानन्दस्य

श्रीः
८

परिच्छेदेऽपि ब्रह्मानन्दात्कोऽपकर्षो येन बद्धस्यानन्दाप्तिरिति चेदत्राहुरद्वैतविद्याचार्याः॥ मा
लिन्यान्वितदर्पणस्थसूर्यप्रतिबिम्बमालिन्यभानवदन्तःकरणमालिन्यान्विते साक्ष्यानन्दस्यापक
ष्टतया भानाद्बद्धस्यानन्दाप्रतीतावपि सर्वमालिन्यहेत्वपगमान्तु नार्थतेति॥ अन्ये तु साक्षिणश्चिद्रू
पता नावृतत्वात्प्रतीयते सुखरूपता त्वावृतत्वान्न प्रतीयते सापि विषयेन्द्रियसंयोगकालीन
वृत्त्याकारधृतावेव बद्धस्य प्रतीयते मुक्तस्य त्वनावृतनिरतिशयानन्दस्वरूपत्वमेवेति विशेष इ
ति विशेष इति वदन्ति सर्वथा साक्षिचैतन्यस्यानावृतत्वादसावरणाभिभावकवृत्तिमनपेक्ष्यैव
तेनाहमज्ञ इत्यादिप्रकाशनमिति स्थितम्॥ ननु साक्षिज्ञानस्य नित्यत्वेन संस्काराभावात्सुखादिस्मर
णानुपपत्तिरिति चेदत्र केचित्तु सुखाद्यवच्छिन्नसाक्षिणाभिसारापन्नकारूपतेन वृत्तिनाशप्रयुक्तसंस्का
रेणानन्तरस्मरणोपपत्तिरित्याहुः॥ पञ्चदशीतत्त्वप्रदीपिकाकारौ तु साक्षिणस्स्वरूपतो नित्यत्वेऽपि वृत्ति
विशिष्टत्वेनानित्यत्वात्तदाहितसंस्कारेण स्मृत्युपपत्तिरित्याहुः॥ अन्ये तु सौषुप्तस्मृतिकल्पितं

याऽविद्यावृत्त्यासंस्काराधानात्स्मृत्युपपत्तिरित्यावक्ष्यते॰ अपरे तु पामनादिवृत्तिवदहमा
कारवृत्तिरन्तःकरणस्यैवभावे लिङ्गपकरणाजन्यत्वादहमंशेनज्ञानं तन्नाशे संस्कारजन्यत्वेनस्मृ
तित्वाज्ज्ञानमित्याहुः॥ इतरे तु मनोजन्यत्वात्स्मार्तज्ञानमेवेत्याहुः॥ एवं च साऽपरोक्षवृत्तीनामेवा
वरणाभिभावकत्वनियमः फलितः॥ नन्वायमपि नियमो ज्ञातसत्ताकशुक्तिरजतस्थलीये
दंवृत्तौ व्यभिचारादिति चेदत्र केचित्॥ भवत्येव तयाप्यावरणाभिभवः॥ तर्ह्युपादानाज्ञानाद्र
जतोत्पत्तिः कथमिति चेदिदमंशज्ञानवृत्त्यापि शुक्तित्वादिविशेषांशज्ञानसत्वात्तदेवर
जतोपादानमित्याहुः॥ अपरे त्विदमंशज्ञानमेव रजतोपादानन्त्रस्यवेदमाकारवृत्त्यावरणशक्ति
नाशेऽपि विक्षेपशक्तिरजतोपादानमित्याहुः॥ ननु किंह्मखल्विदं रजतमिति विशिष्टगोचरैकै
वैवं या वृत्तिर्दोषसहकृतेन्द्रियसंयोगादुत्पद्यते न तु ततः प्रागिदमंशमात्रगोचरान्या वृत्तिरस्ती
ति तस्याश्चाज्ञाननिवर्तकत्वमदसङ्गावविचारः काकदन्तपरीक्षेति मन्यन्ते अन्ये त्विदमाका

रणेन्द्रियैरन्तःकरणान्तदभिव्यक्तसाक्षिणा तदध्यस्तरजतावभाससम्भवाद्रजताकारवृत्तिर्व्यर्थै स्या
त्॥ केचित्त्विदमाकारान्तःकरणवृत्त्यैकवृत्तिरिदं रजतमित्यधिष्ठानाध्यस्तयोस्तादात्म्यगोच
रान्येरात्यात्॥ इतरे त्वधिष्ठानचैतन्यात्तान अधिष्ठानाकारवृत्त्यवच्छिन्नचैतन्यातानध्यरजताका
रेणातस्तानाभासाकारेणावगुणपदेव· विवर्त इत्याचक्षते· ननु साक्षिणैवाखिलपदार्थभानोप
पत्तेः किं वृत्त्यास्त्वन्यार्थसंस्काराधायवृत्तिश्चेत्तदनिर्गमेपि परोक्षस्थल इव परोक्षस्थलेप्यनिर्ग
तवृत्त्यवच्छिन्नसाक्षिणैव घटादिप्रकाशोपपत्तेरिति निर्गमाङ्गीकारो वृथेति चेदत्र केचित्· घटाद्य
वच्छिन्नसाक्षिणोऽपरोक्षस्थले तत्प्रकाशकत्वात्तदभिव्यक्त्यर्थं निर्गमाङ्गीकारश्चावश्यकः परोक्ष
स्थले व्यवहितेन वृत्तिसंसर्गायोगादगत्याऽनिर्गमकल्पनेति वैलक्षण्यमित्याहुः॥ अन्ये तु सुखा
दिप्रत्यक्षे तत्संसर्गचैतन्यजन्यत्वं क्लृप्तमिति घटादिप्रत्यक्षस्य तथात्वार्थं वृत्तिनिर्गम इत्याहुः

॥ इतरे त्वनुमानागमगतस्यापि यदि स्पष्टतार्थै वृत्तिनिर्गम इत्याचक्षते ॥ नन्वियं स्पष्टता विषयावरकाज्ञाननिवृत्तिरेव सा चानिर्गतवृत्त्यापि सुकरेति वृत्तिनिर्गमवैयर्थ्यं तादवस्थ्यमिति चेन्न परोक्षवृत्त्याप्यज्ञाननिवृत्त्यापत्तेः॥ न चापरोक्षत्वविशिष्टवृत्तित्वेनाज्ञाननाशकत्वमिति वाच्यम्॥ अपरोक्षत्वस्य जातित्वोपाधित्वादिना दुर्निरूपत्वात्॥ केचित्तु विषयगताज्ञानस्य प्रमाताधिकरणाज्ञाननिवर्त्यत्वात्प्रमाताधिकारापायार्थो वृत्तिनिर्गम इत्याहुः। अपरे तु वा स्वतमोनिवर्तकत्वं वा स्वप्रकाशस्यैवेति दृष्टानुरोधात् वृत्तिनिर्गममिच्छन्तीत्याहुः॥ केचित्तु प्रमातृचैतन्यस्य विषयप्रकाशकत्वयचैतन्याभेदाभिव्यक्त्यर्थं वृत्तिनिर्गमापेक्षेत्याचक्षते॥ नन्वयं जीवब्रह्माभेदः किंप्रमाणक इति चेदुपक्रमादिलिङ्गोपहततद्वेदान्तप्रमाणक इति पराणघोषः। यथा चायमर्थस्तथा सिद्धान्तलेशे द्रष्टव्यस्ततोऽप्यधिकं जिज्ञासुभिस्समन्वयाध्याये शारीरकभाष्ये द्रष्टव्यो विस्तरभयादुपारम्यत इति शिवम्॥ ॥

श्री:
१०

इति श्रीमत्परंमहंसपरिव्राजकाचार्यश्रीमत्कैलासावलपतिवर्यशिष्येण श्रीमत्कृष्णगिरिणा संगृही
ते सिद्धान्तलेशे प्रथमः परिच्छेदः॥ ॥ननु कथमद्वितीये ब्रह्मणि वेदान्तानां समन्वयः प्रत्यक्षादिवि
धादिति चेन्न· आरम्भणाधिकरणोक्तश्रुतियुक्तिभिर्ब्रह्मविवर्तरूपप्रपञ्चस्य मिथ्यात्वावगमात्· न
नु घटः सन्नित्यादिप्रत्यक्षविरोधात्कुत्स्नादेराभासत्वमिति चेदत्र केचित्तत्त्वशुद्धिकारादयः॥ प्रत्यक्षम
धिष्ठानब्रह्मसत्त्वविषयमेव घटादिवस्तुभेदस्तु भ्रान्त्येति न विरोध इत्याहुः॥ न्यायसुधाकारास्तु घटादे
रिन्द्रियवेद्यत्वेपि तत्र घट इत्यधिष्ठानसत्तानुवेधेन न स्वतः सत्त्वमित्यविरोध इत्याहुः। संक्षेपशारी
रककृतस्तु अज्ञेयावरणकृत्याभावाद्घटादिप्रत्यक्षस्य तत्त्वावेदकप्रामाण्याभावान्न तत्त्वावेदकश्रु
त्यादिभिर्विरोध इत्याहुः॥ केचित्तु सन् घट इति प्रत्यक्षविषयं सत्त्वं सत्ताजातिरूपं देशकालसम्बन्ध
रूपं वा तच्च न श्रौतमिथ्यात्वविरोधीत्याहुः॥ अन्ये तु सत्त्वं द्विधा ऽबाध्यत्वरूपं सर्वथा ऽबाध्यत्वरूपञ्चेति
तत्राद्यं सन् घट इति प्रत्यक्षविषय इति न तात्त्विकसत्त्वबोधकसत्त्वश्रुत्यादिभिः प्रत्यक्षस्य विरो

धइत्याहुः। परे तु दोषशङ्काकलङ्कितप्रथमप्रवृत्तप्रत्यक्षान्निर्दोषत्वात्परत्वाच्चापच्छेदन्यायेन श्रु
तिर्बलीयसीत्यविरोध इत्याहुः॥ ननु श्रुतेः प्रत्यक्षाद्बलीयस्त्वे यजमानः प्रस्तर इत्यत्र प्रत्यक्षावि
रोधाय यजमानपदस्य प्रस्तरे गौणी वृत्तिः कथमुपपद्यत इति चेदुक्तम्। भामतीनिबन्धे ता
त्पर्यवती श्रुतिः प्रत्यक्षाद्बलवती न श्रुतिमात्रमिति। विवरणानुयायिनस्तु न तात्पर्यवत्त्वे
न श्रुतेः प्रत्यक्षात्प्राबल्यम्। कुशलंभपद्येदिति श्रुतेः अपराणां तात्पर्ये सत्यपि प्रत्यक्षवि
रुद्धस्वापराणां तस्य वेनोपीकरणमात्रे लक्षणावत्तत्त्वमसीतिवाक्यस्य जीवपराभेदता
त्पर्ये सत्यपि प्रत्यक्षविरुद्धस्वार्थाभेदासम्भवेन विशिष्टे लक्षणाङ्गीकारात्। किन्तु निर्दोष
त्वात्परत्वात्परत्वाच्छ्रोत्रगतः श्रुतेः प्राबल्यमित्याहुः। पक्षान्तरमपि तैरुक्तम्॥ कुशलंभपद्ये
त्तत्त्वमसीत्यादौ प्रत्यक्षविरोधभयान्न लक्षणा, अपि तु स्वोपाकवाक्यार्थाभेदयोः कर्तुमशक्य

श्रीः
११

त्वादेवैतस्य पच्छेदन्यायेन श्रुतिरेव बलवतीति॰ न च संजातविरोधित्वन्यायेन पूर्वं प्रत्यक्षमेव बल
वत्कुतो नेति चेन्नैकवाक्यताविषयत्वन्यायप्रवृत्तेरित्यवेहि॥ नन्वेवमुपजीव्यप्रत्यक्षविरु
द्धेर्थे कथं श्रुतेः प्रामाण्यमिति चेदत्र केचित्तु॰ धर्मप्रमाणताधीरणत्वेन शाब्दबोधकारणवर्णप
दादिप्रत्यक्षमात्रमुपजीव्यं स्वरूपोपमर्देपि नोपजीव्यविरोध इत्याहुः॥ अन्ये तु यदुपजीव्यं व्याव
हारिकत्वं तन्नेह नानेति श्रुत्या न निषिध्यते निषिध्यते तु तात्त्विकत्वं तन्नोपजीव्यमित्यविरोध इत्या
हुः॥ अन्ये तु नेह नानास्तीत्यादिश्रुतेस्तत्त्वेन प्रपञ्चनिषेध[illegible]वतात्पर्यं न स्वरूपेणा तथा चोपजी
व्यप्रत्यक्षस्य स्वरूपेणाप्रपञ्चविषयकत्वसम्भवान्नोपजीव्यविरोध इत्याहुः॥ अन्ये तु त्रिविधस
त्त्वानङ्गीकारादेकैव पारमार्थिकसत्ताधिष्ठानब्रह्मगता भान्त्या घटादिषु प्रतिभातीति तद्विषय
कत्वेन प्रत्यक्षस्य चारितार्थ्यान्नोपजीव्यविरोध इत्याहुः॥ ननु ब्रह्मभिन्नानां सत्तातिरिक्तप्रप

भसत्त्वाभासानभ्युपगमे व्यवहितसत्स्वरजतानिरैक्येणाभक्रौरजताभासात्मस्यानुपपत्तिरिति चेन्न व्यवहितस्यासन्निकृष्टस्यापरोक्षासम्भवान्निर्वाह्यपत्त्युपगमात्· नन्वेवम्प्रतिबिम्बस्यापि बिम्बातिरिक्तत्वेनोत्पत्त्यापत्तिः। न चेष्टापत्तिः।। ब्रह्मप्रतिबिम्बस्यापि जीवस्य ततो भेदेन मिथ्यात्वापत्तेरिति चेदत्र विवरणानुसारिणः।। स्वरूपत्वसंस्काराद्यभावान्मभेदमिति भानाच्च मुकुरप्रतिहतनयनरश्मिभिः स्वमुखमेव गृह्यते न मुखाभासस्तस्मिन्दर्पणोत्पन्न प्रत्यङ्मुखत्वं बिम्बभेदाद्वा धर्मानन्तु मुखं गौरवान्नात्र मुखमिति तन्नगलात्त्वानिषेधान्वेत्याहुः। अद्वैतविद्याचार्यास्तु ग्रीवास्थमुखत्वान्यार्थ्यस्यैव भेददर्शनादन्यदेवादर्शेध्यस्तं शुक्तिरजतवन्मुखमित्याहुः।। नन्वधिष्ठानस्य दर्पणस्य ज्ञायमानत्वादधिष्ठानाज्ञानरूपोपादानाभावात्कथं मुखाध्यास इति चेदत्र केचित्।। अधिष्ठानाज्ञानस्यावरणांशेन निवृत्तावपि विक्षेपांशेन सत्त्वान्मुखाध्यासे तदेवोपादानमित्याहुः अन्ये तु दर्पणज्ञानेन तूलाविद्यानाशेपि वस्तुनैकनाशान्मूलाविद्यासत्त्वात्तयैव प्रतिबिम्बाध्यासोपा

दानंव्यावहारिकत्वन्तु तदतिरिक्तदोषजन्यत्वावारणीयमित्याहुः। केचित्तु न्यायेन स्वप्नाध्यासे
पि मूलाविद्यैव हेतुर्जाग्रद्बोधेन तन्निवृत्तिरेव न बाधस्तु तत्त्वज्ञानेनैवेत्याहुः। अन्ये तु मूला
ज्ञानजन्योपि स्वप्नो रज्जुयाथात्म्यज्ञानाभावेपि दंडज्ञानेन सर्पवत्तत्त्वज्ञानाभावेपि जाग्रद्बोधेन
बाध्य इत्याहुः। अपरे तु जाग्रज्जीवप्रपञ्चावरकभूतामूलाज्ञानावस्थाविशेषरूपनिद्रैव स्वप्न
जीवजगतोरुपादानमित्याहुः॥ नन्वयं स्वप्नाध्यासोऽहमनवच्छिन्नसाक्षिणि चेत्तुलादिवद्वृ
त्तिमनपेक्ष्यतेन प्रकाशप्रसंगः॥ अहंकृत्यवच्छिन्ने चेदहं गज इत्यादिप्रतीत्यापत्तिरिति चेदत्रा
द्यपक्षपातिनः केचित्॥ अहमनवच्छिन्नसाक्षिण्येव स्वप्नाध्यासः स च देहान्तरेव। नत्रवान्तःक
रणास्पत्वात्तथा चक्षुराद्यनपेक्षवृत्तिसम्भवात्तदभिव्यक्तसाक्षिभास्य इत्याहुः॥ संक्षेपशारी
रकानुयायिनस्तु त्वतोऽपरोक्षभूतसाक्षिण्येव स्वप्नाध्यासोऽस्माभिव्यक्तेन तेनैव वतः प्रका

शोधस्य मिथ्यत्वेन तदभेदात्ममावापीत्याहुः॥ अस्मेत्त्वहं कृत्यवच्छिन्ने विसृति विस्मेत्त्व प्राप्या
तस्त वापि नाहंकारविशिष्टे किंतु तदुपहितेन तथा वाहंकारस्याविशेषणत्वान्नाहं गज इत्यादिप्रती
त्यापत्तिरित्याहुः॥ अन्यत्तु विम्बचैतन्यस्यैव रजताध्यासवत्प्रपञ्चाध्यास इत्याहुः॥ नन्वेजाग्र
त्कालीनशुक्तिरजतस्य कथं विषाक्षुषत्वेपि स्वप्नप्रपंचस्य वाक्षुषत्वं कथमिन्द्रियाणामुपरत
त्वात्तदानीमात्मस्वयंज्योतिः श्रुतिविरोधेनेन्द्रियकल्पनायोगाच्चेति वेदान्तके विन्॥ अतएव
स्वप्नपदार्थेषु चाक्षुषत्वप्रतीतिर्भ्रम इत्याहुः॥ दृष्टिसृष्टिवादिनस्तु जाग्रत्प्रपञ्चस्यापि प्रातिभासि
कत्वात्तत्रापि चाक्षुषत्वप्रत्ययो भ्रम एव स्वाभिवेयत्वात्सर्वस्येत्याहुः किंतु दृष्टिसृष्टिवादमवल
म्ब्य कृत्स्नप्रपञ्चस्य कल्पितत्वाभ्युपगमे कृत्स्नस्य कल्पक आत्मा निरुपाधिर्वा विद्योपहितो वा नोभ
यमपि मोक्षसंसारयोः विशेषापातात् कल्पकान्तरस्य विद्याप्रसम्भाच्चेति वेदान्तके वित् क

ल्पककल्पनाप्रवाहस्यानादित्वात्पूर्वपूर्वकल्पितविशेषोपहितस्यात्मोत्तरोत्तरविषयाकल्पकस्ततस्तत्का
र्यप्रपंचकल्पइत्याहुः॥ अन्येत्वविषयातिरिक्तप्रपञ्चमात्रे दृष्टिसृष्टिवादोऽङ्गीक्रियतेनाविद्यायामि
पामिति नोक्तदोषइत्याहुः॥ ननु दृष्टिसृष्टिवादे क्षित्यादिस्वर्गतत्कर्मादेः ककल्पकइति चेन्नकोपि
श्रुतिस्वत्वेपु दृष्टिप्रतिपादनत्वध्यारोपापवादन्यायेनाद्वितीयवोधार्थत्वात्तत्रतात्पर्यम्॥ ननु
दृष्टिसृष्टिपदस्यकोर्थइति चेद्दृष्टिसमसमयासृष्टिरिति केचित्॥ अन्येतु दृष्टिरेवविश्वसृष्टि
रित्याहुः॥ केचित्तु पक्षद्वयेमनःप्रत्ययमलभमानाः अन्यक्रपरमेष्ठिसृष्टिमन्वजानस
द्विश्वजन्तत्त्रमातात्प्रसरेणाजीवदृष्टिविषयोभवति न तथापि नैतेनानेति प्रत्यामिथ्यात्वमि
ति दृष्टिसृष्टिवादं रोचयन्ते॥ नन्वेवंसति भाष्यादावदृष्टाराध्यासहेतुदोषसंस्कारादिविना
रूपैवस्यादिति चेदत्रविस्तुवोवार्थ्यः॥ केवलमालिवेपत्वाद्दृष्टिःनृत्तवदृष्टादेःप्राति
भासिकत्वमित्याहुः॥ साक्षिणोऽप्रमाणचैतन्यस्य प्रमाणान्वाभिधानाप्रौढिवादोभाष्यादिकमि

तिरामाह्यावार्याः॥ नन्वहिस्त्र हिस्त्र हि दहिवादयोः प्रपञ्चस्य मिथ्यात्वे कथमर्थक्रियेति वेदन्त्वके विन·स्वप्न इवार्थ समसताकार्थक्रिया त्तागरे पीत्वा रुः॥ अद्वैतविद्या वार्या सत्त्वशफनालरु·मभुजङ्ग·मादिज्ञन्यमनः प्रकाः दकम्पादीनां जागरेप्यनुहत्तेर्न समसताकार्थक्रियानियम इत्याहुः॥ आन्तपश्चतदेशाद्वागन्यमन्द प्रकाशवरुहे प्रवि ७ स्यकल्पितान्धकारेण व्यावहारिकस्खलनाद्यर्थक्रियादर्शनादुक्तमेव ब्रुक्तमित्यपि केचित्·अन्ये त्वर्थक्रियाश्रितपदार्थत्वतपमेवोपयोवोगिनतरुतसत्यत्वमपिमंविनोयेतोयत्वजात्यभावादेवनार्थक्रितेत्याहुः॥ अन्ये तु जलादिप्रहत्यन्यथानुपपत्यानत्राप्यस्येवजाति (र्थक्रियानुसंमूलाध्यास्ताशकाधिष्ठानं विशेषांशतानादेवनेत्यावक्षते॥ ननु रीत्या साक्षिनमिथ्यात्वमिथ्यात्वमालिनवा·आये प्रपञ्चस्य सत्यत्वापत्तिः॥ द्वितीये स्नैव दैनापत्तिरिति वेदन्त्राद्वैतदीपिकायां॥

५८८१

पारमार्थिकपदेन स्वसमसत्ताकौं निरूढिवत्वप्रपञ्चसमसत्ताकमिथ्यात्वेन तत्सत्त्वनिरू
त्या मिथ्यात्वस्य सत्त्वपि मिथ्यात्वे न क्षतिरित्याहुः॥ अन्ये तु शुक्तिसाक्षात्कारानिवर्त्यशुक्तित्वस्य स्व
विरुद्धरजतत्वनिवर्तकस्य प्रपञ्चसाक्षात्कारानिवर्त्यतन्मिथ्यात्वस्य स्वविरुद्धतत्तात्वस्य निवर्तक
त्वं तस्यैवाद्वैतसाक्षात्कारेण निवृत्तेर्नाद्वैतक्षतिरित्याहुः। ननु माभून्मिथ्याप्रपञ्चेनाद्वैतक्षतिस्
तैर्जीवैस्तु स्यादेवेति चेन्न तेषां ब्रह्माभिन्नत्वात्। न च भोगसांकर्यमुपाधिभेदेन व्यवस्थोपपत्तेः॥
ननूपाधिभेदात्कथमुपहितभोगसांकर्यवारणमिति चेदत्र केचिदुपाधितादात्म्येन तद्देहस्या
त्मन्यारोपादसांकर्यमित्याहुः॥ अन्ये तु प्रत्यन्तःकरणं प्रतिबिम्बचिदाभासभोक्तृभेदेन व्यवस्था
तस्य च कूटस्थेन तादात्म्याध्यासान्न च बन्धमोक्षवैयधिकरण्यमित्याहुः॥ अपरे त्वन्तःकरणविशिष्ट
स्य भोक्तृविशेषणभेदेन भेदादसांकर्यं तस्यैव बन्धस्य मोक्ष इति न वैयधिकरण्यमित्याहुः॥

अवरे तु जपाकुसुमोपधानात्स्फटिके लौहित्यमिव कर्तृत्वमौऽन्तःकरणोपधानादात्मनि कर्तृत्वाद्यन्त
रमध्यस्यते न भेदादसाङ्कर्यं तस्यैव बद्धस्य मोक्ष इति न वैयधिकरण्यमित्याहुः॥ इतरे तु जपाकुसुमो
पधानात्स्फटिके लौहित्यमिव कर्तृत्वमोऽन्तःकरणोपधानादात्मनि कर्तृत्वाद्यन्तरमध्यस्यते न भेदादसा
ङ्कर्यं तस्यैवोपधानाभावे मोक्ष इत्यवैयधिकरण्यमित्याहुः।० के तु दर्पणमणिकृपाणाद्युपाधिना मुखे
दीर्घत्वादिवदन्तःकरणोपाधिना निष्कल एव नित्य एव कर्तृत्वाद्यध्यासाद्भोगमोक्षयोरसाङ्कर्यावैय
धिकरण्य इत्याहुः। नतु कऽपाधियद्भेदादसाङ्कर्यमिति चेदत्र केचित् पादावच्छिन्नकण्टकादि
वेदनाया हस्तावच्छिन्नेनाननुभवाद्भोगायतनभेद इत्याहुः। अन्ये तु पादलग्नकण्टकोद्धाराय हस्ता
वच्छिन्नस्य व्यापारदर्शनाद्विच्छिन्नेष्वपि न तनभेद एवेत्याहुः। अपरे तु मानसः स्वस्य तदंशस्य तन्नयेना
नुसंधानाच्छरीरभेदेऽप्यसाङ्कर्यं प्रयोजक इत्याहुः। तथा चाविभुत्वमणुत्वं वा ऽऽत्मनो मध्यमा
नानां नैयायिकादीनां मते पुखडः त्वादिसाङ्कर्यादेः सर्वशरीरव्यापिनोत्मा घनुपलम्भापातादे

थ्वन्नूषणागरास्य तत्वेन तन्मनस्य भ्रान्तिमूलंत्वेन मानान्तरविरोधाभावात्त्वमते सर्वदोषाबोरस्य
लतत्वेन प्रपञ्चस्य मिथ्यात्वेन जीवब्रह्मणोरभेदज्ञानान्मुक्तिसम्भवादद्वितीये ब्रह्मणि सर्ववेदा
न्तानां समन्वयः सिद्धः॥ इति सिद्धान्तलेशलेशे द्वितीयः परिच्छेदः॥ ॥ननु मुक्त्याप्तिहेतुर्विज्ञानं
कर्मवोक्तम्भवतु न इति कर्मणामपि ब्रह्मप्राप्तिहेतुस्मरणात्कथं विद्यैव ब्रह्मप्राप्तिरिति चेन्न
नान्यः पन्था इति श्रुतेर्नित्यप्राप्तितुल्यायां विद्यातिरिक्तसाधनाभावात्। स्मृतिश्रुतिपारम्पर्याहे
तुत्वापरा। क्वतर्हि कर्मणामुपयोग इति चेदत्र भामतीमतानुसारिणः॥ तमेतं वेदानुवचनेनेत्या
दिश्रुतेर्विद्याजननलविविदिषायामुपयोग इत्याहुः। विवरणानुसारिणस्तु विविदिषन्ति
त्यत्र धात्वर्थे वेदानुवचनादीनामन्वयं स्वीकृत्य स्वर्गादिवत्काम्यायां विद्यायामुपयोग इ
त्याहुः॥ तत्रापि केचिद्वेदानुवचनादीनां ब्रह्मचर्याद्याश्रमिकर्मणामेव श्रुत्याकथनाते

णामेव मिव विद्योपयोगो न विधुरादिकृतानामपि स्यात्ः। कल्पतरुकारास्तु निष्कामज्ञपक्षानादौ वि-
धुरादेरप्यधिकारानन्तानामपि विद्योपयोगः स्यात्ः तदनुपायिनस्तु दुरितनाशकानां नित्यानां का-
म्यानामेव कर्मणां विद्योपयोगेन तु स्वर्गादिफलककाम्यानामपि स्यात्ः। संक्षेपशारीरककृतस्तु अतो य-
ज्ञादिशब्दाविशेषान्नित्यानां काम्यानां च विद्योपयोगः स्यात्ः ननु ब्राह्मणा विविदिषन्तीति ब्राह्मणा-
कर्मणामेव विद्योत्पत्त्युपयोगश्च वर्णात्क्षत्रियादिकर्मणां साक्षादेव मुक्तिफलकत्वापत्तिः कर्मणै-
व हि संसिद्धिमास्थिता जनकादय इति चेदत्र वार्तिककाराः॥ अतो ब्राह्मणग्रहणस्य त्रैवर्णिको-
पलक्षणत्वात्क्षत्रियवैश्यकर्मणामपि ब्रह्मविद्योपयोगविधायित्वाविशेषात्· स्मृतौ संनिष्ठि-
पदत्वेनः करणशुद्धिपरमपि स्यात्ः। नन्वर्थित्वाविशेषाच्छूद्रस्यापि विद्यार्थकर्माधिकारः स्यादि-
ति चेदत्र केचित्· वेदार्थज्ञानवतस्त्वत्राधिकाराच्छूद्रस्य वेदाध्ययनाभावेन नाधिकारः स्यात्ः।

अन्ये तु श्रावयेच्चतुरो वर्णानित्यादिस्मृत्येतिहासपुराणश्रवणे शूद्रस्याप्यधिकारात्तस्याश्च रजपदानपाकयज्ञादिषु सर्वेषु सर्वपापक्षयद्वारा पुराणोक्तफलविपाके तु ध्वस्यैवाधिकारित्वात्तुः। नन्वस्तु कर्मणां विनष्टिद्वारा विघ्नोपयोगः तस्मात्तस्य तु किन्त्वारादुपयोग इति वेदत्र केचित्· विघ्नो यत्र प्रतिबन्धकदुरितानि विघ्नन्ति तत्र कानिचित्कर्मभिर्निहतानि पारिशिषदुरितध्वंसद्वारस्तस्मात्तस्य विघ्नोपयोग इत्याहुः॥ अन्ये तु स्वजन्यादृष्टद्वारा तस्मात्तच्छ्रवणादृ·ष्टेन विघ्नोपयोग इत्याहुः॥ अपरे तु दृष्टे तच्छ्रवत्य दृष्टकल्पनायोगादर्हत्यादि प्रयुक्तविघ्नप्रतिबन्धकत्वेन श्रवणात्तथात्वसम्पादनेन तस्मात्तस्य विघ्नोपयोग इत्याहुः॥ नन्वाश्रमान्तरस्याप्यनलसस्य कर्मच्छिद्रेषु श्रवणादितत्परत्वसम्भवात्तस्मात्तद्वैयर्थ्यमिति चेन्न· त्वंपदार्थविवेकाय तस्मात्सर्वकर्मणामित्यादिस्मृत्या सन्न्यासिन एव वेदान्तश्रवणाधिकार इति नि

यमनात्· नन्वेवं क्षत्रियवैश्ययोर्वेदान्तश्रवणानुष्ठानं कथं ब्राह्मणः प्रव्रजेदित्यादिसन्न्यास
विधौ ब्राह्मणपददर्शनेन तयोस्सन्न्यासाभावादिति चेदत्र केचित्· ब्राह्मणः क्षत्रियो वापि वैश्यो
वा प्रव्रजेद् गृहात् त्रयाणां वर्णानां वेदमधीत्य चत्वार आश्रमा इत्यादिस्मृत्या तयोस्सन्न्यासाधि
काराच्छ्रवणापत्तेर्ज्ञानसिद्धिः स्यादुः॥ अन्ये तु श्रुतिषु चतुर्धा श्रवणात्सन्न्यासे ब्राह्मणस्यैवाधि
कारः श्रवणे तु देवादिवदसन्न्यासिनोऽपि क्षत्रियवैश्ययोरधिकार इत्याहुः। अन्ये तु सन्न्यासि
न एव श्रवणे मुख्याधिकारस्तस्यैव च ब्रह्मसाक्षात्कारः ऽगृहस्थब्राह्मणक्षत्रियवैश्यानान्तु श्रव
णाद्यनुमतिमात्रन्तत्फलन्तु जन्मान्तरे भविष्यति देवादीनामनुष्ठेयकर्मवैयर्थ्याभावात्त्वनस्ववा
नन्यव्यापारत्वसम्भवात्तु मुक्तिफलकोपासनास्वधिकार इत्याहुः। ननु क्षत्रियादिकृतं श्रव
णं सन्न्यासरूपाङ्गविकलं कथं जन्मान्तरे फलं दास्यतीति चेदत्र केचित्॥ शुश्रूषोत्पादकपा

गनुष्ठितयत्नात्पूर्वमेव स्वकारितश्रवणादीनां जन्मान्तरीयविद्योत्पादकत्वं पश्यतीत्याहुः। विव
रणाचार्यास्तु श्रवणाद्यभ्यासतः फलप्राप्तेर्लोकप्राप्तपथ्यत्वस्यापि जन्मान्तरे फलपर्यन्तावृत्ती
ऽणा कथं श्रवणानुष्ठाननियमादृष्टाउत्पत्स्यतेविपेत्याहुः। केचित्तु दिनेदिनेववेदान्तश्रवणाद्र
क्षितं पुनात्र॥ ग्रहकृष्णपयालंलक्ष्वाशीति फलंलभेदिति स्मृत्या गृहस्थादिकृतश्रवणादेः
प्रतिदिनानुष्ठानजनिताऽदृष्टमहिम्नैव विद्योपयोगित्वमित्याहुः॥ इत्थं श्रवणादेरेव ज्ञानसाधन
त्वं निरूपितम्। भारतीतीर्थास्तु यत्सांख्यैः प्राप्यते स्थानन्तद्योगैरपि गम्यत इत्यादिस्मृत्या निर्गुण
ब्रह्मोपास्तिरपि तत्त्वज्ञानसाधनमित्याहुः॥ नन्वपक्षद्वयेपि ब्रह्मसाक्षात्कारे किङ्कारणमिति चेद
त्र केचित् सांख्यमार्गे निदिध्यासनात्मकयोगमार्गे उपासनात्मके प्रत्ययाभ्यासरूपप्रसंख्या
नमेवेत्याहुः। अन्येतु प्रसंख्यानसहकृतमनएव ब्रह्मसाक्षात्कारे करणमेषोणुरात्मावे

तस्मा वेदितव्य इत्यादिश्रुतेरित्याहुः॥ अपरे तु तन्त्वौपनिषदम्पुरुषमित्यादिश्रुतेस्तत्त्वमस्यादि
महावाक्यमेव साक्षात्कारैकपरतां मननस्तु सहकारिमात्रमित्याहुः। ननु शब्दस्य परोक्षज्ञानज
कत्वात्स्वाभाव्यात्कथम्महावाक्यादपरोक्षज्ञानमिति चेदत्र केचित्· स्वतोऽसमर्थोऽपि शब्दश्श्रवणा
दिसंस्कृतान्तःकरणोसंस्कृतेःग्रीतेमोः पूर्वमिवापरोक्षज्ञानमुत्पादयतीत्याहुः। अन्ये तु निदि
ध्यासनसहकृतःशब्दः साक्षात्कारे करणं कामिनीसाक्षात्कारे भावनासहकृतमनोवदित्याहुः।
परे तु शब्दस्य परोक्षज्ञानजनकत्वन्न कुलधर्मः। किन्तु परोक्षे विषये तथा ब्रह्म तु यत्साक्षाद
परोक्षादिति श्रुतेर्नित्यापरोक्षमिति तद्विषयमपरोक्षमेवोत्पादयति शब्द इत्याहुः॥ अद्वै
तविद्याचार्यास्तु शब्दादुपमानं ब्रह्मज्ञानं सर्वोपादानत्वविशिष्टब्रह्मसंसृष्टमेवोत्प
पादनेनतोऽज्ञानमूलभेदभ्रमविनाश्यापरोक्षम्भवति· न चैवं वेदाध्ययनमात्रेणा

श्रीः
१८

परोक्षज्ञाने मननादिवैयर्थ्यमिति वाच्यम् चित्तविक्षेपादिप्रदोषशान्त्यर्थत्वान्मननादेरित्या
हुः। ननु ब्रह्मज्ञानेनैव मननादिसहकृतेन घटादिज्ञानेनैव ब्रह्माज्ञाननिवृत्तिः कुतो न स्यादिति चेद
त्राचार्याः॥ न संदृशे तिष्ठति रूपमस्येति श्रुतेर्ब्रह्म चक्षुराद्यविषयमेव। न च ज्ञानेऽज्ञानावरो
णस्याभावाद्घटादिज्ञानेन किंचिन्निवर्त्यमिति वाच्यम् चैतन्यावारकाज्ञानस्य तत्रापि सत्त्वादित्या
हुः॥ केचित्तु तूलाज्ञानविषयो घटादिजडवर्ग इति तज्ज्ञानात् तूलाज्ञानस्यैव निवृत्तिर्ब्रह्मविष
यकमूलाज्ञानस्येत्याहुः॥ अन्ये तु घटादिज्ञानस्य तदवच्छिन्नब्रह्मविषयकत्वेपि श्रोतव्य इति
विधिबलाद्वेदान्तजन्यमेव नियमादृष्टसहितमप्रतिबद्धं ब्रह्मज्ञानं ब्रह्माज्ञाननिवर्तकमित्याहुः।
अपरे तु ज्ञानाज्ञानयोस्समानविषयत्वनियमाज्जीवपराभेदगोचरमूला इति विशेषत्वेनां
ज्ञानस्य तदभेदगोचरमेव तत्त्वमस्यादिमहावाक्यजन्यं ज्ञानन्निवर्तकमित्याहुः। ननु ब्रह्म

ज्ञानस्याप्यज्ञानविरोधित्वाभावात्कथं स्वजनकाज्ञाननिवर्तकत्वमिति चेन्न· पटज्ञानस्यापि
घपटाज्ञितं योगस्य पटनाशकत्ववदज्ञानजन्यत्वापि ज्ञानस्य तन्नाशकत्वसम्भवात्· न
नुज्ञानेनाज्ञाननाशेऽपि नाशकान्तराभावात्कथं ज्ञाननाश इति चेदत्र केचित्· कनकरे
गार्गलमलनाशवत्स्वशमिवज्ञानमज्ञानन्नाशयत्स्वमपि नाशयतीत्याहुः। अन्ये तु तप्तलो
हघासि ज्ञाम्बापो वह्निं निवर्त्यत्वयमिवाज्ञानं निवर्त्य स्वयमपि ज्ञानं निवर्तत इत्याहुः॥ अप
रे तु तृणदाहानंतरं वह्निरिवाज्ञाननाशानन्तरं ज्ञानं स्वयमेवोपशाम्यतीत्याहुः॥ केचित्तु द्वितीय
पज्ञानस्य स्वकारणाज्ञानेनाविरोधानन्त्रतिविन्विन वैतन्यसे वस्त्रर्यकानाष्ठाविरशिव
वदज्ञाननन्नार्यनाशकमित्याहुः॥ अन्ये तु ज्ञानमज्ञानस्यैव नाशकं प्रपञ्चस्य तूपादानना
शादेव नाश इति प्रपञ्चान्तःपाति वृत्तिज्ञानस्यापि तत एव नाशोऽजीवन्[illegible]क्षितिडित्ववि

श्रीः
१९

द्यालेशानुवृत्त्येत्याहुः इति शिवम्॥ ॥इति तृतीयः परिच्छेदः॥ ॥अथ कोयमविद्यालेशो य
दनुवृत्त्या जीवन्मुक्तिरिति चेत् अत्र केचित् प्रारब्धकर्मवर्तमानदेहस्थितिप्रयोजकोऽवि
द्याविक्षेपशक्त्यंश इत्याहुः॥ अन्ये तु क्षालितलशुनभाण्डानुवृत्तलशुनवासनावदविद्या
संस्कार इत्याहुः॥ अपरे तु दग्धपटन्यायेनानुवृत्ता मूलाविद्यैवेत्याहुः। सर्वज्ञात्मगुरवस्तु विरोधित
त्त्वसाक्षात्कारेऽदितेः विद्यालेशोऽपि नानुवर्तते जीवन्मुक्तिशास्त्रन्तु श्रवणादिविधेरर्थवादप
त्याहुः। ननु काविद्यानिवृत्तिरिति चेदत्र ब्रह्मसिद्धान्तिनः॥ आत्मरूपैवाऽविद्यानिवृत्तिरिति तद्बोधा
र्थमेव विद्यापेक्षेत्याहुः। आनन्दबोधाचार्यास्तु द्वैतापत्तिविद्यावैयर्थ्यविरोधप्तानस्थि
तिदोषभयात्सदसत्सदसदनिर्वचनीयातिरिक्ता पञ्चमप्रकारैवेत्याहुः। अद्वैतवि
द्याचार्यास्त्वनिर्वचनीयैवनिवृत्तिः किन्त्वनिति विनाशोपिस्थितिको भावविकार इति मत्वा

वस्तुहतिरित्याहुः। नन्वविद्यानिवृत्तेः क्षणिकत्वे मोक्षस्य स्थिरपुरुषार्थता न स्यादिति चेन्न
तस्यास्तु दुःखाभावेतरत्वेन पुरुषार्थत्वाभावे स्थैर्यत्वाभ्युपगमेऽनर्थविरहस्योपलक्षितप
रमानन्दब्रह्मैवेति केचित्। विमुक्तावस्थायां प्रतिबन्धकाभावविषयैव दुःखाभावस्यापेक्ष
णीयत्वान्न दुःखाभावस्स्वतः पुरुषार्थः किन्तु ब्रह्मानन्द एव तथेत्याहुः। ननु ब्रह्मानन्दस्यापि नि
त्यप्राप्तत्वात्तस्यापकृतानवैयर्थ्यमिति चेदत्र केचित्। स्वालस्य विस्मृतचामीकरवत्प्राप्तिभ्रा
न्तिकाः प्राप्तेर्ज्ञानेन निवृत्त्या प्राप्तस्यैव प्राप्तिमौलीत्याहुः। अन्ये तु परमतिशयानन्दो नास्तीत्यभा
नीति सर्वानुभवति सिद्धावगता व्यावहारिकेवाप्राप्तिरिति तन्निवृत्त्या ज्ञानेन पुरुषस्यैव प्राप्तिरि
त्याहुः। अपरे तु नित्यप्राप्तमपि निरतिशयसुखं माहत्त्वेन परोक्षमप्राप्तं तत्त्वज्ञानेन प्रेम
भत्त्वात्प्राप्तमित्युपवर्ण्यत इत्याहुः। ननु तत्त्वज्ञानेनोपाधिविलये पुरुषस्येश्वरभावापत्तिरत [illegible]

चिद्रूपतेति चेदत्रैकजीववादिनः सर्वव्यापित्वेऽभ्यंतरगतएकजीववदविद्याकल्पितत्वात्तस्य वि-
द्योदयेन विलयाच्छुद्धचिद्रूपतैव मुक्तस्येत्याहुः। अनेकजीववादिनां तु केचित् जीवेश्वरावुभावपि
शुद्धबिम्बप्रतिबिम्बौ नतश्च तत्त्वज्ञानेन जीवोपाधिविलये तु तस्य बिम्बभूतशुद्धचिद्रूपतैवेत्याहुः।
अप्पयदीक्षितास्तु प्रतिबिम्बो जीवो बिम्ब ईश्वर उभयानुगतं शुद्धं चैतन्यं तत्र जीवस्य तत्त्वज्ञानेनोपा-
धिविलये तु तस्य सर्वज्ञत्वसत्यकामत्वादिगुणकबिम्बभूतेश्वरभावापत्तिरित्येव तिल्लत्वप-
व्याप्तित्मर्थमित्याहुः। अयमप्पयदीक्षितानामाग्रहः। श्रीमद्भगवत्पादभाष्यापंर्था ज्ञानविज्ञ-
प्ति तद्दिनीलकण्ठस्तत्कृते विस्तर इति सुधीभिर्ध्येयमिति शिवम्॥ विस्तारविज्ञानरतैरितो
बुधैः सिद्धान्तलेशस्तु विचारणीयः। तल्लेश एवात्र मया प्रदर्शितो वेदान्तसिद्धान्तबुभुत्सुज-
न्तोः॥ १॥ यस्याविवेकतिमिरप्रततानतेऽपि विश्वं विभाति वसुधादिशिवावसानम्॥ यो

नवतिमितस्य न भाति मन्त्रं कैलासपर्वतगुरुजनमहंप्रपद्ये॥ २॥ श्रीशाके व्योमवस्वद्रिविधु
प्रमिते विक्रमस्य प्रमोदे वाणोन्दुकैः नवन्दैः परिमितशशादिग्रामरत्तापृगत्व्ये॥ माते
पौषे कृष्णनगुरुशरतागिरेः प्राप्तथनाऽद्भुतो यं गुल्यः विज्ञानलेशादमितगिरिवंधैस्त्यादवेस्याबो
धानाम्॥ इति श्रीमत्पदवाक्यप्रमाणपारावारश्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्कैलाशा
चलयतिवर्यशिष्येणाश्रीमत्कृष्णगिरिणा संगृहीते विज्ञानलेशलेशे चतुर्थः परिच्छेदः समाप्तः॥
॥ ॥शुभम्॥ ॥ ॥

४१६७

श्रीगणेशाय नमः॥ अथ कश्चिदधिकारी खिन्नस्तं प्रकृतायतु यं कश्चिद्गुरुं वि
नितीकृत्य ब्रह्मतत्त्वं च पुं तदुपाख्यानेन तदाश्रिताखिलसंसारमिथ्यात्वेम
र्थोत्थापितपादकधावस्य लौकिकस्य वैदिकस्य चालीकत्वं च सिद्धवत्कृत्य
तत्प्रतिपादनाय सोपानक्रमन्यायेनाध्यारोपापवादन्यायमाश्रित्यादौ ब्र
ह्मतत्त्वं श्रुतिस्मृतिन्यायैः प्रतिपाद्यते॥ तथा च श्रुतिः॥ सदेव सोम्येदमग्र
आसीदेकमेवाद्वितीयं सत्यं ज्ञानमनन्तं ब्रह्म प्रज्ञानं ब्रह्म। अयमात्मा ब्र
ह्म वाचारंभणं विकारो नामधेयमित्यादि॥ स्मृतिश्च यतः सर्वाणि
भूतानि भवन्त्यादियुगागमे। यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये॥
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा। मत्तः परतरं नान्यत्किंचि
दस्ति धनंजय। अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन इत्यादि॥ पुरा

मोक्ष

चवैकुर्वं । नारायणः सर्वमिदं पुराणः ॥ सकृत्समिद्धमर्दं च वासुदेवं वासुदेवः सर्वमिति । अत्रैवासमेवाग्रे नान्यघेत्सदसत्परमित्यादि न्यायश्च तदनन्यत्वमारंभणशब्दादिभ्यः ॥ अभियुक्तवचनं च भवति । मृल्लोहविस्फुलिंगाद्यैः सृष्टिर्या चोदितान्यथा । उपायः सोवनाराय विदोधो नास्ति किंचन इति ॥ एतादृशामायाविधि । इष्ट परब्रह्मणः सकाशादाकाशादि पंचभूतं तन्मात्रं जायते ततः सूक्ष्मशरीराणि सप्तदशावयवरूपाणि । पंचप्राणमनोबुद्धिदशेंद्रियसमान्वितं । अपंचीकृतभूतोत्थं सूक्ष्मांगं भोगसाधनमित्युक्तानि । ततः स्थूलभूतानि तेभ्यः चतुर्दशभुवनानि स्थूलशरीराणि ब्रह्मांडं चोत्पद्यते । कारणशरीरनिरूपणीनु वाक्षीमुखे सत्रबध्यते । एवमध्यारोपो विवक्षितः । अपवादस्तु । अथात आदेशो नेति नेत्यात्मा । नेह नानास्ति किंचन ॥ यथा

नद्यः स्यंदमानाः समुद्रेऽस्तं गच्छंति नामरूपे विहाय॥ तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यमित्यादिश्रुतिभ्योऽवगम्यते॥ उत्पत्तिव्युत्क्रमेण पुराणे प्रलयस्य निरूपणात् क्रमोऽपि तथैव लयस्य जगतां॥ तथाहि ब्रह्माण्डस्य चतुर्दशभुवनात्मकस्य तदन्तर्वर्त्तिगिरिनद्यादिभूगोलकस्य चतुर्विधस्थूलशरीरस्य तदपेक्षितान्नपानादीनां च पंचस्थूलभूतेषु लयः। तत्रापि पृथिव्याः जले जलस्य तेजसि एवं तेजोवाय्वाकाशादीनां आत्मनि लयः। स्थूलानां सूक्ष्मात्मकेषु तेषां मायायां तस्याः आत्मनि लय इति यावत्। तथा च पुराणे॥ यतस्सूक्ष्ममविज्ञेयमित्युपक्रम्य तस्माद्वाक्राद्यामुह्नन्त नित्याद्युक्तात् ततो द्विपरार्द्धे त्वतिक्रान्ते ब्रह्मणः परमेष्ठिनः॥ तदा प्रकृतयः सप्त कल्प्यन्ते प्रलयाय हि॥ जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते घृत्वा

रम्याव्यक्तपर्यन्तस्य लयमुक्त्वा तदनन्तरं अव्यक्ते पुरुषे ब्रह्मन् निष्कले संप्रलीयते इत्यादिन्यायेपि ब्रह्मभिन्नं मिथ्या। सिद्धान्तसारः। यत्नेवनत्तेव आत्मप्रथा मिथ्यात्वंच स्वाश्रयत्वेनाभिमतयावन्निष्ठत्वेताभावप्रतियोगित्वं। शुक्तिरजतादिदृष्टान्तः॥ इदं चानिर्वचनीयवादे मरुमरीचिकं जेयस्पष्टं विस्तरभयान्नेह लिख्यते॥ ननु भवतु सर्वस्य ब्रह्मभिन्नस्य मिथ्यात्वं तथापि कथं तत्सत्तिमादरूस्य तथात्वमिति चेन्न अदृष्टशब्दलगुणत्वब्रह्मान्यत्वादेव। यद्धि ब्रह्माभिन्नत्वे दृष्टस्य तत्रोत्तरमग्रे वक्ष्यामः॥ सर्वोतःपातित्वादेव तथात्वेपि वेदस्य ब्रह्मरूपस्य सहस्रानेदिकेनाऽमिथ्यात्वस्य वक्तुमशक्यत्वादिति कस्याञ्चिदुक्तानन्तरनवचेददे नामिथ्यात्वं क्रमः॥ किं उक्तं त्याद्यमपद्यावेदाः अवेदाः लोकाः अलोकाः

इत्यादिश्रुतिः ॥ स्मृतिरपि । यामिमां पुष्पितां वाचं प्रवदंत्यविपश्चितः इत्यादिः
विष्णुक्तोऽहं पुष्पफलीति भाष्यकारोदाहरणाच्च । तदनुयायिभिः शाल्मलि
फलोदाहरणाच्च ॥ तत्रैव प्रथमपक्षस्य तत्पदार्थपरत्वं मध्यमस्य तत्पदार्थे दा
परत्वमन्तिमस्य तदैक्यपरत्वं चोपक्रम्य अर्थवादत्वं प्रकटीकृतं । चूडाव
र्जनपयःपानयोः सोपधपानपुण्डप्रदर्शनयोः स्व स्पष्टं लोके पुष्टिकर
त्वमारोप्य जनबुद्धी तदुदाहरणाच्चा वेदः अनित्यः उत्पत्तिमत्वात्
दृष्टान्तः घटवत् अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदः । छंदांसि जज्ञि
रे तस्मात् तस्मान्नेपाना त्त्रयो वेदा अजायंत इत्यादिश्रुतेश्च
अत एव वर्णपदवाक्यसमुदायरूपस्य वेदस्य वियदादिवत्सृष्टि
कालीनोत्पत्तिः प्रलयकालीनध्वंसप्रतियोगित्वं च, तथा च स

3 र्गद्यकाले परमेश्वरः पूर्वसर्गसिद्धवेदानुपूर्व्यसमानानुपूर्वकं वेदं विरचि
तवान्न तु भारतादिवद्विजातीयं वेदं ॥ एतेन वेदापौरुषेयत्वमपि सिद्धं ॥
एतच्चादेवताधिकरणे व्यासाधिकारे च स्फुटं समाननामरूपत्वाच्च श
ब्द इति चेन्नातः प्रभवात् इति सूत्राभ्यां वेदस्यापेक्षिकानित्यत्वं शब्दस्य
च निमित्तकारणत्वं प्रतिपादितं य एवं वेदो मयाधीतः स एव वेद
तेनापीति प्रत्यभिज्ञानात्। स भूरिति व्याहरन्स भूमिमसृजतेत्यादि
श्रुतेश्च ॥ न रूपमस्येह तथोपलभ्यत इति भगवद्वचनाच्च । ननु एवं
केन संगतं शब्दमिथ्यात्वे दृष्टे अर्थस्य तदुदाहरणं अर्थसत्यत्वानि
धानं च। अन्यत्प्रभुक्तमन्यदातं। दृष्टान्तादनादीनां नानीभगवद्वचन
वत् प्रस्तुतं जगत्प्रति शब्दस्य निमित्तकारणत्वे मायायाः उपादा-

उ

नलेपलोख्यमतापातः तथा चाद्वैतमेव पर्यवस्यन्नाद्वैतमपीति संक्षेपतः
द्वयं पक्षः॥ अत्रोच्यते सर्वनामसत्यत्वं द्वैतस्य यत्राद्वैतमिव भवतीति
श्रुतेः लौकिकं तद्वदेव इदं प्रमाणीलालनिश्रयाम् इति॥ समन्वयसूत्र
भाष्ये कत्याच अत्र इद वक्षाद लौकिकप्रामाण्याभ्युपगमात् नहाणि कलस्वेना
वगमात्॥ अतएव न प्रवला श्रुतिः यत्र त्वस्य सर्वमात्मैवाभूत्॥
अत्रात्मैवेत्येवकारश्रवणात् प्रवलं द्रष्टव्यं॥ तदुक्तं आविद्या
वद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति।
घटः सन् इति भानं तु ब्रह्मसत्तयैव। अधिष्ठानसत्ताति
रिक्तसत्तायाः आरोपितत्वात्तत्सत्तायाः अनंगीकारात्॥ तदु
क्तं अस्तिभातिप्रियं रूपं नाम चेत्यंशपंचकं॥ आद्यत्रयं

रूप जगद्दृष्टं तमोदृष्टं। तथा च पूर्वोक्तरीत्या ब्रह्मणः सकाशात् जगतः शब्द
तन्मात्रादेरुत्पत्तावपि कार्यकारणयोरद्वैतवर्णनादिना हानित्वेन शब्द
तन्मात्रा। रूपरसशब्दब्रह्मणो वेदस्यापि ब्रह्मतानन्यलाक्षाविवर्त्तवादाश्र
यणेन तदन्यस्यापवादाद्वा सर्वस्यापि ब्रह्मभिन्नस्य मिथ्यात्वसिद्धेः॥
स्वप्नप्रपंचवन्मरीच्युदकं शुक्तिरजतवद्वेति भावः। तदुक्तं मनुगीता
यां। अनन्तशास्त्रं बहुवेदितव्यं अल्पश्च कालो बहवश्च विघ्नाः यत्सार
भूतं तदुपासितव्यं हंसो यथा क्षीरमिवाम्बुमिश्रं॥ पुराणं भारतं वेदशास्त्रा
णि विविधानि च। पुत्रदारादिसंसारो योगाभ्यासस्य विघ्नकृत्॥ इद
ज्ञानमिदं ज्ञेयं यत्सर्वं ज्ञातुमिच्छति॥ अपि वर्षसहस्रायुः शास्त्रां
तं नाधिगच्छति॥ विज्ञेयोऽक्षरतन्मात्रं जीवितं चापि चंचलं॥ विहा 4

यथा स्वजालानि यत्नत्यं तदुपास्यतां॥ पृथिव्यां यानि भूतानि जंकोपस्य तन्निमि
त्तं॥ जंकोपस्य पार्त्यागे पृथिव्यां किं प्रयोजनं॥ तस्मात्पांडित्यं निर्विद्ये
त्यादिश्रुत्या पांडित्यमुगतं ब्रह्मोपासना प्रतिबंधकत्वेन सर्वमपि हेय
मित्यर्थः तर्हि किं कर्तव्यमित आह॥ अथात्र तत्वानं नाधारादि तस्य छमन्त
त॥ सर्वं खल्विदं ब्रह्मेति श्रुतेः किं च कांकी मुखन्यकारी तं उकारस्थेत
नाकृति। अकारस्य तु लुप्तस्य कोर्थः संप्रतिपद्यते॥ वृत्तुत्वं अन्नं कुःत्वं
अस्य स्तादृति कांकी जीवः तत्पुरुषं ब्रह्म कृकारस्य अतं अति तं अकारः
पंचीकृतानि विराडादि स्थूलप्रपंचः उकारः सूक्ष्मप्रपंचः चेतनस्य हृद
यगर्भस्य तैजसस्याकृतिः वाच्यत्वः मकारस्य शरीरद्वयेत्यारभ्य
एतत्त्रयं मकार इत्यस्य सतचिदानंदरूपस्य लुप्तस्य अकारे. कुन्

रः उकारः मकारः मकारः ओंकारे तुमस्य कोर्थः लक्ष्यस्वरूपं साक्षी चैव
स्य अले लयवस्थानं लभापित्ते अधिकारी संप्रतिपद्यते॥ तदेवी पा
अयत्ता त्ता ग्रह स्यम् आर्य पुरुषे। अहं ब्रह्मास्मि इत्यादि श्रुतिभ्यः। प्रम
शून्यं मनः शून्यं बुद्धिः शून्यमनामयं॥ सर्वशून्यं निराभासं समाधिस्थस्य
लक्षणं॥ त्रिशून्यं यो विजानीयात् स तु मुच्येत बंधनात् जाग्रदा
दस्यतै प्रभा मनो बुद्धिभिः क्रमेणाभिधानात्। शून्यं समत्वाभिभूतके व
स्तुमात्रस्य मिथ्यात्वेन तु यथेत् अमात्रं शब्दरहितं स्वरव्यंजनवर्जि
तं॥ बिंदुनादकलातीतं यस्तं वेद स वेदवित्। पल्लालमिव धान्यार्थः
त्यजेत् ग्रन्थमशेषतः इत्यादिनोक्तेन पदादिकारजातस्य स्तू१स
स्य वैखर्यादे स्थूलस्य वा वेदत्वेन मिथ्यात्वं स्यादे युक्तं॥ आर्थे

प

रपि। नाप्तिर्न तोयं न तेजो न वायुर्न खं इत्युपक्रम्य न वेदा न शा
स्त्रं न शास्ता। इत्यादिना शास्त्रस्य वेदादेर्मिथ्यात्वमुक्तं ले तदेको वः
ष्टः शिवः केवलोहमित्युपसंहृतं॥ तस्मात्सिद्धं ब्रह्मभिन्नस्य वेदादि
प्रपंचस्य मिथ्यात्वमिति सर्वं अतिविस्तरेण॥ इति श्री परमहंसपरि
व्राजक श्री रामचंद्रानंद तीर्थ शिष्य स्वरूपघनानंद तीर्थ
कृतौ अनिर्वचनीयवादः समाप्तः॥ शुभमस्तु श्री लक्ष्मीनृ
सिंहार्पणमस्तु॥ लिखितमिदं पुस्तकं पादस्थ। ब्रावरामेण लक्ष्म
णमध्य पंचमावसरे। संवत् १९५८ ३१ पौषे मासि आसते॥

अनुशेते

जीवः संसारितां जुषमाणो सेवमा-
नः तदधीनतया तिष्ठतीति॥

अनिर्वचनीयवादः
वैराग्यादिसंपन्नः

अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः अजो ह्येको जुषमाणो-
नुशेते जहात्येनां भुक्तभोगामजोन्यः॥ द्वा सुपर्णा सयुजा सखाया समानं वृ-
क्षं परिषस्वजाते॥ तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति

आलिंगितवंतौ

कर्मफलं सुखादि

स्वप्रकाशात्मपूर्ण

६१५०

श्री ५ को सरकार

श्रीगणेशाय नमः ॥ ॥ अखंडं सच्चिदानन्दमवाङ्मनसगोचरम् ॥ आत्मा
नमखिलाधारमाश्रयेऽभीष्टसिद्धये ॥ १ ॥ अर्थतोप्यद्वयानन्दानतीतद्वैत
भानतः ॥ गुरूनाराध्य वेदान्तसारं वक्ष्ये यथामति ॥ २ ॥ वेदान्तो नामोपनिषत्प्र
माणम् । तदुपकारीणि शारीरकसूत्रादीनि च । अस्य वेदान्तप्रकरणत्वात्तदी
यैरेवानुबन्धैस्तद्वत्तासिद्धेर्न ते पृथगालोचनीयाः । तत्रानुबन्धो नाम । अधि
कारिविषयसंबन्धप्रयोजनानि । अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वे
नापाततोधिगताखिलवेदार्थोस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्ज

नपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिऽलकल्मषतयानितान्तनिर्मलस्वान्तः साधनचतुष्टयसंपन्नः प्रमाता अधिकारी· काम्यानि स्वर्गादीष्टसाधनानि ज्योतिष्टोमादीनि· निषिद्धानि नरकाद्यनिष्टसाधनानि ब्रह्महत्यादीनि· नित्यानि अकरणे प्रत्यवायसाधनानि संध्यावन्दनादीनि· नैमित्तिकानि पुत्रजन्माद्यनुबंधीनि जातेष्ट्यादीनि· प्रायश्चित्तानि पापक्षयसाधनानि चान्द्रायणादीनि· उपासनानि सगुणब्रह्मविषयमानसव्यापाररूपाणि शांडिल्यविद्यादीनि· एतेषां नित्यादीनां बुद्धिशुद्धिः परं प्रयोजनं· उपास

नानांतु चित्तैकाग्र्यं· तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दा
नेन तपसानाशकेनेत्यादिश्रुतेः· तपसा कल्मषं हन्ति विद्ययामृतमश्नुते· इति
स्मृतेश्च· नित्यनैमित्तिकप्रायश्चित्तोपासनानांतु अवान्तरफलं पितृलोकस
त्यलोकप्राप्तिः· कर्मणा पितृलोको विद्यया सत्यलोक इति श्रुतेः· साधनानि· नि
त्यानित्यवस्तुविवेकेहामुत्रार्थफलभोगविरागशमदमादिषट्कसंपत्तिमुमु
क्षुत्वानि· नित्यानित्यवस्तुविवेकस्तावत्· ब्रह्मैव नित्यं वस्तु ततोन्यदखिलम
नित्यमिति विवेचनं· ऐहिकानां स्रक्चन्दनवनितादिविषयभोगानांक

र्मजन्यतयाऽनित्यत्वात्· आमुष्मिकाणामप्यमृतादिविषयभोगानामनित्य
तयातेभ्योनितरांविरतिरिहामुत्रार्थफलभोगविरागः ·शमादयस्तु·शमदमो॰
परतितितिक्षासमाधानश्रद्धाख्य· शमस्तावत्·श्रवणादिव्यतिरिक्तविषयेभ्यो
मनसोनिग्रहः ·दमोबाह्येन्द्रियाणांश्रवणादितद्व्यतिरिक्तविषयेभ्योनिवर्त
नं·निवर्तितानांतेषांतद्व्यतिरिक्तविषयेभ्यउपरमणमुपरतिः ·अथवाविहिता
नांकर्मणांविधिनापरित्यागः ·तितिक्षाशीतोष्णादिसहिष्णुता·निगृहीतस्य॰ द्वन्द्व२
मनसःश्रवणादौतदनुगुणविषयेचसमाधिःसमाधानं·गुरुवेदान्तवाक्येषु

विश्वासः श्रद्धा· मुमुक्षुत्वं मोक्षेच्छावत्वं· एवंभूतः प्रमाताऽधिकारी· शान्तो दांत
इति श्रुतेः· उक्तं च· प्रशान्तचित्ताय जितेन्द्रियाय प्रहीणदोषाय यथोक्तकारिणे
गुणान्विताया नुगताय सर्वदा प्रदेयमेतत्सततं मुमुक्षवे इति· विषयस्तु जीवब्र
ह्मैक्यं शुद्धचैतन्यं प्रमेयं· तत्रैव वेदान्तानां तात्पर्यात्· संबंधस्तु तदैक्यप्रमे
यस्य तत्प्रतिपादकोपनिषत्प्रमाणस्य बोध्यबोधकभावलक्षणः· प्रयोजनं
तु· तदैक्यप्रमेयगताज्ञाननिवृत्तिः स्वस्वरूपानन्दावाप्तिश्च· तरति शोकमात्म
वित्· ब्रह्मविद्ब्रह्मैव भवतीत्यादिश्रुतेः· अयमधिकारी जननमरणादिसंसा

रानलसंतप्तोदग्धशिराजलराशिमिवोपहारपाणिः श्रोत्रियंब्रह्मनिष्ठंगुरुमुपसृत्यतमनुसरति· समित्पाणिः श्रोत्रियंब्रह्मनिष्ठमित्यादिश्रुतेः· सपरमकृपयाध्यारोपापवादन्यायेनैनमुपदिशति तस्मैसविद्वानुपसन्नायप्राहेत्यादिश्रुतेः· असर्पभूतायांरज्जौसर्पारोपवद्वस्तुन्यवस्त्वारोपोध्यारोपः· वस्तुसच्चिदानन्दाद्वयंब्रह्म· अज्ञानादिसकलजडसमूहोवस्तु· अज्ञानंतुसदसद्भ्यामनिर्वचनीयंत्रिगुणात्मकंज्ञानविरोधिभावस्वरूपंयत्किंचिदितिवदन्ति· अहमज्ञइत्यनुभवात्· देवात्मशक्तिंस्वगुणैर्निगूढां· इत्यादिश्रुतेश्च· इदमज्ञानंसमष्टिव्यष्ट्यभिप्रायेणै

8945

श्रीगणेशोजयति॥ ॥अतमरवपूजितपादंअतपथमनुसोप्पगोचराकारं॥विकसितजलरुहनेत्रंसीतावामांकमाश्रयेरामं॥१॥इहभगवान्शंकराचार्यः।उत्तमाधिकारिणांवेदांतप्रस्थानत्रयंनिर्मायतद्वल्लोकनासमर्थानांमंदबुद्धीनामनुग्रहार्थंसर्ववेदान्तसिद्धान्तसंग्रहंआत्मबोधप्रकरणमिदंनिर्दिदक्षोयिषुःप्रतिजानीते॥तपोभिरिति॥कृच्छ्चांद्रायणानित्यनैमित्तिकानुष्ठानरूपैस्तपोभिःक्षीणपापानिरागाद्यैतैःकरणदोषायसांतेषांनित्यनैमित्तिकैर्वकुर्वतोमु

श्रीगुरुगणेशोजयति॥ ॥तपोभिःक्षीणपापानांशान्तानांवीतरागिणां।
मु॥मुमुक्षूणामपेक्ष्यायमात्मबोधोविधीयते॥१॥राम॥राम॥राम॥

रितक्षयइतिवचनात्॥अतस्त्वशांतानांअशेषमितपापानांमदोतरागिणांइहामुत्रार्थफलभोगरागरहितानांमुमुक्षूणांसंसारबंधविच्छेदनेकृतप्रयत्नानांयथोक्तसाधनसंपन्नानांअयमात्मबोधोविधीयते॥विधिरवेनअवश्यकर्तव्यप्रतिपाद्यतइत्यर्थः॥१॥श्री॥ॐनमोभगवतेवासुदेवायश्रीकृष्णायपरब्रह्मणेनमोनमः॥६

५=किमात्मज्ञानेनेत्याशंक्य॰।कर्मोऽग
नयोर्विरोधाभा=५

ननुतपोयोगमंत्रकर्मयोगाद्यनेकसाधनेषुसत्सुमोक्षंप्रतिबोधस्यैवकिमितिप्राधान्येनोच्यतइत्यत्राह॥बोधो
न्येति॥तपोमंत्रकर्मयोगादिसाधनानिपरंपरयाक्रमेणज्ञानद्वारामोक्षंसाधयन्ति॥ज्ञानंतुस्वजन्ममात्रादेवाज्ञानं
निरवशेषंनाशयित्वोत्कृष्टश्रेयःस्वाराज्येऽभिषेचयति॥अतोन्यसाधनेभ्योज्ञानस्यप्राधान्यमुक्तं॥तदेवदृष्टान्तेनद्रढय
ति॥पाकस्येति॥यथालोकेपचनक्रियायांकाष्ठजलभाण्डादिसाधनेषुसत्स्वपिवह्निंविनातन्नसिध्यतितद्वत्ज्ञानंविनामोक्षो
नसिध्यतीत्यर्थः॥२॥ननुकर्मणाविचित्रशक्तिमत्त्वात्कर्मैवाज्ञानंनाशयिष्यतीतिवाच्येवमित्याह॥अविरोधितेति॥अ

बोधोन्यसाधनेभ्योहिसाक्षान्मोक्षैकसाधनम्॥पाकस्यवह्निवत्ज्ञानंविनामोक्षोनसिध्यति॥२॥
अविरोधितयाकर्मनाविद्यांविनिवर्तयेत्॥विद्याविद्यांनिहन्त्येवतेजस्तिमिरसंघवत्॥३॥अवछिन्न
इवाज्ञानात्तन्नाशेसतिकेवलः॥स्वयंप्रकाशतेह्यात्मामेघापायेंऽशुमानिव॥४॥ मेणोऽविद्याविरोधाभा

वादज्ञानंनाशयितुंनोत्सहते।विद्यातुप्रकाशरूपत्वात्घनतमःतेजःपुंजइवनाशयितुंसमर्थेत्यर्थः॥३॥ननु
प्रतिशरीरमात्मापरिच्छिन्नएवोपलभ्यतेकथमस्यकैवल्यमित्यत्राह॥अवछेति॥परिपूर्णस्यापिसतस्त्वात्मनःअ
ज्ञानपरिकल्पितोऽयंच्छरीरादावासक्तःपरिच्छिन्नत्वंअविवेककृतमेवानतत्त्वदृष्ट्या।अतोविवेकेनअविवे

केनष्टात्माकेवलस्वप्रकाशतेमेघावरणा
भावेभानुवदित्यर्थः॥४॥

आ॰बो॰टि॰
२

मध्यदेरी समाधयानि मनीपिज्ञाति [illegible]

नन्वात्मज्ञानादद्वैतसिद्धिरुक्ता वृत्तिज्ञानेन द्वैतसिद्धिरित्यत्राह॥ अज्ञानेति॥ अज्ञानकार्यभूतै रागादिभिः कलुषीकृतं कर्तृत्वभोक्तृत्वाद्यभिमानिनं जीवं ब्रह्मज्ञानसाधनचतुष्टयकालाभ्यासाद्ज्ञानहानं हत्वा तत्कार्यान्तःकरणादि कर्मक्षयतो नाशयित्वा स्वयमपि नश्यति अज्ञानकार्यत्वाज्ज्ञेः तत्प्रतिबिम्बवितज्ञानमात्माभ्यासात्त्वादात्मन्येव कश्चिन्भवति तदानीमद्वयस्वात्मप्रकाशनेन॥ यथा कतकरेणुरिव जलं जलं निर्मलं कृत्वा स्वयमपि नश्यति तद्वदित्यर्थः॥५॥ ननु अपरोक्षतयाऽनुभूयमानस्य संसारस्य कथमसत्त्वं नासत्त्वं प्रत्यक्षविरुद्धमित्याशंक्य स्वप्नदृष्टान्तेन तस्य मिथ्यात्वं साधयति॥ संसार इति॥ रागद्वेषादिभिः संकुलायमानः संसारः स्वकाले स्व

अज्ञानकलुषं जीवं ज्ञानाभ्यासाद्विनिर्मलम्॥ कृत्वा ज्ञानं स्वयं नश्येज्जलं कतकरेणुवत्॥५॥ संसारः स्वप्नतुल्यो हि रागद्वेषादिसंकुलः॥ स्वकाले सत्यवद्भाति प्रबोधे सत्यसद्भवेत्॥६॥ श्रीवासुदेवाय

स्यकारणभूताज्ञाने स्थिते सति तावन्मिथ्याभूतोपि संसारः सत्य इवाभाति॥ प्रबोधे सति वाक्यश्रवणादात्मज्ञानोत्पत्तौ असन्नेव भवति॥ तत्र दृष्टान्तः स्वप्नतुल्येति॥ स्वप्नेपि यावन्निद्रानुरूपे तावन्मिथ्याभूतोपि सत्य इवाभाति॥ प्रबोधे निद्रानाशे मिथ्या॥ तद्वत्॥६॥ शिवः॥

प्रद्युम्न
२

जगन्मिथ्यात्वेनदृष्टं॥तांतदेवदृष्ट्यपैति॥तावदिति॥यथायावन्नीलत्रिकोणादिविशेषज्ञानंनोत्पद्यतेतावद्रजतज्ञानंसत्यमिवानुभूयते॥त
थासर्वाधिष्ठानभूतंसच्चिदानन्दाद्वयंब्रह्मयावन्नज्ञायते॥साक्षान्नानुभूयतेतावज्जगदेकारोपादिगतःसंसारःसत्यइवभ्रान्त्यादृश्यत
इत्यर्थः॥७॥सर्वंदृश्यप्रपञ्चजातंब्रह्मण्येवमायाकल्पितमितिप्रतिपादयति॥सच्चिदिति॥सत्यज्ञानानंदात्मनिभृत्यपृथ्वानुस्यूतेनि
विष्णौव्यापकेपरब्रह्मणि॥सर्वाव्यक्तयःदेवतिर्यङ्नरस्थावरजङ्गमादयोपिविविधाआपव्यक्तयःसर्वोपादानभूतेपरमेश्वरेहेम्नि

तावत्सत्यंजगद्भातिशुक्तिकारजतंयथा॥यावन्नज्ञायतेब्रह्मसर्वाधिष्ठानमद्वयम्॥७॥सच्चिदा[illegible]
त्मन्यनुस्यूतेनित्येविष्णौप्रकल्पिताः॥व्यक्तयोविविधाःसर्वाहाटकेकटकादिवत्॥८॥यथा
काशोहृषीकेशोनानोपाधिगतोविभुः॥तद्भेदाद्भिन्नवद्भातितन्नाशेसतिकेवलः॥९॥९॥९॥

कटकमुकुटादयइवक[illegible]ल्पिताः॥एवंब्रह्मणोअभिन्नाइत्यर्थः॥यदुक्तं॥तत्रदृष्टान्तः॥उपादानेऽखिलाधारेजग
न्तिपरमेश्वरम्॥सर्गस्थितिलयंयान्तिबुद्बुदाइववारिणि॥८॥उक्तमर्थमाकाशदृष्टान्तेनदर्शयति॥यथेति॥हृषीकेशोमनःप्र
भृतिसर्वेन्द्रियप्रवर्तकोनियामकोवा॥विभुःसर्वगतःपरमेश्वरःस्वमाययाकल्पितनानाविधोपाधिप्राप्तिंविंदितःसन्नानेवाभा
ति॥तन्नाशेति॥ब्रह्मात्मै[illegible]ज्ञानेनतेषांमायाकल्पितदेहाद्युपाधीनांनाशेसतिकेवलएकस्वभवति॥यथाएकस्याकाशो

घटाद्युपाधिभिरेकएवभवति॥उपाधिविलयादेकएवभातितद्वदित्यर्थः॥९॥[illegible]॥९॥

आ॰बो॰टि॰
३

बरा॥

ग॥१

ननु सर्वदेहेषु तत्तज्जात्यादिभिरनुविद्धस्य कथं नित्यत्वमुच्यते तत्राह । नानेति ॥ पूर्वोक्तं नानोपाधिवशाद्देवात्मनि जातिनामाश्रमादयः आ
रोपिताः मायया परिकल्पिताः न तु स्वतः । यथा स्वभावमाधुर्यं जलं केदुतिक्षाराम्लरक्तपीतादिद्रव्योपेतं सत् । तत्तद्रूपं भवति न तु स्वरूप
तः तद्वदित्यर्थः ॥१०॥ आत्मनोऽविद्याकल्पितोपाधित्रयमाह । पञ्चीकृतेति ॥ पञ्चानां भूतानां प्रत्येकं द्विधा विभज्यते एकैकमर्द्धं चतुर्धा
विभज्य स्वांशं परित्यज्य तेषु योजनं पञ्चीकरणम् एवं पञ्चीकृतेभ्यः स्थूलपृथिव्यादिमहाभूतेभ्यः संभवो यस्य तत्संभूतं प्रारब्धकर्मभिः
संचितं चितं स्थूलशरीरं सुखदुःखभोगायतनं भोगस्थानं प्रत्यगात्मन इति ॥११॥ सूक्ष्मोपाधिमाह । पञ्चेति ॥ पञ्चप्राणास्कत्ये

नानोपाधिवशादेव जातिनामाश्रमादयः । आत्मन्यारोपितास्तोये रसवर्णादिभेदवत् ॥१०॥ पञ्चीकृ
तमहाभूतसंभवं कर्मसंचितं । शरीरं सुखदुःखानां भोगायतनमुच्यते ॥११॥ पञ्चप्राणमनोबुद्धिदशे
न्द्रियसमन्वितम् ॥ अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम् ॥१२॥ अनाद्यविद्यानिर्वाच्या कारणो
पाधिरुच्यते ॥ उपाधित्रितयादन्यमात्मानमवधारयेत् ॥१३॥ वमाहताः प्राणस्य प्राणादयो वृत्तयः । ज्ञानेन्द्रि

यकर्मेन्द्रियभेदेन इन्द्रियाणि दश । मनःशब्देन संकल्पविकल्पात्मिकान्तःकरणवृत्तिः बुद्धिः निश्चयात्मिका । एतैः संयुक्तं अपञ्चीकृतसूक्ष्म
भूतोत्थं जातं सूक्ष्माङ्गं लिङ्गशरीरं सुखदुःखभोगसाधनमुच्यत इत्यर्थः ॥१२॥ तृतीयं कारणोपाधिमाह । अनाद्येति । सदसद्भ्या
निर्वाच्याऽविद्याऽनादिनादिभूता कारणोपाधिरुच्यते सच व्यष्टिसमष्टिभेदेन स्थूलसूक्ष्मप्रपंचयोः कारणभूतत्वात्कारणोपा

धिरुच्यते । उपाधित्रयकथने प्रयोजनमाह । उपाधी
ति तत्साक्षिणमात्मानमवधारयेत् । जानीयादित्यर्थः ॥ ॥१३॥

प्रद्युम्नं
३

ननु अन्नमयादिषु पंचकोशेषु व्याप्य तत्तन्मयतया स्थितस्य कथं नित्यशुद्धत्वमित्याशंक्याह। पंचेति। अन्नमयप्राणमयमनोमयविज्ञानमय
आनन्दमयाः पंचकोशाः। आदिशब्देन गीतादीनां ग्रहणम्। एतैर्योगेन मिथ्यातादात्म्येन तत्तन्मय इवावस्थितः आत्मा शुद्धः। ननु तेषु वस्तुतो ज्ञा-
तो विदेहेपि सर्वस्यापि पुरुषोन्नरसमय इत्यादिश्रुतिभिः सूक्ष्मवस्तुदर्शनार्थमेवोपाधिस्थं ब्रह्म सूच्यते न तु तत्त्वदृष्ट्या। यथा निर्मलस्फटिको
नीलपीतवस्त्रादियोगेन तत्तन्मय इवाभाति। वस्तुतो नास्ति तस्य ज्ञानात् तद्वदित्यर्थः॥१४॥ असंगात्मस्वरूपज्ञानविवेचनप्रकारमा-
ह॥ वपुस्तुषेति॥ पंचकोशैर्युक्तं तावदात्मनि स्थितं वपुः स्थूलशरीरं तुषादिभिर्युक्तं तंडुलमिव युक्त्यावघाततः अवहननात् शुद्धमंतरमात्मानं

पंचकोशादियोगेन तत्तन्मय इव स्थितः॥ शुद्धात्मा नीलवस्त्रादियोगेन स्फटिको यथा॥१४॥ वपुस्तुषा
पुस्तुषादिभिः कोशैर्युक्तं युक्त्यावघाततः॥ आत्मानमंतरं शुद्धं विविच्यात्तंडुलं यथा॥१५॥स
दा सर्वगतोप्यात्मा न सर्वत्रावभास्यते॥ बुद्धावेवावभासेत स्वच्छेषु प्रतिबिंबवत्॥१६॥छ॥छ॥

विविच्यात्। विवेकेन जानीयात्। अयं स्थूलदेहो नात्मा भूतकार्यत्वात् घटवत्। सूक्ष्मदेहो[illegible]पि तथैव नात्मा देहत्वा-
त्। स्थूलदेहवत्। इत्यनुमानादिना तेभ्यः कोशेभ्यो भिन्नमात्मानं विवेकेन विविच्य जानीयादित्यर्थः॥१५॥ ननु यदि आत्मा चेत्सर्व-
गतस्तर्हि किं सर्वत्र सर्वैर्न दृश्यत इत्यत्राह॥ सदेति॥ आत्मा सदा सर्वगतोपि सर्वत्र व्याप्यास्थितोपि जडैः बहिःपूर्वतार्थो न प्रका-
शते। स्तम्भादिभिर्हिता। बुद्धावेव अवभासेत प्रकाशते। न सर्वत्र। यथा प्रतिबिम्बः स्वच्छेषु दर्पणादिषु दृश्यते नान्यत्र। त-

द्वदित्यर्थः॥१६॥छ॥

हरिः

देहेष्ववस्थितस्यापि आत्मनः औदासीन्यं राजपुत्रदृष्टान्तेनाह॥ देहेन्द्रियेति॥ देहेन्द्रियमनोबुद्धिप्रकृतिभ्यो जडपरिणामिदृश्येभ्यो विलक्षणं शुद्धात्मानं तद्वृत्तीनां साक्षितया स्थितम्। यथा राजा स्वनगरे स्थितानां तेषु प्रवृत्तमानेषु स्वयं साक्षितया तान्पश्यंस्तिष्ठति तद्वज्जानीयादित्यर्थः॥१७॥ ननु आत्मनोऽविकारित्वमयुक्तं सर्वदा व्यापारवान् दृश्यते तत्राह॥ व्याप्तेष्विति॥ इन्द्रियादिषु स्वस्वविषयेषु व्याप्तेषु सत्सु आत्मा व्यापारीवाविवेकिभिः शुद्धस्वात्मज्ञानादुपदेशरहितैर्दृश्यते न तु तत्त्वदृग्भिः। यथा मेघधावतोऽभ्रेषु वायुवशाद्धावत्सु चन्द्रोऽपि धावतीव लौकिकैर्दृश्यते न तु चन्द्रमा धावति तथात्मापीत्यर्थः॥१८॥ ननु देहेन्द्रियमनोबुद्ध्योऽपि सचेतना दृश्यन्ते किमात्मचैतन्येन तत्राह॥

देहेन्द्रियमनोबुद्धिप्रकृतिभ्यो विलक्षणम्। तद्वृत्तिसाक्षिणं विद्यादात्मानं राजवत्सदा॥१७॥
व्याप्तेष्विन्द्रियेष्वात्मा व्यापारीवाविवेकिभिः॥ दृश्यतेऽभ्रेषु धावत्सु धावन्निव यथा शशी॥१८॥
आत्मचैतन्यमाश्रित्य देहेन्द्रियमनोधियः॥ स्वकीयार्थेषु वर्त्तन्ते सूर्यालोकं यथा जनाः॥१९॥
देहेन्द्रियगुणान्कर्माण्यमले सच्चिदात्मनि॥ अध्यस्यन्त्यविवेकेन गगने नीलतादिवत्॥२०॥

आत्मेति॥ नित्यज्ञानस्वरूपात्मचैतन्यमाश्रित्य देहेन्द्रियमनोबुद्ध्यादयः स्वकीयार्थेषु स्वस्वविषयेषु वर्त्तन्ते। यथा जनाः प्राणिनः सूर्यप्रकाशमाश्रित्य स्वस्वव्यापारेषु व्यवहरन्ति। अतः चैतन्यं ज्ञानं आत्मन्येव देहेन्द्रियादयस्तु वस्तुतः जडा इत्यर्थः॥१९॥ नन्वहं जातोऽस्मि बालकौमाराद्यवस्थामनुभवामि पश्यामीत्याद्यनवरतमनुभूयमानस्यात्मनः कथमविकारित्वं चेत इत्यत्राह॥ देहेन्द्रिये

ति॥ देहेन्द्रियमनोबुद्धिधर्मांश्च गुणान्स्थूलत्वादीन्कर्माणि चाकर्मेन्द्रियव्यापारान्मिथ्यातादात्म्येन स्थितेऽपि निर्मलेऽसंकल्पे सच्चिदानन्दात्मके व्यापके परमात्मन्यतत्त्वाभीप्याद्

य

२ विवेकतोऽध्यस्यन्ति। यथा गगने नीलतादिवत्। अतस्ते आत्मधर्मा न भवन्ति। अपि तु देहादीनामेवेत्यर्थः॥२०॥२०॥ ॥

ननुकर्तृत्वभोक्तृत्वादिकमात्मन्यनवरतमनुभूयमानत्वाद्दुर्वारमित्याशंक्य तदपि तथैव मिथ्येत्याह ॥अज्ञानेति॥ अज्ञानवशान्मानसोपाधिस्तस्यैव कर्तृ
त्वादयोधर्माः तत्वाज्ञानवशादात्मनि कल्प्यन्ते यथांभसश्चलनादिकं अंबुनि प्रतिफलितचन्द्रमसि अविवेकतः कल्प्यते तद्वदित्यर्थः ॥२१॥
इच्छाद्वेषसुखदुःखादीन् आत्मधर्मान्मन्यन्ते वैशेषिकादयः तन्निराकरोति ॥द्वेषेछेति॥ द्वेषेच्छासुखदुःखप्रयत्नादिकं सर्वं बुद्धेरेव न त्वात्मनः
कथं जाग्रत्स्वप्नयोः बुद्धौ सत्यां प्रवर्त्तते सुषुप्तौ तु तस्याः बुद्धेः नाशे कारणे लयेन प्रवर्त्तते तस्माद्बुद्धेरेव धर्माः न त्वात्मन इति ॥२२॥ तर्हि कोह

अज्ञानान्मानसोपाधेः कर्त्तृत्वादीनि चात्मनि। कल्प्यंतेंबुगते चन्द्रे चलनादि यथांभसः ॥२१॥ द्वेषेच्छासुखदुः
खादि बुद्धौ सत्यां प्रवर्त्तते ॥ सुषुप्ते नास्ति तन्नाशे तस्माद्बुद्धेस्तु नात्मनः ॥२२॥ प्रकाशोर्कस्य तोयस्य शैत्यमग्ने
र्यथोष्णता ॥ स्वभावः सच्चिदानन्दनित्यनिर्मलतात्मनः ॥२३॥ आत्मनः सच्चिदंशश्च बुद्धेर्वृत्तिरिति द्व
यम् ॥ संयोज्य चाविवेकेन जानामीति प्रवर्त्तते ॥२४॥ श ॥आत्मनः स्वभाव इत्याशंक्य आत्मस्वभावमुपदिशति ॥प्रकेति॥ य
था प्रकाशस्त्वर्कस्य स्वभावः तोयस्य शैत्यं अग्नेरुष्णता। तथात्मनोऽपि सच्चिदानन्दनित्यनिर्मलता स्वभावः स्वरूपमित्यर्थः ॥२३॥ ननु पूर्वं विका
र्यात्मा तर्हि जानामीति प्रत्ययः कथमित्याकांक्षायामाह ॥आत्मेति॥ प्रत्यगात्मनः सच्चिदंशश्च अंश इवांशः आत्माभासः बुद्धेर्वृत्तिश्च
एतद्द्वयमविवेकेन संयोज्यासंगस्यात्मनः केनापि संयोगो नास्त्येवासंगो ह्ययं पुरुष इति श्रुतेः। तथाप्यज्ञानवशात् मेलनेन संभाव्य जाना
मीति प्रत्ययः ॥ अहंकारवृत्तिः प्रवर्त्तते। तत्केवलप्रत्यगात्मनि नास्ति किंचिद्विकारोऽस्तीति भावः ॥२४॥ ॥राम॥ श्रीरामचन्द्राय नमः

एतदेवस्पष्टयति॥आत्मेति॥आत्मास्वभावादेवविकारशून्यःबुद्धेःकदाचिदपिबोधकर्त्तृत्वंनास्तितथापिजीवःसाभासाहंकारःसर्वंसाभासांतःकरण
वृत्तीनांएकत्वतप्तायःपिण्डवत्एकत्वसंगतमेवमत्यर्थंज्ञात्वादेहेन्द्रियादिकमहमितिविचार्यऽहंकर्त्ताऽहंद्रष्टेतिमुह्यतिभ्रान्त्याभवतीत्
यर्थः॥२५॥आत्मास्वयमेवबुद्धिभिन्नोविवेकेनान्यधर्मानारोप्यविभेतीत्याह॥रज्जुसर्पेति॥यथामंदांधकारादौविकाररहितरज्ज्वादौस
र्पारोपंकृत्वाभयकंपादिवहेत्·एवमात्मापिस्वस्मिन्जीवत्वमारोप्यसंक्लिष्टोऽपिपरिछिन्नंज्ञात्वाबहुदुःखसागरमग्नोभवति॥यदाश्री
आचार्यप्रसादेनशास्त्रार्थज्ञानमुत्पन्नंभवतितदाविवेकचक्षुषास्वमात्मानमखण्डानन्दैकरूपंपश्यततोनाहंजीवःपरमात्माहमिति

पि (बो)

आत्मनोविक्रियानास्तिबुद्धेर्बोधोनजात्विति॥जीवःसर्वमलंज्ञात्वाकर्त्ताद्रष्टेतिमुह्यति॥२५॥रज्जुस
र्पवदात्मानंजीवंज्ञात्वाभयंवहेत्॥नाहंजीवःपरात्मेतिज्ञातश्चेन्निर्भयोभवेत्॥२६॥आत्मावभा
सयत्येकोबुद्ध्यादीनीन्द्रियाणिहि॥दीपोघटादिवत्स्वात्माजडैस्तैर्नावभास्यते॥२७॥स्वबोधेना
न्यबोधेच्छाबोधरूपतयात्मनः॥नदीपस्यान्यदीपेच्छायथास्वात्मप्रकाशने॥२८॥ ज्ञात्वाभयदुःखा

दिरहितःसुखीभवेत्॥२६॥ननुआत्माऽत्यंतसामीप्येकेमनोबुध्यहंकारादिभिःकथंनालोक्यतेतत्राह॥आत्मेति॥आत्माकेवलएक
एवसन्नपिबुद्धिमनोहंकारादीन्यवभासयतितैर्जडैर्मनआदिभिर्नावभास्यते·यथाएकःस्वदीपोघटादीन्सर्वानप्यवभासयति·
नघटादिभिःनभास्यतेतद्वदित्यर्थः॥२७॥आत्माबुध्यहंकारादिभिर्नविभास्यतेयदितर्हिआत्मनोज्ञानेज्ञानांतरेणभवितव्य
मित्याशंक्यनेत्याह॥स्वबोधइति॥आत्मनोबोधरूपत्वात्स्वबोधेनित्यसतितस्यात्मनोबोधायज्ञानांतरापेक्षानास्त्येवअनुभव

रूपत्वात्·यथादीपस्यस्वप्रकाशने·दीपान्तरा
पेक्षानास्तितद्वदित्यर्थः॥२८॥राम॥राम॥श्री

यदिगुर्वादिभिरात्माज्ञेयोनभवेत्तर्हिआत्मज्ञानेउपायांतरंवक्तव्यंसउपायःकइत्यत्राह॥निषिध्येति॥अथातआदेशोनेतिनेतीत्युक्तनि
रसनादेववेदवाक्यैर्निखिलोपाधीन्निषिध्यअनात्मत्वेनज्ञात्वातन्निरस्य।तत्त्वमसिअयमात्माब्रह्म।तद्योहमित्यादिवाक्यैर्लक्षण
यावृत्त्यात्मैक्यज्ञानंविद्यात्।प्राप्नुयात्।अनेनप्रकारेणज्ञातव्यमित्यर्थः॥२९॥आत्मस्वरूपज्ञानेअतन्निरसनाभावेआत्माज्ञातु
मशक्यःयथानायंसर्पइतिआरोपितस्यापाकरणाभावेरज्जुज्ञानंनोत्पद्यतेतद्वदनात्मनिरसनाभावेनात्माज्ञातव्यइत्या
शयेनाह॥आविद्येति॥देहेन्द्रियादिसर्वंदृश्यजातमाविद्यकम्।दृश्यत्वात्बुद्बुदवत्क्षरंनश्वरं।एतद्विलक्षणम्।निर्म

खि निषिध्यनिखिलोपाधीन्नेतिनेतीतिवाक्यतः॥विद्यादैक्यंमहावाक्यैर्जीवात्मपरमात्मनोः॥२९॥आ
विद्यकंशरीरादिदृश्यंबुद्बुदवत्क्षरम्॥एतद्विलक्षणंविद्यादहंब्रह्मेतिनिर्मलम्॥३०॥देहान्यत्वान्न
मेजन्मजराकार्श्यलयादयः॥शब्दादिविषयैःसंगोनिरिन्द्रियतयानच॥३१॥अमनस्त्वान्नमेदुःख
रागद्वेषभयादयः॥अप्राणोह्यमनाःशुभ्रइत्यादिश्रुतिशासनात्॥३२॥ लंनिरुपाधिकंनित्यमेकंसच्चिदानन्द

त्मकंब्रह्मैवाहमस्मीतिविद्यात्।ततःकृतकृत्योभवतीत्यर्थः॥३०॥एवमुक्तरीत्यात्मानमध्यानंदेवाक्यार्थज्ञानेनापरोक्षतयाज्ञात्वास्वानु
भवावष्टंभेनात्मन्येवात्मनोमननप्रकारमाहपञ्चभिःश्लोकैः॥देहान्येति॥देहान्यत्वात्।जडदृश्यत्वादिस्वभावस्यलक्षणैरा
दन्यत्वात्।मेजन्मजराकार्श्यलयादयोनसंति।इन्द्रियादिभिरसंगत्वात्मेशब्दादिविषयभोगेःसंगोऽनुभवोनास्त्येव॥३१॥कथं

पि २

मिन्द्रियप्राणमनसोऽभावस्तस्येत्याशंक्याह॥अमनेति॥अ
मनस्त्वान्नमेदुःखरागद्वेषादयःसंति।अप्राणोह्यमनाःशु
भ्र इतिश्रुतेः।एतस्माज्जायतेप्राणोमनःसर्वेन्द्रियाणिच
खंवायुर्ज्योतिरापःपृथिवीविश्वस्यधारिणी।कथमिन्द्रि

यप्राणमनसामसत्त्वकेत्याशंक्यश्रुतिप्रमाणयति॥अप्राण
इति॥अप्राणोह्यमनाःशुभ्रोऽक्षरात्परतःपरः।स्पष्टार्थः॥
३२॥३२॥छ॥रामः॥रामचन्द्रायनमः॥रघुनाथायनमः॥श्रीहस्तं।

आ·बो·टि·
६

यो:प्रकाशात्स्वानुभवसिद्धमर्थं चाभिनयति निर्गुणइत्यादिभिस्त्रिभिः श्लोकैः॥ निर्गुणइति॥ अहं निर्गुणः गुणाद्यभावात्॥ निः
क्रियः इन्द्रियाद्यभावात्॥ नित्यः अपक्षयाभावात्॥ निर्विकल्पः संकल्पविकल्पाभावात्॥ निरंजनः असंगत्वात्॥ निर्विकारः षो
डशकलात्मकलिंगदेहशून्यत्वात्॥ निराकारः निरवयवत्वात्॥ नित्यमुक्तः बंधाभावात्॥ निर्मलः अविद्यातत्कार्यरहित
त्वात्॥३३॥ ननु पूर्वोक्तैर्हेतुभिः स्वं विशिष्टं स्वरूपं आज्ञाविशेषमित्युक्ते तर्हि विशिष्टमित्याशंक्याह॥ अहमाकाशेति॥ अ
हमाकाशवत्सर्वस्य दृश्यजातस्य बहिरन्तर्गतोऽच्युतः च्युतिरहितः सदा सर्वसमः विषयेष्वपि समं व्याप्य स्थितः ति

निर्गुणो निःक्रियो नित्यो निर्विकल्पो निरंजनः॥ निर्विकारो निराकारो नित्यमुक्तोऽस्मि निर्मलः॥३३॥
अहमाकाशवत्सर्वं बहिरन्तर्गतोऽच्युतः॥ सदा सर्वसमः शुद्धो निःसंगो निर्मलोऽचलः॥३४॥ नि
त्यशुद्धविमुक्तैकमखंडानन्दमद्वयम्॥ सत्यं ज्ञानमनन्तं यत्परं ब्रह्माहमेव तत्॥३५॥ एवं निरन्तरा
भ्यासाद्ब्रह्मैवास्मीति वासना॥ हरत्यविद्याविक्षेपान्रोगानिव रसायनम्॥३६॥ रामचन्द्राय नमः॥

थाविशुद्धः निर्लेपः अचलः स्वतोऽस्य चलनाभावात्॥३४॥ नित्येति॥ नित्यशुद्धविमुक्तैकंसतिसकमखंडानन्दः द्वितीयाभावाद
द्वयम्॥ सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुत्या प्रतिपाद्यते तदेव ब्रह्माहमस्मीति स्वस्वरूपं तत्त्वं कथितम्॥३५॥ पूर्वश्लोकोक्तमननं चि
रकालाभ्यस्तं सत्फलार्थं साधयतीत्याह॥ एवं निरंतरेति॥ एवमुक्तप्रकारेण ब्रह्मैवाहमस्मीति निरंतरेण चिरकालाभ्य

स्ता वासनाऽविद्याहतचित्तविक्षेपान्निःशेषतो नाशय
ति यथा रसायनमौषधं चिरकालस्थितान्रोगा
न्निःशेषतो नाशयतीति हृदयार्थः॥३६॥ ६॥ ७॥

प्रद्युम्न·
६

ब्लानुसंधानेनसाधनेनियमाना॥आदिविक्तेति॥विविक्तेदेशेजनसंबंधवर्जितेदेशेआसीनःसुखेनोपविष्टःविरागःसर्वत्रगताभिलाषः।अ
तस्वविनिर्जितानिइन्द्रियाणियेनसः।अनंतं अपरिछिन्नमद्वयमेकमात्मानमनन्यधीः॥३७॥ब्रह्मरूपेवस्थितानिश्चलात्मिका।आ
त्मा॥आत्मन्यखेति॥अखिलंदृश्यजातंसुधीःशुद्धान्तःकरणःसन्शुद्धयाधिया।आत्मन्येवसमाधिसमयेप्रविलाप्यप्रकर्षेणान
श्यित्वात द्वितीयाभावादेकमात्मानंसज्यौत्न्नाकाशवत्भावयंतिष्ठेत्॥३८॥परमार्थदर्शीमुनिःनामरूपवर्णादिकं
आदिकंसर्वंविहायपरिपूर्णज्ञानानन्दस्वरूपस्वावतिष्ठतइत्यत्राह॥रूपेति॥स्पष्टोर्थः॥३९॥ननुप्रमात्रादित्रिपुटिज्ञानं

विविक्तदेशआसीनोविरागोविजितेन्द्रियः॥भावयेदेकमात्मानंतमनंतमनन्यधीः॥३७॥आत्मन्येवाखि
लंदृश्यंप्रविलाप्यधियासुधीः॥भावयेदेकमात्मानंनिर्मलाकाशवत्सदा॥३८॥रूपवर्णादिकंसर्वंविहा
यपरमार्थवित्॥परिपूर्णचिदानन्दस्वरूपेणावतिष्ठते॥३९॥ज्ञातृज्ञानज्ञेयभेदःपरेनात्मनिवि
द्यते॥चिदानन्दैकरूपत्वाद्दीप्यतेस्वयमेवहि॥४०॥एवमात्मारणौध्यानमथनेसततंकृते॥उदि
तावगतिर्ज्वालासर्वाज्ञानेन्धनंदहेत्॥४१॥

वर्त्तमानमुपलभ्यतेकथमेकत्वभावनेत्याशंक्यपरमात्मनिभेदोनास्तीत्या
ह॥ज्ञातृज्ञेति॥ज्ञातृज्ञानज्ञेयभेदःपरेआत्मनिनविद्यतेसभेदःकल्पितात्मन्येवाभातिनवस्तुतः॥ज्ञानानन्दैकरूपत्वादात्मास्वयमेवदीप्य
तेप्रकाशते॥४०॥एवंविशुद्धवत्त्वध्यातुःप्रत्यक्षमाह॥एवमिति॥आत्मारणौआत्माअन्तःकरणमेवारणिःतस्मिन्मनःस्वात्तरणेःध्या
नेनतयामथनेसर्वदाकृतेतत्रआदिताज्वालास्वरूपावगतिःज्ञानंआत्मविद्या॥अज्ञानमेवइन्धनंमूलाज्ञानंनिःशेषतःसपरिकरंना

शयतितदामुमुक्षुःस्वाराज्येऽभिषिक्तःकृतकृत्योभव
तीत्यर्थः॥४१॥ ॥४१॥ ॥४१॥ ॥४१॥ ॥४१॥

आ·बो·टि·
८ टि

जीवपरयोरत्यंतमैक्यज्ञानेनाविद्यापरिकल्पितां घतमसे निःशेषमपायाते सति परमात्मा स्वयमेवाविर्भवेदित्याह॥अरुणेनेति॥अरुणप्र
काशेनादौ अन्धकारक्षये भानुर्यथाविर्भवेत्तद्वदात्मापीत्यर्थः॥४२॥आत्मा सर्वदाऽपरोक्षस्वभावत्वात्प्राप्त एव अस्माकं कदाचित्प्राप्तो भ
वैति शिष्याभिप्रायमाशंक्याह॥आत्मेति॥आत्मा तु सर्वपूर्णः अद्वयानन्दरूपः सर्वदा प्राप्त एव अविद्यावशात्प्राप्त्याऽप्राप्तइव भाति तन्नाशे॥तदा
वरणाविद्यानाशे वाक्यश्रवणात्प्राप्त इव भाति कंठगतचामीकरन्यायेनेत्यर्थः॥४३॥ननु जीवस्य परमात्मनैकत्वमयुक्तं जीवत्वविरोधित्वभा
वत्वापरिहार्यत्वादित्यत्राह॥स्थाणाविति॥यथांधकारस्थितस्थाणौ पुरुषोपाधिभीते चोरशंकया विभेति तथैवातत्त्वविचारात्ब्रह्मणि

अरुणेनैव बोधेन पूर्वं संतमसे हृते॥ तत आविर्भवेदात्मा स्वयमेवांशुमानिव॥४२॥ आत्मा तु सततं प्राप्तोऽप्यप्रा
प्तवदविद्यया॥ तन्नाशे प्राप्तवद्भाति स्वकंठाभरणं यथा॥४३॥ स्थाणौ पुरुषवद्भ्रान्त्या कृता ब्रह्मणि जीव
ता॥ जीवस्य तात्त्विके रूपे तस्मिन्दृष्टे निवर्त्तते॥४४॥ तत्त्वस्वरूपानुभवादुत्पन्नं ज्ञानमंजसा॥ अहं ममेति चाज्ञा
नं बाधते दिग्भ्रमायथा॥४५॥ सम्यग्विज्ञानवान्योगी स्वात्मन्येवाखिलं जगत्॥ एकं च सर्वमात्मानमीक्ष

जीवत्वभ्रान्त्यापतेयदा साक्षादुपदेशाज्ञानेन विवेकदृष्ट्या तस्य जीवस्य तात्त्विके रूपे लक्षिते तत्त्वंपदार्थैक्ये दृष्टे जाते कलि (ते ज्ञानचक्षुषा॥४६॥
तत्वाज्जीवत्वमपि निवर्तते ब्रह्मैवाहमिति जानातीत्यर्थः॥४४॥अहं ममेति प्रत्ययं जाग्रति कुर्वन्नाहमिति प्रत्यय इत्याशंक्य त
दपि तथैव नश्यतीत्याह॥तत्त्वस्वरूपेति॥जीवपरमात्मनोरेकत्वानुभवादुत्पन्नं पदज्ञानं तदहं ममेति अज्ञानं बाधते॥दिग्भ्रमादिव
दिति भानुदर्शनादित्यर्थः॥४५॥अहं ममेति प्रत्ययेन बुद्धयोगी सम्यग्विज्ञानवान्सन्विज्ञानेन चक्षुषा सर्वं दृश्यप्रपंचं स्वात्म
न्येवाभेदेन पश्यतीत्याह॥सम्यगिति॥एकं आत्मानं
सर्वं पश्यति तदा कृतकृत्यो भवतीति भावः॥४६॥ ॥श्री॥

प्रद्युम्न·
८

न्वात्मा सर्वं न भवति प्रत्यक्षविरोधात् नानात्वेन दृश्यमानमिदं सर्वं कथमात्मन्यभेदेन प्रपश्यतीत्यत्राह ॥ आत्मैवेदमिति ॥ इदं सर्वं जगदात्मैवात्मकार्यत्वात् अन्यथात्मनो न किंचिद्विद्यते यथा घटशरावादि मृत्कार्यं मृदोन्यन्नास्ति । अतः स्वात्मन्येव सर्वं दृश्यजातमभेदेनेक्षते पश्यति । वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति श्रुतेः ॥४७॥ एवंभूतावस्थैव जीवन्मुक्तिरित्याह ॥ जीवन्निति ॥ अनाद्यविद्यापरिकल्पितपूर्वोपाधिं देहमनोबुद्ध्यादीन् गुणान् सत्त्वादीन् परित्यज्येदिति तयत्तदेव जीवन्मुक्तिरित्युच्यते । सच्चिदानन्दादिगुणात्मकत्वात् भ्रमरकीटवत्तत्साक्षाद्ब्रह्म भजेत प्राप्नोतीत्यर्थः ॥४८॥ तत्त्ववस्तु आत्मारामः सुखं तिष्ठतीत्याह ॥ तीर्त्वा मोहेति ॥ मोहरूपार्णवः अपारं ततश्च ज्ञानप्लवेन तीर्त्वा निःशेषं नाशयित्वा राग

मे

आत्मैवेदं जगत्सर्वमात्मनोन्यन्न किंचन ॥ मृदो यद्वद्घटादीनि स्वात्मानं सर्वमीक्षते ॥४७॥ जीवन्मुक्तस्तु तद्विद्वान्पूर्वोपाधिगुणांस्त्यजेत् ॥ सच्चिदानन्दरूपत्वात् भजेद्भ्रमरकीटवत् ॥४८॥ तीर्त्वा मोहार्णवं हत्वा रागद्वेषादिराक्षसान् ॥ योगी शान्तिसमायुक्त आत्मारामो विराजते ॥४९॥ बाह्यानित्यसुखासक्तिं हित्वात्मसुखनिर्वृतः ॥ घटस्थदीपवच्छश्वदन्तरेव प्रकाशते ॥५०॥

द्वेषादयस्त एव राक्षसाः मोक्षपरिपन्थिनः तान् निःशेषं नाशयित्वा शान्तिसमायुक्तः शमदमादिसहितः आत्मारामः आत्मन्येव क्रीडा यस्य स विराजते । स्वाराज्येनाभिषिक्तः प्रकाशते । अत्र अर्थान्तरं ध्वन्यते । श्रीरामाख्यो रामः समुद्रं तीर्त्वा रावणादीन् राक्षसान् हत्वा सीतेव शान्तिस्तया समेतः विराजते अयोध्यायां विराजमानस्ते ॥४९॥ जीवन्मुक्तस्य लक्षणमाह ॥ बाह्यानित्येति ॥ बाह्येन्द्रियविषयोद्भवानित्यसुखस्यासक्तिं प्रीतिं सर्वां वासनां हित्वा । तद्धेतुः । आत्मसुखेन निर्वृत्तः तृप्तः घटस्थदीपवदन्तरेव प्रकाशते स्वसाक्षिकमेवात्मानुभवसुखमितरैर्न ज्ञायत इत्यर्थः ॥५०॥ ६॥

स्वस्वरूपप्रकाशे राजीवन्मुक्तः सन् प्रारब्धसंक्षयादेवं वर्तितव्यमित्याह ॥ उपेति ॥ देहद्वयोपाधौ साक्षित्वेन स्थितोऽपि मुनिर्व्योमवत् तद्धर्मैर्नानुलिप्तः मम कर्मलेपो नास्तीति भावयेत् । सर्वज्ञोऽपि मूढवत् प्राकृतवत्तिष्ठेत् । सर्वत्र विषयेष्वपि संध्याप्राप्तेष्वनासक्तो वायुवच्चरेत् ॥५१॥ प्रारब्धकर्मक्षये देहोपाधौ लीने विदेहकैवल्यमाह ॥ उपेति ॥ उपाधिभूत तद्देहद्वयप्रारब्धकर्मक्षये मुनिः योगी विष्णौ सर्वव्यापके परब्रह्मणि निर्विशेषं यथा भवति तथा विशेत् । अत्यन्तैक्ये दृष्टान्तः । जले जलमित्यादि ॥५२॥ ब्रह्मणः सर्वातिशयत्वात् तटस्थलक्षणेनाभिधत्ते श्लोकद्वयेन ॥ यल्लाभेति ॥ यद्ब्रह्मसाक्षात्कारलाभादपरो लाभो न विद्यते । सर्वलाभानां तत्रैवान्तर्भूतत्वात् । यथा ब्रह्मानन्दे क्षुद्रानन्दानामन्तर्भावः । यत्सुखाद् ब्रह्मानन्दसुखादपरं सुखं नास्ति । निरतिशयसुखत्वात् । यद्ज्ञानाद् ब्रह्मसाक्षा

उपाधिस्थोऽपि तद्धर्मैर्नलिप्तो व्योमवन्मुनिः ॥ सर्वविन्मूढवत्तिष्ठेदसक्तो वायुवच्चरेत् ॥५१॥ उपाधिविलयाद्विष्णौ निर्विशेषं विशेन्मुनिः ॥ जले जलं वियद्व्योम्नि तेजस्तेजसि वा यथा ॥५२॥ यल्लाभान्नापरो लाभो यत्सुखान्नापरं सुखम् ॥ यज्ज्ञानान्नापरं ज्ञानं तद्ब्रह्मेत्यवधारयेत् ॥५३॥ यद्दृष्ट्वा नापरं दृश्यं यद्भूत्वा नापुनर्भवः ॥ यद्ज्ञात्वा नापरं ज्ञेयं तद्ब्रह्मेत्यवधारयेत् ॥५४॥ तिर्यगूर्ध्वमधः पूर्णं सच्चिदानन्दमद्वयम् ॥ अनन्तं नित्यमेकं यत्तद्ब्रह्मेत्यवधारयेत् ॥५५॥ अतद्व्यावृत्तिरूपेण वेदान्तैर्लक्ष्यतेऽद्वयम् ॥ अखण्डानन्दमेकं यत्तद्ब्रह्मेत्यवधारयेत् ॥५६॥ अखण्डानन्दरूपस्य तस्यानन्दलवाश्रिताः ॥ ब्रह्माद्यास्तारतम्येन भवन्त्यानन्दिनोऽखिलाः ॥५७॥

त्कारज्ञानादपरं ज्ञानं नास्ति मोक्षहेतुत्वात् तद्ब्रह्मेति जानीयात् ॥५३॥ यद्दृष्टेति ॥ यद्दृष्ट्वा परं अन्यद्दृश्यं नास्ति तेनैव पुरुषार्थस्य सिद्धत्वात् । यद्भूत्वा येनैक्यं प्राप्य पुनर्जन्मादिकं नास्ति । यद्ज्ञात्वा यत्स्वरूपं ज्ञात्वाऽन्यं ज्ञेयं नास्ति । तदेव ब्रह्मेत्यवधारयेत् । अन्यत्सर्वं वृथापाण्डित्यमित्यर्थः ॥५४॥ तिर्यगूर्ध्वमधः सर्वत्र ब्रह्मैव पूर्णमित्याह ॥ तिर्यगिति ॥ स्पष्टोऽर्थः ॥५५॥ अखण्डानन्दमेकं ब्रह्म वेदान्तैरतद्व्यावृत्तिरूपेणातन्निरसनद्वारा ज्ञातव्यमित्याह ॥ अतदिति ॥ स्पष्टोऽर्थः ॥५६॥ ननु ब्रह्मादयोऽपि निरतिशयानन्दिन एव श्रूयन्ते तत्राह ॥ अखण्डेति ॥ ब्रह्मेन्द्रादयः परिच्छिन्नानन्दिन एव ब्रह्म तु अखण्डानंदस्वरूपत्वादपरिच्छिन्नानंद एवंभूतस्य तस्यानन्दसमुद्रस्यानन्दलेशमाश्रित्य ब्रह्मेन्द्रादयोऽप्यानन्दिनो भवन्ति । आनंदतारतम्येन तस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुतेः ॥५७॥ छ॥ छ॥ छ

परप्रेमास्पदतयात्मैवानुभूयते चेत्तद्युक्तमिति अनात्मापि देहादिप्रपञ्चोपि प्रियतरमनुभूयते इत्याशंक्याह ॥ तद्युक्तमिति ॥ अखिलं देहाद्यनात्मवस्त्वपि तद्युक्तं तेनात्मना संयुक्तमेव प्रियतरं लौकिकोपि व्यवहारः तद्युक्तः स्वप्रियतरस्तत्तत्त्वे गतं ब्रह्म अत्यंतप्रियतरं यथा क्षीरं सर्वं व्याप्य घृतमिव ॥ वस्त्वपि ब्रह्मव्याप्तत्वात् प्रियमिवाभातीति ॥ अत आत्मैव प्रियतममिति सिद्धम् ॥ ५८ ॥ ननु आत्मा केन प्रकारेण सर्वं व्याप्य तिष्ठति ॥ तज्जानीयादित्याशंक्य साक्षाद्वस्तु महद्ध्रस्वत्वादनण्वस्थूलमिति श्रुतेः सत्तारूपेण भातीत्याह ॥ अनण्विति ॥ स्पष्टोर्थः ॥ ५९ ॥ पुनस्तद्ब्रह्मज्ञानार्थं श्लोकत्रयेणापृथङ्निरूपयति ॥ यद्भासेति ॥ यद्वस्तु भान्वादीनवभासयति यद्भास्यैरर्कादिभि

तद्युक्तमखिलं वस्तु व्यवहारस्तदन्वितः ॥ तस्मात्सर्वगतं ब्रह्म क्षीरे सर्पिरिवाखिले ॥ ५८ ॥
अनण्वस्थूलमह्रस्वमदीर्घमजमव्ययम् ॥ अरूपगुणवर्णाख्यं तद्ब्रह्मेत्यवधारयेत् ॥ ५९ ॥
यद्भासा भास्यतेर्कादिभास्यैर्यत्तु न भास्यते ॥ येन सर्वमिदं भाति तद्ब्रह्मेत्यवधारयेत् ॥ ६० ॥
स्वयमन्तर्बहिर्व्याप्य भासयन्नखिलं जगत् ॥ ब्रह्मप्रकाशते वह्निप्रतप्तायसपिण्डवत् ॥ ६१ ॥
जगद्विलक्षणं ब्रह्म ब्रह्मणोन्यन्न किंचन ॥ ब्रह्मान्यद्भाति चेन्मिथ्या यथा मरुमरीचिका ॥ ६२ ॥ श्री ॥ श्री ॥

नैव भास्यते ॥ न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोयमग्निः ॥ तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति श्रुतेः ॥ येन सर्वमिदं भाति तमेतिकं भावरूपं जगद्भाति तद्ब्रह्मेति जानीयात् ॥ ६० ॥ प्रतप्तायसःपिण्डवत्स्वयमेवान्तर्बहिर्व्याप्य भासयन्नखिलं ब्रह्म प्रकाशतेत्याह ॥ स्वयमन्तरिति ॥ स्पष्टोर्थः ॥ ६१ ॥ पुनस्तदेवाह ॥ जगदिति ॥ सर्वं ब्रह्मैव सत्यं तथापि जगद्रूपेण यदा पश्यति तदा न गृह्यते ॥ जगद्विलक्षणेन तत्कारणत्वेन विचार्यते चेत् ज्ञातुम् शक्यम् ब्रह्मणोन्यन्नो विद्यते यदि ततोन्यद्दृश्यते यदि किंचिन्नसैवमरुमरीचिजलवदित्यर्थः ॥ ६२ ॥ छ ॥ छ ॥

को

आ.बो.टि.
८

प्रनष्टदेवब्रह्मस्फुटं निरूपयति ॥ दृश्यत इति ॥ चक्षुषा यद्यद् दृश्यते श्रूयते यद्यन्मनसा स्मर्यते वा चा यदभिधीयते तत्त्वज्ञानात्तत्सर्वं ब्रह्म सच्चिदानन्दमद्वयं ब्रह्मणोऽन्यन्न किंचिदस्तीत्यर्थः ॥ ६३ ॥ सर्वगेति ॥ श्रुतिः ॥ न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमान इत्याद्या । यदि सर्वगतं ब्रह्म तर्हि सर्वैः किं न दृश्यत इत्याशंक्य चक्षुरादिभिर्न गृह्यते इत्यत कुत्याश्रुतिपादयति न चक्षुषेति अज्ञानचक्षुः सर्वगतमपि सच्चिदानन्दं ब्रह्म न पश्यति तथा प्रकाशमानमपि भानुं अन्धोऽपि न पश्यति ज्ञानप्रसादेन ज्ञानचक्षुषा विशुद्धसत्त्वः निवृत्ताविद्यः सर्वदा सर्वत्र ब्रह्मैव पश्यतीत्यर्थः ॥ ६४ ॥ एवं तावद् दृष्टरीत्यानुभवसंप

दृश्यते श्रूयते यद्यद्ब्रह्मणोऽन्यन्न तद्भवेत् ॥ तत्त्वज्ञानाच्च तद्ब्रह्म सच्चिदानन्दमद्वयम् ॥ ६३ ॥ सर्वगं सच्चिदात्मानं ज्ञानचक्षुर्निरीक्षते ॥ अज्ञानचक्षुर्नेक्षेत भास्वन्तं भानुमन्धवत् ॥ ६४ ॥ श्रवणादिभिरुद्दीप्तो ज्ञानाग्निपरितापितः ॥ जीवः सर्वमलान्मुक्तः स्वर्णवद्द्योतते स्वयम् ॥ ६५ ॥ हृदाकाशोदितो ह्यात्मा बोधभानुस्तमोऽपहृत् ॥ सर्वव्यापी सर्वधारी भाति सर्वं प्रकाशते ॥ ६६ ॥ ॥ श्रीकृष्णपरब्रह्मणे वासुदेवाय नारायणाभ्यां नमः ॥

न्नस्यापि तत्त्वाभ्यासरहितस्य वासनावशात् किंचिदज्ञानं संभवति तत्परिहारार्थं पुनः श्रवणादिकं कुर्यादित्याह ॥ श्रवणेति ॥ जीवः प्रत्यगात्मा एतत्पूर्वकरणोक्तार्थस्य श्रवणमननादिभिरुद्दीप्तः प्रकाशितः ज्ञानमेवाग्निः तेन परितापितः परितापितो विशोधितः शोधित इत्यर्थः । सर्वस्मात् मूलभूताज्ञानमलान्मुक्तः स्वयमेव सम्यक् प्रकाशते । यथाग्निना परितापितस्वर्णं औपाधिकदुर्वर्णादिरहितं स्वस्वरूपेण प्रकाशते तद्वदित्यर्थः ॥ ६५ ॥ एवं शोधितो जीवः परमात्मा हृदाकाशोदितः सन् तमः अज्ञानमुपसंहरन् भानुवत् स्वात्मस्वरूपः प्रकाशते इत्याहः ॥ हृदेति ॥ बोधस्वरूपभानुः सर्वस्याधारभूतत्वात्सर्वव्यापी सर्वधारी च ॥ शेषं स्पष्टम् ॥ ६६ ॥ ॥ ॥ ॥ ॥

शुभं
८

आ·बो·टि

१०

ननुआत्मज्ञस्यापिज्ञानप्रतिवंधकदुरितनिवारणार्थंप्रयागादितीर्थयात्रोद्योगःकर्त्तव्यइत्याशंक्यआत्मतीर्थेस्नानस्यनकिंचित्कर्त्तव्यमस्तीत्याह ॥
दिग्देशेति ॥ योविनिष्क्रियःपरमहंसःसःस्वात्मतीर्थंभजतेसेवते ।ससर्ववित्सर्वज्ञःसर्वगःपरमात्मस्वरूपत्वात्‌ ।अमृतोमुक्तोभवेत्‌ ।
कथंभूतंस्वात्मतीर्थंदिग्देशा[illegible]कालाद्यनपेक्ष्यैवसर्वगतंशीतादिद्वंद्वदुःखानिहरतीतिशीतादिहृत्‌ ।नित्यसुखंमोक्षानन्दप्रापकत्वा

दिग्देशकालाद्यनपेक्ष्यसर्वगंशीतादिहृन्नित्यसुखंनिरंजनम्‌ ।यःस्वात्मतीर्थंभजतेविनिष्क्रि
॥ ॥ ॥ ॥यःससर्ववित्सर्वगतोऽमृतोभवेत्‌ ॥६८॥ ॥शुभम्‌ ॥भवतु ॥भूयात्‌ ॥ ॥

तः ।इतरतीर्थेषुतद्विपरीत्यंद्रष्टव्यम्‌ ।तस्मादात्मतीर्थरतस्यनकिंचिदवशिष्यतइतिभावः ॥६८॥ ॥इतिश्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभ
गवत्पूज्यपादशिष्यश्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविरचितमात्मबोधप्रकरणंसमाप्तम्‌ ॥सम्पूर्णम्‌ ॥शुभम्‌ ॥
भवतु ॥भूयात्‌ ॥इतिसम्वत्‌१९२८शाके१७९३मासे१पक्षे२ऋतौ३तिथौ१०वारे२नक्षत्रे यो
गे करणे मुहूर्त्ते ॥घननाथेनलिखितम्‌ ॥

प्रद्युम्नः

१०

४१५८

पं. सं. गल

श्री ५ को सरकार

नत्वाश्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ॥ प्रत्यक्तत्वविवेकस्याक्रियतेपददीपिका॥ १॥ प्रारिप्सितस्यग्रंथस्याविघ्नेनपरिसमाप्तिप्रचयगमनाभ्यांशिष्टाचारपरिप्राप्तमिष्टदेवतागुरुनमस्कारलक्षणंमंगलाचरणंस्वेनानुष्ठितंशिक्षार्थंश्लोकेनोपनिबध्नाति अर्थाद्विषयप्रयोजनेचसूचयति॥ नमइति॥ शंसुखंकरोतीतिशंकरः॥ सकलजगदानंदकरःपरमात्माएषह्येवानंदयतीतिश्रुतेः। आनंदःनिरतिशयप्रेमास्पदत्वेनपरमानंदरूपःप्रत्यगात्मा। शंकरश्चासावानंदश्चेतिशंकरानंदःसम्यगभिन्नःपरमात्मासएवगुरुःपरिपक्वमलायेतान्सादनहेतुशक्तिपातेनयोजयतिपरेतत्वेसदीक्षयाचार्यमूर्त्तिस्थइत्यागमात्॥ श्रीमांश्चासौशंकर

नमःश्रीशंकरानंदगुरुपादांबुजन्मने॥ सविलासमहामोहग्राहग्रासैककर्मणे॥ १॥

नंदगुरुश्चेतिगंधर्विपरत्वादिवत्समासः॥ अनेनश्रीगुरोरणिमाद्यैश्वर्यसंपन्नत्वंसूचितं। यद्वा॥ श्रियाभूत्याशंकरोतीतिश्रीशंकरःशतैर्दतुःपरायणमितिश्रुतेः। अनेनश्रीगुरोर्भक्तेष्टसंपादनेसामर्थ्यंसूचितंभवति॥ अस्यगुरोःपादावेवांबुजन्मकमलंतस्मैनमःह्वीभावोस्तु॥ किंविधायसविलासमहामोहग्राहग्रासैककर्मणेविलासःकार्यवर्गस्तेनसहवर्ततइतिसविलासःमहामोहोमूलाज्ञानंसएवग्राहःमकरादिवत्स्ववशंमाप्तस्यातीवदुःखहेतुत्वात्तस्यग्रासोग्रसनंनिवर्तनंसएवैकमुख्यंकर्मव्यापारोयस्यतस्मैतथाभूताय इत्यर्थः। अनेनशंकरानंदपदगुरुपदसामानाधिकरण्येनजीवब्रह्मणोरेकत्वलक्षणोविषयःजीवस्यभूमब्रह्मरूपेणयापरिच्छिन्नस्वरूपाविर्भावलक्षणंप्रयोजनंचसूचितं॥ सविलासमहादिनानिःशेषानर्थनिवृत्तिलक्षणंप्रयोजनंसुखेनएवाभिहितं॥ १॥

इदानीमवांतरप्रयोजनथनपुरःसरं ग्रंथारंभं प्रतिजानीते॥ तत्पादेति॥ तस्य गुरोः पादावेवांबुरुहे कमले तयोर्द्वंद्वं तस्य सेवया परि
चर्यया स्तुतिनमस्कारादिलक्षणया निर्मलं रागादिरहितं चेतोऽन्तःकरणं येषां ते तथोक्तास्तेषां सुखबोधायानायासेन तत्त्वज्ञा
नोत्पादनोपायवक्ष्यमाणप्रकारस्य तत्त्वस्यानारोपितस्वरूपस्य अखंडसच्चिदानंदमहावाक्येन लक्ष्यत इति वक्ष्यमाणस्य विवे
क आरोपितात्पंचकोशादिलक्षणाज्जगतो विवेचनं विधीयते क्रियत इत्यर्थः॥२॥ जीवब्रह्मणोरेकत्वलक्षणविषयसंभावना

तत्पादांबुरुहद्वंद्वसेवानिर्मलचेतसां॥ सुखबोधाय तत्त्वस्य विवेकोऽयं विधीयते॥२॥
शब्दस्पर्शादयो वेद्या वैचित्र्याज्जागरे पृथक्॥

यजीवस्य सत्यज्ञानादिरूपत्वं दिदर्शयिषुरादौ ज्ञानस्याभेदप्रतिपादनेन नित्यत्वं साधयति॥ शब्दस्पर्शादय इत्यादिना॥ तत्र ताव
द्विषयपृथग्व्यवहारवति जागरे ज्ञानस्याभेदं साधयति॥ शब्देति॥ जागरे इंद्रियैरर्थोपलब्धिर्जागरितमित्युक्तलक्षणेऽवस्थाविशेषे
वेद्याः संविद्विषयभूताः शब्दस्पर्शादय आकाशादिगुणत्वेन प्रसिद्धास्तदाधारत्वेन प्रसिद्धा आकाशादयश्च वैचित्र्यात्परस्परसांक
र्याभावाद्विलक्षणरूपेणत्वात्पृथक्परस्परं भिद्यंते॥ ततस्तेभ्यो विभक्तया बुद्ध्या विवेचितानां संविदेभ्यः शब्दादीनां संविदस्तानं ऐकरू
प्यात्संवित्संविदित्येकाकारेणावभासमानत्वाद्गगनमिव न भिद्यते॥ अत्रायं प्रयोगः॥ विवादाध्यासिता संवित्स्वाभाविकभेदशून्या उपा

धिपरामर्शमंतरेण विभाव्यमानभेदवाऽऽगगनवत्शारदसंवित्स्पर्शसंविदो न भिद्यते संवित्त्वात्स्पर्शसंविद्वदिति॥ एकस्या एव संविदो गगनस्येवोपाधिकभेदेनापि भिन्नव्यवहारोपपन्नो वास्तवभेदकल्पनायां गौरवं बाधकमन्नेयं॥३॥ उक्तन्यायं स्वप्नेऽप्यतिदिशति॥ तथेति॥ यथा जागरणे वैचित्र्याद्विषयाणां भेद ऐकरूप्यात्संविदोऽभेदस्तथा तेनैव प्रकारेण स्वप्नेऽपि करणोपसंहृते प्रजागरितसंस्कारजः प्रत्ययः सविषयः स्वप्न इत्युक्तलक्षणायां स्वप्नावस्थायामपि विषया एव भिन्ना न संविदिति॥ ननु यदि स्वप्न

ततो विभक्तान्तत्संविदैकरूप्यान्न भिद्यते॥३॥ तथा स्वप्नेऽप्यवेद्यं तु न स्थिरं जागरे स्थिरं॥
तद्भेदो न तयोः संविदेकरूपा न भिद्यते॥४॥६७॥

जागरयोरेकाकारता विषयतत्संविदोर्भेदाभेदाभ्यां तर्हि स्वप्नो जागर इति भेदव्यवहारः किंनिमित्तक इत्याशंक्याह॥ अत्र वेद्यं त्विति॥ अत्र स्वप्ने वेद्यं परिदृश्यमानं वस्तुजातं न स्थिरं न स्थापि प्रतीतिमात्रशरीरत्वाज्जागरे तु परिदृश्यमानं वस्तुजातं स्थिरं स्थापि कालान्तरेऽपि दृष्टं योग्यत्वादतः स्थिरास्थिरविषयत्वलक्षणवैलक्षण्यात्तद्भेदस्तयोः स्वप्नजागरयोर्भेद इत्यर्थः॥ ननु स्वप्नजागरयोर्भेदश्चेत्तत्संविदोरपि भेदः स्यादित्याशंक्याह न तयोरिति॥ एकरूपेति हेतुगर्भं विशेषणं॥४॥

एवमवस्थाद्वये ज्ञानस्यैकत्वं प्रसाध्य सुषुप्तिकालीनस्यापि तस्य तेनैक्यप्रसाधनाय तत्तावज्ज्ञानं साधयति॥ सुप्तेति॥ पूर्वं सुप्तः पश्चादुत्थितः सुप्तोत्थितः सुप्तं सुषुप्तिस्तस्मादुत्थित इति वा तस्य सौषुप्ततमोबोधः सुषुप्तिकालीनस्य तमसोऽज्ञानस्य यो बोधो ज्ञानमस्मि न किंचिदवेदिषमिति सा स्मृतिरेव भवेन्नानुभवस्तत्कारणस्येन्द्रियसन्निकर्षव्याप्तिलिंगादेरभावादिति भावः॥ ततः किं तत्रा

सुप्तोत्थितस्य सौषुप्ततमोबोधो भवेत्स्मृतिः॥ सा चावबुद्धविषयावबुद्धं तत्तदा ततः॥५॥

ह। सा चेति। सा च स्मृतिरवबुद्धविषया। अवबुद्धोऽनुभूतो विषयो यस्याः सा तथोक्ता या स्मृतिः सानुभवपूर्विकेति व्याप्तिर्लोके दृष्टेष्टेति भावः॥ ततोऽपि किं तत्राह॥ अवबुद्धमिति॥ ततस्तस्मात्कारणात्तत्सौषुप्तं तमस्तदा सुप्तो अवबुद्धमनुभूतमित्यवगन्तव्यं॥ अत्र प्रयोगः॥ विमतं न किंचिद्वेदिषमिति ज्ञानं अनुभवपूर्वकं भवितुमर्हति स्मृतित्वात्सामेमानेति स्मृतिवदिति ॥५॥

॥न·वि·॥
॥३॥

तस्यात्रभवस्य स्वविषयादज्ञानाद्भेदं बोधांतराद्भेदं चाह। सबोध इति। सबोधः सौषुप्तात्तत्रभवः विषयादज्ञानाद्भिन्नः पृथग्भवितुमर्ह
तिबोधत्वात्‌ न घटबोधवत्‌ बोधांतरान्नभिद्यते बोधत्वात्स्वप्नबोधवत्‌॥ फलितं कथयन्नुक्तन्यायमन्यत्राप्यतिदिशति॥ एवमित्या
दिना॥ स्थानत्रयेपि एकदिनवर्त्तिजाग्रदाद्यवस्थात्रयेपि संविदेकैव सर्व्वं वाक्यं सावधारणमितिन्यायात्‌॥ तद्वद्दिनांतर इति॥

सबोधोविषयाद्भिन्नोनबोधात्स्वप्नबोधवत्‌॥ एवंस्थानत्रयेप्येकासंविन्तद्वद्दिनां
तरे॥ ३॥ मासाब्दयुगकल्पेषुगतागम्येष्वनेकधा॥ नोदेतिनास्तमेत्येकासंवित्‌·

यथैकस्मिन्दिवसेवस्थात्रयेपिज्ञानस्याभेदएवमन्यस्मिन्नपिदिवसे॥ अनेकधाऽनेकप्रकारेषुगतागम्येष्वतीतागामिषुमासे
षुचैत्रादिषुअब्देषुप्रभवादिषुयुगेषुकृतादिषुकल्पेषुब्राह्मादिषुचज्ञानस्याभेदएवेत्यर्थः॥ संविदएकत्वसमर्थनेफल
माहनोदेतीति॥ यतःसंविदेकाऽतोनोदेतिनोत्पद्यतेनास्तमेतिनविनश्यतिच असाक्षिकयोरुत्पत्तिविनाशयोरसिद्धेःस्यात्तन्निवि
नाशयोस्तयैवसंविदाग्रहीतुमशक्यत्वात्संविदंतरा॥

॥राम:॥
॥३॥

भावाच्चेतिभावः। ननुसंविदंतराभावेग्राहकाभावादस्याअप्यभानेजगदांध्यंप्रसज्येतेत्यतआह॥ एषेति॥ अत्रायंप्रयोगः। संवि
त्स्वयंप्रकाशाभवितुमर्हति। अवेद्यत्वेसत्यपरोक्षत्वाद्व्यतिरेकेघटवन्नचायंविशेषणासिद्धोहेतुःसंविदःस्ववेद्यत्वेकर्मक
र्तृत्वविरोधात्परवेद्यत्वेऽनवस्थानादतःस्वप्रकाशत्वेनभासमानायाःसंविदःसर्वावभासकत्वसंभवान्नजगदांध्यप्रसंगइ
तिभावः॥७॥ भवत्वेवंसंविदोनित्यत्वंस्वप्रकाशत्वंचनततःकिमित्यतआह॥ इयमिति॥ अत्रायंप्रयोग॥ इयंसंविदात्माभवि

एषास्वयंप्रभा॥७॥ इयमात्मापरानंदः

तुमर्हतिनित्यत्वेसतिस्वप्रकाशत्वाद्यन्नैवंतन्नैवंयथाघटइतिआत्मनोनित्यसंविद्रूपत्वप्रसाधनेनसत्यत्वमपिसाधितंभवतिनित्यत्वव्य
तिरिक्तसत्यत्वाभावात्नित्यत्वंसत्त्वंनयस्यास्तिनतन्नित्यंसत्यमितिवाचस्पतिमिश्रैरुक्तत्वादितिभावः॥ आत्मनआनंदरूपत्वंसाध
यति। परानंदइति। आत्मेत्यनूद्यपरश्चासावानंदश्चपरानंदःनिरतिशयसुखस्वरूपइत्यर्थः॥ ॥७॥ ॥७॥ ॥७॥ ॥

तत्र हेतुमाह । परेति ॥ यतो यस्मात्कारणात्परस्य निरुपाधिकत्वेन निरतिशयस्य प्रेम्णाः स्नेहस्य आस्पदं विषयस्तस्मादेवेदमनुमानमात्मा परमानंदरूपः परप्रेमास्पदत्वाद्यः परमानंदरूपो न भवति नासौ परप्रेमास्पदमपि यथा घटो न तथा चायं परप्रेमास्पदं न भवति तस्मात्परमानंदरूपो न भवतीति । न चात्मनि द्विष्यामिति द्वेषस्योपलभ्यमानत्वात्प्रेमास्पदत्वमेवासिद्धं कुतः

परप्रेमास्पदं यतः ॥ मा न भूवं हि भूयासमिति प्रेमात्मनीक्ष्यते ॥ ८ ॥ तत्प्रेमात्मा
र्थमन्यत्र नैवमन्यार्थमात्मनि ॥ अतस्तत्परमं तेन परमानंदतात्मनः ॥ ९ ॥

परप्रेमास्पदत्वमित्याशंक्य तस्य दुःखसंबंधनिमित्तकत्वेनान्यथासिद्धत्वात्प्रेमणश्चात्मन्यनुभवसिद्धत्वान्नैवमिति परिहरति । मा न भूवमिति हि यस्मात्कारणादात्मनि विषये मा न भूवमहं मा भूवमिति नेममासत्त्वं कदापि मा भूत्किंतु भूयासमेव सत्त्वमेव मम भूयादित्येवंविधं प्रेमेक्ष्यते सर्वैरनुभूयते ऽतो नास्ति क्वचित्स्यर्थो ऽमा भूत स्वरूपासिद्धिः प्रेम्णः परत्वे मानाभावाद्विशेषणासिद्धिर्हेतोरित्याशंक्याह । तत्प्रेमेति ॥ ९ ॥ ७ ॥

अन्यत्रस्वातिरिक्तेपुत्रादौयत्प्रेमतदात्मार्थंतेषामात्मशेषत्वनिमित्तकत्वमेवनस्वाभाविकमेवमात्मनिविद्यमानंप्रेमान्यार्थं नात्मनोऽन्यशेषत्वनिमित्तकंनभवतिकिंत्वात्मत्वनिमित्तकमेवातोनिरुपाधिकत्वात्तत्परमंनिरतिशयं फलितमाह।तेननि रतिशयप्रेमास्पदत्वेनात्मनःपरमानंदतानिरतिशयसुखस्वरूपत्वंसिद्धं॥एतैःसप्तभिःश्लोकैःप्रतिपादितमर्थंसंक्षिप्यदर्श यतिइत्थमिति॥शब्दस्पर्शादयइत्यादिनाज्ञानस्यनित्यत्वंप्रसाध्यतस्यैवयमात्मेत्यात्मत्वप्रसाधनेनात्मनःसच्चिद्रूपत्वंसाधितं

इत्थंसच्चित्परानंदआत्मायुक्त्यातथाविधं परंब्रह्मतयोश्चैक्यंश्रुत्यंतेषूपदिश्यते १०

परानंदइत्यादिनाचपरमानंदरूपत्वंसमर्थितमतआत्मामहावाक्येत्वंपदार्थः।सच्चिदानंदरूपःसिद्धः॥ननूक्तलक्षणस्यात्म नोऽशक्तौवावगतावुपनिषदांनिर्विषयत्वेनाप्रामाण्यप्रसंगइत्याशंक्याह॥तथाविधमिति॥तथातादृग्विधाप्रकारेणप स्यतत्तथाविधंसच्चिदानंदरूपंपरंब्रह्मतत्पदार्थस्तयोस्तत्त्वंपदार्थयोरैकमखंडैकरसत्वंचश्रुत्यंतेषुवेदांतेषूप दिश्यतेप्रतिपाद्यतेअतोनवेदांतानांनिर्विषयत्वमित्यर्थः॥१०॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

॥ त॰वि॰ ॥
॥ ५ ॥

आत्मनः परमानंदरूपत्वमाक्षिपति ॥ अभान इति ॥ परमानंदरूपत्वं न भासते वा अभानेऽप्रतीतौ न परं प्रेमात्मनि निरतिशयस्नेहो न स्या-
द्विषयसौंदर्यज्ञानजन्यत्वात्स्नेहस्य भाने प्रतीतौ तु विषयेषु स्वसाधने स्रगादौ तज्जन्ये सुखे वा स्पृहा इच्छा न स्यात्फलप्राप्तेस्
त्यासाधने छानुपपत्तेः ॥ नित्यनिरतिशयानंदलाभे सति क्षणिके साधनपारतंत्र्यादिदोषदूषिते वैषयिके सुखे स्पृहायोगाच्च ॥

अभाने न परं प्रेम भाने न विषये स्पृहा ॥ अतो भानेप्यभातासौ परमानंदता-
त्मनः ॥ ११ ॥ अध्येतृवर्गमध्यस्थपुत्राध्ययनशब्दवत् ॥ भानेप्यभानं

तस्माच्चानंदरूपतात्मनऽनुपपन्नेति प्रकारांतरस्यासंभवान्नैवमिति परिहरति ॥ अत इति ॥ यतो भानाभानपक्षयोरुभयो-
रपि दोषोऽस्त्यतः कारणादात्मनोऽसौ परमानंदता भानेपि प्रतीतौ सत्यामपि अभानानप्रतीता भवति ॥ नन्वकस्य युगपद्भा-
नाभानेन युज्यत इत्याशंक्य किमिदमयुक्तत्वं अदृष्टचरत्वमुपपत्तिरहितत्वं वा नाद्य इत्याह ॥ अध्येतृवर्गेति ॥ अध्ये ॥ छ ॥

॥ रामः ॥
॥ ५ ॥

न्दृणांवेदपाठकानांवर्गःसमूहस्तस्यमध्येतिष्ठतीत्यध्येतृवर्गमध्यस्थःसत्वासौपुत्रश्चेतितथातस्याध्ययनंतत्कर्तृकंपठनंत
स्यशब्दोध्वनिर्यथावहिःष्ठस्यपितुर्भासमानोपिसामान्यतोनभासतेविशेषतोयंमत्पुत्रध्वनिरितितथानंदस्यापिभानेप्य
भानंभवतीत्यर्थः॥ द्वितीयंपद्याह॥ भानस्येति॥ भानेप्यभानमित्येतद्व्याप्युपपंजनीयंभानस्यस्फुरणस्यप्रतिवंधेनवस्तु

भानस्यप्रतिवंधेनयुज्यते॥ १२॥ प्रतिवंधोस्तिभातीतिव्यवहारार्हवस्तु
नि॥ तंनिरस्यविरुद्धस्यतस्योत्पादनमुच्यते॥ १३॥ ७॥

माणलक्षणेनभानेप्यभानंसामान्यतःप्रतीतावपिविशेषाकारेणाऽप्रतीतिर्युज्यतेउपपद्यतइत्यर्थः॥ १२॥ कोसौप्रति
वंधइत्यतआह॥ प्रतिवंधइति॥ अस्तिभातीतिव्यवहारार्हवस्तुनिष्ठमस्तिविद्यतेभातिप्रकाशतइत्येवंप्रकारंव्यवहारमर्हती
त्यस्तिभातिव्यवहारार्हंतच्चतद्वस्तुचेतितथातस्मिनतंपूर्वोक्तंव्यवहारंनिरस्यनिराकृत्यविरुद्धस्यनास्तिनभातीत्येवंरूपस्यव्य
व्यवहारस्योत्पादनंजननंप्रतिवंधइत्युच्यते॥

उक्तलक्षणस्य प्रतिवंधस्य कारणं दृष्टांतदार्ष्टांतिकयोः क्रमेण दर्शयति । तस्येति ॥ पुत्रध्वनिश्रवणलक्षणो दृष्टांते तस्य प्रतिवंधस्य हेतुः कारणं समानाभिहारः बहुभिः सह पठनं इह दार्ष्टांतिके व्यामोहैकनिबंधनं व्यामोहानां विपरीतज्ञानानामेकनिबंधनं मुख्यकारणमनादिरुत्पत्तिरहिताविद्या वक्ष्यमाणा प्रतिवंधस्य हेतुरित्यर्थः ॥ १४ ॥ इदानीं प्रतिवंधहेतुमविद्यां

तस्य हेतुः समानाभिहारः पुत्रध्वनिश्रुतौ ॥ इहानादिरविद्यैव व्यामोहैकनिवंधनं ॥ १४ ॥
चिदानंदमयब्रह्मप्रतिविंवसमन्विता ॥ तमोरजःसत्वगुणा प्रकृतिर्द्विविधा च सा ॥ १५ ॥

प्रतिपादयितुं तन्मूलभूतां प्रकृतिमुत्पादयति ॥ चिदानंदेति ॥ यच्चिदानंदरूपं ब्रह्म तस्य प्रतिविंवेन प्रतिच्छायया समन्विता । युक्ता तमोरजःसत्वगुणा सत्वरजस्तमोगुणानां साम्यावस्था या सा प्रकृतिरित्युच्यते सा च द्विविधा द्विप्रकारा भवति चकाराद्वक्ष्यमाणं प्रकारांतरं सूचयति ॥ १५ ॥ ॥ ७ ॥ ॥ १५ ॥ ॥ ७ ॥ ॥ १५ ॥ ॥ ७ ॥ ॥

सहेतुकं द्वैविध्यमेव दर्शयति॥ सत्त्वेति॥ सत्वस्य प्रकाशात्मकस्य गुणस्य शुद्धिः गुणांतरेणाकलुषीकृतता अविशुद्धिः गुणांतरेणकलुषीकृतत्वं ताभ्यां सत्वशुद्ध्यविशुद्धिभ्यां ते च द्विविधे मायाविद्ये मायेत्यविद्येति च मते संमते विशुद्धसत्त्वप्रधाना माया मलिनसत्त्वप्रधानाविद्येत्यर्थः॥ यदर्थं मायाविद्ययोर्भेद उक्तस्तदिदानीं दर्शयति॥ मायाबिंब इति॥ माया

सत्त्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते॥ मायाबिंबो वशीकृत्य तां स्यात्सर्वज्ञ
ईश्वरः॥१६॥ अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा॥ ७॥ ७॥

बिंबः मायायां प्रतिफलितश्चिदात्मा तां मायां वशीकृत्य स्वाधीनीकृत्य वर्तमानः सर्वज्ञः॥ सर्वज्ञत्वादिगुणकः ईश्वरः स्यादविद्यावशगो विद्यायां प्रतिबिंबत्वेन तत्परतंत्रः चिदात्मान्यो जीवः स्यात्स च तद्वैचि[illegible]त्र्यात्तस्या अविद्याया उपाधिभूताया वैचित्र्याद्विशुद्धितारतम्यादनेकधा अनेकप्रकारः देवतिर्यगादिभेदेन विविधो भवतीत्यर्थः॥ ॥७॥ ॥७॥ ॥

यथामुंजादिषीकेवमात्मायुक्त्यासमुद्धृतः॥शरीरत्रितयाद्धीरैःपरंब्रह्मैवजायतइत्युक्तत्तत्रशरीरत्रितयाद्विवेचितस्यजीवस्यपरब्रह्मत्वंवक्ष्यतितत्रतानिकानित्रीणिशरीराणितदुपाधिकोवाजीवःकिंरूपोभवतीत्याकांक्षायांतत्सर्वंक्रमेणमुत्पादयतीति॥साकारणशरीरमित्यादिना।साविद्याकारणशरीरंस्थूलसूक्ष्मशरीरादिकारणंभूतप्रकृत्यवस्थाविशेषत्वात्कारणस्वरूपत्वाच्छीर्यतेतत्त्वज्ञानाच्छिद्यतइतिवेतिशरीरंस्यात्तत्कारणशरीरेऽभिमानवानतादात्म्याध्यासेनाह

साकारणशरीरंस्यात्प्राज्ञस्तत्राभिमानवान्॥१७॥तमःप्रधानप्रकृतेस्तद्भोगा
येश्वराज्ञया॥वियत्पवनतेजोऽम्बुभुवोभूतानिजज्ञिरे॥१८॥ छ॥ ॥

मित्यभिमानवान्जीवःप्राज्ञःप्रज्ञाविनाशिस्वरूपानुभवोपस्यसप्रज्ञःप्रज्ञएवप्राज्ञः एतन्नामकःस्यादित्यर्थः क्रमप्राप्तंसूक्ष्मशरीरंतदुपाधिकंजीवंचवक्ष्यत्यादपितत्कारणाकाशादिसृष्टिमाह तमःप्रधानेति तद्भोगायतेषांप्राज्ञानांभोगायसुखदुःखसाक्षात्कारसिद्धयेतमःप्रधानप्रकृतेस्तमोगुणप्रधानायाःप्रकृतेः पूर्वोक्तायाउपादानकार

णभूतायाः॥

वृत्तिभेदानेव दर्शयति ॥ प्राण इति ॥ ते पुनस्तत्तु भेदाः प्राणादिशब्दवाच्या इत्यर्थः ॥ २३ ॥ यदर्थमाकाशादीनां तानां सृष्टिस्त-
ज्जातदिदानीं दर्शयति ॥ बुद्धीति बुद्धयो ज्ञानानि कर्माणि व्यापारास्तज्जनकानीन्द्रियाणि बुद्धिकर्मेन्द्रियाणि बुद्धीन्द्रियाणि
कर्मेन्द्रियाणि चेत्यर्थः बुद्धिकर्मेन्द्रियाणि च प्राणाश्च बुद्धिकर्मेन्द्रियप्राणाः तेषां पंचकानि तैर्मनसा विमर्शात्मकेन धिया

प्राणोपानः समानश्चोदानव्यानौ च ते पुनः ॥ २३ ॥ बुद्धिकर्मेन्द्रियप्राणपंचकैर्मनसा धि-
या ॥ शरीरं सप्तदशभिः सूक्ष्मं तल्लिंगमुच्यते ॥ २३ ॥ प्राज्ञस्तत्राभिमानेन तैजस-
त्वं प्रपद्यते ॥ हिरण्यगर्भतामीशस्तयोर्व्यष्टिसमष्टिता ॥ २४ ॥ छ छ

निश्चयरूपया बुद्ध्या च सहत्यदशभिः सप्तदशसंख्याकैः सूक्ष्मं शरीरं भवति ॥ तस्यैव संज्ञान्तरमाह ॥ तल्लिंगमिति ॥ उच्यते वेदान्तेष्वि-
त्यर्थः एवं सूक्ष्मशरीरमभिधाय तदभिमानित्वप्रयुक्तं प्राज्ञेश्वरयोरवस्थांतरं दर्शयति ॥ प्राज्ञ इति ॥ प्राज्ञो मलिनसत्त्वप्रधाना-
विद्योपाधिको जीवस्तत्र तैजसशब्दवाच्यान्तःकरणाद्युपलक्षितलिंगशरीरेऽभिमानेन तादात्म्याभिमानेन तैजसत्वं तैज-
सनामकत्वं प्रपद्यते प्राप्नोति। ईशः विशुद्धसत्त्वप्रधानमायोपाधिकः ॥ २४ ॥ छ ॥ २४ ॥ छ ॥

परमेश्वरस्तत्रशरीरेऽहमित्यभिमानेनहिरण्यगर्भसंज्ञत्वंप्रपद्यतइत्यत्रपंगस्तैजसहिरण्यगर्भयोर्लिंगशरीराभिमानित्वेसमा
स्तीतितयोःपरस्परभेदःकिंनिबंधनइत्यतआह॥ तयोरिति॥ तयोस्तैजसहिरण्यगर्भयोर्व्यष्टित्वंसमष्टित्वंचभवतीतिततएवभेद
इत्यर्थः॥ ईश्वरोहिरण्यगर्भःसर्वेषांलिंगशरीरोपाधिकानांतैजसानांस्वात्मनातादात्म्यवेदनात्स्वात्मनातादात्म्यैकत्वस्यवेद

समष्टिरीशःसर्वेषांस्वात्मतादात्म्यवेदनात्॥ तदभावात्ततोन्येतुकथ्यंतेव्यष्टिसंज्ञयाइति॥ २५॥

नात्दानात्समष्टिर्भवतीतिततईश्वरादन्येजीवास्तुतदभावात्तस्यतादात्म्यवेदनस्याभावात्व्यष्टिसंज्ञयाव्यष्टिशब्देनकथ्यंते॥ ए
वंलिंगशरीरंतदुपाधिकौतैजसहिरण्यगर्भौचदर्शयित्वास्थूलशरीरोत्पत्तिसिद्ध्यर्थंपंचीकरणंनिरूपयितुमाह॥ तद्भोगायेति

सकाशादीश्वराज्ञया ईशानादिशक्तियुक्तस्य जगदधिष्ठानराज्ञपा ईक्षापूर्वकसर्जनेच्छारूपया निमित्तकारणभूतया वियदादीनि पृथिव्यंतानि पंचभूतानि जज्ञिरे प्रादुर्भूतान्युत्पन्नानीत्यर्थः॥ भूतसृष्टिमभिधाय भौतिकसृष्टिमभिदधान आदौ ज्ञानेंद्रियसृष्टिमाह॥ सत्वांशैरिति तेषां वियदादीनां पंचभिः सत्वांशैः सत्वगुणभागैरुपादानभूतैः श्रोत्रत्वगक्षिरस

सत्वांशैः पंचभिस्तेषां क्रमाद्धींद्रियपंचकं॥ श्रोत्रत्वगक्षिरसनघ्राणा
ख्यमुपजायते॥१२॥ तैरंतःकरणं सर्वैर्वृत्तिभेदेन तद्द्विधा॥

नघ्राणाख्यं धींद्रियपंचकं धींद्रियाणि ज्ञानेंद्रियाणि तेषां पंचकं क्रमादुपजायते एकैकभूतसत्वांशादेकैकमिंद्रियं जायत इत्यर्थः॥१२॥ सत्वांशानां प्रत्येकमसाधारणकार्याण्यभिधाय सर्वेषां साधारणं कार्यमाह॥ तैरंतःकरणमिति तैः सह सत्वांशैः सर्वैः संभूय वर्त्तमानैरंतःकरणं मनोबुद्ध्युपादानभूतं द्रव्यमुपजायत इत्यन्वयः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

तस्यावांतरभेदंसनिमित्तमाह॥ वृत्तीति॥ तदंतःकरणंवृत्तिभेदेनपरिणामभेदेनद्विधाद्विप्रकारंभवतिवृत्तिभेदमेवदर्शयति॥ मनइति॥ विपर्शरूपंविमर्शःसंशयात्मिकावृत्तिःसास्वरूपंयस्यतत्तथातन्मनःस्यान्निश्चयात्मिकानिश्चयोऽध्यवसायःसआत्मास्वरूपंयस्याःसानिश्चयात्मिकासावृत्तिर्बुद्धिःस्यात॥ क्रमशःप्राणानांरजोंशानांप्रत्येकमसाधारणकार्याण

मनोविमर्शरूपंस्याद्बुद्धिःस्यान्निश्चयात्मिका॥ २०॥ रजोंशैःपंचभिस्तेषांक्रमात्कर्मेंद्रिया
णितु॥ वाक्पाणिपादपायूपस्थाभिधानानिजज्ञिरे॥ २१॥ तैःसर्वैःसहितैःप्राणोवृत्तिभे
दात्सपंचधा॥

पाह॥ रजोंशैरिति॥ तेषांवियदादीनामेवपंचभिरजोंशैरजोभागैरुपादानभूतैर्वाक्पाणिपादपायूपस्थाभिधानानिएतन्नामकानिकर्मेंद्रियाणिक्रियाजनकानिकर्मेंद्रियाणिजज्ञिरे॥ रजोंशानामेवसाधारणंकार्यमाहतैःसर्वैरितिसहितैःसंभूयकारणानांगतैःसंभूयकारणानांगतैःप्राणोजायतइतिशेषः॥ तस्यावांतरभेदमाहवृत्तिभेदादिति॥ सप्राणोवृत्तिभेदात्प्राणनादिव्यापारभेदात्पंचधापंचप्रकारोभवति॥

भगवानैश्वर्यादिगुणगणाढ्यसंपन्नपरमेश्वरःपुनःपुनरपितद्भोगायतेषांजीवानांभोगायैवभोग्यभोगायतनजन्मनेभो
ग्यस्यान्नपानादेर्भोगायतनस्यजरायुजादिचतुर्विधशरीरजातस्यचजन्मनेउत्पत्तयेवियदादिकमाकाशादिभूतपंचकं
प्रत्येकमेकैकंपंचीकरोत्यपंचात्मकंपंचात्मकंसंपद्यमानंकरोति॥कथमेकैकस्यपंचात्मकत्वमित्यतआह। द्विधेति॥ वियदा

तद्भोगायपुनर्भोग्यभोगायतनजन्मने॥पंचीकरोतिभगवान्प्रत्येकंवियदादिकंइति॥२६॥
द्विधाविधायचैकैकंचतुर्धाप्रथमंपुनः॥ स्वस्वेतरद्वितीयांशैर्योजनात्पंचपंचतेइति॥ २७॥

दिकंएकैकंद्विधाद्विधाद्विधातंत्रेणाच्चारितोद्विधाशब्दःविधायकृत्वाभागद्वयोपेतंकृत्वेत्यर्थः॥पुनश्चपुनरपिप्रथमंप्रथमंभा
गंचतुर्धाभागचतुष्टयोपेतंविधायेत्यनुषज्यते॥स्वस्वेतरद्वितीयांशःस्वस्मात्स्वस्मादितरेषांचतुर्णांचतुर्णांभूतानांयोयो
द्वितीयःस्थूलोभागस्तेनतेनेनसहप्रथमंप्रथमभागांशानांचतुर्णांचतुर्णांमध्येएकैकस्ययोजनात्तेवियदादयःप्रत्येकंपंचपं
चात्मकानिभवंतीति॥ २७॥

एवंपंचीकरणमभिधायतैर्भूतैरुत्पाद्यंकार्यवर्गंदर्शयति। तैरंडइति। तैःपंचीकृतैर्भूतैरुपादानकारणभूतैरंडः। ब्रह्मांडः। उत्पद्यतेतत्रब्रह्मांडेभुवनानामुपरिभागेवर्त्तमानाभूरादयःसप्तलोकाःभूमेरधःस्थितान्यतलादीनिसप्तपातालांतानितेषुचभुवनेषुतैस्तैःप्राणिणांभोग्ययोग्यान्यन्नादीनितत्तल्लोकोचितशरीराणिचतैरेवपंचीकृतैर्भूतैरीश्वराज्ञयाजायंतेएवंस्थूलशरीरोत्पत्तिमभिधाय

तैरंडस्तत्रभुवनंभोग्यभोगाश्रयोद्भवः॥ हिरण्यगर्भःस्थूलेस्मिन्देहेवैश्वानरोभवे
त॥२८॥ तैजसाविश्वतांयातादेवतिर्यङ्नरादयः॥ तेपराग्दर्शिनः

तेषुस्थूलशरीरेष्वभिमानवतोहिरण्यगर्भस्यसमष्टिरूपस्यवैश्वानरसंज्ञकत्वंएकैकस्थूलशरीराभिमानवतांव्यष्टिरूपाणांतैजसानांविश्वसंज्ञकत्वंचभवतीत्याह। हिरण्यगर्भइति॥ अस्मिनस्थूलदेहवर्त्तमानोहिरण्यगर्भोवैश्वानरोभवेत्तत्रैववर्त्तमानास्तैजसाविश्वाभवंतितेषामवांतरभेदमाह। देवेति। इदानींतेषांविश्वसंज्ञांप्राप्तानांजी॥

वानांतत्वज्ञानरहितत्वेनसंसारापत्तिप्रकारंसदृष्टांतंश्लोकद्वयेनाहतेपरागिति तेदेवादयःपराग्दर्शिनःबाह्यानेवशब्दादीनेवपश्यंति
नतुप्रत्यगात्मानं।परांचिखानिव्यतृणत्स्वयंभूस्तस्मात्पराङ्पश्यंतिनांतरात्मन्निति श्रुतेः॥ ॥ननुतार्किकादयोदेहव्यतिरि
क्तमात्मानंजानंतीत्याशंक्ययद्यप्यात्मानंतेजानंतितथापिश्रुतिसिद्धंतत्वंनजानंतीत्याशयेनोक्तमित्याह।प्रत्यगिति।अतए

प्रत्यक्तत्वबोधविवर्जिताः॥ २९॥कुर्वतेकर्मभोगायकर्मकर्तुंचभुंजते॥नद्यांकीटाइ
वावर्त्तादावर्त्तांतरमाशुते॥ ३०॥ व्रजंतोजन्मनोजन्मलभंतेनैवनिर्वृतिं॥ ७

चभोगायसुखाद्यनुभवायमनुष्यादिशरीरारापधियापकर्मतत्तच्छरीरोचितानिकर्माणि।कुर्वतेजातावेकवचनंपुनश्चक
र्मकर्तुंदेवादिशरीरैस्तत्तत्फलंभुंजतेचफलानुभवाभावेनतत्तत्सजातीयेच्छानुपपत्यातत्तत्साधनानुष्ठानानुपपत्तेरेवंव
र्तमानास्तेजीवाहपतिताःकीटश्चावर्त्तादावर्त्तांतरयाशुव्रजंतोयथानिर्वृतिंसुखंनलभंतेएवमाशुजन्मनोजन्मव्रजंतःसुखंनैव

॥७॥

॥त॰वि॰॥
॥११॥

एवंसंसारापत्तिमभिधायतन्निवृत्त्युपायंदर्शयितुंदृष्टांतंतावदाह।सत्कर्मेति।तेकीटाःसत्कर्मपरिपाकात्पूर्वोपार्जितपुण्यकर्मपरिपाकात्कृपालुनाकेनचिद्गुरुविशेषेणोद्धृताःनदीप्रवाहाद्बहिर्निःसारिताःसंतस्तीरतरुच्छायांप्राप्यसुखंयथाभवतितथापद्विश्राम्यंति।इदांनीदृष्टांतेनसिद्धमर्थंदार्ष्टांतिकेयोजयति।उपदेशमिति॥एवमुक्तेनप्रकारेणपूर्वोपार्जितपु

सत्कर्मपरिपाकात्तेकरुणानिधिनोद्धृताः॥३१॥प्राप्यतीरतरुच्छायांविश्राम्यंतियथासुखं।उपदेशमवाप्यैवमाचार्यात्तत्वदर्शिनः॥३२॥पंचकोशविवेकेनलभंतेनिर्वृतिंपरां॥अन्नंप्राणोमनोबुद्धिरानंदश्चेतिपंचते॥३३॥

ण्यकर्मपरीपाकवशादेवतत्वदर्शिनःप्रत्यगभिन्नब्रह्मसाक्षात्कारवतआचार्याद्गुरोःसकाशादुपदेशंतत्वमस्यादिवाक्यार्थज्ञानसाधनंश्रवणंवक्ष्यमाणविवेचनेनपरांनिर्वृतिंमोक्षसुखंलभंतेप्राप्नुवंति।केतेऽन्नादयःपंचकोशाइत्याकांक्षायांतानुद्दिशति।अन्नप्राणइति।अन्नमाणोमनोबुद्धिरानंदश्चेतितेपंचकोशाःबुद्धिर्विज्ञानं॥ ७ ॥ ७ ॥

॥रामः॥
॥११॥

तेषामन्नादीनां कोशशब्दाभिधेयत्वे कारणमाह। तैरिति तैः कोशैरावृत आच्छादितः स्वात्मा स्वरूपभूत आत्मा विस्मृत्या स्वस्वरूपविस्मरणेन स्मृतिं जननादिप्राप्तिरूपं संसारं व्रजेत स्पष्टं कोशा यथा कोशकारकृमेरावरकत्वेन क्लेशहेतुरेवमन्नाद्या अप्यध्यानं दत्वाद्यावरकत्वेनात्मनः क्लेशहेतुत्वात्कोशा इत्युच्यंत इत्यर्थः। तेषां कोशानां स्वरूपाणि क्रमेणाभुत्पादपाति। स्यात्पंचीकृतेत्यादि ना। मोदादिवृत्तिरित्यं तेनेनं। पंचीकृतेभ्य उत्पन्न। स्थूलो देहोऽन्नसंज्ञकः। अन्नमयशब्दितः कोश। स्यात्प्राणस्कंधाणामयकोशस्त

कोशास्तैरावृतः स्वात्मा विस्मृत्या संसृतिं व्रजेत॥ स्यात्पंचीकृतभूतोत्थो देहः स्थूलोऽन्नसंज्ञकः॥ ३४॥
लिंगेतु राजसैः प्राणैः प्राणः कर्मेंद्रियैः सह॥ सात्विकैर्धींद्रियैः साकं विमर्शात्मा मनोमयः॥ ३५॥

लिंगे लिंगशरीरे वर्त्तमानै राजसै रजोगुणकार्यभूतैः प्राणैः प्राणोऽपानादिभिर्वायुभिः पंचभिर्वागादिभिः कर्मेंद्रियैः सहस्वशभिः स्याद्विमर्शात्मा संशयात्मकं पंचभूतसत्वकार्यं यन्मन उक्तं तत्सात्विकं भूतसत्वकार्यभूतैर्धींद्रियैः श्रोत्रादिभिः पंचभिर्ज्ञानेंद्रियैः साकं सहितं मनोमयः कोशः स्यादिति पूर्वेणासंबंधः निश्चयात्मिका धीस्तेषामेव सत्वकार्यरूपा बुद्धिस्तैरेव पूर्वोक्तैः ज्ञानेंद्रियैरेव साकं सहिता सती विज्ञानमयः विज्ञानमयाख्यः को॥ ७॥

शः स्यात्कारणे कारणे कारणाभूतायामविद्यायां यन्मलिनसत्त्वमस्ति तन्मोदादिवृत्तिभिः प्रियमोदप्रमोदाख्यैरिष्टदर्शनलाभभोगज
न्यैः सुखविशेषैः सहितमानंदमय आनंदमयाख्यः कोशः स्यादिति ननु यमैः स्थूलशरीरादीनामन्नमयादिशब्दवाच्यत्वे सवा
एष पुरुषोऽन्नरसमय इत्युपक्रम्य तस्माद्वा एतस्मादन्नरसमयादन्योंतरेतरे आत्मा प्राणमयोन्योनर आत्मा मनोमय इत्यादि

तैरेव साकं विज्ञानमयो धीर्निश्चयात्मिका ॥ कारणे सत्त्वमानंदमयो मोदादिवृत्तिभिः ॥ ३६ ॥

ष्क्तत्वादात्मनोन्नमयादिशब्दवाच्यत्वं कथमुच्यंते इत्याशंक्य देहादीनामन्नादिविकारत्वेनान्नमयादिशब्दवाच्यतयात्मनस्त
नेनतेन कोशेन तादात्म्याभिमानादि साह ॥ तद्वदिति ॥ आत्माप्रणात्मातन्नन्कोशैस्तननते ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥

नकोशेनसहतादात्म्यात्तादात्म्याभिमानात्तत्तन्मयस्तत्तत्कोशमयःस्याद्व्यवहारकालेऽन्नमयादिकोशप्राधान्यादन्नमयादिशब्दवाच्य इत्यर्थः तुशब्दआत्मनःकोशेभ्योवैलक्षण्यद्योतनार्थःकथंतर्ह्येवंविधस्यात्मनोब्रह्मत्वंभवतीत्याशंक्यकोशेभ्योविवेचनाद्भवतीत्याह ॥ अन्वयेति ॥ अन्वयव्यतिरेकाभ्यांवक्ष्यमाणाभ्यांपंचकोशविवेकतःपंचानांकोशानामन्नमयादीनांविवेकतःप्रत्यगात्मनो

तत्तत्कोशैस्तुतादात्म्यादात्मातत्तन्मयोभवेत् ॥ अन्वयव्यतिरेकाभ्यांपं
चकोशविवेकतः ॥ ३७ ॥ स्वात्मानंततउद्धृत्यरंब्रह्मप्रपद्यते ॥ ॥
प

विवेचनेनपृथक्करणेनयद्वापंचकोशेभ्योऽन्नमयादिभ्यआत्मनःपृथक्करणेनस्वात्मानंप्रत्यगात्मानंततस्तेभ्यः ॥ कोशेभ्य उद्धृत्यबुद्ध्यानिष्कृष्यचिदानंदस्वरूपंनिश्चित्यपरंब्रह्मपूर्वोक्तलक्षणंप्रपद्यतेप्राप्नोतिब्रह्मैवभवतीत्यर्थः ॥ ७ ॥

इदानीविवक्षितावन्वयव्यतिरेकौदर्शयति अभानइति स्वप्नेस्वप्नावस्थायांस्थूलदेहस्यान्नमयकोशस्याभानेप्रतीतौसत्याम
मात्मनःप्रतीतौयद्भानंस्वप्नसाक्षित्वेनयत्स्फुरणमस्तिसआत्मनोऽन्वयस्तस्यामेवस्वप्नावस्थायांतद्भानेतस्यात्मनःस्फुरणे
सतिअन्यानवभासनमन्यस्यस्थूलदेहस्यानवभासनमप्रतीतिःव्यतिरेकःस्थूलदेहस्येतिशेषःअस्मिन्प्रकरणेऽन्वयव्यतिरे

अभानेस्थूलदेहस्यस्वप्नेयद्भानमात्मनः॥३८॥सोन्वयोव्यतिरेकस्तद्भानेऽन्यानवभासनं लिंगाभानेसु
षुप्तौस्यादात्मनोभानमन्वयः॥ ॥३९॥ ॥व्यतिरेकस्तुतद्भानेलिंगस्याभानमुच्यते॥ छ॥ ॥

कशब्दाभ्यां अनुवृत्तिव्यावृत्तीउच्येतेएवंस्थूलदेहस्यानात्मत्वाववोधकावन्वयव्यतिरेकौदर्शयित्वालिंगदेहस्यतथात्वावग
मकौदर्शयति॥ लिंगेति। सुषुप्तौसुषुप्त्यवस्थायांलिंगाभानेलिंगस्यसूक्ष्मदेहस्याभानेऽप्रतीतौआत्मनोभानंतदवस्थासा
क्षित्वेनस्फुरणमात्मनोन्वयःस्यादात्मभानेलिंगस्याभानंलिंगदेहस्यव्यतिरेकइत्युच्यते॥ छ॥ ॥छ॥ ॥छ॥ ॥

ननुपंचकोशविवेचनस्यप्रक्रम्यलिंगदेहविवेचनंप्रकृतासंगतमित्याशंक्यप्राणमयादिकोशत्रितयस्यतत्रैवांतर्भावात्न
प्रकृतासंगतिरित्याह॥ तद्विवेकादिति॥ तस्यलिंगशरीरस्यविवेकाद्विवेचनात्प्राणमनोधियएतन्नामकाःकोशाविविक्ताःआ
त्मनःपृथक्कृताःस्फुटीकृताइत्यतआह॥ तेहीति॥ हियस्मात्कारणात्तेप्राणमयादयःतत्रतस्मिन्लिंगशरीरेगुणावस्थाभे

तद्विवेकाद्विविक्ताःस्युःकोशाःप्राणमनोधियः॥४०॥ तेहितत्रगुणावस्थाभेदमात्रात्पृथक्कृ
ताः॥ सुषुप्त्यभानेभानंतुसमाधावात्मनोन्वयः॥४१॥ व्यतिरेकस्त्वात्मभानेसुषुप्त्यनवभासनं॥

दमात्राद्गुणप्रधानभावेनावस्थानविशेषादेवपृथक्कृताःभेदेननिर्दिष्टाइत्यर्थः॥ इदानीमानंदमयकोशत्वेनविवक्षित
स्यकारणशरीरस्यविवेचनोपायमाह॥ सुषुप्तीति॥ समाधौवक्ष्यमाणलक्षणायांसमाध्यवस्थायांसुषुप्त्यभानेसु
षुप्तिशब्दोपलक्षितस्यकारणदेहरूपस्याज्ञानस्याप्रतीतौआत्मनःतुशब्दोवधारणेआत्मनएवभानंस्फुरणंयदस्तिसआ
त्मनोन्वयःआत्मभानेआत्मनःस्फूर्तौसत्यांसुषुप्त्यनवभा॥ ❀ ॥ ❀ ॥ ❀ ॥ ❀ ॥

॥त·वि·॥
॥१४॥

सत्वंसुषुप्त्युपलक्षितस्याज्ञानस्याप्रतीतिरेवव्यतिरेकस्तस्येति।अत्रायंप्रयोगः॥अन्वगात्माअन्नमयादिभ्योभिद्यतेतेषुपरस्परंव्यवर्त्तमानेष्वपिस्वयमव्यावृत्तत्वात् यद्येषुव्यावर्त्तमानेष्वपिनव्यावर्त्ततेतत्तेभ्योभिद्यतेयथाकुसुमेभ्यःसूत्रंयथावाखंडादिव्यक्तिभ्योगोत्वमित्यन्वयव्यतिरेकाभ्यांकोशपंचकाद्विविक्तस्यात्मनोव्रह्मप्राप्तिरुक्तं तत्प्रतिपादिकामंगुष्ठमात्रःपुरुषो

यथामुंजादिषीकैवमात्मायुक्त्यासमुद्धृतः॥ ४२॥ शरीरत्रितयाद्धीरैःपरंव्रह्मैवजायते॥

तरांतरात्मेत्यादिकांतंविद्याच्छुक्रममृतमित्यंतांकठश्रुतिमर्थतःपठति॥यथेति॥यथायेनप्रकारेणमुंजादेतन्नामकात्तृणाद्विशेषादिषीकागर्भस्थकोमलतृणंयुक्त्यावहिरावाकत्वेनस्थितानांस्थूलपत्राणांविभजनलक्षणेनोपायेनसमुद्ध्रियतेएवमात्मापियुक्त्यान्वयव्यतिरेकेणोपायेनशरीरत्रितयात्पूर्वोक्ताच्छरीरत्रितयाद्धीरैःब्रह्मचर्यादिसाधनसंपन्नैरधिकारिभिः समुद्धृतःपृथक्कृतश्चेत्स॥ [illegible] ७॥[illegible]॥

॥राम:॥
॥१४॥

ज्ञापतेचिदानंदरूपत्वस्यलक्षणस्योभयोरविशिष्टत्वादित्यभिप्रायः॥ एतावताग्रंथसंदर्भेणफलस्यतत्त्वज्ञानस्यनिरूपितत्वादुत्तरग्रंथभागस्यानारंभप्रसंगइत्याशंक्यतदारंभसिद्धयेवृत्तानुकीर्त्तनपूर्वकमुत्तरग्रंथस्यतात्पर्यमाह। परापरेति। एवंउक्तेनप्रकारेणपरापरात्मनोस्तत्त्वंपदार्थयोःपरमात्मनीवात्मनोरेकताभिन्नतायुक्त्यालक्षणासाम्यप्रदर्शनाद्युपायेनसंभावि

परापरात्मनोरेवंयुक्त्यासंभाविनैकता॥४३॥ तत्त्वमस्यादिवाक्यैःसाभागत्यागेनलक्ष्यते
जगतोयदुपादानंमायामादायतामसीं॥४४॥ निमित्तंशुद्धसत्त्वांतामुच्यतेब्रह्मतद्गिरा॥

ताअंगीकारितासाएकतातत्त्वमस्यादिवाक्यैःस्पष्टभागत्यागेनविरुद्धांशपरित्यागेनलक्ष्यतेलक्षणयावृत्त्याबोध्यते॥तत्त्वमसीतिवाक्यार्थज्ञानस्यतदादिपदार्थज्ञानपूर्वकत्वात्तत्पदस्यवाच्यार्थंतावदाह। जगत इति॥यत्सच्चिदानंदलक्षणंब्रह्मतामसींतमोगुणप्रधानांमायामादायउपाधित्वेनस्वीकृत्यजगतश्चराचरात्मकस्य॥ ७॥ ॥७॥ ॥७॥ ॥७॥ ॥

कार्यवर्गस्यउपादानमध्यासाधिष्ठानंशुद्धसत्वांविशुद्धसत्वप्रधानांतामुपाधित्वेनस्वीकृत्यनिमित्तमुपादानाद्यभिज्ञंकर्तृभवतितद्ब्रह्मनिमित्तोपादानोभयरूपंब्रह्मतज्ज्ञानत्वमसिवाक्यस्येनतत्पदेनोच्यते त्वंपदवाच्यार्थमाह॥पदेति॥तदेवब्रह्मयदायस्यामवस्थायांमलिनसत्वांरजस्तमोमिश्रेणमलिनसत्वप्रधानांअतएवकाममकर्मादिदूषितामविद्या

यदामलिनसत्वांतांकामकर्मादिदूषितां॥४५॥आदत्तेतत्परंब्रह्मत्वंपदेनतदोच्यते॥
त्रितयीमपितांमुक्त्वापरस्परविरोधिनीं॥४६॥अखंडंसच्चिदानंदंमहावाक्येनलक्ष्यते॥

शब्दवाच्यांमायामादत्तेउपाधित्वेनस्वीकरोतितदात्वंपदेनोच्यतेएवंतत्वंपदार्थावभिधायवाक्यार्थमाह॥त्रितयीमिति॥त्रितयीमपित्रिप्रकारांमःप्रधानविशुद्धसत्वप्रधानमलिनसत्वप्रधानत्वभेदेनोक्तामतएवपरस्परविरोधिनींतांमायामुक्त्वापरित्यज्यअखंडंभेदरहितंसच्चिदानंदंब्रह्ममहावाक्येनलक्ष्यतेउक्तं॥ ॥ ॥ ॥

नन्वेवंलक्षणावृत्त्यावाक्यार्थबोधनंकष्टमित्याशंक्याह॥सोयमिति।सोयंदेवदत्तइत्यादिवाक्येऽत्रतदिदंतयोस्तदेतद्देशकालवैशिष्ट्यलक्षणयोर्धर्मयोर्विरोधादैक्यानुपपत्तेर्भागयोर्विरुद्धांशयोस्त्यागेनैकआश्रयोदेवदत्तस्वरूपमेकमेवयथालक्ष्यते एवंदृष्टान्तमभिधायदार्ष्टान्तिकमाह॥मायाऽविद्येइतिएवंसोयंदेवदत्तइत्यादिवाक्येयथातद्वत्परजीवयोरुपाधी उ

सोयमित्यादिवाक्यस्थविरोधात्तदिदंतयोः॥ ४७॥ त्यागेनभागयोरेकआश्रयोलक्ष्यतेयथा॥मायाविद्येविहायैव
मुपाधीपरजीवयोः॥ ४८॥अखंडंसच्चिदानंदंपरंब्रह्मैवलक्ष्यते॥सविकल्पस्यलक्ष्यत्वेलक्ष्यस्यस्यादवस्तुता॥४९॥

पाधिभूतेमायाविद्येपूर्वोक्तेविहायपरित्यज्याखंडंभेदरहितंसच्चिदानंदंपरंब्रह्मैवमहावाक्येनलक्ष्यंसविकल्पमुतनिर्विकल्पमितिविकल्प्यप्रथमपक्षेदोषमाहपूर्ववादी सविकल्पस्येति।सविकल्पेनविपरीतत्वेनकल्पितेननामजात्यादिनारूपेणवर्त्ततइतिसविकल्पंतस्यलक्ष्यत्वेवाक्येनबोध्यत्वेलक्ष्यस्यवाक्यार्थतयालक्ष्यस्यावस्तुतामिथ्यात्वंस्यात्॥ ७॥ ॥

द्वितीयेदोषमाह॥निर्विकल्पस्येति।निर्विकल्पस्यनामजात्यादिनारहितस्यलक्ष्यत्वंनदृष्टंलोकेनक्वापिदृष्टंनचसंभविउपपद्य
मानमपिनभवतिलक्ष्यत्वधर्मवतोनिर्विकल्पत्वव्याघातादितियावत्सिद्धांतीजात्यन्तरत्वान्नेदंचोद्यमितिविकल्पपूर्वकं
दोषमाह॥विकल्पइति॥सविकल्पस्यवानिर्विकल्पस्यवालक्ष्यत्वमितितयोर्विकल्पस्त्वयाकृतःसकिंनिर्विकल्पस्यउतसवि

निर्विकल्पस्यलक्ष्यत्वंनदृष्टंनचसंभवि॥विकल्पोनिर्विकल्पस्यसविक
ल्पस्यवाभवेत्॥५०॥आद्येव्याहतिरन्यत्राऽनवस्थात्माश्रयादयः॥

कल्पस्यभवेदाद्येप्रथमेपक्षेव्याहतिस्त्वयोक्तोव्याघातएवअन्यत्रद्वितीयेपक्षेऽनवस्थादयस्तथाहिसविकल्पस्यवि
कल्पइत्यत्रविकल्पेनसहवर्त्ततइत्यत्रतृतीयांतविकल्पपदेनप्रथमांतविकल्पपदेनचैकएवविकल्पोऽभिधीयतेद्वौवाए
कएवचेत्त्वयमेकएवविकल्पाश्रयविशेषणतयाआश्रयस्तदाश्रितोविकल्पश्चेत्तदात्माश्रयतादोषः॥ ७ ॥

न्नदानृतीयांनशब्दनिर्द्दिष्टस्यापिविकल्पस्याविकल्परूपत्वात्तदाश्रयस्यापिसविकल्पत्वात्तद्विशेषणभूतोविकल्पः किंप्रथमं
नशब्दनिर्द्दिष्टएवविकल्पउतताभ्यामन्यः आद्यअन्योन्याश्रयनाद्वितीयेपिधर्म्मिविशेषणीभूतोविकल्पः किंप्रथमांनश
ब्दनिर्द्दिष्टउततेभ्योऽन्यआद्येचक्रकापत्तिर्द्वितीयेतस्याप्यन्यस्तस्याप्यन्यइत्यनवस्थापातइति ॥ नकेवलमनेनैवेदं

॥ इदंगुणक्रियाजातिद्रव्यसंबंधवस्तुषु ॥ ५१ ॥ समंतेनस्वरूपस्यसर्वमेतद्दितीप्सतां· ॥

दूषणमपितुसर्व्वेचैवंविधविकल्पपूर्व्वकंदूषणंप्रसरतीत्याह। इदमिति। इदंविकल्पदूषणजातंगुणक्रियाजातिद्रव्यं
संबंधवस्तुषुगुणादिसंबंधांतेषुपंचसुवस्तुषुसमंतथाहिगुणाः किंनिर्गुणावर्त्तंतेऽथवागुणावंति क्रियापिकिंक्रियारहि
तेक्रियावतिवाआद्येव्याघातोऽन्यत्रात्माश्रयादयइतिसर्व्वत्रैवंचैवमूह्यं ॥ नन्विदमसदुत्तरंचेत्किंसदुत्तरमित्याशंक्याह

तेनेतितेनैवंविकल्पस्यासंगतत्वेनेन ॥

गुणादिकं सर्वं स्वरूपस्येतीष्यतां गुणादयः सर्वे वस्तुस्वरूपेवंतन्न इत्यभिप्रायः ॥ भवत्वेवमन्यत्र प्रकृते किमायातमित्यत आह। विकल्पेति। विकल्पतदभावाभ्यां विकल्पेन विकल्पाभावेन चासंस्पृष्टात्मवस्तुनि संस्पर्शरहिते परमात्मवस्तुनि निर्विकल्पितलक्ष्यत्वसंबंधाद्यास्तत्र विकल्पितत्वं नाम सविकल्पस्यैवा निर्विकल्पस्यैवेति पूर्वोक्तेन विषयीकृतत्वं लक्ष्यत्वं लक्षणाकृत्वाज्ञाप्यत्वं संबंधः संयोगादिरादिशब्देन द्रव्यादयो गृह्यन्ते तु शब्दोऽवधारणेनत्र द्रव्यं नाम गुणानामाश्रयो द्रव्यं समवायि·

विकल्पतदभावाभ्यामसंस्पृष्टात्मवस्तुनि ॥ ५२ ॥ विकल्पितत्वलक्ष्यत्वसंबंधाद्यास्तु कल्पिताः ॥

कारणं द्रव्यमिति वा तार्किकैर्लक्षितं कर्मव्यतिरिक्तत्वे सति जातिश्चाश्रयो गुणाः नित्यमेकमनेकवृत्ति सामान्यमिति लक्षिताजातिः संयोगवियोगयोरसमवायिकारणजातीयं कर्मेति लक्षिता क्रिया एते सर्वे स्वरूपे कल्पिता एवेत्यर्थः ॥ ॥ एतावता ग्रंथसंदर्भेण किमुक्तं भवतीत्याकांक्षायां फलितमाह। इत्यमिति। इत्थं जगत्तोयदुपादानमित्यादिग्रंथजातोक्तप्रकारे ॥ ७ ॥

णावाक्यैस्तत्त्वमस्यादिवाक्यैस्तदर्थानुसंधानंतेषांवाक्यानामर्थस्यजीवब्रह्मणोरेकत्वलक्षणस्यानुसंधानंश्रवणंभवेद्यु
क्त्याशब्दस्पर्शादयोवेद्याइत्यादिनापरापरात्मनोरेवंयुक्त्यासंभावितैकत्वेन्यंतेनग्रंथसंदर्भेणोक्तप्रकारेणासंभावितत्वानुसं
धानंकृतस्यार्थस्योपपद्यमानत्वज्ञानंयदस्तितन्मननमित्युच्यते॥इदानींनिदिध्यासनमाह·ताभ्यामिति।ताभ्यांश्रव

इत्थंवाक्यैस्तदर्थानुसंधानंश्रवणंभवेत्॥ ५३॥ युक्त्यासंभावितत्वानुसंधानंमननंतुतत्॥
ताभ्यांनिर्विचिकित्सेर्थेचेतसःस्थापितस्ययत्॥ ५४॥ एकतानत्वमेतद्धिनिदिध्यासनमुच्यते॥

णमननाभ्यांनिर्विचिकित्सेनिर्गताविचिकित्सासंशयोयस्माद्सौनिर्विचिकित्सःतस्मिन्नर्थेविषयेस्थापितस्यधार
णावतश्चेतसःदेशबंधश्चित्तस्यधारणेतिपतंजलिनोक्तत्वाद्यदेकतानत्वमेकाकारवृत्तिप्रवाहवत्त्वमेतन्निदिध्या
सनमुच्यतेहिप्रसिद्धंयोगशास्त्रेतत्रप्रत्ययैकतानताध्यानमिति॥ ७॥ ॥७॥ ॥७॥ ॥७॥ ॥

॥त.त्व.॥
॥१८॥

तस्यैवनिदिध्यासनस्यपरिपाकदशारूपंसमाधिमाह।ध्यातृध्यानेइति।निदिध्यासनेतावध्याताध्यानंध्येयंचेतित्रितयंभास
तेतत्त्रयंयदाचिरमभ्यासवशेनध्यातृध्यानेध्यातारंध्यानंचक्रमात्परित्यध्येयैकगोचरंध्येयमेकमेवगोचरोविषयोयस्यतत्तथा
विधंभवतितदासमाधिरित्युच्यतेतत्रदृष्टांतः।निवातेति।वातरहितेप्रदेशेवर्तमानोदीपोयथानिश्चलोभवतितद्वदित्यर्थः।ननु

ध्यातृध्यानेपरित्यज्यक्रमाद्ध्येयैकगोचरं॥५५॥ निर्वातदीपवच्चित्तंसमाधिरभिधीयते॥
वृत्तयस्तुतदानीमज्ञाताअप्यात्मगोचराः॥स्मरणादनुमीयंतेव्युत्थितस्यसमुत्थिताः॥५६॥

समाधौवृत्तीनामनुत्पत्तेर्ध्येयैकगोचरत्वमपिनिश्चेतुंनशक्यतइत्याशंक्यवृत्तिसद्भावस्यानुमानगम्यत्वान्मैवमित्या
ह।वृत्तयस्त्विति।आत्मगोचराआत्मागोचरोविषयोयासांतावृत्तयस्तुतदानींसमाधिकालेज्ञाताअपिव्युत्थितस्यसमा
धेरुत्थितस्यसमुत्थिताउत्पन्नास्मरणादेतावंतंका॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

॥रामः॥
॥१८॥

लंसमाहितोभूवमित्येवंरूपादनुसीपंतेयद्यत्स्मर्यतेतत्तदनुभूतमितिव्याप्तेर्लोकसिद्धत्वादित्यर्थः॥ ॥ननुतदांनीवत्क
त्यादकप्रयत्नाभावात्कथं। वृत्त्यनुवृत्तिरित्याशंक्यतात्कालिकेप्रयत्नाभावेपिप्राथमिकादेवप्रयत्नाददृष्टादिसहकारि
सहिताद्भवतीत्याह। वृत्तीनामिति। ध्येयेकेगोचराणांवृत्तीनामनुवृत्तीस्तत्प्रवाहरूपेणानुगतिस्तत्प्रथमादपिप्रयत्नात्स

वृत्तीनामनुवृत्तिस्तत्प्रयत्नात्प्रथमादपि॥ अदृष्टासकृदभ्याससंस्कारसचिवाद्भवेत्॥ ५७॥

माधिपूर्वकालीनादपिअदृष्टमशुक्लाकृष्णकर्माख्योयः। पुण्यविशेषः॥ कर्माशुक्लाकृष्णंयोगिनस्त्रिविधमितरेषामिति
पतंजलिनासूत्रितत्वात् पश्चासकृतदभ्याससंस्कारःपुनःपुनःसमाध्यभ्यासेनजनितोभावनाख्यःसंस्कारविशेषस्ता
भ्यांसहकारिकारणाभ्यांसहवर्त्तमानाद्भवति॥ ५७॥

॥न.वि.॥
॥१९॥

नन्वयं समाधिः पूर्वं वा येन निरूपितो दृष्ट इत्याशंक्य सर्वज्ञरूपेण श्रीपुरुषोत्तमेन निरूपितत्वान्नैवमित्याह। यथेति। यथादीपो निवातस्थो नेंगते सोपमा स्मृतेत्यादिभिः श्लोकैरनेकधा नानाप्रकारेण भगवान् ज्ञानैश्वर्यादिसंपन्न इममेव निर्विकल्पकसमाधिरूपमर्थमर्जुनाय शिष्यायान्यरूपप निरूपितवान्। अस्य समाधेरवान्तरफलमाह। अनादाविति। अनादेरस्य स्पष्टं इहास्मिन्संसारे संचिताः संपा

यथादीपोनिवातस्थ इत्यादिभिरनेकधा। भगवानिममेवार्थमर्जुनायान्वरूपयत्॥ ५८॥
अनादाविह संसारे संचिताः कर्मकोटयः। अनेन विलयं यान्ति शुद्धो धर्मो विवर्द्धते॥ ५९॥

दिताः कर्मणां पुण्यापुण्यलक्षणानां कोटय इत्युपलक्षणं अपरिमितानि कर्माणीत्यर्थः। अनेन समाधिना विलयं यान्ति विनश्यन्ति क्षीयन्ते चास्य कर्माणि ज्ञानाग्निः सर्वकर्माणीति श्रुतेः स्मृतेश्च शुद्धो धर्मः समूलाविद्यानिवर्तकत्वात्साक्षात्कारसा

शुद्धो धर्मो विवर्द्धते॥ ७॥

॥राम:॥
॥१९॥

तत्तु किंप्रमाणमित्यतआह। धर्मेति। योगविन्नमाः अतिशयेनयोगज्ञाब्रह्मसाक्षात्कारवंतइतियावत् इमंनिर्विकल्पसमाधिं धर्ममेघंप्राहुः स्पष्टंतदुपपादयति वर्षतीतियतः॥ कारणादेषसमाधिधर्मामृतधाराः धर्मलक्षणाअमृतधाराःसहस्रशोवर्षतिक्षणमेकंक्रतुशतस्यापीति क्रतेरतोधर्ममेघंप्राहुरिति पूर्वेणान्वयः। इदानींसमाधेःपरमप्रयोजनमाह॥

धर्ममेघमिमंप्राहुःसमाधिंयोगवित्तमाः॥ वर्षत्येषयतोधर्मामृतधाराःसहस्रशः॥८०॥
अमुनावासनाजालेनिःशेषंप्रविलापिते॥ समूलोन्मूलितेपुण्यपापाख्येकर्मसंचये॥८१॥

अमुनेति॥ अमुनासमाधिनावासनाजालेअहंकारममकारकर्तृत्वाद्यभिमानहेतुभूतेज्ञानविरुद्धसंस्कारसमूहेनिःशेषंयथाभवतियथाप्रविलापितेविनाशितेपुण्यपापाख्येकर्मसंचयेसमूलोन्मूलितेमूलसहितयथाभवतितथोन्मूलितेउच्छते विनाशितइतियावत्॥८॥

॥न.वि.॥
॥२०॥

फलितमाह। वाक्यमिति। वाक्यं तत्त्वमस्यादिवाक्यं अप्रतिवद्धं सत् कर्मवासनाभ्यां प्रतिवंधरहितं सत्प्राक्कृतपरोक्षावभासिते पूर्वं परोक्षतया प्रकाशिते तत्त्वे करामलकवत् करस्थितामलकगोचरमिवापरोक्षम् अपरोक्षतया तत्त्वावभासनसमर्थं वोधं ज्ञानं प्रसूयते जनयति। इदानीं परोक्षज्ञानस्य फलमाह। परोक्षमिति दैशिकं पूर्वं यथा भवति तथा कृतं कृत्स्नं समस्तपापं व

वाक्यमप्रतिवद्धं सत्प्राक्परोक्षावभासिते॥ करामलकवद्वोधमपरोक्षं प्रसूयते॥ ६२॥
परोक्षं ब्रह्मविज्ञानं शाब्दं दैशिकपूर्वकं॥ बुद्धिपूर्वकृतं पापं कृत्स्नं दहति वह्निवत्॥ ६३॥
अपरोक्षात्मविज्ञानं शाब्दं दैशिकपूर्वकं॥ संसारकारणाज्ञानतमसश्चंडभास्करः॥ ६४॥

द्धिपूर्वकं गुरुमुखाल्लब्धं तत्त्वमस्याद्यागमजन्यं परोक्षं ब्रह्मविज्ञानं बुद्धिपूर्वकं ज्ञानपूर्वं वह्निवद्दहति अपरोक्षज्ञान फलमाह। अपरोक्षेति॥ शाब्दं दैशिकपूर्वकं व्याख्यातं अपरोक्षात्मविज्ञानम् अपरोक्षस्यात्मनो विज्ञानं संशयविपर्ययरहितप्रज्ञानं तत् संसारकारणाज्ञानतमसः संसारकारणं पदत्तानमस्ति न देवनमस्तस्य ॥ ॥७॥ ॥७॥

॥राम:॥
॥२०॥

॥त॰वि॰॥
॥२१॥

वंडभास्करःमध्यान्हकालीनःसूर्यःवाह्यतमसखंडभास्करइवाज्ञानतमसोनिवर्त्तकमित्यर्थः॥ ग्रंथाभ्यासफलमाह॥इत्थमि
ति॥नरइत्थमुक्तेनप्रकारेणतत्वविवेकंतत्वस्यब्रह्मात्मैकत्वलक्षणस्यविवेकःकोशपंचकाद्विवेचनंविधायकृत्वातस्मिंस्त
त्वेविधिवच्छास्त्रोक्तप्रकारेणमनः॥समाधायस्थिरीकृत्यविगलितसंसृतिबंधोऽपरोक्षज्ञानेननिवृत्तसंसारबंधःसन्परंप

इत्थंतत्वविवेकंविधायविधिवन्मनःसमाधाय॥विगलितसंसृतिबंधःप्राप्नो
तिपरंपदंनरोनचिरात्॥ ६५॥ इतिश्रीतत्वविवेकःसमाप्तः॥ १॥ ।
पंचदश्यांप्रथमप्रक

दंनिरतिशयानंदरूपंनचिरादविलंबेनप्राप्नोतिसप्रज्ञानानंदलक्षणंब्रह्मैवभवतीत्यर्थः॥ ॥इतिश्रीमत्परमहंसपरिव्रा
जकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिं॥ करेणश्रीरामकृष्णाख्यविदुषाविरचितातत्वविवेकदीपिकासमाप्ता

॥रामः॥
॥२१॥

॥न.वि.॥
॥२०॥

फलितमाह। वाक्यमिति। वाक्यं तत्वमस्यादिवाक्यं अप्रतिबद्धं सत् कर्मवासनाभ्यां प्रतिबंधरहितं सत्प्राक्कृतपरोक्षावभासिते पूर्वं परोक्षतया प्रकाशिते तत्वे करामलकवत् करस्थितामलकगोचरमिवापरोक्षमपरोक्षतया तत्वावभासनसमर्थं बोधं ज्ञानं प्रसूयते जनयति। इदानीं परोक्षज्ञानस्य फलमाह। परोक्षमिति दैशिकं पूर्वं यथा भवति तथा कृतं कृत्स्नं समस्तपापं व

वाक्यमप्रतिबद्धं सत्प्राक्परोक्षावभासिते॥ करामलकवद्बोधमपरोक्षं प्रसूयते॥ ६२॥
परोक्षं ब्रह्मविज्ञानं शाब्दं देशिकपूर्वकं॥ बुद्धिपूर्वकृतं पापं कृत्स्नं दहति वह्निवत्॥ ६३॥
अपरोक्षात्मविज्ञानं शाब्दं देशिकपूर्वकं॥ संसारकारणाज्ञानतमसश्चंडभास्करः॥ ६४॥

द्धिपूर्वकं गुरुमुखाल्लब्धं तत्वमस्यादिवागमजन्यं परोक्षं ब्रह्मविज्ञानं बुद्धिपूर्वकं ज्ञानपूर्ववद्दहति वह्निर्दहति अपरोक्षज्ञानफलमाह। अपरोक्षेति॥ शाब्दं देशिकपूर्वकं व्याख्यातं अपरोक्षात्मविज्ञानमपरोक्षस्यात्मनो विज्ञानं संशयविपर्ययरहितं यज्ज्ञानं तत्संसारकारणाज्ञानतमसः संसारकारणं यदज्ञानं तमस्ति नदेव नमस्तस्य॥ ॥७॥ ॥७॥

॥रामः॥
॥२०॥

वंडभास्करःमध्यान्हकालीनःसूर्यःवाह्यतमसश्चंडभास्करइवाज्ञानतमसोनिवर्त्तकमित्यर्थः॥ ग्रंथाभ्यासफलमाह।इत्थमिति॥नरइत्थमुक्तेनप्रकारेणतत्वविवेकंतत्वस्यब्रह्मात्मैकत्वलक्षणस्यविवेकःकोशपंचकादिविवेचनंविधायकृत्वातस्मिंस्तत्वेविधिवच्छास्त्रोक्तप्रकारेणमनः॥समाधायस्थिरीकृत्यविगलितसंसृतिवंधोऽपरोक्षज्ञानेननिवृत्तसंसारवंधःसन्परंप

इत्थंतत्वविवेकंविधायविधिवन्मनःसमाधाय॥विगलितसंसृतिवंधःप्राप्नोतिपरंपदंनरोनचिरात्॥ ६५॥इतिश्रीतत्वविवेकःसमाप्तः॥ ॥ ।

पंचदश्यांप्रथम

दंनिरतिशयानंदरूपंनचिरादविलंवेनप्राप्नोतिसप्रज्ञानानंदलक्षणंब्रह्मैवभवतीत्यर्थः॥ ॥इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिं॥ करेणश्रीरामकृष्णाख्यविदुषाविरचितातत्वविवेकदीपिकासमाप्त

४१५७

श्री ५ को सरकार

तत्ववोधार्थ्यजीवनाथस्येदम्।

तो.

श्रीगणेशाय नमः॥ ॥वासुदेवेन्द्रयोगीन्द्रन्नत्वाज्ञानप्रदंगुरुम्॥मुमुक्षूणांहितार्थायतत्वबोधोविधी
यते॥१॥पठन्तिचतुरोवेदान्धर्मशास्त्राण्यनेकशः॥आत्मानन्नैवजानन्तिदर्वीपाकरसंयथा
॥२॥साधनचतुष्टयसंपन्नाधिकारिणांमोक्षसाधनभूतंतत्वविवेकप्रकारंवक्ष्यामः॥साध
नचतुष्टयंकिम्॥नित्यानित्यवस्तुविवेकः॥इहामुत्रार्थफलभोगविरागः॥शमादिषट्कसं
पत्तिः॥मुमुक्षुत्वञ्चेति॥४॥नित्यंवस्तुब्रह्मतदतिरिक्तंसर्वमनित्यंअयमेवनित्यानित्यव
स्तुविवेकः॥इहस्रक्चन्दनवनितादिषुअमुत्रस्वर्गादिभोगेषुचेच्छाराहित्यमेवविरागः
॥शमादिकिम्॥शमदमोपरतितितिक्षाश्रद्धासमाधानमितिषट्॥मनः अन्तरिन्द्रियनि

७

गङ्कुरादि   विषयेभ्यो निवृत्तिः

ग्रहः शमः । दमो बाह्येन्द्रियनिग्रहः । उपरतिः प्रपञ्चोपरमणमेव । तितिक्षा शीतोष्णसुखदुःखादि
सहित्वम् । समाधानं चित्तैकाग्रता । श्रद्धा गुरुवेदान्तवाक्येसु विश्वासः । मुमुक्षुत्वं मोक्षमेवा
भूयामितीच्छा । एतत्साधनचतुष्टयसंपन्नस्तत्त्वविवेकस्याधिकारी भवति । तत्त्वविवेको ना
म । आत्मा सत्यस्तदन्यन्मिथ्येति ज्ञानमेव । आत्मा कः । स्थूलसूक्ष्मकारणशरीरेभ्यो व्यतिरि
क्तः पंचकोशातीतः अवस्थात्रयसाक्षी चतुर्विंशतितत्त्वाधारः मायया प्रतीय प्रतीयमाना
भ्यां जीवेश्वराभ्यां भिन्नः सच्चिदानन्दस्वरूपवान् यस्तिष्ठति स आत्मा ॥ ११ ॥ स्थूलशरी
रं कीदृशम् । पञ्चीकृतपञ्चमहाभूतैः कृतं सत्कर्मजन्यं सुखदुःखादिभोगायतनं अस्ति जा   त
यते वर्द्धते विपरिणमते अपक्षीयते विनश्यति इति षड्भावविकारैर्युक्तं यत्तत्स्थूल
शरीरम् । सूक्ष्मशरीरं कीदृशम् । अपञ्चीकृतपञ्चमहाभूतैः कृतं सत्कर्मजन्यं सुखदुः

स्वादिभोगसाधनंज्ञानेन्द्रियाणिपंचकर्मेन्द्रियाणिपंचपंचवायवोमनश्चैकंबुद्धिश्चैकाएवंसप्तदशकला
भिःसहयत्तिष्ठतितत्सूक्ष्मशरीरम्॥कारणशरीरंकीदृशम्॥अनाद्यविद्यारूपमानिर्वचनीयंस्थू
लसूक्ष्मशरीरकारणमात्रंसत्स्वरूपाज्ञानंनिर्विकल्पकरूपंयदस्तितत्कारणशरीरम्॥अव
स्थात्रयंकीदृशम्॥जाग्रत्स्वप्नसुषुप्त्याख्यम्॥जाग्रदवस्थाका॥श्रोत्रादिज्ञानेन्द्रियैःशब्दादिवि
तत्र षयाज्ञायन्तेयत्सजाग्रदवस्था॥स्थूलशरीराभिमान्यात्माविश्वइत्युच्यते॥७॥स्वप्नावस्था
का॥जाग्रदवस्थायांयद्दृष्टंयच्छ्रुतंतज्जनितवासनयानिद्रासमयेयःप्रपञ्चःप्रतीयतेसा
स्वप्नावस्था॥सूक्ष्मशरीराभिमान्यात्मातैजसइत्युच्यते॥सुषुप्त्यवस्थाका॥अहंकिमपिनज्ञा
तत्र तवान्सुखेनमयानिद्रानुभूतेतियदनुभूतंजाग्रदवस्थायांस्मर्यतेसासुषुप्त्यवस्था॥कार
णशरीराभिमान्यात्माप्राज्ञइत्युच्यते॥पंचकोशाःके॥अन्नमयप्राणमयमनोमयविज्ञानमया

तत्र

नन्दमयाख्याः। अन्नमयकोशः कः। अन्नरसेनैवाविर्भूत्वा अन्नरसेनैवाभिवृद्धिंप्राप्यान्नर
समयपृथिव्यांयत्प्रलीयते सोन्नमयकोशः स्थूलशरीरम्। प्राणमयमनोमयविज्ञानम
यानांसूक्ष्मशरीरम्। प्राणमयः कः। प्राणादिपञ्चवायवो कर्मेन्द्रियैर्मिलिताः प्राणमयः।
मनोमयः कः। मनश्च ज्ञानेन्द्रियपंचकञ्च मिलित्वा मनोमयः। विज्ञानमयः कः। बुद्धिश्च
ज्ञानेन्द्रियपञ्चकंच मिलित्वा विज्ञानमयः। आनन्दमयः कः। मोहाद्याहृतिमत्स्वस्व
रूपाज्ञानं यदस्ति स आनन्दमयस्तदेव कारणशरीरम्। चतुर्विंशतितत्त्वानां कारणत्वात्
। चतुर्विंशतितत्त्वानि कानि। ज्ञानेन्द्रियाणि पञ्च श्रोत्रत्वक्चक्षुरसनाघ्राणाख्यानि। क
र्मेन्द्रियाणि पंच वाक्पाणिपादोपस्थपाय्वाख्यानि। प्राणाः पञ्च। प्राणापानसमा

नोदानव्यानाख्याः। तन्मात्राणिपञ्च। शब्दस्पर्शरूपरसगन्धाख्यानि। अन्तःकरणंचतुष्टयम्। मनोबुद्धिचित्ताहङ्काराख्यम्। एतानिचतुर्विंशतितत्वानि। ज्ञानेन्द्रियाणांविषयाः। शब्दस्पर्शरूपरसगन्धाः। कर्मेन्द्रियाणांविषयाः। वचनादानगमनाविसर्गानन्दाः। अन्तःकरणचतुष्टयस्यसंकल्पनिश्चयस्मरणगर्वाविषयाः। तेषामधिपतयः के। तत्श्लोकः। दिग्वातार्कप्रचेतोश्विवह्नीन्द्रोपेन्द्रमृत्युकाः। चन्द्रश्चैवचतुर्वक्त्रोरुद्रमेवज्ञईश्वरः। श्रोत्रेन्द्रियस्यदिशः। त्वगिन्द्रियस्यवायुः। चक्षुरिन्द्रियस्यसूर्यः। रसनेन्द्रियस्यवरुणः। घ्राणेन्द्रियस्याश्विनौदेवौ। वागिन्द्रियस्याग्निः। पाणीन्द्रियस्येन्द्रः। पादेन्द्रियस्यविष्णुः। गुह्येन्द्रियस्यमृत्युः। शिश्नेन्द्रियस्यब्र

९६

स्ता।अन्तःकरणचतुष्टये।मनसश्चन्द्रः।बुद्धेर्ब्रह्मा।अहङ्कारस्यरुद्रः।चित्तस्यक्षेत्रज्ञः।तत्र कोशपंचकम्।मदीयंशरीरम्।मदीयाःप्राणाः।मदीयंमनः।मदीयाबुद्धिः।मदीयमज्ञानमितिस्वेनैवज्ञायते।तद्यथा।स्वेनैवज्ञातंकुण्डलादिकंस्वस्माद्भिन्नंवर्त्तते।तथापंचकोशआत्मानभवति।तर्ह्यात्माकः।सच्चिदानन्दस्वरूपः।सत्किम्।कालत्रयेपियत्तिष्ठतितत्सत्।चित्किम्।साधनान्तरनैरपेक्षेणस्वयंप्रकाशमानतयायदितरपदार्थावभासकंतच्चित्।आनन्दःकः।देशकालवस्तुकृतपरिच्छेदशून्यःपरमात्माआनन्दस्वरूपः।नतुगुणोनापिधर्मोनापिजातिरितिबोध्यम्।४०।अथचतुर्विंशतितत्त्वोत्पत्तिंवक्ष्यामः।आत्मनोमायात्रिगुणात्मिकाप्रकृतिरस्ति।ततआकाशःसंभूतः।आकाशाद्वायुः।वायोरग्निः।अग्नेरापः।अद्भ्यःपृथिवी।एतेषांपंचतत्त्वानांमध्येआकाशस्यसात्त्विकांशाच्छ्रोत्रेंसंभूतम्।वायोःसात्त्विकांशात्त्वक्।

द्रुपं

गिन्द्रियं

ब्रह्मणाश्रयासत्वरजस्तमोगुणात्मिकामायास्ति।ततोमहान्महतोहंकारोहंका
दाकाशःसंभूतइति

रिन्द्रियंसंभूतम्

न्द्रिय न्द्रिय

वे. अग्नेःसात्विकांशाच्चक्षुँः। जलस्यसात्विकांशाद्रसनेंम्। पृथ्व्याःसात्विकांशाद्घ्राणेंम्। तेषांपं
१ चतत्वानांसमष्टिसात्विकांशान्मनोबुद्धिचित्ताहंकाराःसंभूताः। तेषांपंचानांमध्ये आकाशस्य
राजसांशाद्वागिन्द्रियंसम्भूतम्। वायोराजसांशात्पाणी। अग्नेराजसांशात्पादौ। जलस्य
राजसांशाच्छिश्नम्। पृथ्व्याराजसांशाद्गुदम्। एतेषांसमष्टिराजसांशात्प्राणादिपंचवाय
वोनागाद्युपवायवश्चसम्भूताः। नागाद्युपवायवोनागकूर्मकृकलदेवदत्तधनञ्जयाः। ए
तेषांसमष्टितामसांशात्पंचीकृतपंचमहाभूतानिसंभवन्ति। पंचीकरणंकथम्। पंचानांभू
तानांमध्येएकैकंद्विधाविभज्यएकंभागंनिक्षिप्येतरंचतुर्धाविभज्यस्वांशंपरित्यज्ये
तरेतरभागेषुयोजनम्। एतेभ्यःपंचीकृतपंचमहाभूतेभ्योब्रह्माण्डंसंभूतम्। तन्मध्येचतु राम:
र्दशभुवनानिजातानि। तन्मध्येऽण्डजजरायुजस्वेदजोद्भिजाजायन्ते। ततस्थूलशरीरं १

भिमानीजीवेमुक्ताराउभिमानीश्वरः। आत्मन्येवमाययाजीवेश्वरभेददृष्टिः कल्पिता। तत्कथमितिचे
त्। अविद्योपाधिकः। सन्नात्माजीवइत्युच्यते। मायोपाधिकः सन्नीश्वरइत्युच्यते। स्वर्वा
भेददृष्टिर्यावत्पर्यन्तं तिष्ठति तावत्पर्यन्तं जन्ममरणादिसंसारोननिवर्त्तते। तस्माज्जी
वस्यैवईश्वरः। ईश्वरस्यैवजीवः। इतिपरस्परभेददृष्टिर्नकर्त्तव्या। ननुसाहंकारस्य जीवस्य निर
हंकारेणेश्वरेणसहकथमभेदइतिचेन्न। तत्वपदयोर्वाच्यार्थोलक्ष्यार्थश्चेतिअर्थद्वय
मस्ति। अविद्यातत्कार्यैकर्त्तृत्वादिगुणवान्त्वंपदवाच्यार्थः। मायातत्कार्यसर्वज्ञत्वादि
गुणवान्तत्पदवाच्यार्थः। अविद्यातत्कार्यरहितंचिन्मात्रंत्वंपदलक्ष्यार्थः। मायातत्का
र्यरहितंचिन्मात्रंतत्पदलक्ष्यार्थः। तयोरैक्यंमहावाक्यैर्बोध्यते तत्वमसि अहंब्रह्मास्मी

तत्त्वमसीतिम
हावाक्याद

त. बो.
५

त्यादिभिः। तस्माद्ब्रह्मसत्यंजगन्मिथ्येतिजीवोब्रह्मैवकेवलंनामितिगुरुशास्त्रोपदेशेनस्वा
नुभवेनच। येपुमांसोविजानंतितेजीवन्मुक्ताः। जीवन्मुक्ताःके। येषामपरोक्षंब्रह्म
ज्ञानंते। अपरोक्षज्ञानंनुयथादेहोहमितिदृढनिश्चयज्ञानंतथानिजस्वरूपेपिस
त्यज्ञानानन्दोहमितिदृढनिश्चयज्ञानं। अनेनज्ञानेनसकलंकर्मबन्धनिवृत्तिर्भवति
कर्माणिकतिविधानि। आगामिप्रारब्धसंचितनाख्यानित्रिविधानि। आगामिकर्मकिम्
। ज्ञानोत्पत्त्यनन्तरंज्ञानिदेहेनोत्पन्नंपुण्यपापात्मकम्। प्रारब्धंकिं। एतच्छरीरज
नकमस्मिन्देहेदुःखादिभोगप्रदंकर्म। संचितंकर्मकिम्। अनन्तकोटिजन्मनां
वीजवत्कारणरूपमवस्थानेतिष्ठतितत्। तत्रप्रारब्धकर्मणांभोगेनैवक्षयः। ८

रामः
१

आगामिकर्मविज्ञानेननश्यति. प्रारब्धंभोगेननष्टंभवति. संचितकर्मब्रह्मैवाहमस्मीतिनिश्चयात्मकज्ञानेननश्यति.

ग-गो
ह
व

संचितंज्ञानाग्निदग्धंभवति। ज्ञानाग्निः। सर्वकर्माणिभस्मसात्कुरुतेर्जुनः। इतिभगवद्वचनात्।
आगामिकर्मणांनलिनीदलगतजलवत्। ज्ञानिनांसम्बन्धोनास्त्येव। इदमागामिकर्मकथंन
श्यतीतिचेत्। येपुमांसोन्नवस्त्रादिकंदत्वा ज्ञानिनंरक्षंतितेषुज्ञानिदेहकृतंसुकृतंगमिष्यति।
येतान्द्विषन्तितेषुतद्देहकृतंदुष्कृतंगमिष्यति। एवंज्ञानिसर्वकर्मबन्धात्तरति। तरतिशो
कमात्मवित्। एकोदेवःसर्वभूतेषुगूढोभियतेहृदयग्रन्थिरित्यादिश्रवणात्। ज्ञानिदे
हो गयांवाचाण्डालवाटिकायांम्रियतेतथापिज्ञानीमुक्तःसन्नानन्दरूपःकृतार्थोभवति।
तदुक्तंत्यजतुवाकाश्यांश्वपचस्यगृहेथवाज्ञानसंप्राप्तिसमयेमुक्तोसौविगताशयः।
। ~~॥इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीवासुदेवेन्द्रविरचितात्मबोधाख्यंप्रकरणंसमा~~

[illegible]

४१५६

श्री ५ को सरकार

१

श्रीगणेशाय नमः ॥ ॥ तपोभिः क्षीणपापानां शांतानां वीतरागिणां ॥ मुमुक्षूणां मपेक्ष्योयमात्मबोधोऽभिधीयते ॥ १ ॥ बोधोन्यसाधनेभ्योहि साक्षान्मोक्षैकसाधनम् ॥ पाकस्य वह्निवज्ज्ञानं विना मोक्षो न सिध्यति ॥ २ ॥ अविरोधितया कर्म नाविद्यां विनिवर्त्तयेत् ॥ विद्या विद्यां निहंत्येव तेजस्तिमिरसंघवत् ॥ ३ ॥ परिछिन्न इवाज्ञानात्तन्नाशे सति केवलः ॥ स्वयंप्रकाशते ह्यात्मा मेघापायेंशुमानिव ॥ ४ ॥ अज्ञानकलुषं जीवं ज्ञानाभ्यासाद्विनिर्मलम् ॥ कृत्वा ज्ञानं स्वयं नश्येज्जलं कतकरेणुवत् ॥ ५ ॥ संसारः स्वप्नतुल्यो हि रागद्वेषादिसंकुलः ॥ स्वकाले सत्यवद्भाति प्रबोधे ऽसत्यवद्भवेत् ॥ ६ ॥ तावत्सत्यं जगद्भाति शुक्तिकारजतं यथा ॥

यावन्नज्ञायतेब्रह्मसर्वाधिस्थानमद्वयम ॥७॥ सच्चिदात्मन्यनुस्यूतेनित्येविष्णौप्रक
ल्पिताः॥ व्यक्तयोविविधाःसर्वाःहाटकेकटकादिवत ॥८॥ यथाकाशोहृषिकेशोना
नोपाधिगतोविभुः॥ तद्भेदाद्भिन्नवद्भातितन्नाशादेकवद्भवेत ॥९॥ नानोपाधिवशा
देवजातिवर्णाश्रमादयः॥ आत्मन्यारोपितास्तोयेरसवर्णादिभेदवत ॥१०॥ पंची
कृतमहाभूतसंभवंकर्मसंचितम॥ शरीरंसुखदुःखानांभोगायतनमुच्यते ॥११॥
पंचप्राणमनोबुद्धिदशेंद्रियसमन्वितं॥ अपंचीकृतभूतोत्थोसूक्ष्मांगंभोगसाध
नम ॥१२॥ अनाद्यविद्यानिर्वाच्याकारणोपाधिरुच्यते॥ उपाधित्रितयादन्यमात्मा
नमवधारयेत ॥१३॥ पंचकोशादियोगेनतत्तन्मयइवस्थितः॥ शुद्धात्मानीलव

स्त्रादियोगेन स्फटिको यथा॥१४॥ वपुस्तुषादिभिः कोशैर्युक्तं युक्त्यावघाततः॥ आ
त्मानमंतरं शुद्धं विविच्यात्तंडुलं यथा॥१५॥ सदा सर्वगतोप्यात्मा न सर्वत्रावभासते
॥ बुद्धावेवावभासेत स्वच्छेषु प्रतिबिंबवत्॥१६॥ देहेंद्रियमनोबुद्धिप्रकृतिभ्यो विलक्ष
णं॥ तद्वृत्तिसाक्षिणं विद्यादात्मानं राजवत्सदा॥१७॥ व्यापृतेष्विन्द्रियेष्वात्मा व्यापा
रीवाविवेकिनां॥ दृश्यतेभ्रेषु धावत्सु धावन्निव यथा शशी॥१८॥ आत्मचैतन्यमाश्रि
देहेंद्रियमनोधियः॥ स्वकीयार्थेषु वर्त्तंते सूर्यालोकं यथा जनाः॥१९॥ देहेंद्रियगु
णान्कर्माण्यमले सच्चिदात्मनि॥ अध्यस्यंत्यविवेकेन गगने नीलतादिवत् -

॥२०॥अज्ञानान्मानसोपाधेःकर्त्तृत्वादीनिचात्मनि॥कल्प्यंतेंबुगतेचन्द्रेचलनादिय
थांभसः॥२१॥रागेच्छासुखदुःखादिबुद्धौसत्यांप्रवर्त्तते॥सुषुप्तौनास्तितन्नाशेतस्माद्बुद्धे
स्तुनात्मनः॥२२॥प्रकाशोऽर्कस्यतोयस्यशैत्यमग्नेर्यथोष्णता॥स्वभावसच्चिदानं
दनित्यनिर्मलतात्मनः॥२३॥आत्मनःसच्चिदंशश्चबुद्धेर्वृत्तिरितिद्वयम्॥संयोज्यचा
विवेकेनजानामीतिप्रवर्त्तते॥२४॥आत्मनोविक्रियानास्तिबुद्धेर्बोधोनजात्विति
॥जीवःसर्वमऽलंज्ञात्वाकर्त्ताद्रष्टेतिमुह्यति॥२५॥रज्जुसर्पवदात्मानंजीवोज्ञात्वा
भयंभवेत्॥नाहंजीवःपरात्मेतिज्ञातश्चेन्निर्भयोभवेत्॥२६॥आत्मावभासयत्येको

॥आ॥ ॥ बुध्यादीनिन्द्रियाणि च॥ दीपो घटादिवत्स्वात्मा जडैस्तैर्नावभासते॥२७॥ स्वबोधे नान्य
बोधेच्छा बोधरूपतयात्मनः॥ न दीपस्यान्यदीपेच्छा यथा स्वात्मप्रकाशने॥२८॥ निषि
॥३॥ ध्या निखिलोपाधिं नेति नेतीति वाक्यतः॥ विद्यादैक्यं महावाक्यैर्जीवात्मपरमात्मनि
॥२९॥ आविद्यकं शरीरादि दृश्यं बुद्बुदवत्क्षरं॥ एतद्विलक्षणं विद्यादहं ब्रह्मेति नि
र्मलम्॥ देहान्यत्वान्न मे जन्मजराकार्श्यलयादयः॥ शब्दादिविषयैः संगो निरिं
द्रियतया न च॥३१॥ अमनस्त्वान्न मे दुःखरागद्वेषभयादयः॥ अप्राणो ह्यमनाः शु ॥राम॥
भ्र इति च श्रुतिशासनात्॥ एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च॥ खं वा ॥३॥

शुभ्रोति एवमादिश्रुतिशासना निर्गुणो निःक्रियो नित्यो विकल्पो निरंजनः॥ निर्विकारो निरा
कारो नित्यमुक्तोस्मि निर्मलः॥३४॥ अहमाकाशवत्सर्वबहिरंतर्गतोच्युतः॥ सदा सर्वसमः
सिद्धो निःसंयोगो निर्मलोचल॥३५॥ नित्यशु[illegible]विमुक्तैकमखंडानंदमद्वयं॥ [illegible] ज्ञानम
नंतं यत्परंब्रह्माहमेवतत्॥३६॥ एवं निरंतरं कृत्वा ब्रह्मैवास्मीति वासना॥ हरत्यविद्यावि
क्षेपान् रोगानिव रसायनम्॥३७॥ विविक्तदेशे आसीनो विरागो विजीतेन्द्रियः॥ भावये
देकमात्मानं तमनंतमनन्यधी॥३८॥ आत्मन्येवाखिलं दृश्यं प्रविलाप्य धियासुधीः
भावयेदेकमात्मानं निर्मलाकाशवत्सदा॥३९॥ नामरूपादिकं सर्वं विहाय परमार्थ

||आ||

||४||

वित् || परिपूर्णं चिदानंदस्वरूपेणावतिष्ठति ||४०|| ज्ञातृज्ञानज्ञेयभेदः परमात्मनि
विद्यते || परानंदैकरूपत्वात् दीप्यते स्वयमेव तत् ||४१|| एवमात्मारणौ ध्यानमथ
ने सततं कृते || उदितावगतिर्ज्वाला सर्वाज्ञानेंधनं दहेत् ||४२|| अरुणेनेव बोधेन पूर्वं
संतमसि हृते ततआविर्भवेदात्मा स्वयमेवांशुमानिव ||४३|| आत्मा तु सप्राप्तोवदवि
द्यया || तन्नाशे प्राप्तवद्भाति स्वकंठाभरणं यथा ||४४|| स्थाणौ पुरुषवद्भ्रांत्या कृ
ता ब्रह्मणि जीवता || जीवस्य तात्विके रूपे तस्मिन् दृष्टे निवर्त्तते ||४५|| तत्वस्वरूपानु
भवादुत्पन्नं ज्ञानमंजसा || अहंममेतीवाज्ञानं बाधते दिग्भ्रमादिवत् ||४६|| सम्यग

||४||

||राम:||

विज्ञानवान्योगि स्वात्मन्येवाखिलं स्थित॥ एकं च सर्वमात्मानमीक्षते ज्ञानचक्षुषा॥४७॥
आत्मैवेदं जगत्सर्वमात्मनो त्वन्नाकिंचन॥ मृदो यद्वत् घटादीनि स्वात्मानं सर्वमीक्ष्यते
॥४८॥ जीवन्मुक्तस्तु तद्विद्वान्पूर्वोपाधिगुणान्स्त्यजेत्॥ सच्चिदानंदरूपत्वात्भवेत् भ्रमर
कीटवत् ४९ तीर्त्वा मोहार्णवं हत्वा रागद्वेषादिराक्षसान्॥ योगी शांतिसमायुक्त
आत्मारामो विराजते॥५०॥ बाह्यानित्यसुखासक्तिं हित्वात्मसुखनिर्वृतः घटस्थदी
पवत्स्वस्थ अंतरेव प्रकाशते॥५१॥ उपाधिस्थोपि तद्धर्मैर्नलिप्तो व्योमवन्मुनिः॥
सर्वज्ञमूढवत्तिष्ठेदसक्तो वायुवच्चरेत्॥५२॥ उपाधिविलयाद्विष्णोर्निर्विशेषे विशे

॥आ॥

न्मुनिः॥ जलेजलंवियद्व्योम्नि तेजस्तेजसिवायथा॥५३॥ यल्लाभान्नापरोलाभोय
त्सुखान्नापरंसुखम्॥ यज्ज्ञानान्नपरंज्ञानंतद्ब्रह्मेत्यवधारयेत्॥५४॥ तद्युक्तम
खिलंवस्तुव्यवहारस्तदन्विता॥ यद्[illegible]दृश्यंयद्भूत्वानपुनर्भवः॥ यद्ज्ञात्वा
नापरंज्ञेयंतद्ब्रह्मेत्यवधारयेत्॥५५॥ तिर्यगूर्द्धमधःपूर्णंसच्चिदानंदमद्वयम्॥ अ
नंतंनित्यमेकंयत्तद्ब्रह्मेत्यवधारयेत्॥५६॥ अतद्व्यावृत्तिरूपेणवेदांतैर्लक्ष्यतेऽद्व
यम्॥ अखंडानंदमेकंयत्तद्ब्रह्मेत्यवधारयेत्॥५७॥ अखंडानंदरूपस्यतस्यानं
दलवाश्रिताः॥ ब्रह्माद्यास्तारतम्येनभवंत्यानंदिनोऽखिलाः॥५८॥ तद्युक्तमखिलं

॥५॥

॥५॥

॥राम॥

वस्तु व्यवहारास्तदन्विता ॥ तस्मात्सर्वगतं ब्रह्म क्षीरे सर्पिरिवाखिले ॥ ५९ ॥ अनण्वस्थू
ह्रस्वमदीर्घमजमव्ययं ॥ अरूपगुणवर्णाख्यं तद्ब्रह्मेत्यवधारयेत् ॥ ६० ॥ यद्भासा भा
स्यते ऽर्कादिर्भास्यैर्यन्नावभास्यते ॥ येन सर्वमिदं भाति तद्ब्रह्मेत्यवधारयेत् ॥ ६१ ॥
स्वयमंतर्बहिर्व्याप्य भासयन्नखिलं जगत् ॥ ब्रह्म प्रकाशते वह्निः प्रतप्तायसपिं
डवत् ॥ ६२ ॥ जगद्विलक्षणं ब्रह्म ब्रह्मणोऽन्यन्न किंचन ॥ ब्रह्मान्यद्भाति चेन्मिथ्या य
था मरुमरीचिका ॥ ६३ ॥ दृश्यते श्रूयते यद्यद् ब्रह्मणोऽन्यन्न किंचन ॥ तत्वज्ञानाच्च त
द्ब्रह्म सच्चिदानंदमद्वयम् ॥ ६४ ॥ न चक्षुषा पश्यति कश्चिदेनं हृदा मनीषा मनसाभिक्लृप्तो

॥६७॥
स्वर्णवद्द्योततेस्वयम्हृदाकाशोदितोह्यात्माबोधभानुस्तमोपहृत्‌

यस्मिंविडरमतास्तेभवंति॥६५॥सर्वगंसच्चिदात्मानंज्ञानचक्षुर्निरीक्ष्यते॥अज्ञानचक्षुर्ने
क्षेतभास्वंतंभानुमंधवत्॥६६॥श्रवणादिभिरुद्दीप्तोज्ञानाग्निपरितापितः॥जीवःसर्व
मलान्मुक्तःसर्वव्यापीसर्वदाभातिसर्वंप्रकाशते॥६८॥दिग्देशकालाद्यनपेक्ष्यसर्व
गंशीतादिहृन्नित्यसुखंनिरंजनं॥यःस्वात्मतीर्थंभजतेविनिःक्रियःसर्ववित्सर्वगतो
मृतोभवेत्॥६९॥इतिश्रीमच्छंकराचार्यविरचितंआत्मबोधाख्यवेदांतप्रकरणं॥

॥राम॥

[illegible]

...तो दष्ट्वा [illegible] संसारं [illegible] नो वे [illegible] भावयन्ति [illegible]

६९४

कंठं तिष्ठत्यु तो वे [illegible] ने कुसुमास्तं तमानं नैव जानंति दीपिकारते
या ॥१॥

अष्टमावं च तु मूलं [illegible] वत्रं दृश्यन्ति तम् ॥ बहुरूपं विपरीतं च यो जानाति स नीति वित ॥१॥

वेतो हराः पुत्र यः सुहृदो [illegible] कुला स [illegible] प्रमाति न मू [illegible]

लो वे [illegible] तिष्ठति [illegible] तासा रस्यां र गाः सां भि लग्ने न यन यो [illegible]

रे चित्त चिन्तय चिरं चरणौ मुरारेः पारं गमिष्यसि यतो भव सागरस्य ॥ पुत्रा
कलत्र मित्र न हिते सहायाः सर्वं विलोकय सखे मृगतृष्णिका मम ॥१॥

परो मदं नोजगत स्तसु [illegible] प्रांतं पटवद्यत्र विश्वम् ॥ यदंशतो स्य
स्थिति जन्म नाशा न सोत वद्ध स्यव [illegible] च लोकाः ॥१॥ मायाहीनमनंगलं
[illegible] नेत्रहस्तनं [illegible] कुरु [illegible] दासीनं तानो जीवा
[illegible] तिक [illegible] समाप्ते [illegible] तं [illegible] स्थितेः २

६९४

॥६७॥
स्वर्णवत्‌द्योततेस्वयम्‌हृदाकाशोदितोह्यात्माबोधभानुस्तमोपहृत्

६ यत्स्नं विदुरमृतास्ते भवंति ॥६५॥ सर्वगंसच्चिदात्मानंज्ञानचक्षुर्निरीक्ष्यते ॥ अज्ञानचक्षुर्ने
क्षेतभास्वंतंभानुमंधवत् ॥६६॥ श्रवणादिभिरुद्दीप्तोज्ञानाग्निपरितापितः ॥ जीवः सर्व
मलान्मुक्तः सर्वव्यापीसर्ववाभातिसर्वंप्रकाशते ॥६८॥ दिग्देशकालाद्यनपेक्ष्यसर्व
गंशीतादिहृन्नित्यसुखंनिरंजनं ॥ यःस्वात्मतीर्थंभजतेविनिःक्रियः सर्ववित्सर्वगतो
मृतोभवेत् ॥६९॥ इतिश्रीमच्छंकराचार्यविरचितं आत्मबोधाख्यवेदांतप्रकरणं ॥

॥ राम ॥

६

॥ ॥ ॥
॥ ॥

श्रीगणेशायनमः॥ ॥शतमखपूजितपादंज्ञानपथमनसोप्यगोचराकारं·विकसितजलरुहनेत्रमुमा
च्छायांकमाश्रयेशंभुं॥१॥इहभगवान्शंकराचार्यःउत्तमाधिकारिणांवेदांतप्रस्थानत्रयंनिर्मायतद
वलोकनाऽसमर्थानांमंदबुद्धीनांअनुग्रहार्थंसर्ववेदांतसिद्धांतसंग्रहंआत्मबोधाख्यंप्रकरणंनिर्दर्श
यिषुःतंप्रतिजानीतेतपोभिरितिकृच्छ्रचान्द्रायणनित्यनैमित्तिकोपासनानुष्ठानरूपैस्तपोभिःक्षी

तपोभिःक्षीणपापानांशांतानांवीतरागिणां॥मुमुक्षूणामपेक्ष्योयमात्मबोधोऽभिधीयते॥१॥

णानिपापानिरागाद्यंतःकरणदोषायेषांतेनित्यनैमित्तिकैरेवकुर्वाणोदुरितक्षयमाप्नोतीतिवचना
त्॥अतएवशांतानामक्षोभिताशयानांवीतरागिणांइहामुत्रार्थफलभोगरहितानांमुमुक्षूणांसंसा
रग्रंथिभेदनेकृतप्रयत्नानांयथोक्तसाधनसंपन्नानांअयमात्मबोधोऽभिधीयतेविधिमुखेनावश्यक
तयाप्रतिपाद्यइत्यर्थः ॥१॥
ते

॥एमः॥
॥१॥

ननु तपोमंत्रकर्मयोगाद्यनेकसाधनेषु सत्सु मोक्षं प्रति बोधस्यैव किमिति प्राधान्येनोच्यत इत्यत आह बो
ध इति॥ तपोमंत्रकर्मयोगादिसाधनानि परंपरया क्रमेण ज्ञानद्वारा मोक्षं साधयंति ज्ञानं तु स्वजन्ममात्रा
देवाज्ञानं निःशेषं नाशयित्वा सद्यःस्वराज्येऽभिषेचयति· अतोन्यसाधनेभ्यो ज्ञानस्य प्राधान्यमुक्तं न
देव दृष्टान्तेन द्रढयति॥ पाकस्येति· यथा लोके पचनक्रियायाः काष्ठजलभाण्डादिसाधनेषु सत्स्वपि व

बोधोन्यसाधनेभ्यो हि साक्षान्मोक्षैकसाधनम्॥ पाकस्य वह्निवज्ज्ञानं विना मोक्षो न सिध्यति॥२॥
अविरोधितया कर्म नाविद्यां विनिवर्तयेत्॥ विद्याविद्यां निहन्त्येव तेजस्तिमिरसंघवत्॥३॥ ॥

ह्निं विना पाको न सिध्यति· तद्वत् ज्ञानं विना मोक्षो न सिध्यतीत्यर्थः॥२॥ ननु कर्मणां विचित्रशक्तिमत्त्वा
त्कर्मैव किंचिदज्ञानं नाशयिष्यति किमात्मज्ञानेनेत्याशंक्य कर्माज्ञानयोर्विरोधाभावन्नेवमित्या
ह॥ अविरोधीति कर्मणोऽविद्याविरोधाभावादज्ञानं नाशयितुं नोत्सहते विद्यायां विकाशरूपत्वादंधत
मस्तेजःपुंज इव नाशयितुं समर्था इत्यर्थः॥३॥ ॥७॥ ॥७॥ ॥

॥आ॰दी॰॥
॥२॥

ननुप्रतिशरीरमात्मापरिछिन्नएवोपलभ्यतेकथमस्यकैवल्यमित्यत्राह॥परिछिन्नइति॥परिपूर्ण
स्याद्वितीयस्यात्मनः अज्ञानपरिकल्पितोऽद्यावचशरीराध्यासकृतपरिछिन्नत्वमविवेककृतमेवन
तुतत्वदृष्ट्या अतोविवेकज्ञानेनाविवेकहानादात्माकेवलएवप्रकाशतेमेघावरणाभावेभानुवदित्य
र्थः॥४॥नन्वात्मनोऽद्वैतसिद्धिरयुक्तावृत्तिज्ञानेनद्वैतसिद्धेरित्यत्राह॥ अज्ञानेति॥अज्ञानकार्यभूते

परिछिन्नइवाज्ञानात्तन्नाशेसतिकेवलः॥ स्वयंप्रकाशतेह्यात्मामेघापायेंशुमानिव॥४॥अज्ञा
नकलुषंजीवंज्ञानाभ्यासाद्विनिर्मलम्॥ कृत्वाज्ञानंस्वयंनश्येज्जलंकतकरेणुवत्॥५॥

रू
रहमादिभिःकलुषीकृतंकर्तृत्वभोक्तृत्वाद्यभिमानीनंजीवंज्ञानंकृत्वाचिरकालाभ्यासवशात्· अज्ञान
कृतनमवारात्तत्का- र्यांनःकरणादिकंनिःशेषंनाशयित्वास्वयमेवनश्यति· अज्ञानकार्यत्वात्तद्वृत्तेः
95 106
तत्रप्रतिबिंबितंज्ञानमात्माभासत्वात्· आत्मन्येवैवंभवतितदानीमद्वयएवात्माप्रकाशते· यथाकतक
करेणुराविलंजलंनिर्मलंकृत्वास्वयमेवनश्यतितद्वदित्यर्थः॥५॥ ॥७॥ ॥

॥रामः॥
॥२॥

नु

ननुअपरोक्षतयाँभूयमानस्यसंसारस्यकथमत्यंतमसत्वंप्रत्यक्षविरुद्धमित्याशंक्यस्वप्नदृष्टांतेनास्य मिथ्यात्वंसाधयतिसंसारइति॥रागद्वेषादिभिःसंकुलायमानःसंसारःस्वकालेस्वस्यकारणभूताज्ञाने स्थितेसतितावन्मिथ्याभूतोप्ययंसंसारःसन्निवाभातिप्रबोधेसतिवाक्यश्रवणादात्मज्ञानोत्पन्नेअस न्निवभवतितत्रदृष्टांतःस्वप्नतुल्यइति स्वप्नोहियावन्निद्रानुभूयतेतावन्मिथ्याभूतोपिसत्यइवाभाति

संसारःस्वप्नतुल्योहिरागद्वेषादिसंकुलः।स्वकालेसत्यवद्भातिप्रबोधेऽसत्यवद्भवेत्।६॥
तावत्सत्यंजगद्भातिशुक्तिकारजतंयथा॥यावन्नज्ञायतेब्रह्मसर्वाधिष्ठानमद्वयम्॥७॥

प्रबोधेनिद्रानाशेसतिमिथ्यावद्भदित्यर्थः॥६॥ तावन्मिथ्यात्वमेवदृष्टांतांतरेणदृढयति। यथानील पृष्ठत्रिकोणादिविशेषज्ञानंनोत्पद्यतेतावद्रजतज्ञानंसत्यमेवानुभूयते॥तथासर्वाधिष्ठानभूतं सच्चिदानंदाद्वयंब्रह्मयावन्नज्ञायतेसाक्षान्नानुभूयतेतावज्जगदाकारेणपरिणतःसंसारःसत्यइव भ्रान्त्यादृश्यतइत्यर्थः॥७॥

सर्वंदृश्यंप्रपंचजातंब्रह्मण्येवमायाकल्पितमितिप्रतिपादयति॥ सच्चिदात्मनीति॥ सत्यज्ञानानंदात्म
मनिनित्येसर्वानुस्यूतेविभौव्यापकेब्रह्मणिसर्वाःऋषयोनराःस्थावरजंगमादयोविविधाअपिव्य
क्तयःसर्वोपादानभूतेपरेब्रह्मणिईश्वरेहेम्निकटकमुद्रिकादय इवकल्पिताएतद्ब्रह्मणिअपि
उक्तमर्थमाकाशदृष्टांतेनद्रढयति॥ यथेति॥ हृषीकेशः मनःप्रभृतिसर्वेंद्रियप्रवर्त्तकः॥ नियाम

सच्चिदात्मन्यनुस्यूतेनित्येविभौप्रकल्पिताः॥ व्यक्तयोविविधाःसर्वाः हाटकेकटकादिवत्॥ ८॥
यथाकाशोहृषीकेशोनानोपाधिगतोविभुः॥ तद्भेदाद्भिन्नवद्भातितन्नाशादेकवद्भवेत्॥ ९॥

कोवाविभुः सर्वगतः परमेश्वरः स्वमाययापरिकल्पितनानाविधोपाधिषुप्रतिबिंबितःसन्नाने
वभातितन्नाशेसतिब्रह्मात्मैक्यज्ञानेनतेषांमाययाकल्पितदेहाद्युपाधीनांनाशेसतिकेवलं
एकवद्भवति॥ यथाएकएवाकाशोमठघटाद्युपाधिषुएवनानाविधोभवतिउपाधिलयादे
कवद्भवतितद्वदित्यर्थः॥ ९॥ ॥छ॥ ॥ ॥छ॥ ॥ ॥छ॥

[illegible]

॥रामः॥
॥३॥

न तु सर्वदेहेषु तत्तज्जात्यादिभिरनुबद्धस्य कथं नित्यमुक्तत्वमुच्यते। तत्राह। नानोपाधीति पूर्वोक्तनानोपाधिवशादेवात्मनि जातिवर्णाश्रमादय आरोपिताः। मायया कल्पिताः न तु स्वतः यथा स्वभावमाधुर्यं जलं कटुतिक्ष्णलवणाम्लरक्तपीतादिद्रव्योपेतं सत्तद्रूपं भवति न तु स्वरूपेणा तद्वदित्यर्थः॥१०॥ आ

नानोपाधिवशादेव जातिवर्णाश्रमादयः॥ आत्मन्यारोपितास्तोये रसवर्णादिभेदवत्॥१०॥
पंचीकृतमहाभूतसंभवं कर्मसंचितम्॥ शरीरं सुखदुःखानां भोगायतनमुच्यते॥११॥

त्मनो विद्यापरिकल्पितोपाधित्रयमध्ये स्थूलोपाधिमाह। पंचीति। पंचानां भूतानां प्रत्येकं द्विधा विभज्य तत्रैकैकमर्द्धं चतुर्द्धा विभज्य स्वांशं परित्यज्य तेषु योजनं पंचीकरणं एवं पंचीकृतेभ्यः स्थूलपृथिव्यादिमहाभूतेभ्यः संभवो यस्य प्रारब्धकर्मभिः संचितं रचितं स्थूलशरीरं सुखदुःखानामायतनं भोगस्थानं प्रत्यगात्मन इति॥११॥

सूक्ष्मोपाधिमाह॥ पंचेति॥ पंचप्राणाः एकस्यैव महाप्राणस्य पंचवृत्तयः ज्ञानेंद्रियकर्मेंद्रियभेदे
न इंद्रियाणि दश मनः शब्देन संकल्पविकल्पांतःकरणवृत्तिः बुद्धिर्निश्चयात्मिका एतैः संयुक्तं अपं
चीकृतसूक्ष्मभूतोत्थं जातं सूक्ष्मांगं लिंगशरीरं सुखदुःखभोगसाधनमित्यर्थः॥१२॥ तृतीयं कार

पंचप्राणमनोबुद्धिदशेंद्रियसमन्वितं॥ अपंचीकृतभूतोत्थं सूक्ष्मांगं भोगसाधनम्॥१२॥
अनाद्यविद्यानिर्वाच्या कारणोपाधिरुच्यते॥ उपाधित्रितयादन्यमात्मानमवधारयेत्॥१३॥

णोपाधिमाह॥ अनादीति॥ सदसद्भ्यामनिर्वाच्याऽविद्याऽनादिभूता कारणोपाधिरुच्यते· सा च सम
ष्टिव्यष्टिभेदेन स्थूलसूक्ष्मप्रपंचयोः कारणभूतत्वात्कारणोपाधिरुच्यते· उपाधित्रयवशेन प्रयो
जनमाह॥ उपाधित्रितयादन्यमिति· तत्साक्षिणमात्मानं अन्नमयादिषु कोशेषु व्याप्य तत्तन्मयतया

१५ त्मानमवधारयेत् जानीयादित्यर्थः १३

स्थितस्य कुतो नित्यत्वप्रच्युत इत्याशंक्याह॥५॥

पंचकोशेति॥ अन्नमयप्राणमयमनोमयविज्ञानमयानंदमयाः पंचकोशाः आदिशब्देनाशनपिपासादिग्रहणं तैर्योगेन मिथ्यातादात्म्येन तत्तन्मय इव स्थितः आत्मा शुद्धः नतु तेषु वस्तुतो रंजितः वेदोपि स वा एष पुरुषोन्नरसमय इत्यादिभिः सूक्ष्मवस्तुदर्शनार्थमेवोपाधिस्थं ब्रह्म सूचयति नतु तत्त्वतः यथा निर्मलस्फटिको नीलपीतवस्त्रादियोगेन तत्तन्मय इवाभाति वस्तुतो नास्ति तेन रंजनं तद्वदित्यर्थः॥१४॥ असंगात्मस्वरूपज्ञानविवेचनप्रकारमाह॥ वपुरिति॥ पंचकोशैस्तावदात्मनि स्थितं वपुः स्थूलादिशरीरं तुषादिभिर्युक्तं तंडुलमिव युक्त्यावघाततः अवहननात् शुद्धमात्मानं विविच्यात् विवेकेन जानीयात् कथं अयं स्थूलदेहोपि नात्मा भूतकार्यत्वात् घटवत् सूक्ष्मदेहोपि नात्मा देहत्वात् स्थूलदेहवत् कारणदेहोपि नात्मा मिथ्यात्वादित्यनुमानात्तेभ्यः कोशेभ्यो भिन्नमात्मानं विविच्याद्विवेकेन जानीयादित्यर्थः॥१५॥

पंचकोशादियोगेन तत्तन्मय इव स्थितः॥ शुद्धात्मा नीलवस्त्रादियोगेन स्फटिको यथा॥१४॥
वपुस्तुषादिभिः कोशैर्युक्तं युक्त्यावघाततः॥ आत्मानमंतरं शुद्धं विविच्यात्तंडुलं यथा॥१५॥

नन्वात्मा सर्वगतस्तर्हि किं सर्वत्र सर्वैर्न दृश्यत इत्यत आह॥ सदेति॥ आत्मा सर्वगतोपि सर्वत्र व्याप्य स्थितोपि जडैर्बहिःप्रवृत्ताक्षैर्न प्रकाश्यते रागादिभिरविद्यायां बुद्धावेवावभासते न सर्वत्र यथा प्रतिबिंबः स्वच्छेष्वेव दर्पणादिषु दृश्यते नान्यत्र तद्वदित्यर्थः॥१६॥ देहे स्थितस्याप्यात्मनिमौदासीन्यं राजदृष्टान्तेनाह देहेति देहेंद्रियमनोबुद्धिप्रकृतिभ्यो जडपरिणामिदृश्येभ्यो विलक्ष

सदा सर्वगतोप्यात्मा न सर्वत्रावभासते॥ बुद्धावेवावभासेत स्वच्छेषु प्रतिबिंबवत्॥१६॥
देहेंद्रियमनोबुद्धिप्रकृतिभ्यो विलक्षणं॥ तद्वृत्तिसाक्षिणं विद्यादात्मानं राजवत्सदा॥१७॥
व्यापृतेष्विंद्रियेष्वात्मा व्यापारीवाविवेकिनां॥ दृश्यतेभ्रेषु धावत्सु धावन्निव यथा शशी॥१८॥

णं शुद्धात्मानं तत्तद्वृत्तीनां साक्षितया स्थितं यथा राजा स्वनगरे स्थितेषु मंत्रिषु वर्तमानेषु स्वयं साक्षितया तान् पश्यन् तिष्ठति तद्वदेव जानीयादित्यर्थः॥१७॥ ननुआत्मनोविकारित्वमयुक्तं सर्वदा व्यापारवान् दृश्यते तत्राह॥ व्यापृतेष्विति॥ इंद्रियादिषु स्वस्वविषयेषु प्रवृत्तेषु सत्सु आत्मा

व्यापारीवाविवेकिनांगुरुशास्त्राद्युपदेशरहितानांदृश्यतेनतुतत्त्वदृशां· यथामेघखंडेषुवायुवशा
द्धावत्सुचन्द्रोपिधावतीवलौकिकैर्दृश्यतेनतुचंद्रमाधावतितथात्मापीत्यर्थः॥१८॥ ननुदेहेंद्रियमनोबु
द्ध्योपिसचेतनादृश्यंतेकिमात्मानमाश्रित्यप्रवर्त्तंतेतत्राह॥ आत्मचैतन्येति॥ ज्ञानस्वरूपमात्मचैत
न्यमाश्रित्यदेहेंद्रियमनोबुद्ध्यादयः स्वकीयार्थेषुवर्त्तंतेयथाजनाः प्राणिनःसूर्यप्रकाशमाश्रित्यव्या

आत्मचैतन्यमाश्रित्यदेहेंद्रियमनोधियः॥ स्वकीयार्थेषुवर्त्तंतेसूर्यालोकंयथाजनाः॥१९॥
देहेंद्रियगुणान्कर्माण्यमलेसच्चिदात्मनि॥ अध्यस्यंत्यविवेकेनगगनेनीलतादिवत्॥२०॥ ॥

५२

पारेषुव्यवहरंति· अतश्चैतन्यज्ञानमात्मनएवदेहेंद्रियादयस्तुसर्वेजडाइत्यर्थः॥१९॥ नन्वहंजातो
स्मिबाल्यकौमाराद्यवस्थामनुभवामिपश्यामीत्याद्यनवरतमनुभूयमानस्यात्मनःकथमविकारित्व
मुच्यतइत्यत्राह देहेति देहेंद्रियमनोबुद्धिधर्मान्गुणांश्चसत्त्वादीन्कर्माणिकर्मेंद्रियव्यापारान्·
मिथ्यातादात्म्येनस्थितेनिर्मलेअसंगरूपेसच्चिदात्मन्येतत्सामीप्यादविवेकिनोध्यस्यंतियथागगने

नीलतादिवत्· अतस्तेआत्मधर्माःनभवंतिअ
पितुदेहादीनामेवेत्यर्थः ॥२०॥

ॐपरमात्म१ न३

॥आ॰टी॰॥
॥६॥

ननुकर्तृत्वभोक्तृत्वादिकंआत्मनिअनवरतमनुभूयमानत्वाद्दुर्वारमित्याशंक्यतदपितथैवमिथ्या
इत्याह॥अज्ञानेति॥अज्ञानवशान्मानसोयमुपाधिस्तस्यैवकर्तृत्वादयोधर्मास्तेचाज्ञानवशादात्म
निकल्प्यंते· यथांभसश्चलनादिकंअंबुनिप्रतिबिंबवतिचंद्रमसिअविवेकिनःकल्प्यंतेतद्वदात्मनीत्य

अज्ञानान्मानसोपाधेःकर्तृत्वादीनिचात्मनि॥कल्प्यंतेंबुगतेचन्द्रेचलनादियथांभसः॥२१॥
रागेच्छासुखदुःखादिबुद्धौसत्यांप्रवर्त्तते॥सुषुप्तौनास्तितन्नाशेतस्माद्बुद्धेस्तुनात्मनः॥२२॥

र्थः॥२१॥रागेच्छासुखदुःखादीनात्मधर्मान्मन्यंतेवैशेषिकादयस्तान्निराकरोति॥रागेति॥रागेच्छा
सुखदुःखप्रयत्नादिकंसर्वंबुद्धेरेवनत्वात्मनःकथं॥जाग्रत्स्वप्नयोर्बुद्धौसत्यांप्रवर्त्ततेसुषुप्तौ
तस्यांबुद्धेर्नाशेकारणेलीनेनप्रवर्त्तते॥तस्माद्बुद्धेरेवधर्माःनत्वात्मनइति॥२२॥ ॥छ॥ ॥

॥एमः॥
॥६॥

ननुतर्हिआत्माकीदृशस्वभावइत्याशंक्यआत्मस्वभावमुपदिशति॥प्रकाशेति॥यथाप्रकाशएवा
र्कस्यस्वभावः तोयस्यशैत्यं अग्नेरुष्णता तथात्मनोपिसच्चिदानंदः नित्यनिर्मलस्वभावः स्वरूपमि
त्यर्थः॥२४॥ननुयद्यप्यऽविकार्योयमात्मा तर्हिजानामीतिप्रत्ययः कथमित्यपेक्षायामाह॥ आ

प्रकाशोऽर्कस्यतोयस्यशैत्यमग्नेर्यथोष्णता॥स्वभावंसच्चिदानंदेनित्यनिर्मलतात्मनः॥२५॥
आत्मनःसच्चिदंशश्चबुद्धेर्वृत्तिरितिद्वयम्॥संयोज्यचाविवेकेनजानामीतिप्रवर्तते॥२६॥

त्मनेति॥प्रत्यगात्मनःसच्चिदंशश्चअंशश्चांशः आत्माभासः बुद्धेर्वृत्तिश्चएतद्द्वयंअविवेकेनसंयो
ज्यासंगस्यात्मनःकोपिसंयोगोनास्त्येवअसंगोह्ययंपुरुषइतिश्रुतेः॥तथाप्यज्ञानवशान्मेलनंसं
भाव्यजानामीतिप्रत्ययः अहंकारवृत्तिःप्रवर्ततेकेवलप्रत्यगात्मनिकिंचिद्विकारोनास्तीतिभावः ॥२८॥

नार

एतदेवदर्शयतिआत्मनइति॥आत्मास्वभावादेवविकारशून्यःशुद्धःकदाचिदपिबोधशंकैवनास्ति
जडत्वात्तथापिजीवःसाभासाहंकारःसर्वसाभासांतःकरणवृत्तीनांतप्तायसःपिंडवदेकत्वसं
गतमेवमलमत्यर्थंज्ञात्वादेहेंद्रियादिकमहमितिविचार्याहंकर्त्ताहंद्रष्टेतिसुदृढंभ्रांतोभवतीत्यर्थः
॥२५॥आत्मास्वयमेवस्वस्मिन्नविवेकेनान्यधर्मानारोप्यबिभेतीत्याह॥रज्जुसर्पवदिति॥यथाअंध

आत्मनोविक्रियानास्तिबुद्धेर्बोधोनजात्विति॥जीवःसर्वमऽलंज्ञात्वाकर्त्ताऽद्रष्टेतिमुह्यति॥२५॥
रज्जुसर्प्पमिवात्मानंजीवोज्ञात्वाभयंवहेत्॥नाहंजीवःपरात्मेतिज्ञातश्चेन्निर्भयोभवेत् ॥२६॥

कारादौविकाररहितरज्ज्वादौसर्पाद्यारोपणंकृत्वाभयकंपंवहेत्॥एवमात्मापिस्वस्मिन्जीवत्वमा
रोप्यसद्वितीयंपरिछिन्नंज्ञात्वाभयदुःखसागरेनिमग्नोभवति।यदाशास्त्राचार्यप्रसादेनशास्त्रा
र्थज्ञानमुत्पन्नंभवतितदाविवेकचक्षुषास्वात्मानमखण्डानंदज्ञानैकरूपंसंपश्यन्ततोनाहंजीवः

पादिकं३

परमात्माहमितिज्ञात्वाभयदुःखादिरहितः
सुखीभवेत्॥२६॥

+त्रि

नन्वात्माऽत्यंतसामीप्यकैर्बुद्धिमनोहंकारादिभिः कथंनावलोक्यतेनज्ञायतेतत्राह॥आत्मेति॥आत्
माकेवलएकएवसन्नपिबुद्धिमनोहंकारादीन्सर्वानवभासयतितैर्जडैर्मनश्चक्षुरादिभिर्नावभास्य
ते· यथाएकएवदीपोघटादीन्सर्वानपिप्रकाशयतिप्रकाशितैर्घटादिभिःनावभास्यतेतद्वदित्य

आत्मावभासयत्येकोबुद्ध्यादीनिन्द्रियाणिच।दीपोघटादिवत्स्वात्माजडैस्तैर्नावभासते॥२७॥
स्वबोधेनान्यबोधेछाबोधरूपतयात्मनः॥नदीपस्यान्यदीपेछायथास्वात्मप्रकाशने॥२८॥

र्थः॥२७॥नन्वात्माबुद्ध्यहंकारादिभिर्यदिनावभास्यतेतर्हिआत्मज्ञानेज्ञानांतरेणभवितव्यमि
त्याशंक्यतत्राह॥स्वबोधेति॥आत्मनोबोधरूपत्वात्स्वबोधेनित्येसतितस्यात्मनोबोधायज्ञा
नांतरापेक्षानास्तिएवअनुभवस्वरूपत्वात् यथादीपस्यैवस्वप्रकाशनेदीपांतरापेक्षानास्तितद्
दित्यर्थः॥२८॥

ननु यदि बुद्ध्यादिभिरात्मा ज्ञेयो न भवेत्तर्हि आत्मज्ञाने उपायान्तरं वक्तव्यं स उपायः कः इत्यत आह॥ निषिध्येति॥ अथात आदेशो नेति नेतीति अतन्निरसनवेदवाक्यैर्निखिलोपाधिं निषिध्य आत्मानं ज्ञात्वा तत्त्वमसि अयमात्मा ब्रह्म नतरहमित्यादिवाक्यैर्लक्षणया ब्रह्मात्मैक्यज्ञानं विद्यात् प्राप्नुयात्॥ अनेन प्रकारेण ज्ञातव्यमित्यर्थः॥२८॥ आत्मस्वरूपज्ञाने अतन्निरसनाभावे का नः क्षतिरि

निषिध्य निखिलोपाधीन्नेति नेतीति वाक्यतः॥ विद्यादैक्यं महावाक्यैर्जीवात्मपरमात्मनोः॥२९॥
आविद्यकं शरीरादि दृश्यं बुद्बुदवत्क्षरं॥ एतद्विलक्षणं विद्यादहं ब्रह्मेति निर्मलम्॥३०॥

त्याशंक्याह॥ अतन्निरसनाभावे आत्मज्ञानमशक्यं यथा नायं सर्प इति आरोपितस्य सर्पस्यापाकरणाभावे रज्जुज्ञानं नोपपद्यते॰ न ह्यनात्मनिरसनाभावेनात्मज्ञानव्यशर्पशयेनाह॥ आविद्येति॥ अविद्याकल्पितं देहेन्द्रियादि सर्वं दृश्यजातं आविद्यकं दृश्यत्वाद्बुद्बुदवत्क्षरं विनश्वरं एतद्विलक्षणं निर्मलं निरुपाधिकं नित्यमेकं सच्चिदात्मकं ब्रह्मैवाहमस्मीति विद्यात् ततः ज्ञानज्ञन्यो भवति

॥ [illegible] ॥ [illegible]

एवमुक्तरीत्यात्मानमद्वयानंदं वाक्यार्थज्ञानेनापरोक्षतया ज्ञात्वा स्वानुभवावष्टंभेन स्वात्मन्येवा
त्मत्वानमननप्रकारमाह। पंचभिः श्लोकैः॥ देहेति॥ देहान्यत्वात्जडदृश्यत्वादिस्वभावस्थूलश
रीरादन्यत्वात् मे जन्मजराकार्श्यलयादयो न संति· इंद्रियादिभिरसंगत्वान्मे शब्दादिविषयैर्भोगैः

देहान्यत्वान्न मे जन्मजराकार्श्यलयादयः॥ शब्दादिविषयैः संगो निरिंद्रियतया न च
न२ ॥३१॥ अमँस्त्वान्न मे दुःखरागद्वेषभयादयः॥ अप्राणो ह्यमनाः शुभ्र इति च श्रुतिशासना
त्॥३२॥ एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि च॥ खं वायुर्ज्योतिरापश्च पृथ्वी विश्वस्य [illegible]

संगोऽनुभवो नास्त्येव ॥३१॥ अमनस्त्वेति अमन इति स्पष्टार्थः॥३२॥ कथं इंद्रियप्राणमनसां भा
सकत्वं इत्याशंक्य श्रुतिं प्रमाणयति· अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः॥ एतस्मा
ज्जायते प्राणो मनः सर्वेंद्रियाणि च स्पष्टार्थः॥३३॥ ॥ ७ ॥ ॥

गुरुप्रसादात्स्वानुभवसिद्धमर्थंचाभिनयतिनिर्गुणइत्यादिभिस्त्रिभिःश्लोकैर्निर्गुणइति· अहंनि-
र्गुणः·गुणाद्यऽभावात्· निःक्रियःइंद्रियाद्यभावात् नित्यःअपक्षयाभावात्निर्विकल्पःसंकल्प-
रहितत्वात्निरंजनःअसंगत्वात्·निर्विकारःषोडशकलात्मकलिङ्गदेहशून्यत्वात्· निराका-
रःनिरवयवत्वात्नित्यमुक्तःबंधनाभावात्· निर्मलःअविद्यातत्कार्यरहितत्वात्॥३४॥नगु

निर्गुणोनिःक्रियोनित्योनिर्विकल्पोनिरंजनः॥निर्विकारोनिराकारोनित्यमुक्तोऽस्मिनिर्मलः
॥३४॥अहमाकाशवत्सर्वंबहिरंतर्गतोऽच्युतः॥सदासर्वसमःशुद्धोनिःसंगोनिर्मलोऽचलः॥३५॥

पूर्वोक्तैर्हेतुभिरेवंविशिष्टस्वरूपमहमस्मीत्युक्ते·तत्किंविशिष्टमित्याशंक्याह॥अहमिति
अहंआकाशवत्सर्वदृश्यजातस्यबहिरंतर्गतःअच्युतःच्युतिरहितःसदासर्वसमःविषमेष्व-
पिसमःव्याप्यस्थितःतथाविशुद्धःनिर्मलःअचलःपूर्णस्यचलनाभावात्॥३५॥ ॥

नित्यमिति॥एकमखंडानंदंद्वितीयाभावादद्वयंसत्यंज्ञानमनंतंयत्परंब्रह्मेतिश्रुत्याप्रतिपाद्यतेतत्परंब्रह्मैवाहमस्मीतितत्त्वस्वरूपंकथितं॥३५॥पूर्वश्लोकोक्तमननंचिरकालाभ्यस्तंसत्तुरूपार्थंसाधयतीत्याह॥एवमितिएवमुक्तप्रकारेणब्रह्मैवाहमस्मीतिनैरंतर्येणचिरकालाभ्यस्तवासनाऽविद्याकृतचित्तविक्षेपान्निःशेषतोनाशयतियथारसायनमौषधंचिरकालसेवितंसत्रोगान्निः

नित्यशुद्धविमुक्तैकमखंडानंदमद्वयं सत्यंज्ञानमनंतंयत्परंब्रह्माहमेवतत्॥३६॥एवंनिरं
तरंकृत्वाब्रह्मैवास्मीतिवासना॥हरत्यविद्याविक्षेपान्रोगानिवरसायनम्॥३७॥विवि
क्तदेशआसीनोविरागोविजितेंद्रियः॥भावयेदेकमात्मानंतमनंतमनन्यधीः॥३८॥

शेषतोनाशयतितद्वदित्यर्थः॥३७॥ब्रह्मानुसंधानेसाधननियममाह॥विविक्तेति॥विविक्तदेशेजनसंबंधवर्जितेदेशेआसीनोउपविष्टःविरागःसर्वत्रगताभिलाषःअतएवविनिर्जितानींद्रियाणियेनसःअनंतमपरिच्छिन्नमद्वयमेकमात्मानमनन्यधीर्ब्रह्मण्येवस्थितानिश्चयात्मिकाबुद्धिर्यस्यतादृशोभावयेत्ध्यायेत्॥३८॥

ननु दृश्यप्रपंचे जाग्रति कथमेकत्वभावना संभवतीत्याह॥आत्मनीति॥अखिलं दृश्यजातं सुधीः शुद्धांतकरणः सन् शुद्ध धिया आत्मन्येव समाधिसमये प्रविलाप्य प्रकर्षेण नाशयित्वा तदा द्वितीयाभावादेकमात्मानं सज्योत्स्नाकाशवत् भावयन्नवतिष्ठति॥३९॥परमार्थदर्शी मुनिः नामरूपवर्णादिकं सर्वं विहाय परिपूर्णज्ञानानंदस्वरूपेणैवावतिष्ठतीत्याह॥नामरूपेति॥नाम

आत्मन्येवाखिलं दृश्यं प्रविलाप्य धिया सुधीः॥भावयेदेकमात्मानं निर्मलाकाशवत्सदा॥३९॥
नामरूपादिकं सर्वं विहाय परमार्थवित्॥परिपूर्णचिदानंदस्वरूपेणावतिष्ठति॥४०॥ज्ञा
तृज्ञानज्ञेयभेदः परमात्मनि विद्यते॥ परानंदैकरूपत्वात्दीप्यते स्वयमेव तत्॥४१॥

रूपेति श्लोकस्य स्पष्टोर्थ॥४०॥ननु प्रमातादि त्रिपुटीज्ञानमुपलभ्यते कथमेकत्वभावनेत्याशंक्य परमात्मनि भेदो नास्तीत्याह॥ज्ञातृज्ञानेति॥ज्ञातृज्ञानज्ञेयभेदः परमार्थतो न विद्यते स भेदः कल्पितात्मन्येव भाति ज्ञानानंदैकरूपत्वात् आत्मा स्वयमेव दीप्यते प्रकाशयते॥४१॥

एवंविभुद्भवस्तुध्यातुः प्रत्यक्षफलमाह। एवमिति। आत्मारणौ आत्मा अंतःकरणमेवाधरारणिः तस्मिन् प्रणवमेवोत्तरारणिः ध्यानेन तयोर्मथने सर्वदा कृते तत्त्वोदिता ज्वाला स्वरूपावगतिर्ज्ञानं विद्याऽज्ञानमेवेंधनं मूलाज्ञानं निःशेषतं सपरिवारं नाशयति· तदा मुमुक्षुः स्वरूपेऽभिषिक्तः कृतकृत्यो भवतीत्यर्थः॥४२॥ एवं जीवपरमात्मनोरत्यंतैक्यज्ञानेनाविद्यापरिकल्पितान्ध्वतमसि निःशेषमपयाते सति

एवमात्मारणौ ध्यानमथने सततं कृते। उदितावगतिर्ज्वाला सर्वाज्ञानेंधनं दहेत्॥४२॥
अरुणेनेव बोधेन पूर्वं संतमसि हृते। तत आविर्भवेदात्मा स्वयमेवांशुमानिव॥४३॥ आत्मा तु
सततं प्राप्तोऽप्यप्राप्तवदविद्यया। तन्नाशे प्राप्तवद्भाति स्वकंठाभरणं यथा॥ ४४ ॥ ॥

परमात्मा स्वयमेवाविर्भवेत् इत्याह अरुणेनेति। अरुणप्रकाशेन आदावंधकारक्षये अंशुमान् यथाविर्भवेत्तद्वदात्मापीत्यर्थः॥ आत्मा सदापरोक्षस्वभावत्वात् अप्राप्त एव स आत्मा कदा प्राप्तो भवतीति शिष्याभिप्रायमाह। आत्मा त्विति॥ आत्मा सर्वत्र पूर्णानंदाद्वयरूपः सर्वदा प्राप्त एव अविद्यावशात् भ्रांत्याऽप्राप्त इवाभाति तत्त्वायोतदावरणाविद्यानाशे वाक्यश्रवणात्· प्राप्त इव भाति कंठगतचामीकरन्यायादित्यर्थः॥४४॥

पहरत्ना

॥ननु जीवस्य परमात्मन्येकत्वमयुक्तमित्याशंक्याह॥ स्थाणाविति॥ अंधकारे स्थितस्थाणौ पुरुषो यमि
तिचौरशंकया बिभेति तथैवाविचाराद्ब्रह्मणि जीवत्वमारोप्यते यथा शास्त्रोपदेशजनितविवेकदृष्ट्या तस्य
जीवस्य तात्विके रूपे लक्ष्ये तत्त्वंपदार्थे दृष्टे अज्ञानकल्पितत्वात्॥ जीवत्वमपि निवर्त्तते ब्रह्मैवाहमिति
जानातीत्यर्थः॥८५॥ ननु अहंममेति अज्ञानप्रत्यये जायते कथं नाहमिति प्रत्यय इत्याशंक्य तदपि तत्त

स्थाणौ पुरुषवद्भ्रांत्या कृता ब्रह्मणि जीवता॥ जीवस्य तात्विके रूपे तस्मिन्दृष्टे निवर्त्तते॥८५॥
तत्वस्वरूपानुभवादुत्पन्नं ज्ञानमंजसा॥ अहंममेति चाज्ञानं बाधते दिग्भ्रमादिवत्॥८६॥ सम्य
ग्विज्ञानवान्योगी स्वात्मन्येवाखिलं स्थितं॥ एकं च सर्वमात्मानमीक्षते ज्ञानचक्षुषा॥८७॥

थैवन्मृषा इत्याह॥ तत्वेति॥ जीवपरयोरेकत्वानुभवादुत्पन्नं यज्ज्ञानं तदहंममेति अज्ञानं बाधते दिग्भ्रमादिवद्दिग्
भानुदर्शनादित्यर्थः॥८६॥ अहंममेति प्रत्यये नष्टे योगी सम्यग्विवेकज्ञानवान्सत् विज्ञानचक्षुषा सर्वदृ
श्यप्रपंचं स्वात्मन्येवाभेदेन पश्यतीत्याह सम्यगिति॥ एकमात्मानं सर्वं पश्यति कृतकृत्यो भवतीभावः॥८७॥

नर. ति

नन्वात्मानंसर्वंपश्यतीतिप्रत्यक्षविरोधात्· नानात्वेनदृश्यमानमिदंसकथमात्मन्यभेदेनपश्यतीत्य
त्राह॥ आत्मैवेति॥ इदंसर्वंजगदात्मैवआत्मकार्यत्वात्· अर्थतोन्यदात्मनोनकिंचिद्विद्यते·यथाघ
टशरावादिकंमृत्कार्यंमृदोन्यन्नास्तिअतःस्वात्मन्येवसर्वंदृश्यजातमभेदेननिरीक्ष्यतेपश्यती

आत्मैवेदंजगत्सर्वमात्मनोन्यन्नकिंचन॥ मृदोयद्वत्घटादीनिस्वात्मानंसर्वमीक्षते॥४८॥
जीवन्मुक्तस्तुतद्विद्वान्पूर्वोपाधिगुणांस्त्यजेत्॥ सच्चिदानंदरूपत्वात्भवेद्भ्रमरकीटवत्॥४९॥

ति· वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यमितिश्रुतेः॥४८॥ एवंभूतावस्थेयाजीवन्मु
क्तइत्याह· जीवन्मुक्तइतिअनाद्यविद्ययापरिकल्पितपूर्वोपाधित्वादीन्परित्यजेत्· इतिइ
यमेवजीवन्मुक्तिरेवमुच्यतेसच्चिदानंदगुणवत्वात्भ्रमरकीटवत्साक्षाद्ब्रह्मभवेत्प्राप्नोतीत्यर्थः

देहगतोगुणादीनगुणान्त २

नन्वनसुआत्मारामःसुखंतिष्ठतीत्याह तीर्त्वेति मोहएवार्णवः अपर्यंतत्वात्तंज्ञानप्लवेनतीर्त्वा
निःशेषंनाशयित्वारागद्वेषादयएवराक्षसामोक्षपरिपंथिनस्तान्निःशेषतोनाशयित्वाशांतिस
मायुक्तःसमदमादिसहितःआत्मारामआत्मन्येवक्रीयँस्यसविराजतेस्वाराज्येनाभिषिक्तःप्र

तीर्त्वामोहार्णवंहत्वारागद्वेषादिराक्षसान्॥योगीशांतिसमायुक्त आत्मारामोविराजते॥५०॥
वाह्यानित्यसुखासक्तिंहित्वात्मसुखनिर्वृतः॥घटस्थदीपवत्स्वस्थ अंतरेवप्रकाशते॥५१॥

काशतेअत्रअर्थांतरंध्वन्यतेः अथआत्मारामःश्रीरामःसमुद्रंतीर्त्वारावणादीन्राक्षसान्हत्वासी
तैवशांतिरूपासीतया समेतःविराजतेअयोध्यायां॥५०॥जीवन्मुक्तलक्षणमाह॥ वाह्ये
ति॰ वाह्येंद्रियविषयोद्भवांनित्यसुखाशक्तिंप्रीतिवासनांहित्वातत्रहेतुःआत्मासुखेननिर्वृतःघ

टस्थदीपवदंतरेवप्रकाशतेस्वसाक्षिकमेवा
त्मानुभवसुखमितरैर्नज्ञायतेइत्यर्थः॥५१॥

एवमुक्तप्रकारेणजीवन्मुक्तःसन्प्रारब्धसंक्षयादेवनिवर्त्तितव्यमित्याह् उपाधिस्थइतिदेहोपाधौसाक्षित्वेन
स्थितेरपिमुनिर्व्योमवत्तद्धर्मैर्नानुलिप्तः ममकर्मलेपोनास्तीतिभावयन्·सर्वज्ञोपिमूढवत्प्राकृतवत्तिष्ठेत्
सर्वत्रविषयेषुयदृच्छयाप्राप्तेषुः नासक्तोआसक्तिरहितःसन्वायुवच्चरेत् निवर्त्तयेत्॥५१॥प्रारब्धक्षयेदे
होपाधौलीनेविदेहकैवल्यमाह।उपाधीति उपाधिभूतदेहद्वयविलयेप्रारब्धकर्मसंक्षयेमुनिःयोगी

उपाधिस्थोपितद्धर्मैर्नलिप्तोव्योमवन्मुनिः॥सर्वत्रमूढवत्तिष्ठेदसक्तोवायुवच्चरेत्।५२। उपाधि
विलयाद्विष्णौनिर्विशेषंविशेन्मुनिः॥जलेजलंवियद्व्योम्नितेजस्तेजसिवायथा।५३।यल्लाभा
न्नापरोलाभोयत्सुखान्नापरंसुखम्। यज्ज्ञानान्नापरंज्ञानंतद्ब्रह्मेत्यवधारयेत्॥५४॥ ७ ।

विष्णौसर्वत्रव्यापकेपरेब्रह्मणिनिर्विशेषंयथाभवतितथाविशेत्· अत्यंतप्रवेशेदृष्टांताः जलेजलमित्याद
यः॥५३॥ब्रह्मणःसर्वातिशयित्वात्तत्तटस्थलक्षणेनाभिधत्तेश्लोकद्वयेनयल्लाभादिति ब्रह्मसाक्षात्कार
लाभादपरोलाभोनविद्यतेसर्वलाभानांतत्रैवांतर्भूतत्वात्· यथाब्रह्मानंदेक्षुद्रानंदानामंतर्भावः यत्सुख
तद्ब्रह्मानुभवसुखादपरंसुखंनास्तिनिरतिशयत्वात्· यज्ज्ञानात्यद्ब्रह्मसाक्षात्कारज्ञानादपरंज्ञानानास्तिमो
क्षहेतुत्वात्तद्ब्रह्मेतिजानीयात्॥५४॥

नं

यद्दृष्ट्वेति ॥ यत् दृष्ट्वा नापरमन्यत् द्रष्टव्यं नास्ति तेनैव पुरुषार्थसमर्थत्वात् ॥ यद्भूत्वा प्राप्त्वा तेनैक्यं गत्वा पुनर्भवो जन्मादिकं नास्ति · यज्ज्ञात्वा यत्स्वरूपं ज्ञात्वाऽन्यत् ज्ञेयं नास्ति तदेव ब्रह्मेत्यवधारयेत् ॥ अन्यत्सर्वं वृथा यादि त्यर्थः ॥ ५५ ॥ तिर्यगूर्ध्वमधः सर्वं ब्रह्मैवमित्याह · तिर्यगिति तिर्यगिति स्पष्टार्थः ॥ ५६ ॥ अखण्डानंदमेकं ब्रह्म वेदांतैरतद्व्यावृत्तिरूपैरतन्निरसनेन ज्ञातव्यमित्याह ॥ अतदिति ॥ स्पष्टोऽर्थः ननु ब्रह्मादयोपि निर

यद्दृष्ट्वा नापरं दृश्यं यद्भूत्वा न पुनर्भवः ॥ यज्ज्ञात्वा नापरं ज्ञेयं तद्ब्रह्मेत्यवधारयेत् ॥ ५५ ॥ तिर्यगूर्ध्वमधः
पूर्णं सच्चिदानंदमद्वयम् ॥ अनंतं नित्यमेकं यत्तद्ब्रह्मेत्यवधारयेत् ॥ ५६ ॥ अतद्व्यावृत्तिरूपेण
वेदांतैर्लक्ष्यतेऽद्वयम् ॥ अखंडानंदमेकं यत्तद्ब्रह्मेत्यवधारयेत् ॥ ५७ ॥ अखण्डानंदरूपस्य त
स्यानंदलवाश्रिताः ॥ ब्रह्माद्यास्तारतम्येन भवंत्यानंदिनो लवाः ॥ ५८ ॥ ॥ ७ ॥ ॥

तिशयानंदिन एव श्रूयंते तत्राह · अखंडानंदेति · ब्रह्मादयः परिच्छिन्नानंदिन एव ब्रह्म तु अखंडानंदानुभवानंदरूपत्वात् अपरिच्छिन्नानंदमेवं स्वरूपं यस्य तस्यानंदसमुद्रस्यानंदलवलेशमाश्रित्य ब्रह्मादयोपि आनंदिनो भवंति · आनंदतारतम्येन एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः ॥ ५८ ॥

ननुपरमप्रेमास्पदत्वयाआत्मैवभातीत्युच्यते· तदयुक्तंअनात्मापिदेहादिकप्रपंचंप्रियतरमनुभूयत
इत्याशंक्याह॥ तद्युक्तमिति· अखिलंदेहाद्यनात्मवस्त्वपितद्युक्तंतेनात्मनासंयुक्तमेवप्रियतमंलो
किकोपिव्यवहारस्तद्युक्तमेवप्रियतमंतस्मात्सर्वगतंब्रह्मात्यंतंप्रियंयथासर्वंक्षीरंव्याप्यघृतमेव(

तद्युक्तमखिलंवस्तुव्यवहारास्तदन्विताः॥तस्मात्सर्वगतंब्रह्मक्षीरेसर्पिरिवाखिले॥५९॥
अतएवास्थूल ह्रस्वमदीर्घमजमव्ययं।अरूपगुणवर्णाख्यंतद्ब्रह्मेत्यवधारयेत्॥६०॥

वतिष्ठतेतस्मा वस्त्वपिब्रह्मव्याप्तत्वात्·प्रियतममेवाभात्यतआत्मैवप्रियतम इतिसिद्धंननुतर्हि
आत्माकेनप्रकारेणसर्वंव्याप्यतिष्ठतीतिजानीयात्· इत्याशंक्यसाक्षान्वक्तुमशक्यत्वात्अतएवा
स्थूलमितिश्रुतेःस्वरूपेणभातीत्याह॥अतइति॥अतएवास्थूलमितिस्पष्टोर्थः॥६०॥ ६७ ॥

पुनस्तद्ब्रह्मज्ञानार्थंश्लोकत्रयेणपृथक्पृथक्निरूपयतियद्भासेति॥ यद्भासाआदित्यंभासय
तिनतुभास्यैरर्कादिभिर्नभास्यतेनतत्रसूर्योभातिनचंद्रतारकंनेमाविद्युतोभांतिकुतोयमग्निस्तमेव
भांतमनुभातिसर्वंतस्यभासासर्वमिदंविभातीतिश्रुतेः॥ येनसर्वमिदंभूतभौतिकंभावरूपंजग

यद्भासाभास्यतेऽर्कादिर्भास्यैर्यत्त्रावभास्यते॥ येनसर्वमिदंभातितद्ब्रह्मेत्यवधारयेत्॥६१॥ स्व
यमंतर्वहिर्व्याप्यभासयन्नखिलंजगत्॥ ब्रह्मप्रकाशतेवह्निःप्रतप्तायसःपिंडवत्॥६२॥ ज
गद्विलक्षणंब्रह्मब्रह्मणोन्यन्नकिंचन॥ ब्रह्मान्यद्भातिचेन्मिथ्यायथामरुमरीचिका॥६३॥ ॥

द्भातितद्ब्रह्मेत्यवधारयेत्जानीयात्॥६१॥ तप्तायःपिंडवत्स्वयमेवांतर्वहिर्व्याप्यभासयन्नखिलंब्रह्म
प्रकाशतइत्याह॥ स्वयमितिस्पष्टोर्थः॥ पुनस्तदेवाहजगद्विलक्षणमिति॥ सर्वंब्रह्मैवसत्यंतथापिजग
द्रूपेणयदापश्यतितदानगृह्यतेइत्याह॥ जगदिति॥ जगद्वैलक्षण्येननतत्कार्यत्वेनविचार्यतत्त्वतस्तु
शकंब्रह्मणोन्यन्नविद्यतेयदिततोन्यद्दृश्यतेयत्किंचित्तन्मृषैवमरुमरिचिकाजलवदित्यर्थः॥६३॥

पनस्तदेवस्पष्टंनिरूपयति· दृश्यतइति॥ चक्षुषाश्रोत्रेणादृश्यतेश्रूयतेयन्मनसास्मर्यतेयद्वाचाऽभिधीयतेतत्वज्ञानात्सर्वंब्रह्मैवसच्चिदानंदमद्वयंब्रह्मणोन्यन्नकिंचिदस्तीत्यर्थः॥६४॥नचक्षुषागृह्यतेनापिवाचानान्यैर्देवैस्तपसाकर्मणावाज्ञानप्रसादेनविशुद्धसत्वः ततस्तुतंपश्यतिनिष्कलंध्या

दृश्यतेश्रूयतेयद्ब्रह्मणोन्यन्नकिंचन। तत्वज्ञानाच्चतद्ब्रह्मसच्चिदानंदमद्वयम्॥६४॥न
चक्षुषापश्यतिकश्चिदेनंहृदामनीषामनसाभिक्लृप्तोयएनंविदुरमृतास्तेभवंति॥६५॥
सर्वगंसच्चिदात्मानंज्ञानचक्षुर्निरीक्षते। अज्ञानचक्षुर्नेक्षेतभास्वंतंभानुमंधवत्॥६६॥

यमानइतिश्रुतेः॥ननुयदिसर्वगतंब्रह्मतत्सर्वैः किंनपश्यतइत्याशंक्यचक्षुरादिभिर्नगृह्यतेइत्यनयाश्रुत्याप्रतिपादयतिनचक्षुषेतिस्पष्टोर्थः॥६५॥य एतज्ज्ञानचक्षुःसर्वगतमपिसच्चिदानंदंब्रह्मपश्यतियत्वऽज्ञानचक्षुःसन्पश्यतियथाप्रकाशमानमपिभानुंअंधोनपश्यतिज्ञानप्रसादेनचक्षुषाविशुद्धसत्वः निवृत्ताविद्यःसर्वत्रब्रह्मैवपश्यतीत्यर्थः॥६६॥

मननादि

एवमुक्तरित्यानुभवसंपन्नस्यापितदभ्यासरहितस्यवासनावशात्किंचिदज्ञानंसंभवतितत्परि
हारार्थंपुनःस्मरणादिकुर्यादित्याह· स्मरणादितिजीवःप्रत्यगात्माएतत्प्रकरणार्थस्यस्मरणा
दिभिरुच्चैर्दीप्तःप्रकाशितःज्ञानमेवाग्निस्तेनपरितापितोभातिशोभतेइत्यर्थः सर्वसंसारमूलभू

स्मरणादिभिरुद्दीप्तज्ञानाग्निपरितापितः॥जीवःसर्वमलान्मुक्तःस्वर्णवद्द्योततेस्वयम्॥६७॥
हृदाकाशोदितोह्यात्माबोधभानुस्तमोपहृत्॥सर्वव्यापीसर्वधारीभातिसर्वंप्रकाशते॥६८।

ताज्ञानमलान्मुक्तःस्वयमेवसम्यक्प्रकाशते· यथाग्निपरितापितःसुवर्णःऔपाधिकंदुर्वर्णादिकं
हित्वास्वरूपेणप्रकाशतेतद्वदित्यर्थः॥६७॥एवंशोधितोजीवःपरमात्माहृदयाकाशेउदितःस
न्तमःअज्ञानमुपसंहरन्नेवभानुवत्पूर्वस्वरूपःप्रकाशनइत्याह॥हृदिति॥बोधएवभानुःसर्वस्या
धारभूतत्वात्· सर्वव्यापीसर्वधारीचशेषंस्पष्टम्॥६८॥ ॥७॥ ॥

नन्वात्मनोज्ञानप्रतिबंधकदुरितापहारार्थंप्रयागादितीर्थयात्रोद्योगः कर्त्तव्यइत्याशंक्यआत्मतीर्थज्ञानस्यनकिंचित्कर्त्तव्यमित्याह॥ दिग्देशेति· योनिःक्रियः परमहंसः स्वात्मतीर्थंभजते स सर्ववित्सर्वज्ञपरमात्मस्वरूपत्वात्· अमृतः मुक्तोभवेत्कथंभूतंस्वात्मतीर्थंदिग्देशकालाद्यनपेक्ष्यमेवा

दिग्देशकालाद्यनपेक्ष्यसर्वगंशीतादिहृन्नित्यसुखंनिरंजनं॥ यःस्वात्मतीर्थंभजतेविनिःक्रियःस
सर्ववित्सर्वगतोमृतोभवेत्॥६९॥ इतिश्रीमच्छंकराचार्यविरचितंआत्मबोधाख्यवेदांतप्रकरणं

सर्वगंशीतादिद्वंद्वदुःखानिहरतीतिशीतादिहृन्नित्यसुखंमोक्षानंदस्वरूपत्वात्॥ इतरतीर्थंतुतद्विपरीतंद्रष्टव्यं· तस्मादात्मतीर्थेज्ञानस्यनकिंचिदवशिष्यतेइतिभावः॥६९॥ इतिआत्मबोधवेदांतप्रकरणे टीका[illegible]समाप्तमिदंसटीकं॥ ॥सम्वत् १९०९ सालमितिआषाढशुदि ३ रोज १ शुभं॥

॥राम:॥

रहस्यमात्रसारोचेतीस्तैफेनककहारेनरसोनापिचर्मोमधुकरलेधोस्नुरामेमसि २ कुतांतस्पदूतीज
राकर्तमूर्तेसमागतावक्षीनिल्कोका: प्र. स्वध्येपरस्त्रीपद्मपाचिंतात्मज स्वंमनध्येरमा नाथपा
दारविंद २ [illegible]:

दृष्टिंस्थिरकरीसदाहठधरीत्यागेंद्विषैकोव्यसन् अंतःकरणभुञ्जभैजवरहोस्आ
फैआउलामगन्ः ब्रह्मादिसनकादिनारदसबैध्येन्यासतागर्दछन् योगाभ्यासव
ढौछमुक्तिकहियोलिउन्नसत्संगिले १

ट

४१५८.

गीतासारभाषासंपूर्ण

श्री ५ को सरकार

श्री रामनाथलिखितेन

श्रीगणेशायनमः॥ ॥अथन्यासः॥ उक्तेतिः॥ अंगुष्टकनिष्ठिकादिः अंगुलालेगरि॥ आत्मस्व
रुपिभगवानलाई॥ पृथिव्यात्मकचन्दनसमर्पणगर्नु॥ अंगुष्टारतर्जनीलेगरि आकाशा
त्मकपुष्पसमर्पणगर्नुनमस्कारगर्नु॥ उक्तेति॥ अघिकहिआयाको अंगुष्टमध्यमादि

ॐनमःशिवाय॥ ॐअंगुष्टकनिष्ठिकायालंपृथिव्यात्मकंगन्धंसमर्पयामि॥ अंगुष्ठ
तर्जन्योहंआकाशात्मकंपुष्पंसमर्पयामिनमः॥ उक्तन्यासेन॥ अंगुष्टतर्जन्याहंवाय्वा
त्मकंधूपंसमर्पयामिनमः॥ अर्थोंगुष्टमध्यमायाहंवाय्वात्मकंदीपंसमर्पयामिनमः

न्यासलेगरि॥ ईश्वरलाईवाय्वात्मकगुगाश्विधूपसमर्पणगरिनमस्कारगर्नु॥ उक्तेति॥
अघिकहिआयाको अंगुष्टमध्यमअंगुलिकान्यासलेगरि॥ वाय्वात्मकदीपसमर्पणगरी

नमस्कार गर्नु ॥ उक्तेति ॥ अधिकहि आयाको अंगुष्ठ अनामीकादि अंगुलिका न्यासले गरि ॥ अ
मृतस्वरूप भयाको अन्नादि नैवेद्य समर्पण गरि नमस्कार गर्नु ॥ इति मानसी पूजा ॥ श्री आत्म
स्वरूपी श्री ईश्वरको गरि ॥ ॐ नमो भगवते वासुदेवाय ॥ यो मंत्रले नमस्कार गर्नु ॥ ॐ नमो नाराय

पं समर्पयामि नमः ॥ उक्तन्यासेन ॥ अंगुष्ठ अनामिकाग्राहं ॥ अमृतात्मकं नैवेद्यं स
मर्पयामि नमः ॥ ॐ नमो भगवते वासुदेवाय ॥ ॐ नमो नारायणेति मंत्रः ॥ गाय
त्री छन्दः गीतासारो ग्रंथः ॥ ब्रह्माविष्णुरुद्र ऋषयः अग्निवायुसूर्यो देवता ॥

णाय ॥ यो आहाँ मन्त्र छ ॥ छन्द गायत्री गीतासार ग्रंथः ॥ तस्का ऋषि ब्रह्माविष्णुरुद्र ऊन ॥
अग्नि वायु सूर्य हरु देवता छन् ॥ दक्षिणाग्नि गार्हपत्य अग्नि आहवनीय अग्नि तारक्ष

कछन्॥ नीलोपहेलोसेतोवर्णभयाका छन्॥ अकारताबीज उँकारनाशक्ति॥ मकारनाकीलककहिंछ
श्रीपरमात्माहरिप्रीतिकानिमित्त गीतासार पाठको विनियोग गर्छु॥ श्रीगीताबडोग्रंथ देषिपनि
दक्षिणाग्नि गार्हपत्याग्नि आहवनीयाग्नि रक्षकः॥ नीलपीतश्वेतवर्णा अकारबीजं उँकारश
क्तिः॥ मकारकीलकं॥ ॐ नमोपरमात्मने हरिप्रीत्यर्थे गीतासारपाठे विनियोगः॥ अर्जुन उ
वाच॥ उँकारस्यमहात्मानंरूपस्थानं परंतपः॥ तत्सर्वं श्रोतुमिच्छामि ब्रूहि मे पुरुषोत्तम
॥१॥ श्रीभगवानुवाच॥ साधु पार्थ महाबाहो यन्मां त्वं परिपृच्छसि॥ विस्तरेण प्रवक्ष्या
मि तन्मे निगदतः शृणुः ॥२॥
सारजानाको इछा गषि अर्जुन श्रीकृष्णहछुर्विंति गर्छन्॥ उँकारेति॥ हे कृष्ण आज्ञा गर्छन्॥१
हे पार्थ हे महाबाहु॥ जो नवाततिमि सोध्छौ सो बढिया हो॥ सो बातना विस्तार लेकहंछु एकचि
त्तभैसुन॥ २॥ छ॥

श्री ५ को सरकार

पहिले ॐकारको महात्म कहंछन ॥ पृथिवि ॥ अग्नि ॥ ऋग्वेद ॥ भूर्व्याहृति ब्रह्मा ई सबै अकारमा
लय भयाका छन ॥ यो प्रणवको प्रथम अंश कहाउंछन ॥ २ ॥ अन्तरिक्ष आकाश यजुर्वेदः भुवः
व्याहृति ॥ अनादि जो विष्णु ती उंकारमा लय भै रह्याका छन ॥ यो प्रणवको द्वितीय अंश कहिं

पृथिव्यग्निश्च ऋग्वेदो भूरित्येव पितामह ॥ अकारे तु लये प्राप्ते प्रथमे प्रणवांशके ॥ ३ ॥
अन्तरिक्षे यजुर्वेदो भुवो विष्णुः सनातनः ॥ उंकारे तु लये प्राप्ते द्वितीये प्रणवांशके ॥ ४ ॥
दिवि सूर्यः सामवेदः स्वरित्येव महेश्वरः ॥ मकारे तु लयं प्राप्ते तृतीये प्रणवांशके ॥ ५ ॥

छ ॥ ४ ॥ दिवि आकाश श्री सूर्य शामवेद ॥ स्वः व्याहृति महेश्वर एति मकारमा लय भै रह्या
का छन ॥ यो तृतीय प्रणवको अंश हो भनि जान ॥ ५ ॥ छ ॥ छ ॥

अकाररजोगुणहोपहेलोवर्णभयाकोउकारसत्वगुणीछसेतोवर्णछभनिजानु ॥ मकारकोता
तमोगुणहोकालोवर्णलेयुक्तभयाकोछ ॥ ६ ॥ अकारउकारमकारईतीनएकैस्वरूपभैज्यो

म
अकारोपीनवर्णश्चरजोगुणसमुद्भवः ॥ उकारःसात्विःशुक्लोमँकारःकृष्णनामस ॥ ६ ॥
अकारश्चउकारश्चमकारश्चधनंजयः ॥ इदमेकंसमुत्पन्नंमोमितिज्योतिरूपकम् ॥ ७ ॥
त्रिविधोतिष्ठनेशब्दंसशब्दंकथयाम्यह ॥ अकारोब्रह्मणोनाभिउकारोविष्णुवोहृदिं
॥ ८ ॥

तिस्वरूपॐयोउत्पन्नभयाकोहोभनिहेधनंजयपतिमिनिश्चयलेगरिजान ॥ ७ ॥ तिनप्रका
रलेगरि ॥ ॐकारकोशब्दउच्चारणहुंछत्योशब्दजाहादेषिउच्चारणमैएकहुंछसोसुन ॥ ॐ
अकारनाब्रह्मास्वरूपभयाकोनाभिमारहंछ ॥ उकारनाविष्णुस्वरूपभयाकोहृदयमारहं

मकारतारुद्रस्वरूपभयाकोछदेमूर्द्धस्थानमैरह्याकोछ॥विन्दुताशक्तिरूपभन्ईचारले
युक्तभयाकोएकॐकारशब्रह्महोभनिजान्नु॥इचारलेयुक्तभयाकोएकॐकारज्योतिरूपक
हिंछ॥ ८ ॥आठअगचारपाउतीनस्थानपाचदेवतामयॐकारजोजान्दैनब्राह्मणको

मकारोमूर्द्धिकंरुद्रोशक्तिरूपंचतुर्विधं॥ईदमेकंसमुत्पन्नंॐमितिज्योतिरूपकं॥ ९ ॥
अष्टांगंचचतुष्पादंत्रिस्थानंपंचदेवतं॥ॐकारंयोनजानातिब्राह्मणोनसब्राह्मणः॥१०
त्रिस्थानंचत्रिमात्रंचअहंमत्रंनिरक्षरं॥त्रिमात्राचार्द्धमात्रेणप्रणवंनिर्विशिष्यते॥११

योनिमैजन्म्यानापनित्योब्राह्मणहोईनभनिजान्नु॥ १०॥तीनैस्यातीनैमात्रातीनैःदुःख
कोनाशगर्न्यातीनैअक्षरलेयुक्तःतीनमात्रादेषिनपरअर्द्धमात्रालेयुक्तभयाकाप्रणवक

संपूर्णजतिमंत्र छन्न्कोउत्पत्तिस्थानस्थाभयाकोजोवीजमंत्र छन्न्कोपनिवीजभयाकोयो
महाविजजोॐकारअव्ययनाशनउत्पाएरुकनब्रह्मरंध्रमारस्याकिशक्तिलेसंगजोउच्चारं
रणर्छसोउत्तमपदपाउंछ ॥ १२ ॥ ॐकारदेखिचारवेदउत्पन्नभयाका छन्‌ ॐकारैदेखिस

योनिविजंमहावीजंतद्वीजंवीजमव्ययं ॥ उच्चारंतिपराशक्तीब्रह्मरंध्रनिवासिनी ॥ १२ ॥ ॐका
रात्प्रभवावेदा ॐकारात्प्रभवाःस्वराः ॥ ॐकारात्प्रभवंसर्वंत्रैलोक्यंसचराचरम् ॥ १३ ॥ ॐका
रस्यचयोत्पत्तिंब्रह्मणायोनजानाति ॥ अशक्तिस्तस्यविज्ञेयाब्राह्मणायोनजानाति ॥ १४ ॥

प्रस्वरभयाका छन्‌ ॐकारदेखिंचरास्वरसवभयाको छ त्रैलोक्यपनिभयाको छ ॥ १३ ॥ ॐका
रकोस्थानजोब्राह्मणाजांदैनसोनाशक्तिहिनभयाकोहोभनिजान्नुशास्त्रब्रह्मलेहीनभया छ ॥ १४ ॥

ॐयोएकाक्षररूपभयाकोसर्वांगमाव्यापितभैरह्याकोजोएस्तोपरमेश्वरलाईहृदयरूपिक
मलमाध्यानराषिनेहिॐकारकोवारंवारअभ्यासगर्नुभन्निजान्याभंछुन॥१५॥धैर्यरूप
अग्निवनाउनुमनरूपीपशुमार्न्यामौलोवनाउनुसंतोषरूपीदाउरावनाउनु॥इंद्रियरू

ॐमित्येकाक्षरंरूपंसर्वांगंपरमेश्वरं॥हृदिपद्मंस्थितेज्ञात्वातस्मातदभ्यसेत्सुधीः१५
धृतिरग्निमनोयूपंसंतोषसमिधस्मृतं॥इंद्रियाणिपशुंकृत्वास्वात्माशुद्धंप्रपश्यति॥१६
आत्मानमरणिंकृत्वाप्रणवंचोत्तरारणी॥ध्याननिर्मथनाभ्यासादेवंपश्यतिगूढवत्॥१

पीपशुलाईमौलामाकाटनसैआगामाहोमगरिदिनुरःशुद्धभयाकोस्वात्मादेषिंछयोआ
त्मयज्ञकाहिंछ॥१६॥आत्मालाईनामथानिवनाउनुत्योमथानिअथ्याउन्याप्रणववनाउ
नु॥ध्यानरूपीनेतिलगाईमनरूपीरहिलाईमथुर॥गूढभैरह्याकोननीजहिआत्मप्रका

गी० ॥ १२ ॥ श्री ॥

ह्रस्वउच्चारणगर्‍यापापनाशऊंछदीर्घउच्चारणालेमोक्षऊंछमध्यमस्वरलेउच्चारणगर्दा
फेरिपापलेछुनसक्तैनतीनप्रकारकोप्रणवकोउच्चारणकाहिंछ॥१८॥तेलकाधारजाहिन
छिन्न्यानिरंतरभयाकोफेरिवडोघण्टकारन्काजस्तोभयाको॥एस्ताप्रणवकोअग्रजान्न्या

ह्रस्वोदहतिपापानिदीर्घोमोक्षप्रदायक॥अपापंसर्वतोवापित्रिविधोच्चारणोननु॥१८॥
तैलाधारामिवाछिन्नंदीर्घघंटानिनादवत्॥अवाच्यंप्रणवस्याग्रंयस्तंवेदसवेदवित्॥१९॥
प्राणायामंपरंब्रह्माप्राणायामंपरंशिवः॥प्राणायामपरंविष्णुःपरब्रह्मस्वरूपकम॥२०॥

भन्यावेदज्ञांन्यातसैल्लाईभन्नुआत्मजान्यापनितसैल्लाईभनिंछ॥ १९ ॥प्राणायामजो
होसोब्रह्माऊनप्राणायामैविष्णुस्वरूपऊनप्राणायामैजोहोसोपरंब्रह्मस्वरूपहो॥२०॥

ब्रह्माकोस्वरूपतापूरककहाउंछकुंभकजोहोसोताविष्णुस्वरूपकहाउंछरेचकताक्षरअक्ष
रभंद्दापनिपररत्याकाकेवलशिवस्वरूपहुन॥२१॥वाहृलेगरिपूरकहुंछसोहृलेगरिकुंभक
हुंछरेचकनादशॐकारगर्नुसबैअठतिसॐकारलेगरिएकप्राणायामकहाउंछयोयौंसा

ब्रह्माचपूरकंज्ञेयंकुंभकोविष्णुरुच्यते॥रेचकतुंतथाज्ञेयंक्षराक्षरपरंशिवम्॥२१॥पूर
कोद्वादशीचैवकुंभकोषोडशाभवेत्॥रेचकोदशॐकार्प्राणायामःसउच्यते॥२२॥प्रा
णंकोनिष्ठिकानष्टंदक्षिणंप्राणपूरकम्॥स्वासोह्रंनयनंकर्णाजिह्वादंतानरागतः॥२३॥

जी१
मान्यहो॥२४॥प्राणवायुलाईवामनाककाछिडमाकांछिअंगुलीलेंछेकनुदक्षिणनाकका द्वा
रप्राणवायुलाईपूर्नेगनुस्वासलाईउंभोलैगिडुवेलाँनकाबीचमाजिह्लालाइराषनुरकहिआ
याकोक्रमलेप्राणायामहुंछ॥ २३ ॥ छ ॥ छ ॥ छ ॥ छ ॥

नीलकमलकादलवरोवर स्याममूर्त्तिभया ॥ वारवाऊलेयुक्त भयाका नाभिमण्डलमा रह्याका विष्णुको ध्यान कुंभक जो प्राणायाम का समयमा ध्यान गर्नु ॥ २४ ॥ कुभकका समयमा तारातो वर्ण भयाका कलेका वीचवस्याका ब्रह्माकन हृदयकमलमा ध्यान गर्नु ॥ २५ ॥ रेचकका समयमा शुद्धजो

नीलोत्पलदलश्यामं नाभिमध्यप्रतिष्ठितं ॥ वर्तुर्भुजं महात्मानं पूरकेनविचित्रयेत् ॥ २४ ॥
ब्रह्माणं रक्तसौभाग्यं रक्षेरक्षपितामह ॥ पूरके हृदयतिछं ध्यानेन कमलासनं ॥ २५ ॥
रेचके ईश्वरं विद्याल्ललाटस्थं महेश्वरं ॥ शुद्धस्फटिकसंकाशं निर्मलं पापनाशनं ॥ २६ ॥
अक्षराणां च मात्राणां सर्वे विंदुसमाश्रिताः ॥ विंदुर्भिद्यति नादेन स नादः केन भिद्यते ॥ २७ ॥

निर्मलस्फटिककाजस्तो श्वेतकांति भयाका संपूर्ण पापको नाश गर्न्या भयाका एस्ता महेश्वरलाई ललाटमा छु भनि ध्यान गर्नु ॥ २६ ॥ अर्जुन विंति गर्छन् ॥ अक्षरहरुमा मात्राहरुतां सपूर्ण विदुमा आश्रय भैरह्याका छन् त्यो विंदु नादले गरि भेद भैजांछ सो नाद क्याले भेद हुंछ भनी निर्वित गर्दा भया ॥ श्रीकृष्ण आग्या गर्छन् ॥ २७ ॥

ॐकारको जो ध्वनि त सरेषिड्ब्याको जो नाद त्यो नादलाई वायुले हिड्नाले गरि फेरि मुख र नाक
काबिचमा वायुको संचारले पनि नाद हराउं छ ॥ २८ ॥ सोहि संचारको प्रकार कहं छ न् ईडा नाडि
मा चन्द्र रह्याको पीगला नाडीना सूर्य वहाउं छ उवैकाबीचको नाडि सुषुम्णा कहाउं छ तस्मा

ॐकारध्वनिनादेन वायुसहरणान्तिकम् ॥ मुखनासिकयोर्मध्ये वायुः संचरणेन च ॥ २८ ॥
ईडानाडीस्थितं चड्रं पिंगला भानुवाहिनि ॥ सूक्ष्मेण संभूरूपेण मनुहंसस्वरूपकम् ॥ २९ ॥
हंकारे निर्गम प्रोक्तो सकारे तं प्रवेशनं ॥ हंकारेणं शंभूरूपेण सकार शक्तिरूच्यते ॥ ३० ॥

सूक्ष्मरूपले गरि शंभु रह्याका छन् सोहि हंसस्वरूप कहाउं छन् ॥ २९ ॥ हंकारमा प्राणवायु निस्कं
छ सकारमा वायु भित्र प्रवेश गर्छन् तस्मा हंकार जो हो सो शिवरूप हो सकार जो हो शो शक्ति
रूप कहीं छ तसै निमित्त यो जगत् शिवशक्त्याक कहाउं छ ॥ ३० ॥ छ ॥ छ ॥

॥गी:॥
॥७॥

प्रकटैलेगरिवायुकोचलनुनामुखदेषिदेषिंछ ॥ ईडानाडी१पिंगलानाडी२सूक्ष्मनाडीसुषु
म्णातेहिकहाउँछ३ ॥ ३१ ॥ वामनाडीवहायेरशक्तिरूपभैचन्द्ररह्याकोछ दक्षिणनाडीवहा
येरशंभुरूपभैदिवाकररह्याछन् ॥ ३२ ॥ अतिनिर्मलभयाकोसमुद्रकाजस्तोगंभीरकोहि

प्रकटंवायुसंचारोलक्षतेमुखमध्यतः ॥ ईडाचपिंगलानाडीसूक्ष्मनाडीतृतीयकम् ॥ ३१ ॥
शक्तिरूपास्थितंचन्द्रवाम्मनाडीप्रवाहकम् ॥ दक्षनाडीप्रवाहश्चशंभूरूपिदिवाकरः ॥ ३२ ॥
६ निर्मलंचसमुद्रस्ययचनादोयंगतः ॥ निरालंबपदप्राप्तंचित्तेनलयतांगते ॥ ३३ ॥
निवर्त्तेतेक्रियासर्वेतास्मिन्दृष्टेपरावरे ॥ ॐमितेकाक्षरंरूपंपरब्रह्मप्रकीर्त्तितं ॥ ३४ ॥

सूक्ष्मनाडीछजाहानादपनिलयहोईजांछएस्तोनिरालंबभयाकोपदमापाएचित्तपनिताहि
लयहोईजांछजवचित्तलयभयोतवतासपूर्णमनुष्यकोकर्त्तव्यतानिवृत्तिहोईजांछकाहि
लेभन्यापरमभेदापनिपरमभयाकाईश्वरलाईदेष्यापछि ॥ ३३ ॥ ॐयोएकाक्षररूपभया
कोजोयोहोसोहिपरंब्रह्मरूपहोभनिजान्नु ॥ ३४ ॥ ❀ ॥ ❀ ॥ ❀ ॥

॥राम:॥
॥७॥

नादकाविचरेषिउत्पन्नभयाकोमध्यमजोसुस्मणानाडीलेसंगभयाकोएस्तोजोॐकारशोता
तालुशिरकावीचमारहंछसोजांनुताअतिदुर्लभछभनिकह्याकोछ॥३५॥एसैसुषुम्णाकन
जान्नाकानिमित्तउंभोतिरप्राणवायुकनअतियत्नलेनिरोधगर्नालेमध्यनाडीवहंछरत्यो

नादांतरसमुत्पन्नंमध्यमंशून्यप्रवाहकं॥ॐविद्धिपरमानंदंतालुमूर्द्धव्यवस्थितं॥३५॥
अनडुर्ध्वनिरोधेनमध्यकंमध्यवाहकम्॥यद्दिव्यमतिश्रेष्ठस्यसंसारमरणांत्यजेत्॥३६॥
अनहदस्यशब्दस्यतस्यशब्दस्ययोध्वनिः॥ध्वनिरन्तर्गतोज्योतिरंतर्गतंरविः ॥३७॥
र्ज्योति

परमानंदजोस्वरूपनामभयाकोअतिदिव्यपदपाईयोभन्यासंसारमावारंवारजन्मनुमर्नुछुट्द
रछभनिकहिआयाकोछ॥३६॥एतिजान्यापछि॥अनहतपनिजानिंछ॥अनहदभयाकोअक
स्मात्अन्तःकरणमासुनिंछतसैकोजोध्वनित्योध्वनिकाविचमाज्योतिकोत्योज्योतिकाविचमा
श्रीसूर्यरत्याकाछनभनिभंछन॥३७॥

नीसूर्यकाबीचमास्थानसिंहासनछत्योसिंहासनकाबीचमामनरह्याकोछत्योमनकाविचमा
मनैलीनभयाकोजोहोसोपरमपदविष्णुकाहोछत्योपदजस्लेजान्याकोछसोब्राह्मणवेदजां
न्याकहाउंछतस्लेजान्यापदजानिसकोभनिजानहेअर्जुनभनिभगवान्आज्ञागर्छन ॥ ३८

रविंदंतर्गतस्थानंस्थानरन्तर्गतंमनः ॥ तन्मनोविलयंयांतितद्विष्णोपरमंपदं ॥ ३८
आदिभूतंमध्यभूतंअंत्यभूतंनिरामयं ॥ त्रिभूतंयोभिजानातिसर्वबन्धैःप्रमुच्यते ॥ ३९

आदिपनिमनैमात्रपियायोशरिरता आदिपनिभुन्याथियोकेवलमनैकोविलासहुनाले
योशरिरबन्याकोछमध्यमापनियोभुंन्येछ ॥ शरिरछभंन्यानामनैहोअंत्यमापनिजलिब
लिघरानिभेजान्याहुनालेअंत्यमापनिभूत्यरहन्याछ ॥ मननमात्रबाहिकेरहन्याछतिनैअव
स्थामाभूत्यभयाकोयोशरिरकनभूत्यभावलेजोजांदछसोतासंपूर्णाबन्धनदोषमुक्तहुं

एतिकहि आयाको शून्यभाव जो छ सो आत्मकलाँउ छ नेहि शून्यभाव जान्यो भन्या पुन्यपाप दु
वैकोले पतेश्लाई छुंदैन स्वशून्यस्वरूपको भावना जवना यो शरीरमा ऊं छ सो शून्य ऊ जो हो
सो हि परमपदकाहिं छ ॥४०॥ नहि पद जो हो सो ध्यानकाहिं छ सो हि ध्यान जो हो सो परहो भ

शून्यभावो भवेदात्मा पुण्यपापैर्न लिप्यते ॥ सशून्याभमिदं भाति शून्यं नाम परं पदं ॥४०॥
तत्पदं परमं ध्यानं तद्ध्यानं ब्रह्म उच्यते ॥ नाभिमूलेस्थितं पद्मनालं तस्य दशांगुलं ॥ ४१ ॥
कोमलं तस्य तन्नालं निर्मलं च अधोमुखम ॥ कदलिपुष्पसंकाशं चन्द्रकान्तिसुशीतलं·

निजानु ॥ नाभिका मूलमा एककोहि कमल छ तस्को नाल दश अंगुल परिनाम भयाको छ ॥
॥४१॥ अति कोमल त्यो नाल छ अति निर्मल भैकन उंधोमुख भैरह्याको छ केराका फलका
जस्तो आकार भयाको चन्द्रकाँदि मानि बरोबर शीतल छ ॥४२॥ छ ॥ छ ॥

८४

कोवर्णा३

लामालामा यानन्दले युक्त भयाको हंसचारुसुनिर्मल भयाको न्यो कमल नित्य आनन्दमय भयाको
नसैकना विष्णुपदकहिं छ॥४३॥ हृदयमा पनि कमल छ न्यो कमल आठ पत्रले युक्त छ तस्का पान
पनि अति सुंदर केशरले युक्त भयाको सुवर्ण भयाको छ तस्कामा झमा अंगुष्ठमात्र प्रमान
भयाको पुराण पुरुष छन भनि देषन्या मुनिहरु भन्छन् तिनै पुरुषलाई तिनै ध्यान गर्नु॥४४

विशालदलसंपूर्णं चारुहासं सुनिर्मलं॥ नित्यानन्दमयं स्थानं नाद्विष्णो परमं पदं॥४३॥ हृदि
स्थितं पंकजमष्टपत्रं सकर्णिकं केशरपत्रनालं॥ अंगुष्ठमात्रं मुनयो वदंति ध्यायेनाद्विष्णुं
पुरुषं पुराणं॥४४॥ गमागमस्थं गमनादिशून्यं चिदिपदीपं तिमिरंधकारं॥ पश्यंति ते स
र्वजनांतरस्थं नमामि हंसं परमात्मरूपं॥४५॥

फेरि कस्ता छन् भन्या आउन्या जान्यामा रह्याको गमनादि क्रियाले शून्य भयाको चीन जो जीवा
तस्का दिया भयाका तिन प्रकारको अंधकार नाश गर्न्या रस्ता पुरुषलाई जो ना संपूर्ण जन
मा रह्याको देषदछन् ती हंसरुप भयाका परमत्पकन प्रणाम गर्छु भनि कृष्णजी भंछन्॥४५

देहतादेवालयपवनाउँजुजिवतासदाशिवहुन्॥अज्ञानरूपीदेवलकोनिमाल्यफेकिसोहंभन्याभा
वनालेपूजागर्नु॥४६॥एतिवातसुनिअर्जुनफेरिविंतिगर्छन्॥हेश्रीकृँजीतिमिलेजोकह्योसो
तावडाकठिनलेपनिनजानिसक्नुछउःखलेपनिआराधनानगरिसक्नुछतगौउगर्म्यभया

देहोदेवालयःप्रोक्तोजीवोदेहःसदाशिवः॥त्यजेदज्ञाननिर्माल्यंसोहंभावेनपूजयेत्॥४६॥
अर्जुनउवाच॥उर्विज्ञेयदुराराध्यंउःप्राप्यंजनार्दनं॥अधोमुखंयदाभूतंहृदयंकेनगछति॥४७॥
श्रीभगवानुवाच॥ईडयावायुमारोप्यपूरितोदरसंस्थिति॥ततोग्निदेहमध्यस्थंध्यायेज्वा
लावलीयतम॥ ४८ ॥

कोछकिनभन्याउँधोमुखभयाकाहृदयकमलमाकसोगरिप्रवेशगर्नुयोतावहुनैकठिनछ
भनिविंतिगर्याकोसुनिभगवान्आज्ञागर्छन्॥४७॥ईनाडीलेगरिप्राणवायुलाईउँभोलैजाजरपे
टमापूर्णगर्नुरनाहादेषिन्देहमारह्याकाअग्निलाईमैज्वालाकामालालेयुक्तभयाकोध्या
नगर्नु॥४८॥छ॥

फेरिविधियुक्तलेरेचकगर्नुरवायुकामंडलमारह्याकाईश्वरलाईचित्तलेध्यानगर्नुफेरिपिंगलानाडि
लेवायुपूर्णगर्दामाउंधोमुखभयाकोवतीसकेशरलेयुक्तभयाकोकमलऊर्द्धछ॥४९॥उंधोमु
खभयाकोहृदयकमललाईप्रणवलेउठायेरतेहिकमलकाभीत्रपसेरप्रस्फुल्लितगरायेरदे

रेचकंविधिसंयुक्तंवायुमण्डलमध्यगम्॥धारयेद्धृदिचित्तेषु अन्तःपिंगलयापुनः॥४९॥
ततःपिंगलयापूर्यप्राणंदक्षिणयेयदि॥अधोमुखंतुहृत्पद्मद्वात्रिंशकेशरान्वितम्॥५०॥
अधोमुखंतुहृत्पद्मंसुऊत्पप्रणवेनतु॥गत्वातुपद्मकोशान्तेविकाशेव्याधिनाशनं॥५१॥

हमारह्याकोव्याधिसंपूर्णनाशऊंछ॥५०॥तांहांउप्रान्तन्याकमलनाशंपूर्णशरिरलाईसुखदि
न्याऊंछन्याकमलआठपत्रलेयुक्तभयाकोवतिसकेशरलेयुक्तभयाकोछभनिजांनु॥५१॥

तस्काविचमाइन्द्रादिदशदिग्पालकोध्यानगर्न ॥ तीनैकावीचमासूर्यरह्याकाछन्तिनैकामा
माचन्द्ररह्याछन्काछन् ॥ ५२ ॥ चन्द्रमाकावीचमाअग्निरह्याछन् अग्निकावीचमाकान्तिछ
त्योकान्तिकावीचमाअनेकरत्नलेषजितभयाकोसिंहासनछ ॥ ५३ ॥ अनेकनानानरहका

ततःपश्चाद्भवेत्पद्मंसर्वगात्रसुखप्रदं ॥ अष्टपत्रंतुहृत्पद्मंद्वात्रिंशत्केशरान्वितम् ॥ ५२
तस्यमध्यस्थितंध्यायेईन्द्राद्यादशदेवता ॥ तस्यमध्यस्थितोभानुर्भानुमध्यगतःशशी ॥ ५३
शशीमध्यगतोवह्निर्वह्निमध्यगतप्रभाः ॥ प्रभामध्यगतंपीठंनानारत्नप्रवेष्टितम् ॥ ५४ ॥

रत्नमापनिश्रेष्ठभयाकारत्नलेगरिशोभायमानछं ॥ कस्ताबल्दाअग्निजस्तातसैमाफमादेवताका
पनिदेवताभयाकामनस्वरूपीनारायणरह्याछन्तिनैकोध्यानगर्नु ॥ ५४ ॥ छ

श्रीवत्सकौस्तुभमणिलेगरिसोभाभयाकावक्षस्थललेयुक्तभयाकाकमलकाफुलकापातजस्तानेत्रलेशोभाभयाकाकेहुनाशनहुन्याकेयूरकटनिहारकुण्डललेसोभाभयाका ॥ ५५ ॥ हज्जारफणाभयाकाशेषनागकाफणालेशिरमाशोभितभयाकासबकामाऊमाबस्याका

अनेकरत्नसंकीर्णज्वलनार्कसमप्रभम् ॥ तस्यमध्यस्थितंदेवंनारायणमनामयम् ॥ ५५ ॥
श्रीवत्सकौस्तुभोरस्कंपींयीकाक्षम्रवुतम् ॥ केयूरकटिसूत्रंचहारकुण्डलशोभितम् ॥ ५६ ॥
सहस्त्रफणासंयुक्तंमध्यदेवंस्थितंहरेत ॥ शंखचक्रगदापद्मंमुशलंखड्गमेवच ॥ ५७

देवताकापनिदेवताभयाकाविष्णुकोध्यानगर्नु ॥ शंखचक्रगदापद्ममुशलखड्ग ॥ ५६ ॥ धनुधनुनाराचलियाकाआठबाऊलेयुक्तभयाकानानापकैकोनाशगर्न्याहरिकोध्यानगर्नु

शुद्धनिर्मलस्फटिककाजस्ताकांतिभयाकाचन्द्रकान्तमणिजस्तोप्रभावभयाका॥५८॥कमल-
काकेशरजस्तापीतवस्त्रपहिऱ्याकाफेरिपोल्याकासुनकाजस्ताकान्तिभयाकाकोटिसूर्यव

धनुश्चैवतुनाराचंअष्टवाहूंधरंहरिं॥शुद्धस्फटिकसंकासंचन्द्रकांतमणिप्रभम्॥५८ ॥
पद्मकिंजल्कसदृशंतप्तकांचनसंनिभम्॥सूर्यकोटिप्रतिकाशंचंद्रकोटिसुसीतलं॥५९ ॥
पादादधस्तलंविंद्यापादोर्ध्वेवितलंभवेत्॥सुतलंजंघदेशेतुजानुदेशेतथातल॥ ६० ॥

रोवर्तेजभयाकाकोटिचन्द्रमाकावरोवरशीतलभयाकाछ॥५९॥फेरिपैतालामाताजस्को
तललोकरह्याकोछताहादेषिउभोतावितललोकरह्याकोछसुतललोकताजंघदेशमा
रह्याकोछजानुदेशमाताअतललोकछ॥६० छ ॥

महातललोकताजस्काउरूदेशमारह्याकोछ गुल्फदेशमारसातलछ ॥ पाताललोकताजस्का
कटिदेशमारह्याकाछ ॥ एस्तातरहलेसातलोकरह्याछन्भनिभंछन् ॥ ६१ ॥ भूर्लोकताज
स्कानाभिस्थानमाछ भुवर्ल्लोकताजस्काकोषमारह्याकोछ ॥ हृदयमाताजस्कास्वर्गलो

महातलंतउरूपांगुल्फदेशेरसातलं ॥ पातालंकटिदेशेतुसप्तमंपरिकीर्त्तितम् ॥ ६१ ॥
भूर्लोकंनाभिमध्यस्थंभुवर्लोकंतुकुक्षिगं ॥ हृदिस्थंस्वर्गलोकंस्तुमहर्लोकंतुवक्षसि ॥ ६२
जनलोकंतुकंठेचअतऊर्द्धंतपस्तथा ॥ सत्यलोकंतालुरंध्रेभुवनानिचतुर्दश ॥ ६३ ॥

करह्याकोछमहलोकताजस्काछातिमारह्याकोछ ॥ ६२ ॥ जनलोकताजस्काकंठदेशमारह्या
कोछ आहादेषिउभोजस्कातपलोकरह्याछसत्यलोकताजस्कातालुकाछिद्रमारह्याकोछ
एस्तातरहलेएकैईश्वरमाचौधलोकरह्याकोछभनिजान ॥ ६३ ॥ ७ ॥

भूर्भुवस्व भन्याका व्याहृति मंत्रले गरि शरीरको शोधन गर्नु र यो शरीरलाई प्रणवमय छ भनि
ध्यान गर्नु र विजुलिका जस्ता तेज भयाका छ भनि सम्झनु ॥ ६४ ॥ तसै शरीरको विचमा ईश्व
र एकाक्षर मंत्रमय भयाका छन् भनि ध्यान गर्नु त्यो मंत्र पनि ॐकार अक्षरै रूप भयाको हृ

भूर्भुवस्वरिति मंत्रै शरिरं परिसोधयन् ॥ शरीरं प्रणवं ध्यायेन्विद्युत्सौदामिनीयथा ॥ ६४ ॥
तस्यमध्यगतं देवं मंत्रमेकाक्षरं परं ॥ ॐमित्येकाक्षरं रूपं हृत्प मंत्रविशेशाभिनम् ॥ ६५ ॥
अंगुष्ठमात्रमेरूपं ध्यायेदोंकासमीश्वरम् ॥ कृतेश्वेत हरिविद्यात्रेतायारक्तवर्णकम् ॥ ६६

दयरूपी कमलमा रहि ॥ अति सोभायमान गरि रह्याका छँ भनि जान्नु ॥ ६५ ॥ अंगुष्ठ प्रमानमा
त्र भयाको ॐकारै रूपी ईश्वर भयाको मेरो ध्यान ता केवल हृदयैमा गर्नु हे धनंजय भनि श्री
कृष्णआज्ञा गर्छन् ॥ सत्ययुगमा ता श्वेतवर्णाभर्णा भयाका हरिको ध्यान गर्नु त्रेतायुगमा
तारावर्णभयाका ॥ ६६ ॥ ४ ॥

गी॰

द्वापरयुगमानापहेलोवर्णभयाकाहरिकलियुगमानाकृष्णवर्णभयाकाहरिछंभनिध्यानगर्नुहु
लाभन्यावौधलोकजस्ताशरीरमारह्याकाछुन्॥सानामाभन्याअंगुष्ठप्रमानभयाकाछुनपुं
तुनाईश्वरनानिराकारनिर्विकारछुनिरंजनपनितीनैलाईभन्नु॥ ६६॥केलैपनिएस्ताछनेभनि

द्वापरेपीतवर्णश्चनीलवर्णंकलौयुगे॥स्थूलसूक्ष्मनिराकारंनिर्विकारंनिरंजनं॥ ६७ ॥
अप्रमेयप्रभंविष्णुंतंविन्द्यात्पुरुषोत्तमम्॥तैलाग्निवर्तिसंयोगान्निर्धूमंज्योतिरूपकं॥ ६८॥
नाद्यंपरमंरूपंस्मरेत्पार्थअनन्यभाक्॥कारणंयोगविज्ञानंहेतुसाधनवर्जितम्॥ ६९ ॥

नसकिन्याप्रभावभयाकाछुन्तिनैविष्णुकनपुरुषोत्तमभनिजान्नु॰तेलअग्निबातिकासंयोगमा
जस्तैधूमननभयाकोज्योतिजस्तोस्वरूपभयाकोदेषिछ॥ ६८॥नस्तैतनकनजान्नामाकेवलयोग
देषिंदोस्तोकेहिपनिछैनयोगलेमात्रदेषन्याअनेकअरुहेतुलेनदेषिन्याभयाका॥ ६९ ॥

तस्ताईश्वरकनहेपार्थपरमश्रेष्ठभयाकाकनअर्कानीरचिन्ननदीकनभजनगरातिकस्ताभ
न्याषट्भावलेरहितभयाकाशिवकल्याणरूपभयाकाकनजान्यातेहिहोदोस्तोकेहिछैन
भनिजान॥मात्रालेपनिशब्दलेपनिरहितभयाकास्वरव्यंजनलेवर्जितभयाकाकेवलआ

निष्प्रपंतंविजानीयान्षड्भावरहितंशिवम्॥अमात्रशब्दरहितंस्वरव्यंजनवर्जितं॥७०॥
अर्जुनउवा॥अदृश्येभावनानास्तिदृश्यमानोविनश्यति॥अवर्णाश्वस्वयंब्रह्मकथं
ध्यायंतियोगीन॥७१॥छ॥

नन्दमयरूपभयाकाशिवकल्याणरूपिभगवान्कोभजनागर॥७०॥एतिसुनिअर्जुनफे
रिविंतिगर्छन॥हेकृष्णनदेषियाकावस्तुमाभावनाचिन्नरहंदैननदेषियाकोभन्यानाश
होईजांछनसमर्थवर्णपनिनभयाकास्वरूपपनिनभयाकाब्रह्मकनजोगिहरूकसोगरि
ध्यानगर्छनभनिअर्जुनलेविंतिगर्दाभगवानआज्ञागर्छन॥ ७१ ॥ छ ॥

जाउ२

अंतःकरणमा पनि पूर्णरूपले रह्याका बाहिर पनि पूर्णरूपले रह्याका बीचमा पनि पूर्णरू
पले रह्याका संपूर्णमा पूर्णै पूर्णरूपले रह्याका छन् भनि ज्ञो हो सो हो समाधिको लक्षण

श्रीभगवानुवाच॥ अन्तःपूर्णवहिपूर्णोमध्यपूर्णसनातनम्॥ सर्वपूर्णोनिमान्येति
समाधिस्यललक्षणं॥ ७२॥ यथाविभुर्व्रमाकाशःसहसैवाभ्रमेण्डलेम॥ भू
त्वाप्रलीयतेनद्वदात्मनेवाखिलंजगत॥ ७३॥ छ॥

रि भा१

होभनिजान्नु॥ ७२॥ जसैस्वच्छनिर्मलभयाका आशमा मेघले ढाकद छ र अन्धकार
लेव्याप्तगर्छ मेघमय आकाश होईजांछ फेरितेहराया पछि आकाश पनि निर्मलरूं
छ तसै अज्ञानरूपी मेघको नाश गराउन रयो जन्मं पूर्ण आत्मामय होईजांछ॥ ७३॥

तस्तोध्यानकाहासम्मगर्नुभन्यायावत्कालसंममहाकाससमऊं[illegible]नताहासम्मध्यानगर्नु
जस्तैघडाफुटदामाघडाभित्ररह्याकोआकासआकासैमामिलिजांछरघडाकोआकासर
महाआकासकोभिन्नगर्नुकोहिसकदैन॥७४॥तस्तैयोप्रकृतदेहकोअभिमानकोनाशभ

यावत्पश्येतघटाकारंतावत्कालंविचिन्तयेत्॥भिन्नेकुंभेयथाकाशंमहाकाशेविलियते
ने·नै ॥७४॥नेप्राकृतेदेहेयथात्मापरमात्मनि॥तादृशंपरमात्मानंस्मरेत्पार्थमनंतकं॥७५॥
हृत्पद्मेकोर्डुद्रंसुवंमध्येपदीपशिखाकृतिं॥अंगुष्ठमात्रमचलंध्यायेदोंकारमीश्वरं॥७६

यापछिआत्माजोछसोपरमात्मामालीनहोईजांछनवनात्योमऊंभन्याभावनाहोईजां
छन्त्योभावनैरूपीअनन्तजोपरमात्माकनहेपार्थस्मरणगर्नु॥७५॥हृदयरूपीकमल
मारह्याकाऊंधोमुखभयाकादीपककोशिखाकोआकारभयाकाअंगुष्ठप्रमाणभयाका
निश्चलभयाकोएस्तोमेरोॐकारस्वरूपीईश्वरकनहेरिध्यानगर्नु॥ ७६ ॥ ८ ॥

त्योध्यानकैहृगर्छभन्याबस्तामाभयोबासुत्तामाभयोबाउठडामापनिहिड्दामापनि
सदाशुद्धचित्तभैसंपूर्णयत्नलेगरिकनयोगयुक्तहेअर्जुनतिमिहोईजाउस्मरणागर॥७
७॥अन्तकर्णमाकोसंगपनिबाहिरकोसंगपनिआत्मसंगपनिसंपूर्णसंगछोडिए

आसनेशयनेवापिनिष्ठन्गछन्सदाशुचि॥तस्मात्सर्वप्रयत्नेनयोगयुक्तोभवार्जुन
॥७७॥अंतःसंगंबहिसंगःआत्मसंगंपरित्यजेत॥सर्वसंगनिवृतात्मापश्येदात्मानमा
त्मनि॥७८॥देहनष्टेकुनोबुद्धिर्बुद्धीहीनेकुनःस्मृति॥स्मृतिहीनकुटोज्ञानंज्ञानहीनेकु

कैभयेरआत्मालेआत्मैलाईहेर्ने॥७८॥परंतुदेहकोनारक्षागर्छभछन्देहकानाशभयोभन्या
बुद्धिकाहादेषिहोलाबुद्धिनष्टभयोभन्यास्मरणकाहावानहोलास्मृतिकोनाशभयोभन्या
॥ज्ञानकाहादेषिनहोलाज्ञानैहिनभयोभन्यानस्कोउत्तमगनीकाहादेषिहोलातसनिमि
त्तदेहकोनासर्वप्रकारलेरक्षागर्छ॥७९॥३॥

नोगतिः॥७२॥

देहदेहमाव्यापिनभैयोदेहताअत्यन्तमलिनछ्देहीजोआत्माताअतिशुद्धछ्ईदुवैकोअन्तर
जान्याभयाकाज्ञानिपुरुषलेकस्कोशुद्धगर्नेकसैकोशुद्धगर्नेपर्दैनभनिजान्नु॥ ८०॥ नौछि

अत्यन्तमलिनंदेहदेहीचात्यन्तनिर्मलं॥ उभयोरंतरंज्ञात्वाकस्यशौचविधिंयते॥ ८० ॥
नवछिद्रयुतोदेहःस्त्रवन्तेघटिकाइव॥ वाह्यशौचेनशुद्ध्यन्तियावद्ब्रह्मनविन्दति॥ ८१

द्रलेयुक्तभयाकोजोछ्योदेहकस्तोभन्याघडियंत्रजहिंचुऊंछ्तसर्थवाहिरगयाकाशौ
चलेताशुद्धऊंदैन॥ किनऊंदैनभन्याजहासंमकेवलब्रह्मजान्दैनताहासम्मशुद्धताहु

रु॥८॥१॥

त्योब्रह्मकसोगरीदेषिंछभन्याजांन्याज्ञानिलेताजाहासम्मज्ञानभयाकोछैनताहापर्यंतशास्त्र
हीज्ञानजानुजवतावाउजत्यो व्यापकभयाको आत्मा रहेछ भन्याज्ञानजवभयो भन्यानि
शास्त्रहरुताकस्तादेषिंछुनत्से औषधिकोरसनिकाल्या पछिसिठिफकदछुनत्सेशास्त्र

ग्रंथमभ्येषयेधीमान्यावद्ज्ञानैर्नविंदति॥ ब्रह्मानिलमयंज्ञात्वाग्रंथंत्यजतिशेषवत्॥ ८२
पठंतुश्चतुरोवेदादाधर्मशास्त्रमनेकधा॥ आत्मानंयेनविंदंतिसर्वेतेपश्युवत्स्मृता॥ ८३ ॥
तीर्थेषुवस्तुयज्ञेषुकाष्ठपाषाणमृण्मये॥ प्रतिमासुचवह्नीषुतेनरमूढचेतसः॥ ८४ ॥

पनिहुददछन्॥ ८२॥ चारवेदसंपूर्णपढ्योस्तापनिधर्मशास्त्र अनेकपढ्योस्तापनिआत्मा
लाईजोताजादैनसोमनुष्यतापशुतुल्यहोभनिजान्नु॥ ८३॥ तीर्थादिमापशुघातऊन्या
यज्ञमाकाष्ठमापत्थरमामाटामाबनायाकाप्रतिमाअग्निमाईश्वरछभनिरुदछुभन्याभा
वनाराषदछुनसोमनुष्यनाममूर्षकहाउंछुनभनिकहिआयाकोछ॥ ८४ ॥ छ ॥

किनभन्या आफ्ना देहमा रह्याका आत्मास्वरूपी ईश्वर छोडि जो नावाहीर तीर्थादिमा घुम्दछन्
सो मनुष्य हरू ता आफ्ना घरको खिर छाडि भिक्षा माग्न जान्या दुर्मति जस्ता हुन् ॥ ८५ ॥ यो
तीर्थ गन्याको यो फल मिल्छ भनि जो नावारंबार फिरिरहन्छन् सो ता आत्मरूपी तीर्थ नजान्याति ति३

बहिर्भ्रमति यः कश्चित्यक्त्वा देहस्थमीश्वरं ॥ स्वगृहे पायसं त्यक्त्वा भिक्षामथति दुर्मतिः ॥ ८५
इदं फलमिदं तीर्थं यो रमन्ते च दुर्मति ॥ आत्मा तीर्थं न जानन्ति तीर्थसेवा निराकृताः ॥ ८६ ॥
तिलमध्ये यथा नैलं लक्षीमध्ये यथा घृतं ॥ काष्ठमध्ये यथा वह्निर्देहे देहे व्यवस्थितं ॥ ८७ ॥

ता दुर्मति हुन् भनि जान किनभन्या तीर्थको शेवारूपी अज्ञानले ठगियाका ती हुन् ॥ ८६ ॥ देह
देहमा व्यापित भै कुन कस्ता प्रकारले रह्याका छन् भन्या जस्तै तिलमा तेल रहन्छ दुधमा घ्यू
उ मा काठमा आगो जौन प्रकारले रहन्छन् तस्तै तरहले संपूर्ण देहमा आत्मा व्यापित छ भनि जा
त्मा१

ज्ञानैलेगरियोदेहशोभापाउंछ त्योज्ञानपनिब्रह्ममाअर्प्पणभयाकोछभन्यानेहिब्रह्मज्ञानरू
पीअग्निलेगरित्योज्ञानिकोपापपुन्यउवैजलाउंछ ॥८८॥ पापपुणपउवैदछुआकोज्ञानिकस्तो
ऊंछभन्याजस्तैपानिमापानिघीउमाघीउउदमाउदमिलायाकोपनिभिन्नदेषिंदैनतस्तै

ज्ञानेनदीप्यतेदेहं पद्मपत्रसमाश्रितम्॥ ब्रह्मज्ञानाग्निनानित्यंदहन्तेपुणपपातकम्॥८८
यथाजलेजलंमिश्रंक्षिरेक्षीरंघृतेघृतम्॥ अवशेषिभवेधर्मयथात्मापरमात्मनि॥ ८९ ॥
मुऊर्तमपियोगस्यएकाग्रगतमानसः॥ नित्यंदहतिपापानियानिजन्मशनोद्भवम्॥ ९०॥

पापपुणपनभयाकाज्ञानिकोआत्मापरमात्माकोपनिभेदकान्निपनिऊंदैनकारणाकेवल
ज्ञानैछभनिजान॥ ८९॥ हेअर्जुन॥ एकछुऊर्तपनियोगभन्याकोधन्यहाभनिएकाग्रचित्तग
रिजोतायोगमानम्परलोगद्छनस्काशयजन्मकापापपनिसबैजालिजोछनावारंवारजोगे
मालागपाकामनुष्यकोमहिमाकाहासम्मकऊं॥ ९०॥ छ॥

योगीतासारनामभयाकोग्रंथतागीनैबाननिकाल्याकोहो॥चारवेदकोरशास्त्रकोएकवाक्यभया
कोब्रह्मज्ञानरह्याकोछ॥२१॥योगीतासारकनपढोस्लापनिविष्णुकामहात्मलेयुक्तभया

गीतासारमिदंशास्त्रंगीतासारसमुद्भवं॥नचस्थितंब्रह्मज्ञानंवेदशास्त्रसमुच्चयम्॥२१॥
पठतांशृणवतांवापिविष्णोर्माहात्म्यमुत्तमम्॥भारतंश्रुतिसर्वस्वंविष्णोवक्त्रसमुद्भवम्॥२२
अष्टादशपुराणानिनवव्याकरणानिच॥निर्मथ्यचतुरोवेदामुनिनाभारतःकृतं॥२३॥

कोभारतरूपीश्रुतिकोज्ञानलेयुक्तभयाकोश्रीकृष्णकामुखदेखिनिकल्याकोहो॥२२॥
अष्टादशेति॥फेरिअठारपुराणनवव्याकरणचारवेदमथनगरिवेदव्यासलेभारतबनाया

तेहिभारतरूपीसमुद्रमाथिगीताअठारअध्यायनिकात्यारभया॥ तेहिगीताकनश्रीभगवा
न्लेमैथैरसारनिकालिकनअर्जुनकामुखमाहोमगर्दाभयानसैनिमितगीतासारकस्या
कोहो॥२४॥गीतासहस्रनामस्तवराजभनिमनुष्यकोस्मृतिहुईसबजस्कापेटमारह्या

भारतोदधिमंथानंगीतानिर्मथनस्य च॥ सारमुद्धृत्यकृष्णेनअर्जुनस्यमुखेहुतं॥२४
गीतानामसहस्रंचस्तवराजमनुस्मृतिः॥यस्यकुक्षौजुवर्त्तैन्तसर्वैनारायणस्वयम्॥२५
मलनिर्मोचनंपुंसांजलस्नानंदिनेदिने॥सकृद्गीताम्भसिस्नानंसंसारमलनासनम्॥२६

काछन्सोनारायणकहाउंछुभनिजान॥२५॥बाहीरकोमयलेआफ्नाकानिमित्त
वारंवारजललेगरिस्नानगर्छन्एकवेरगीतारूपीजलमास्नानगर्‍याभन्यापनिसंसा
ररूपीकमलकोनाशउंछुभनिकहंछन्॥२६॥७॥

गीताजो छ संपूर्ण शास्त्रमय कहाउंछ मनुजको स्मृति सो ता संपूर्ण धर्ममय कहियाको छ गं
गाजो छ संपूर्ण तीर्थमय छन संपूर्ण देवता स्वरूप ता हरि छन ॥ २७ ॥ गीताको एक पद ह
वोस्ता पनि आधा पाउ हवोस्ता पनि आधा श्लोक हवोस्ता पनि एक श्लोक भया पनि जो

सर्वशास्त्रमयी गीता सर्वधर्ममयो मनुः ॥ सर्वतीर्थमयी गंगा सर्वदेवमयो हरि ॥ २७
पादमेवार्द्धपादं वा श्लोकार्द्धं श्लोकमेव वा ॥ नित्यं धारयते विप्र स मोक्षमधिगछति ॥ २८
खमध्ये करत्वात्मानं आत्ममध्ये खगत्रु ॥ आत्ममध्ये खगं कृत्वा न किंचिदपि चिन्तयन ॥ २९

नानित्य पाठ गर्छ न सो मुक्त छन ॥ २८ ॥ आकाशमय आत्मा बनाउनु आत्ममय आकाश बना
उनु आकाश र आत्माको एकत्व भया पछि केहि पनि चिन्तना गर्नु ॥ २९ ॥ छ ॥

कृष्णरूपीवृक्षदेषिंगीतानामभयाकोहरीतकीफल्याकिछदिनादिनतस्कनहेनाराहोकिन
षानौनसंसाररूपीरोगीगकोनाशगर्छैनसोनिमित्तषाउं॥१००॥जान्यालेनायोसंसारमा
गीतागीतामात्रजप॥अरूशास्त्रपाठिक्याऊंछशास्त्रपढन्याहरूनानर्कमापर्छन्॥गी

कृष्णवृक्षसमुद्भूतागीतानामहरीतकी॥हेनराकीनखाद्यन्तेकलौमलविमोचनी॥१००
गीतागीताचकर्त्तव्याकिमन्यैःशास्त्रसंग्रहै॥अनंतनरकेघोरेगीताध्यायीनपश्यति
॥१०१॥गंगागीताचगायत्रीगोविंदोयस्यचेनसा॥चतुर्गकारसंयुक्तंपुनर्जन्मनविद्यते

॥१०१॥

नापाठगर्न्यालाईताघोरनर्कहेर्नुपनिपर्दैनन्॥१०१॥गंगागीतागायत्रीगोविंदईचार
गकारलेसंयुक्तभयाकामनुष्येकनहरूलेताफेरिजन्मलिनुपर्दैनभनिभंछन्॥१०२

॥गी:॥
॥२०॥

श्री ५ को सरकार

म२

जान्याज्ञानिहरुलेताविषयभोगनिस्पृहगर्जुशत्रुमित्रमावरोवरदेषन्रुविषयकोभोगगर्जु
पर्दैन॥त्यागीतापरममेरोभक्तकहाउंछु॥१०३॥जोयोगीताआरंभवान्कासुखकमलदीष
निकल्याकोहोनस्कोज्ञानरूपीअग्निलेडढ्याकोकोशरीरफेरिजन्मनेसक्दैन॥ १०४॥

विषयानिशुभंकुर्यान्ननिस्पृहंसर्वकामिकः॥प्रियोरिपौसमंपस्यन्सयोगीपरमोतमः॥१०३
यास्वयंपद्मनाभस्यमुखपद्माद्विनिःसृतं॥ज्ञानदग्धशरीरस्यपुनर्जन्मोनविद्यते॥१०४
यथारविसर्वरसंप्रभुंक्तेऊतासनस्यापिचसर्वभक्षी॥तथैवयोगीविषयान्भुंक्तेनलिप्य
तेकर्मशुभाशुभाभ्यां॥ १०५ ॥इतिश्रीमहाभारतेगीतासारसंपूर्णम्॥ १ ॥

जस्तैसूर्यसंपूर्णकोरसखांछन्जस्तैअग्निपनिसंपूर्णपदार्थकनखांछन्तस्तैयोगीप
निविषयभोगगर्छन्नपनितिनेलाईशुभाशुभकर्मकोलेपऊंदैन॥१०५॥इतिश्री
गीतासारभाषायांसंपूर्णम्॥ १ ॥शुभम्॥ छ ॥

॥रामः॥
॥ २० ॥

४१३३

श्री ५ को सरकार
संस्कृत महाविद्यालय

श्रीमदुदयनाचार्यकृतस्य
बौद्धाधिकारनाम्न· आत्मतत्त्वविवेकस्य
श्रीरघुनाथशिरोमणीनां
कृतौ दीधित्यां टीकायां
श्रीगदाधरभट्टाचार्यरचिता
विवृतिः

(पत्राणि: ७६)

श्रीः ॥ ॐ नमो गुरवे ॥ श्रीकृष्णचरणद्वन्द्वमाराध्य श्रीगदाधरः ॥ वौद्धाधिकारविवृतिं व्याकरोति शिरोमणेः ॥१॥ ननु
स्वाम्यभित्यादिपद्येनोपनिबद्धस्येश्वरनमस्कारस्य ग्रन्थारम्भसमये कृतमाचरणमफलं तत्कर्तव्यतासाधकवेद
स्याप्रचारात् लौकिकप्रमाणस्यानवकाशात्· एवं तदुपनिबन्धनमप्यफलं तत्कथं विशेषदर्शिनामाचार्याणां
तदाचरणं तदुपनिबन्धनं चेत्याशङ्कां परिहरति·।· शिष्टेति·।· शिष्टाचारपरम्पराप्रमाजन्यसमीहितकर्मारम्भका
लीनपूर्वपूर्वसमाप्तिकामपुरुषीयनमस्कारादिरूपमङ्गलगोचरप्रवृत्तिपरम्परा ततः परिज्ञाप्ता· सिद्धा अभिमत
कर्मारम्भसमये या कर्तव्यता इष्टसमाप्तिसाधनीभूतकृतिविषयता यस्य तादृशमित्यर्थः· तत्सिद्धिश्च नमस्का
रादिरूपमङ्गलाचारः प्रारीप्सितसमाप्तिफलसाधनं समाप्तिकामाधीनप्रमाजन्याचारत्वात्· यो प्रमाजन्या
यत्कामनाधीना कृतिः सा तत्फलसाधनं· तृप्त्यादिकामाधीनपुरुषीयतृप्त्यादिसाधनभोजनादिकृतिवदि
त्याद्यनुमानात्· एवञ्चादिराचारो भ्रममूलकोपि सम्भवतीति कथं मङ्गलाचारे प्रमामूलकत्वावधारणमि

बौद्ध-ग-टी-१

रूपोपाधिभेदाद्भेदेनोपादानं । नित्यस्वतन्त्रता सर्वदादृश्यानधीनता सर्वदादृश्यशून्यत्वमित्यर्थः जीवस्यापि प्रो
क्षप्रदृश्यायामदृश्यशून्यत्वेन नियमित्युक्तं अलुप्तशक्तिः अविनाशिनी कार्यमात्रानुकूला वर्तशक्तिः सा च नैया
यिकानां कृतिरेव अनन्तशक्तिः अनन्ता असङ्कुचा निरुक्ता शक्तिः यद्यपि भगवतः कृतिरूपा शक्तिरेकैव तथापि
अनन्तकार्यानुकूलतया तदुपन्यासः अलुप्तशक्त्यनन्तशक्त्योरेकत्वेपि अलुप्तत्वानन्तत्वरूपोपाधिभे
दात्पूर्ववद्भेदेन नाङ्गानां षोढात्वव्याघातः अङ्गपदञ्च धर्मपरं न तु सहकारिपरं तत्प्रापादेरतथात्वात् जग
तामित्यत्र जगत्पदस्य जन्यमात्रपरत्वे भगवतः पितृसाम्यप्रदर्शके जगत्सुत्पन्ने करणमित्यादावपि तत्परता
या आवश्यकत्वात् घटादौ व्युत्प[illegible]त्यादिबाधादसङ्गते जगत्पदमन्यथा व्याचष्टे । । निखिलेति । आत्मनिरू
रूपितस्य जनकत्वरूपपितृत्वस्यासम्भवेपि विशेषणजनकतया विशिष्टजनकत्वव्यपदेश इत्यनुपदं
जगत्सु जनितेष्वेतद्व्याख्यावसरे समाधास्यते । [illegible] लक्षणजनकतायास्त्वपितृपदार्थतावच्छेदकतयैव

रेतद्धात्पितृपदस्य जनकपरतया व्याचष्टे ।। जनकायेति ।। जगत्पितृरूपमात्मस्याप्रसिद्धानामारूपकसम्भवः
वस्तुतो जनकपदमत्र जनकताविशेष्यपरमेव तातं जनकः पितेति पर्यायदर्शनात् तत्पदेन पितृपदव्याख्यानमपि
तत्त्वस्य जनकत्वगर्भतया ईशपदस्य जगत्कर्त्रर्थकत्वे पौनरुक्त्यसूचनाय तथा च रूपकदर्शनस्यापि सङ्गति
रित्यवधेयं । पूर्वेगुरूणां मध्ये उत्तमाय इति निर्धारणविवक्षायां समासानुपपत्तिः न निर्धारण इति षष्ठीसमासनिषे
धात् निर्धारणसप्तम्यैतेन समासस्य साधुत्वेन सूत्रगतैव षष्ठ्यादतः पञ्चमीसमासेन व्याचष्टे ।। पूर्वेगुरुभ्य इ
ति ।। कपिलादिभ्यः परमेश्वरस्योत्कृष्टतमत्वप्रयोजकरूपमाश्रयत्वं प्रकाशयति ।। तेषामपीति ।। इत्यपे
क्षायां इत्या   कारिकायां तत्पदार्थाकांक्षायां । ओमादावित्यनेन स्वाम्यपालनाद्यपेक्षया ओमादित्वस्य
विवक्षा न सम्भवति जातीत्यत्रातीतार्थकनिष्ठाबलादेवतानामभावात् आदिपदं सर्गादिपरतया व्याच
ष्टे ।। आदाविति ।। यद्यपीदानीन्तनानामपीश्वरजन्यत्वं तान्निरस्य स्वाम्यनिरूपकत्वादिकमस्तीति सर्ग

स्याशङ्कानिराकरणायपरस्येतिभणितं ।। ईशायेति ।। ईशपदस्यजगत्कर्तृत्वपरत्वेतच्छरीरे जगज्जनकत्वान्नभो
वाज्जगतोपित्रइत्यनेनैवतदुक्तेः पुनरुक्तिः स्यात् नचजनकत्वाघटितं तज्ज्ञानकृतिमत्त्वमेवात्रतत्कर्तृत्वंवा
च्यं तथाचनपुनरुक्तिप्रसक्तिरितिवाच्यं एवंकर्तृत्वेशरीरे कर्तृजनकत्वान्नभोऽवपि तज्ज्ञानकृतिमतोजनक
त्वनियमात् अन्यथाकर्तुः क्रियानिमित्तकारकत्वानुपपत्तेरर्थपौनरुक्त्यस्यदुर्वारत्वादित्यन्यथेशपदार्थंव्या
चष्टे ।। सार्वज्ञ्यादीति ।। सार्वज्ञ्यं विश्वविषयकनित्यज्ञानं आदिपदात्सर्वेशतातृप्तिरनादिबोधइत्यादिवच
नोपात्ततृप्त्यादिधर्मग्रहः ईश्वरस्यसार्वज्ञ्यादिशालित्वेक्रमेणश्रुतिस्मृती प्रमाणतयादर्शयति ।। श्रूयन्ते हीत्या
दिना ।। ज्ञाविदोः पर्यायतया सर्वज्ञः सर्वविदित्यनयोः प्रसक्तं पौनरुक्त्यं सामान्यविशेषानुसारेणनिर
कुरुते ।। सर्वज्ञइतीति ।। इतीत्यत्रसामान्यतस्सर्वज्ञानंविवक्षितमितिशेषः विशेषतो विशेषधर्मप्रकारे
णपूर्ववत्पूरणं ज्ञानमयन्तपइत्यस्यच ज्ञानमेवतपइत्यर्थः तपसः सृष्टिहेतुत्वबोधके ऋतञ्चसत्यञ्चा

भीज्ञानपसइत्यादिवेदेपितदेवतपःपदार्थः यद्विषयकं श्रवणादिरूपंज्ञानमेवान्येषांतपइत्यर्थइतिकेचित्
ब्रह्मणःपरमात्मनोजन्माभावात्ऽजायतइत्यस्यानन्वयंमत्वाव्याचष्टे ।। हिरण्यगर्भाख्यमिति ।। हिरण्यगर्भवा
पुंलिङ्गत्वेन चकब्रह्मशब्दस्यनपुंसकत्वा नुपपन्न्या हिरण्यगर्भइत्यनुक्त्वा हिरण्यगर्भाख्यमित्यभिहितं तथा
चात्रब्रह्मपदं हिरण्यगर्भशक्त्यानतद्बोधकं हिरण्यगर्भाख्यत्वेनशक्तिविरहात् अपितु परमात्मशक्ति
मूलकलक्षणयैव परमात्मवाचकब्रह्मपदस्य नपुंसकत्वाच्च तच्छक्तिमूलकलक्षणयार्थान्तरपरत्वेन
क्लिष्टत्वेनेति भावः नामरूपमन्नञ्चजायतइत्यस्य नामारूप्यतइति व्युत्पत्त्या व्रीहियवादिनामभिः परस्प
रव्याहृतमिदन्नामित्यर्थः सर्वज्ञतेत्यादि तृप्तिः पूर्णता स्वीयसुखेच्छावदन्यच्छामिलितयावत्स्वं अन्यत्वम
नियोगि जीवेप्रसिद्धिः अत्रेश्वरस्यप्रीतिरूपतृप्तिविरहेपि नक्षतिः भोजनाभावादिजन्यदुःखाभाव
वत्त्वादितिकेचित् अनादेवोधः अजन्यंज्ञानं सर्वगोचरज्ञानाजन्यज्ञानयोरैक्ये सर्वगोचरत्वाजन्यत्व
पि

गा६

दावित्यनेनसङ्कोचोनयुज्यते तथापीदानीन्तनेनेश्वरस्यासाधारण्येनजनकत्वं न वाप्रयोजकादिश
रीरपरिग्रहेणवुत्पत्तिमस्यादनामितितदुक्तिः स्वामित्वस्य परमेश्वरस्यप्रभुत्वमेव न तु स्वत्वनिरूपकत्वं तत्त्व
त्वस्याप्रामाणिकत्वात् शरीरपरिग्रहरूपजन्मनोजन्यर्थतायाअत्रैवनिराकार्यतया आद्यक्षणसम्बन्धार्थ
तोजनेराह । जनितेष्विति । जगत्सुजनितेष्विति व्यधिकरणसप्तमीत्वभ्रमंनिराकर्तुं जगत्स्विति पर
तोयोजितं । यस्येति । सर्वस्यैव स्वाम्ये स्वीयत्वलाभान्निजपदस्य तदर्थकत्वासम्भवइत्यागन्तुक
हेत्वनपेक्षत्वरूपस्वाभाविकतां दर्शयति । निजामिति । स्वाम्यस्याप्राप्तत्वेनाविधेयत्वं न तु स्वाम्यानु
वादेननिजत्वविधानं इत्याविष्कर्तुं स्वाम्यपदं निजपदात्परं योजितं । शरीरिरूपजगत्पदार्थप्राविष्ट
विशेष्यात्मनउत्पत्तिबाधेन विशेषणे तत्संक्रान्ति माहात्म्यनामित्यादिः आत्मनामित्यस्याभावेना
न्वयः तथात्वादुत्पत्तिमत्त्वात् विशिष्टस्य शरीरावच्छिन्नस्य तथात्वव्यपदेशः जनित्वव्यवहारः श

रीरत्वाचेतनस्यतुल्यत्वादेवविरहाज्ञागत्यदस्यविशिष्टात्मपरतेतिध्येयं. शरीरपरिग्रहरूपजन्मआ
त्मनोपिसम्भवतीतिकथंविशेष्यान्वयपरित्यागइत्यतआह पूर्वेति. अपूर्वत्वंसजातीयानुत्तरत्वंसजा
तीयप्रागभावध्वंसासमानकालीनत्वमितियावत्. साजात्यञ्च एककालीनद्व्याद्यतिजात्या. खण्डशरी
रोत्पत्तिकालेजायतइत्यव्यवहारादपूर्वत्वोपादानं.। नमुख्योजन्यर्थइति.। घटादावपिस्वरसत्तोजायत
इत्यादिव्यवहारात्. तथाचलक्षणादोषान्नतथाव्याख्यातमितिभावः नन्वपूर्वशरीरपरिग्रहेपिजातिप्रयो
गस्यमूलत्वात्तत्रापिशक्तिर्निरूढलक्षणापिशक्तितुल्या इति नोक्तदोषइत्यतोदोषान्तरमाह.। नचेति.।ता
वतापि. शरीरपरिग्रहसम्पादकत्वेनापिसाम्यनिर्वाहः आत्मनिसत्वानिर्वाहः शरीरस्यैवपितुर्दानवि
क्रयादिविनियोगात्पुत्रात्मनिपितुःस्वत्वस्याप्रामाणिकत्वादितिभावः आदिपदादिष्टसम्पादनप
रिग्रहः.।.शब्देनग्रहइत्यादि.।.तथाचतत्करणंप्रयोज्यप्रयोजकशरीरपरिग्रहेणसम्पादनेपरस्येत्यर्थः.

वै.द्र-ग-टी.४

मुस्यादिरूपा स्वर्गकामोऽश्वमेधेन यजेत इत्यादिरूपा भाववविहितास्तेनैः क्रान्द्विहितइति न्यायात् कर्मबोधक
त्वादे तत्सङ्गतिः भूतपदस्य सत्यार्थकतया यथार्थेति व्याख्यातं स्वाभाविकी आगन्तुकहेत्वनपेक्षा
एतद्विशेषणस्य स्वरूपान्वयित्वेन निरुपधिरित्यनेन पौनरुक्त्यमत उक्तिविशेषणत्वाभिप्रायेण तस्य याथार्थ्य
प्रयोजकत्वेन तदुपादानमिति दर्शयति । रागद्वेषेति । वक्तुस्तस्येत्यादिः रागद्वेषयोः प्रतारणात्मकदो
षबीजतया शब्दाप्रामाण्यप्रयोजकत्वेन तद्विरहस्य प्रामाण्यप्रयोजकता भ्रमादीत्यादिपदाद्विप्र
लिप्साकरणापाटवपरिग्रहः । यथार्थत्वादिति । तदुपादानसङ्गतिरिति शेषः अन्यथा यथार्थस्य त्र
स्वाभाविकीत्यत्र च यथार्थत्वादित्यत्र हेत्वनन्वयेनासङ्गत्यापत्तेः तस्य रागादिशून्यत्वे किं प्रमाणमि
त्यपेक्षायामाह । ताद्रूप्येणैवेति । रागादिविरहात्मकधर्मवत्त्वेनैवेत्यर्थः तस्य ईश्वरस्य धर्मिणः । सिद्धे
रिति । तथा च धर्मिग्राहकमेव प्रमाणं तत्प्रमाणमिति भावः पितुरापि पुत्रं प्रत्युपदेशकत्वे प्रतारणान

धीनत्वेन प्रायशो यथार्थतया साधर्म्येण निर्वाहः॥ निरुपधिपरहितेच्छायाः कृपापदार्थत्वे निरुपधि[illegible]रित्यस्य वैयर्थ्यान्निरुपधित्वान्तर्भावेन कृपापदार्थं व्याचष्टे॥ कृपेति॥ हितमिष्टं सुखं दुःखाभावश्च स्वहितानुसन्धानमिति॥ स्वसमानाधिकरणसुखादिगोचरेत्यर्थः तदन्या तज्जन्येच्छाभिन्नेत्यर्थः स्वप्रतियोगितयानिविष्टेच्छा यात्वस्मदादिप्रसिद्धा [illegible]प्यस्मदादीनां पुत्रादिहितविषयिणी कृपारूपेच्छापि स्वीयहितानुसन्धानजन्यैव स्वीयसुखदुःखनिवृत्तेरेव स्वतः पुरुषार्थतया पुत्रादिहितगोचरेच्छायामिष्टसाधनताज्ञानहेतुताया आवश्यकत्वात् तथा च तदुक्तकृपाविशेषणाव्याप्तिः ईश्वरकृपायाः स्वातन्त्र्यविवक्षितत्वे कृपा निरुपधिरित्यस्याभिन्नरसाधर्म्यप्रतिपादकताविरोधः स्वहितानुसन्धानरूपकारणाविशेषोपादानानुपपत्तिश्च· तथा सत्यजन्यत्वमात्रस्यैव वक्तुमुचितत्वात् तथापि परकीयदुःखविषयकज्ञानाधीनदुःखस्य स्वस्मिन्ननुत्पादरूपं यत् हितं तदन्यस्वहितगोचरेच्छानधीनत्वदोपाहितविषयिणी

न्या०कु०-प्रा-टी-५

वै

स्वेच्छातंत्रप्रातिनिरुपाधिरूपेति विवक्षायांसामञ्जस्यं दयालोः परदुःखज्ञानाद्दुःखंभवतीति तन्निवृत्तीछैव
दुःखनिवृत्तीच्छोत्पद्यते नत्रनिरुक्तहितान्यस्वहितेच्छानधीनत्वस्याक्षतत्वात्. यदिच दयालोः परस्यसुखा
भावज्ञानादपि दुःखंजायते तदातन्निवृत्तीच्छाधीन परसुखेच्छा सङ्कुहायपरकीयसुखाभावज्ञाना
धीनदुःखनिवृत्तिरूपहितभिन्नत्वमपिस्वहितविशेषणंदेयं ईश्वरेच्छायापरहितेच्छात्वन्यत्वप्रसक्ति
रेवनास्ति इत्याह ।। नित्यत्वादिति ।। निरवधिरितिपाठेवधिपदेनकालरूपावधिविवक्षणेपुत्रंप्रत्यन्य
दीयरूपाप्याअसङ्गत इत्यवधिपदंव्याचष्टे ।। अवधिरिति । सीमेत्यस्याविषयरूपादेशकालकेत्यादिःता
दृशीसीमाच स्वविषयप्रहितं यत्किञ्चित्परहितविषयकत्वपर्यवसितं तदन्यत्वञ्चयावद्धितविषय
कत्वपर्यवसितं अन्येषांस्वपुत्रयावद्धितविषयापीच्छाभवतीतिसैवतत्साधर्म्यं ईश्वरस्येच्छायां जगतोया
वद्धितविषयकत्वेपुनरिमाह ।। नित्यत्वेनेति ।। अन्येच्छा विषयतायाजनकज्ञानविषयतारूपप्रयोज

कविरहात् कचिदभावसम्भवादीश्वरे ज्ञाया अजन्यत्वेन तद्विषयताविरहप्रयोजकत्वसम्भवात्तविषयसङ्गृ
चइतिभावः तदर्थात्मकइत्यत्र तत्पदेन जन्मादिरूपापर्यन्तसमुदायस्य परामर्शे ईश्वररूपायानित्यत्वेन प्रयो
जनस्वरूपार्थत्वासम्भवादसङ्गतिरतः रूपां तत्पदपरामर्शनीयसमुदायाद्बहिर्भावयति·।·तदिति·।· तत्प्रयोज
नफलं· प्रथमतइत्यवक्तुस्तस्याभिधानं प्रकृतग्रन्थगोचरप्रवृत्त्युपयोगितया सूचयति·।·प्रेक्षेति·।·प्रेक्षाव
तां विवेचकानां विशिष्यप्रयोजनज्ञानं विना सामान्यतःसफलत्वज्ञानेपि अप्रवर्तमानानामितियावत्·
आह·विशिष्य प्रतिपादयति आकर्णयन्तीत्यत्रैवप्रथमवाक्यपरिसमाप्तेस्तदन्तवाक्यार्थेन ग्रन्थप्रयोजनत्वा
दिनापवर्गाद्यलाभादसङ्गतिशङ्कास्यात्तन्निराकरणाय विविच्यतइत्यन्तेनेत्यन्तधारणं अपवर्गरूपप्रयोजन
स्येहेत्यादिग्रन्थप्रतिपाद्यतामाह·।·तत्रेति·।· तत्र तादृशग्रन्थे सप्तम्यर्थस्य प्रयोजनत्वेनाभिधेयेन सम्ब
न्धेन चान्वयोबोध्यः प्रयोजनसम्बन्धान्वयी तदर्थःप्रतिपाद्यत्वं स्वसमभिगेयपदार्थैकदेशाभिधेयत्वान्व

बौद्ध-गा-टी.६

यिप्रयोज्यत्वमपिवोध्यं अभिधेयत्वस्यप्रतिपाद्यस्वरूपतयाग्रन्थस्यार्थप्रतिपाद्यत्वान्वयित्वं सम्भवतिनेति
वोध्यं दुःखं जिहासव इत्यत्रैदाविसयतयादुःखहानरूपापवर्गप्रतिपत्तिर्वोध्या आत्मतत्त्वं आत्मनोनारोपि
तंरूपं नित्यतयाशरीरादिभिन्नत्वं अभिधेयतयातत्प्रतिपत्तिश्च आत्मतत्त्वमत्रविविच्यतइत्यतः अत्रविवि
च्यतइत्यस्यैतद्ग्रन्थस्पर्शेनप्रतिपाद्यतइत्यर्थकत्वात् विशिष्याभिधेयकथनञ्चैतद्ग्रन्थप्रतिपाद्यार्थेन्यतोज्ञानत्वश
ङ्कानिवृत्तये तद्बुद्ध्याएतद्ग्रन्थाधीनार्थज्ञानेसिद्धत्वशङ्कारूपतयातदर्थिप्रवृत्तिविरोधित्वयातन्निवृत्तेरुपयोगः ।
ग्रन्थेति । ग्रन्थात्मतत्त्वज्ञानयोर्हेतुभावः अपवर्गहेतुमद्भावइत्यर्थः अत्रग्रन्थात्मतत्त्वज्ञानयोर्मिथोहेतुहेतुम
द्भावोनविवक्षितः ग्रन्थात्मतत्त्वज्ञानयोर्ज्ञाप्यज्ञापकभावइत्यतएवतल्लाभात् तत्त्वज्ञानमेवतदुपायमारूणे
यति इत्यतस्तत्त्वज्ञानस्यदुःखहानरूपापवर्गोपायतालाभे आत्मतत्त्वमत्रविविच्यतइत्यतआत्मतत्त्वज्ञा
नस्यग्रन्थहेतुकत्वलाभेग्रन्थस्यतत्त्वज्ञानद्वाराहेतुत्वमर्थाल्लभ्यते इति [illegible] तल्लाभेपिनासङ्गतिः उपा
ग्रन्थात्साक्षा

यप्रयोजनयोर्हेतुहेतुमद्भावसम्बन्धग्रहस्येष्टसाधनताधीसध्र्याप्रवृत्त्युपयोगित्वंसुघटमेवग्रन्थात्मतत्वयोर्ज्ञाप्य
ज्ञापकभावसम्बन्धलाभश्च कथितग्रन्थाभिधेयतयात्मतत्वप्रतिपत्तेरेव· नन्वपवर्गस्यग्रन्थफलत्वेपितस्य
पुरुषार्थत्वेमानाभावान्नतदर्थंप्रेक्षावतांप्रवृत्तिरुपपद्यतेइत्याशङ्कानिराकरणपरतया दुःखविशेषणस्यो
पादानं सङ्गमयति ।सुखमित्यादिना · सि[illegible]मन्नमित्यन्तेन · दुःखमपिनहेयं नेच्छाविषयीभूतहानप्रतियो
गी · इयमेवैकाशङ्का · एतच्छङ्काप्रयोजकमहेयसाधर्म्यमाह ।सुखमिवात्मगुणा इति ।आत्मगुणत्वेन
सुखतुल्यमित्यर्थः ॥भङ्गान्तरं दर्शयति ।हेयस्येति ।सुखविरोधितामात्रेणेति ।ज्ञानसुखयौगपद्यानभ्युपग
मे दुःखसत्वेतत्साक्षात्कारस्यावश्यकत्वात् सुखानुत्पादेन दुःखसाक्षात्कारसामग्रीत्वेन दुःखस्यसुखप्रति
बन्धकत्वात् ततएवहेयमित्यर्थः दुःखनिवृत्तेः सुखविरोध्यभावरूपतया सुखरूपफलहेतुत्वेनैव दुःखहान
स्यपुरुषार्थतेतियावत् तथाच दुःखहानात्मकापवर्गस्यकथञ्चित्प्रयोजनत्वेपिनस्वतस्तथात्वमितिभावः

वैकु - गा - टी. ९

तथाचतत्वज्ञानस्यापवर्गवदपवर्गस्यफलान्तरमनभिधानस्यग्रन्थकृतस्तत्रस्वतःसिद्धप्रयोजनत्वमेवाभिधित्सितंतदसङ्
तमितिभावः अथवादुःखनिवृत्तेरुक्तदिशासुखहेतुत्वेपिनापवर्गस्यस्वतोऽपुरुषार्थत्वेगौणप्रयोजनतापि-तद्द
शायांसुखस्यापिहानेनसुखानुपधाननिश्चयादित्याशयः अन्यामपिशङ्कामाह। असदेवेति।। तथाचदुःखस्य
नित्यनिवृत्ततयातन्निवृत्तिर्नपुरुषार्थइतिभावः व्योमकमलिनीप्रसूनपूतिगन्धवदिति। दृष्टान्तेनतदाश्रयस्यव्यो
मकमलस्येवप्रकृतेदुःखाश्रयात्मनोऽसत्वंशङ्काविषयतयाअभिहितंतथाचकस्यापवर्गार्थंप्रवृत्तिरितिभा
वः शङ्कात्रयनिरासायेति। निसर्गतः स्वभावतः प्रतिकूलस्वभावः प्रतिकूलतायस्येत्यर्थः अनेननिसर्गप्रतिकू
लस्वभावमित्यनेनदुःखस्यद्वेषविषयत्वरूपप्रतिकूलत्वकथनाद्धेयत्वशङ्कानिवृत्तिः द्वेषविषयत्वान
स्येच्छाविषयत्वनियमात् द्वेषविषयत्वस्यानुद्देश्यनिवृत्तिकत्वरूपाहेयत्वव्यावर्तकत्वात् द्वितीयविशेष
णस्यासत्वनियतत्वात्तत्प्रदर्शनादसत्वशङ्कानिवृत्तिरितिभावः अस्योपायः दुःखहानस्योपायः इतिजिज्ञासा

वइस्याकारकजिज्ञासावत्तः तादृशजिज्ञासात्मकानुसरणक्रियायाज्ञानविषयत्वेन दुःखहानोपायविषयक
ता इति तस्य तत्क्रियाकर्मत्वेन मूलेऽविद्वस इत्यत्रैवानुसरण इत्यत्रापि तज्ज्ञानोपायमित्यस्य सम्बन्धः न च दुःखनि
हासया तज्ज्ञानरूपेष्टोपायस्यैवइष्टत्वं भवति ननु तदुपायज्ञाने इष्टोपायविषयत्वस्येष्टाप्रयोजकत्वा
उपयोगादिति दुःखजिहासाया हानोपायजिज्ञासारूपानुसरणप्रयोजकत्वाभिधानसङ्गतिरितिवाच्यं विशि
ष्टोपायज्ञानं विनोपायसम्पादनासम्भवेन तस्यापि फलोपायतया फलेच्छयात्रापीच्छासम्भवात् तत्व
ज्ञानस्य मोक्षोपायत्वावधारणेऽप्रामाण्यशङ्कानास्कन्दित तज्ज्ञानात्मक सकलाध्यात्मविदेकवाक्यताया
अप्रामाण्यशङ्कानिवर्तकत्वेनापेक्षितत्वात् सकलेत्यादिमूलसङ्गतिः एकवाक्यता वाक्यानां मिथः स
मभिव्याहाररूपा वाक्यानामेव धर्मो न त्वध्यात्मविदामित्यतस्तत्पदार्थं व्याचष्टे· एकेति· ऐकमत्यमि
ति प्रकृतार्थे इत्यादि ऐकमत्यञ्चाविरुद्धमतिता तथा च सकलाध्यात्मविन्मतिसम्वादेन तत्त्वज्ञाने मो

क्षोपायतावुक्तेःप्रामाण्यावधारणमितिमूलाशयः वाक्यपदस्यज्ञानार्थकतांविना एकंवाक्यं[illegible]येयामितिवहुव्री
हिणाप्येकवाक्यपदेन एकमतिकत्वस्यालाभइति तत्पदस्यतदर्थकतामाह· कारणइति· वाक्यकारणेवाक्या
र्थज्ञाने कार्येस्यकार्यवाचकपदस्योपचारात् लक्षणातो वाक्यस्यैकार्थस्वरूपैक्यलाभे वाक्यार्थज्ञान
स्याप्यर्थतएकविषयत्वंलभ्यतइति,वाक्यपदस्य वाच्यार्थपरित्यागोऽनुचितइत्याशयेनाह· एकमिति· आ
कर्णनपदस्यश्रावणप्रत्यक्षपरत्वात्तत्त्वज्ञानंतदुपायमाकर्णयन्तीति मूलासङ्गति रर्थस्यश्रावणप्रत्यक्षा
विषयत्वादतोव्याचष्टे· आकर्णयन्तीति· तत्त्वज्ञानभिन्नस्य सहकारिणः साधारणमोक्षोपायस्यसत्वा
दितरोपायसामान्यव्यवच्छेदार्थकैवकारासङ्गतिरतः पूरयति।· असाधारणमिति।· तथाचासाधारणोपा
येतत्त्वज्ञानान्यत्वव्यवच्छेदएवकारार्थः सचावाधितएव· मोक्षमात्रवृत्तिधर्मावच्छिन्नकार्यतानिरूपितकारण
तारूपासाधारणोपायतायास्तत्त्वज्ञानएवसत्वादितिभाव. कृल्लत्वावच्छिन्नकार्यताप्रतियोगिककारण

ताः साधर्णकारणतेति तु न सत् मुक्तौ काशीमरणादेः स्वतन्त्रकारणतापक्षेपि व्यभिचारेण मुक्तिलक्ष्यजन्यत्वे
नैवच्छेदकतया निरुक्तासाधारणतायाः शङ्कानास्पदत्वात् . एवकारेणास्य तन्निराकरणस्यासम्भवेन काशीमर
णादेरित्यग्रिमग्रन्थासङ्गतेः असाधारणमितिविशेषणमपूरयतां व्याख्यामुपन्यस्यति ।· तत्त्वज्ञानमिति ।· तत्त्व
ज्ञानविशिष्टकारणकलापमिति ।· तत्त्वज्ञानघटितमुक्तिप्रयोजकसमुदायमित्यर्थः तथा च मुक्तिप्रयोजक
सामग्र्यां तादृशसामग्र्यन्यत्वव्यवच्छेद एवकारार्थः स चाबाधित एवेति भावः कारणकलापसामग्रीघटके
षु प्रत्येकं समुदायत्वावच्छिन्नान्यत्वसत्त्वात्तद्व्यवच्छेदः समुदाये बाधित एवेत्यत्रास्वरसः नन्वेवकारादेवोपाया
न्तरव्यवच्छेदलाभात्ततोन्यामित्यस्यानर्थक्यमित्येवकारार्थविवरणपरतया तत्सार्थकयति · काशीमरणा
देरिति · काशीमरणादेस्तत्त्वज्ञानसम्पादने न मोक्षप्रयोजकत्वेपि तत्त्वज्ञानस्यावश्यकतया सर्वेषां मुमुक्षूणां
तत्त्वज्ञानोपायेशास्त्रादौ प्रवृत्तिरुपपद्यते इत्येवकारेण काशीमरणादेर्मोक्षोपायत्वव्यवच्छेदनमित्युक्तमि

स्यतउक्तं ।·स्वातन्त्र्येणेति ।·तत्त्वज्ञानमनपेक्ष्येत्यर्थः· काशीमरणादेः स्वातन्त्र्येणमोक्षहेतुत्वेकाशीमरणसम्भाव
नायां तत्त्वज्ञानोपायेनिष्कम्पाप्रवृत्तिर्नस्यात् इति तन्निराकरणस्यावश्यकत्वमितिभावः प्रतियोग्यनुयोगितयेत्या
दिना प्यात्मतत्त्वज्ञानस्यैवमोक्षहेतुत्वमुक्तं· तत्त्वज्ञानमेवतदुपायमाकर्णयन्तीत्यनेनापितस्याभानात् पुनरु
क्तेतिशङ्कानिराकरणार्थमाह· तत्त्वज्ञानस्येति ।·तत्त्वज्ञानमेवेत्यादिनोलब्धेपीतिशेषः आत्मनइति· कु
तइति तादृशतत्त्वज्ञानस्यात्मविषयकत्वंकुतोलब्धमित्यर्थः तत्रतद्बोधकपदाभावादितिशेषः तथाचतादृ
शतत्त्वज्ञानस्याविशेषप्रतिपादकतया पौनरुक्त्यमितिभावः इदमुपलक्षणम्· तत्त्वपदस्यतदीयासाधा
रणरूपमात्रार्थकतया तद्विशेषालाभात्तत्सम्पादकत्वेनापि तत्प्रतियोगीत्यादिसार्थक्यमित्यवधेयं· प्र
तियोग्यनुयोगितयेत्यस्य प्रतियोगिनिरूपितानुयोगितयेत्यर्थः प्रतियोगि[illegible]रूपितत्वमव्यावर्त्तकमि
त्यतोव्याचष्टे ।·प्रतीति ।·इत्यर्थइति· हृद्दानन्तरभावप्रत्ययबलादितिभावः नैयायिकनयेशरीरा

दिभेदानुयोगितयैवात्मज्ञानं मोक्षहेतुर्न तु प्रतियोगितयेति॰ बौद्धमताभिमताभिप्रायेण तत्सङ्गमयितुमाह॰।
मतेति॰। तदितिप्रतियोगितयाऽनुयोगितया ज्ञानस्य विभिन्नमतासिद्धत्वादित्यर्थः॥ नैरात्म्यदृष्टिः अभावप्र-
तियोगितया आत्मदृष्टिः॥ केचनेति। बौद्धभेदा इत्यर्थः आत्मतत्त्वधियं॰ शरीरादिभिन्नतयात्मज्ञानं॰
आत्मतत्त्वज्ञानस्य समूलं मिथ्याज्ञानमुन्मूलयतो भोगबीजधर्मविशेषानुत्पत्तिविरोधितया मोक्षोपयोगित्वमा-
स्तां॰ आत्मा नास्तीति ज्ञानस्य तु कथमित्याकाङ्क्षायां पूर्वपूर्वाचरितकर्मोपचितासञ्चितसुकृतदुष्कृतफलासु
भोगजननेनन्नीयेतीत्यपि जन्मान्तरैहिकामुष्मिकविविधसुखभोगलम्पटतरलीकृतचेतसामपरापरविहितनिषि-
द्धकर्माचरणोचितप्रसूयच्छृङ्खलानियन्त्रणप्रकारेण कामनाफलोपायमशङ्कापनयमिति तदुपाय एवा-
मीषां संसारपारावारपारप्रापणोपायः स्यात् स्यादनेन च नैरात्म्यदृष्टिरेव वरीयसी कामनाविषयभोग-
भाज आत्मनोऽभावनिश्चये कर्मणां फलानुपधाननिश्चयेन तच्चिकीर्षानुदयात् तत्प्रवृत्त्यनुत्पादेनाग्रिम

धर्माधर्मार्जनात्प्राचीनाञ्च तेषां भोगेन भस्मीकरणाज्जन्मान्तरविरहोपपत्तेरित्याह।। सर्वेस्वहीति।। स्थिरन्तरं क्रि
यमाण विहितनिषिद्धकर्माधीन भोगपर्यन्तस्थायित्वविशिष्टं सुखादिकं कामयन्ते सुखादिकामनया तत्तत्क
र्म चिकीर्षन्ते· फलकामनायां फलानुपधाननिश्चायकनैरात्म्यदृष्टेरविरोधित्वाद्यथाश्रुतासङ्गतेः साहजि
कस्यात्मज्ञानस्य कामनाधीनकर्मवन्धानुवन्धित्वे सम्वादमाह।। य[illegible]हुरिति।। सुखी भवेयमिति· अहं
सुखीभवेयमिति· अहंदुःखीमाभूवमितिवा [illegible]त [illegible]वतः पुंसो याप्रवृत्तिप्रयोजिकाऽहमितिधीः भो
गभागितया आत्मधीः सैव सहजमात्मज्ञानमित्यर्थः कामयमानाश्च सुखादिकमिति· सुखदुःखाभा
वकामनया तदुपायं चिकीर्षमाणा इत्यर्थः विहितनिषिद्धं विहितं यागादिः निषिद्धं अगम्यागमनादिः
असत्प्रतिग्रहरूपञ्च· अस्य सुखादेः साधनमिति सन्तः कुर्वाणाः कर्माशयान् तादृशकर्माधीनधर्मा
धर्मान् आचिन्वाना अर्जयन्तः जन्मादिकं नानाविधशरीरपरिग्रहं तदधीनसुखदुःखमनुभवन्ति· प्राप्नु

वन्ति· मतभेदभिन्ननैरात्म्यज्ञानाकारमाह·।· यदिपुनरिति·।· अमी जीवाः किमपि नाहमिति· आत्मान्नवस्तु
भूतइत्यर्थः कदाप्यात्मा नास्तीत्यवधारये रन्नित्यग्रिमेणान्वयः एतच्च मतं भोगसमवायिनोऽलीक
त्ववादिनां तेषाञ्चालीकत्वाभावोऽनुमतः नैषद्धा मभावोनिरूप्यतइतिनैयायिकसिद्धान्तस्यानादरात्
क्षणिकालयविज्ञानधाराया आत्मत्ववादिनो योगाचारस्य मतमाह·।· नाहमास्पदमस्मिकिञ्चिद
पिवस्तुस्थिरमिति· अहम्पदवाच्यं किमपि वस्तुस्थिरं नास्तीत्यर्थः किमपीति सामान्याभावलाभाय· अ
स्यापीत्यादिनान्वयः एतन्मते आत्मनो नालीकत्वमपितु स्थैर्यरूपविशेषणावच्छिन्नस्यैवनस्येति ध्ये
यं स्थिरत्वं स्वाधिकरणोत्तरक्षणवृत्तित्वं· तथाच स्वाधिकरणोत्तरक्षणे आत्मा नास्तीत्यवधारणं पर्य
वसितं· सौगतमतमाह· विश्वमेवक्षणभङ्गुरमिति· वाह्यमवाह्यञ्चवस्तु स्वाधिकरणोत्तरक्षणे नास्ती
त्यर्थः अस्याप्यग्रिमेणेत्यवधारयेरन्नित्यनेनान्वयः·।· शून्यतावादिनां मतमाह। लीकमिति· विश्वमेवे

ॐ द्र-गा-टी. ५१

त्यनुषज्यते. तथाचकिमपिकदापिनास्तीत्यर्थः कामयेरन् सुखादिकामनयाचिकीर्षेरन् तावतैवकथं
कर्माचरणमित्यपेक्षायामाह.।. नचेति.।. अकामयमानाः अचिकीर्षमाणाः कर्माशयेनसीव्यन्तेक
र्माशयेनसहस्यूताभवन्तितेनसहस्यूतिश्च दुरपनेयतत्सम्बन्धः नैरात्म्यदर्शनमपवर्गस्यसाधनंप
वक्षीतियोजना क्वचित्तुशिष्यन्तइतिपाठः सचतालव्यशकारादिवन्धनार्थकशिषधातुमादायसङ्गम
नीयः यद्वातोरूपंरज्ज्वादिनिर्मितस्थाल्यादिपतनप्रतिवन्धकद्रव्यविशेषवाचकंशिक्यपदं. नैरात्म्यदृ
शिरितिकारिकापदार्थंव्युत्पादयति. अपरेस्पुनरिति. अपरेनैयायिकाः न्यायोयुक्तिः आदिपदेन
श्रुतिपरिग्रहः तदीयं तत्वज्ञानं तद्विषयकंशरीरादिभिन्नत्वप्रकारकंज्ञानं न्यायागमाभ्यां न्याय
वेदानुसारेणाचक्षतइति तथाचैतन्मतानुसारेणानुयोगितयेत्युक्तौ ज्ञेयइतिरूपप्रत्ययेनयदिप्राधान्ये
नविषयत्वविवक्षा तदा अभावस्यज्ञानप्रतियोगिनः आत्मनस्तद्विशेषणतयैवभानात्तज्ज्ञानक

ज्ञानमादायैवज्ञेयत्वमुपपादयति·।·अभावज्ञानइति·।·तथाचानुयोगितयेत्यस्यानुयोगिविधयेसर्थवत्प्रतियोगि
विधयेतिनार्थः अपितु ज्ञातत्वाभावस्यप्रतियोगित्वेन हेतुनेत्यर्थः केचित्तुनैरात्म्यदर्शनपरतया प्रतियोगि
तयेतिव्याकरोति· अभावज्ञानइति·।·फलीभूतज्ञानेतुतन्नयेनात्मनोज्ञानं सदसत्तोरेकज्ञानविषयत्वादित्याहुः
नैयायिकादिमतस्वप्रतियोगितयाज्ञातत्वमुपपादयतांव्याख्यामुपन्यस्यति·।·परेत्विति·।·भिन्नत्वस्यभेदा
नुयोगित्वस्य आत्मभिन्नत्वस्य आत्मप्रतियोगिकभेदस्यज्ञानमिति· शरीरादिविशेष्यकात्मभेदावगाहिज्ञानज
न्यवासनायांसमानविशेष्यकतयाग्रहाभावावगाहितयाचतस्यैवविरोधित्वादितिभावः आसंसारं सं
सारमभिव्याप्य प्रतिजन्मेत्यर्थः अथाप्येतज्ज्ञानस्यापि नापवर्गवार्त्तातथाचनसाहजिकात्मज्ञानस्यमोक्षहेतु
तासम्भवइतिशेषः अतआह· इत्याशयेन प्रतियोग्यनुयोगितयेत्युक्तिसङ्गतयेसाहजिकात्मतत्त्वज्ञानस्य
मोक्षहेतुत्वमाह· इतिशङ्कां निरसितुमाहइतिनार्थः प्रतियो[illegible]ग्यनुयोगितयेतिपूर्वमभिधानादेवनैसर्गि

नैकि - मा - टी - ८८

कस्यगोरोहमित्यात्मतत्वज्ञानस्यमोक्षहेतुत्वशङ्कानिरस्ते: आत्मनोदेहादिरूपतायाक्षणिकालयविज्ञानरू
पतायावास्वीकर्तुरपिमतेतस्यवस्तुभूतत्वाभावाद्वस्तुभूतइत्युपादायतदनन्तरंपूरयति· देहादिभिन्नानां
दिनिधनइति·।· ज्ञानादिमानितिचात्मपदार्थविवरणमेव· नतुपूरणं· तत्वज्ञानपदस्यप्रमार्थकतयाआ
त्मनःसत्यत्वमते अहंसुखीत्यादिदेहभेदानवगाहिनैसर्गिकात्मज्ञानस्यातत्वज्ञानत्वानुपपत्तिरिति
अतत्वज्ञानमित्यस्यदेहभेदावगाहिज्ञानेयथाश्रुतस्यवतदनवगाहिज्ञानेमोक्षरूपतत्वज्ञानकार्या
कारित्वमर्थेऽन्वेतीत्याह·।·नैसर्गिकमिति·।· एतदात्मज्ञानमित्यन्वयि· अनादिपदमनादिपरम्परप्रह
नार्थकं देहाभेदवासना· देहभेदगोचरसंस्कारः अनुभवरूपमिथ्याज्ञानेदोषविधयासहेतुः भ्रम
स्यसत्ख्यातिरूपतावादिनांवौद्धानांमतेतादृशज्ञानस्यभ्रमत्वंघटयति·।·असतइति·।· भानानेनावगा
हनात्· अर्थतादृशज्ञानस्यातत्वज्ञानत्वोक्तिर्मोक्षानुपयोगित्वसूचनार्थैव· तथाचनैरात्म्यज्ञानस्यापि

तेषामसद्विषयकतयातस्यापिमोक्षानुपयोगितापातात्सिद्धान्तोभज्यते· नचसदसतोरैक्यज्ञानमनभ्यु
पगन्तुमात्मनोऽसत्वेपि च तदभावस्यप्रामाणिकत्वमुपगन्तुं मोक्षोपयोगिनैरात्म्यज्ञानं स्वतन्त्रप्र
तियोगिज्ञानपूर्वकमभावगोचरज्ञानान्तरमेवेति सामञ्जस्यं अतोपिप्रतियोगिज्ञानविधयैव नैरात्म्यज्ञा
नेआत्मज्ञानस्योपयोगितापूर्वमुक्तेति वाच्यं· सौगतादिमतेऽभावस्यालीकतयाऽसद्विषयकत्वस्यमो
क्षोपयोगिनैरात्म्यज्ञानसाधारणतयाऽसद्विषयकत्वेनातत्वज्ञानकथनासङ्गतेर्दुर्वारत्वादितिचेन्न· प्रह
स्यप्रतिकूलज्ञानेऽसद्विषयकत्वरूपमतत्वज्ञानत्वंमोक्षानुपयोगित्वप्रयोजकमित्याशयात् आत्मा
नास्तीतिज्ञानस्यासद्विषयकत्वेपिप्रहन्तृप्रतिकूलत्वात्· मोक्षानुपयोगित्वनिर्वाहार्थमन्यथाख्याति
वादिमतेउक्तज्ञानस्यभ्रमत्वमुपपादयति देहाभेदेति·। वाधितेत्यादिः देहसंभेदो देहाभेदः आत्मज्ञा
नेनुपस्थितदेहादेरभेदः प्रायशोभातुमीष्टे अतःकादाचित्कमित्युक्तं· देहभेदविषयकानुमित्यादेर्मिथ्या

बौद्ध-मा-टी. १२

ज्ञानतिरस्कृतत्वसम्पादनायबलवत्वेति· विपरीतज्ञानाप्रतिबध्यत्वाप्रयोजकदोषविशेषजन्यत्ववत्वेत्यर्थः
तिरस्कृतत्वादप्रतिबन्धकीकृतत्वात्· नकार्यक्षममिति।· मिथ्याज्ञाननिवर्तनक्षमस्यैवापवर्गकार्यक्षमत्वा
दितिभाव: साधकमनुक्त्वैववाधकनिराकरणं किमर्थमित्यत आह।· सतिचेति· तदेव· वाधकमेव· वाध
कस्यविपरीतसाधकप्रमाणरूपतया प्रमाणानात्मकानां क्षणभङ्गादीनां नतथात्वसम्भव: नचज्ञाय
मानलिङ्गस्यकारणत्वमते क्षणभङ्गादिरपि लिङ्ग·विधया विपरीतसाधकएवेति वाच्यं एवमपिस्थैर्या
द्यभावस्यैवक्षणभङ्गादिरूपतया साध्याविशेषेण क्षणभङ्गादे: स्थैर्याद्यभावसाधकत्वानुपपत्तेरित्य
तआह।· क्षणेस्यादविति· विश्वस्यनिर्वक्ष्यमाणक्षणिकत्वरूपक्षणभङ्गसाधकमानमात्मनिस्थैर्यवा
धकं एवंगुणगुणिभेदभङ्गे गुणिनि आत्मनि ज्ञानरूपास्थिरत्वस्यगुणभेदाभाव: तत्साधकं वाप्रमाणं
आत्मनोनित्यत्ववाधकं वाह्यार्थभङ्ग: वाह्यस्य ज्ञानातिरिक्तस्य भङ्गे मिथ्यात्वे तत्साधकं वाप्रमाणं

सत्यात्मनः स्थिरत्वबाधकं एवं अनित्यदेहादिभिन्नात्मनोऽनुपलम्भोपि आत्मनोनित्यत्वबाधकमित्य
वधेयं. सौगतैः समं विचारे विप्रतिपत्तिं दर्शयति ।। शब्दादिरिति ।। विश्वेषां सत्त्वेन पक्षत्वे पक्षतावच्छे
दकेन हेतुभूतसत्त्वस्याविशेषाद्धेतुभूते साध्यसामानाधिकरण्यावगाहिनोऽन्वयव्याप्तिग्रहस्य सिद्धिवि
धयाऽनुमितिविरोधित्वादिति विशिष्यपक्षतादरः ननु क्षणिकत्वं क्षणमात्रस्थायित्वं स्वाधिकरण
समयोत्तरक्षणावृत्तित्वरूपं स्वसमयध्वंसावृत्तित्वरूपं वा. न चैन्यायमते क्वचिदपि प्रसिद्धमिति तथा
च साध्यस्योभयमतप्रसिद्धिविरहेण सन्दिग्धसाध्याप्रसिद्धिग्रस्ततया बौद्धानां क्षणिकत्वसाधना
सम्भवः स्वमते प्रतियोग्यप्रसिद्ध्याऽभावाप्रसिद्धेर्नैयायिकानां तदभावसाधनासम्भवश्च. न च
स्वाधिकरणसमयोत्तरक्षणावृत्तित्वे स्वपूर्वोत्पन्नप्रसिद्धं तत्तदभावो धर्मिणि द्वाभ्यां साधनीयाविति
वाच्यं. अनुयोगिनां सत्त्वेनोपादाने घटादिपूर्वोत्पन्ने तत्समयोत्तरक्षणावृत्तित्वप्रसिद्ध्या घटादौ त

त्साधनसम्भवेपि आत्मादिकं स्वपदेनोपादायतादृशक्षणावृत्तितायाः क्वचिदपिप्रसिद्धिसम्पादना
सम्भवेन तत्र तत्साधनासम्भवात्· स्वसमयोत्तरक्षणवृत्तिनियमत्वं तदन्यत्वस्य साधने च बौद्धानांप्र
तियोग्यप्रसिद्ध्या क्षणिकत्वरूपसाध्याप्रसिद्धिरिति विभाव्यान्यादृशंप्रागभावेचरमध्वंसेचप्रसिद्धं
क्षणिकत्वंनिर्वक्ति ।· क्षणिकत्वञ्चेति ।· स्वाधिकरणेत्यादिना केवलकादाचित्कत्वस्योत्पत्तिमत्त्वस्य वा
साधने अनित्यवस्तुनि अंशतः सिद्धसाधनं· अवच्छेदकावच्छेदेन तत्सिद्धेरुद्देश्यत्वात्तस्या दोषत्वे
पि स्थैर्यविरोधिनः सिद्धेर्न तदभिमतसिद्धिरतः सत्पन्नं· उत्पत्तिविवादाविषयघटादौ स्वाधिकरण
समयपूर्वक्षणानुत्पन्नत्वसिद्धावेव क्षणिकत्वपर्यवसानं· स्वाधिकरणसमयप्रागभाववत्त्वस्य तत्का
लोत्पन्ने चरमध्वंसेनास्माकं विशेषणदलस्य प्रसिद्धिः क्षणोपादानमन्तरेण सम्भवति· अतस्तत्रा
पि तत्प्रसिद्धये द्वितीयकल्पाभिप्रायेण वा क्षणोपादानं क्षणानुपादानेपि स्थिरवस्तुमात्रमनभ्युप

गच्छतांपरेषांनस्थिरकालमादायस्वमतेसाध्याप्रसिद्धिरितिध्येयं· तादृशक्षणावृत्तित्व निवेशेप्राग
भावेनदप्रसिद्ध्या महाप्रलयासत्वेसाध्याप्रसिद्धिरेव इत्युत्पत्ति पर्यन्त निवेशः [redacted] कादाचित्कत्वा
नुपादाने आत्मादावंशतः सिद्धसाधनं आत्मनोनादिनिधनत्वविरोधिधर्मप्रसिद्ध्या तदभिमता
निर्वाहश्चेतितदुपादानं· कादाचित्कत्वमुत्पत्तिविनाशान्यतरप्रतियोगित्वं· किञ्चित्कालावृत्तित्वंवा
आत्मन्युक्तसाध्यासिद्धावनादिनिधनत्वादिनिराकरणसम्भवेपि नस्थैर्यनिराकरणसम्भवः स्थि
रेपिप्रागभाववद्विनाशितामात्रेण तादृशसाध्योपपत्तेरित्यनुशयेनमहाप्रलयसत्वमङ्गीकृत्य
कादाचित्कत्वमुपेक्ष्यान्यद्विशेष्यमुपादत्ते।। उत्पत्तिमत्वंवेति। एतद्रूपे चरमध्वंसएवाप्रसिद्धिः प्राग
भावेविशेष्याविरहात्· एतद्रूपेपूर्वसत्यनादत्ते उत्पत्तिविशेषणं विशेष्यदलसार्थक्याय स्पत्तिरूप्य अतएव
मनन्तर्भाव्य लघुलक्षणमत्रवक्ष्यतेस्वयमेव अत्रोत्पत्तिर्यदि स्वाधिकरणसमयध्वंसानधिकर

नै-दु-मा-टी. ५५

णसमयसम्बन्धस्तदावस्वध्वंसाधिकरणसमयध्वंसाप्रसिद्ध्या तत्र न साध्यप्रसिद्धिसम्भवः प्रा
गभावासत्त्वमभ्युपेत्यानुमानदीधितौ निरुक्तोत्पत्तिव्याप्तिघटिततया गुरुशरीराप्यादृता उत्र प्रा
गभावघटितक्षणिकत्वे प्रागभावघटितामनीदृशीमुत्पत्तिं निर्वक्ति उत्पत्तिश्चेति ।। चरमध्वंसस
मयप्रागभावस्यापि तदधिकरणस्थूलकालवृत्तित्वात्तत्र नैतत्प्रसिद्धिरिति प्रथमक्षणपदं आद्यक्ष
णे तदुत्तरक्षणे च स्थायिनि स्थूलकाले घटादेः सम्बन्धस्योत्पत्तिपदार्थत्वाभावात् द्वितीयक्षणोपा
दानं उत्पत्तिसामान्यलक्षणाभिप्रायेण प्रकृते च समयमात्रं तत्र निवेश्यं ।। इदमग्रे चिन्त्यते । ईदृशो
त्पत्तेर्विशेष्यतया प्रवेशे न युक्तः प्रागभावप्रतियोगित्वस्य विशेष्यतयैवार्थान्तरवारणसम्भवात्
न च सत्यन्तदलप्रविष्टोत्पत्तिनिर्वचनमेवेदमिति वाच्यं । स्वसमयपूर्वकालीनपदार्थान्तरोत्पत्ते
रेव तद्दलप्रविष्टतया स्वाधिकरणसमयध्वंसानधिकरणसमयसम्बन्धरूपोत्पत्तेस्तत्र प्रवेशे

१५

पि चरमध्वंसे स्वसमयपूर्वक्षणे यस्य नाशोत्पत्तिस्तदन्यत्वस्याक्षततया नाशोत्पत्तिपरित्याग
स्य निर्वीजत्वापातादिति । स्वाधिकरणेत्यत्र क्ष[illegible]णत्वं यदि स्ववृत्तिप्रागभावप्रतियोग्यनाधा
रत्वं स्ववृत्तिप्रतियोगिकध्वंसानाधारत्वम्वा । तदा चरमध्वंसस्य ईदृशक्षणलक्षणानाक्रान्ततया च
रमध्वंसस्य कालक्रियादेरभावाच्च चरमध्वंसाधिकरणक्षणाप्रसिद्ध्या तदुपपत्त्यसिद्धिरित्यतो महाप्रलय
साधारणमन्यादृशंक्षणं निर्वक्ति । स्वाधेयेति । प्रागभावे ध्वंसे चेति । यत्र घटादौ क्षणिकत्वं साधनी
ध्वंसादि
यं तत्समयप्रागभावाधिकरणक्षणानुत्पत्तिकत्वघटितक्षणिकत्वस्य तन्नाशोत्पत्त्यभावप्रसिद्धावपि
नित्यात्मादिस्वरूपपदार्थघटितक्षणिकत्वस्याप्रसिद्ध्या तदप्रसिद्धिः प्रागभावचरमध्वंसयोरेव स्वीका
र्येत्यर्थः वस्तुतस्तु तत्तद्घटको तत्तद्व्यक्तिसमयप्रागभावाधिकरणक्षणानुत्पत्तिकत्वघटितक्षणिकत्वं सद्
हेतुना साधयितुं शक्यते सत्वस्य नाशक्षणोत्पन्नसत्वेन व्यभिचारादतः स्वसमयप्रागभावाधिकरण
क्षणानुत्पन्नत्वघटिततत्तत्क्षणिकत्वघटितं यद्घटत्वं तत्तद्घटकूटाधिकरणाभावरूपं तावदन्यतमत्वं साध्यंतोऽशंस्वंप्रागभावचरमध्वंसरूपमेवेति ध्येयम्

अतस्मादृशानुगमसा
ध्याभाव
अतपरे न लघोग्रन्थः

वौद्ध-गा-टी-१६
(शुद्धग्रन्थः)

४१३४

श्री ५ को सरकार

१ प्रमाणमप्यादेर्यितनत्र ज्ञानात्मस्य[illegible]निमाव: १ ४ ज्ञानेयच[illegible]मतयोनित्यास्तत्केविषयाश्चोतिबोधः १

तर्क॰टी
१

श्रीगणेशाय नमः॥ ॥ओंनत्वा देभिः प्रतिपादितायनितांखिलेत्वाक्ननिधीश्वराय॥ लीलाघनश्यामकलेव
रायनमोस्तु तस्मै जगदीश्वराय॥ १॥ उज्वला तर्क भाषायाइयं भावार्थदीपिका॥ भट्टाचार्यगाधीरे
णगौरीकांतेन तन्यते॥ २॥ मानभार्रतिहेम्निरोमणिवचोव्याख्यानसत्कौशलात् साहंकारतयैवकेशव
कृतिव्याख्यासुकिंलज्जसे॥ ३॥ कर्पूरप्रसुरेऽत्रसुन्तवदिरवृन्दाम्बूलजोवाधरे रागोप्यावकजोऽथवायदि
नरकानामशोभाक्षतिः॥ ४॥ इह खलु प्रेक्षावन्तो ग्रंथाभिधेयप्रयोजनसंबधान् प्रतीत्यैव तदध्ययना
दौ प्रवर्त्तंते॥ ॥तदुक्तम्॥ ॥सिद्धार्थं सिद्धसंबंधं श्रोतुं श्रोता प्रवर्त्तते॥ शास्त्रादौ तेन वक्तव्यः संबंधः स
प्रयोजनः॥ अतः प्रारिप्सितस्य ग्रंथस्य प्रेक्षावत्प्रवृत्तये प्रयोजनाभिधेयसंबंधान् दर्शयन् शिष्यावधानाय
तर्कभाषाप्रकाशनं प्रतिजानीते॥ बालोपीति॥ बाल इव बालः॥ प्रकृतशास्त्रीयपरिभाषानभिज्ञ इत्यर्थः॥
अग्निर्माणवक इतिवत् गौणप्रयोगः॥ अलसः॥ दुरूहभाष्यादिग्रंथभावार्थबोधानुकूलवज्ञताभ्यास
विधायकसामर्थ्यविकलः॥ एवंभूतोपि सन्योजनः अल्पेन क्षतेनाध्ययनेन न्यायः प्रतिज्ञाहेतूदाह
रणोपनयनिगमनात्मकपंचावयववाक्यसमुदायः तत्त्वंबधिनितयेन्नीयंते निर्णीयंतेऽर्थाः अनेनेतिन्याय

पृटः
१

न्याशास्त्रे तर्कविद्यायामिति यावत्॥ प्रवेशं गृहाद्विवस्तुत्वेनावगतिं प्रबोधपदसमभिव्याहृतप्रवेशपदस्वान
स्वरशात्॥ वाञ्छति कामयते॥ तस्येकृते॥ तस्य प्रयोजनाय एषा संक्षिप्तयुक्त्यान्विते तर्कभाषा प्रका
श्यत इत्यन्वयः॥ तर्कंति: तर्कसहकृतप्रमाणजन्यप्रमितिविषयीक्रियंते इति तर्काः पदार्थास्तेभा
ष्यंते उद्देशलक्षणपरीक्षादिभिर्निरूप्यंते ऽनयेति तर्कभाषा ग्रंथरूपवाक्यावलिः॥ सदसद्विवेचनं
युक्तिस्ताभिरन्विता प्रतिपाद्यत्वेन संबद्धा॥ सा चासौ तर्कभाषा चेति तृतीयांततत्पुरुषगर्भः कर्मधारयः
संक्षिप्ता च स्वल्पशब्दा चासौ सा चेति पुनरपि कर्मधारयः॥ एतेनान्येषां ग्रंथानाम संक्षिप्तत्वात् युक्तिव
जत्वाभावाच्च नरुचितिबालकुमादकत्वमिति ध्वनितम्॥ संक्षिप्तेत्यस्य युक्तिपदेन कर्मधारयः॥ तद
न्तस्यान्वितपदेन तृतीयांततत्पुरुषः॥ पश्चादन्वितांतेन कर्मधारय इत्यपि केचित्॥ युक्तिविशेषणा
त्वे संक्षिप्तत्वं सारभूतत्वं बोध्यम्॥ संक्षिप्ता सारभूता युक्तयो यत्रेति वा बहुव्रीहिः॥ अन्विता अन्वयवती
अनन्वितत्वादिपुनरुक्तनिराकांक्षत्वादिदोषरहिता। पश्चात्कर्मधारय इत्यपरे केचित्तु हे अन्वितः युक्ते
संक्षिप्तयुक्ति यथा तथा प्रकाश्यत इति क्रियाविशेषणम्॥ अन्यथा संक्षिप्तत्वादेः समासे निविष्टत्वेन

तर्क·ग
२

गौणतयानुवाद्यत्वे विधेयताप्रतीत्यभावेन विमृष्टविधेयांशतादोषप्रसंगात्॥ यथा· न्यासीकृतां स्थानविदा हरस्य
रेरद्वितीयमौर्वीमिव कार्मुकस्येत्यत्रेति वा वक्ष्यते॥ तत्र॥ एवमपि बहुव्रीहिसमासे गुणीभूततया तद्दो
यदि ३ षतादवस्थ्यात्॥ यत्तु न प्रकाशनक्रियायामेव संक्षिप्तमुक्त्वा विततत्वं प्रतीयते न तर्कभाषायाम्॥ प्रका तर्क ३
शनेऽपि कैरपायस्य संक्षेपो नाम परकीयग्रन्थादिकं विलोक्य लेखनमिति विवृतमतिकृद्दोषोपि स्या
दिति न किंचिदेतत्॥ अन्वितपदस्य लक्षणापत्तेश्च॥ वस्तुतस्तु अविमृष्टविधेयांशता हि ति
रस्कबोधप्रतिबंधकतया काव्यदोषो न तु च्युतसंस्कृतादिवत् शाब्दबोधप्रतिबंधकतया वाक्य
दोषः। प्रमाणाभावात्॥ न चेदं पद्यं काव्यलक्षणाक्रान्तं॥ गुणालंकारादिविरहात् किंतु · कारिका
रूपं वाक्यं॥ तत्र च काव्यमात्रदूषकाणामदूषणत्वमेव॥ अन्यथा बालपदगदवश्लीलत्वं संक्षिप्ते
तादेक्कृतिकर्तृत्वं एषेऽप्यत्र समाप्तपुनरात्तानभिमतादिदोषाणामनुद्धारात्। प्रकाश्यतेऽस्यनेन उत्त:
स्तिष्वस्यैव मया प्रकाशनं क्रियते न तु क्लिष्टं न विरुद्धं किंचित्त्वयं कल्पितमिति ध्वनितम्॥ अन्यथा प्र २
कल्पनस्यैवयुक्तात्॥ एषेऽप्यत्र मानसप्रत्यक्षमात्रयप्रत्यक्षतुष्टिविषयता बोध्या॥ एतेनात्र पदार्थस्त्र

मिथे यावालस्यापि अनायासेन पदार्थव्युत्पत्तिः फलं संबंधश्च पदार्थग्रंथयोः प्रतिपाद्यप्रतिपादकभा
वः बालव्युत्पत्त्या ग्रंथस्य जन्यजनकभाव इति दर्शितम्॥ अत्र च सकलशिष्टैः प्रारिप्सितादौ मंगलं क्रि
यते अत्र तेन तत् किमिति न कृतमिति नाशंकनीयं॥ मंगलस्य नतिस्तुत्यादिरूपस्य कृतस्याप्युपनिबंधा
भावसंभवात्॥ उपनिबंधस्तु शिष्यशिक्षामात्रप्रयोजनः तत्र प्रकृते शिष्यस्य बालकत्वात् एतद्ग्रं
थमधीत्यैव ग्रंथकरणसामर्थ्यस्यासंभावितत्वेन तदुपनिबंधनस्य निष्फलत्वात्॥ शिष्टाचारानुमि
तश्रुत्या मंगलस्य निर्विघ्नपरिसमाप्तिसाधनत्वेऽवगतेऽप्यत्र मंगलं न क्रियते न वापि जन्मान्तरीयादि
कं तत्कल्प्यते नादृष्टसमाप्तिदर्शनात्॥ तथाहि मंगलं वेदबोधितकर्त्तव्यताकं अलौकिकविषयधर्म
शास्त्रानिषिद्धशिष्टाचारविषयत्वात्॥ दर्शवदिति प्रयोगः॥ भोजनादावाचारे व्यभिचारवारणायालौकि
केति॥ रात्रिश्राद्धादौ व्यभिचारवारणाय धर्मेत्यादि॥ नास्तिकाचारवारणाय शिष्टेति॥ शिष्टत्वं च वेदैकक
र्मकर्त्तृत्वम्॥ वेदस्याप्राबल्ये विवक्षितेऽसंभवात्॥ यत्किंचित्त्वे हिंसादिकमादाय बौद्धादावतिव्याप्तेः॥
नापि वेदनिषिद्धाकर्तृत्वे सति यत्किंचिद्वेदविहितकर्तृत्वं॥ वसिष्ठादावव्याप्तेः॥ न च तेषामलक्ष्यत्व

२ x मा हिंस्यात्सर्वा भूतानीति वेदवाक्यस्य अहिंसा परमो धर्म इति बौद्धवाक्यस्य च साम्यात् [illegible] भावः २
१ x विश्वामित्रादेरपि [illegible] अर्थः १

तर्क॰टी॰
३

१× [illegible] प्रतियोगि [illegible] दभावाभाववत्ते [illegible]

तदनाचारत्वेन ननु मापकतापत्तेरिति चेन्न। उच्यते॥ वेदप्रामाण्याभ्युपगंतृत्वं हि शिष्टत्वं॥ सामान्यतः सर्वे वेदाः प्रमाणमिति अभ्युपगमस्य सर्वशिष्टेषु सत्त्वात्॥ अत्र यद्यपि ज्ञानरूपाभ्युपगमस्य द्विक्षणमात्रावस्थायितया तदभाववद्दशायामव्याप्तिः उपलक्षणत्वेन पूर्वमास्तिकस्य बौद्धतादशायामतिव्याप्तिस्तथाप्याद्यवेदप्रामाण्याभ्युपगमकालीनविरोध्यभ्युपगमप्रागभाववत्त्वं शिष्टत्वमिति निष्कर्षो बोध्यः॥ य आदौ शिष्टस्ततो नास्तिकः पुनः शिष्टस्तत्र द्वितीयशिष्टतादशायां येविरोध्यभ्युपगमध्वंसास्तेषामाद्यशिष्टतादशायामभावादव्याप्तेराद्येति विशेषणात्॥ आद्यत्वं च वर्तमानकालीनत्वम्॥ एवं च मंगलस्य कृतिबोधितत्वेन सफलत्वे सिद्धे निर्विघ्नपरिसमाप्तिकामशिष्टकर्त्तव्यतादर्शनात्। उपस्थितत्वाच्च निर्विघ्नपरिसमाप्तिरेव फलमिति प्रतीयते॥ न चैवं यत्र मंगलं विना समाप्तिर्दृश्यते तत्राप्ययं कृतमंगलो निर्विघ्नपरिसमाप्तिग्रंथकर्तृत्वात् दृश्यमंगलकवदित्यादिक्रमेणाजन्मान्तरीयादिमंगलं कल्प्यते। यत्र मंगले सत्यपि समाप्तिर्न दृश्यते तत्र मंगलस्य असांगत्वं कल्प्यते॥ यथा वृष्ट्यभावे कारीर्याः॥ यदि सांगेपि मंगले न समाप्तिरिति निर्णीतं शा

४× [illegible] ४

४× [illegible]

४× [illegible]

टी॰
३

ध्यते॰ तत्रापि विघ्नबाहुल्यात् मंगलानंतरोत्पन्नद्विघ्नाद्वा समाप्तिप्रतिबंधः॥ विघ्नान्यूनसंख्याकमंगले हेतुत्वात्॥ विनाशनाशिकारमते तु मंगलस्य न समाप्तौ हेतुत्वं किंतु विघ्नध्वंसमात्रे। समाप्तिः स्वकारणादेव॰ समाप्तिं प्रति विघ्नसंसर्गाभावो हेतुः॥ यत्तु मंगलं विनापि परिसमाप्तिर्दृश्यते॰ तत्र स्वतः सिद्धविघ्नात्यंताभाव एव कारणं॥ मंगले सत्यपि समाप्त्यभावस्तु पूर्ववत्॥ तेन जन्मांतरीयग्रंथादिकमुद्दिश्य क्वचिदपि मंगलाचरणस्यादर्शनात् न व्यभिचारो निरस्यते॥ अधिकं तु नरसिंहकृतवैशेषिकभाष्यविवरणे द्रष्टव्यम्॥ मंगललक्षणं तु॰ विघ्नभिन्नत्वे सति विघ्नध्वंसप्रतिबंधकाभावभिन्नत्वे च सति प्रारिप्सितविघ्नध्वंससाधारणकारणत्वम्॥ विघ्ने विघ्नध्वंसप्रतिबंधकाभावे चातिव्याप्तिवारणाय सत्यंतद्वयम्॥ दृष्टविघ्नध्वंससाधारणकारणे कारीरीयागेतिव्याप्तिवारणाय प्रारिप्सितेति॰ कालादृष्टादावतिव्याप्तिवारणाय असाधारणेति॰ प्रारिप्सितविघ्नध्वंसार्थं कृतसुवर्णदानादेर्लक्षणत्वमेव॥ तथा च मंगलं कृतं किंतु न निबद्धमिति वा जन्मांतरीयमंगलमेवेति वा स्वतः सिद्धविघ्नात्यंताभावं प्रमाणांतरतः प्रतीत्य मंगलं न कृतमिति वा [illegible] ऽत्र कल्पनीयम्॥ निर्विघ्नसमा

५,४ स्वतःसिद्धविघ्नात्यन्ताभाववन्नष्टेऽनमङ्गले व्याप्तिवारणार्थं तादृशाकारस्तात्पदेन दत्त धर्मेवत्वमितिवक्तव्यम्: ५

३,४ आदिपदेन विनाशकजन्यप्रागभावादिसंग्रहः। तेषामपि कारणत्वात्। तथा च शुभकर्मजन्यादृष्टरूपो [illegible] नाशकः पापनाशकविघ्नध्वंसस्यापि [illegible] वर्णितमन्येन। सा च पापा [illegible] हेतो [illegible] नाशकानां विघ्नध्वंसस्याबाधात् [illegible] लक्षणघटकत्वेन [illegible] कारणाभावः इति बोध्यम्: ३,४

१ स्वतःपुरुषार्थत्वं च स्वज्ञानात्मस्वेतरज्ञानाधीनेच्छाविषयत्वं [illegible] १

तर्क·प
४

त्रिवलात् ॥ ननु ग्रंथस्य पदार्थज्ञप्तिरेव प्रयोजनमित्युक्तम् ॥ सा च न स्वतः पुरुषार्थः ॥ सुखदुःखाभावा
न्तररूपत्वाभावात् ॥ तथाहि· इह जगति पुरुषार्थद्वयम् ॥ सुखं दुःखाभावश्च ॥ तदर्थमेव पुरुषास्तदु
पायादौ प्रवर्तन्ते ॥ पदार्थबोधस्तु न सुखं न वा दुःखाभावः ॥ तस्य ज्ञानरूपत्वात् ॥ तत्कथं तदुपायभूतेऽत्र
शास्त्रे प्रेक्षावतां प्रवृत्तिर्भवेदिति चेत् ॥ सत्यम् ॥ किंतु ॥ दुःखोच्छेदरूपतया परमपुरुषार्थे मोक्षे परं
परया शास्त्रस्य प्रयोजकत्वात् शास्त्रे प्रवृत्तिं दर्शयितुं श्रीमदक्षपादमहामुनिप्रणीतन्यायपंचाध्या
यी प्रथमं सूत्रमवतारयति ॥ प्रमाणेति । प्रमाणादीनां तत्त्वसाक्षात्कारस्य मोक्षहेतुत्वात् तस्य च श्रव
णमनननिदिध्यासनसाध्यत्वात् ॥ मननस्य चानुमितिरूपस्य पूर्वरूपोपपत्तिहेतुज्ञानसाध्यत्वा
त् ॥ तादृशज्ञाने एतच्छास्त्रस्योपयोगित्वात्· परंपरया शास्त्रस्य मोक्षप्रयोजकत्वं परंपरया इष्ट
साधनताज्ञानस्यापि प्रवर्तकत्वात्· । अन्यथा भोजनजन्यतृप्त्यर्थिनस्तंडुलक्रयणादौ प्रवृत्तिर्न स्या
त् ॥ साधनतामध्यनिविष्टान्तथा सिद्धविशेषभेदानिवेशे लाघवात् ॥ शास्त्रापवर्गयोः प्रयोजक
भावः संबंधः ॥ नन्वज्ञानादिति हेतुतायां पंचमी ॥ निःश्रेयसाधिगम इत्यत्र कृदभिहितो भावोऽद्रव्यवत्

गुरुः
४

प्रयोज्य २

प्रकाशन इति न्यायादधिगम्यमानं निश्रेयसमित्यर्थः॥ अन्यथा निश्रेयसं प्रति हेतुत्वालाभात्॥ अधिग
मपदं च यस्मिन्नात्मनि तत्त्वज्ञानं तच्चैव मोक्ष इति सामानाधिकरण्यप्रदर्शनाय॥ यत्तु तत्त्वं ज्ञायतेऽनेने
ति तत्त्वस्यात्मनस्तत्त्वज्ञानं शास्त्रमिति॥ तन्न॥ शास्त्रस्य मोक्षहेतुत्वे मानाभावात्॥ न चैवं पञ्चम्याः प्रयोजकत्वे
लक्षणा॥ मुख्यार्थे नैवोपपादितत्वात्॥ न चेत्यादिवक्ष्यमाणग्रंथविरोधाच्च॥ न च तत्रापि सम्यग्ज्ञा
नपदं करणव्युत्पत्त्या शास्त्रपरमिति वाच्यम्॥ उद्देशलक्षणपरीक्षादीनां पदार्थबोधं प्रति हेतुत्वे
हितानर्थक्यम्॥ शास्त्रं प्रति तेषामहेतुत्वे न संदर्भविरोधापत्तेः॥ न च यदि शास्त्रपरत्वं न स्वीक्रिय
तेन तदा शास्त्रस्येष्टसाधनत्वग्रहाभावान्न तत्र प्रवृत्तिर्न स्यादिति वाच्यम्॥ तर्कभाषेति समाख्याबला
त्पदार्थबोधकत्वे शास्त्रस्य सिद्धे पदार्थबोधस्य च मुक्तिहेतुत्वे सू
त्रादेवावगते मोक्षप्रयोजकतया शास्त्रे प्रवृत्तिसंभवात्॥ वस्तुतस्तु पदार्थबोधस्य मोक्षहेतुता
यां प्रतिपादितायामाप्तवाक्यादिनः शास्त्रस्य तादृशबोधोपयोगितां प्रतीत्यापि तत्र तदर्थप्रवृत्ति
संभवान्न शास्त्रस्य मोक्षप्रयोजकत्वं शब्देन प्रतिपादनीयम्॥ अन्यथा यागस्य स्वर्गसाधनत्वे

तर्कटी
५

बोधितेपितत्साधनतत्त्वज्ञानानुष्ठानलब्धिहि क्षपणादावपि विध्यपेक्षास्यादिति बोध्यम्॥ तस्मात्गोवर्द्धनब
लभद्राभ्यां यदुक्तं॥ तन्नश्रद्धेयं॥ तत्वज्ञाः पुरुषास्तेषांनिश्रेयसमिति षष्ठीतिकेचित्॥ तच्चदृष्टसा
धनताबोधके च सूत्रे साधनतावाचकपदस्याप्यपेक्षानर्हत्वात्॥ तत्वज्ञानं तु सवासनमिथ्या
ज्ञानोच्छेदद्वारा मोक्षहेतुः॥ तथाहि॥ श्रवणादिक्रमोत्पन्नसाक्षात्काररूपतत्वज्ञानात्ससारमूलका
रणस्यसवासनमिथ्याज्ञानस्योच्छेदः ततः कारणाभावाद्रागद्वेषयोरुच्छेदस्ततः प्रवृत्तेस्ततः शरी
रसैवध्वस्य ततो दुःखोच्छेदेन मोक्षइति॥ तथाचन्यायसूत्रं॥ दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञा
नानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गइति॥ ग्रंथगौरवभियानविलिख्यते॥ अपवर्ग
लक्षणं तु प्रमेयग्रंथे दर्शयिष्यते॥ तत्वमनारोपितरूपमिमावार्थाः॥ तत्व॥ आरोपविषय
त्वस्य केवलान्वयित्वात्॥ किंतु यत्र यन्निष्ठमितत्रतत्तत्वम्॥ यत्र यन्नास्ति तत्रातत्वम्॥ त्वा
श्रयप्रतियोगिकात्यन्ताभावानधिकरणत्वं तत्वं यदधिकरणावच्छेदेन यस्य तत्र तत्वमिति
वा विशिष्य निर्वचनीयम्॥ प्रमाणोमारोपितेतरेतरद्वंद्वसमासः॥ तेनैव विवक्षितार्थसिद्धेः॥ ननु

गुरुः
५

कथमत्र द्वन्द्वसमासः॥ वार्थे हि द्वन्द्वसमासस्यार्थस्य भेदनियतः॥ तथा च पदार्थानां भेदे सति द्वन्द्वसमासो भवति॥ यथा धवखदिरपलाशा इत्यत्र॥ प्रकृते तु प्रमेयपदार्थेन सहतकस्यापि भेदः॥ सर्वस्यैव प्रमेयत्वात्॥ तथा हेत्वाभासपदार्थस्य निग्रहस्थानपदार्थेन सह भेदः॥ न च पदार्थभेदे कर्मधारयसमासस्याविहितत्वात् कर्मधारय एवास्तु नीलोत्पलमित्यादाविवेति वाच्यम्॥ संशयप्रयोजनपदार्थानाम्भेदादिति चेत् उच्यते· पदार्थतावच्छेदकस्य प्रमाणत्वप्रमेयत्वादेर्भेदसत्वात् न तत्र द्वन्द्वसमासस्यासाधुत्वम्॥ ननु यदि पदार्थतावच्छेदकभेदाभावेन द्वन्द्वाविषयत्वात्॥ द्वन्द्वविषय एव तद्बाधकस्यैकशेषस्य प्रवृत्तत्वादिति चेन्न· घट इत्यादौ पदार्थतावच्छेदकभेदाभावे अक्षा इत्यादौ नानार्थस्थले इन्द्रियत्वपाशत्वादिरूपपदार्थतावच्छेदकभेदसत्वेन तत्रैव सरूपैकशेषविषयत्वसत्वात् ॥कर्मधारयस्थले पदार्थयोरभेदो भासते॥ [redacted] ॥द्वन्द्वे तु न भेदो न वा अभेद इति कर्मधारयोर्द्वन्द्वस्य वैलक्षण्यं॥ प्रमाणादिपदानां प्रमाणत्वादिधर्मपरत्वं वा॥ तथा च निग्रहस्थानानामिति षष्ठिप्रकारितायां॥ प्रमाणत्वादिप्रकारकत्वज्ञानादिरर्थः॥ अत्र समासवाक्यमेवं॥ प्रमाणानि च प्र

× द्वन्द्वस्तदा द्वन्द्वसमासबाधकस्य सरूपैकशेषस्य निर्विषयत्वं स्यात्
तत्रपदार्थतावच्छेदकभेदा –६

नद१
६

मेयंच संशयश्च प्रयोजनेच दृष्टान्तोच सिद्धांताश्च अवयवाश्च तर्कश्च निर्णयश्च वादश्च जल्पश्च वितंडा
च हेत्वाभासाश्च छलानि च जातयश्च निग्रहस्थानानि चेति तानि तथा॥ विभागसूत्रेतु तथैव वचनभेदद
र्शनात्· तदभिप्रायस्तु प्रमाणानां स्वप्रयोजने परस्परनिरपेक्षत्वसूचनाय बहुवचनम्॥ प्रमेयसमु
दायस्यैव ज्ञानं मोक्षजनकमित्यात्मपदार्थस्यैवैकस्य प्रमेयस्य प्राधान्यमिति वक्तव्यपितं तत्रैकवचनम्॥
संशयानां परस्परनिरपेक्षाणामेव न्यायांगत्वमिति बहुवचनम्॥ प्रयोजनयोः परस्परनैरपेक्ष्येणोद्देश्य
तेति द्विवचनम्॥ दृष्टान्तयोरप्येवमेवोदाहरणत्वमिति तत्रापि द्विवचनम्॥ सिद्धान्तानामपि परस्परनै
रपेक्ष्यात् बहुवचनम्॥ अवयवानामप्यवान्तरवाक्यार्थबोधेनथात्वाद्बहुवचनम्॥ तर्कादीनामेकैक
स्यैव प्रयोजकत्वमिति तेष्वेकवचनम्॥ हेत्वाभासानामपि हेतुदूषणे नैरपेक्ष्याद्बहुवचनम्॥ एव
छलत्वादिष्विति निबंधनकारादयः॥ अत एव निर्देशे यथावचनं विग्रह इति भाष्यम्॥ सूत्रे यथाव
चननिर्देशस्तथा विग्रहः समासेकार्थ्यमित्यर्थः। अत्र च पदार्थबोधद्वारा शास्त्रस्य मोक्षहेतुत्वमाप्त
वाक्यादिना प्रतीय शास्त्रेप्रवृत्तिरितिबोध्यम्॥ तेन शास्त्रे प्रवृत्तौ प्रयोजनज्ञानं प्रयोजनज्ञाने च शा

रा६

उल:
६

स्वेष्टत्वप्रवृत्तिरित्यनेनाश्रयो निरस्तः॥ मोक्षप्राप्तिरिति॥ प्राप्यमानो मोक्ष इत्यर्थः पूर्वोक्तकर्तेः॥ ननु तत्त्व
ज्ञानं यथार्थज्ञानं तच्च प्रमाणप्रमेयेत्यादिसूत्रेणैव ज्ञानमित्यधिकवैफल्यमित्यत आह॥ नवेति॥ सम्य
गिति मिथ्याज्ञानोन्मूलनसमर्थश्रवणादिकर्मणोऽन्यत्र मितरभेदसाक्षात्काररूपमित्यर्थः॥ ईदृशं
वज्ञानं नोद्देशमात्रादिति भावः॥ तच्चेतरभेदानुमितावुद्देशस्य पक्षोपस्थापकतया लक्षणस्य हेतुज्ञा
५५ नविधया परीक्षायाश्च व्याप्तिग्राहकतया योगः॥ प्रवृत्तिः प्रकर्षेण वर्तनं सत्त्वं॥ एतच्छास्त्रं त्रिधा वर्तत इत्य
र्थः एतच्छास्त्रविषयिणीति व्याख्येयम्॥ यथोक्तेनैवोपपत्तौ लक्षणानौचित्यात्॥ शास्त्रभेदप्रमा
वेद्यत्वप्रवृत्तिभेदप्रदर्शनानौचित्याच्च॥ उद्देश इति॥ उद्देशतया व्यवहार्य्यमित्यर्थः॥ तेन लक्षणवाक्या
र्थेन सह उद्देशपदार्थस्यैकान्वयपौनरुक्तिः॥ एवमग्रेऽपि बोध्यम्॥ उद्देशशास्त्रस्य लक्षणमाह॥ नामेति
अत्र तृतीयाभेदे धान्येन धनवानितिवत् सम्यक्कीर्त्यते प्रतिपाद्यते परकीयबोधो जन्यतेऽनेनेति
संकीर्त्तनं वस्तुनः संकीर्त्तनं वस्तुसंकीर्त्तनम्॥ वस्तुप्रतिपादकमिति यावत्॥ नाममात्राभिलत्वं वस्तु
प्रतिपादकं॥ वस्तुप्रतिपादकं नाममात्रमुद्देश इति लक्षणं पर्य्यवस्यति॥ अत्र घट इति लौकिकवा

कर्त्तुः प्रवृत्तिरिति केचित् तन्न उद्देश इत्याद्यग्रिमग्रन्थविरोधात् नचात्राप्युद्देशविषयिणी ६

न.कं.१
८

स्यातिव्याप्तिवारणायवस्तुपदम्॥ लक्षणपरीक्षावाक्यविषयीभूतवस्तुपरम्॥ लक्षणीयप्रमाणस्यसा
मान्यतः प्रतिपादकं मेयपदे प्रमाणोद्देशलक्षणस्यातिव्याप्तिवारणाय नामपदं विशेषरूपेण संज्ञा
परं॥ विशेषरूपंच लक्ष्यतावच्छेदकं तेन प्रमेयत्वेन रूपेण लक्षणीयपदार्थस्योद्देशो प्रमेयप
दे सामान्यतः पदार्थप्रतिपादकेपि नाव्याप्तिः॥ लक्षणपरीक्षावाक्ये तु प्रमाणानामसत्वात् तत्रातिव्या
प्तिरतो मात्रेति लक्षणपरीक्षोपयोगि पदं न तासाकांक्षमित्यर्थः॥ ईदृशोद्देशस्य कर्त्तव्यत्वं ज्ञा
त्वा यथाभिधानेन क्वचित् लिप्यादिद्वारा प्रकाशः क्रियते इति न मौलिकोद्देशादावव्याप्तिशंका सं
कीर्त्तनस्योच्चारणपरत्वाभावात्॥ केचित्तु संकीर्त्तनं बोध इति वदन्ति॥ नत्र शाब्दस्यात्र लक्ष्यत्वात्न
अत्र च लक्षणवाक्यस्थितलक्षणभागैरेव नत्वभेदानुमितौ पक्षोपस्थितिसंभवात् उद्देशस्य लक्ष
णजिज्ञासोत्थापकत्वं न्यूनाधिकसंख्याव्यवच्छेदश्च प्रयोजनं बोध्यं॥ ननु पदार्थेषु न न्यूनसंख्या
या अवच्छेदः षोडशसंख्यातो न्यूनसंख्याया एकद्वित्वादिरूपाया अपि सत्वात्ताप्यधिकसंख्याया
परार्द्धपर्यंतसंख्यायाः पदार्थेष्वसत्वात्॥ एवं च पदार्थानां न्यूनाधिकाव्यवच्छेदः कथं बोध्यः॥ तथा

गुरुः
८

हिं प्रमाणादिषोडशपदार्थाधिकः प्रसिद्धो वा न वा ॥ आद्ये प्रसिद्ध्यापह्नोतुमशक्यत्वात् ॥ अंत्ये कस्यनिषेधेः ॥ प्रतियोग्यप्रसिद्धेः तदुक्तं सदसग्राममभावो नित्यमुपैति नैकेन सनैति वैद्यमाने ॥ पदार्थेषु प्रमाणत्वादिषोडशपदार्थविभाजकोपाध्यन्यतमायोगव्यवच्छेदो वाच्यः ॥ अतिरिक्तपदार्थसत्वे एतादृशनियमस्यासंभवात् ॥ विभागस्तूद्देश एव ॥ सामान्योद्दिष्टस्य विशेषतः पुनरुद्देशो विभागः यथा प्रमाणपदेन सामान्यत उद्दिष्टानां प्रत्यक्षानुमानेत्यादिरूपेण विभाग इति ॥ तदिति ॥ नाममात्रेण वस्तुसंकीर्तनमित्यर्थः ॥ लक्षणं तु ॥ लक्षणशास्त्रं तु लक्षणशास्त्रस्य लक्षणमाह ॥ असाधारणेति ॥ असाधारणो लक्ष्यतावच्छेदकव्यापकत्वे सति लक्ष्यतावच्छेदकव्याप्यो यो धर्मस्तद्वचनं तत्प्रतिपादकं वाक्यं लक्षणशास्त्रमित्यर्थः ॥ प्रत्यक्षप्रमाकरणत्वं प्रमाणधर्म इत्यादिवाक्यातिव्याप्तिवारणाय सत्यंतम् ॥ पदार्थत्वं प्रमाणधर्म इति वाक्यातिव्याप्तिवारणाय व्याप्यदलम् ॥ धर्मपदं च लक्षणतावच्छेदकसंबंधेन व्यापकत्वलाभार्थं ॥ अन्यथा चैत्रजन्यतावच्छेदकताया घटत्वव्याप्यज्ञानेरपि समवायेन घटलक्षणत्वापत्तेः ॥ कालिकसंबंधेन घटत्वव्याप्यकत्वात् ॥ असंभववारणाय वचनपदम् ॥ शास्त्रस्यासाधारणधर्मरूपत्वाभावात् ॥

घटत्वस्यैकत्वे

२४ पार्थिवघटं सुवर्णघटं चादाय तत्सामानाधिकरण्यस्याभाववद्वृत्तित्वस्य स्वसमानाधिकरणभेदप्रतियोगिता[illegible]च्छेदकधर्मवत्त्वे [illegible] न वस्तुविशिष्टत्वरूपस्यान्यस्य पृथिवीत्वघटत्वे तेजस्त्वघटत्वयो सत्वात् तेषां अतिव्याप्तिवारणार्थं [illegible] घटत्वं अनेकैकत्वमित्याह तेषां च तेषां च वैयर्थ्यात् [illegible] घटत्व आतिमत्वस्य लक्षणा(स्थाने) तात्पर्यमित्यर्थः २

त॰दी॰
८

शाखस्यात्र लक्ष्यतात्॥ लक्षणस्यालक्षणे तु वचनपदेशने॥ संभवो भवतीति तत्र तन्न देयम्॥ अत्र लक्ष
णस्य त्रयो दोषाः सन्ति अतिव्याप्तिरव्याप्तिरसंभवश्चेति लक्षणत्वेनाभिमतस्यालक्षणतावच्छेदक
त्वेनाभिमतसंबंधेनालक्ष्यवृत्तित्वमतिव्याप्तिः॥ यथा पृथिव्या द्रव्यत्वम् नत्वादिकं लक्ष्यवृत्तित्वे स
ति लक्ष्यवृत्तिभेदप्रतियोगितावच्छेदकत्वमव्याप्तिः॥ यथात्रैव घटत्वं। लक्षणतावच्छेदकविरुद्धत्वमस
संभवः॥ यथात्रैव जलत्वम्॥ एते त्रयोप्यसाधारणत्वस्याविघटका भवंति॥ अतिव्याप्तौ व्याप्यद
लस्येतरयोश्च व्यापकदलस्य भंगात्‌ एषां दूषकताबीजं तु लक्षणेनेतरभेदानुमितौ अतिव्याप्तौ
व्यभिचारः॥ इतरयोश्च भागासिद्धिस्वरूपासिद्धी अभाव नैक विशेषणस्य तु व्यर्थविशेषणताप्र
युक्तव्याप्यत्वासिद्धिः॥ अत्र साधारणत्वं व्यतिरेकिधर्मत्वमिति गोवर्द्धनः॥ केचित्तु वृत्तित्वे सति किं
चिद्वृत्तित्वं॥ यत्र सर्वत्र वृत्तिमत्त्वं वा बलभद्रः॥ उभावपि वर्पारौ· एवं सति प्रमेयपदार्थस्यालक्षणी
यत्वापत्तेः॥ व्यतिरेकी धर्मस्य सर्वस्यैवाव्याप्तेः प्रमाविषयत्वादिरूपकेवलान्वयिधर्मस्य तन्मते
व्यतिरेकिधर्मत्वाभावेनालक्षणत्वादिति स्फुटतरमालोचनीयम्॥ अत एव गुणाकिरणावल्यामा

गुरुः
८

५ × पक्षतावच्छेदकसमानाधिकरणे न हेत्वभाववत्पक्षे भागासिद्धिः पक्षतावच्छेदकावच्छेदेन हेत्वभाववत्पक्षः स्वरूपासिद्धिः ५
परकालीनान्यत्वावच्छिन्नाद्दिदृतौ स्वावच्छिन्नविषयकप्रतीतिविषयतावच्छेदकप्रकृतसाध्यतावच्छेदकत्वसमानाधिकरणधर्मवत्त्वम्
विषयकप्रतीतिविषयतावच्छेदकत्वं प्रकृतं [illegible] चन्तादृशविषयतावच्छेदकत्वे सति तत्समानाधिकरणतादृशार्थप्रतियोगितावच्छेदकत्वं व्याप्यत्वासिद्धिः

६ × असम्भवस्थले व्याप्यदलस्यापि भङ्गिरित्यग्रे बोध्यः ६
५ × साध्याभाववद्वृत्तित्वं व्यभिचारः अनेन व्याप्यत्वासिद्धिः ५

वार्थ्वरणैःप्रमाकरणत्वमिति प्रमाणलक्षणम् प्रमाविषयत्वमिति प्रमेयस्याप्यनेन ग्रंथेन प्रमा
विषयत्वस्य प्रमेयलक्षणत्वमुक्तम्॥ ननु प्रमाणत्वादिरूपासाधारणधर्मवत्त्वेषु प्रमाणप्र
मेयेषूद्देशपरीक्षावाक्येषु सर्वत्रैव लक्षणमतिव्याप्तम्॥ न च तेषामपि लक्षणत्वं लक्षणत्वस्य
व्यापकत्वादिति वाच्यम्॥ तदा लक्षणत्वस्य शास्त्रत्वसमशीलतया शास्त्रविभाजकत्वानुपप
त्तेरित्याशंकायामाह॥ यथेति॥ गोश्वात्वादिमत्त्वमिति वाक्यम्॥ यथेत्यर्थः॥ तथा च लक्ष्यताव
च्छेदकप्रकारेण लक्ष्यमुद्दिश्य यत्रासाधारणधर्मः प्राधान्येन विधीयते तल्लक्षणशास्त्रम्॥ ते
न पृथिवीत्वेन घटमुद्दिश्य यत्र पृथिव्याः कंबुग्रीवादिमत्त्वं लक्षणं क्रियते तत्र न तल्लक्षणशास्त्र
त्वमिति मंतव्यम्॥ यथालक्षितं तत्वेति॥ यथा येन प्रकारेण लक्षणं कृतं तेनैवेत्यर्थः यथा पृथिव्या
गंधवदिति लक्षणे कृते तेन घटे गंधो न वेति विचारेण परिक्षेत्यर्थः॥ विचार इति विषयसंशयपूर्वपक्षसि
द्धांतोपसंहाररूपपंचांगोपेतमधिकरणवाक्यं परिक्षाशास्त्रमित्यर्थः॥ तदुक्तम्॥ विषयो विशय
श्चैव पूर्वपक्षस्तथोत्तरम्। निर्णयश्चेति पंचांगं शास्त्रेऽधिकरणं स्मृतम्॥ विषयं प्रतिज्ञां विशयः

तर्क· १
९

संशयः। वादिप्रतिवादिभ्यामेवं क्रमेणोक्तं तस्य परीक्षादेर्लक्षणत्वमेव॥ यदि तु प्रामाणिकानां तत्र तत्र न्याय
व्यवहारस्य च शास्त्रान्तर्गतत्वे सतीति विशेषणं देयं॥ तेनेति। येनैव तत्त्वेऽद्देशः कृतो लक्षणपरीक्षे
न कृते तेनेत्यर्थः॥ तत्रापि तेष्वपि मध्ये॥ प्रथममिति। प्रथमोद्देशबीजं तु सर्वापेक्षयाऽभ्यर्हितस्यापवर्ग
तस्य प्रमेयपदार्थस्य प्रमाणासिद्धस्योपादेयत्वमिति प्रमेयात्पूर्वं तस्योद्देशः एवं सर्वत्र मन्तव्यात्प्रमे
यस्याधिकरणागततया संशयस्य प्रमाणप्रवृत्त्युद्देश्यतया प्रयोजनस्यानुमानप्रमाणामाङ्गतया
दृष्टान्तस्य अवयवानां पदार्थानुमानाङ्गभूतानामपि द्व्यवयवत्र्यवयवपञ्चावयवादिभेदस्य सिद्धां
ताधीनत्वात्सिद्धांतस्य॥ पदार्थानुमानाङ्गतयाऽवयवपदार्थस्य प्रमाणसहकारितया तर्कस्य।
प्रमाणफलतया निर्णयस्य तत्त्वबोधकतया वादस्य॥ स्वपक्षस्थापकतया जल्पस्य। जयसाधनतया
वितण्डायाः॥ अनुमानदोषत्वेन परिहार्यतया अवश्यवेदितव्यस्य हेत्वाभासपदार्थस्य स्वमतव्याघा
तकत्वाच्छलस्य॥ असदुत्तरत्वाज्जातेः। विवादावसानभूतत्वान्निग्रहस्थानस्यांतेऽद्देशः। प्रमाकर
णमिति। प्रमायाः करणमित्यर्थः॥ प्रमाणमिति। प्रमाणतया व्यवहार्यमित्यर्थः। तानन्तरमेत

गुरु
९

तुमाने सिद्धसाधनम् ॥ तथा च प्रमीयतेनेनेति व्युत्पत्त्या प्रमाणशब्दः करणसाधनः ॥ भावसाधने प्रमीयत
इति प्रमाणं प्रमेत्यर्थः ॥ क्वचित्कर्मसाधने। प्रमीयते यत्तत्प्रमाणम् ॥ प्रमेयमित्यर्थो बोध्यः। प्रमाक
रणत्वं च लक्षणमित्यत्र प्रमाकरणमिति पाठे भावप्रधानो निर्देशः। यथार्थेति ॥ तद्वति तत्प्रकारकं यथा
र्थं अनुभवत्वं जातिविशेषः स्मृतिभिन्नज्ञानत्वं वा। तथा च तद्विशेष्यकत्वे सति तत्प्रकारकं यत्स्मृ
तिभिन्नज्ञानं तत्प्रमेत्यर्थः पर्यवस्यति ॥ शुक्तिविशेष्यकरजतत्वप्रकारकचाक्षुषेतिव्याप्तिवारणा
य सत्यन्तम्। रजतविशेष्यकशुक्तित्वप्रकारकचाक्षुषे रजतप्रमालक्षणस्यातिव्याप्तिवारणाय तत्
प्रकारकत्वमिति। रजतत्वप्रकारकरजतविशेष्यकस्मृतौ अतिव्याप्तिवारणाय स्मृतिभिन्नमिति ॥
रजतत्वप्रकारकरजतविशेष्यकेच्छादावतिव्याप्तिवारणाय ज्ञानेति ॥ ज्ञानपदं च निश्चयपरं तेन
रजतत्वधर्मिके इदं रजतं न वेति संशये नातिव्याप्तिः। निश्चयत्वं चात्र तदभावाप्रकारकत्वमात्रं। अधि
कस्य वैयर्थ्यात्। अत्र च रंगरजतत्वे प्रमालक्षणस्यातिव्याप्तिवारणाय तद्विशेष्यकत्वावच्छिन्नं तत्प्र
कारत्वमिति वाच्यम् ॥ ॥ तथा चात्र रजतत्वप्रकारकत्वं न रजतविशेष्यकत्वावच्छिन्नं किंतु रंगविशेष्य

योरजतत्वरङ्गत्वप्रकारकभ्रमे रजतत्ववद्विशेष्यकत्वस्य रजत्वप्रकारकत्वस्य च सत्वात् रजत ×२

ज्ञानस्य तत्प्रकारकत्वं बोध्यम्. तेन कालिकादिसम्बन्धेन गन्धसम्बन्धी जलविशेष्यके समवायसम्बन्धेन ४

तर्दी.१
१०

कत्वावच्छिन्नमिति नातिव्याप्तिः। गगने शब्द इत्याकारे गगनप्रकारकशब्दविशेष्यकप्रमायां गगनस्याऽवृत्ति
तया गगनवद्विशेष्यकत्वाप्रसिद्ध्या अव्याप्तिवारणाय तद्विशिष्टत्वं तत्संबन्धीति वाच्यम्॥ भवति च गग
नेशब्द इति ज्ञाने समवायसंबंधेन गगनसंबद्धिशब्दविशेष्यकं गगनप्रकारकं चेति नाव्याप्तिः॥
येन संबंधेन विशेष्यस्य तत्संबंधित्वं तेनैव संबंधेन गंधप्रकारके ज्ञाने नातिव्याप्तिः। अस्मिन्कालीनो घ
टो गंधवानिति पाकरक्तो घट इदानीं श्याम इति। अत्र कपिसंयोगवति वृक्षे मूले वृक्षः कपिसंयोगवा
निति भ्रमेऽतिव्याप्तिवारणाय यदवच्छेदेन विशेष्यं यत्संबंधि तदवच्छेदेन तत्प्रकारत्वं वक्तव्यम्॥
तथा चऽस्मिन्निकालावच्छेदेन गंधस्य रक्तताकालावच्छेदेन श्यामरूपस्य मूलावच्छेदेन कपिसंयोग
स्य च विशेष्यसंबंधाभावान्न दोष इति वदन्ति॥ एवं सति घटो गंधवानित्याद्यवच्छेदकाविषयप्रमा
यामव्याप्तिः। अस्मिन्कालानवच्छेदेन घटसंबंधिनो गंधस्य तत्कालावच्छिन्न प्रकारत्वाभावात्
निरवच्छिन्नगंधस्यैवात्र प्रकारत्वे विशेषणं देयम्॥ गंधस्य घटसंबंधितानवच्छेदकोपऽस्मिन्काल
स्तदनवच्छिन्नत्वमेव गंधीयप्रकारत्वमिति नाव्याप्तिः। अस्मिन्कालीनो घटो गंधवानित्यादौ तथा

गुरुः
१०

२ प्रकारत्वात्. तथा च तद्धरणाय विशेष्यसम्बन्धितानवच्छेदकं तदनवच्छिन्नत्वं ५

विधोत्पत्तिकालावच्छिन्नत्वमेव गंधीयप्रकारकत्वमिति न दोषः तथा च गंधसमवायिविशेष्यकत्वा
वच्छिन्नगंधीयघटवृत्तितानवच्छेदकानवच्छिन्नसमवायिनिरूपितगंधीयप्रकारताशालित्वे तद्ध
र्मिकगंधाभावप्रकारकान्यत्वे सति भिन्नज्ञानत्वं समवायेन गंधप्रमात्वम्॥ घटो गंधवान् जलं गंधा
भाववत् इत्यादिसमूहालंबनेऽव्याप्तिवारणाय तद्धर्मिकेति॥ एवमन्यत्रापि निर्वचनीयम्॥ विष
यभेदेनैव प्रमालक्षणाभेदात्॥ परं त्वयं घट इत्यादौ निरवच्छिन्नघटत्वादिप्रकारकप्रमायां विशेष्यवृत्ति
न८ तानवच्छेदकानवच्छिन्नत्वं देयम्॥ प्रयोजनाभावात्॥ वस्तुतस्तु उत्पत्तिकाले इदानीं घटो गंधवानि
त्यादिबोधे समवायेन घटगंधस्यावच्छेद्यतासंबंधेन कालोपि गंधे प्रकारतया भासते॥ तथा च त
देशे भ्रमतया येन संबंधेनेत्यादिनैवातिव्याप्त्यभावे विशेष्यवृत्तितानवच्छेदकेत्यादिविशेषणं कुत्रा
पि न देयमिति त्रुटिसौरगमनया ग्रंथगौरवभिया च विरम्यते॥ निर्विकल्पकस्य लक्षणं त्वे भ्रमभिन्नत्वे
सति स्फुटं तस्य ज्ञानत्वे प्रमात्वं वाच्यम्॥ भ्रमत्वं च तदभाववद्विशेष्यकत्वावच्छिन्नतत्प्रकारकज्ञान·
त्वमिति· तेन पृथक् निष्प्रयत्वं न निवेशनीयं। ग्रंथकारमते निर्विकल्पकस्यापि प्रमात्वम्॥ तथा च

न·कौ·प्र
११

वक्ष्यति निर्विकल्पकरूपानुप्रमाफलमिति ॥ एतादृशप्रमायां करणत्वं प्रमाणत्वं ॥ करणत्वं च व्यापार
वत्त्वे सति असाधारणकारणत्वम् ॥ व्यापारत्वं च तज्जन्यत्वे सति तज्जन्यजनकत्वं ॥ नन्वेवमात्ममनः
संयोगादिरूपव्यापारवति प्रमाकारणे आत्मादावतिव्याप्तिरिति चेन्न ॥ व्यापारवत्त्वे सति जन्यवृत्ति
प्रमानिष्ठकार्यताप्रतियोगिककारणताशालित्वस्योक्तत्वात् ॥ विषयेन्द्रियसंनिकर्षादौ च प्रमा
णव्यापारे अतिव्याप्तिवारणाय सत्यंतं ॥ चक्षुर्मनोयोगादेश्चाक्षुषत्वावच्छिन्नं प्रति हेतुत्वेपि न
व्यापारवत्त्वं ॥ चक्षुर्घटसंयोगस्य तज्जन्यत्वे मानाभावादिति न तत्रातिव्याप्तिः ॥ आत्मादावति
व्याप्तिवारणाय जन्यवृत्तित्वेति ॥ जन्यज्ञानत्वेन जन्यात्मगुणत्वेन वात्मत्वेन समानतः कार्यका
रणभावो विशिष्य न तु प्रमित्वेन वा कल्पनीयः ॥ न तामत्वेन चाक्षुषत्वेनानुमितित्वादिना
वा मध्यमविधः कार्यकारणभावः कल्प्यते ॥ प्रमाणाभावात् । अतएव विषयालोकसंयोग
रूपव्यापारवति चाक्षुषप्रमाकारणे आलोकेनातिव्याप्तिः । तमोभिन्नचाक्षुषत्वमेव तस्य का
र्यतावच्छेदकं ॥ न च न जातिः ॥ अत्रानुमानादावनुमितित्वादिजातिरेवावच्छेदिका ॥ प्रत्यक्ष

उतः
११

स्थलेतु प्रमक्ष प्रमात्वं न तथा ॥ नित्यईश्वरज्ञाने प्रमित्वात्। किंतु चाक्षुषत्वादिकं चक्षुःसंयोगादि
कं व्यापारः। श्रावणत्वे श्रोत्रमनोयोगः शब्दो वा श्रोत्रस्य व्यापारः। एवं घटादिकारणे दंडादावतिव्या
प्तेः प्रमानिष्ठेति ॥ प्रमानिविष्टयथार्थपददाने पीतः शंख इति भ्रमजनके सदोषचक्षुष्यति
व्याप्तिः। तस्यापि चाक्षुषत्वावच्छिन्नं प्रति हेतुत्वात् ॥ व्यारवत्वाद्य। संस्कारद्वारा स्मृतित्वाव
च्छिन्नं प्रति कारणज्ञानेऽतिव्याप्तिवारणाय प्रमान्तर्गतस्मृतिभिन्नपदं ॥ इच्छात्वव्याप्यतागत्वा
वच्छिन्नं प्रति अदृष्टद्वारा कारणे मिथ्याज्ञानेतिव्याप्तिवारणाय प्रमान्तर्गतस्मृतिप्रविष्टज्ञान
पदम् ॥ एतादृशप्रमाणलक्षणे ईश्वरस्य न लक्षत्वमिति ॥ नित्यप्रमाश्रयत्वेनाधारत्वेनास्य प्र
माणत्वमिति बोध्यम् ॥ नवीनमते तु फलायोगव्यवच्छिन्नकारणं करणमिति करणलक्षणं ॥
यत्सत्वे द्वितीयतृतीयक्षणे फलाभावो नास्ति तु व्यापारत्वेनाभिमतेन्द्रियसंयोगादिकमेव करणं।
अत एवानुमितिकरणप्रसंगे चिंतामणिकारैरप्युक्तं ॥ तत्र लिंगपरामर्श इति ग्रंथकारोपि त
थैव वक्ष्यति ॥ लिंगपरामर्शोनुमानमिति तद्वृतिकरणं प्राचीनमते व्याप्तिज्ञानं करणं परामर्श

मि

र्षो व्यापारः॥ तथा च नवीनमते प्रमाणलक्षणे व्यापारवत्त्वे सतीति हित्वा कारणताशालीमत्त्वं करणताशा
लीति वाच्यं॥ जातिमत्त्व छिन्नेति न वाच्यम्॥ आलोकसंयोगादेस्तथाविध करणत्वाभावात्। आलोकसं
योगे सति तेवा लक्षणं भवत्येवेति नियमाभावात्॥ यत्तो क्तव्याप्तिवृत्तिसर्वत्र व्यापारवत्त्वाति व्याप्तिरेतन्म
तेवोध्या॥ यत्तु अनुभवत्वव्याप्यजातिमत्त्व छिन्नकार्यतानिरूपितकारणताश्रयत्वे सति व्यापारवत्त्वे
सति प्रमाकारणत्वमिति तिन्नो वृद्धनैनोक्तं॥ यद्वा॥ यथार्थज्ञानकारणत्वे सति व्यापारवत्त्वे सति अनुभ
वत्वव्याप्यजातिमत्त्वछिन्नकार्यताप्रतियोगिककारणताश्रयत्वं प्रमाणमिति तदेवलक्षणं परि
वर्त्य बलभद्रेणालिखितं॥ तद्द्वयमप्ययुक्तं॥ तथा हि॥ आत्मातिव्याप्तिवारणार्थमेवानुभवत्वे
त्यादिविशेषणं कारणतावच्छेदविशिष्टं॥ अत्र प्रमानिष्ठकार्यतायां जातिमत्त्वछिन्नत्वविशेषणेनैव
सामंजस्ये महागुरुतरत्वरं भवेषैफल्यात्॥ अयथार्थज्ञानमिति॥ तद्भाववति तत्प्रकारकज्ञानमित्य
र्थः॥ विपर्ययेति॥ तदभाववति तत्प्रकारकज्ञानात्मकनिश्चयः इत्यर्थः। अन्यथा संशयतर्कयोर
पि विपर्ययमध्ये अंतर्भावेनानन्वयात् ज्ञानानामिति स्वरूपकथनं॥ ज्ञानप्रभेदा एवैते इति

गलबोधनार्थं॥ तन्निरासइति। अतिव्याप्तिविषयत्वनिरासइत्यर्थः। अनुभवपदेनकथं स्मृ
तेर्निरास इत्यत आह॥ अनुभवोनामेति। व्यतिरिक्तं। भिन्नं। तदुक्तं। तं विद्भगवतीदेवी स्मृत्यनुभ
वभेदिका अनुभूतिः स्मृतेरन्यास्मृतिः संस्कारमात्रजेति कश्चिल्लक्षणकेइयं कारिकातिष्ठ
ति॥ एतन्मतभिज्ञायां सोयंदेवदत्त इत्यत्रततासंस्कारजन्यायामतिव्याप्तिवारणायमात्रेति। मात्र
पदं बहिरिन्द्रियाजन्यत्वपरमूतेन बहिरिन्द्रियाजन्यसंस्कारजन्यज्ञानत्वं स्मृतित्वं। मनोजन्ये स्मृ
तिमात्रे असंभववारणाय बहिःपदं॥ कालादिरूपबहिःपदार्थजन्यत्वात दोषवारणाय इं
द्रियपदं। मानससाक्षात्कारे अतिव्याप्तिवारणाय संस्कारपदं॥ संस्कारध्वंसातिव्याप्तिवा
रणाय [redacted] ज्ञानपदं॥ प्रकृष्टकारणमिति॥ २॥ व्यापारवत्वं वा प्रकृष्टत्वं इति प्राचीनाः
स्वानंतरोत्पत्तिकसहकार्यंतरानपेक्षत्वमिति नवीनाः॥ सहकारित्वं च स्वाजन्यत्वे सति स्वजन्
यजनकत्वं॥ व्यापारस्यापि सहकारिताव्यवहारश्चेन दासस्यं तेन देयं॥ यस्येति॥ कार्यात्पूर्व
भावो अव्यवहितकार्य्यप्रागभावाधिकरणकालवृत्तित्वं। नियतो नियमवान्॥ नियमो

व्याप्तिनिरूपकत्वेन न तत्रानुव्यापकः॥ यस्य कार्य्यपूर्वकालवृत्तित्वं कार्य्यपूर्वकालत्वव्यापकमित्यर्थः
नियतो व्याप्य इत्युक्तौ तु दैवात्तत्रागतस्य रासभस्यापि कार्यपूर्वभावः कार्य्यपूर्वकालत्वव्याप्य इ
ति तद्दोषतादवस्थ्यापत्तेः अनन्यथासिद्धो ऽन्यथासिद्धिभिन्न इत्यर्थः॥ यद्यपि दण्डरूपादेः
पूर्वभावो नान्यथासिद्धः किन्तु दण्डरूपादिधर्मियेन सहैव यस्यान्ये प्रतीतावेन तथैव प्रतीतेस्त
स्यापि पूर्वभावस्यान्यथासिद्धत्वं बोध्यं॥ अत्र प्रागभावस्य न व्यक्तित्वेन प्रवेशं तेन स्वप्रतियोगि
जनकाभावत्वादिरूपप्रागभावत्वादिकमादाय नात्माश्रयः॥ प्रागप्राभावत्वमखण्डोपाधिरि
ति केचित्॥ तथापीति॥ रासभीयपटपूर्वकालवृत्तित्वस्य पटसामान्यस्य पूर्वकालत्वाव्या
पकत्वात्॥ रासभं विनापि पटं नरोत्पत्तेर्दर्शनादिति भावः॥ न च न तत्पटं प्रति तद्रासभपूर्वभाव
स्यानियतत्वात् तत्र तस्य हेतुत्वमस्त्विति वाच्यं॥ अन्यत्र क्लृप्तनियतपूर्ववर्तिन एव कार्य्यसं
भवे इत्यादिवक्ष्यमाणान्यथासिद्धिसत्त्वात्॥ अत एव यत्सामान्ययोः कार्य्यकारणभावो बा
धकं विना न तद्विशेषयोरित्यादिना सामान्यविशेषकार्य्यकारणभावयोः समनैयत्यमुक्तं॥

दण्डत्वादेरन्यथासि

रामः १२

नतु पटसामान्यं प्रतिरासभस्यान्यथासिद्धत्वादेव वारणे नियतपदवैयर्थ्यमिति चेन्न॥ पटसामान्यं
प्रतितादृशान्यथासिद्धिसंभवात्॥ अन्यत्र पटसामान्यभिन्ने यघटादौ त्वनियतपूर्ववर्त्तिनो दं
डादेः पटोत्पत्यसंभवात्। किं तेनेति॥ येन सहैवेत्यादि वक्ष्यमाणान्यथासिद्धिसत्वादित्यर्थः॥ न
तु तंतुरूपं चेदन्यथासिद्धं तदा पटरूपं प्रत्यपि तंतुरेव कारणं स्यान्न तंतुरूपं तु न स्यादत आह॥ प
टरूपेति। पटरूपजनने पक्षीरात्वादन्वयव्यतिरेकानुविधानेनास्य चरितार्थत्वात्॥ ततो रूपेऽतु
रूपेऽपितादिपटरूपे अन्वयव्यतिरेकाभावान्न तत्र हेतुत्वमिति भावः॥ नन्वेवं सति पटं प्रति तंतुरूपं का
रणं न तु वेति विनिगमनाविरहः। एकत्र पक्षपातिनी युक्तिर्विनिगमना। सा च नास्ति। तथा हि। य
था तंतुना सहैव तंतुरूपस्य पूर्वभावोऽवगम्यते तथा तंतोरपि तद्रूपेण सहेति वक्तुं शक्यत्वात्॥ अत्रा
ह। पटं प्रतीति॥ कल्पनायां कारणतावच्छेदककल्पनायां गौरवात्॥ तंतुत्वापेक्षया तंतुरूपत्वस्य
गुरुत्वादित्यर्थः॥ यथाश्रुते किन्त्वन्यथासिद्धः इत्यनेनैवोपपत्तौ पटरूपेत्यादिवैयर्थ्यात्। यत्तु गौ
रवपदेन येन सहैवेत्यादि अन्यथासिद्धिरेवोच्यत इति। बलभद्रेणोक्तं। तन्न। लक्षणापत्तेः अन्यथा

सिद्धस्य पूर्वमेवोक्तत्वात्पौनरुक्त्यापत्तेश्च· उपसंहरति· तेनेति॥ अनन्यथासिद्धस्येति यत पूर्वभा
वित्वं पूर्वकालवृत्तित्वं तद्धजातीयत्वं कारणत्वमित्यर्थः॥ तेन नारणपक्ष्य दंडाद्यव्याप्तिः॥ साजात्यं
च येन रूपेणान्यथासिद्धभावस्तेनेति यत पूर्ववृत्तितावच्छेदकरूपेणावबोध्यम्॥ तेन द्रव्यत्वा
दिना रासभेपि तंतुसाजात्यान्नातिव्याप्तिः॥ अन्यथासिद्धत्वं च चिंतामणिकारमते त्रिधा भवति॥
तथाहि। येन सहैव यस्य यं प्रति पूर्वभावो ज्ञायते तेन तेनान्यथासिद्धमित्युक्तं॥ अन्यं प्रति पूर्ववृ तंप्रति
त्तित्वे ज्ञात एव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते तत्तं प्रत्यन्यथासिद्धमिति द्वितीयं॥ अन्य
त्र क्लृप्तनियतपूर्ववर्तिन एव कार्यसंभवे तत्सहभूतमन्यथासिद्धमिति तृतीयम्॥ येने
ति येन तंतुना सहैव यस्य तंतुरूपस्य यं पटं प्रति पूर्वभावो ज्ञायते तेन तं पटं प्रति तत्तंतुरूपं ते उक्तः
तर न तंतुनान्यथासिद्धमित्यर्थः॥ तंतुरूपस्य तत्पूर्वभाव ज्ञाने रूपस्यातिप्रसक्तेनयानं तंतुरूपत्वे १४
नैवविषयत्वं वाच्यं॥ तथा चोक्तान्यथासिद्धिः। साहित्यं च एकज्ञानविषयत्वं बोध्यम्॥ पूर्ववृत्तित्वांशे
इति केचित्॥ तन्न॥ तंतुरूपं पटपूर्ववृत्तीति ज्ञाव्कृतौ तंतुपूर्वत्वं विनापि तद्रूपपूर्ववृत्तित्वस्यावि

घटत्वेन तद्धेतुत्वेति साहित्यनियमभङ्गप्रसंगात्॥ एकज्ञानविषयत्वं तु नत्वाप्यसीति ध्येयम्॥
अत्र येनेत्यस्य स्वतन्त्रान्वयव्यतिरेकशालि नेति विशेषणं देयं॥ तेनातथाभूतेन तंतुत्वेन तंतो
र्नान्यथासिद्धिः॥ तथा यस्यान्यस्य स्वतंत्रान्वयव्यतिरेकुम्भन्यप[illegible]ति विशेषणं देयम्॥ [illegible]
[redacted] तेन तंतुसंयोगस्तंतुनानान्यथासिद्धः॥ ॥
तंतोस्तस्यापि तंतुसंयोगं विना पटानुत्पत्तेः। अत्रैव कुंभकारपितृत्वरूपेण कुंभकारपिताप्यन्यथा
सिद्धः॥ न तु तंतुरूपस्य तंतुरूपत्वेनान्यथासिद्धत्वेपि पटं प्रति रूपत्वेन हेतुत्वे को दोषः॥ न चाति
प्रसक्तत्वमिति वाच्यम्॥ तंतुत्वादेरपि पटानुपधायकतंतुवृत्तित्वेनातिप्रसक्तत्वात्। न च ये
न रूपेणान्यथासिद्धिस्तद्व्यापकरूपेणापि तथैवेति वाच्यम्॥ कुलालीयपितृत्वस्यान्यथासिद्ध
त्वावच्छेदकतया न व्यापकेन कुलालत्वेनापि तथात्वापत्तेरिति चेत्। मैवं। स्वतंत्रान्वयव्यतिरेक
शालिनीयन पूर्ववृत्तिपदार्थैकविदपि न वर्त्तते यो धर्मः स कारणतावच्छेदकतया न कल्प्यते:
विरोधात्॥ तंतुरूपं तथेति सुधीभिर्विभावनीयं॥ अन्यं प्रतीति। यथा आकाशस्य शब्दं प्रति

सर्वज्ञत्वे ज्ञाते एव ज्ञानादिकं प्रति सर्वज्ञत्वमवगम्यते इति ज्ञानादिकं प्रत्याकाशमन्यथासि
द्धम्। आकाशत्वं च शब्दसमवायिकारणत्वम्॥ तेन रूपेण हेतुत्वकल्पनायामेवान्यथासि
द्धत्वम्॥ ~~अ~~·द्रव्यत्वादिना तु संयोगादिकं प्रति हेतुत्वमस्त्येवाकाशस्य॥ नन्वेवं शब्दं प्रत्याका
शस्य केन रूपेण हेतुत्वं॥ आकाशत्वेन चेत्॥ स एव दोषः। आत्माश्रयश्च॥ अष्टद्रव्यातिरि
क्तद्रव्यत्वेन तद्व्यक्तित्वेन वा तथेति चेत्॥ ज्ञानादिकं प्रति तेन रूपेण हेतुत्वे को दोष इति चेत्·॥ ए
वं॥ यस्येतस्य प्रमाणान्तरासिद्धकारणताकस्येति विशेषणात्॥ तथाहि॥ पांचभौतिकं शरीर
मित्यादिशब्देन शरीरं प्रति शब्दस्य जनकता न तया द्रव्यजनकत्वात्तु मायके परिशेषानुमाने
न शब्दं प्रति शब्दग्रहणस्य कारणजनकतया श्रोत्रजनकत्वात्तु मापके न परिशेषानुमाने नच
शब्दप्रत्यक्षं प्रति आकाशस्य हेतुत्वबोधनात्॥ तत्र कार्यं प्रत्याकाशस्य मानान्तरसिद्ध
कारणताकत्वमेव तिष्ठतीति नान्यथासिद्धत्वं॥ ज्ञानादिकं प्रति तु तादृशप्रमाणाभावात् अ
न्यथासिद्धत्वमेव॥ अन्यथासिद्धस्य च न व्यक्तित्वादिनापि तथात्वं· अन्यथा न व्यक्तित्वादि

नाहेतुत्वे अनन्यथासिद्धत्वमेव ॥ अन्यथासिद्धिमात्रप्रलयापत्तेः ॥ दण्डत्वादीनां तु संयोगादिजन
कघणादिवृत्तितया न पूर्वोक्तान्यथासिद्ध्यवच्छेदकधर्मव्यापकतया कारणतानवच्छेदकत्वमि
ति प्राचीननयानुसारिपन्थाः ॥ ननु स्वर्गं प्रति पूर्वभावे अवगते एव यागस्यापूर्वं प्रति पूर्वभा
व अवगम्यत इति यागोऽपूर्वं प्रत्यनन्यथासिद्धः स्यादिति चेन्न ॥ पूर्ववृत्तित्वमित्यस्यापूर्वावग
तपूर्ववृत्तित्वानुपपादकमिति विशेषणात् ॥ अपूर्वपूर्ववृत्तित्वस्य तु स्वर्गपूर्ववृत्तित्वोपपाद
कत्वान्न दोषः ॥ अन्यं प्रति साक्षात्पूर्ववृत्तित्वज्ञानम् इति विवक्षणाद्वा ॥ कुलालपिताघ्रश्चायं नर्भवति
अन्यत्रै त्ति ॥ अत्र एवमर्थो न विवक्षितः ॥ अन्यत्रक्लृप्तनियतपूर्ववृत्तिसहभूतत्वमेव न स्वतन्त्रान्व
यव्यतिरेकवत्त्वाभावस्य तदन्यथासिद्धमित्यर्थः ॥ तेन एवमर्थजनकतामादाय नात्माश्रयः ॥ न वा नथाक्लृप्ते
न दण्डादिनावच्छिन्नादिमन्यथासिद्धं स्वतन्त्रान्वयादिमत्त्वात् ॥ उदाहरणं चात्र नमटं प्रति अन्यत्र पगन्न
रे क्लृप्तनियतपूर्ववृत्तितन्त्वादिभिरेव कार्यसंभवेन तत्सहभूतो दैवादागतरासभः ॥ यथा वा गंधवति
गंधानुत्पत्तेः क्लृप्तनियतपूर्ववृत्तिगंधप्रागभावसहभूतो रूपप्रागभावादिर्गंधं प्रत्यन्यथासिद्धः

प्राचीनास्तु पंचविधमन्यथासिद्धत्वमित्याहुः। पूर्वोक्तमेव त्रयं यमादायैव यस्य पूर्वभावोऽवगम्यते तेन तन्
दन्यथासिद्धमिति चतुर्थम्॰ यथा दंडमादायैव दंडत्वस्य पूर्वभावोऽवगम्यते इति दण्डेन दंडत्वमन्यथा
येन२ सिद्धम्॰ सहैवेत्यादौ अवच्छेदकेन दंडेनावच्छेद्यं दंडरूपमन्यथासिद्धं॰ अत्र तु॰ अवच्छेदेन दंडेना
वच्छेदकं दण्डेन मन्यथासिद्धिमिति द्वयोर्भेदः। यत्र जनकं प्रति पूर्वभावे ज्ञाते जनकस्य यं प्रति पूर्वभावो
ऽवगम्यते तेन तज्जन्ये तज्जनकोऽन्यथासिद्ध इति प्रथमं॰ यथा कुलालपितुः स्वजनकं कुलालं प्रति पूर्वभावे ज्ञा
ते जनकस्य तस्यैव घटं प्रति पूर्वभावोऽवगम्यते इति जन्येन कुलालेन जनकः कुलालपिताऽन्यथासिद्धः॰
येन सहैवेत्यादियस्येत्यस्य साहित्यप्रतियोगिजनकान्यस्येति वाच्यम्॥ अन्यथा मननव्यापारकत्व
वत्त्वेन तत्त्वज्ञानत्वेन कार्यकारणभावलोपस्स्यात्॥ तथा अन्यं प्रति पूर्ववृत्तित्वे इत्यत्र समवायिका
रणत्वे इति वक्तव्यं मननव्यापारकत्ववतानुरोधा॰ तेन तयोर्मध्ये कुलालपितानां न भवति॥ अत्र जन
कस्य स्वतन्त्रान्वयव्यतिरेकरहितस्येति वाच्यम्॥ तेन पूर्वोक्तश्रवणानातिप्रसंग इति प्राचामाशयः॥
चिन्तामणिकृतामाशयस्तु। दंडत्वस्य आद्ये एव कुलालपितुस्तु द्वितीये एवान्यथासिद्धत्वेऽन्तर्भाव

संभवतीति नाधिक्यं ॥ मन्नुन व्यापारकस्य वगास्मतुल्वतं त्रान्वयव्यतिरेकसत्त्वात् ॥ श्रोतव्यं श्रुतिवाक्येभ्य इ
त्यादिप्रमाणासिद्धत्वाच्च नोक्तो ऽन्यथासिद्धिद्वयमध्यपातन इति ॥ नवीनास्तु एकमेवान्यथासिद्धत्वं ला
घवात् ॥ तथा हि ॥ अवश्यकल्पनीयलघुनियतपूर्ववृत्तिनियतन्तन्सहभूतस्वतंत्रान्वयव्यतिरेकिणां स
र्वमेव तेनान्यथासिद्धं घटादिकं प्रति नेजत्वादिना हेतुत्ववारणायावश्यकल्पनीयमिति ॥ इतरेका
रणसत्त्वे यदभावाङ्कविनकार्य्याभावमस्तरं ॥ महत्वसमानाधिकरणानेकद्रव्यसमवेतत्वादिवार
णाय लघ्विति ॥ वह्निसामान्यं प्रति मणित्वादिना हेतुत्ववारणाय नियतपूर्ववृत्तीति ॥ लाघवं च पट
कीभूतपदर्थेउपस्थितौ संबंधे च बोध्यं ॥ अनेकद्रव्यसमवेतत्वापेक्षया महत्त्वस्य शरीरे लाघवं ॥
रूपप्रागभावापेक्षया गंधं प्रति तत्प्रागभावस्योपस्थितौ लाघवं ॥ गंधस्योपस्थितत्वात् एवमाकाश
स्योतीन्द्रियत्वात्तदपेक्षया ज्ञानादिकं प्रति आत्मनः शीघ्रोपस्थितौ लाघवं ॥ तथा दण्डरूपस्य स्वसमवा
यिसंयोगरूपसंबंधापेक्षया दण्डस्य संयोगसंबंधे लाघवं ॥ इदं च रूपत्वेन हेतुत्वपक्षे ॥ दण्डरूपत्वे न तु तथा
त्वे तु शरीरकृतमपि गौरवमस्तीति बोध्यं ॥ एवं च दण्डरूपाकाशरासभदण्डत्वकुलालपितृप्रभृतिना

तर्क०टी
१७

मेकैकेनैव कारणसंभवे त्रिविधा पंचधा वेति प्रपंचोऽभ्युनति वैयर्थ्यापत्तेरिति वदंति॥ अन्ये तु॥ यस्य यत्कार्यं प्रति नि-
यत पूर्ववृत्तित्वमनन्यथा प्रकारांतरेणासिद्धं संबंधभवतीति तत्कार्यं प्रतितदन्यथासिद्धं॥ प्रकारांतरं क्वचिदन्व-
नं चान्वयव्यतिरेकाभावः यथा दंडरूपादेः। क्वचित्प्रमाणाभावः॥ यथा घटादिकं प्रत्याकाशरासभादेः॥ क्व-
चित्गौरवं॥ यथा कुलालपित्रा घटनेकद्रव्यत्वादेः॥ एवं सर्वाणि अन्यथा सिद्धमिति योगार्थोपि संगच्छते इ-
त्याहुः॥ इदं च कारणविशेषलक्षणं॥ यस्माद्धि यत्कार्यं प्रति अनन्यथासिद्धनियतपूर्ववृत्तित्वं तस्य तत्का-
र्यं प्रति कारणत्वमित्यर्थः॥ कारणसामान्यलक्षणं तु पारिमांडल्यादिभिन्नत्वं॥ तदुक्तं॥ कारणत्वं चान्य-
त्र पारिमांडल्यादिभ्य इति॥ पारिमांडल्यं परिमाणुपरिमाणं इत्यर्थः॥ तस्य किंचित्कार्याजनकत्वात्॥
योगजधर्मजालौकिकप्रत्यक्षस्याविषयाजन्यत्वात्॥ ननु यस्य कार्यात् पूर्वभाव इत्यत्र कार्यपदस्य सहे-
तुकत्वात्परतया आत्माश्रय इत्यतः कार्यलक्षणमाह॥ अनन्यथासिद्धेति॥ यद्यस्मादनन्यथासिद्धान्नि-
यतपश्चाद्भावि तत्तस्य कार्यमित्यर्थः॥ घटे दंडरूपादिकार्यतावारणायानन्यथासिद्धेति॥ देवादाग-
तरासभकार्यतावारणाय नियतेति॥ दंडावयवादौ दंडकार्यतावारणाय पश्चादिति॥ इदमपि विशे-

तर्कः
१७

पलक्षणं॥कार्य्यसामान्यलक्षणंतुउत्पत्तिमत्वंप्रागभावप्रतियोगित्वंवाबोध्यम्॥कार्यानुकृतेति·कार्य्येणानुकृतमनुकूलीकृतंपूर्ववृत्तिकृतमित्यर्थः॥कार्य्यंवैसम्यान्नभावीतदैकारणस्यतत्पूर्ववृत्तिताभवतीतितथोपचारः॥यद्वा॥कार्य्येणानुअनुवृत्तित्वंपश्चाद्वृत्तित्वंकृतमाश्रितंयस्यपूर्ववृत्तिनःतत्कार्य्यानुकृतं॥अन्वयव्यतिरेकौविद्येतेअस्येतिअन्वयव्यतिरेकि॥प्रसंशार्थेमत्वर्थीयइनिः॥स्वतंत्रान्वयव्यतिरेकशालीत्यर्थः॥कार्यानुकृतेवतदन्वयव्यतिरेकिचेतितत्तथाकार्य्यपूर्ववृत्तित्वेसतिस्वतंत्रान्वयव्यतिरेकवत्वंकारणत्वमित्यर्थः।सव्येतरगोविषाणयोःपरस्परंकारणत्ववारणायसत्यंतं॥देवादागतरासभवारणायस्वतंत्रेत्यादि॥तदर्थक्तं॥स्वस्वपारेतरयावत्कारणसमवधानेयदन्वयकालेयदन्वयःयद्व्यतिरेककालेयद्व्यतिरेकइति॥दंडाद्यसमवधानकालेयावत्कारणसमवधानाभावात्असंभववारणायस्वेति॥तदानीमेवदंडेतरयावत्कारणमध्यवर्त्तिदंडसंयोगाभावात्दंडाद्यव्याप्तिवारणायस्वव्यापारेति।साक्षात्जन्यपरं॥तेनदंडावयवादेःस्वस्वजन्यदंडेतरयावत्कारणमध्यपतितदंडसंयोगादिसमवधानासंभवा

त्रदोषः। स्वत्वव्याप्येप्यभिधाने दंडत्वादावतिप्रसंगः॥ दंडत्वस्य स्वसमवायिसंयोगेन दंडादिव्यापकतया स्वदंडत्वतद्व्याप्यो दंडादिस्तदितरसमवधाने यदन्वयेनादिनियमसत्वात्॥ व्यापारपददाने तु नातिप्रसंगः दंडादेः दंडत्वव्यापारत्वाभावात्॥ दंडतद्व्यापारेतरयावत्कारणसत्वे दंडत्वव्यतिरेकाभावात्। यत्किंचित्कारणसत्वेपि रासभादिव्यतिरेककाले घटव्यतिरेक इति दैवादागतरासभेऽतिव्याप्तिवारणाय यावत्पदम्॥ असंभववारणाय कारणपदम्॥ नियतपूर्ववृत्तिपरम्॥ तेन च नात्माश्रयः॥ दंडजनकादृष्टादेः घटं प्रतिकारणत्ववारणाय पदद्वयेति॥ अदृष्टजन्यदंडेतरसकलकारणसत्वेन दृष्टव्यतिरेककाले घटव्यतिरेकात्॥ तदृष्टान्वयकालेतु घटान्वयाभावात् नातिव्याप्तिः। स्वस्वजन्येतरयावत्कारणसत्वे रासभान्वयेपि घटान्वयदर्शनादतिव्याप्तेर्व्यतिरेकस्यापि। घटव्यतिरेको यद्व्यतिव्यतिरेक इति वाच्यम्॥ तेन नादृष्टकारणसत्वे द्वितीयक्षणोप्रागभावव्यतिरेककाले घटोत्पत्तिव्यतिरेकसत्वात्तत्प्रागभावेऽव्याप्तिः॥ कार्यतानुकूलतो कार्यान्वयव्यतिरेककालपूर्वकालीनौ अन्वयव्यतिरेकौ विषयेनेपत्योति कार्यानुकूलतान्वयव्यतिरेकौति वा

ण्णोनमसंगतत्वात् तथासति कार्यैरणाद्युक्तौ अन्वयव्यतिरेकौ असोति वहुव्रीहिसमासेन कार्यान्वयव्य
तिरेकमितिवक्तव्यात्॥ न कर्मधारयान्मत्वर्थीयो वहुव्रीहिश्चेदर्थप्रतिपत्तिकरस्स्मृते॥ यथाकृतस्मरा ग२ इति
समादावतिव्याप्तेश्च॥ यदपि गोवर्द्धनेनोक्तं॥ अत्र लक्षणद्वयेनासमर्थम्। अनन्यथासिद्धनियतप
दत्वे पदत्वव्यहमेकं। तत्त्वव्याप्येतरसकलकारणसमवधाने अनन्यथासिद्धपदव्यतिरेकाघटव्य
तिरेक इतपरम्॥ देवदागतत्वसमभेतिव्याप्तिवारणाय पूर्वलक्षणे नियतपदम्॥ घटसामाग्र्यप्रति
अनन्यथासिद्धे देवदागतत्वसम्भेऽतिव्याप्तिवारणाय द्वितीयलक्षणे समवधानेसंत॥ दण्डत्वादा
वतिव्याप्तिवारणायानन्यथासिद्धेति॥ एतल्लक्षणद्वयमपि दुष्टम्॥ सव्यविषाणास्यनियतान्वये
इतरविषाणान्वयात् सव्यविषाणादौ प्रथमलक्षणमतिव्याप्तं॥ न च सव्यविषाणाणामनन्यथासिद्धमि
ति वाच्यम्॥ पूर्ववर्त्तिन एवानन्यथासिद्धत्वात्। अन्यथा नूक्तलक्षणे अनन्यथासिद्धपदेनैव सव्ये
तरविषाणवारणे पूर्ववृत्तित्वपदवैयर्थ्यम्॥ न च पदत्वयोत्तरकाले पदत्वय इति विवक्षितमि
ति वाच्यम्॥ सव्यविषाणान्वयोत्तरकालेपि इतरविषाणान्वयसत्वात्॥ द्वितीयलक्षणमपि न द्

तर्कटि
१९

दंडचक्रसंयोगादिव्याप्यकैर्वाऽनन्वे दंडचक्रछिन्नत्वेति व्याप्तमा॥ न छिन्नत्वेन छिन्नव्याप्य दंडचक्रसंयोगे
नरयावकारणसत्वेनछिन्नव्यतिरेके घटव्यतिरेकात्। नवतछिन्नमन्यथासिद्धम्। देवादगनरा
सभवनघटसामान्येतन्मानन्यथासिद्धत्वात्॥ उभयलक्षणापनेयाव्याख्यानेफलोक्तदेघस्य
पूर्वलक्षणेऽसंभवात्। संदर्भविरोधाच्चावलभङ्क्तत्वस्वव्याप्येतरसकलकारणसंपत्तौ यद
यद्व्यतिरेके
व्ययेपदम्यायो यद्व्यतिरेके स्वचकारणमिति। न चाकाशव्यतिरेकोऽदिव्यतिरेक इति आकाशादि
कहेतुत्ववारणायान्वयभागः। यद्यप्याकाशानुपेदिगन्वयोप्यस्ति· तथापि यदन्वये पदस्यापि
रितिवा व्यमा॥ अन्यपदव्याप्तिः पूर्ववद्बोध्येति वाचष्टे॥ तदपिमंदं॥ दंडत्वादावतिव्याप्तेः। दंड
त्वदंडत्वव्याप्येतरसकलकारणसत्वे दंडत्वान्वये घटान्वयदंडत्वव्यतिरेके घटव्यतिरेकस्य व
दर्शनात्। अनन्यथासिद्धत्वेन विशेषणीयमिति चेत्॥ तथापि दिशः कारणप्रसिद्ध्या आकाश
न व्याप्येतरसकलकारणसत्वासंभवादेवातिव्याप्तिवारणे यदन्वयेवदन्वयइत्यस्यवैयर्थ्य
मेवेति सुधीभिर्विभावनीयं॥ नियमविभूतामिति। नियमाभिधानानीति भ्यनिवेपितेषामिति हेतुगर्भ

त॰न:
१९

विशेषणात्॥ ध्वंसप्रागभावावृत्तियोगित्वं नित्यत्वं॥ ध्वंसे ऽतिव्याप्तिवारणाय प्रागभावपदम्॥ प्रागभा-
वेन रूपं ध्वंसपदम्॥ यावन्मूर्त्तसंयोगित्वं विभुत्वं॥ घटादावतिव्याप्तिवारणाय यावदिति॥ असंभववा-
रणाय मूर्त्तेति॥ मूर्त्तत्वं चावच्छिन्नपरिमाणवत्त्वम्॥ व्योमादावतिव्याप्तिवारणायावच्छिन्नेति॥ क्रिया-
वत्त्वं वा मूर्त्तत्वं॥ अनवच्छिन्नपरिमाणवत्त्वं वा विभुत्वम्॥ तथा च नित्यत्वाद्व्योमादीनां कालतो न व्यति-
रेकः॥ अनित्यानामेव घटादीनामुत्पत्तेः पूर्वकाले ध्वंसकाले च व्यतिरेकसंभवः॥ विभुत्वाच्च न देशतो
व्यतिरेकोऽपि॥ मूर्त्तानामेव घटादीनां कुविज्जलहृदादौ व्यतिरेकः संभवति॥ विभूनामिति भावः॥ इ-
दं तु यथाश्रुतलक्षणे दूषणमापाततः॥ अत्र हि यद्व्यतिरेक इत्यस्य कारणतावच्छेदकसंबंधा-
वच्छिन्नप्रतियोगिताकयदभावे इत्यर्थोऽवश्यं वाच्यः॥ अन्यथा समवायसंबंधेन दण्डव्यतिरेके
घटव्यतिरेकभावादव्याप्तेः॥ तथा च समवायसंबंधेन यत्र शब्दोत्पत्तिस्तत्तादात्म्यसंबंधेन आ-
काशमिति रीत्या शब्दकारणतावच्छेदकतादात्म्यसंबंधावच्छिन्नप्रतियोगिताकस्याकाशाभावस्या-
त्यन्ताभावरूपस्य घटादावेव सत्त्वात्॥ एवं कार्यसामान्यं प्रतीश्वरस्य कारणतावच्छेदकसंबं-

धः कालिक एव।। तेन संबंधेन गगनादिषु व्यतिरेकसुलभः आकाशादेरवृत्तेः।। अभावत्वस्य केवलान्वयितया सर्वदेशकालवृत्तित्वेन यथा कथमपि दुर्वचनम्।। एवमन्यत्राप्यूह्यम्।। नव विभूनाममूर्त्तिनयाय दन्वये साध्यस्य सत्त्वादव्याप्तिरिति वाच्यम्।। यदन्वये साध्यस्य यत्संबंधे इत्यर्थो न तु यद्वृत्तित्वे। अतिवृत्त्यनियामकेन तादात्म्यादिसंबंधेनाकाशादेरपि संबंधित्वमिति।। परंतु स्वत्वघटितत्वात्स्वजत्वघटितत्वाच्च अत्र लक्षणे अतिगौरवमिति नाप्यर्थम्।। वालदुरुहतया ग्रंथगौरवभिया वा विरम्यते।। तत्र तेषु मध्ये प्रथमोद्दिष्टं समवायिकारणं लक्षयति।। यदिति। प्रथमोद्देशबीजं तु अन्ययोस्तन्निरूपणाधीननिरूपणत्वमेव।। यत्समवेतं।। समवायसंबंधेन यद्वृत्ति।। समवायसंबंधावच्छिन्नकार्य्यतानिरूपिततादात्म्यसंबंधावच्छिन्नकारणताशालित्वं समवायिकारणत्वमिति लक्षणं बोध्यम्।। तेन न यत्तदित्याद्यननुगमः।। मूले कार्य्यपदं च समवायसंबंधावच्छिन्नकारणताशालिनि घटत्वादावतिव्याप्तेः समवायेति।। समवायसंबंधावच्छिन्नकार्यतानिरूपितकारणताशालिषु असमवायिकारणेष्वतिव्याप्तेस्तादात्म्येति।। स्वसमवेतं प्रत्यनन्यथासिद्ध

२४ यन्नालाभाय· विषयतावच्छिन्नलौकिकप्रत्यक्षनिष्ठकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नका

नियतपूर्ववृत्तित्वं स्वसमवेतकार्यजनकत्वमिति वाकेनचिदनभिज्ञेनोक्तं ॥ तन्नयुक्तम् ॥ स्वं कपालादितत्समवेतकार्यजनकत्वं कपालसंयोगादिरपीति तत्रातिव्याप्तिः ॥ तादृशं च स्वमिति पुनरपि स्वपदोपादाने मूलस्यैव सम्यक्त्वान्नतथाफलपिनम ॥ समवेतपदस्य संबद्धमात्रपरताभ्रमेणाप्रवृत्ति ॥ नान्निति ॥ तत्र· तयोर्मध्ये ॥ अयुतसिद्धयोरिति ॥ युतौ पृथक्भूतौ संबंधानरसद्भावकालेप्यसंबद्धौ घटपटादी तद्भिन्नावयुतौ संबंधिसद्भावकाले संबंधाभावरहितौ संबंधानधिकरणसंबंधानधिकरणकालवृत्तिभिन्नौ ॥ सिद्धौ भावरूपतया प्रसिद्धौ भावभिन्नावित्यर्थः ॥ तयोः संबंधो वृत्तिनियामकः ॥ तथासंबंधानधिकरणसंबंधानधिकरणकालवृत्तिभिन्नाभावान्यपदार्थद्वयवृत्तिराधेयतानियामकः संबंधः समवाय इति लक्षणं पर्यवस्यति ॥ संबंधानधिकरणकालवृत्तिभिन्नत्वं न कापित्यसंभववारणाय संबंधानधिकरणेति कालविशेषणं ॥ घटोत्पत्तेः पूर्वं कपालस्य कपालनाशकाले घटस्यापि संबंधानधिरणकालवृत्तित्वादव्याप्तिवारणाय भिन्नांतम् ॥ आकाशशब्दप्रागभावादिकयोः संबंधेतिव्याप्तिवारणायाभावान्ये

ति॥ सप्तमपदार्थमित्यपरमतेनेत्यत्र देरपि स्वाभावाभाववत्तया नासंभव इति॥ आकाशस्याभावमित्व
तयातदोषवारणाय यद्वयपदम्। फलेप्येतदर्थमेव द्विवचननिर्देशः॥ पितृपुत्रत्वादिसंबंधाति
व्याप्तिवारणाय स्वाश्रयेयमेति॥ संबंधत्वं वा विशिष्टप्रतीतिनियामकत्वं अखंडं वा संयोगादिसा
धारणं ग्राह्यम्॥ अन्ययोरिति॥ संबंधानधिकरणसंबंध्यनधिकरणकालवृत्तिनोः संबंधः संयो
ग इत्यर्थः॥ अतएवाप्राप्तिपूर्वका प्राप्तिः संयोग इत्युक्ते मीघात्यवरणोः॥ ययोर्मध्ये इति॥ अ
नेन तादृशकालवृत्तिभिन्नानां तभागसत्वं दर्शितम्॥ अविनश्यदिति॥ संबंध्यंतर समानकाली
नमित्यर्थः अपराश्रितेनम्। संबंध्यंतरसंबद्धमवतिष्ठत एवेति योजनीयं॥ तेन संबंध्यंतरसत्ता
वकाले संबंधाभावो नास्तीत्यर्थः॥ क्षणमिति॥ अवयवनाशोत्पत्तिक्षण इत्यर्थः। घटादिनाशोत्पत्ति
कपालनाशस्य हेतुत्वं॥ न च पूर्ववृत्तित्वं विनातं क्षिवहेतुतेति द्वितीयक्षणे कपालध्वंसे न घटध्वं
सो जन्यते इति क्षणमात्रं अनाश्रितो घटस्तिष्ठतीत्यर्थः॥ तथा च तत्क्षणस्य संबंधानधिकरण
त्वेपि संबंध्यंतरं यत्कपालं तदनधिकरणत्वान्न घटितत्वेपि न क्षतिरिति भावः। प्रसंगाद्यथाक्र

त्वविनश्यत्तालक्षणमाह ॥ विनश्यत्त्वेति ॥ विनाशकारणसामग्रीति पाठे सामग्रीपदं समूहपरं ॥ सा
न्निध्यं ॥ तदधिकरणकालवृत्तित्वं तथाच विनाशकारणकालाधिकरणकालवृत्तित्वं विनश्यत्ता
उत्पत्तिसामग्रीसमवधाने अतिव्याप्तिवारणाय विनाशपदं तत्प्रतियोगिकविनाशपरं तेन घ
टनाशसामग्रीसमवधानेन पटस्य विनश्यत्ता ॥ नाशजनकादृष्टादिरूपयत्किंचित्कारणसम
वधाने अतिव्याप्तिवारणाय कलापपदं तावन्मात्रं चेत् विनश्यत्ता तदा तद्विशिष्टः कालस्
य विनश्यत्पदवाच्यः स्यान्न तु घटादिरिति वृत्तित्वमित्यन्तं ॥ कालपदं लक्षणपरं ॥ नो चेत्तादृशस्थू
लकालवृत्तित्वमादाय अन्यकालेपि विनश्यत्त्वं स्यात् ॥ नन्वेवमवयवावयविगुणगुण्यादिमध्ये
तं तु पटैका विनश्यत्त्वमित्यजिज्ञासायामाह ॥ तं तु पटावपीति ॥ अयुतसिद्धत्वात् ॥ अपृथक्सि
द्धयोः संबंधत्वादित्यर्थः ॥ तेन समवायस्य साधने हेतौ न पक्षाव्याप्तित्वं ॥ संयोगादिव्यभिचारवा
रणायापृथगित्यादि ॥ तदपि तयोरिति ॥ परस्परमिति शेषः ॥ परस्परं समवायाभावः साध्यः ॥
तेन समवायाभावमात्रस्य साध्यत्वे तु घटत्वादिसमवायस्य पटे पटत्वादिसमवायस्य च

सत्वात्तन्नबाधः। अथवागुणिपत्योःसंबंधोनसमवायः अयुतसिद्धसंबंधत्वाभावादितिव्याख्येयं॥ हेत्वसिद्धिंनिराकरोति। नत्वित्यादिना॥ उपसंहरति॥ अतइति अयुतसिद्धसंबंधत्वाभावात्॥ तयोःसंबंधः संयोगएव॥ नसमवायइत्यर्थः॥ तेननसमवायइत्युपक्रमेणसहसंयोगएवेत्युपसंहारस्यनविरोधः॥ यथातंतवः। पटइत्यादिपूर्वोक्तमुपसंहरति॥ तदेवमिति॥ मुमान्नि वैशद्यार्थंअसमवायिकारणमुदाहरति॥ एवमित्यादि॥ मृत्पिंडःकपालरूपःस्वगतरूपादेः॥ समवायिकारणमित्यत्रधंगः। प्रत्यक्षेणसूक्ष्मकालभेदानामग्रहणात्पटस्यस्वगतरूपस्यतुल्यकालोत्पत्तिकत्वमत्याशंकते॥ नन्विति। समानकालीनत्वादिति॥ एककालोत्पत्तिकत्वादित्यर्थः समानकालोत्पत्तिकत्वस्यकार्यकारणभावविघटकत्वंकुतइत्याकांक्षायामाह॥ पौर्वापर्याभावादिति॥ पूर्ववृत्तित्वघटितत्वात्कारणस्येतिभावः॥ अतइतियतोउत्प ण त्तिनोःकार्यकारणभावोनास्ति· अतइत्यर्थः· ननुकारणलक्षणंभिन्नक्तंसमवायिकारणत्वेकिंबाधकमितिआशंकायामाह॥ कारणविशेषत्वादिति॥ तथाचकारणत्वसामान्यधर्मः

२४लक्षणंभिन्नमुक्तं· तथाचपौर्वापर्याभावात्कारणत्वाभावेपिसमवायिकारण

समवायिकारणत्वं विशेषधर्मः। सामान्यधर्माणां ज्ञानस्य विशेषधर्माभावादिति भावः॥ त्वोक्ते वि
पक्षबाधकतर्कप्रदर्शनमुखेन प्रमाणं सूचयति॥ समानकालोत्पत्ताविति॥ समानकालोत्प
त्तौ हेतुः समानसामग्रीकत्वादिति॥ समानकालीनसामग्रीकत्वादित्यर्थः॥ सामग्रीपदस्य का
रणकलापवचनस्य अत्र कालघटितकारणप्रचयपरत्वेन समानसामग्रीकत्वमेव समान
कालीनसामग्रीकत्वमिति बोध्यं॥ भिद्यतेऽनेनेति भेदो धर्म्मः। गुणत्वगुणित्वधर्मित्वादिरूप
न त्वस्याहित्यर्थः। अयं भावः। समानकालीनसामग्रीकत्वात् गुणगुणिनोः समानकालोत्पत्तौ घ
टो गुणी रूपं गुणः घटो धर्मी रूपादिकं धर्म इत्यादिवैधर्म्यरूपो गुणगुणिनोर्भेदो न स्यादित्य
र्थः॥ न हि तुल्योत्पत्तिकयोः सव्येतरविषाणयोः कश्चिद्धर्मी कश्चिद्धर्म इत्यादिभेदोऽस्ति॥ उभयोः
स्वतन्त्रत्वात्। न तदत्रापि स्यात्। तथा च तर्कः॥ गुणगुणिनौ यदि समानकालोत्पत्तिकौ स्यातां त
र्हि धर्मधर्मिभावापन्नौ न स्यातां सव्येतरविषाणवदिति॥ प्रयोगश्च गुणगुणिनौ असमानकालो
त्पत्तिकौ। धर्मधर्मिभावापन्नत्वात् शब्दाकाशवदिति। एतेन समानकालोत्पत्तिकत्वेन

तर्कदी
३३

समानसामग्रीकत्वव्याप्यं· न वा स्वरूपभेदाभावसाधकं॥ समानकालोत्पत्तिकानामपि रूपरसा
दीनां भिन्नसामग्रीकत्वस्य स्वरूपभेदस्यैव दर्शनादिति दूषणं परास्तं। ननु समानकालोत्पत्तिक
योरपि धर्मधर्मिभावे किं बाधकमिति तर्कस्य मूलशैथिल्यं दोषमुद्धरति॥ कारणभेदेति। कार्य
गतभेदस्य धर्मत्वस्य आधेयतारूपस्य कारणभेदः कारणनिष्ठं यद्धर्मित्वं आधारतारूपं तत्प्र
युक्तत्वात्। नित्पन्नयोरव्याप्यत्वादित्यर्थः। समवायेन च धर्मधर्मिभावोत्र॥ तथा च रूपादिध
र्मः कारणीभूतधर्मि समवेतः॥ समवेतकार्यत्वात्। घटक्रियावदित्यनुमानेनास्पव्यं। घटत्वा
दिधर्मे व्यभिचारवारणाय कार्यपदं। इदमेवानुमानं पूर्वोक्ततर्कस्य विपक्षबाधकं। घटो धर्मी रू
पादिकं धर्म इत्यत्र कार्यकारणभाव एव नियामकः॥ अन्यथा तु गोधर्मी घटो धर्म इति वैपरि
त्यमेव किं न स्यात्। समवायेन जन्यसत्त्वावच्छिन्नं प्रति तादात्म्येन द्रव्यस्य हेतुत्वात्। यद्यपि घट
रूपादेस्तुल्यकालत्वेपि घटो न समवायिकारणं किन्तु कपालं॥ न च रूपवति कपाले कथं रू
पोत्पत्तिरिति वाच्यं॥ तुल्यन्यायतया कपालोत्पत्तिकाले रूपस्य कपालिकायामेवोत्पत्तेः कपा

ऊनः
३३

लस्यनीरूपत्वात्। तस्यनीरूपत्वेनाचाक्षुषत्वापत्तेः। एकार्थसमवायेनापि रूपस्य चाक्षुषहेतुत्वसं
भवादिति वक्तुं शक्यते॥ तथापि घटे रूपवान् रूपं न घटवत् इत्यादि विलक्षणबुद्धीनां समवायमात्र
विषयत्वात्। एकार्थसमवायस्य सर्वत्र समानत्वादिति अलं विस्तरेण। यत्तु गुणगुणिनोः समा
नकालोत्पन्नौ कपालरूपघटरूपयोः कपालस्यैव समवायिकारणं वाच्यं॥ सामग्रीपूर्वं समवायि
कारणपूर्वं॥ तथापि समवायिकारणैकात् कपालरूपघटरूपयोर्भेदो नस्यादिति केनचित्प्रल
पितं॥ तद्दूषणाभारेणापातालमिव प्रयाति। गुणगुणिनोः समानकालोत्पत्तिपक्षे तुल्यन्याये
न कपालोत्पत्तिकाले कपालिकायां रूपोत्पन्नो घटोत्पत्तिकाले कपालस्यनिरूपत्वात् सति
वा तदानीं कपालस्य रूपवत्वे कथं रूपान्तरोत्पत्तेः रूपवति रूपानुपपत्तेः। समवायिकारणै
क्यस्य वा कथं भेदाभावसाधकत्वं॥ रूपरसादिषु व्यभिचारात्॥ कपालरूपघटरूपयोर्वा भेदे
किमनिष्टं संबंधभेदेनोपपत्तेः। यदर्थन्तु दक्षरं व्याख्यायते इत्यलन्तु स्मन्नववक्षिकाव्यरूपाणा
प्रतिसंधानेन। तस्मादिति। यस्मात्समवेतकार्यस्य कारणसमवेतत्वनियमः कारणत्वंच

तर्क· १
२८

ननु स्वकालीनमस्ति कस्य तस्मादिति भावः। ननु एतावता प्रबंधेन तु गुणगुणिनोः स्वस्वकालीनमपि क
त्वे धर्मधर्मिभावो नेत्यादिमुक्तं॥ ननु च गुणगुणिनोरभेदवादिमते इष्टापत्तिः॥ धर्मधर्मिभावस्य
भेदनियतत्वात् इत्यत आह॥ तदेति॥ तदा उक्तप्रमाणबलात्कार्यकारणभावाभ्युपगमकाले गुण
कार्यात् गुणिनः कारणस्य भेदोऽप्यस्ति स्वीकृत इति शेषः। अभेदे कार्यकारणभावासंभवात्॥
तदेवोपपादयति। घटोऽस्मादिना। रूपं घटाभिन्नमितिमते रूपं प्रति घटः कारणमित्युक्ते घटं
प्रति घटः कारणमित्यायाति। तत्राह॥ घटं प्रतीति॥ तथा च घटो रूपवानिति सर्वोक्तप्रतीत
स्याप्युपपत्ता कार्यकारणभावे स्वीकृते अर्थात् भेदवादिमतमादायेष्टापत्तेरेवं तु मशक्यत्वा
दिति भावः। ननु मास्तु कार्यकारणभावो गुणगुणिनोः भेद एवास्तु लाघवात् किं दूषण
मिति चेन्न। रूपं चेत् घटस्तदा तस्य चक्षुर्मात्रग्राह्यत्वादन्धेन त्वचा न गृह्येत गृह्यते चेत्तु कपि
त्वादिरूपेणापि गृह्येत भेदाभावादिति दूषणसत्त्वात्॥ ननु नीलपीतादिरूपं जातिर्वास्तु
घटत्वादिवत्॥ तदुक्तं जगन्मेकैका एव नीलारुणाद्युक्तं रूप इति। तथा च घटत्वविशिष्टरूपव

तर्कः
२८

नीलरूपादिविशिष्टोपि घटः प्रथमेक्षणे उत्पद्यते जातः संबंधश्चेति न्यायात् । कथमुक्तं प्रथमे·
क्षणे निर्गुण एवेति चेन्न रूपिना । रूपं वैजातिः स्यात् तद्वा घटत्वादिवदवान्तरभेदेन स्यात्
दृश्यते च नीलपीतादिरूपावान्तरभेदः ।। पाकान्नीलरूपं नष्टं रक्तरूपमुत्पन्नमित्यायत्तु पपन्ने
स्यात्तत्र हि जातिरूपत्वेन संभवति· ।। जातेर्व्यक्तिसत्त्वे संबंधत्वनियमादिति द्रष्टव्यमित्यलं·
बहुना ।। स्वगुणानीति ।। स्वस्य गुणान्स्वभिन्नगुणान्प्रतीत्यर्थः । उत्पत्तिद्वितीयक्षण मा
रभ्यैव घटश्चाक्षुष इति मत्वाशंकते । नन्वेवमिति । एवं सतीति प्रथमेक्षणे रूपेणान्वितं· ।।
आद्यक्षणे निर्गुणत्वे सतीत्यर्थः । अचाक्षुष इति । चाक्षुषलौकिकप्रत्यक्षाविषयो न स्यादि
त्यर्थः । द्वितीयक्षणेपीति शेषः ।। प्रथमेक्षणे इंद्रियसंयोगादेरभावात् ।। द्वितीयक्षणे तेषा
मुत्पत्तावपि पूर्वं तु त्रित्वाभावेन तृतीयक्षण एव तैर्घटे चाक्षुषजननात् ।। अरूपीति · । रू
पाभाववद्द्रव्यत्वादित्यर्थः ।। पटादौ व्यभिचारवारणाय रूपाभाववदिति ।। रूपादौ व्यभिचार
वारणाय द्रव्यत्वेति ।। अत्र चात् [redacted] ति· घटस्य प्रथमद्वितीयक्षणात्मकः कालःपदित

तर्क·१
२५

ष्टरूपोत्तरकालीनस्यानन्तरं घटचाक्षुषकालीनस्यानन्तरं पूर्वकालवदिति तर्कतात्पर्यं। अ
नुमानेन च घटेन प्रथममद्वितीयक्षणावृत्तिचाक्षुषविषयः तत्पूर्वकालीनरूपाभाववत् द्रव्यत्वात्।
वायुवत्· भाविघटवदिति।। एतेनानुपलब्धघटेष्वाक्षिप्तं रूपाभाववत्त्वं चेन्न रूपात्यन्ताभाववत्त्वं त
दा स एव दोषः।। यदि रूपसंसर्गाभाववत्त्वं तदा रूपक्षयभावादिमतो द्रव्यस्याचाक्षुषत्वा
न्व्यभिचार इत्यादिदूषणमपास्तं। अत्र च व्याप्तिग्रहोपयोगिकार्यकारणभावं दर्शयति·।। तदे
वेति· रूपादिचाक्षुषे व्यभिचारवारणाय द्रव्यपदं।। आत्मप्रत्यक्षे तद्वारणाय प्रत्यक्षमप पद
हाय चाक्षुषपदं।। लौकिकचाक्षुषपरं· तेन वायो रूपं नास्तीत्याद्युपनीतभानेन न व्यभिचार
द्रव्ये वा लौकिकचाक्षुषत्वं कार्यतावच्छेदकमित्यर्थः। इदं च मतभेदेन। मूर्त्तप्रत्यक्षत्वमे
व तथा· तेन वायोर्नस्पार्शनं। महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वं कारणतावच्छेदकं पर
माणाववति प्रसंगवारणाय महत्त्वेति।। चक्षुष्यनुद्भूतरूपवारणायोद्भूतेति। उद्भूतस्पर्शा
नुद्भूतरूपतैलकण[illegible]वह्न्यादिवारणाय रूपेति।। गुणाभावानधिकरणत्वरूपं गुणाश्र

तर्क·
२५

यत्वं द्रव्यलक्षणं मत्वा शंकते॥ अद्रव्यमिति तर्के इष्टापत्तिरनुमाने च सिद्धसाधनं दोष इत्याह॥ सत्यपि
त्यादिना प्रथमेक्षणे प्रथमे॰ऽनंतरक्षणे द्वय इत्यर्थः॥ निमेषेति प्रथमेक्षणे इत्यर्थः। विषयस्य हे
तुतया सत्त्वेणास्ति पक्षोपि द्वितीयक्षण एव वाच्यं पंचस्याम नमनेनुत्तीयक्षण इति प्रत्यक्षेणा
सूक्ष्मकालभेदाग्रहणात्तत्कापि क्षतिरिति भावः॥ द्वितीयादिति॥ अतद्गुणसंविज्ञानबहुव्रीहिणा तृ
तीयप्रभृतिक्षणोपीत्यर्थः॥ समवायीति। समवायिपदं गुणाद्यति व्याप्तिवारकं॥ पुनरपि स ए
व दोष इति कारणपदं॥ कारणत्वं चानन्यथासिद्धनियतपूर्वकालवृत्तित्वं॥ तच्चाद्यक्षणेप्यक्षतं॰।
समवायिकारणतावच्छेदकजातिमत्त्वं वाच्यं। योग्यतयेति॰ गुणात्यंताभावाभाववत्त्वं गुणाश्रय
त्वयोग्यतावच्छेदकं। तच्च गुणप्रागभावगुणध्वंसान्यतमरूपं॥ प्रथमक्षणे च गुणप्रागभावस्य स
त्त्वान्न द्रव्यलक्षणायोग इत्यभिप्रायः। क्रमप्राप्तं समवायिकारणं लक्षयति। यदिति। अवधृतं
निष्ठितं सामर्थ्यं कारणे नरूपं यस्य तत्कारणमित्यर्थः। तथा च॰ यत्कार्यस्य समवायिकारणं प्रत्या
सन्नं संबद्धं सत्कारणं तत्समवायिकारणमित्यर्थः। घटकारणस्य दंडचक्रसंयोगस्यात्र समवायि

कारणेदंडादौसंबद्धत्वात्तत्रातिव्याप्तौ कार्य्यस्येति । कार्य्यस्य कारणे दंडे संबद्धत्वान्नैवतत्रातिव्याप्ते
र्वारणाय समवायीति प्रथमकारणपदमुपरंजकविशेषणम्॥ निमित्तकारणेऽतिव्याप्तेः तन्मात्र
नोक्तम्॥ स्वजनकसमवायिकारणसमवेतत्वे परमाणुपरिमाणेऽतिव्याप्तिवारणाय कारणपदं
अत्रापि प्रकृतकार्यस्येति बोध्यं। तेन घटरूपसमवायिकारणसमवेते रसे स्वसाक्षात्कारणे ना
तिव्याप्तिः अत्रसमवायिकारणेअसमवायिकारणस्य द्विविधा प्रत्यासत्तिः। एका समवायरूपा
अन्या एकार्थसमवायरूपा यथा घटस्य समवायिकारणे कपाले असमवायिकारणस्य कपाल
संयोगस्य समवायः। यथा वा घटरूपसमवायिकारणे घटे तत्समयिकारणस्य कपालरूप
स्य एकार्थसमवायः॥ एकस्मिन्कपालपदार्थे घटकपालरूपयोः समवायसत्त्वात्। नन्वत्र घटं
प्रति निमित्तकारणे कुलालकपालसंयोगेऽतिव्याप्तिः। तथापटकारणे तुरीतन्तुसंयोगे तथा घ
ट निमित्ते वायाकाशसंयोगे तथा ज्ञानत्वादिनिमित्ते सुखे तथा अभिघातादिनिमित्ते वे
गादेवातिव्याप्तिः। कार्यसमवायिकारणे कपालादिषु समवेतानामेवैतेषां कारणत्वात्॥ नवने

ग्रा

षामपि लक्षणत्वमेवेति वाच्यं॥ घटे कपालद्वयसंयोगस्य पटे तंतुमात्रसंयोगस्य शब्दे भेर्य्याकाशसंयोगवं
शदलाकाशविभागशब्दादीनां ज्ञानादावात्ममनोयोगस्य अभिघाते क्रियाया एवासमवायिकारणत्व
मन्येषां निमित्तत्वमिति तांत्रिकव्यवहारात्॥ असमवायिकारणभेदघटितत्वान्निमित्तकारणस्येति
चेत्सत्यं॥ किंतु सामान्यासमवायिकारणलक्षणमिदं॥ तत्र चक्रकुलालकपालसंयोगादेरपि लक्षणत्वमे
व॥ तेषामपि घटकुलालसंयोगादिरूपसंयोगजसंयोगासमवायिकारणत्वात्॥ एवमवयववेगादेर
किअवयवविवेगाद्यसमवायिकारणत्वात्॥ परं तु ज्ञानादृष्टादेरात्मविशेषगुणस्य किंचित्कार्यं प्रत्यपि
नासमवायिकारणत्वमिति तद्भिन्नत्वेन विशेषणीयं॥ निमित्तकारणत्वकारणत्वस्यैवभेदो निवि
शेन कारणस्येति वक्ष्यते॥ तथा चात्मविशेषगुणाभिन्नत्वे सति स्वकार्यसमवायिकारणनिरूपितस
मवायैकार्थसमवायान्यतरसंबंधाश्रयत्वे सति जातिमत्कारणत्वमसमवायिकारणत्वमिति सा
मान्यलक्षणं बोध्यं॥ कपालरूपादावव्याप्तिवारणायात्मपदं॥ आत्ममनःसंयोगेऽतिव्याप्तिवारणा
यविशेषपदं॥ अदृष्टादावतिव्याप्तिवारणाय प्रथमसत्यंतं॥ पूर्वोक्तदंडचक्रसंयोगस्यापिका

तर्क·दी
२७

र्यत्वमिति स्वपदं। कार्यसमवायिकारणपदे पूर्वोक्तार्थे घटसमवायिनि कपालसंयोगे अव्याप्तिवारणा
य समवायेति॥ घटरूपासमवायिकारणकपालरूपे अव्याप्तिवारणाय एकार्थसमवायेति॥ अ
सभववारणायानन्तरेति॥ घटकारणे दण्डादावतिव्याप्तेर्द्वितीयसत्यन्तं॥ स्वजन्यस्वप्रत्यक्षस
मवायिकारणात्मसमवेतेऽव्यत्वादावतिव्याप्तिवारणाय जातिमदिति॥ चरमकारणपदं पू
र्वोक्तार्थं· अजनितपटादिकार्यस्य तन्तुसंयोगादेर्लक्षत्वे वादृष्टकारणवृत्तितत्कार्यजन
कतावच्छेदकत्ववत्त्वं वाच्यं॥ तत्त्वं तु संयोगत्वादिकं। एकार्थसमवायस्य भेदेन बोध्यः॥ तेन घ
टरूपं प्रति घटस्य नासमवायित्वं। असमवायिकारणविशेषलक्षणं तु अवयवमात्रवृत्ति
संयोगत्वं द्रव्यासमवायिकारणस्य॥ वाद्याकाशसंयोगस्याभि आकाशसमवेतकारणत्व
शब्दासमवायिकारणस्य। आत्ममनोयोगत्वमात्मगुणासमवायिकारणस्येत्येवमन्यत्रापि
विशेषलक्षणमूह्यमुदाहरणं तु संयोगे लक्षणसत्त्वं दर्शयति। तन्तुसंयोगस्येत्यादिना॥
अत्र समवायिकारणे समवायः प्रत्यासत्तिरसमवायिनः॥ एकार्थसमवायप्रत्यासत्तिस्य

उत्तः
२७

लेउदाहरति। एवं तंतुरूपमिति। प्रत्यासन्नपटस्य समवेतमात्रपरताभ्रमेणाशंकते॥ नान्विति
समवायिकारणप्रत्यासत्यभावादिति॥ तंतुरूपस्य पटसमवेतत्वाभावादित्यर्थः। एकार्थस
मवायोपि प्रत्यासत्तिपदेन संगृहीत इत्यभिप्रायेणासमाधत्ते॥ मैवमिति। पटरूपस्य समवा
यिकारणं पटस्तस्य समवायिकारणं तंतुस्तत्रप्रत्यासन्नस्यापि। समवेतस्यापित्यर्थ॥ परंप
रयेति॥ एकार्थसमवायेनेत्यर्थः। प्रत्यासन्नत्वानतामंकड्त्वादित्यर्थः॥ प्रत्यासत्तिरिति। प्रकृ
तलक्षणघटितेति शेषः। कार्य्यैकार्थेति॥ कार्येण सहैकस्मिन्नर्थे प्रत्यासत्तिः। समवाय इ
त्यर्थः। यथा एकस्मिन्तंतौ पटेन सह तंतुसंयोगस्य॥ कारणैकार्थेति। स्वकार्य्यस्य समवा
यिकारणेन सह एकार्थसमवायः। तत्रेति। तंतुरूपपटरूपस्थल इत्यर्थः। पटरूपस्य समवा
यिकारणं पटः तेन सहैकस्मिन्तंतौ समवायादिति भावः॥ अत्र चोभयप्रत्यासत्योरनुगतरः
त्वेनरूपेण सामान्यलक्षणोउपादानप्रयोजकमुक्तमेव॥ केचित्तु। कार्य्यकारणभावनिरूप
कत्वेन कार्य्यकारणयोरनुगमं कृत्वा तदेकार्थसमवायः प्रत्यासत्तिपदार्थ इत्याह॥ तत्र कार्य

तर्क·१
२८

कारणभावनिरूपकतायाः अतिप्रसक्तत्वेनदिवक्षितार्थालाभात्। अनन्तरं निमित्तकारणं लक्षयति। यत्रसमवायीति। नन्वत्र समवायिकारणाभिन्नं यत्कारणं तन्निमित्तकारणमिति वक्तुं न शक्यते घटं प्रति निमित्तकारणस्य दण्डादेः स्वगुणान्प्रति समवायिकारणत्वात्तथा घटनिमित्तरूपाया भ्रमेरुत्तरदेशसंयोगासमवायिकारणत्वात्तुरीतंतुसंयोगस्य पटनिमित्ततुरीपटसंयोगासमवायित्वात्॥ एवमन्येष्वप्यनिमित्तेषु अव्याप्तिप्रसंगात्: नव यत्कार्यं प्रतिपन्नसमवायिनाप्यसमवायीकृतं कारणं तत्कार्यं प्रति तंनिमित्तं दंडाक्षेनां कार्यं प्रति संभवति एवं समवाय्यसमवायिकारणत्वं घटं प्रति निमित्तमेवेति वाच्यं॥ एवं सति ईश्वरघटसंयोगं प्रति कालघटसंयोगं प्रति च समवायितया ईश्वरादेर्निमित्तत्वं न स्यात् उत्तरदेशसंयोगं प्रति असमवायिकारणरूपायाः क्रियायाः कालोपाधिविधया निमित्तत्वं न स्यात्· ध्वंसस्य समवायिकारणासमवायिकारणा~~त्मनोविषयत~~योरप्रसिद्धा तद्भिन्नस्याप्रसिद्धौ तं प्रति प्रतियोग्यादीनां निमित्तत्वं न स्यादिस्येवमादिवजघव्याप्तेरिति चे

उत·
२८

निमित्तत्वं न स्यात् आत्मप्रत्यक्षं प्रति समवायिकारणस्यात्मनो विषयतया +३

त॥ अत्रोच्यते। फलेकारणपदत्रयं भावप्रधानं तथा कारणत्वपरं तथा च समवायिकारणत्वा
समवायिकारणत्वभिन्नं यत्कारणत्वं तन्निमित्तकारणत्वमित्यर्थः समवायिकारणभेदश्च सा
मान्यतो ज्ञेयः। दंडादिनिष्ठं यद्घटादिपूर्ववृत्तित्वं तस्य समवाय्यसमवायिकारणताभिन्नत्वान्न
दोषः॥ अवच्छेदकभेदात्संबंधभेदाच्चैकार्य्यकारणभावभेदः। ईश्वरस्य तु घटसंयोगं प्रति स
मवायेन जन्यसत्वावच्छिन्नं प्रति द्रव्यत्वरूपेण समवायिकारणत्वं। निमित्तकारणत्वं तु जन्यमा
त्रं प्रति ईश्वरत्वेनेति कारणत्वयोर्भेदसत्वान्न दोषः। एवमन्यत्राप्यूह्यं। ध्वंसं प्रत्यपि घटादे
र्यत्कारणत्वं यच्चासमवायिकारणत्वसामान्यलक्षणाक्रान्तं तत्संयोगादिनिष्ठं तद्भिन्नमेवसे
वेति न दोषः॥ प्रकृतकार्यं प्रति समवायित्वादेरनभिधानात् एतेन निमित्तकारणस्य दंडादेः स
मवायिकारणभेदेपि दंडनिष्ठनिमित्तकारणत्वसमवायिकारणत्वयोर्भेदसत्वान्नासंगतिः
उपर्व्ययसंकरेप्युपाधेरसंकरादिति न्यायात्। ततश्च कारणत्वव्यापकं निमित्तकारणत्वादिकं
व्याप्यं बोध्यं। तेन निमित्तकारणत्वकारणत्वयोः पर्य्यायतेति परास्तं। समवाय्यसमवायिका

५ तत्सामान्यतो। यत्समवायिकारणत्वलक्षणाक्रान्तं तन्निष्ठं घटादिकारणत्वं

स्वविषयप्रत्यक्षादिकार्यप्रतिनिमित्तत्वादितिसंबन्धस्थम् भावानामेवेति : अभावभिन्नानामेव

तर्क·दी
२९

रणत्वेननिमित्तत्वव्यापकोकिंतुनिमित्तकारणत्वंतद्व्यापकमित्यपिबोध्यं।परमाणुपरिमा
णाभिन्नानामेवंकार्य्यपदार्थानांत्रिविधंसमवाय्यसमवायिनिमित्तरूपं॥नाभावस्येत्यर्थः।ननु
तर्हिकिमभावस्यकारणमेवनास्तीत्याशंकायामाह॥अभावस्येति।ध्वंसरूपस्येत्यर्थः अन्येषां
ग४ प्रागभावादीनामनादित्वात्।निमित्तमात्रं।नभाववत्समवायिकारणापीत्यर्थः॥हेतुमाह॥तस्ये प्यसमवा
ति।असमवायात्॥समवायाभावादित्यर्थः॥समवायस्येति।ध्वंसस्यापिसमवायस्वीकारे
कपालसमवेतकार्य्यनाशंप्रतिकपालनाशस्यहेतुतयाकपालनाशात्घटध्वंसनाशेघ
टोन्मज्जनप्रसंगात्॥ध्वंसानामन्त्वेननानाकार्य्यकारणभावेषुविशेषगौरवात्॥अभावस्य
समवायोनस्वीक्रियतइतिभावः॥करणलक्षणोपसंहारंकरोति॥तदेवमिति।कथमिति
व्यापारवत्त्वेनरूढिफलोपधायकत्वेनवेत्यर्थः॥प्रमाणलक्षणमुपसंहरति·तेनेति·भट्टम
तमुट्टंकयति।यत्त्विति।अनधिगतपूर्वमज्ञातंयोर्थोविषयस्तंतद्ग्राहकंअगृहीतावधि
तार्थविषयकमित्यर्थः।स्मरणेअतिव्याप्तिवारणायानधिगतेति।स्मरणस्यपूर्वोपस्थितविष

तर्क·
२९

श्री

यत्वात्तदोषः॥ अगृहीतत्वं च नष्टशरीरावच्छेदेन बोध्यं॥ अन्यथानादिसंसारे सर्वस्यैव गृहीतत्वात् असंभवं स्यात्· प्रमवारेणाबाधितेति·। अत्र यथार्थविशेषणं न देयं वैयर्थ्यात्· तस्मात् शुक्तौ रजतमित्यय यथार्थस्थले इदमिति ग्रहणात्मकं रजतमिति स्मरणात्मकमिति ज्ञानद्वयमगृहीतभेदकं। तत्रेदमितस्य लक्ष्यत्वात्· स्मरणेऽतिव्याप्तेरसंभवादिति कश्चिन्तन्न भेदेऽन्यथाख्यात्यंगीकारात्॥ ज्ञानपदमत्र न देयं॥ न च यथार्थेच्छायामतिव्याप्तिरिति वाच्यं॥ इच्छाया ज्ञानमात्रविषयत्वेन गृहीत[redacted]गृहीत्वाभावात्॥ तेनात्रापि ज्ञानघटितलक्षणाकरणं तन्मना ज्ञानपदमुक्तं गोवर्द्धिप्रभृतेरिति मंतव्यं॥ ईदृशप्रमात्वमीश्वरज्ञानेप्यक्षतं। तत्समानाधिकरणज्ञानानां तदगृहीतार्थग्राहकत्वात्। अन्यथा सर्वस्यैव ज्ञानस्याद्यक्षणे स्वयं गृहीतार्थस्य द्वितीयादिक्षणे ग्राहकत्वात् असंभवापत्तेः॥ परं तु नेश्वरस्यानंगीकारात्· तन्मते नेश्वरज्ञाने अतिप्रसंग इति बोध्यं· अत्र प्रमाणपदं भावसाधनं। प्रमेयपर्थः· तादृशप्रमाकरणं वा प्रमाणं बोध्यं। गृहीतेति·। पूर्वपूर्वज्ञानविषयीभूतविषयग्राहकमि

तर्क॰ ८
३०

त्यर्थः। अप्रामाण्येति। अप्रामाण्यमप्रमात्वं नचेष्टापत्तिः तत्र पृथग्ज्ञानस्यैव प्रामाण्यमस्तुद्वि
तीयादिज्ञानानामप्रामाण्ये को दोष इति वाच्यं॥ संवादिनिप्रवृत्तिहेतुप्रमाफलत्वे। नतुद्वितीयादि
ज्ञानेष्वप्यस्तीति तेषामप्रमात्वकल्पने बीजाभावः॥ अन्यान्येति। नत्वोस्ति घटस्य यो लोके यत्तत्का
लीनगोचर इत्युक्तेः। सर्वस्यैव धारावाहिकज्ञानस्य पूर्वज्ञानाविषयीभूतत्वाधिकरणवि
षयत्वात्तद्दोषः अगृहीतग्राहकत्वमिति॥ नचेत्यर्थः॥ क्रियाघटितेति। क्रिया विभागः पूर्वसंयो
गनाशः उत्तरसंयोगोत्पत्तिः तेषां क्षणचतुष्टयोत्पत्तीनामेककालताको भ्रमो न स्यात्॥ भेद
ग्रहस्य सत्त्वादित्यर्थः। इदमुपलक्षणं॥ शुचीशतपत्रभेदस्थले एकपत्रभेदनानन्तरं क्रियावि
भागादिक्रमाच्चतुर्थक्षणे अन्यपत्रभेद इति क्षणचतुष्टयेपि यौगपद्यभ्रमात्। नच
धारावाहिकस्थले पूर्वपूर्वज्ञानविषयोत्तरोत्तरज्ञानानाविषयत्वान् उत्तरज्ञानानां प्रमात्व
मिति वाच्यम्। ज्ञाततायां प्रमाणाभावात्॥ ज्ञातो घट इति प्रतीतेर्विषयविशिष्टविषयत्वेना
नुपपत्तेः। अन्यथा इष्टः कृत इत्यादिप्रतीतेरिष्टताकृततादयोपि पदार्थाः स्युरित्यापत्तेः॥

क्षण

उत॰
३०

तयाहा नरु

प्राभाकराश्च। अनुभूतिः प्रमेति वदंति। तच्च तन्मते स्मृतेरपि आत्मांशे स्वांशे च प्रत्यक्षरूपत
यातत्रातिव्याप्तेः। अस्मन्मते भ्रमेऽतिव्याप्तेश्च निर्विकल्पकमेव प्रमेति सौगताः। तन्न। सवि
कल्पस्यापि संवादिप्रवृत्तिजनकतया प्रमात्वात्।। अथ पूर्वं प्रकृष्टं कारणमिति करणल
क्षणं कृतं।। तच्च कारणपदार्थो निरुक्तः। प्रकृष्टत्वं चेत्कारणांतरावश्यापेक्षातीयत्वं तच्च स
र्वेषामेव [illegible]कारणानामस्तीति मत्वा शंकते।। नन्विति। फलायोगव्यवच्छिन्नत्वं प्रकृष्टत्वमि
त्यभिप्रायेणाह। सत्यमपीति। उपसंहरति। अत इति। इंद्रियसंयोगादिरेवेति। फलायोगव्य
वच्छिन्नं कारणं करणमिति मते।। व्यापारवत्कारणं करणमिति मते तु इंद्रियादिप्र
माणमिति बोध्यं। प्रत्यक्षेति। अत्र मुक्तिहेतुभूतपदार्थतत्त्वसाक्षात्कारसजातीयतया
सर्वप्रमित्यपेक्षया प्रत्यक्षप्रमाया अभ्यर्हितत्वेन तत्कारणस्य प्रत्यक्षप्रमाणस्यादौ निरूप
णं नत्वनुमानं प्रत्युपजीव्यत्वात्प्रथमं निरूपणं युक्तं। उपजीव्यनिरूप[illegible]णानंतरमेवोपजीव
कनिरूपणमिति नियमाभावात्क्वचित्कार्यनिरूपणानंतरमपि कारणनिरूपणदर्श

नन्तरंकारणनिरूपणंक्रियतेनतत्रकारणत्वंसंगतिः।यत्रकारणनिरूपणानन्तरंकार्यनिरूपणंन

[illegible]

तर्क· ८
३१

नात्।यथानुमितिलक्षणानंतरमनुमानलक्षणं।परंतुयत्रकार्यनिरूपणंक्रियतेतत्रका
र्यत्वंसंगतिः।कारणत्वमेवोपजीव्यत्वं।उपजीवकत्वंकार्यत्वं।यथाप्रत्यक्षस्यकारणानन्त स्या
रंकार्यस्यानुमानस्यनिरूपणेउपजीवकत्वसंगतिः।अनुमितिकरणस्यव्याप्तिप्रत्यक्षादेःप्रत्यक्ष
प्रमाकरणेंद्रियजन्यत्वात्।एवंकार्यरूपायाअनुमितेर्निरूपणानंतरंतत्कारणानुमाननि
रूपणेउपजीव्यत्वंसंगतिः॥अनुमानानंतरमुपमानाभिधानेअवसरसंगतिः।प्रतिबंधकी
भूतशिष्यजिज्ञासानिवृत्तौअवश्यवक्तव्यत्वमवसरः।अतिप्रसिद्धत्वादादौशिष्यस्यानुमाने
जिज्ञासोदयात्तन्निवृत्त्याउपमाननिरूपणानंतरंशब्दएवावशिष्टइतिप्रमाणप्रसंगा
दवसरसंगत्यावातन्निरूपणंसंगतिश्चषड्विधा॥तदुक्तं।सप्रसंगउपोद्घातोहेतुतावसर
स्तथा।निर्वाहकैककार्यत्वेषोढासंगतिरिष्यतेइति।स्मृतस्योपेक्षानर्हत्वंप्रसगः।चिंता
प्रकृतासिद्ध्यर्थामुपोद्घातंविदुर्बुधाःइत्युक्तत्वात्।चिंताकालीनप्रकृतसिद्ध्यनुकूलत्वमुपो
द्घातः।हेतुताकारणत्वकार्यत्वे।अवसरःपूर्वमुक्तः।एकनिर्वाहकत्वमेकप्रयोजकत्वं॥ए

तर्कः
३१

एतत्प्रसंगाद्यन्यतमत्वं संगतित्वं अनंतराभिधायिनीष्ठदोषाधायकाभावप्रतियोगिधर्मविशे
षवत्त्वं वा भवति च प्रसंगाद्यभावे वक्तुरप्रकृताभिधायितया निंदेति कृतं पाल्लवितेन॥ साक्षा
त्कारीति· साक्षात्कारिप्रमानिष्ठजात्यवच्छिन्नकार्यताप्रतियोगिककारणताशालित्वमर्थः। अ लि १
नुमानादिनिवारणाय साक्षात्कारीति। आत्मालोकादिवारणाय जातीति॥ प्रमालक्षणोक्तौ रि
सा अन्यत्सर्वं ह्रियं॥ प्रत्यक्षप्रमाणलक्षणानुकूलां जन्यप्रत्यक्षाप्रमां लक्षयति। इन्द्रियजेति·
अत्र जन्यज्ञानसामान्यस्यत्वमतो योगादिज्ञानत्वग्मतो जन्यतयातिव्याप्तिवारणाय इंद्रिय
गि ५ त्वावच्छिन्नकारणताप्रतियोककार्यताशालित्वं लक्षणमिति वदंति। वस्तुतस्तु असाधारणानु
मताविवक्षितामावेन्द्रियनिष्ठकारणतानिरूपितजात्यवच्छिन्नकार्यताशालित्वरूपा॥ अनुमि
त्यादेनुमनत्वावच्छिन्नकारणताप्रतियोगिकजन्यज्ञानत्वावच्छिन्नकार्यताशालित्वरूपेति ना
तिप्रसंगः॥ न च ईश्वरप्रमास्याजन्यत्वान्न चाव्याप्तिरिति वाच्यं॥ तस्य प्रत्यक्षप्रमाणलक्षणा
घटकत्वेनात्रालक्षत्वान्नागत एवं इंद्रियार्थसन्निकर्षोत्पन्नं ज्ञानमिति सूत्रेप्येवमेव लक्षितं॥

तर्कदी
३२

इन्द्रियलक्षणं त्वग्रे वक्ष्यते। प्रत्यक्षप्रमा लक्षणं तु ज्ञानाकरणकं ज्ञानं प्रत्यक्षं। अनुमित्यादि
वारणाय ज्ञानाकरणकमिति· तत्र व्याप्तिज्ञानादेः करणत्वान्नातिव्याप्तिः॥ निर्विकल्पकरूपाप्रमे
ति निर्विकल्पकस्यापि भ्रमभिन्नत्वरूपप्रमात्वमस्तीति प्रमालक्षणे दर्शितं। आत्ममनसेति
ज्ञानमात्रं प्रति आत्ममनोयोगकारणं। एवं त्वग्मनोयोगोऽपि बोध्यः। यदभावात्सुषुप्तिप्राक्
कालोत्पन्नज्ञानादिविशिष्टात्मप्रत्यक्षसामग्रीसत्वेपि सुषुप्तिकाले न ज्ञानमुत्पद्यते॥ सुषुप्ति
काले हि मनस्त्वचं विहाय पुरीतति प्रवर्तते॥ ननु सुखमहमस्वाप्सं न किंचिदवेदिषमित्यादिबो
धः कथं जायते· दुःखाभावरूपस्य सुखस्य ज्ञानाभावस्य वाननुभूतत्वेन स्मरणासंभवादिति
चेन्न। अनुमित्यादिरूपोपनायकवलाज्जाग्रद्दशायामुपनीतभानमिदं॥ ननु सुषुप्तिकालीना
नुभूतस्मरणं। सामग्र्यभावादिति बोध्यं। इन्द्रियाणामिति॥ प्राप्यमेव स्वविषयसंनिकर्षलब्धा
प्रत्यक्षजनकत्वनियमादित्यर्थः। योजनाहिनमिति। योजना वैशिष्ट्यं तेन विशिष्टविषयकं
निर्विकल्पकमित्यर्थः। निर्विकल्पकेपि संबंधस्य विषयत्वात्॥ घटघटत्वसमवायानामेव सा

उत्त:
३२

Nepal Sanskrit University, Balmiki Campus, Kathmandu

मग्रीवत्वा निर्विकल्पके विषयताप्+ प्रकारकं ज्ञानमिति वा· यत्तु संबंधानवगाहि ज्ञानं निर्विकल्पकं·
मिति गोवुद्धिनोक्तं तन्न· निरं तु पूर्वं विशेषणज्ञानाभावान्न विशिष्टबुद्धिः। वस्तुमात्रेति। विशेष्यवि
शेषणसंबंधरूपं यद्विशकलितं वस्तु तन्मात्रावगाहि। न तु विशेष्यत्वप्रकारकादिविलक्षण
विषयताशालीत्यर्थः। किं विशिष्टेति वि शेषणरूपेण वक्तुमशक्यत्वपरं। अन्यथा किंचिदिदमित्य
स्यापीदंतातिविशिष्टज्ञानरूपतया असंगतेः। योजनात्मकमिति। उत्पत्ते संवृण्वने विशिष्ट
तया विषयीक्रियते अनेनेति योजनं विशिष्टज्ञानं तदात्मकं तत्त्वरूपमित्यर्थः। तथा च विशिष्ट
विषयकं सप्रकारकं वा सविकल्पकमिति लक्षणं बोध्यं। अत्रापि संबंधविषयकं सविकल्पकमि
ति गोवुद्धिनोक्तं तन्न। निर्विकल्पके अतिव्याप्तेः हानोपादानेति। अनिष्टसाधनताज्ञानं हानबु
द्धिः। हियते त्यज्यते अनेनेति हानं॥ एवमग्रेऽपि· इष्टसाधनताज्ञानमुपादानबुद्धिः। एतदुभयाति
रिक्तं ज्ञानमुपेक्षा· अत्रेदं बोध्यं· सर्पादिसविकल्पकानन्तरमेव हानबुद्धिर्न जायते अज्ञानमप
दंशम्प बालकादेस्तद्दर्शनात्॥ किंच स्वजनकीभूततत्तद्दशावर्तिनाप्रमितिविषयसमर्पित

तर्क·दी
३३

रताजात्यंतु मितिरूपं हानादिज्ञानं। तत्र च सविकल्पकज्ञानस्य पक्षतानतयोपयोगित्वं प्रत्यक्षेणात्
क्ष्मकालभेदाग्रहात्सविकल्पकानां तथाभिमानः अत एव ज्ञानाकरणकं ज्ञानं प्रत्यक्षमिति प्राचीनाः
अन्यथाज्ञानकरणा [illegible] नितिनयाते वाव्याप्तेः। एतद्दूषयन्नेवतिजातिमत्त्वमाह।। कश्चि
दाहेति· सविकल्पकानां नदीनां निर्विकल्पकानामपीत्यर्थः।। संनिकर्षादित्यादिपदान्निर्वि
कल्पकपरिग्रहः।। अवान्तरव्यापारइति। व्यापारइत्यर्थः। साक्षात्कारिप्रमेति· लौकिकप्रत्यक्षहे
तुरित्यर्थः। प्रत्यक्षं हि द्विविधम्।। लौकिकमलौकिकं च· तत्र लौकिकत्वादिकं विषयितावि
शेषः।। लौकिके षोढेन्द्रियसंनिकर्षः। यथा सामान्यलक्षणा ज्ञानलक्षणा योगजधर्मश्चेति। त
त्र सामान्यं लक्षणं स्वरूपं यस्याः प्रत्यासत्तेः सा तया इन्द्रियसंबद्धविशेष्यकज्ञानप्रकाररूपा·
यथा चक्षुःसंयुक्तो धूमस्तद्विशेष्यकं धूम इति ज्ञानं तत्र प्रकारो धूमत्वं तत्त्वाश्रयाणां सर्व
धूमानामलौकिकचाक्षुषविशेषे चक्षुरिन्द्रियसंनिकर्षः। इन्द्रियाणां संनिकर्षं विना प्रत्य
क्षाजनकत्वादतीतानागतादीनां धूमे चक्षुः संयोगादेः संनिकर्षस्यासंभवात्।। ज्ञानलक्ष

उत
३३

कारणम्· अलौकिके तु त्रिविधेन्द्रियसन्निकर्षः· ४५

णानुज्ञानस्वरूपा प्रत्यासत्तिः। यथा पूर्वानुभूतसौरभस्मरणात्सुरभिचंदनमिति चाक्षुषोपनी
तभाने चक्षुषः सौरभेन सह सन्निकर्षः। यद्यपि चक्षुःसंयुक्ते चंदने सौरभस्य समवायो वर्त्तते·
तथाप्ययोग्यवृत्तित्वात्नासौ ग्राहकः। अन्यथानुत्वादेरपि तथात्वापत्तेः। एवं योगिनां देशकाल
विप्रकृष्टपदार्थप्रत्यक्षे योगजन्यो धर्मः प्रत्यासत्तिः। योगसमाधिः यौनःप्रयत्नेना [redacted] मध्या
नाभ्यासः तेन जन्यत इतउद्धरणामात्रं प्रदर्शितम्॥ विस्तरस्तु अनुमानमणिदीधितिविवेचने
अनुसंधेयः। यत्तच्चक्षुषेति। तथा च द्रव्यचाक्षुषत्वेन कार्यता चक्षुःसंयोगत्वेन कारणतेति भा
वः। एवं द्रव्यस्पार्शनत्वेन त्वक्संयोगत्वेन कार्यकारणभावो बोध्यः। अयुतेति युतसिद्धयोः संबंध
त्वादि सर्वं॥ एवं मनसेति· आत्ममानसत्वावच्छिन्नं प्रति आत्ममनःसंयोगत्वेन हेतुतेति भावः
घटगतरूपादिकमिति·॥ द्रव्यसमवेतचाक्षुषे चक्षुःसंयुक्तसमवायत्वेन· द्रव्यसमवेतस्पर्श
नेत्वक्संयुक्तसमवायत्वेन तथाविधरासने रसनासंयुक्तसमवायत्वेन· तथाविधघ्राणजे
घ्राणसंयुक्तसमवायत्वेन कार्यकारणभाव इति भावः। एवं मनसेति·। आत्मसमवेतमानसे

ख२

मनःसंयुक्तसमवायत्वेन हेतुतेति भावः॥ परिमाणादिग्रह इति परिमाणगतोत्कर्षादिग्रह इत्य-
र्थः॥ अधिकमिति॥ संयुक्तसमवेतसमवायातिरिक्तमित्यर्थः॥ संयुक्तसमवाये। संयुक्तसम-
वाये इत्यर्थः। आतिग्राहकत्वात्परिमाणाद्यग्रहणात् परिमाणवृत्तिविशेषाग्रहणादित्यर्थः। परि-
मिदमि[illegible]मिति सामान्यतः परिमाणग्रहणस्य तूणादावपि संभवात्। व्रुटयेति· सर्वावयवा-
वच्छेदेनेति। एवं संयोगस्य हेतुता क्वौविनिगमनाविरहस्तु ह्ययत्वं बोध्यं· सामान्यविषयक-
मिति· द्रव्यसमवेतसमवेत चाक्षुषे चक्षुःसंयुक्तसमवेतसमवायहेतुता·। एवं तथाविधस्पा-
र्शने तथाविधत्वक्संनिकर्षत्वेन· एवं घ्राणरसनयोस्तथा समवेतज्ञानसत्त्वेन मनःसंयुक्त-
समवेतसमवेतत्वेन कार्यकारणभावो बोध्यः। नन्वत्र संनिकर्षत्रयस्य योग्यदृश्यकार्यकारणभावा-
ऽक्ताः। संयोगेत्रयोऽप्ययोक्तदर्शनत्रसमन्नभिरेव निर्वाहो भवति वे[illegible]त्यर्थः। तथाहि· तृतीय-
संनिकर्षस्थले त्वाऽपि च आत्मप्रत्यक्षे मनःसंयोगः आत्मसमवेतप्रत्यक्षे मनःसंयुक्तसमवा-
य एव हेतुरस्तु। घटचाक्षुषादेः चक्षुःसंयुक्तकपालिकासमवेतकपालसमवायादेव संभ-

समवेत २
त्वेन ६
समवेत ५
ऽत्रक्तः
३४
रूपमा २

गात्। किं चक्षुःसंयोगादेरपि कारणत्वकल्पनयेति। संयोगस्थले द्वयम्। संयुक्तसमवायस्थले चत्वार
इति पक्षांवैयर्थ्यं॥ न चात्ममानसस्थले द्रव्यप्रत्यक्षत्वं कार्यतावच्छेदकमिन्द्रियसंयोगत्वं कारणताव
च्छेदकं तेन घटादिप्रत्यक्षस्थलेपि संयोगस्य हेतुतेति वाच्यम्॥ द्रव्यप्रत्यक्षत्वस्यनित्येश्वरज्ञानवृत्तित
याजन्यत्वविशेषणावश्यकत्वे परस्परविशेषताविशेष्यभावे विनिगमनाविरहात् कार्यकारणभाव
द्वयम्॥ जन्यत्वस्य नियमादिघटितनयाऽतीन्द्रियत्वस्यापि प्रवेशनेतिगौरवात्। लाघवेन मनःसंयोगत्वे
नात्ममानसत्वेनैव कार्यकारणभावकल्पनादिति चेत्। मैवम्। चक्षुःसंयुक्तमहद्वृत्तरूपवत्समवेतयो दु५
ग्यवृत्तिसमवायस्यैवात्र हेतुत्वमिति वाच्यम्। अन्यथा परमाणुरूपादिघटितसंनिकर्षेण नीलत्वा रू
दिचाक्षुषत्वापत्तेः। तथा च वायुघटितसन्निकर्षेण कर्मत्वादिचाक्षुषत्वापत्तिः। न च स्वसमवायिस
मवेतसमवायेन महत्त्वादेरपि हेतुत्वान्न तथेति वाच्यम्। नीलत्वजातेरेकतया घटरूपघटितसं
बंधेन तस्यापि सत्वात्। घटीयगुरुत्वघटितसंबंधेन गुरुत्वादेश्चाक्षुषत्वापत्त्यायोग्यवृत्तीतित
थाच सति त्रसरेण्वादेश्चाक्षुषत्वं न स्यात्॥ चक्षुःसंयुक्तपरमाणुसमवेतद्व्यणुकसमवायस्य

त्वेन द्रव्यसमवेतसमवेतरूपत्वादि चाक्षुषे स्वसमवायिसमवेत स

तर्क. १
३५

निरुक्तरूपत्वाभावेनाहेतुत्वात्. तत्र चक्षुःत्रसरेणुसंयोगो हेतुरेवरूपं वाच्यः। एवं त्रसरेणुरूपादि
ग्रहे संयुक्तसमवायोपि। परमाणुद्व्यणुकयोरनंगीकारेण त्रुटावेव विश्राम इति नयेतु युक्ततरं त
था।। एवं चतुरणुकादिस्पार्शनार्थं त्वक्संयोगादेरपि हेतुतोहनीयेति ग्रंथगौरवाद्विरम्यते। अ
त्रद्रव्यचाक्षुषे इंद्रियसंयोगावच्छेदेन विषयालोकसंयोगस्य कारणत्वं समवायसंबंधेन. द्रव्यस
मवेतरूपादिचाक्षुषे स्वसमवायिसमवेतैं समवायत्वेन हेतुत्वं बोध्यम्।। एवं द्रव्यस्पार्शने उद्भू
तस्पर्शस्य समवायेन हेतुत्वम्।। स्पर्शादिस्पार्शने स्वसमवायिसमवेतेन स्पर्शत्वादिस्पार्शने स्वस
मवायिसमवेतेन समवायेन तथात्वम्।। प्रभायास्तु न स्पार्शनं. उद्भूतस्पर्शाभावादिति।। कस्यचि
न्मते प्रभाया अतीन्द्रियत्वमेव तद्रूपस्यैव प्रत्यक्षत्वमिति।। तथा द्रव्यादिचाक्षुषे उद्भूतरूपम
पि समवायेन कारणम्।। द्रव्यसमवेन चाक्षुषे स्पर्शवत्सन्निकर्षो बोध्यः. उद्भूतत्वमनुद्भूतत्वा
भाववत्वं अनुद्भूतत्वं जातिविशेषः। चक्षुरादीनामुद्भूतरूपाभावान्न चाक्षुषम्।। एवं सति वा
युरपि स्पार्शनप्रत्यक्षविषय एव. उद्भूतस्पर्शादिघटितत्वक्सामग्रीसत्वादिति मीमांसकमता

६

१

तर्क.
३५

उयायिनः नैयायिकास्तु मूर्त्तलौकिकप्रत्यक्षत्वावच्छिन्नं प्रति उद्भूतरूपत्वेन कारणता तेन वायोर्नोद्भूतरूपाभावान्न प्रत्यक्षत्वम्॥ भवन्मते रूपस्य द्रव्यचाक्षुषत्वं कार्य्यतावच्छेदकमिति आकाशादिस्पार्शनवारणाय द्रव्यस्पार्शनत्वावच्छिन्नं प्रति स्पर्शस्य हेतुत्वे कार्य्यकारणभावद्वयकल्पनागौरवात् मन्मते रूपाभावादेवाकाशादेः प्रत्यक्षत्वाभाव इत्येक एव कार्य्यकारणभाव इति लाघवमनन्च मूर्त्तप्रत्यक्षत्वस्य स्वरूपानुप्रवृत्तिनियामकत्वे न विशेषणत्वापि गौरवमिति वायम इन्द्रियसन्निकर्षादिजन्यतावच्छेदकस्यैवाद्वैजात्यविशेषस्य कार्य्यतावच्छेदकमपि निवेशात् तथा मीमांसकमते द्रव्यचाक्षुषत्वं मूर्त्तचाक्षुषत्वं वा द्रव्यस्पार्शनत्वं मूर्त्तस्पार्शनत्वं वा रूपादिकार्य्यतावच्छेदकमिति विनिगमनाविरहात्कार्य्यकारणभावाधिक्यमिति वायोरप्रत्यक्षत्वमेवेति वदन्ति॥ वायुस्पर्शस्तु नैयायिकमतेपि प्रत्यक्षः। त्वक्तु उक्तमहत्त्वसमवायस्य सत्वात्॥ यथा वायुस्तथा ग्रीष्मोष्मा। तथा महत्त्व मपि द्रव्यलौकिकप्रत्यक्षे समवायेन कारणं। द्रव्यसमवेतत्वादिस्थले सन्निकर्षः पूर्ववद्बोध्यः। यदा श्रोत्रेन्द्रियेणेति। शब्दश्रावणत्वेन श्रोत्रेन्द्रियसम

तत्संबद्धाभावे घटत्वाभावग्रहे चक्षुःसंयुक्तविशेषणविशेषणतामाहेत्यरितिचेदेवंक्रमेणापरंपराविशे
षणानामवक्रमेणभवंतीतिसंक्षेपतइत्युक्तम्॥ विशेषणतात्वेनैवत्र चोटासन्निकर्षोक्तिविरो
धः॥ अत्र चाभावप्रत्यक्षे योग्यानुपलब्धिः कारणम्॥ योग्यानुपलब्धिं प्रतियोग्युपलंभाभावः साप्र
तियोगिसत्त्वप्रसंजनप्रसंजितः प्रतियोग्युपलंभाभाव इत्यर्थः॥ यद्यत्र घटः स्यात्तदुपलभ्येते
त्यादितर्कविषयीभूतोयः प्रतियोग्युपलंभः तदभाव इति यावत्॥ स च तर्कः तदा वक्तुं शक्यते
यदा घटतत्सन्निकर्षव्यतिरिक्तयावत् घटचाक्षुषादिकारणसत्त्वम्॥ अन्यथा आलोकादि
यत्किंचित्कारणासत्त्वे तदभावादेव प्रतियोगिसत्त्वेप्युपलंभस्यापादयितुमशक्यत्वात्॥ तेनापि
शाचाभावो न प्रत्यक्षः॥ यद्यत्र पिशाचः स्यात्तदुपलभ्येतेति प्रसंजयितुमशक्यत्वात्॥ पिशाचस्या
तीन्द्रियत्वात्॥ पिशाचभेदस्तु प्रत्यक्ष एव॥ घटोपि यदि पिशाचभिन्नः स्यात्तदुपलभ्येतेत्यापादयितुं
शक्यत्वात्॥ तस्माद्योग्याभावप्रत्यक्षे अधिकरणस्य तदिन्द्रियप्रत्यक्षयोग्यतापेक्षिता॥ अन्यं
ताभावस्थले च प्रतियोगियोग्यतेति बोध्यम्॥ नैनवायौ रूपाभावः परमाणौ महत्त्वाभावश्च चाक्षु

४१३२

श्रीगुरवे नमः ॥ ॥ मूले व्याप्तिपक्षधर्मतयोः सङ्गत्यप्रदर्शनोन्यूनतां परिजिहीर्षुस्तयोरेककार्यानुकूलत्वरूपसङ्गतिं प्रदर्शयन् व्याप्त्यनन्तरमित्यादिमूले तामवतारयति । अनुमितीति । अनुमितिलक्षणं अनुमितिस्वरूपं यदेककार्यं तदनुकूलत्वमित्युक्त्या संप्रयोजकत्वरूपसङ्गत्या प्रयोजकत्वञ्च कारणतावच्छेदकस्यापीति । व्याप्तिपक्षधर्मतयोः परामर्शनिष्ठकारणतायामिवावच्छेदकत्वेनानुमित्यजनकत्वेपि न क्षतिः । यद्यपि पक्षतायां न कारणतावच्छेदकत्वं तामनन्तर्भाव्य पर्वतादिव्याप्तिस्वज्ञानत्वेनैवानुमितिजनकतावच्छेदकत्वात् । तथापि पक्षतायाः अनुमितौ स्वातन्त्र्येण कारणतया तदुपलक्षितधर्मिवृत्तितायाश्च कारणतावच्छेदकतया तद्घटितविशिष्टस्य कार्यानुकूलत्वमक्षतमेवेति ध्येयम् । निरूपयितुमिति । निरूपणं प्रतिपत्त्यनुकूलो व्यापारः । एवञ्च पक्षधर्मतात्वघटकपक्षतानिरूपणस्यापि पक्षधर्मताप्रतिपत्त्यनुकूलत्वेनैव तन्निरूपणत्वमक्षतमेवेति मूले पक्षतानिरूपणेपि पक्षधर्मतां निरूपयितुमित्यस्य नासङ्गतिः । पक्षे धर्मत्वं यस्येति व्युत्पत्त्या पक्षधर्मतापदं पक्षीयधर्मविशेषरूपपक्षतापरमिति केचित् । तच्चिन्त्यम् । तथात्वे निरवनसङ्कष्टेपि निर्वन्धिनो दीधितिकारस्य पक्षतां निरूपयितुमित्यस्यापेक्षायां बीजाभावात् । व्याप्तीति । व्याप्तिनिरूपणानन्तरमिति मूलपाठाभिप्रायेण । व्याप्त्यनन्तरमिति पाठे तु तत्र ईकाराभावात् प्रत्यक्षेत्यादीत्यपेक्ष्य प्रत्यक्षविस्यादीतिरीत्या प्रत्यक्षोपजीवकत्वादित्यादिग्रन्थोद्धारकस्य तथाविधलिखनासङ्गतेः । तत्रेति मूले तत्पदं पक्षधर्मतापरं सप्तम्यर्थश्च घटकत्वं । अन्वयश्चास्य पक्षत्वमित्यत्रेत्यवधेयम् । सन्दिग्धेत्यादिरूपग्रन्थस्य सन्दिग्धः साध्यरूपो धर्मो यत्रेति व्युत्पत्त्या विषयविधया साध्यीभूतधर्मसन्देहवत्त्वं तादृशसन्देहपर्यवसितं पक्षत्वमित्यर्थः ॥

तत्र साध्ये धर्मित्वनिवेशनमफलं धर्मिपदस्यार्थकाय यस्मिन्सन्दिग्धं साध्यधर्मत्वं साध्यधर्मीयस्येति न हुव्रीहिवत्ना तत्साध्यनिरूपितधर्मित्वं पर्यवसितं पक्षत्वमित्युक्तौ साध्ये सन्दिग्धत्वं स्वधर्मत्वं पक्षत्वमित्युक्तौ च साध्यनिरूपितधर्मित्वस्य पक्षधर्मित्वस्य अप्रसिद्धिस्थले वक्ष्यमाणानुपपत्तिप्रयोजकत्वञ्च एवं साध्यकोटिकसंशयस्य निवेशो साध्यं पक्षवृत्ति न वा साध्यं पक्षनिष्ठाभावप्रतियोगि न वेत्यादिसंशयासङ्ग्रहः तादृशसंशयोत्पादने च पक्षः साध्यवान्न वेति संशयादनुमित्यनुपपत्तेस्ततो धर्मित्वं परित्यज्य केवलान्वयिग्रन्थे मणिकृतैव वक्ष्यमाणं तथाविधसकलसंशयानुगमप्रकारं दर्शयति यत्रेति यद्धर्मावच्छिन्ने सध्यानिर्णयान्वयिविशेषणत्वं साध्यस्य साध्यतावच्छेदकावच्छिन्नस्य यच्छब्दार्थप्रकारित्वं तस्यापि निर्णयेऽन्वयः तत्र तद्धर्मावच्छिन्ने सप्तम्यर्थोऽनुमित्यन्वयिविशेष्यत्वं तादृशसम्बन्धेनानुमितौ तादृशसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नविषयकानुमितौ पक्षताजनकीभूतेत्यर्थः पक्षविशेष्यकसाध्याभावविशिष्टबुद्धाविव साध्यधर्मिकपक्षवृत्तित्वपक्षनिष्ठाभावप्रतियोगित्वविशिष्टबुद्धावपि साध्यवान्नेति निश्चयस्य प्राचीनमते प्रतिबन्धकत्वात्साध्यं पक्षवृत्ति न वेत्यादिसंशयसङ्ग्रहः एवञ्च पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितशुद्धसंयोगादिसंसर्गावच्छिन्नशुद्धवह्नित्वावच्छिन्नविषयताकानुमितित्वावच्छिन्नं प्रति पर्वतत्वावच्छिन्नविशेष्यतानिरूपितसंयोगादिसंसर्गावच्छिन्नवह्नित्वावच्छिन्नप्रकारताशालिनिश्चयत्वावच्छिन्नप्रतिबन्धकताकसाध्यसंशयो हेतुरिति पर्यवसितं. तादृशनिश्चयप्रतिबन्धकस्य यथाश्रुते घटादिविषयकसमूहालम्बनात्मकवह्निमत्त्वनिश्चयप्रतिबध्यघटादिसंशयसाधारण्यात् तादृशनिश्चयत्वा.

वच्छिन्नप्रतिबन्धकताप्रवेशः अंशाद्भ्रमत्वस्यान्यूनवृत्तिभिन्नं ननु स्वरूपसम्बन्धविशेषः तेन वन्हिसामान्याभावविशिष्टबुद्धौ महानसीयत्वा
दिविषयतामनन्तर्भाव्य वन्हिमान् महानसीयवन्हिमानित्यादिसकलसाधारणवन्हित्वाद्यवच्छिन्नवत्तानिश्चयत्वेन प्रतिबन्धक
त्वनिरूपणान्महानसीयवन्हिमान्वन्हिसामान्याभाववान्वा पक्ष इत्याकारकसंशयं प्रति महानसीयत्वावच्छिन्नप्रकारकनिश्च
यत्वेन प्रतिबन्धकत्वेपि न तथाविधसंशयस्य महानसीयत्वाद्यवच्छिन्नसाध्यकानुमितौ पक्षतात्वानुपपत्तिः एवं महानसीय
वन्ह्यभावादिविशिष्टबुद्धिं प्रतिबन्धकतावच्छेदककोटौ वन्हित्वाद्यवच्छिन्नप्रकारताकत्वादेर्निविष्टत्वेपि वन्हिमानित्याद्यनुमि
तौ महानसीयवन्हिमान्नवा पक्ष इत्यादिसंशयस्य पक्षतात्वापत्तिः इत्थञ्च आहार्यस्य भ्रमत्वज्ञानास्कन्दितस्य च निश्चयस्याप्र
तिबन्धकतया ऽनाहार्यत्वं भ्रमत्वज्ञानानास्कन्दितत्वञ्च निश्चयविशेषणं देयमतो न तथाविधनिश्चयत्वान्यूनवृत्तिप्रतिबन्ध
कत्वाप्रसिद्धिः पर्वतो वन्हिमानित्यादेः कस्याश्चित्तालक्षणधर्मान्तरावच्छिन्नविशेष्यताकान्यसंसर्गकान्यधर्मावच्छिन्नप्रकारक
निश्चयसाधारणसंयोगादिसंसर्गकवन्हित्वाद्यवच्छिन्नप्रकारकनिश्चयत्वान्यूनवृत्तिप्रतिबन्धकताकत्वं सम्भवतीति प्रकृतपक्ष
तावच्छेदकावच्छिन्नविशेष्यतानिरूपितत्वादेः प्रकारताविशेषणत्वे ऽपनीतभानात्मकबाधनिश्चयस्यापि साध्यवत्ता
निश्चयसामान्यनिवर्तनीयतया भ्रमत्वज्ञानास्कन्दितस्य तस्यानुमितिविरोधितया तथाविधबाधदशायामनुमित्यापत्तिरतः
संशयत्वनिवेशनं न च पक्षसाध्यविशेष्यकसंशयसाधारणस्यानतिप्रसक्तस्य संशयत्वस्य दुर्निर्वचतया पुनरननुगमतादव
स्थ्यमिति वाच्यम् तद्विनिश्चयनिवर्तनीयत्वस्यैवात्र संशयपदेन विवक्षितत्वात् केवलान्वयिनि च साध्ये पक्षनिष्ठाभाव
प्रतियोगित्वनिश्चयस्य दुर्लभत्वे बाधस्य तद्विधबोधोपादानेपि नैवंविधसंशयाननुगमसम्भवात्तदननुगमो न दोषाय अनुगतस्यापि

एतद्ग्रन्थं मेकममं त्रुटितम्:

कृपाश्चसंसमगाच्च· 'एतेन पक्षतायां वैशिष्ट्यावगाहिसंशयस्य पक्षतात्वमिष्टमेव तस्य वन्हिः पक्षनिष्ठाभावप्रतियोगी न वेति संशयसमये तत्त्वात्
तत्त्वनिश्चयविषयितायाश्च बाधप्रतिबध्यतावच्छेदकत्वं निवेशनीयम्· तेन वन्हिव्याप्यसाध्यकस्थले वन्हिमान्न वेत्येतादृशसंशयस्य सत्त्वे
ऽपि वन्हिव्याप्याभावाभाववत्त्वेन व्याप्यस्य पक्षधर्मतानेऽपि संशयत्वघटकीभूतस्वनिश्चयवन्हिमत्पक्षविषयितया वन्हिव्याप्याभाववन्निश्चयप्रतिबध्य
तावच्छेदकत्वविरहात्· एवञ्च शुद्धवन्हिसाध्यकस्थले वन्हेरभाववान्पक्ष इत्येतादृशबाधनिश्चयप्रतिबध्यस्य महानसीयवन्हि
मान्न वा पक्ष इत्येतादृशसंशयस्य पक्षतात्ववारणाय साध्यवत्तानिश्चयप्रतिबध्यतावच्छेदकावच्छिन्नत्वं निवेशनीयमित्यवधेयम्· एतेनावच्छे
दकावच्छेदेन तत्तन्मितौ पक्षतावच्छेदकसामानाधिकरण्यमात्रेण कोटिद्वयावगाहिनो निश्चयस्यावच्छेदकावच्छेदेन साध्यादिमत्तानिश्चय
प्रतिबध्यत्वेऽपि निरुक्तसंशयस्य भावे न पक्षतात्वमिति समुक्षेपः· अथावच्छेदकावच्छेदेन कोटिमवगाहमानस्य कोटिद्वयसमुच्चय
स्य पक्षतात्वापत्तिः तस्याप्युक्तरूपानपायात्· न च विरोधावगाहित्वनिवेशात् तद्वारणसम्भवः· कुत्रचित्किञ्चित्प्रतियोगिकविरोधभा
नस्य समुच्चये पक्षतात्वात्· तद्वत्तदभावादिविरोधावगाहितस्य प्रत्येकं सकलसंशयसाधारण्यासम्भवादिति चेन्न· संयोगादेरव्या
प्यवृत्तित्वस्थानदशायां तद्वत्त्वग्रहविषयीभूतधर्मिणि तदभावादिग्रहोत्पत्त्या तद्वत्ताग्रहस्य तदभावग्रहप्रतिबन्धकतायां सव्याप्यवृत्ति
त्वज्ञानस्योत्तेजकतामुपेक्ष्य व्याप्यवृत्तितावगाहित्वेनैव प्रतिबन्धकत्वमुपेयते· व्याप्यवृत्तित्वज्ञानवद्भिन्नाधारताकत्वं सर्वत्र प्रतिबन्धक
तानैतादृशाधारताया अन्ततः संसर्गतयैव भानमुपेयते· एवञ्च समुच्चयात्मककोटिविषयिता नाविपरीतधर्मप्रतिबन्धकतावच्छेदिका व्याप्य
वृत्तित्वविषयित्वानिरूपितत्वात्· अतः उक्तसंशयत्वनिरुक्तौ स्वपदेन समुच्चयोपादानासम्भवेन तस्य पक्षतात्वापत्तिविरहात्· अथवा
स्वघटितधर्मावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकीभूता या स्वावच्छेदकधर्मावच्छिन्ननिरूपितविरोधित्वविषयितानिरूपितम्

कोटिता सामानाधिकरण्यसम्बन्धेन तद्विशिष्टप्रकारितैव संशयत्वं तच्च समुच्चयव्यावृत्तं समुच्चये च भावाभावकोटिद्वयविष
यिताया निरोधविषयत्वानिरूपितत्वात् संशये चावृत्ति: कोट्यो: संसर्गतयापि परस्परविरोधभानोपगमेन सकलसंशयसंग्रह: यद्
वा संशयत्वं तत्कोटिविरोधस्यैव कुत्रकरूपेणोपादानसम्भवान्न च स्वतन्त्रविरोधभानं मानाभावादिति प्रसङ्ग इति संक्षेप: केचित्तु साध्यनिश्च
य साध्याभावनिश्चयघटितवक्ष्यमाणतावच्छेदकविशेष्यताशालित्वं समुदितार्थ: संशये च धर्मिण्युभयप्रकारतानिरूपितैकविल
क्षणविषयता समुच्चये तु लक्षण्यायोपगम्यते इति तादृशविषयताया विभिन्नरूपेणोभयनिश्चयघटितवक्ष्यमाणतावच्छेदकतया नासम्भ
व इत्याहु: तच्चिन्त्यम्। प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतदभावकोटिकज्ञानत्वादिकमुपेक्ष्यानेकत्वरूपेण संशयविशे
षणस्य प्रयोजनं दर्शयति तेनेति नपक्षेति। पक्षविशेष्यकस्य पक्ष: साध्यवान्नवेत्यस्य साध्यविशेष्यकस्य साध्यं पक्षवृत्ति नवेत्या
कारकस्य संशयस्याननुगम: तथा सति फलस्याविलक्षणतया व्यभिचारेण कारणता भज्येतेति भाव: इदमुपलक्षणं साध्याभाव
साध्यवद्भेदादिकोटिकसंशयाननुगमोऽपि बोध्य:। विशेषसम्बन्धातिवेशनप्रयोजनमाह नवेति। सम्बन्धान्तरेण। तत्सम्बन्धातिरिक्त
सम्बन्धेन। सन्देह इति सन्देहदशायां। निर्णीतसम्बन्धेन विधेया। तत्कालीननिर्णयाविषयीभूततत्सम्बन्धेन। इत्यनन्तरमनुमितावि
तिपूरणीयम्। तत्सम्बन्धेन संशयसत्त्वेऽपि तत्सम्बन्धेन सिद्धिशून्यकाले इष्टापत्तिसम्भवान्निर्णीतमुक्तं सम्बन्धमात्रनिवेशस्य साध्यनिर्ण
यसामान्यनिवर्त्यत्वान्निवेशोऽप्रसिद्धिप्रसङ्गात् यत्किञ्चिन्निश्चयनिवर्त्यत्वं यत्किञ्चित्संसर्गकनिर्णयसामान्यनिवर्त्यत्वं वा यदि
निवेश्यते तदाऽतिप्रसङ्गो बोध्य:। धर्मित्वांशपरित्यागप्रयोजनमाह तथा तम:प्रभृतौ स्थिति:। स्वधर्मित्वं संशयविषयसाध्यकत्वं
पक्षत्वमित्युक्तौ धर्मित्वानिवेशोऽप्य[illegible]ने साध्यवद्घटादिपक्षकस्थले पक्षतावैकल्यं घटादिसमवेतत्वस्य प्रसिद्ध्या गगनादौ तत्संशय

एतदुत्तरं वेन्यपत्रं त्रुटितम्:

कुत्रचित्संशयमादाय· एतेन पक्षतायाः वैशिष्ट्यावगाहिसंशयस्य पक्षतात्वमिति समे तस्य वह्निः पक्षनिष्ठाभावप्रतियोगी न वेति संशयसमये तस्य च
स्वनिष्ठविषयितायाश्च बाधप्रतिबध्यतावच्छेदकत्वं निवेशनीयम्· तेन वह्निव्याप्यसाध्यकस्थले वह्निमान्न वेत्येतादृशसंशयस्य सत्त्
त्वं वह्निव्याप्याभावाभावत्वेन व्याप्यस्य पक्षधर्मतानेऽपि संशयत्वघटकीभूतस्वनिष्ठवह्निमत्पक्षविषयितायाः वह्निव्याप्याभाववन्निश्चयप्रतिबध्य
तावच्छेदकत्वविरहात्· एवञ्च शुद्धवह्निसाध्यके वह्नित्वसाधकस्थले वह्न्यभाववान्पक्ष इत्येतादृशबाधनिश्चयप्रतिबध्यस्य महानसीयवह्नि
मान्न वा पक्ष इत्येतादृशसंशयस्य पक्षतात्ववारणाय साध्यवत्तानिश्चयप्रतिबध्यतावच्छेदकतावच्छिन्नत्वं निवेशनीयमित्यवधेयम्· एतेनावच्छे
दकावच्छेदेनानुमितौ पक्षतावच्छेदकसामानाधिकरण्यमात्रेण कोटिद्वयावगाहिनो निश्चयस्यावच्छेदकावच्छेदेन साध्यादिमत्तानिश्चय
प्रतिबध्यत्वेऽपि निरुक्तसंशयस्य भावेन न पक्षतात्वमिति सदाक्षेपः· अथावच्छेदकावच्छेदेन यो कि मनवगाहमानस्य कोटिद्वयसमुच्चय
स्य पक्षतात्वापत्तिः तस्याप्युक्तप्रतिबन्ध्यत्वात्· न च विरोधावगाहित्वविशेषणात्तस्यासम्भवः कुत्रचित्किंचित्प्रतियोगिकविरोधभा
नेऽपि संशयत्वे प्रत्यक्षत्वात्· तदभावत्वतदभावाभावादिविरोधावगाहित्वस्य प्रत्येकं सकलसंशयसाधारण्यासम्भवादिति चेन्न· संयोगादेर्व्या
प्यवृत्तित्वज्ञानदशायां लघुत्वगृहविषयीभूतधर्मिणि तदभावादिग्रहोत्पत्त्या तत्संशयस्य तदभावग्रहप्रतिबन्धकतायां सव्याप्यवृत्ति
त्वज्ञानस्योत्तेजकतामुपेक्ष्य व्याप्यवृत्तित्वावगाहित्वेनैव प्रतिबन्धकत्वमुपेयते· व्याप्यवृत्तित्वज्ञानवद्धिन्नाधारतावत्त्वं सर्वत्र प्रतिबन्धक
तानैतादृशाधारतायां अन्ततः संसर्गतयैव भानमुपेयते· एवञ्च समुच्चयाजनककोटिविरोधिता नातिप्रसक्ता प्रतिबन्धकतावच्छेदिका व्याप्य
वृत्तित्वविषयित्वानिरूपितत्वात्· अतः उक्तसंशयत्वानिरुक्तौ स्वपदेन समुच्चयोपादानासम्भवेन तस्य पक्षतात्वापत्तिविरहात्· अथवा
स्वघटितधर्मावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकीभूतायाः स्वावच्छेदकधर्मावच्छिन्ननिरूपितविरोधितत्वविषयितानिरूपितम्

कोटितो सामानाधिकरण्यसम्बन्धेन तद्विशिष्टप्रकारितैव संशयत्वं तच्च समुच्चयव्यावृत्तं समुच्चये च भावाभावकोटिद्वयविषयिताया निरोधाविषयत्वान्निरूपितत्वात् संशये चासतः कोटौ संसर्गतयापि परस्परविरोधभानोपगमेन सकलसंशयसंग्रहः यद्द्वे संशयत्वं तत्कोटिविरोधस्यैव प्रकाररूपेणोपादानसम्भवान्न च स्वतन्त्रविरोधभानं मा दायातिप्रसङ्ग इति संक्षेपः। केचित्तु साध्यनिश्चयसाध्याभावनिश्चयप्रतिबन्धकतावच्छेदकविशेषणतापन्नत्वं समुदितार्थः संशये च धर्मिण्युभयप्रकारतानिरूपितैकावैलक्षण्यविषयता समुच्चयवैलक्षण्यायोपगम्यते इति तादृशविषयताया विभिन्नरूपेणोभयनिश्चयप्रतिबन्धकतावच्छेदकतया नासम्भव इत्याहुः। तच्चिन्त्यम्। प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतदभावकोटिकज्ञानत्वादिकमुपेक्ष्यानेकरूपेण संशयविशेषणस्य प्रयोजनं दर्शयति तेनेति। न पक्षेति। पक्षविशेषणकस्य पक्षः साध्यवान्नवेत्यस्य साध्यविशेष्यकस्य साध्यं पक्षवृत्ति न वेत्याकारकस्य संशयस्य नानुगमः तथा सति फलस्याविलक्षणतया व्यभिचारेण कारणता भज्येतेति भावः। इदमुपलक्षणं साध्याभावसाध्यवद्भेदादिकोटिकसंशयाननुगमोऽपि बोध्यः। विशेषसम्बन्धनिवेशप्रयोजनमाह न वेति। सम्बन्धान्तरेण। तत्सम्बन्धातिरिक्तसम्बन्धेन। सन्देहे। सन्देहदशायां। निर्णीतसम्बन्धेन विधया। तत्कालीननिर्णयाविषयीभूततत्सम्बन्धेन। एवं तदन्तरमनुमितावितिपूरणीयम्। तत्सम्बन्धेन संशयसत्त्वेऽपि तत्सम्बन्धेन सिद्धिशून्यकाले इष्टापत्तिसम्भवान्निर्णीतेत्युक्तं सम्बन्धमात्रनिवेशे च साध्यनिर्णयसामान्यानिवर्त्यत्वान्निवेशोऽप्रसिद्धिप्रसङ्गात् यत्किञ्चिन्निश्चयनिवर्त्यत्वं घटादित्वसंग्राहकं निर्णयसामान्यनिवर्त्यत्वं वा यदि निवेश्यते तदाऽयमतिप्रसङ्गो बोध्यः। धर्मित्वांशपरित्यागप्रयोजनमाह तथा नमः प्रभातीत्यादौ। स्वधर्मित्वं संशयाविषयसाध्यकत्वं पक्षत्वमित्युक्तौ धर्मित्वानिवेशेऽप्यसतीसाध्यकपर्वतादिपक्षकस्थले पक्षतावैकल्यं च घटादिसमवेतत्वस्य प्रसिद्ध्या गगनादौ तत्संशय

समभवादिति ~~[illegible]~~ तमःप्रभातिपर्यन्तस्य पक्षत्वानुसरणं· तथाच साध्येसम्बन्धान्तरेण ध्वान्तित्वसन्देहदशायां निर्णीतसम्बन्धेना-
नुमितिवारणाय प्रकृतसाध्यतावच्छेदकसम्बन्धेन स्वध्वान्तित्वसंशयस्यावश्यनिवेशनीयतया तमःप्रभातिसमवेतत्वस्याप्रसिद्ध्या
साध्ये पक्षध्वान्तित्वसंशयमादायापि न तत्र पक्षतोपपत्तेरिति भावः· स्वरूपसम्बन्धेन तमोध्वान्तित्वस्य प्रसिद्ध्या तेन सम्बन्धेनानु
मितौ नानुपपत्तिरतः· समवायेनेति· पक्षे साध्यीयसाध्यतावच्छेदकसम्बन्धावच्छिन्नधर्मितासंशयस्य पक्षतात्वे तमःप्रभाते
ध्वान्तिमत्साधने नानुपपत्तिरतः आकाशादीति·। तद्वैकल्यम्। पक्षतावैकल्यम्·। सन्देहे गमि हेतुः विशेषतया पक्षधर्मिताज्ञान
निश्चतज्ज्ञानजनकतायामवच्छेदकं। तत्राद्यं दूषयति· भूले सन्देह इति। विशेषणम्· अपेक्षणीयानुमितिसंव्यवहितप्राक्क्षणसत्त्वं अनुमिते
कारणं विशेषण। विशेषतया कारणतावच्छेदकधर्मे ~~[illegible]~~ ति यावत्· परामर्शपूर्वं तस्य संशयस्य नाशादित्यन्वयः· यत्राद्यौ विशे
षदर्शनं ततो व्याप्तिस्मरणं तदभिप्रायेण नि दर्शनस्य, यत्र तयोर्विपरीतक्रमस्तदभिप्रायेण व्याप्तिस्मरणस्य। नाशकत्वमभिहितम्·
अतएकत्रोभयनाशकत्वासम्भवेपि न क्षतिः. आदिपदेन यत्र संशयानन्तरक्षणे व्याप्तिस्मरणाद्यनुकूलज्ञानान्तरोत्पादः तदनन्तर
मेव व्याप्तिस्मरणादि तत्रत्यसादृशज्ञानसङ्ग्रहः। द्वितीयं दूषयति· नेपलक्षणमिति। अव्यावर्तकतापत्तेः सिद्धिस्थलेऽनुमित्यवारक
तापत्तेः· तत्कालीनपरामर्शस्यापि कालान्तरीयसंशयविषयधर्मिध्वान्तित्वावगाहितया सामग्र्या अक्षतत्वादिति भावः। अथ साध्य
सन्देहेऽनुमितौ हेतुरेव· लिङ्गदर्शनादेः पूर्वोत्पन्नस्य संशयस्य तेन विनाशेपि तदनन्तरपरामर्शाव्यवहितप्राक्क्षणजातसंशयान्तरा
पेरनुमितिः कल्प्यते· नन्वेवमन्त एव संशये यत्र सामग्रीवशात्परामर्शोत्पत्तिस्तत्रानुमित्यनुदयप्रसङ्गः परामर्शकाले तदनन्तरञ्च
विशेषदर्शनरूपप्रतिबन्धकवशेन संशयोत्पादासम्भवादिति वाच्यम्· फलानुरोधेन सर्वत्रैवानुमित्युपधायकपरामर्शाव्यवहितप्राक्क्षणे

[illegible]

सर्वत्र संशयोत्पादकल्पनात् यत्र संशयोत्पादो द्वितीयादिक्षण एव परामर्शसामग्री प्रमाणोल्लेख यत्र वा परामर्शसामग्री पूर्वक्षणे
संशयजनकधर्मिज्ञानाद्यभावः प्रामाणिकस्तत्र परामर्शेनैतत्तरं साध्यस्य प्रत्यक्षतन्निर्णय एवोत्पद्यते अतएव प्रवृत्त्याद्युपपत्तेः तत्रानुमितेरपि
स्यानुत्पत्तस्य सायस्यापत्त्या भूमत्वमेव कल्प्यते । अनुगतानामनुगतानां साधाय्ये साध्याभाववत्त्व विशिष्टावृत्तेश्चाभावस्यानुमितिहेतुत्वोपेक्षया संशय
हेतुतायां लाघवात् संशयहेतुत्वोपगमे बाधनिश्चयदशायां संशयाभावादेवानुमितेर्वारणसम्भवात् नानाविधबाधाभावस्यानुमिति
हेतुत्वाकल्पनेनानुमितिसामग्रीप्रतिबन्धकतायां तद्विनिवेशनेनैव लाघवात् अतः ज्ञानविरोधितयैव च बाधादीनां हेत्वाभासतोपपत्तेः
संशयस्य च कार्यतावच्छेदककोटौ कारणवैशिष्ट्यं निवेश्य विशिष्टतादृशसंशयत्वेनैव हेतुत्वावश्यकत्वात् तन्नो [illegible] कारोक्तप्रकारस्य तु
परितनया उक्तयुक्त्यावश्यकत्वात् प्रतिबध्यतादीनां स्वरूपावच्छेदकभेदेन भिन्नानामननुगमात् स्वरूपानुगममात्रपर्यवसानेऽपि न क्षतिः
संशयबाधस्य स्वरूपतः तदभाववत्ताज्ञानत्वेनैव कारणत्वे ननु पक्षधर्मिकस्य ध्यतदभावोभयप्रकारकज्ञानत्वरूपसंशयत्वेन गौरवात् बाधा
निश्चयदशायामनुमित्यापत्तिसम्भवः प्रत्यक्षादेः साधारणेनालौकिकविशिष्टवैशिष्ट्यावगाहिने प्राचे वा बाधनिश्चयस्य प्रतिबन्धकताया
आवश्यकत्वादिति चेन्न [illegible] अधिनिश्चये प्रामाण्यग्रहसत्त्वेऽनुमित्यापत्तेः । अप्रामाण्यग्रहाभावस्य संशयजनकतायां प्रयोजन
विरहेणानिवेशात् साध्यसन्देहे प्रामाण्यग्रहसत्त्वेऽप्यनुमित्युपगमे क्षतिविरहादिति चेन्न प्रत्यक्षादिनिर्णीतेऽप्यनुमित्सया
अनुमितेरनुभवसिद्धत्वात् संशयस्य पक्षतात्वे तदनुपपत्तेः अनुभवो यत्नापि विशेषदर्शनमूलकप्रत्यक्षादेव सर्वत्र प्रवृत्त्यादिसम्भवे
अनुमानप्रामाण्यस्यैव विलयापत्तेः पक्षधर्मताप्रत्यक्षव्याप्तिस्मरणयोः एवेरक्रमेणोत्पत्त्यनन्तरं यत्र परामर्शस्तत्र व्याप्तिस्मरणकालीन
पक्षधर्मताज्ञानस्यापि विशेषदर्शनतया सत्त्वेन व्याप्तिस्मरणानन्तरं संशयकल्पनासम्भवाच्च संशयानन्तरजाततत्संशयकल्पने
संशयादनुमित्यापत्तिश्चेति सङ्क्षेपः । संशयनाशोऽपि यावन्न निर्णयस्तावन्न स्यादिति संशययोग्यतया अनपायात् स्यात् सत्पक्षतात्वं सम्भव
तीतिलदधिशकरणे मूलस्य न्यूनता अतो नापीनिर्मूलमेव संशययोग्यतानिराकरणकतया व्याचष्टे संशययोग्यतामिति । साधक

बाधकमानपदस्य सिद्धिबाधकपयथाश्रुतपरत्वे सर्वत्रैवानुमित्यनुपपत्तिः अनुमितेः पूर्वं सिद्धेर्बाधहेतुभूतचक्षुरादेः सिद्धिहेतुपरामर्शस्य च सर्वत्रैव सत्त्वादतस्तत्पदं सिद्धिबाधपरतया व्याचष्टे । साधक इति । यद्यपि बाधकमानपदस्य बाधजनकतत्सामग्रीपरत्वेऽप्येनक्षतिः बाधसामग्र्यनन्तरक्षणे कदाप्यनुमितेरनुत्पादात् तथापि बाधजनकत्वमात्रेण तत्सामग्रीपरत्वे तदवच्छिन्नाभावस्य हेतुत्वलाभेन तत्राप्युक्तैवानुपपत्तिः बाधसामग्रीत्वेन तत्परत्वं च विना लक्षणां न निर्वहतीति लक्षणाया आवश्यकत्वे बाधस्वरूपलक्षणैव चितेत्यभिप्रायेणेदम् । ननु पक्षे साध्याभावनिश्चयस्य बाधतया केवलान्वयिनि साध्याभावाप्रसिद्ध्या बाधासिद्धिरिति तदभावघटितपक्षतावैकल्यमत आह केवलान्वयिनि चेति । पक्षतेति । साध्य इत्यादिः धीः निर्णयः सुलभो बाधदशी तथा च तादृशबाधाभावस्यैव पक्षताघटकत्वान्नानुपपत्तिरिति भावः । सुलभ इत्यनेन तादृशाभावांशे साध्यीयत्वे भ्रमात्मकबाधस्यापि कदाचित्सत्त्वाच्चेत्युक्तस्य प्राप्तिकृता तदभावघटितत्वमपि पक्षतायाः सम्भवतीति सूचितम् । व्याप्तिस्मरणात् पूर्वमनुमित्सया तादृशस्थलेऽनुमितिमुपपाद्य सिषाधयिषाविरह इत्यादिग्रन्थमवतारयति । नन्विति । तत्रापि परामर्शात् पूर्वमनुमित्साया अस्थिरत्वेऽपि पुनरनुमित्सा [illegible] परामर्शानन्तरं अनुमित्सान्तरं । ननु परामर्शानन्तरोत्पन्नेन इच्छाजनकज्ञानेनेच्छाजननं क्षणद्वयं परामर्शस्य विनाशादतः कथमनुमितिरित्यत आह । ततः परामर्शानन्तरमिति । विनश्यदवस्थानुमित्सयाऽनुमितिमुपपाद्य अविनश्यदवस्थयाप्युपपादयति स्मरणात्मका हेति । [illegible] चाक्षुषादिपरामर्शस्यानुमित्यंशे इव साध्यवत्ताप्रकारकसमूहालम्बनत्वं नोपपद्यते । स्वात्मयोग्यविशेषे शाने इन्द्रियस्यासमर्थत्वात् अतस्तस्य तथात्वमुपेक्ष्य तन्मूलकव्याप्यवत्पक्षगोचरसंस्कारात् पूर्वमनुमित्सानन्तरमुत्पन्नस्या धनत्वज्ञानादितः संस्कारसहकृतात्तत्समूहालम्बनस्मरणात्मकपरामर्शान्तरस्यानुसरणं तथा च यथानन्तरं परामर्शस्य

बोध्यः ननु कल्पकाभावान्नैतादृशकल्पनसम्भव इत्याशङ्कां परिहरति· फलबलादिति·। सिषाधयिषारूपकारणं विना अनुमित्या
त्मककार्यानुपपत्तिबलादित्यर्थः। सिषाधयिषाविरहेऽपीति मूलस्यानुमातुरित्यादिः· तेन परस्यासिषाधयिषायाः सत्त्वात्पक्षत्वेऽपि न क्षतिः
इच्छारूपपक्षतया आत्मनिष्ठप्रत्यासत्त्यैव हेतुत्वेत्यभिप्रायेणेदं· न च तथापि फलबलादनुमित्सां कल्पयित्वा, नुमितिः सम्भवोऽस्मिन्नेका· त
त्तदभाववत्यानुभवात्। अहं तथा कल्पनासम्भवात्· पूर्वं कदापि यस्य मे चानुमितिर्जाता ते तेन तत्रेच्छासाधनताया आगृहीतत्वेन तद्गोचर
क· स्मरणस्य तदनुमित्यनुभावस्य तदानीमभावेन तद्गोचरानुभवस्य चासम्भवेन तदनुमित्सासामग्र्या एव दुर्घटत्वात् च विषयानिष्ठ
प्रत्यासत्त्यै अनुमित्साया हेतुता वाच्या इत्यभिप्रायेणोक्तस्थले पक्षतोपपत्तिं दीधितिकृदाशङ्कते·। न चानुमित्सेति·। इच्छैव·। समाना
धिकरणव्यधिकरणसाधारणेच्छामात्रमेव। स्वानिष्ठैव· अनुमातृसमवेतैव·। तस्याः· ईश्वरेच्छायाः। पक्षताप्रसङ्गादिति· सर्वत्र च
सिद्ध्युत्तरमप्यनुमित्यापत्तिरित्यर्थः। तदानीं सिद्धिदशायां·। न तज्जनकत्वमिति· तथा चानुमितिजनकत्वविशिष्टेच्छात्वेनैव·
हेतुता· कारणतावच्छेदकं विशिष्टस्य प्राक्सत्त्वमेव फलोपधाने तन्त्रमिति नातिप्रसङ्ग इति भावः· जनकत्वेन जनकत्वे आत्माश्रयसत्त्वेऽपि
स्फुटत्वात्तमनपेक्ष्य दूषणान्तरमाह· तद्धीति·। योग्यता स्वरूपयोग्यता· अन्यथा यादिति· कारणतावच्छेदकधर्मस्वरूपयोग्यतायाः
सर्वदैव सत्त्वादित्यर्थः· तदुपधानं तद्वैशिष्ट्यं· तदभावात्· अनुमितिवैशिष्ट्याभावात्· तथा चानुमित्युत्पत्तिदशायामिच्छाया अनु
मितिविशिष्टेच्छायाः प्रागसत्त्वादनुमितेरेवानुपपत्तिः· इदमुपलक्षणम्· अनुमित्युत्तरमनुमित्यापत्तिरपि दूषणम्· नन्वनुमि
तिजनकतावच्छेदकतावच्छेदको धर्मः· प्रत्येकं तदवच्छिन्नकूटविशिष्टत्वरूपतः सामग्रीसमवधानमेव इच्छाविशेषणांशे भ्रमः· तच्च
कार्याव्यवहितप्राक्क्षण एवेति नातिप्रसङ्ग· इत्याशङ्कां परिहरति· न तत्सामग्रीति·। कारणमात्रस्येति·। तथा च परामर्शादिस
त्त्वदशायां तादृशपक्षताविरहादेवानुमित्यवारणसम्भवात्परामर्शादीनां हेतुताविलयप्रसङ्ग इति भावः· ननु सामग्रीसमवहि

५३

तेच्छात्वे तत्पक्षताया न हेतुत्वमुपेयते सामग्रीघटकहेतूनां विशेष्यविशेषणभावाविनिगमनाविरहात्तेषां स्वतन्त्रकारणत्वे
वात्तेप्रसङ्गस्य वारितत्वात्. किन्तु ईश्वरेच्छायां सिद्धिकाले पक्षताव्यवहारवारणाय पक्षपदप्रसक्तिनिमित्तमेव तद्दूषणेनोपेय
त इति असौ नायं दोष इति दूषणान्तरमाह. शेषेति । अनुमितित्वसामग्र्या एव पक्षतात्वसम्भवे इच्छारूपविशेष्यभागानिवेश
स्य निष्प्रयोजनकत्वादित्यर्थः. अपेक्षापक्षे दूषणान्तरमाह । तदानीमिति. तदानीं परामर्शादिसमवहितात्मनि सिद्धिदशायां
अन्वयव्यभिचारस्य सामग्रीविरह इत्यनेन. वक्तव्यत्वापातात्. सामग्रीमध्यनिवेशनफलात्. तथा च तादृशकारणांसि साधार्ये
साविरहविशिष्टसिद्ध्यभाव एव. एवञ्च तस्यैव पक्षतात्वसम्भवे अलंकारणान्तरस्य पक्षताकुक्षिनिवेशनेनेति सिद्धिकालत्वदशा
पर्यन्तमात्रमिति भावः. सिद्धान्तलक्षणे सिद्ध्यन्तरक्षणे स्वबाधाये साधीभानुयोगित्वे उपपादनाय सहकारितावविशेषणमुपात्तं
तच्च तदैवोपपद्यते यदि सिद्धिहेच्छाया वा परामर्शानां त्रयाणामनुमितेरव्यवहितपूर्वक्षणेऽवस्थितिः सम्भवति. न चैवं
मुपपद्यते आत्मयोग्यविशेषगुणानां द्विक्षणमात्रावस्थायितया त्रयाणां युगपदनवस्थानात्. न चापेक्षाबुद्ध्यात्मक
परामर्शस्य साध्यनिश्चयस्य वा प्रथममुत्पादस्तत्रैव तत्तृतीयक्षणे त्रयाणामवस्थानं सम्भवतीति वाच्यम्. अपेक्षा
बुद्धेः क्षणत्रयावस्थायित्वमङ्गीकुर्वतो[illegible] तदव्यवहितोत्तरक्षणे तदधिकरणे विशेषगुणोत्पादानभ्युपगमादन्यथा समा
नाधिकरणमानान्तरोत्पन्नविशेषगुणात्पदनाशकत्वभङ्गात् तस्यास्तृतीयक्षणे विनाशापत्तेरित्याशङ्क्य परित्रेहीयमासि
द्ध्यात्मकसमूहालम्बनात्मकपरामर्शस्थले तादृशविशेषणप्रयोजनं दर्शयति. यत्रेत्यादिना अनुमितेरव्यवहितोत्तरक्षणे
सिद्धिरूपप्रत्यक्षं न सम्भवति. इच्छोत्पत्तिकाले वा[illegible]नानुत्पन्नत्वविशेषणवत्त्वघटितसामग्रीविरहात् इच्छापूर्वक्षणे तादृश
सामग्रीसमवधाने इच्छासामग्र्यपेक्षया प्रत्यक्षसामग्र्या एवोत्पादसम्भव इत्यतो विशिष्टस्मरणानुधावनं न्यूनताभङ्गाय प. (दव.ल.)
रामर्शपूर्वोत्पन्नेच्छास्थले प्रयोजनमनुत्पादनान्तरोत्पन्नेच्छास्थले न स दर्शयति. अनुमितीति यत्रेत्यनुषज्यते इच्छासामग्रीस

सम्पन्नत्वे ॥ अनुमितौ इष्टसाधनताविषयकेति· तादृशस्मरणात्साध्यतद्व्याप्यविशिष्टपक्षस्मरणात्· पूर्वोक्तयुक्त्या चाक्षुषादिपरामर्शस्यानुमितौ विषयसा
धनतावगमात्हेत्वासम्भवात् यत्र परामर्शाव्यवहितपूर्वक्षणे इष्टसाधनताज्ञानं तत्र तत्पूर्वक्षणे एव फलेच्छासम्भवेन तस्याः परामर्शोत्पत्तिसमये नाशात्तदुत्त
रमनुमित्साया असम्भवेन इष्टसाधनताविषयकपरामर्शस्यावश्यकत्वात्तत्स्मरणानुधावनं न्यूनतापरिहाराय प्रत्यक्षात्मके परामर्शे क्षणोत्पत्तेजननमाह· अनु
मित्सापूर्वेति· अत्रापि यत्रेत्यनुषज्यते· प्रत्यक्षात्मकधूमत्वादिविशेषणज्ञानस्थले तज्जनकसन्निकर्षादेस्तदुत्तरक्षणे विशिष्टप्रत्यक्षमेव भाविष्यातेनाले
क्षा· विनश्यदवस्थसन्निकर्षादिविशेषणप्रत्यक्षानुधावनेन च प्रायशो गौरवमतो विशेषणस्मरणपर्यन्तानुधावनं· अनुमित्सापूर्वकाले परामर्शादिजनक
सन्निकर्षादिसत्वे तस्या एव उत्पत्त्यभावः· अत्तेनुमित्साकालोत्पन्नेन्द्रियसन्निकर्षसाहित्तादिति, सहकृतान्तं· सहकृतान्तभागोपक्ष्यापात्ते बाधते
बाविरहवैशिष्ट्यं तस्याभावविशेषणस्वातिशाधायिसादृशायां तदभावविशिष्टस्येच्छाभावस्यासम्भवात् सिद्धौ सत्यां पक्षत्या अनुमित्यनु
पपत्तेरत· साध्यकभानविशेषणामेति· सिषाधयिषाविरहपदस्य सिद्धीच्छासाधारणपरत्वे प्रत्यक्षादिप्रकारकेच्छादिकालादसत्यां प्रत्य
क्षादिसामग्र्यां सिद्धिदशायामनुमित्यापत्तेः अनुमितिमोरचरेच्छापरत्वे प्यथासिद्धेश्वोचरशाब्दं नायतामितीच्छाबलात्सिद्धिकालेनुमित्याप
त्तेः नचानुमित्युत्पत्त्यान्वितादृशेच्छाविषयसिद्धेस्तादृशानुमितिरिष्टैवेति वाच्यम्· प्रकृतानुमित्युत्पत्त्यैव तादृशेच्छाविषयासिद्धेस्तादृशेच्छासत्व
एव सिद्धिकालेनुमितेरननुभविकत्वात्· उक्तेच्छायाश्चासत्वः उपहितगोचरमानसज्ञानेनापि विषयत्वे [illegible]के अवस्करत्वादित्यतः सिषाधि
यिषापदार्थं व्याचष्टे· सिषाधयिषा चेति· घटादिविशिष्टपर्वतविषयको[illegible]जायतामित्येतादृशेच्छासत्वे सिद्धिसत्त्वे वह्न्यनुमित्युत्पादात्तत्साध्य
विशिष्टेति· तत्सम्बन्धेन तत्साध्यतावच्छेदकावच्छिन्नविशिष्टेत्यर्थः तेन कालिकसम्बन्धेन वह्निविशिष्टपर्वतविषयकानुमितिर्जायतां द्रव्यत्वा
वच्छिन्नविशिष्टपर्वतविषयकानुमितिर्जायतामित्येतादृशेच्छासत्वेन सिद्धिकाले संयोगादिना वह्नेस्साध्यवच्छिन्नस्यानुमितेः वह्निविशिष्ट
महानसविषयकानुमितिर्जायतां वह्निविशिष्टद्रव्यत्वावच्छिन्नविषयकानुमितिर्जायतामितीच्छाबलात्पर्वतो वह्निमानित्याद्यनुमित्यनु

[illegible] तादृशविषयताप्रकारक [illegible] वन्ह्यादि [illegible] अनुमिति

वान्

स्यादात्तत्पक्षकद्राते तत्पक्षतावच्छेदकावच्छिन्न इत्यर्थः नचयत्किंचिद्वेद्गोचरं ज्ञानं जायतामितीच्छावत्त्वादिवआलोकपर्वत इत्याद्यनुमिते
सामग्रीदशायां वन्हिमत्पर्वतत्वविषयकानुमितेर्जायतामितीच्छावत्त्वादप्यसिद्धिसत्वे वन्हिविषयकानुमितेर्जायते तत्काले नलक्षणप
सिद्ध्याप्तोऽनुमित्युत्पत्त्यैव तादृशेच्छाविषयत्वात् वन्हिमत्पर्वतविषयकानुमितेः सिद्धेरित्युक्तरूपेणापीच्छाया उत्तेजकत्वं न सम्भ
वतीति वाच्यं साध्यविशिष्टपक्षनिरूपितविलक्षणविषयताप्रकारकत्वेनैवेच्छाया उत्तेजकत्वोपगमात् आलोकवान् पर्वत इत्याद्यनुमि-
तेर्वन्हिविशिष्टनिरूपितत्वेलक्षणविषयताशून्यत्वेनानुत्पत्त्या तादृशविषयताप्रकारकेच्छाविषयत्वासम्भवात् साध्यविशिष्टपक्षनिरूपि
तत्सत्त्व साध्यवैशिष्ट्यपक्षनिष्ठनिरूपकताकत्वमतो न वन्हिमानित्यादौ साध्यविशिष्टपक्षतापत्तेः इच्छावत्त्वेन तादृशविषयताया तत्प्रका
रकानुमित्यसाध्यव्याप्तेर्सिद्धेः इदन्तादेनिष्ठतादृशभूमहानेविषयतानिरूपकत्वस्यापि इदंसप्रकारीभूतवन्ह्याद्यवच्छिन्नत्वात् वस्तुतस्तु
तत्साध्यविशिष्टतत्पक्षविषयकत्वेत्यनेन तत्साध्यतावच्छेदकावच्छिन्नतत्संसर्गावच्छिन्नविधेयतानिरूपिततत्पक्षतावच्छेदकावच्छिन्नो
द्देश्यताकत्वपर्यन्तं विवक्षितं अतो वन्हिमान् पर्वतो धूमवानित्याद्यनुमितेः सामग्रीदशायां पूर्वोक्तयुक्त्या वन्हिविशिष्टपर्वतविषयकेच्छा
वत्त्वात् पर्वतादिपक्षकवन्ह्यादिविधेयकानुमित्यनुत्पादेपि न क्षतिः तादृशोद्देश्यतात्वेन तादृशोद्देश्यताकत्वप्रकारकत्वं विवक्षणीयमत-
एव केवलपर्वतत्वावच्छिन्नोद्देश्यतात्वेन तादृशोद्देश्यताप्रकारकानुमितेः सामग्रीदशायां पर्वतो वन्ह्यनुमितेः सामग्रीसत्वेमतत्स[illegible]वन्ह्यनुमित्या
अनुत्पत्तेः साध्यविशिष्टपक्षविषयकत्वप्रकारकत्वनिवेशप्रयोजनं दर्शयति यत्किंचिदिति किंचिद्विषयकत्वप्रकारकत्वनिवेशेपि य
त्किंचिद्ज्ञानं जायतामितीच्छावारणं सम्भवतीति यत्किंचिद्गोचरत्वप्रकारकेच्छानुधावनं न चेच्छापूर्वं यत्किंचिद्गोचरज्ञानेच्छावश्यं प्रसिद्धत्वात्ता
दृशेच्छैव न सम्भवति ज्ञानगोचरेच्छादशायां स्वरूपसत्याः सा विषयतासिद्धेर्वाविलोपि तत्तद्रूपेण गृहीतज्ञाने ज्ञानेच्छाभवतीति वाच्यं तद्वत्स्वत्ती
यत्किंचिद्गोचरज्ञानं जायतामित्याकारेच्छाया एव विवक्षितत्वात् न त्वनुमितित्वप्रकारकत्वं निवेश्यैव तथा विधेच्छावारणसम्भवे किंगुरु

तत्साध्यविशिष्टपक्षविषयकत्वप्रकारकत्वानिवेशने नेत्यत आह· अनुमितित्वप्रकारिकायामपीति· प्रत्यक्षाद्यात्मकसिद्धिदशायां पर्वते
वह्निमान्‌जायतामित्याकारकेच्छासम्भवात्तद्विषयीभूतप्रत्यक्षादिरूपासिद्धेरेवाविरुद्धत्वात्· अतः प्रत्यक्षाद्यतिरिक्तत्वमिति· शाब्दादिरूपसिद्धौ
प्रत्यक्षाद्यतिरिक्तज्ञानंजायतामित्यादीच्छाया उत्पादासम्भवात्· प्रत्यक्षाद्यन्यत्वमिति· प्रत्यक्षादिरूपासिद्ध्यन्यत्वमित्यर्थः अनुमित्सुत्पादकेति
तथाचानुमितित्वप्रकारकत्वानिवेशात्वेनुमत्याकामेव साध्यतोच्छानामसङ्ग्रहप्रसङ्ग इति भावः इदमुपलक्षणम्· अनुमितित्वप्रकारक
त्वानिवेशेपि हठादनुमितिर्जायतामितीच्छाकाले सिद्ध्युत्तरानुमितिवारणाय प्रकृते साध्यादिविषयकत्वप्रकारकत्वानिवेशनमाव
श्यकं नच प्रकृतसाध्यादिविषयिणी याऽनुमितिस्तद्विषयकत्वानिवेशनेनापि दर्शितेच्छावारणसम्भव इति वाच्यम्· तादृशेच्छया अ
पि घटाद्यनुमितित्वेन वह्न्यादिगोचरसमूहालम्बनाविषयकत्वात्· नचानुमितित्वप्रकारकत्वानिवेशेऽनुमितिर्देवयत्र प्रत्यक्षत्वादि
नेच्छाविषयस्तत्रानुमित्यापत्तिरिष्टत्वात्· अनुमितौ प्रत्यक्षत्वभ्रमदशायामेव तादृशेच्छाया उत्पादात्तस्यानुमितित्वप्रकारकेच्छा
समधीनत्वात्· नचानुमितित्वप्रकारकत्वानिवेशे पर्वते वह्नेः प्रत्यक्षतः सिद्धौ शाब्दसामग्र्याश्च सत्त्वां प्रत्यक्षातिरिक्तज्ञानंजायता
मितीच्छासत्त्वेपि अनुमित्यापत्तिरिति वाच्यम्· तत्र पक्षतासत्त्वेप्यनुमितित्वप्रकारकेच्छाविरहविशिष्टसमानविषयकशाब्दसामग्र्याः प्र
तिबन्धकत्वादेवानुमितिवारणसम्भवात्· अथासिद्धिदशायां पर्वते वह्नेरन्यज्ज्ञानंजायतामितीच्छासत्त्वेऽनुमित्यापत्तिस्तस्या अप्यनुमिति
विषयत्वान्नचेष्टापत्तिः तदुत्तरं पर्वतो वह्निमानित्यादिमानसानुत्पादादिच्छाविषयासिद्धेः तादृशेच्छाया यत्किञ्चिद्गोचरं ज्ञानंजायतामि
त्येतादृशेच्छारूपत्वात्· नच प्रत्यक्षेच्छाविशिष्टप्रत्यक्षसामग्रीरूपप्रतिबन्धकसत्त्वान्नापत्तिरिति वाच्यम्· प्रत्यक्षत्वादिप्रकारकेच्छावि
शिष्टाया एव मानसादिसामग्र्या अनुमितिप्रतिबन्धकत्वात्· अन्यथासिद्धिरूपकालेपि तादृशेच्छासत्त्वेऽनुत्पादप्रसङ्गात्· नव्योक्तयुक्त्या

वन्हिविधेयकत्वावगाहित्वस्यानिवेशस्यावश्यकत्वात् वन्हिप्रकारकत्वावगाहिदर्शितेच्छावतान्यानुमितिप्रसङ्गः तद्विधेयकत्वावगा
हीच्छादशायाञ्जायमानानुमितौ विधेयतायाः प्रत्यक्षअप्रामाण्यकतया तत्प्रकारके[illegible]च्छा अनुमित्युत्पत्तौ विधेयासिद्धेरिति वा
च्यम् विधेयतायाः प्रत्यक्षादिव्यावृत्तत्वे तत्प्रकारिकाः प्रत्यक्षान्यत्वप्रकारिकाया अपीच्छायाः प्रत्यक्षसिद्धिकाले सत्त्वा वा प्रत्यक्षान्य
त्वप्रकारकेच्छापर्यन्तानुधावनस्यानैयर्जित्वात् न च विधेयताप्रत्यक्षत्वादृश्येव तदवगाहित्वसूचनार्थैवोपदर्शितेच्छाकारे प्रत्यक्षान्येति
ध्येयत्व इति वाच्यम् एवमपि वक्ष्यमाणस्य शाब्दसिद्धिकाले शाब्दज्ञानं जायतामितीच्छावतो नानुमितेर्जायते नतु प्रत्यक्षसामग्रीकाले इत्य
स्यासङ्गमायेनुमपकत्वात् तादृशेच्छायाः प्रत्यक्षविधेयताद्यवगाहित्वे प्रत्यक्षसामग्रीकालत्वे तद्भिन्नानुमितौ चेत्यादौ तदनवगाहित्वे
सिद्धावप्यनुत्तेजकत्वात् अतोच्यते अनुमितिप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छायामनुमितित्वविषयकेच्छात्वेनैवानुगमः पर्वते वन्हि
ज्ञानं जायतामित्याकारकेच्छाकाले सत्यां सिद्धौ तथाविधोपनीतभानसामग्र्याश्चानुमितेर्वारणाय तथाविधेच्छानां तत्तदाकारेणत्वेन प्रति
बन्धकताकल्पने इति न दोषः एवं तासां तत्तदाकारेण नानात्वप्रतिबन्धकताकल्पनामपेक्ष्यानुमितेः स्वादिप्रकारविशेषमनन्तर्भाव्य
वानुमित्सा नामुत्तेजकत्वमुचितमिति वाच्यम् तथा सति पर्वते वन्हि ज्ञानं जायतामितीच्छाकाले तथाविधोपनीतभानविरोधेच्छाद्यन
मितीच्छाविशिष्टसामग्रीसत्वे सिद्धौ सत्यां वन्ह्याद्यनुमित्यपेक्षायै तादृशेच्छाव्यक्तीनां तत्तदाकारेणेनासिद्धावुत्तेजकत्वापत्त्या तदभा
व सममग्रस्य मिथो विशेष्यविशेषणभावविनिगमनाविरहेण सिद्धिप्रतिबन्धकतानन्त्यप्रसङ्गात् ॥ ननु साध्याविधेयकत्वावच्छिन्नप
क्षोद्देश्यकत्वप्रकारकेच्छायाऽनुपादाने पक्षोद्देश्यकत्वावच्छिन्नसाध्याविधेयकसत्प्रकारकेच्छायामसङ्ग्रह एवं विधेयानुपरक्तानुमिति
विषयिण्या अनुमितिर्जायतामितीच्छाया अपि निरुक्तरूपेणासङ्ग्रहः न च स्यात् सङ्ग्रहे एवं असिद्धस्य चावान्तरानुमितिसामग्र्यामसत्यां व
ह्न्यादावसिद्धस्य पक्षत्वसाध्यस्यानुमितेः सन्देहेच्छाविषयसिद्ध्यनुरोधेनावश्यकत्वात् इत्यत आह यादृशयादृशीति । सिद्धौ सत्यामिति ।

[illegible]

तत्तदिच्छाभावसमुदायस्येति· साध्यविशेषावच्छिन्नपक्षविशेष्याद्यवगाहित्वप्रकारकेच्छानां तत्तदवगाहित्वप्रकारकानुमितिगोचरेच्छा
त्वेनाननुगमस्य एकैकाभावानिवेशयन्ते· अतश्चाविशेषानां अनुमितिर्जायतां प्रत्यक्षं मा जायतामित्याकारकेच्छानामनुपघात्ते
त्वावच्छिन्नप्रतियोगिताकभेदत्वावच्छिन्नत्वेन उपस्थितिः पुरोवर्तिनि प्रमाणाभावात् कथं विशेषणतानिरूपितत्वं तत्तादात्म्यं पक्षधर्मावच्छि
न्नवाचकपदेन नञा तत्र साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकभेदबोधकत्वमिति चेन्न तादात्म्यसंबन्धेन प्रतिपादकत्वात् । ननु अस्तु साध्यतावच्छेदकावच्छिन्नबोधकता
हेतुवाक्यात् प्रमेयवान्वाच्यत्वादित्यादौ व्याप्तिः किन्तु साध्यतावच्छेदकसमानाधिकरणाभावप्रतियोगितावच्छेदकतावच्छेदकताकप्रतियोगिताकभेदवत्यपि विद्यमानत्वात् पक्ष
क्षो प्रतियोगितावच्छेदकव्यापकत्वविवक्षयैव वाच्यतायाः किञ्चिन्निवेशनं धूमवान्वह्नेरित्यादौ यत्तत्त्वायेन तत्तद्व्यक्तिभेदसत्वेन धूमत्वव्यापकत्वविपक्षेति
व्याप्तिः वह्निमान्धूमादित्यादावव्याप्तिस्तु समानाधिकरणाभावप्रतियोगितावच्छेदकभेदविवक्षया हि साध्यतावच्छेदकभेदविवक्षायां दोषोऽतिप्रसङ्ग इति न दोषः । नापि
साध्यतावच्छेदकस्य भवति तद्धर्मनिष्ठनिरवच्छिन्नावच्छेदकताकप्रतियोगिताकभेदे नाऽतः प्रतियोगितावच्छेदकव्यापकत्वं निवेशनीयं तेन न प्रमेयवानाकाश
त्वादित्यादावव्याप्तिः । नवा धूमवान्वह्नेरित्यादौ व्यापकत्वनिवेशनादतिव्याप्तिरिति । तथापि गोत्वमादाय पर्याप्तत्वविवक्षया हि तदा प्रतियोगितानवच्छेदकोऽयो
धर्म इति । नन्वेवमपि प्रतियोगितावच्छेदकत्वावच्छिन्नत्वावच्छिन्नप्रतियोगिताकभेदत्वावच्छिन्नानुयोगिताकपर्याप्तिकत्वविशिष्टसमानाधिसाध्यता
वच्छेदकमित्येवास्तां अन्यथा वह्निमान्धूमादित्यादौ तत्र व्याप्तिभेदः परस्परं भिन्नत्वेनेति चेन्न समवायेन प्रमेयवान्वाच्यत्वादित्यादौ प्रतियोगितावच्छेदकप्रमे
यत्वावच्छिन्नप्रतियोगिताकभेदस्तु न प्रसिद्धः प्रसिद्धस्तद्भिन्नभेदकूटसमानाधिकरणस्य साध्यतावच्छेदकसत्वात् अतिव्याप्तेरिति । नन्वेतादृशप्रतियोगिता
नितावच्छेदकतावच्छिन्नत्वावच्छिन्नानुयोगिताकपर्याप्तिकत्वं साध्यतावच्छेदके विवक्षणीयं तत्र तादृशधर्मनिरूपितप्रतियोगिताकपर्याप्ति
ताहृशपर्याप्तिनिरूपितानुयोगितात्वावच्छिन्नयोगितानिरूपितावच्छिन्नत्वसंबन्धावच्छिन्नावच्छेदकतावच्छिन्नधर्मनिष्ठनिरवच्छिन्नावच्छेदकताकप्रति
योगिताकभेदवत्त्वमिति संबन्धेन निवेशनीयमिति चेन्न वह्निमान्धूमादित्यादौ विषयितया तादृशाभावस्यापि लक्षणघटकत्वेन ऽयन्तावच्छिन्नभेदस्या
सत्वेनाव्याप्तापत्तेरिति ननु तथापि अवच्छेदकत्वानुसरणे वर्णितादृशप्रसंबन्धावच्छिन्नावच्छेदकताकप्रतियोगितावच्छेदकभेद एव प्रतियोगितावच्छेदकावच्छिन्न
भेदस्तेनैव तादृशाः धूमवान्वह्नेरित्यादावतिव्याप्तिस्तु प्रतियोगितावच्छेदकधूमत्वावच्छिन्नत्वे धूमत्वभेदसत्वे विधमवन्नालोत्पभावमादाय भेदवत्तान्तरवृ
त्तिन धूमत्वमानास्ति इत्यभावमादाय वह्निमान्धूमादित्यादावव्याप्तिरित्यत्र तत्तद्धर्मेण साध्यतावच्छेदकावच्छिन्ने एवं तादृशभेदेऽपि विद्यमानत्वमिति
वत्तत्र प्रसिद्धं तत्तत्सत्वाविवक्षास्वरूपमोरवदेपलेशांशकाकलनात् इति साध्यतावच्छेदकतान्यान वह्निमत्त्वसाध्यकधूमहेतुकस्थले वह्निमान्धूमा वर
कालिदि तेनैव उभय

रि जन्यमातात्वघटे न वह्नित्वमेव साध्यतावच्छेदकम् ॥१३॥ रूपा प्रतियोगित्वमविरुद्धनिरूपितानुयोगितानिरूपितप्रतियोगितावच्छेदकतात्वानवच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगिताव
च्छेदकान्यसंबंधेन १२॥

वत्त्वस्य प्रतियोगितावच्छेदकतानिवेशेनानवच्छेदकत्वानुसरणं न वाच्यमनातोवच्छेदकतादिना दोषनुपालवच्छिन्नेति साध्यतावच्छेदकत्वं वह्निरेतदुभयाभावमादाय व्याप्तिवारणाय सा
ध्यतावच्छेदकतातिरिक्तवृत्तित्वमेव निवेश्यं न च धर्मत्वमधिकरणत्वेनेत्याप्तिवति व्याप्तिरनोनिरवच्छिन्नस्वरूपसंबंधेन साध्यवत्त्वं निवेश्यं तथा च घटत्वाभावघटत्वाभाव
त्वनिरवानुमतादिसाध्ये घटत्वाभावाभावादिकमादाय व्याप्तिरिति न दुरस्तं साध्यानवच्छेदकत्वानुसरणमिति वाच्यं स्वप्रतियोगितावच्छेदकविरोधिताघटकसंबंधेन साध्य
वत्त्वनिवेशेनैव दोषवारणात् प्रमेयघटवान् वाच्यत्वादित्यादौ तु तत्संयोगाभावमादाय पर्याप्तिरिति निरवच्छिन्नसाध्यतावच्छेदकताभावात् पक्षिवा
चाप्यवृत्तित्वं ज्ञानत्वेन जन्यत्वानुरोधात् गुरुसमवायस्यापि न यथात्वमिति मन्यते तदा व्याप्यवृत्तिता नियामकावच्छेदकत्वाभिरूपद्रव्यत्वं वृत्तितायामेव
निवेश्यं मतस्य च संयोगिसत्त्वादित्यादावतिव्याप्तिरिति नव्यकालिकसंबंधावच्छिन्नप्रतियोगिताकमहाकालस्यापि वृत्त्यभावमादाय व्याप्तिवारणाय
प्रतियोगितायां साध्यवत्त्वनिरूपितावच्छेदकतानुयोगितानिरूपितत्वाभावान्न दुरस्त्वान्नय साध्यतावच्छेदकसंबंधावच्छिन्नत्वं स्वप्रतियोगितायां निवे
श्यं अप्रसिद्धिरव्याप्तिर्धूमवत्संयोगिसत्त्वादित्यादौ तु न साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितानवच्छेदकरूपवृत्तित्वघटितप्रतियो
गिताकोभयाभावनिवेशात् वृत्तितावच्छेदकतानादिसंबंधेन नवत्वाविशिष्टमेयवह्न्यान्यत्वादित्यादौ साध्यतावच्छेदकतायाः साध्यतावच्छेदकस्व
रूपत्वे प्रसिद्धिरिति वाच्यं साध्यतावच्छेदकताप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकरूपतावच्छेदकवृत्तित्वोभयाभावनिवेशात् वृत्तितावत्स्वरूपसंबंधेन
न च वह्नित्वगतैकत्वविशिष्टवह्नित्वे तदुभयाभावीयप्रतियोगितायाः प्रतियोगिस्वरूपत्वे एकत्वविशिष्टप्रतियोगिमान्नेतादृश्यव्याप्तिरिति वाच्यं स्वनिरूपितानु
योगितानिरूपितप्रतियोगितावत्त्वसंबंधेन वृत्तित्वं निवेश्यं तत्रापि स्वनिरूपितानुयोगिताविशिष्टप्रतियोगितावत्त्वसंबंधेन सत्त्वात् नाप्रसिद्धिरिति न सत्
पर्याप्तिसंबंधावच्छिन्नाधेयत्वसंबंधेन वह्नित्वविशिष्टस्यैकत्वस्य तादात्म्येन साध्यतायां ज्ञातत्वादित्यत्राव्याप्तिः एकत्वाभावस्य प्रतियोगिव्यधिक
रणत्वाभावात् यद्यपि तादृशसंबंधेन तादृशाभावमादाय व्याप्तिर्यथोक्तदानेनैव रत्नभिज्ञावेत पर्याप्तिसंबंधावच्छिन्नाधेयतासंबंधेन वह्नित्वविशिष्टस्य पर्याप्तिसंब
धेन सत्त्वाद्वह्नित्वाद्यहेतावव्याप्तिः तस्याप्यभावघटकप्रतियोगिव्यधिकरणत्वाभावात् ननु स्वाश्रयप्रतियोगिकत्वस्वाश्रयसामानाधिकरण्योभयसंबंधेन सा
ध्यतावच्छेदकविशिष्टान्यत्वस्याभावे निवेशान्नानवच्छेदकत्वानुसरणं न तादृशोभयानवच्छिन्ने निवेश्य साध्यवृत्तितानिरवच्छिन्ना अभावे वृत्तित्वस्य
प्रतियोगितापि नाग्रह विरोधितावच्छेदकसंबंधेन तत्रापि गगनाभावमित्यपभावत्वादित्यादावप्रसिद्धिवारणाय स्वाश्रयाधिकरणनिरूपितवृत्तितावच्छेद
साध्याभावानुयोगितामात्रेनाप्रतिष्ठं च स्वनिरूपितनवसाधिष्ठानुयोगित्वानिरूपितत्वोभयसंबंधेन तेनाप्येकसा
भावत्वरूपानुयोगितासामान्यपिरूपत्वाभाववत्ताभावे प्रतियोगितावत्ता ६

त्वानुसरणेच तद्रूपावच्छिन्नावच्छेदकता निरूपित प्रकारतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगिता
वच्छेदकरूपशालित्वं साध्य १६॥

१०= साध्यवन्निरूपितनिरवच्छिन्नसंसर्गतावच्छिन्नधर्मितावच्छेदकताकत्वानुयोगि
तानिरूपितप्रतियोगिता साध्यतावच्छेदकताविशिष्टावच्छेदकतानिरूपित
प्रतियोगिताकाभावानिवेशः इति तु सद्गदितार्थः॥१०=

कानुयोगितानिरूपितत्वस्वाश्रयानिष्ठत्वोभयाभावनिवेशः न चापि कालिकेन महानसीयवह्निमति विभागीयप्रतियोगिताया उभयाभावत्वेनाक्षेपे साध्वस्थापि
तितद्वारणाय साध्यतावच्छेदकसंबन्धावच्छिन्नत्वस्य प्रतियोगितायां निवेशे तु प्रमेयत्वावच्छिन्नप्रतियोगिक तादात्म्येन प्रमेयस्य साध्यतायामप्रसिद्धिरिति
तद्वारणार्थं यदि व्यापकतासंबन्धेन साध्यतावच्छेदकताविशिष्टावच्छेदकतात्वनिवेशात्तदा न तु प्रसक्तिर्नासीत्यस्या वारणमिति अत एव स्वाश्र
यसामानाधिकरण्यनिवेशः इति भिन्नत्व स्वानुभयाभावविवक्षेन तावच्छेदक [illegible] जितावधिरवच्छिन्नस्वरूपसंबन्धेन तेन संयो
गेन तु व्यापकत्वाप्राप्तिरिति चेन्मतेन द्वैधतादवस्थ्यापत्तिः तेन प्रमेयमिति निःस्वरूपेण न तु प्रसक्तिर्नासीत्यभावमादाय दोषस्य तादवस्थ्यात् साध्यतावच्छेदकसंबन्धाव
च्छिन्नत्वस्य प्रतियोगितायां निवेशेऽपि न नैवाव्याप्तिरिति साध्य ८ स्वाभावीयप्रतियोगितानिरूपितसाध्यतावच्छेदकनिष्ठावच्छेदकनिष्ठावच्छे
दकत्वानिरूपक प्रतियोगिताकाभावनिवेशात् तदनिरूपितानवच्छिन्नत्वं चिरवच्छिन्नस्वरूपावच्छिन्नधर्मितावच्छेदकानुयोगितानिरूपितन
प्रतियोगितानिरूपितसाध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपकत्वादि विवक्षणान्नगगनाभावभिन्नसमभावत्वादित्यादौ संयोगिसत्त्वादित्यादा
वतिव्याप्तिः कालिकेन महानसीयवह्निर्नासीत्यभावमादाया व्याप्तिवारणाय साध्यतावच्छेदकतापर्यवसानावच्छिन्नत्वनिवेशेतु प्रमेयत्वावच्छिन्नप्रति
योगिकतादात्म्येन प्रमेयस्य साध्यतायामप्रसिद्धिरिति तद्वारणार्थं साध्यतावच्छेदकताविशिष्टायाऽवच्छेदकताया तादृशप्रतियोगितानिरूपितत्वं निवे
रूपतादृशावच्छेदकत्वानिरूपकत्वं निवेश्यते व्यापकतासंबन्धेन तथापि साध्यान्यधर्मावच्छिन्नाधिकरणत्वानङ्गीकारे तदुपपत्तिप्रयासेन गौरवमिति
नेशं भावनरतीति साध्यतावच्छेदकतादिनिरोभ्यानवच्छिन्नेति स्वानवच्छिन्नप्रकारतावच्छेदकतानचयेन रूपेण साध्यतावच्छेदकत्वं
रूपानवच्छिन्नप्रकारताश्रयत्वमात्रविवक्षणेनैव प्रसिद्धिसंभवे प्रकारावच्छेदकतानां भावनं विफलमिति वाच्यं महानसीयवह्निमान् धूमादित्यादौ ये
न रूपेण साध्यतावच्छेदकत्वं तद्रूपानवच्छिन्नप्रकारताश्रयविह्नितानिष्ठावच्छेदकतानिरूपकत्वघटितोभयस्य सत्त्वेन लक्षणघटकत्वानुपपत्तेः सा
ध्याभावस्य वह्न्यादिवत्तत्र महानसीयाभावमादायैवातिव्याप्तिवारणं क्रियते तत्र महानसीयवह्निमान् धूमादित्यत्राव्याप्तिः प्रत्येकाभावस्तु न प्रतियो
गिव्यधिकरणः इति प्रकारतावच्छेदकतावच्छेदकनिष्ठान्योन्याभावविवक्षणान्न दोषः कीदृशं तु साध्यतावच्छेदकनिष्ठस्थाने व्यापकतासंबन्धेन साध्यता

एवं च स्वरूपतो न तत्प्रसक्तिर्नासीत्यभावमादाय प्रमेयमन्वात्वमादित्यादावतिदोषः १=

वच्छेदकताविशिष्टावच्छेदकताकत्वमेव निवेश्यते तस्मात्तु साध्यतावच्छेदकताप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकरूपद्वित्वं स्वनिरूपितावच्छेदकताप्रति
योगिकपर्याप्त्यनुयोगितावच्छेदकत्वसंबंधेन निवेशान्तु प्रमेयाभाववान्धूमादिमात्त्व प्रसिद्धिरित्यादौ न च वह्नित्वव्यापकतज्ज्ञानत्वादित्यादौ महानसीयवह्नि
त्वनाशसीत्वभावमादाय व्याप्तिः येन रूपेण साध्यतावच्छेदकत्वं तद्रूपावच्छिन्नावच्छेदकतानिरूपकत्वस्य महानसीयवह्नित्ववत्त्वं हि ज्ञानीयप्रकारताया
असत्त्वात् इति वाच्यं तदितरत्वस्य प्रसिद्धिमात्रेणान्यथासिद्धेरतोऽनु साध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपितत्वसाध्यतावच्छेदकताविशिष्टान्यावच्छेदकतानिरूपित
त्वोभयाभाववत्त्वं तदर्थः वैशिष्ट्यं च स्वतादात्म्यस्वसामानाधिकरण्योभयसंबंधेन न चैवं रीत्या साध्यतावच्छेदकतादितरोभयानवच्छिन्नत्वपरिष्कारेऽग्रे वह्निमान्
मादित्यादौ समवायेन वह्निर्नास्तीत्यभावमादाय व्याप्ति वारणाय साध्यतावच्छेदकसंबंधावच्छिन्नत्वं निवेशितं तन्न हि रूपवत्तापत्तिवारणं यथाश्रुते तु वह्निमान्धूमादि
त्यादौ संयोगेन घटाभाववानलक्षणघटकः साध्यतावच्छेदकसंयोगनिष्ठावच्छेदकतानिरूपितत्वसाध्यतावच्छेदकताविशिष्टान्यघटत्वनिष्ठावच्छेदकतानिरूपि
तत्वोभयस्यासत्त्वात् यदि च समवायेन घटाभावमादाय व्याप्तिवारणं क्रियते तदा संयोगसमवायकालिकस्वरूपान्यतमसंबंधेन वह्नेः साध्यतायामभावाप्रसिद्धिरिति
न तदर्थं किंचित्संबंधावच्छिन्नसाध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपितत्वप्रतियोगिकोभयाभावनिवेश एव तन्निवेशेपि कालिकेन संयोगेन साध्यताया
स्पन्दत्वादिहेतौ संयोगेन संयोगीनास्तीत्यभावमादाय व्याप्तिः तादृशाभावीयप्रतियोगितायां तादृशोभयाभावसत्त्वात् अतः किंचित्संबंधावच्छिन्नावच्छेदकतावि
शिष्टान्यत्वप्रतियोगिकोभयाभावनिवेशः निवेशे च धूमवान्वह्नेरित्यादावतिव्याप्तिः संयोगेन धूमाभावीयप्रतियोगितायां साध्यतावच्छेदकनिष्ठकिंचि
त्संबंधावच्छिन्नावच्छेदकतानिरूपितत्वकिंचित्संबंधावच्छिन्नावच्छेदकताविशिष्टान्यावच्छेदकतानिरूपितत्वोभयस्य सत्त्वात् इति तद्वारणाय यत्किंचित्संबं
धावच्छिन्नावच्छेदकताविशिष्टान्यकिंचित्संबंधावच्छिन्नावच्छेदकतानिरूपितत्वप्रतियोगिकोभयाभावो निवेशनीयः निवेशे च समवायेन वह्निर्नास्तीत्यभावो
लक्षणघटक इति तद्वारणाय साध्यतावच्छेदकसंबंधावच्छिन्नत्वं निवेशितं ग्रन्थसंगतिरिति नन्वप्रमेयवह्नित्वज्ञानत्वादित्यादौ निरुक्तज्ञानान्यत्वविशिष्टघटाभा
वो न लक्षणघटकः साध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपितत्वतादृशोभयसंबंधेन साध्यतावच्छेदकताविशिष्टान्यावच्छेदकतानिरूपितसत्त्वादिति चेन्न
तादृशोभयसंबंधेन साध्यतावच्छेदकताविशिष्टावच्छेदकताकत्वसाध्यतावच्छेदकताविशिष्टान्यावच्छेदकताकत्वोभयाभावनिवेशः तथा च तद्वारणं
आगामिनि तिङ्कृत्यन्यस्थामः नन्वग्रे साध्यतावच्छेदकतातिरिक्तसाध्यधर्मानवच्छिन्नेति कल्प्ये प्रमेयवान्धूमवत्त्वादित्यादावप्रसिद्धिरित्युक्तं तन्न संगच्छते साध्यता

कतातिरिक्तानवच्छिन्नत्वाभिरिक धर्मानवच्छिन्नत्वनिवेशो

२= सावच्छेदकताप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकत्वसंबंधेन साध्यतावच्छेदकताविशिष्टावच्छेदकताप्रतियोगिकपर्याप्त्यनुयोगिताव २
२= च्छेदकरूपद्वित्वमेव साध्यता [illegible] वच्छेदकताविशिष्टावच्छेदकताकत्वपदेनाभिप्रायात् २=

महाकालगतैकत्वादिकमपि तत्र निवेशनीयादोषात् न च महाकालगगनान्यतरस्य तादात्म्येन साध्यतायां गगनमहाकालान्यतरत्वादिहेतौ प्रत्येकाभावसाध्याया अव्याप्तिरिति वाच्यम्

[redacted]

गगनाभावमादाय प्रत्येकलक्षणे संगतिसत्वात् प्रमेयमपवाच्यत्वादित्यादावप्रसिद्धिवारणाय धर्मसाध्यतावच्छेदकतानात्वावच्छिन्नप्रतियोगितापर्याप्त्यनुयोगितानवच्छेदकगगन
नगतैकत्वातिरिक्तधर्मावृत्तिप्रतियोगिताकाभावस्यैव निवेशः न च तादात्म्येन प्रमेयस्य नागनत्वादित्यादावप्रसिद्धिरिति वाच्यं गगनगतैकत्वातिरिक्तसाध्यतावच्छेदकतात्वा
वच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितानवच्छेदकयत्किंचिद्धेत्वधिकरणवृत्तितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपावृत्तित्वस्य
प्रतियोगितायां निवेशात् प्रकृते च न महाकालभेदमादाय दोषः तादृशाभावस्य तादृशरूपावृत्तिप्रतियोगिताकत्वाभावात् गगनभेदस्य लक्षणघटकत्वेपि तद्भिन्नस्य
महाकाले सत्वात् अतो लक्षणसमन्वयः यदि च तत्र प्रमेयत्वेन गगनस्य विषयतासंबन्धेन साध्यत्वे तत्र ज्ञानत्वादित्यादौ गगनाभावमादायाव्याप्तिरिति अनवच्छेदकत्वानुसर
णाभावरूपं तथापि निरवच्छिन्नसाध्यतावच्छेदकतादितरोभयानवच्छिन्नत्वविशिष्टप्रकृतत्वा एवं न संयोगेन गोलकीयवह्निर्नीलत्वादित्यभावमादायाव्याप्तिस्तादृशाभावीयप्रतियोगि
तायास्तादृशरूपावृत्तित्वादिति वाच्यं यत्किंचिद्धेत्वधिकरणवृत्तित्वविशिष्टगगनत्व[redacted]गतैकत्वातिरिक्ततादृशरूपावृत्तिप्रतियोगिताकाभावनिवेशात् भवति चायो
गोलकीयवह्निगतद्वित्वे हेत्वधिकरणवृत्तित्वनिरूपितवृत्तिता च साध्यतावच्छेदकसंबन्धावच्छिन्ना द्वितीयवृत्तिता च साध्यतावच्छेदकतापर्याप्तसंबन्धावच्छिन्ना तृ
तीयवृत्तिता च स्वरूपसंबन्धावच्छिन्ना इति केचित्तन्न घटोऽनित्यज्ञानत्वादित्यादौ नित्यज्ञानान्यत्वविशिष्टघटाभावादीनां लक्षणघटकत्वानुपपत्त्याऽव्याप्त्यापत्ते
रिति ध्येयं ननु हेतुसमानाधिकरणाभावभिन्नाभावप्रतियोगि[redacted]साध्यसामानाधिकरण्यमित्यनेनैव निर्वाहे किं तादृशगुरुतरलक्षणेनेति चेन्न धू
मवान्वह्नेरित्यादौ हेतुसमानाधिकरणाभावभिन्नाभावप्रमेयाभावप्रतियोगिधूमसामानाधिकरण्यमिति व्याप्तिवारणाय तादृशप्रतियोगितावच्छेदकसाध्यतावच्छेदकावच्छिन्नसा
मानाधिकरण्यमिति वक्तव्यं गगनाभावभिन्नं घटत्वादित्यादौ गगनाभावभेदाभावस्य गगनाभावस्वरूपत्वात्तत्प्रतियोगिव्यधिकरणहेतुसमानाधिकरणत्वेन तद्भिन्नत्वाभावाद
व्याप्तिरतो यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणं हेत्वधिकरणं तादृशप्रतियोगिताभिन्नप्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके वक्तव्यं कालिक
संबन्धावच्छिन्नप्रतियोगिताकवह्न्यभावस्तु न प्रतियोगिव्यधिकरण इति तद्भिन्नत्वान्न दोषः तादात्म्येन प्रमेयस्य साध्यतायां वाच्यत्वादिहेतौ समवायेन प्रमेयाभावस्य प्रतियो
गिव्यधिकरणहेतुसमानाधिकरणाभावभिन्नत्वान्न लक्षणसमन्वयस्तथापि गुरुधर्मस्य प्रतियोगितावच्छेदकत्वानङ्गीकारे कंबुग्रीवादिमच्छून्यकपालत्वादित्यादौ प्रतियोगिव्य
धिकरणहेतुसमानाधिकरणाभावभिन्नाभावप्रतियोगितावच्छेदकत्वस्य कंबुग्रीवादावप्रसिद्ध्याऽव्याप्तिः न च पारिभाषिकानुसरणे न दोष इति वाच्यं प्रतियोगिव्यधिकरण
हेतुसमानाधिकरणाभावभिन्नाभावद्रव्याभावप्रतियोगितावच्छेदकद्रव्यत्वाभाववद्वृत्तित्वस्य धूमत्वादौ सत्त्वात् लक्षणगमनेऽतिव्याप्तिप्रसंगात् किंच
व्यभिचारज्ञानप्रतिबन्धकत्वानुपपत्त्या व्याप्तिनये न स्यात् महानसीयवह्निवृत्तित्वविशिष्टजातिमान्नालीति कथमभावीयप्रतियोगिव्यधिकरणतेति प्रतियोगितावच्छेदकता

१५ अवच्छेदकतानुयोगिकपर्याप्तिसंबंधेन द्वितीयावच्छेदकतायाः घटितत्वं च स्वनिरूपितप्रतियोगितानिरूपितावच्छेदकतासंबन्धेन अवच्छेदकतावत्तात्वस्वनवच्छेदकत्वान
वच्छिन्नत्वसामानाधिकरण्योभयसंबंधेन १५

ऽग्रे

त्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपघटितनिरूपकताकाधिकरणत्वाभावनिवेशे तु हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वस्याभावः साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वावच्छिन्नानुयोगिताकपर्याप्तिसंबन्धेनैव विवेचनीयं एतन्मते साध्यतावच्छेदकतादिनिवेशे प्रयोजनविरह इति नन्विति परिष्कृतमिति चेन्न एवं तत्पर्याप्त्यनङ्गीकारे ऽप्रसिद्ध्यापत्तिः स्थलविशेषे हेतुनिष्ठाप्रतियोगिताविशिष्टनिरूपकताकाधिकरणताभाववत्त्वं हेत्वधिकरणे विवक्षितं प्रतियोगिताविशिष्टं च स्वसामानाधिकरण्यस्वावच्छेदकसंबन्धावच्छिन्नत्वस्वनिरूपितावच्छेदकतात्वस्वघटितत्वएतच्चतुष्टयसंबन्धेन व्यापकता च स्वनिरूपितावच्छेदकतावत्तासंबंधेन अवच्छेदकतावत्ता च चतुष्टयसंबंधेन स्वघटितत्वं च स्वनिरूपितावच्छेदकतात्वव्यापकत्वव्यापकत्वसंबन्धेन व्यापकता च स्वनिरूपितावच्छेदकतावत्तासंबंधेन अवच्छेदकतावत्ता च चतुष्टयसंबन्धेन तादृशावच्छेदकतात्वव्यापकत्वं तु नानावह्निविषयकज्ञानवह्निविषयकज्ञानान्यतरत्वहेतुकस्थले नानावह्निविषयितायाः साध्यतापां तन्नानावह्न्यभावो न प्रतियोगिव्यधिकरणः प्रत्येकवह्नित्वावच्छिन्ननिरूपकतायास्तन्नानावह्न्यभावीयप्रतियोगितावच्छिन्नत्वात् स्वघटितत्वसंबंधेन नानावह्न्यभावो लक्षणघटक इति तदर्थे तन्नानात्वहेतुकवह्निसाध्यकस्थले कपालभावस्य लक्षणघटकत्वानुपपत्तिः अतो स्वघटितत्वमिति तथा च महानसीयवह्नित्वविशिष्टजातिमान्नानात्वीयाभावस्य लक्षणघटकत्वेनाप्रसंगात् इति केचित्तन्मन्दं नानावह्निविषयतासंबंधेन यत्र साध्यते नानावह्निविषयकवह्नित्वावच्छिन्नविषयकज्ञानान्यतरत्वादिहेतुकस्थले साध्याभावस्य लक्षणघटकत्वानुपपत्त्या अतिव्याप्त्यापत्तेः अतो रूपपर्यन्तनिवेशनमावश्यकं तथा चाग्रे एव द्विविधविनिवेशितमिति पूर्वपक्षो दुरुद्धर इति चेदत्रोच्यते धेयं यत्र साध्यतावच्छेदकतापन्नातिरिक्तवृत्तित्वं तादृशस्थलीयलक्षणे रूपपर्यन्तनिवेशः प्रतियोगिव्यधिकरणघटिते यत्र कालसंबन्धवृत्तित्वं नास्ति साध्यतावच्छेदकतायास्तादृशस्थलीयलक्षणे प्रतियोगिताविशिष्टनिरूपकाधिकरणत्वेनापरित्याज्यो वेशः तथा च रूपत्वस्य पर्याप्त्यनङ्गीकारेऽपि न क्षतिः न च वह्नित्वत्वेन वह्नित्वविशिष्ट महानसीयत्वत्वेन महानसीयत्वविशिष्टस्य साध्यत्वे तज्ज्ञानत्वादिहेतुकस्थले प्रत्येकाभावमादाय व्याप्तिः कालसंबन्धस्य वच्छेदकतास्थलीयलक्षणस्येति वाच्यं यत्किंचित्साध्यतावच्छेदकत्वावृत्तित्वे सति यत्किंचित्साध्यतावच्छेदकताघटितत्वं यत्किंचित्स्वत्वाधिकरणघटितावच्छेदकताविशिष्टावच्छेदकतानिरूपकप्रतियोगिताकाभावनिवेशेन दोषवारणात् यत्किंचित्साध्यतावच्छेदकताघटितत्वं च स्वनिरूपितावच्छेदकतानिरूपितावच्छेदकतावत्त्वसंबन्धेन यत्किंचित्तन्निवेशेन तद्व्यक्त्यभावनिवारणं तादृशावच्छेदकतायाः साध्यतावच्छेदकताघटितत्वात् एतेन वह्नित्वत्वेन वह्नित्वविशिष्टस्य साध्यत्वे तज्ज्ञानत्वादिहेतुकस्थले स्वरूपतो वह्नित्वनीलत्वभावमादाय व्याप्तिरिति परास्तं न च तादृशे वह्निविषयताया साध्यस्थलेन ज्ञानत्वादिहेतौ वह्नितानीलाभावमादाय व्याप्तिस्तथापि दुर्वारैव नितरां अन्तरङ्गतो ज्ञानावच्छिन्नाधिकरणसाध्यतावच्छेदकताविशिष्टत्वसंबन्धावच्छिन्नविषयतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपघटितत्वस्यावच्छेदकसंबन्धावच्छिन्नत्वोभयसंबन्धेन अवच्छेदकतावैशिष्ट्यं तथा च विपरीताभावीय

नेयमिति किंचित्साध्यता
वच्छेदकतावच्छिन्नं

नरनुगमस्तु स्वनिरूपितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितानवच्छेदकत्वादिविशिष्टयत्किंचित्त्वाधिकरण
वृत्तिताविशिष्टरूपप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वसंबंधेन साध्यत्वाभाववत्त्वं प्रतियोगितावच्छि

प्रतियोगितावच्छेदकताविशिष्टान्योन्यादृग्विशिष्टस्य तत्पर्याप्तेरुभयसत्त्वेनाव्याप्तिरिति न चैतन्मते नीलपीतघटस्य धूमवान्वह्नेरित्यादावतिव्याप्तिः धूमाभावस्य प्रतियोगि
धिकरणत्वाभावात् वृत्तित्वं साध्यतायाः व्यासज्यवृत्तिधर्मावच्छिन्नत्वानिरूपकत्वविशेषणात् न चास्य व्यासज्यवृत्तिधर्मावच्छेदकता तत्र नीलपीतघटस्य नालोके वह्निमान्ज्ञानत्वादित्याद
वतिव्याप्तिरिति वाच्यं अव्यासज्यवृत्तिधर्मानवच्छेदकताकत्वस्य विधेयतानिवेशनादिति सूचितं वस्तुतस्तु सर्वत्र रूपपर्यन्तमनुसृत्यैव प्रतियोगित्वे व्यधिकरणसंबंधविवक्षि
तं तदितरोभयानवच्छिन्नत्वपर्यन्तं साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगिताकपर्याप्तिसंबंधेन तादृशप्रतियोगि
तावच्छेदकत्वाभाववन्निवेशयितं गतिलघिमेति तु न सम्यक् पर्याप्तेः स्वरूपत्वे एतादृशनिवेशस्य कुत्राप्यनागतत्वात् एतेन एकत्वपर्याप्तौ मनोऽपि प्रायेण गतः अनिवेशितमि
तिपर्याप्तिप्रत्येकाभावादितिवारणेनु साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगितादपर्याप्त्यनुयोगितावच्छेदकयत्पर्याप्तिकिंचिद्धिकरणवृत्तिताविशिष्टरूपप्रतियो
गिदपर्याप्त्यनुयोगितावच्छेदकं तद्धर्मित्वाभाववत्त्वस्य प्रतियोगितायां विवक्षणे नापि तादृशवृत्तितावैशिष्ट्यं च स्वनिरूपितावच्छेदकताविशिष्टप्रतियोगिताक
पर्याप्त्यनुयोगितावच्छेदकत्वसंबंधेन अवच्छेदकतावैशिष्ट्यं च स्वतादात्म्यस्वनिरूपितत्वान्यतरसंबंधावच्छिन्नस्वनिष्ठावच्छेदकतानिरूपितत्वविशिष्टावच्छेदकतात्वाव
च्छिन्नत्वस्वनिरूपितावच्छेदकताकत्वसंबंधावच्छिन्नस्वनिष्ठावच्छेदकतानिरूपितत्वविशिष्टावच्छेदकतात्वावच्छिन्नतान्यतरसंबंधेन तेन प्रमेयवह्न्यादिप्र
तादित्यादौ तादृशानवच्छेदकपर्याप्तिविशिष्टत्वधिकरणवृत्तितानिरूपिततायाः प्रमेयत्वावच्छिन्नावच्छेदकतात्वावच्छेदकताप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकरूपप्र
तित्वस्य सत्त्वेऽपि पुनर्नोप्रसिद्धिरिति· स्वनिरूपितावच्छेदकतानिरूपकत्वसंबंधेत्यादिनिवेशात् वह्नित्वत्वेन वह्नित्वविशिष्टस्य साध्यत्वे तत्र ज्ञानत्वादित्यादित्यादौ
स्वरूपतो वह्निनालोकाभावमादाय नाव्याप्तिरिति रूपप्रतियोगिकपर्याप्त्यनुयोगितेत्यादिनिवेशात् नालोके वह्निमान्ज्ञानत्वादित्यादौ वह्न्यनालोकाभावमादायाव्याप्ति
रितिपादः साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितानवच्छेदकरूपवृत्तित्वसाध्यतावच्छेदकताविशिष्टावच्छेदकतात्वस्य एतदुभयाभाववत्त्वमेवेति
तदोभयानवच्छिन्नत्वमिति वैशिष्ट्यं च चतुष्टयसंबंधेन स्वरूपविषयताघटितसामानाधिकरण्यसंबंधेन भेदत्वावच्छेदेन भेदत्वविशिष्टस्य विषयतया साध्यत्वे नित्यज्ञाने
त्वादित्यादौ स्वरूपतो नित्यज्ञानान्यतरत्वा·नालीत्यस्य लक्षणघटकत्वार्थं स्वसामानाधिकरण्यनिवेशस्य साधननिवेशे च प्रमेयवह्न्यावाच्यत्वादित्यादावप्रसिद्धिरतः स्वा
नवच्छेदकसंबंधावच्छिन्नेति न च तादृशसामानाधिकरण्यसंबंधेन प्रमेयविशिष्टस्य विषयतया साध्यत्वे नित्यज्ञानत्वादिहेतुकस्थले स्वरूपतो नित्यज्ञानान्यत्ववान्ना
लीत्यस्य घटकत्वार्थं स्वरूपनिवेशस्यावश्यकत्वेन स्वावच्छेदकसंबंधनिवेशनमफलमिति वाच्यं इष्टापत्तेः एवं च नीलो नास्ति पीतो नास्तीत्यादिप्रतीतिसिद्ध
योगितांगघटितस्यानवच्छेदकानवच्छिन्नेत्यस्य निवेशनं तु अखंडाभावघटकतया लाघवार्थं व्यधिकरणसंबंधावच्छिन्नविशिष्टाभावनास्तीत्यादि अग्रिम

एवं साध्यतावच्छेदकताविशिष्टावच्छेदकतानिरूपितावच्छेदकतायाः साक्षान्निरूपितत्वं निवेशनीयम् यथा स्वविशिष्टकालवृत्तित्वविशिष्टगोत्वं नास्तीत्यादौ स्वाभावीनलक्षणगतधर्मः तादृशगोत्वनिष्ठप्रतियोगिताया
उभयसत्त्वात् गोत्वत्वगवत्वेतरसमवेतत्वे सति निखिलगोसमवेतत्वं गोत्वावच्छिन्नप्रतियोगिताकभेदवत्प्रतियोगितावच्छेदकतासमवेतत्वं तथा च गोत्वत्वकुक्षौ गोत्वं भासते अतः साध्यतावच्छेदकताविशिष्टावच्छेद
तागोत्वविशिष्टावच्छेदकतानिरूपितत्वस्य सत्त्वात् अतः साध्यतावच्छेदकताविशिष्टावच्छेदकतायाः साक्षान्निरूपितत्वं निवेशनीयं साक्षात्त्वं च अवच्छेदकतानिरूपितत्वाभावेन भवति ७==

गुरुत्वासमानाधिकरणेति निरवच्छिन्नेति । द्विविधधर्मो न वह्नित्वावच्छेदकतानिरूपकप्रतियोगितायाः स्वार्थः न च स्व कालवृत्तित्वविशिष्टगोत्वं नास्तीत्यभावमादाय प्रतियोग्यव्याप्ति
परकालेगोमानगोत्वादित्यादौ तादृशगुरुत्वविशिष्टप्रतियोगितानवच्छेदकधर्मानवच्छिन्नावच्छेदकतावत्त्वाभावात् इति भावः सत्तावान्गोत्वादित्यादिस्थले तु स्वप्रकृतगुरुत्वाभाव
प्रसिद्ध्याऽव्याप्तिवारणाय साध्यतावच्छेदकनिष्ठत्वमपि किंचिद्धर्मावच्छिन्नत्वाभावस्यावच्छेदकताया अभावस्य निरूपकप्रतियोगिकत्वमनोनिवेशनीयम्
पि किंचिद्धर्मनिष्ठसाक्षादवच्छेदकतानिरूपकत्वाभाववत्त्वस्यावच्छेदकतायां निवेशनीयमेवं तद्धर्मे भयान वह्नित्वघटितसाक्षान्निरूपितत्वं निवेश
नीयं अन्यथा महानसीयत्वकालीनवह्निमान् धूमादित्यादौ महानसीयवह्न्यभावमादाय व्याप्तिलाभात् भावीयप्रतियोगितायाः साध्यतावच्छेदकताविशिष्टाव
त्वाभावात् अतः साध्यतानिरूपितसाक्षादवच्छेदकताविशिष्टान्यत्वमेवात्र निवेशनीयं तन्निवेशे च महानसीयवह्न्यभावमादाय तत्साक्षात्साध्यतावच्छेदकताविशि
ष्टान्यथा महानसीयत्वत्वनिष्ठावच्छेदकतानिरूपकत्वघटितोभयत्वस्य सत्त्वेन न साध्याभावीयलक्षणघटकत्वमिति तादृशावच्छेदकतासाक्षान्निरूपितत्वं निवेश्यम् ॥
नीयमिति साध्यतावच्छेदकतावच्छेदकतादितरोभयानवच्छिन्नेति । साध्यतावच्छेदकतावच्छेदकतावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितानवच्छेदकरूप
निवाभाववत्त्वस्य प्रतियोगितायां निवेशनादित्यर्थः रूपद्वितयवत्त्वनिरूपितावच्छेदकतानातावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वस
वंधेन दण्डिमान् दण्डिसंयोगादित्यादौ स्वरूपतः प्रकृते धर्मानंतर्भावेन व्यधिकरणावच्छिन्नाभावमादाय लक्षणसमन्वयः एवं च स्वरूपतोऽभावीयगोत्वादेनवेव व्याप्तिः
तदेवाह प्रमेयवत्त्वघटाभावीयादिना वस्तुतस्तु वह्नित्वप्रतियोगिकसमवायेन वह्नित्वविशिष्टसाध्यता स्थले व्याप्तिवारणाय साध्यतावच्छेदकतावच्छेदकसंबन्धा
नि किंचित्संबंधावच्छिन्नत्व साध्यतावच्छेदकनिष्ठत्वोभयाभावो निवेशनीयः तथा च घटत्वाभाववान्पटत्वादित्यादौ निखिलप्रमेयत्वावच्छिन्नप्रतियोगिकसंयोगेन प्रमेय
विशिष्टस्य तादात्म्येन सोऽयमित्यादिना प्रसिद्धिवारणाय साध्यतावच्छेदकव्यापकनिष्ठत्वसाध्यतावच्छेदकताघटसंबंधानतिरिक्तसंबंधावच्छिन्नत्वोभयाभाव
एव वक्तव्यः तत्र प्रमेयत्वेन साध्यत्वे संयोगेन घटाभावप्रसिद्धावपि प्रमेयत्वावच्छिन्नप्रतियोगिताकत्वेन प्रमेयविशिष्टस्य साध्यतायामप्रसिद्धिः पुनः घटे
नसंबंधाव्यापकत्वात् तद्धटितेनव्यापकतायामप्रसिद्धेः न च साध्यनिरूपिताव्च्छेदकतावच्छिन्नसमवायापि स्वरूपसंबंधप्रतियोगितानवच्छेदकधर्मनिष्ठत्वसा
ध्यतावच्छेदकताघटकसंबंधातिरिक्तसंबंधावच्छिन्नत्वोभयाभावसंबंधेन अधिकरणेन साध्यत्वाभावकल्पने वाच्छेदकतायां निवेशनात् प्रागभावस्य प्रति
ष्ठितत्वान्तर्गतेव विषयतया प्रमेयत्वात् नास्ती स्वभावमादाय व्याप्तिप्रसङ्गात् इति साध्यतावच्छेदकधर्मावच्छिन्नवत्त्वावच्छेदकसंबन्धावच्छिन्नत्वोभयसंबंधेन साध्यतादि

[illegible]

४

साध्यतावच्छेदकताविशिष्टावच्छेदकतानिरूपितत्वविशिष्टतादृशान्वितयसंबंधेन साध्यतावच्छेदकताविशिष्टान्यावच्छेदकतानिरूपितत्वं न स्वसमर्थत्रिसत्त्वेनाव्याप्तेरिति भावः ८ =

शिष्टनिरूपकतासमानाधिकरणनिरूपकतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वरूपनिष्ठत्वसाध्यतावच्छेदकताघटकसंबन्धातिरिक्तसंबन्धावच्छिन्नत्वोभयाभावप्रवेशात् जातिमत्तद्घटत्वादित्यादौ विवक्षितया सत्तावान् जातेरित्यस्यापि लक्षणघटकत्वं स्यात् साध्यताविशिष्टनिरूपकतावच्छेदकत्वोभयादिकं विनापि निरूपकतासमानाधिकरणरूपकतेत्युक्तं अथ कालिकेन महानसीयत्वविशिष्टस्य समवायेन वह्नित्वविशिष्टस्य संयोगेन साध्यतायां धूमादिहेतौ समवायेन महानसीयत्वविशिष्टस्य कालिकेन वह्नित्वविशिष्टाभावमादायाव्याप्तिरिति प्रतियोगिव्यधिकरणत्वेन भवतीति शंक्यं तत एव समवायेन महानसीयत्वविशिष्टस्य साध्यतायां धूमादिहेतुकस्थले साध्याभावस्य लक्षणघटकत्वानुपपत्त्या प्रतियोगिताव्याप्यनिरूपकताकाधिकरणत्वं वाच्यं तथा चाव्याप्तिरिति दोषात् यद्यपि स्वावच्छेदकसंबन्धावच्छिन्नत्वसंबंधेन साध्यतावच्छेदकताविशिष्टान्यत्वसाध्यतावच्छेदकनिष्ठत्वोभयाभयाभावनिवेशात् नदितरोभयानवच्छिन्नत्वेनैव नार्थतेन तथापि साध्यतावच्छेदकताघटकसंबंधावच्छिन्नत्वेनैव वारणमुचितमिति चेन्न स्वसामानाधिकरण्यस्वसाजात्योभयसंबंधेन साध्यतावच्छेदकताविशिष्टावच्छेदकतानिरूपितत्वविशिष्टं यत् स्वसामानाधिकरण्यस्वसाजात्यस्वावच्छेदकसंबंधावच्छिन्नत्वएतत्रितयसंबंधेन साध्यतावच्छेदकताविशिष्टान्यावच्छेदकतानिरूपितत्वतदभाववत्त्वसप्रतियोगितायां निवेशात् पूर्वं न सामानाधिकरण्यमात्रनिवेशः प्रमेयसाध्यतावच्छेदकस्थलेऽप्रसिद्धेरतः स्वसाजात्येति तन्मात्रनिवेशे वह्निमान् धूमादित्यादौ घटाभावादिकमपि न लक्षणघटकं स्यात् अतस्तन्निवेशः अग्रिमविशेषणस्वावच्छेदकसंबंधावच्छिन्नत्वानिवेशे समवायेन महानसीयत्वविशिष्टस्यादिकं स्यापूर्वोक्तस्थले दोषः स्यादतस्तत् स्वसामानाधिकरण्यानिवेशे कालिकेन वह्नित्वविशिष्टस्य समवायेन द्रव्यत्वविशिष्टस्य संयोगेन साध्यत्वे न द्रव्यत्वादित्यादौ समवायेन वह्नित्वविशिष्टस्य कालिकेन द्रव्यत्वविशिष्टस्याभावमादाय व्याप्तिरतस्तत् स्वरूपतः समवायेन धूमत्वविशिष्टस्य कालिकेन धूमत्वेन धूमत्वविशिष्टस्य विवक्षितया साध्यत्वे तज्ज्ञानत्वादिहेतौ विपरीताभावमादायाव्याप्तिवारणाय स्वसाजात्यनिवेश इति न च तथापि नीलान्यघटपीतान्यघटोभयसाध्यतायां पीतघटनीलघटोभयस्य हेतुतायां पीतान्यघनीलान्यघटोभयाभावमादायाव्याप्तिः न च साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वसाध्यतावच्छेदकताविशिष्टावच्छेदकतात्वोभयाभावरूपस्य साध्यतावच्छेदकतादिनिरोभयानवच्छिन्नत्वेनैव वारणमिति वाच्यं रूपवैलक्षण्ये मानाभावात् इति वाच्यं साध्यवृत्तिसाध्यतावच्छेदकनिष्ठावच्छेदकताविशिष्टान्यास्वप्रतियोगिवृत्तिवृत्त्यवच्छेदकतानतिरिक्तरूपकत्वसाध्यतावच्छेदकनिष्ठत्वोभयाभावविवक्षणेन दोषाभावात् निरुक्तसाध्यवृत्तिमचारितिसाध्याभावस्य लक्षणघटकत्वार्थं स्वप्रतियोगिवृत्तिवृत्तीत्यादिनिवेशात् अन्यथा प्रतियोगितावच्छेदकतायाऽउभयत्वेन सकलोभयसिन्नत्वेन साध्यवृत्तिसाध्यतावच्छेदकनिष्ठावच्छेदकताविशिष्टान्यघटितोभयस्य सत्त्वे नातिव्याप्त्यापत्तेरिति अथ स्वनिरूपितावच्छेदकतानिरूपितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वसंबंधेन साध्यताभाववद्वृत्तित्वाभाववत्त्वं प्रतियोगितायां निवेश्य एकमेव लक्षणमस्तु एतन्नियामकसंबंधस्यैतन्नियामकसंबंधस्य प्रतियोगितानवच्छेदकत्वे तु प्रमेयविशेष्यताप्रतियोगिकस्वरूपेण स्वनिष्ठविषयतानिरूपितावच्छेदकत्वविषयतानिरूपिताप्रकारतावच्छेदकत्वप्रकारतानिरूपितविशेष्यत्वाभाववद्वृत्तित्वाभाववत्त्वमेव निवेशनीयं अथवा साध्यतावच्छेदकतावृत्तिरूपवृत्तित्वाभाववत्त्वमेव तत्र निवेशनीयं तत्र च निवेशे च स्वावच्छिन्नत्वसंबन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसंबंधेन यदि तु वह्नित्वेनैव वह्नित्वविशिष्टस्य महानसीयत्वेन महानसीयत्वविशिष्टस्य विवक्षितया साध्यत्वे शानत्वादिहेतौ साध्याभावेन लक्षणघटकः साध्यतावच्छेदकतावृत्तिय महानसीयत्वत्वादिकं तद्रूपावच्छि

रूपवृत्तित्वं च स्वनिरूपितावच्छेदकतानिरूपितावच्छेदकत्वसंबंधेन
बोध्यं रूपवत्तादत्वादिकमादाय नाव्याप्तिः २ =

अवच्छेदकतानिरूपितत्वाभावात् इत्यस्य चानेन तादात्म्यावच्छिन्नावच्छेदकताकत्वसंबंधावच्छिन्नत्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदस्वत्वसंबंधेन साध्यताघटितत्वं बोध्यम् तथापि यत्र
प्रमेयस्यैव साध्यतावच्छेदकतावच्छेदकत्वं तत्राप्रसिद्धिरिति चेदत्र केचित् यत्किंचित्संबंधावच्छिन्ननिरवच्छिन्नावच्छेदकतानिरूपितावच्छेदकतानिरूपितत्ववान् अनुमाकारकसाध्य
ताश्रयभेदप्रतियोगितानिरूपितपरंपरं यावच्छेदकतानिरूपितधर्मनिष्ठावच्छेदकताविशिष्टावच्छेदकतानिरूपितावच्छेदकताभाववत्त्वप्रतियोगितायां निवेश्य न दोषः धर्मनि
ष्ठावच्छेदकतावैशिष्ट्यं च स्वावच्छेदकसंबंधावच्छिन्नत्वसमानाधिकरण्योभयसंबंधेन यत्र संयोगसमवायादिसकलान्यतमसंबंधेन प्रमेयस्य साध्यतावच्छेदकतावच्छेदकत्वं तत्राद
शाभेदाप्रसिद्धावव्याप्तिवारणाय निरवच्छिन्नेत्युक्तं अथवा साध्यतावच्छेदकत्वाभाववती यावच्छेदकतानिरूपितसाध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपकप्रतियोगिताकाभावस्य वि
वक्षणाद्देयोभयत्र गतिः वृत्त्युभयसंबंधेन स्वनिरूपितावच्छेदकताविशिष्टावच्छेदकतात्यवत्त्वसंबंधावच्छिन्नप्रतियोगिताकसाध्यतावच्छेदकत्वाभावो ग्राह्य इति न संभ्यक् इति वेन्नव्यक्तिमा
न्वहि नवत्वाविच्छिन्नप्रतियोगितानिरूपितावच्छेदकत्वमेव लक्षणघटकदण्डत्वे यथावयवसंबंधक्रमाभिप्रायेण अभावानाभावादिनिःशेषपदे प्रतियोगिकरणतावच्छेदकतायां प्रतियोगिकस्वरूपसंबंधेनयुक्तत्व
दनिरूपकताकाधिकरणताविषयकमिति करणताभावात् इत्यर्थः एतेन धूमत्वावच्छिन्नाधिकरणतासामान्यविषयकप्रतीतेर प्रसिद्धत्वेन तज्जनककरणत्वस्य सुतरामप्रसिद्धत्वेन
तदभावप्रतिपादनमयुक्तं तत्सत्त्वेपि तदभावप्रतिपादनमयुक्तं प्रसक्तस्यैव निषेधासंभवात् इति परास्तं प्रमाप्रमात्मकताहृशप्रतीतिजनकताहृशकरणत्वस्यामत्वात् अथवाधिकरणतावि
षयतानिरूपितनिरूपकत्वविषयतानिरूपितत्वनिरूपितविषयतानिरूपितत्वविषयतासाप्रमितिजनककरणत्वाभावस्यापि केचित् न च पर्वतीयधूमत्वावच्छिन्नप्रतियोगिता
पर्वतीयेति धूमत्वोभयधर्मावच्छिन्नाधिकरणतैव विषयोस्तु उभयधर्मावच्छिन्नाधिकरणत्वेमानाभाव इति वाच्यम् एकधर्मावच्छिन्नाधिकरणतायाः केवलपर्वतीयधूमवत्त्वसाधि
त्वस्यापि प्रमात्वापत्तेः अत एव धूमत्वे पर्वतीयत्वावच्छिन्नाधिकरणतैवावगाह्यतां सैव कपिन सत्त्व धूमे अन्येपि पर्वतीय धूमवानिति प्रतीत्यापत्तेः वस्तुतस्तु तत्प्रकारक
त्वविशिष्टत्वपर्वतीयधूमवानिति प्रतीतौ तत्प्रकारकत्वविशिष्टत्वपर्वतीयत्वधूमत्वोभयधर्मावच्छिन्नाधिकरणतायाविषयत्वमात्रं पर्वतीयधूमवानिति प्र
तीत्यापि सैवावगाह्यते नातिरिक्तापर्वतीयत्वधूमत्वोभयधर्मावच्छिन्नाधिकरणताविषयकग्रंथस्याप्रतिगैव तात्पर्यं न च धूमत्वनिष्ठप्रकारताविशिष्टत्वपर्वतीयत्वावच्छिन्ना
धिकरणतैव सा उपपद्यते कृतं ताहृशाधिकरणतयेति वाच्यं पर्वतो धूमवानित्यादिनाशाब्दत्वानुरोधेनैव तत्कल्पनात् । हेतुतावच्छेदकेति स्वावच्छिन्नानुयोगिताकपर्याप्तिकाव
च्छेदकताकनिरूपकताकाधिकरणतानवच्छिन्नाधिकरणतानिरूपितनिरूपकतावच्छेदकतानावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितानवच्छेदकत्व अधिकरणतानिरू
पितनिरूपकतावच्छेदकतावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकताभावाभावो हेतुतावच्छेदकतावच्छेदकतावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगि
तावच्छेदकरूपेताहृशाधिकरणमित्यर्थः तत्स्वावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकहेतुतावच्छेदकताघटकसंबंधावच्छिन्नत्वनिवेशेपि तेन कपिसंयोगेन धूम

त्वविशिष्टस्याधिकरणवृत्तिमात्रपदेनाव्याप्तिः इतरवारकमपि देयं अन्यथासमवायकालिकान्यतरसंबंधेन तद्विशिष्टाधिकरणमात्रतया व्याप्तिः स्यान्न च हेतुतावच्छेदकतावच्छेदकताघटकसंसर्गतावच्छेदकनिष्ठावच्छेदकताकसंसर्गतेत्यादिरीत्या निवेशान्न तादृशान्यतरसंबंधमात्रतया व्याप्तिः स्यादिति वाच्यं कालिकसमवायत्वान्यतरत्वसंबंधेन तद्विशिष्टाधिकरणमात्रतया व्याप्तेरसत्त्वस्यापत्तेः एतद्वारकमपि अन्यथा कालिकसमवायोभयत्वसंबंधेन धूमविशिष्टस्य हेतुतास्थले अप्रसिद्धकालिकेन धूमत्वविशिष्टाधिकरणमात्रपतगेवाव्याप्यापत्तेरिति एवं निरूपकतायां हेतुतावच्छेदकसंबंधावच्छिन्नत्वं निवेशनीयं ज्ञानाधिकरणतानवच्छिन्नाधिकरणतानिरूपकतायामपि हेतुतावच्छेदकसंबंधावच्छिन्नत्वं देयं अन्यथा ज्ञानाभावविषयकज्ञानत्वस्य साध्यत्वे विषयितया ज्ञानाभावस्य हेतुतायां ज्ञानाभावाधिकरणे ज्ञानाभाववद्घटविषयकज्ञाने प्रतियोगितासंबंधावच्छिन्नज्ञानाभाववृत्तिनिरूपकतामात्रयाव्याप्त्यापत्तेः प्रतियोगितासंबंधेन ज्ञानाभावस्य ज्ञानमात्रे सत्त्वात् न च एतद्वारकेतरवारकपर्याप्तिद्वये अग्रेऽधिकरणतानिरूपितनिरूपकतापि हेतुतावच्छेदकसंबंधावच्छिन्नेति अन्यथा विषयतासंबंधावच्छिन्नाधिकरणतानिरूपितनिरूपकतावच्छेदकतात्वावच्छिन्नप्रतियोगितावत्पर्याप्त्यनुयोगितावच्छेदकत्वघटितोभयत्वस्य सत्त्वेनाव्याप्त्यापत्तेः वह्निमान्धूमादित्यादौ इतरवारकपर्याप्तिनिवेशे विषयितासंयोगान्यतरसंबंधावच्छिन्ननिरूपकतावच्छेदकतात्वावच्छिन्नप्रतियोगितावत्पर्याप्त्यनुयोगितावच्छेदकत्वघटितोभयस्य सत्त्वेनाव्याप्तेलाघवस्थ्यं एतद्वारकपर्याप्तिनिवेशे तु विषयितात्वसंयोगत्वान्यतरत्वसंयोगसंबंधेन धूमस्य हेतुतायामव्याप्तिः हेतुतावच्छेदकसंसर्गनिष्ठसंसर्गतानिरूपकनिरूपकताकत्वनिवेशे विविषयताया विषयस्वरूपत्वेन न निवेशोपि न तु एतद्वारणमिति ध्येयं अत एव दण्डत्वघटत्वपटत्वोभयस्मादित्यादौ नातिव्याप्तिः यथाश्रुते स्वाश्रयाश्रयाधिकरणे घटादिमात्रतयातिव्याप्त्यापत्तिः स्यादेवं न च तन्निवेशेपि वाच्यत्वस्य साध्यत्वे महानसीयवह्नित्वावच्छिन्नप्रकारितासंबंधेन वह्नेर्हेतुतायां विरहेतिव्याप्तिरस्त्वेव स्वावच्छिन्नानुयोगितावत्पर्याप्तिकावच्छेदकतानिरूपकताधिकरणतायां महानसीयवह्निविषयकज्ञाने सत्त्वात् इति तद्वारणाय हेतुतावच्छेदकगतैकधर्मीयविशिष्टव्यतानिरूपितताप्रकारताहेतुतावच्छेदकसंबंधावच्छेदकतात्वावच्छिन्नप्रतियोगितावत्पर्याप्त्यनुयोगितावच्छेदकत्वं वाच्यं तेनैव दण्डत्वघटत्वपटत्वोभयस्मादित्यादौ नातिव्याप्तिवारणसंभवे स्वावच्छिन्नानुयोगितावत्पर्याप्तिकावच्छेदकतानिरूपकताकाधिकरणत्वपर्यन्तं निवेशनं विफलमिति वाच्यं यदि विशिष्टसत्तावान्घट इत्यादिप्रतीतीनां घटनिष्ठविशिष्टविशिष्टसत्तावगाहित्वावच्छिन्ननिरूपकताधिकरणतावगाहित्वेनैवोपपत्तौ प्रकृतविशिष्टसत्तात्वावच्छिन्ननिरूपकताकाधिकरणत्वावगाहित्वे मानाभावेन द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ स्वाश्रयाश्रयाधिकरणमात्रनिवेशे गुणमात्रतयाव्याप्त्यापत्तेः अधिनावच्छेदकत्वाभावप्रयुक्तोभयाभावसत्त्वात् न च ग्रन्थस्य तात्पर्यमेवमपि तु न रामते गुणं गृहीत्वाऽभवत्त्वप्रतिपादनात् भवद्रीत्यानुस्वाधिकरणगुणमेव न भवतीति वाच्यं यतः द्वयनिष्ठाधिकरणतानिरूपितनिरूपकतावच्छेदकताप्रतियोगितावत्पर्याप्त्यनुयोगितानवच्छेदकं विशिष्टसत्त्वानेकत्वं स्वावच्छिन्नानुयोगितावत्पर्याप्तिकावच्छेदकताकनिरूपकताकाधिकरणं द्रव्यमेवेति यतो गुणनिष्ठाधिकरणतानिरूपितनिरूपकतावच्छेदकताप्रतियोगितावत्पर्याप्त्यनुयोगितानवच्छेदकं अतः तत्त्वं स्वावच्छिन्नानुयोगितावत्पर्याप्तिकावच्छेदकतानिरूपकताकाधिकरणं न गुणादीति हेतुमत्त्वेन तादृशगुणत्वादिपौनरुक्त्यं न तु प्रमेयत्वनिवेशे दोषो हेतुतावच्छेदकगतरूपनिष्ठप्रमेयविशेष्यतानिरूपितप्रकारतावच्छेदकतात्वावच्छिन्नप्रतियोगितावत्पर्याप्त्यनुयोगितावच्छेदकत्वं तादृशाधिकरणमेव हेत्वधिकरणपदेन वाच्यमिति गुरुतरनिवेशे प्रमाणाभाव इति नव्यविशिष्टसत्तावान्गुणे इति निर्वलितावगाहिप्रतीतेः प्रमात्वेन तादृशप्रकारतावच्छेदकस्य हेतुतावच्छेदकत्वं गुणमाद

सि२।९२

यैव मतीति द्रव्यं विशिष्टसत्त्वस्यास्यापत्त्यव्याप्तिरिति वाच्यं सत्तावच्छिन्नानुयोगिताकपर्याप्त्यवच्छेदकतावच्छेदकविरूपकताकप्रतियोगितावच्छिन्नस्य प्रतीयविशेषणतासंनिवेशादिति चेन्न अभाववद्वृत्तिविषयकज्ञानस्य साध्यतेवि
षयितया अभाववद्वृत्तित्वस्य हेतुतास्थले अव्याप्तेः वह्न्यभाववद्वृत्तिविषयकज्ञानत्वमिति कृत्वा विशिष्टवैशिष्ट्यावगाहित्वेन अभावे पलक्षितेन अभाववद्वृत्तिज्ञानत्वस्याविद्यमानत्वेन तादृशप्रतियोगित्वप्रकारतावच्छेदकत्वस्य हेतुता
वच्छेदकत्वसत्त्वेन नवह्न्यभाववद्वृत्तिविषयकज्ञानस्य साध्यतापत्तेः तादृशज्ञाने हृदत्वनिष्ठप्रकारतानिरूपितानिरवच्छिन्नविशेष्यतानिरूपितविशेष्यतासंबंधेन हृदस्य सत्त्वात् तादृशसंबंधस्यैवाभाववद्वृत्ति
ज्ञाननिष्ठाद्वितीयप्रकारतावच्छेदकत्वेन तदवच्छिन्नविशेष्यतानिरूपितविशिष्टवैशिष्ट्यावगाहिद्वितीयप्रकारतावच्छेदकत्वं हेतुतावच्छेदके निवेश्य न चारणायते तथापि नसाध्यसाध्यतत्सन्निवेशस्य वा
व्यतिरेकस्यैव वह्न्यभाववद्वृत्तिज्ञानत्वाभाववद्वृत्तित्वस्यादिज्ञानमादाय दोषस्यैतादवस्थ्यापत्तेस्तादृशरूपवत्त्वविकरणतावगाहिद्वितीयप्रकारतावच्छेदकत्वं तत्र निवेश्यैव तदर्थं तथा च वह्न्यभाव
विशिष्टज्ञानस्य हृदत्वसमधिकरणत्वप्रसिद्ध्या व्याप्तेः स्वरूपाणां व्यक्तिभेदेन च स्वाभाववृत्तियोगितानवच्छेदकत्वेन हेतुतावच्छेदकं नदेव हेत्वधिकरणान्यत्वेन वाच्यं न तदच्छेदकत्वमभावो हेतुतावच्छेदकसंबंधाव
च्छिन्नप्रतियोगिताकस्वग्राह्यसंबंधसमवायावच्छिन्नप्रतियोगिताकहेत्वभाववत्त्वात्तेनास्यापत्तेः ननु च्छिन्नावच्छेदकानुयोगितानिरूपितत्वमपि प्रतियोगितायोगितायां वा समवायसंबंधेन
वह्निविशिष्टसत्ताभावादित्यादौ हेत्वधिकरणवृत्त्यभावप्रतियोगितावच्छेदकत्वस्यैव सत्त्वेनातिव्याप्त्यापत्तेरिति तत्र प्रतियोगितावच्छेदकसंबंधावच्छिन्नाघटभिन्नघटाभावादिन्यायदोषाभावादतिव्याप्तिरवधि
करणत्वस्य घटे पृष्ठस्य तेन व्याप्त्यापत्तेरतः स्वप्रतियोगिमन्नागृहविशेषितावच्छेदकसंबंधेन वैशिष्ट्यनिवेशसमसंबंधस्वप्रतियोगितानवच्छेदकत्वे न सत्त्वादिसंबंधनादिहेतुवृत्तित्वप्रसिद्धि
रितिनछारणार्थं घटत्वप्रतियोगितावच्छेदकतावच्छेदकताभावो हेतुतावच्छेदके नतथाविधहेत्वधिकरणमेवेति वाच्यं नथाचसमवायेनानुयोगिककालिकसंबंधेन घटस्य हेतुत्वे सत
कालत्वस्य व्याप्त्येन हेतुतावच्छेदकतावच्छेदकसंबंधावच्छिन्नावच्छेदकमेदस्याप्रसिद्धिरिति महाकालान्यत्वविशिष्टघटस्य सात्संबंधेन व्याप्तेरहेतुघटत्वमेदस्याप्रसिद्धेः अन्योन्याभावे तु अधिक
रणमेवाभाववत्त्वथाविधहेत्वधिकरणमेवनदिति वक्तव्यं तथावन्नाप्रसिद्धत्वापेक्षया लाघवमिति तात्पर्यकपिसंयोगी वृक्षत्वादित्यादौ यद्यपि तादृशानवच्छेदकत्वविशिष्टतादृशावच्छेदकत्वाभाव
एव निवेशयितुमुचिताभावनिवेशे गौरवात्तादृशानवच्छेदकत्वविशिष्टावच्छेदकत्वस्याप्रसिद्ध्या मतान्तरसिद्धत्वप्रसक्त्या तावेवोक्तिरित्युक्तं तस्य प्रतियोगिकसंयोगसंबंधेन धूमस्य हेतुत्वे वह्नेः
साध्यतास्थले प्रसिद्धापत्तेः अथ स्वावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताकनिरूपकताकाधिकरणतावच्छिन्नाधिकरणतावच्छेदकताधिकरणतानवच्छेदकत्वान्यतरवत्त्वस्थावि
धहेत्वधिकरणमेवस्वावच्छिन्नानुयोगितान्यत्वनिवेशेन द्रव्यं विशिष्टसत्त्वादित्यादौ हेत्वधिकरणत्वस्यापरिभाषितस्य गुणे पि सत्त्वापत्तेरिति तत्र व्याप्यतासमस्त्यानिवेशे तु न संभवति वह्नि
विषयकज्ञानस्य सत्त्वाप्रत्यक्षविषयत्वया वह्निगुणत्वादौ बाधात्तेः हेत्वधिकरणे तद्ज्ञानस्यविषयकज्ञानस्यापि सत्त्वात् नचवनन्तस्यासंपित तत्रापि प्रसिद्धि विषयितासंबंधावच्छिन्नविषयज्ञानाप्रि
सिद्धिकरणतानिरूपितविनिरूपकताकावच्छेदकतानावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितानवच्छेदकत्वस्याप्रसिद्धेः न वाच्यं गगनेऽवृत्तिप्रसिद्धिरिति वाच्यं विषयितासंबंधावच्छिन्न प्रमेयकवि
षयावच्छिन्ननिरूपकताकावच्छेदकतानावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वस्य गगनवृत्तित्वादिति वाच्यं हेतुतावच्छेदकतानिरूपकत्वस्य वच्छेदकतायां तादृशपर्याप्त्यनुयोगितावच्छेदकरूपस्य
निरूपणतादृशप्रतियोगितापर्याप्त्यनुयोगितावच्छेदकरूपनिरूपिताभावान्तररूपतया एवतृतीयानिवेशनादोषात् स्वरूपसंबंधावच्छिन्नप्रतियोगिताभावस्य यद्यपि प्रसिद्धत्वादिति चेन्न गगनेऽवृत्तिमत्त्वावच्छिन्नतृ
तीयोगितानामभेदरूपस्यान्यतरस्यानिवेशे गगनगोपवृत्तिवाच्यवृत्तित्वाभावावच्छेदकतानाद्यात्मरूपप्रतिनिरूपिताभावेतद्भिन्नाश्रयवत्त्वापि हेत्वधिकरणमेवेतिविशेष्याला
घववृत्तिमान्यताव्याप्तत् तथापि अवच्छेदकतायामवच्छेदकस्वरूपत्वे प्रमेयाश्रयवतोविषयितासंबंधेन हेतुत्वेतद्ज्ञानत्वस्य साध्यतास्थले व्याप्तिः प्रमेयवत्त्वस्वरूपाव्याप्तेर्हेतुताव

६

इति द्विष्ठत्वस्य व्याप्यत्वापत्तेरतो यद्वृत्तिमद्वृत्तिप्रतियोगितासामान्ये हेतुतावच्छेदकसंबंधा
वच्छिन्नत्वे हेतुतावच्छेदकावच्छिन्नाभावभेदे १०

च्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकप्रमेयत्वनिष्ठावच्छेदकतायां स्वाभावावच्छिन्नानुयोगिताकपर्याप्तिनिरूपकावच्छेदकतानिरूपकतानाधिकरणनिष्ठाधिकरणतानिरूपकतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वस्य समर्थेन प्रकालीनप्रमेयत्ववृत्तातानंतरभावेनैतन्निरूपणार्थं हेतुतावच्छेदकतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकतात्वावच्छिन्ननिरूपकतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपे स्वाश्रयाभावाश्रयावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकतानिरूपकताधिकरणनिरूपितनिरूपकतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकतात्वावच्छिन्ननिरूपकतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकप्रमेयत्वनिष्ठावच्छेदकताभाव एतदुक्तौ अयं वत् इत्येवंरीत्या निवेशनीयत्वेन महागौरवापत्तेरिति। अथ हेतुतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिहेतुतावच्छेदकसंसर्गतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तिसंसर्गता[illegible]तावच्छेदकतानिरूपितत्वसंबंधावच्छिन्नावच्छेदकतेत्येवंरीत्या अभाववृत्तेरेतेषु समर्थोपपत्तिसंभवे अधिकरणत्वेनापृथग्देशत्वात्तु प्रसिद्धिगतेव धत्वापाधिमोक्षादिसौवधूमिति चेन्न अभाववृत्तिविशिष्टवैशिष्ट्यस्य गगनादिव्यावृत्तस्य भावेन तद्घटितावच्छिन्नप्रतियोगिताकत्वस्य संसर्गतायां गगनादिवृत्तित्वस्य विशिष्टवैशिष्ट्यस्य गगनादिव्यावृत्तरूपस्य समवेतत्वेनानुगतधर्मविशिष्टनिवेशसंभवेपि तद्धर्मावच्छिन्ननिरूपकताधिकरणतावत्त्वसंबंधेनापादते मेयतातद्गगनादित्वसत्ताद्यधिकरणत्वावगाहित्वस्य वा विशिष्टवैशिष्ट्यावगाहित्वस्य समत्वेन तादृशानुपसिद्धेर्दुर्वचत्वात् न च तत्तावत्प्रियावेशना तादृशाभ्युपगमसत्त्वात् न च हेतुतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकतानिरूपकताधिकरणतावगाहित्वमेव विशिष्टवैशिष्ट्यावगाहित्वमस्तु तादृशरूपवदधिकरणत्वावगाहित्वे मानाभावस्तथा च सति गीयविषयतायामंतर्भाव्य तादृशात्वावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकताधिकरणतानिष्ठावच्छेदकताभिन्नत्वसतो हेतुतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तितादृशसंसर्गतावच्छेदकगतरूपवृत्तिसंसर्गताकावच्छेदकताभिन्नायाश्च्छेदकतातादृशावच्छेदकतानिरूपितताताद्रूपावच्छेदकतादृग्यानिरूपितायानिरूपितत्वसंबंधावच्छिन्नावच्छेदकतेत्यादिरीत्या निवेशनादोषात् स्वाभंगीयविषयतामनंतर्भाव्य निवेशो नु विषयतासंबंधेन वह्निहेतुत्वेन ज्ञानत्वस्य साध्यतायामव्याप्त्यापत्तेः महानसीयवह्निविषयकज्ञानस्याविदित्वाधिकरणतादिति चेन्न वह्न्यभाववद्वृत्तिविषयकज्ञानं विषयतासंबंधेनाभाववद्वृत्तिस्तस्यापि विशिष्टवैशिष्ट्यावगाहिप्रमात्वापत्तेर्वारणाय उभयसंबंधेन तादृशरूपवदधिकरणत्वावगाहित्वस्यैव विशिष्टवैशिष्ट्यावगाहित्वस्योपगमात्। यज्जातीयतन्नानाधिकरणेति।। ननु यद्धर्मविशिष्टिनत्वाज्जातिपदव्यावृत्तिरेवोचितेति चेन्न संबंधव्यावृत्तिमंतरानुमापकस्य संभवान्न तत्त्वे च पृथगाननत्वादुभयावृत्तित्वस्यैव व्यावृत्तिदानप्रवृत्तिनिमित्ताशयेनाह नवेति स्वरूपासिद्धिरिति न यावद्व्यभिचारो नियमभंग इत्यर्थः स्वावच्छिन्नप्रतियोगिताकाभाववत्तासंबंधेन तद्धर्मस्यैव साध्यतामित्यभिप्रायेण वाच्यमिति चालेऽपि इति न तूभयावृत्तित्वस्य धर्मनिवेशं परित्यज्य लाघवात् प्रतियोगितायामेव निवेश्यतां मितिवाच्यं प्रतियोगिस्वरूपत्वेन तन्नन्त्ययोगादिना उभयवृत्तित्वेनाप्रसिद्ध्यापत्तेः उभयवृत्तितानवच्छेदकधर्मावच्छिन्नप्रतियोगिताकत्वेप्युक्तौ तु तत्ताघटितप्रत्येकं तत्तत्प्रसिद्धत्वादिगमवत्त्वगुणित्वदोषः न चाभावे स्वप्रतियोगितासंबंधेनोभयावृत्तित्वं निवेश्यतां मिति वाच्यं समनियताभावानामैक्येन यादृशाव्यक्तौ तद्रूपतदुभयोर्मिथःसमारोपेऽपि सत्त्वेन व्यभिचारस्य दुर्वारत्वापत्तेः अनुयोगितायामुभयावृत्तित्वनिवेशस्य स्वनिरूपितप्रतियोगितासंबंधेन तत्त्वेपि स्वनिरूपितप्रतियोगितासंबंधेन स्वाभाववत्त्वेनासंभवः स्वाभावाभावस्य स्वस्वरूपत्वात् स्वनिष्ठानुयोगितानिरूपितत्वस्वनिरूपितत्वोभयसंबंधेन स्वविशिष्टप्रतियोगितासंबंधेनोभयावृत्तित्वविवक्षणात् स्वनिष्ठानु

स्वाभावव्य (?) तिष्ठत्प्रतियोगितावच्छेदकसंबन्धेनाभावो इति चेत् न तत्संबन्धेनाभावस्य तस्य स्वसमानाधिकरणो यत्र इति धर्मावच्छिन्नप्रतियोगिताकाभावत्वं संबन्धेन
क्रियोपरि इतिधर्मस्य वैशिष्ट्यावच्छेदेन सभावोऽप्रसिद्धः ५=

योगितात्वावच्छिन्ननिरूपकतानिरूपितनिरूपकतावत्संबन्धेन तथा प्रतियोगितापानुयोगित्वरूपत्वेनैकत्वेऽपि पुरस्कारेण तस्य तत्संबन्धेन एव जातिरिति कृत्वा तात्कालिकत्वात् ज्ञातत्वावच्छिन्ना
भावत्वादिविशेषणस्यार्थः जातिरिति तत्स्वरूपस्याभाववत्त्वं इति तत्संबन्धेन तद्वृत्ति च स्वसमानाधिकरणो यत्र इति धर्मावच्छिन्नप्रतियोगिताकाभावत्वं तत्संबन्धावच्छिन्ना तन्निविशिष्टान्तःस्वसम
मानाधिकरणो धर्मावच्छिन्नप्रतियोगिताकाभावत्वं तत्संबन्धेन नास्ति इति त्याभावस्य स्वसमानाधिकरणो धर्मावच्छिन्नप्रतियोगिताकाभावत्वं तत्संबन्धेन नास्ति इति त्याभावाच्छिन्नत्वात्
यदि च ज्ञातिसमानाधिकरणो यत्र इति धर्मावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नः सत्ता त्वावच्छिन्नाभाववानिति तदर्थः इतितावच्छेदकतासंबन्धावच्छिन्नस्याभाववत्त्वं तिन्नाभावव
त्वसंबन्धेन तु वृत्ते तथापि घटाभाववत्त्वेऽपि इतिविशिष्टे तदभावस्याप्रामाणिकत्वेनासंभव: अतः यत्ज्ञातिमत्त्वं तित्रयत्र इति धर्मावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्ननिरूपकतावच्छे
दकतात्वावच्छिन्नप्रतियोगिताकरूपयोग्यप्रतियोगितावच्छेदकरूपप्रतिपत्तौ तत्त्वेन ज्ञातत्वावच्छिन्नाभावः साधनीयस्तथा च विशिष्टं तद्रूपान्तरेण तदीनं तन्नएतादृशस्येति तद्वैयर्थ्यापत्तिरिति चेदत्र
केचित् यत्र इति धर्मविशिष्टस्य प्रकारतात्वस्यैवोद्देश्यतावच्छेदकतापर्याप्तिसंबन्धेनैव व्याप्यत्वे तेनाप्रतियोगितावच्छेदकः अतएव वृत्तिघटत्वेन यावद्धर्मावच्छिन्नत्वमिति प्रयोगस्तथा च प्रकृते
जातिसमानाधिकरणो यत्र इति धर्मावच्छिन्नप्रतियोगिताकाभावत्वस्यैव हेतुतेति तद्वैयर्थ्यानुपपत्तिरिति न च विशिष्टान्तरसत्त्वानुगमादिति तत्समन्वयत्वं तदीदृशीत्वेऽपि तेन तादृशत्वरूपव
त्वेति न वैयर्थ्योपपत्तिरिति त्वं वैयर्थ्यं लक्षणो निरवच्छिन्नतत्स्वरूपत्वेनोपस्थितिप्रयोजकत्वस्य तदुपस्थितत्वात् वैयर्थ्यं लक्षणो यदि स्वावच्छिन्नानुयोगिताप्रयोजकावच्छेदकतावच्छि
रूपकताविशेषणताप्रत्यनुपपत्ती निविषयितानिरूपितावच्छेदकतात्वावच्छिन्नप्रतियोगिताप्रयोजकत्वानुयोगितावच्छेदकपर्यन्तमेव वक्तव्यं तादृशप्रतीतिविशिष्टताप्रत्यनुपपत्तीति विषयिता
वच्छेदकत्वमात्मो तु महानसीयवह्निमान् महानसीयधूमादित्यादौ महानसीयधूमस्यापि वाप्यर्थविशेषणं वर्णितत्वापत्तिः हेतुतावच्छेदकतानवच्छेदकत्वं इतिनिरूपकतावविषयिताप्र
त्याय धूमो महानसीयवृत्तिप्रतीति तन्निरूपितविषयतावच्छेदकमहानसीयत्वस्य घटितत्वात्तादृशरूपस्येति अतस्तादृशविषयताप्रत्ययप्रतीति विषयितानिरूपितनिरूप
कतावच्छेदकतात्वावच्छिन्नप्रतियोगितावच्छेदकपर्याप्त्यनुयोगितावच्छेदकत्वेनैव विशिष्टान्तरवैरूप्येनापि संयोगेन नीलधूमवत्तादशायां हेतुत्वेऽनन्य वैयर्थ्यानुपपत्तिः हेतुतावच्छे
दकतात्वावच्छिन्नप्रतियोगितावच्छेदकपर्याप्त्यनुयोगितावच्छेदकं नीलत्वं धूमत्वं नीलधूमत्वं तान्यतमत्वं तद्रूपावच्छिन्नानुयोगितावच्छेदकपर्याप्तिमत्त्वं दकताऽनिरूपकतातद्विष
यिताप्रत्यापाद्यधूमनानिविषयितानिरूपितविषयतानिरूपितविषयतानिरूपकतावच्छेदकतात्वावच्छिन्नप्रतियोगितावच्छेदकपर्याप्त्यनुयोगितावच्छेदकसमवलधूमगतधूमत्वतात्पर्यन्तम
त्वं तत्प्रतिनियतरूपावच्छिन्नानुयोगितावच्छेदकतावच्छेदकतानिरूपकतावविषयिताप्रत्ययवत्त्वमेव हेतुविषयप्रतीतिरिति अतो हेतुतानिरूपितनिरवच्छिन्नावच्छेदकतात्वावच्छि
न्नप्रतियोगितावच्छेदकपर्याप्त्यनुयोगितावच्छेदकत्वेनैव स्वस्य निवेश: धूमत्वं तथा च तादृशरूपं नीलत्वं धूमत्वादिकं तद्विशिष्टनिरूपकतावविषयिताप्रत्ययप्रतीतिधूमत्वेति
प्रतीति विषयतावच्छेदकधूमत्वगतैकत्वघटितत्वेनानुपपत्तिरिति न चापि हेतुतानिरूपितावच्छिन्नावच्छेदकतात्वेन संसर्गितावच्छेदकता हेतुतावच्छेदकतापर्यवसंसर्गताव
च्छेदकत्वादिनिष्ठावच्छेदकतासाधारणस्य निवेश: अन्यथा एकालिकसमवायोभयसंबन्धेन धूमवत्तविशिष्टस्य संयोगेन हेतुतास्थले तत्र वैयर्थ्यविशेषणतानुपपत्तिः हेतुतावच्छेदकग
तैकत्वविशिष्टनिरूपकतावविषयिताप्रत्ययतत्संबन्धसमवाये न धूमत्वविशिष्टविषयप्रतीतेरिति इतीत्थं समवायत्वादि धूमत्वसंयोगत्वसाधारणस्यैव स्वपदेन ग्राह्यविशिष्टत्वाप्ते

[illegible]

७

न प्रसक्तित्वेन महानसीयवन्निष्ठधूमत्वगतद्वित्वमहानसीयत्वागतसमूहपर्यन्तं २=

नन्वभावानवच्छिन्नप्रतियोगिताकाभावनिवेशोपि यत्र वह्निसंयोगत्वावच्छिन्नाभावादिरूपलं विशेषितास्वा
भावपदनिवृत्तीति नन्वप्रसक्तमवेतत्वेनाभावाकारकाभावमादाय व्याप्तिप्रभावानिरूपितत्वान्तूनि
न च समवेतत्वादिं समवायसंबन्धावच्छिन्नप्रतियोगित्वं समवायत्वेनावच्छिन्नत्वे सति संसर्गत्वं तत्र वनित्वतं

दुःखधूमत्वगतैकत्वतत्समवायत्वगतैकत्वादिरित्यास्यातं निवेशेऽपि महानसीयवह्निमान्महानसीयधूमादित्यादिस्थले चिरन्तनोक्तदिवसर्थत्वापत्तिः महानसीयत्वावच्छिन्नधूमत्वगतद्वित्वविशिष्टनिरूपकताकविषयि
ताभिन्नप्रतीतिविषयतावच्छेदकतया प्रसक्तित्वगततत्समूहपदत्वविशिष्टनिरूपकताकविषयिताशालित्वेऽपि हेतुविषयकप्रतीतेस्तादृशविषयितानिरूपकताया अवच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्य
नुयोगितावच्छेदकत्वसत्त्वात् महानसीयत्वसाधारण्येन समूहपदत्वाद्यवच्छिन्नत्वात् सत्त्वस्येति चेत् अतो विशिष्टान्तरविशिष्टनिरूपकताकविषयिताभिन्नप्रतीतिविषयितानिरूपकतानिरूपितनिरवच्छिन्नावच्छेद
कताकत्वेनावच्छेदकतायाः प्रवेशात् एवं रीत्या निवेशेऽपि समवायेन मनुष्यवान् ज्ञानिमत्त्वादित्यादौ हेतौ वृथा विशेषणत्वापत्तिः स्वरूपसंबन्धपर्याप्तज्ञानित्वगतैकत्वविशिष्टनिरूपकताकविषयिताभिन्नप्रती
तीतिविषयितावच्छेदकधूमत्वगतैकत्वविशिष्टनिरूपकताकविषयिताभिन्नत्वं ज्ञानिमत्त्वानित्यप्रतीतेरिति न दुष्टं नन्वेवं स्वरूपत्वस्येति अतो विशिष्टान्तररूपावच्छिन्नानुयोगिताकपर्याप्त्यवच्छे
दकतायामपि निरवच्छिन्नत्वं निवेशनीयं तथा च निरवच्छिन्नावच्छेदकताकनिरूपकताकविषयिताभिन्नत्वं तत्प्रतीतेरसिद्धमित्यदोषः एवं च नहि न प्रमेयत्वेनोक्तपक्षेऽपि यत्र येन साध्यव्याप्यता
येन संबन्धेन तन्निरूपितनिरवच्छिन्नावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वमेव विशिष्टान्तररूपे विवक्षणीयं यमन्यथा हेतुता निरूपितनिरवच्छिन्नावच्छेद
कतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपावच्छिन्नानुयोगिताकपर्याप्त्यवच्छेदकतानिरूपकताकविषयिताभिन्नप्रतीतिविषयितानिरूपकतावच्छेदकतात्वावच्छि
न्नानुयोगिताकपर्याप्त्यनुयोगितावच्छेदकं धूमत्वगतैकत्वस्य नातिरिक्तं साध्यव्याप्यतानिरूपितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकतानुपपत्तेः स्वमेव न स्या
त् तथा च महानसीयवह्निमान्महानसीयधूमविशिष्टस्य संयोगेन साध्यतास्थले साध्यव्याप्यतानिरूपितनिरवच्छिन्नावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगि
तावच्छेदकं महानसीयत्वं धूमत्वगतद्वित्वस्य तादृशनिरूपकताकविषयताभिन्नप्रतीतिविषयितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वानुपपन्ना व्यर्थविशेषणत्वं
॥व न स्यात् तादृशहेतोस्तादृशनिरूपकताकविषयिताभिन्नप्रतीतिविषयितानिरूपितानिरूपकतानिरूपितावच्छेदकतायामपि निरवच्छिन्नत्वं निवेशनीयं एवं तादृशनिरूपकतासमाना
धिकरणनिरूपकतावच्छेदकतायामपि निरवच्छिन्नत्वं निवेशनीयमेतेन नासंभव इत्यलमनल्पेनेति ॥ यद्धर्मेत्यत्र हेतौ धर्मेति घटवृत्तिसंयोगेति न्यूनवृत्तिधर्मे स्वाश्रयवृत्तित्वे
न स्वानाश्रयवृत्तित्वोभयसंबन्धेन पक्षतावच्छेदकविशिष्टान्यत्वस्य निवेशान्न घटवृत्तिसंयोगत्वावच्छिन्नाभावसंग्रह इत्यत आह ह्रदस्येति एतेन ह्रदत्वसमानाधिकरणावि
त्वस्वरूपासिद्धिसंभवे ह्रदत्वावच्छेदेन तद्विरहनिरूपणमनुधावनं व्यर्थमिति परास्तं व्याप्यवृत्तित्वागगनसंयोगस्यासंभवादिति जा० । न च संगत्यनुमितौ न प्रसक्तविषयपदत्वविशिष्टप्रत्यक्षस्य
विषयितासंबन्धेन सत्तायाः सत्त्वघटकावयवत्वादित्यत्र स्वावच्छेदकतासंबन्धेन वह्निमद्वृत्तित्वविशिष्टसंयोगस्यापि सत्तानादवयवेऽव स्वीकारे गतिप्रसंग इति वाच्यं तादृशेन
रूपसमवायवच्छिन्नवृत्तित्वोपलक्षितसंयोगप्रतियोगितादात्म्येन तदवयवस्य कारणत्वमिति कार्यकारणभावेन गगनसंयोगस्यैव तथैव तिप्रसंगस्य तादवस्थ्यापत्तिः न च वृत्त्यनुयोगिकसं
योगस्यैव तेन मूलावच्छिन्नवृत्तित्वोपलक्षितसंयोगस्यावच्छेदकतासंबन्धेन व्यभिचारेणोपि तन्न तादात्म्येन मूलाभावेन व्यभिचार इति वाच्यं अनुयोगितावच्छेदकसंबन्धस्यैव
कार्यतावच्छेदकसंबन्धत्वेनाभ्युपगमात् न च प्रतियोगिप्रभवप्रतियोगिसंयोगस्याभ्युपगतस्य अनुयोगितावच्छेदकसंबन्धेन व्यभिचारेऽपि तत्त्वेन तत्र मूलस्याभावेन व्यभि
चारस्य स्वानवच्छेदकत्वं प्रसक्तिविशिष्टावच्छेदकतासंबन्धेन संयोगप्रतियोगितदवयवस्य तादात्म्येन हेतुत्वमित्यभ्युपगमे गगनसंयोगस्यैव कार्येऽपि नष्टानि वा व्यंलाघवा

साध्यतावच्छेदसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावकूटव्यापकाभावप्रतियोगितावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभाववत्त्वेनरूपेण साध्यसजातीयसंयोगाभावघटाभावादिकं
अनेन रूपेण साध्यत्वं =५
एतादृशं च प्रतियोगि तु घटत्वं यथा घटत्ववत् द्रव्यत्वं वच्छिन्नेन संबंधेन सर्वत्रैव जातिर्जातिमद्वृत्तिः =४

समानाधिकरणस्वस्यान्यतराभावस्य प्रतियोगितात्वव्यापकाभावप्रतियोगिकालिकसंबंधप्रतियोगितावच्छेदकत्वविशिष्टव्याप्यवृत्तितावच्छेदकत्वं तत्तु घटत्वादावेवास्तीति न क्षतिपदे
षः न चोत्तरकालेप्रसक्तव्यापकत्वोक्तावपि विरुद्धव्यापकत्वाभावसाधने बाधकाभावादिष्टापत्तिरिदमुक्तमिति वाच्यं भवन्मते निरुक्तव्यापकत्वस्यानस्यैवानुमितिहेतुतया निरुक्तव्यापक
त्वाभावानुमितिस्थलेऽपि तथानुमित्यनुपपत्त्या इष्टापत्तेरयोगात् अस्मन्मते च तत्स्यमाणव्यापकताज्ञाने एतदनुमितेः प्रतिबंधकत्वादिष्टापत्तिसंभवादित्याहुः वस्तुतो घटव्याप्तिरीकृद्रूपा
त्मक कालमात्रवृत्तिधर्मत्वावच्छेदेनाव्याप्यवृत्तितावच्छेदकघटत्वावच्छिन्नविधेयताकानुमितित्वावच्छिन्नविधेयताकानुमितित्वावच्छिन्नजन्यतानिरूपितजनकतानतिरिक्तवृत्तिधर्मा
भावस्यैव साधनीयत्वान्न कोऽपि दोषः तादृशजनकतानतिरिक्तवृत्तिधर्मप्रसिद्धिस्तु क्रियात्वादावेव हेतुस्तु कालिकसंबंधावच्छिन्नप्रतियोगिताविशिष्टान्यत्वविशिष्टवृत्तित्वप्रतियोगितावैशिष्ट्यसं
स्वावच्छेदकसंबंधावच्छिन्नप्रतियोगितावच्छेदकतावच्छिन्नाधिकरणतावच्छिन्नवृत्तित्वसंबंधेनेति ध्येयम्॥ अथात्र व्याप्तिरीत्या वृत्तित्वप्रत्येकं सिन्नादिभिन्नं त्वं तदा कालपदवैयर्थ्यं यदि
द्रव्यभिन्नादिभिन्नधर्मावच्छिन्नप्रतियोगिताकभेदपदं न तु घटत्वस्यापि तादृशव्यापकत्वस्य गोत्वादौ प्रसिद्धिसंभवादिति चेत्तत्र केचित् प्रत्येकभेदस्यैकतापर्याप्त्यर्थं कालपदं तु कालिकविशे
षणतालाभायेत्याहुः वस्तुतः कालावृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदवत्त्वं तदतिरिक्तवृत्तित्वं कालपदं कालावृत्तिलाभायेति ध्येयं एवं धर्मपदमपि येन संबंधेन कालमात्रवृत्तित्वं तेन
संबंधेन हेतुतालाभाय एवं महाकालत्वं परित्यज्य तादृशहेतुतानुसरणं महाकालत्वतत्र घातित्वादिनानाधर्मसंग्रहाय महाकालपदं तत्स्थानावच्छेदकोनिरुक्तकालमात्रवृत्तिधर्म इति तद
नुसरणमिति नव्याः केचित्तु व्याप्तिरिक्तेति व्यापवृत्तिजगदीशग्रन्थासंगतोऽस्तीति ध्येयम्॥ न चात्र विशेषणताविशेषसंबंधेन महाकालनिरूपितविशेषणताया एव विवक्षितत्वान्न तादृशसंबं
धेन निरुक्तप्रतियोग्यधिकरणताप्रसिद्धिः तादृशाभावस्यापि प्रतियोगिवैयधिकरण्यासंभव इति वाच्यं तथा सति कालमात्रवृत्तिधर्मस्य तादृशविशेषणतया किमपि व्यापकं न स्यादित्यस्यैव सम्यक्त्वे वृत्ति
त्वपदं कालपदं च व्यर्थमिति चेद्गतं केचित् अव्याप्यवृत्तिधर्मे निरुक्तसंबंधेन व्यापकत्वाभावं साधयितुमशक्यः किंतु अव्याप्यवृत्तिधर्मावच्छिन्नव्यापकतावच्छेदेन निरुक्तकालिकसंबंधा
वच्छिन्नप्रतियोगिताकत्वाभावः साधनीयः निरुक्तानुगमहेत्वनुसरणं तु नो ह्येतत्कालवृत्तिर्योयो धर्मस्तत्तद्धर्मे व्यापकताया एव पक्षः व्यापकताया व्यापकस्य च भेदेनाभिमतत्वात् इत्थं च कालपदानुपादाने ग
गनस्यापि तादृशत्वात् तस्य व्यापकत्वाप्रसिद्ध्या विकल्पस्यायोग्यतापत्तेस्तदुपादाने च गगनस्य तादृशत्वाभावान्नानुपपत्तिरित्याहुः परे तु स्वाश्रयसामान्ययोगित्वसंबंधेन स्वव्यापकत्वाभावस्य व्याप्यवृत्ति
धर्मे साधने एवं तात्पर्यं स्वत्वघटितया वृत्तिधर्मः इत्थं च तादृशधर्मलाभाय कालादिपदं महाकालानुयोगिकेत्यत्र महाकालपदमनुगतत्वलाभाय अत एव तात्पर्यग्रन्थे स्वविधेयपदं यत्तु स्वरूपे
णोवप्रवेशप्रयोजनं विवक्षा इति मथुरानाथेनोक्तमित्याहुः वस्तुतस्तु कालपदस्य वृत्तिपदस्य च पूर्वमपि व्यावृत्तिर्दत्ता इदानीमपि तथैवेति ध्येयम्॥ सिद्धान्तलक्षणे कालो घटवान्
महाकालत्वादित्यनुमिताव्याप्तिः घटत्वकालिकसंबंधेन प्रतियोगिव्यधिकरणाभावाप्रसिद्धेः दत्ता तत्र महाकालान्यत्वविशिष्टघटाभावस्य प्रतियोगितावच्छेदकं येऽपि संसाध्यता
वच्छेदकता घटत्वसमवायसंबंधेनाप्रसिद्धस्वरूपसमवायाभ्यामेव तत्र तथात्वादिति जगदीशेनोक्तं अत्रायमभिप्रायः स्वप्रतियोगिव्यधिकरणपदेन स्वप्रतियोगितावच्छेदकतावच्छिन्न

अत्र व्याप्तिरिक्ते न्यभिधानस्य संदर्भविरोधापत्तेरि
ति जगदीशः अत्रेयमाशंका नानुधर्मस्य केनापि व्यापकं
नेत्यादिस्तस्यैव सम्यक्त्वे १२८

१

भाव १

अथ कालोपधेर्महाकालत्वादित्यादावव्याप्तिः प्रतियोग्यसमानाधिकरणाभावस्याप्रसिद्धेरिति चेत्तास्मदुक्तरीत्या स्वाधिकरणानुयोगिकत्वविशिष्टो यः संबंधस्तेन यत्स्वप्र
तियोग्यधिकरणं तेनाधिकरणेन तद्वृत्तित्वं स्वरूपसंबन्धेन तद्वृत्तित्वाभावविशिष्टो योऽभावः स एव प्रतियोग्यधिकरणवृत्त्यर्थः येन यत्र समभावप्रसिद्ध्याव्याप्तिवारणं
स्यात् न चैवं साध्याभावप्रसिद्ध्याव्याप्तिरिति वाच्यं हेत्वधिकरणताघटकसंबंधस्य स्वनिरूपकाधिकरणानुयोगिकत्वेनाविवक्षणात् स्वनिरूपकाधिकरणत्वं च साध्यता
वच्छेदकसंबंधेन विवक्षितत्वात् साध्यतावच्छेदकत्वमत्र साध्यप्रतियोगिकत्वं वक्तव्यं न चैवं तथापि तादृशसंबन्धेन स्वनिरूपकस्याधिकरणस्याप्रसिद्धिरिति वाच्यं तत्
संबंधावच्छिन्नाधिकरणतायाः स्वरूपसंबन्धेनाधिकरणत्वाभावस्य विवक्षितत्वादिति प्राहुः । नन्वेवं घटादिव्याप्यतिरिक्तघटादौ नभस्कालमात्रवृत्तिधर्मस्य विशेषणतावि
शेषेण व्याप्यवृत्तित्वं किमपि व्यापकं न स्यात् स्वावच्छेदकसंबन्धेन प्रतियोगिमत्तं विधेयकाले वर्तमानस्याभावस्य प्रतियोगितायां तत्संबंधावच्छिन्नत्वस्य तेन संबंधेन यत्प्र
तियोगिसंबंधितद्भिन्नत्वस्य महाकाले विरहादिति चिन्त्यमिति । अथ व्याप्यवृत्तिधर्मावच्छेदेन तादृशकालमात्रवृत्तिधर्मव्यापकत्वाभावः साधनीयः तत्र व्यापकत्वं वृत्तिं
कालिकसंबंधेन प्रतियोगिव्यधिकरणनिरूपकालसमानाधिकरणाभावप्रतियोगित्वाभावरूपं किं वा प्रतियोगित्वे व्यधिकरणघटितस्वप्रतियोगिमत्ताबुद्धिविरोधि
ताघटकसंबंधेन निरूपकालत्वसमानाधिकरणाभावप्रतियोगित्वाभावरूपं नाद्यः निरूपकप्रतियोगित्वाभावरूपव्यापकत्वाप्रसिद्ध्यासाध्याप्रसिद्धिप्रसंगात् नापि द्वितीयः
अव्याप्यवृत्तिधर्मनिरूपकालत्वसमानाधिकरणाभावप्रतियोगित्वाभावाभावरूपव्यापकत्वाभावस्यैव तादृशसाधनायत्ते न चव्याप्यकतासंबंधेन निरूपका
लत्वाभावः साधनीयः क्रियात्वादिरूपधर्मस्य तादृशव्यापकत्वसंबंधः प्रसिद्धः महाकालत्वादेश्चाधिकरणसंबंध एव तादृशव्यापकता दृशव्यापकत्वसंबंध इति
नाप्रसिद्धिरिति वाच्यं निरूपकव्यापकत्वसंबंधो यदि प्रतियोगिवैयधिकरण्यघटितस्तदा निरुक्तस्याप्रसिद्ध्या साधनायत्त इति चेन्न अव्याप्यवृत्तितावच्छेदकधर्मपक्षी
कृत्य प्रतियोगिवैयधिकरण्यघटितव्यापकतावच्छेदकत्वतद्घटितव्यापकतावच्छेदकत्वोभयसाधारणरूपेण संसर्गत्वमादाय निरुक्तकालत्वाभावस्य साध
नीयत्वात् संसर्गतावच्छेदकत्वं च स्वनिष्ठनिरूपकतानिष्ठावच्छेदकतानिरूपिताधिकरणत्वनिष्ठावच्छेदकतानिरूपिताधिकरणतानिष्ठावच्छेदकतानिरूपितानिरूपकत्वनिष्ठावच्छेद
कतानिरूपितासती स्वप्रतियोगिमत्ताबुद्धिविरोधिताघटकसंबंधावच्छिन्नत्वनिष्ठावच्छेदकतानिरूपितासती स्वप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वसंबंधावच्छिन्नस्वनिष्ठावच्छेदकताव
भेदवत्त्वसंबंधावच्छिन्नत्वनिष्ठावच्छेदकतानिरूपितासती इति त्वनिष्ठावच्छेदकतानिरूपिताया अवच्छेदकतायाः निरूपितासती या वृत्तितानिष्ठावच्छेदकतानिरूपिताभावनिष्ठावच्छेद
कतानिरूपिताप्रतियोगितानिष्ठावच्छेदकतानिरूपितावच्छेदकतात्वनिष्ठावच्छेदकतासंसर्गतात्स्वनिष्ठप्रतियोगितात्वभेदत्वं तथा च स्वनिरूपकताधिकरणतावन्नि
रूपितस्वप्रतियोगिमत्ताबुद्धिविरोधिताघटकसंबंधावच्छिन्नवृत्तिताकाभावप्रतियोगितावच्छेदकतासंबंधेन स्ववान् नेत्याकारकभेदस्य स्वस्वनिष्ठनिरूपकताधिकरणतावन्नि

दिक्कालादिरूपः

रूपितस्वप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वसंबंधाव

मावप्रतियोगितावच्छेदककुक्षौ यादृशपदार्थः प्रविष्ट इति किं लाघवं तादृशपदार्थस्यैव फलतः प्रतियोगितावच्छेदकावच्छिन्नसंबंधत्वसमानाधिकरणाभावप्रतियोगित्वं
नास्तीत्यभावः साध्यतावच्छेदकसंबंधत्वतादृशानुयोगिकत्वोभयाभावत्वस्याभावयोर्द्वयोः प्रतियोगितावच्छेदककुक्षौ प्रवेश इति किं लाघवं नवा सर्वकल्पे न दोषोद्धार इति कथमेतत्
प्रयासः न च प्रतियोगिवैयधिकरण्यस्यानुगतत्वाय स्वप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकसंबंधत्वस्यैव नानाप्रतियोगिकसंबंधत्वस्य व्यापकतात्कूटस्य एकस्मिन्साद
श्योभयाभावनिवेश एव लाघवमिति वाच्यं तादृशप्रतियोगिताघटितोभयाभावकूटे साध्यतावच्छेदकसंबंधत्वव्यापकताया विवक्षासंभवादिति चेन्न गगनाभावे इति प्रतीतिवारणप्रप्रा
यैरुद्देश्यतावच्छेदकाभाववद्वृत्तित्वविशिष्टपर्य्याप्तेर्वोभयत्वादेः संबंधत्वसीमितं तथा च भवन्मते प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगितानिरूपकत्वाभाववत्त्वे सति तादृशा
नुयोगिकत्वाभाववत्त्वयत्तद्दर्शनात्वविशिष्टपर्य्याप्तिसंबंधेनाभिहितोभयाभावस्यापि वैशिष्ट्यापादनप्रतियोगितावच्छेदकतावच्छेदकसंसर्गे प्रतियोगितानिरूपकत्वस्य पृथिव्या
रः गौरवान्ममतेतु साध्यतावच्छेदकसंसर्गतावच्छेदकावच्छिन्नसंसर्गताभाववत्त्वे सति तादृशानुयोगिकत्वाभाववत्तद्दर्शनात्वविशिष्टपर्य्याप्तिसंबंधस्य निवेशे लाघवान्नपायात् इति
न विशिष्टाभाववत्संसर्गविधया सामानाधिकरण्यपर्य्यवेक्षादुभयाभावापेक्षया लाघवाभावेन कथं वैशिष्ट्याभावे आशंका एतेनेति निरुक्तं निरुक्तपर्य्याप्तेरेव संसर्गतया ऽभयाभावनिवे
शे गौरवस्यानुपपत्त्वादिति ध्येयं ननु स्वरूपसंबंधेन गगनादेरिति स्वमतेपि प्रकृतसाध्यीयसाध्यतावच्छेदकसंबंधसंबन्धसामान्ये तादृशोभयाभाववविवक्षयैव सामञ्जस्ये एतत्तद्विवक्षा
तिरेण घटत्वान्महाकालत्वादित्यन्यघटत्वविशेषणानां घटत्वावच्छिन्नप्रतियोगितावत्त्वविरहेणोपपत्तभावस्य प्रतियोगिवैयधिकरण्यसंभवात् कालं प्रमेयवान्महाकालत्वादित्यत्र कालिकसं
बंधेन प्रमेयसामान्यस्य वाच्यवृत्तिनियामकप्रतियोगिवैयधिकरण्यसंभवात्तदुपारं यत्वेन निर्दिष्टं पारिति जगदीशः नन्वगगनान्यविशिष्टविशिष्टप्रमेयवत्वं प्रमेयत्वेन तदुभयस्य कालिक
नसाध्यतावान्महाकालत्वादित्यादौ व्याप्तिः कालिकविशेषणताभावात्स्वैवस्वाधोसाध्यतावच्छेदकसंबंधेन घटत्वादिप्रमेयधर्मावच्छिन्नप्रतियोगितावत्त्वहेत्वधिकरणीभूतमहाका
लानुयोगिकत्वोभयस्याभावेन प्रतियोगिवैयधिकरण्याभावाप्रसिद्धेः न चोक्तरूपेणासाध्यतामानस्य व्याप्यवृत्तिनियामकत्वेन प्रतियोगिवैयधिकरण्यप्रवेशान्नोव्याप्तिरिति वाच्यं गगनस्य
विशिष्टविशिष्टात्रुविशिष्टप्रमेयत्वप्रमेययोः स्वरूपसंबंधेनाधिकरणीभूतस्य गगनान्यघटादेः स्वप्रसिद्धत्वात् एतच्छेदेनाव्याप्यवृत्तिनियामकत्वस्य वह्निमान्धूमादित्यादौ तत्रैव तत्त्वाद्यप्रतियोगितावच्छेद
कावच्छिन्नसाध्यतावच्छेदकसंसर्गीयप्रतियोगितासामान्ये हेत्वधिकरणीभूततयाविशिष्टानुयोगितानिरूपितत्वसाध्यतावच्छेदकावच्छिन्नत्वोभयाभावस्याप्रसिद्धेः तत्रैव जगदीशानामव्याप्ति
धिकरणादिति तथाहि घटत्वाद्यवच्छिन्नसाध्यतावच्छेदकजातिकसंसर्गीयप्रतियोगितासामान्ये हेत्वधिकरणीभूतमहाकालानुयोगितानिरूपितत्वसत्वेपि साध्यतावच्छेदकीभूतताद्रूप्यतावच्छेदकमेतादृशो
भयत्वावच्छिन्नतद्विरहेणोभयाभावस्य स्वत्वात् तादृशाभावस्य लक्षणघटकत्वासंभवात् प्रभावात् न चोभयत्वावच्छिन्नस्याप्रसिद्धेः प्रतिबन्धकाभावप्रतियोगितानामेव तत्सोपलक्ष्यापरत्वा
त्?: तेन परं भातीति यथाहि अभावीयप्रतियोगितासाधारण्यावच्छिन्नत्वैकपभावान् अभावप्रतियोगितानिष्ठलाघवावच्छिन्नत्वघटिततादृशोभयाभावस्यापि वैशिष्ट्यमहिमा ऽप्रमा
मादिना दोषे दर्शितैव साध्यतावच्छेदकावच्छिन्नसाध्यतावच्छेदकसंसर्गीयप्रतियोगितासामान्ये ऽभावीयप्रतियोगितानिष्ठसाध्यतावच्छेदकावच्छिन्नत्वघटिततादृशोभयाभावस्यत्वेन साध्याभावत्वापिलक्ष

ता घटत्वतया ऽसंभवापत्तिः सांसर्गिकप्रतियोगितानि

ष्टतात्त्वावच्छिन्नत्वघटितत्वाद्धूमवदभाववृत्तित्वेन साध्याभावस्यापि लक्षणघटकतया ऽसंभवापत्तेः सांसर्गिकप्रतियोगिता प्रवेशे तु उक्तस्थले सांसर्गिकप्रतियोगितायाः साध्यतावच्छेदकीभूततादा
त्म्यत्वावच्छिन्नत्वाप्रसिद्ध्याऽव्याप्तितादवस्थ्यादिति चेत् पक्षधरमिश्रेण अत्र ब्रूमः तादात्म्यप्रतियोगितावच्छेदकावच्छिन्नसाध्यतावच्छेदकसंसर्गीयप्रतियोगितावच्छेदकतासामान्ये हेत्वधिक
रणीभूतयत्किंचिद्व्यक्तिनिष्ठानुयोगितानिरूपितप्रतियोगितानिरूपितत्वसाध्यतावच्छेदकनिष्ठत्वोभयाभाववत्त्वस्य प्रवेशेनाप्रसिद्धावपि तेन उक्तस्थले व्याप्तिविरहात् विषयघटत्वेनापि कार्यत्वावच्छि
न्नप्रतियोगिता संबन्धेन वह्नेः साध्यत्वे तत्प्रतादिदेनाव्याप्तिः तेन संबन्धेन प्रतियोगिव्यधिकरणाभावाप्रसिद्धेः तथापि तादात्म्यप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगितासंसर्गीयप्रतियोगि
तावच्छेदकतासामान्ये हेत्वधिकरणीभूतयत्किंचिद्व्यक्त्यनुयोगितानिरूपितत्वसाध्यतावच्छेदकावच्छिन्नसंसर्गप्रतियोगितानिरूपितत्वसाध्यतावच्छेदकनिष्ठत्वेनोभयाभावस्य निवेशनीय
त्वान्नाव्याप्तिरित्यभिप्रायो जगदीशस्येति ध्येयम् ॥ यद्वा तु साध्यतावच्छेदकावच्छिन्नाधिकरणतासमनियताधिकरणतावच्छेदकीभूतयत्किंचित्साध्यतावच्छेदकावच्छिन्नप्रतियोगिकसाध्यता
वच्छेदकसंबन्धस्य निवेशात् प्रकृतस्थले यत्किंचित्साध्यतावच्छेदकीभूतघटत्वावच्छिन्नप्रतियोगिसाध्यतावच्छेदकसंबन्धसामान्येपणभावीयप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वविर
हेणपणभावस्य लक्षणघटकतया न प्रतियोगिव्यधिकरणाभावाप्रसिद्धिरिति ध्येयम् ॥ ननु साध्यप्रतियोगिकत्वनिवेशादेवाप्रसिद्धिवारणसंभवात् उक्तसाध्यपदं व्यर्थमिति चेन्न विषयतासं
बन्धेन घटघटान्यप्रमेयोभयवान् ज्ञानत्वादित्यादौ विषयतामात्रस्यैव साध्यप्रतियोगिकसाध्यतावच्छेदकसंबन्धतया प्रतियोगिव्यधिकरणाभावाप्रसिद्धेः अस्मन्मते तु उभयत्वावच्छिन्नप्रति
योगिकविषयतायाः पर्याप्त्यावच्छिन्नप्रतियोगिकत्वविरहेण पणभावस्य प्रतियोगिव्यधिकरणस्य संभवादिति दिक् । एवं धर्मावच्छिन्नप्रतियोगितायाः स्वप्रमेयत्वावच्छिन्नप्र
तियोगितासामान्यघटितत्वमिति कालत्वादिरित्यादौ प्रतियोगिनः कालिकस्याद्विनापि प्रतियोगिव्यधिकरणाभावाप्रसिद्धेरव्याप्तिः ॥१॥ न च यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगि
कसंबन्धसामान्ये हेत्वधिकरणीभूतयत्किंचिद्व्यक्त्यनुयोगिकसाध्यतावच्छेदकसंबन्धत्वस्य तथात्वं धर्मसामान्ये वा यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वस्य रेकत्वादि
दृशप्रतियोगितामवच्छेदकावच्छेदकसाध्यतावच्छेदकस्य कथं नो क्रमिति जगदीशः । अत्र स्वरूपसंबन्धावच्छिन्नपर्याप्तिनिरूपिताधेयत्वस्याधिकरणतासंबन्धेन साध्यतापर्याप्तत्वस्यैव तत्त्वे व्यभिचारिणि साध्या
भावप्रतियोगितावच्छेदके निरुक्तोभयत्वावच्छिन्नप्रतियोगिकत्वस्य पर्याप्तिनिष्ठाधिकरणतायां सत्त्वात् तत्र वर्णितानुयोगिकत्वस्य सत्त्वेन साध्याभावस्य लक्षणघटकत्वात् अधिकरणतायाः साधेयताप्रतियोगि
कत्वस्य तादृशेतरव्याप्तेः नो निरुक्तनिरुक्तप्रतियोगिकसंबन्धनिवेशः तन्निवेशे च पर्याप्तिनिष्ठाधिकरणतायां पर्याप्तिनिरूपिताधेयताप्रतियोगिकसंबन्धत्वस्याभावात् नातिव्याप्तिः एवं संयोगेन समवायेन
साध्यतायां द्रव्यत्वहेतौ व्यभिचारिणि हेत्वधिकरणानुयोगिकसाध्यतावच्छेदकसामान्यानुगतसंयोगनिरूपकोभयसत्त्वेन साध्याभावस्य घटे मत्साध्यत्वादितिव्याप्तिर्नो हेत्वधिकरणे यत्किंचित्कृत्स्न
योगिकसाध्यतावच्छेदकसंबन्धस्य कस्यापीति ध्येयम् ॥ ॥ हेतुसमानाधिकरणाभावप्रतियोगितासामान्ये यत्संबन्धावच्छिन्नत्वयत्धर्मावच्छिन्नत्वोभयाभाव इति निष्कर्षः अत्र साध्यतावच्छेदकनि
ष्ठयत्किंचित्संसर्गावच्छिन्नावच्छेदकतानिरूपकसाध्यतावच्छेदकनिष्ठयत्किंचित्संसर्गानवच्छिन्नावच्छेदकतानिरूपकत्वोभयाभावः अथवा साध्यतावच्छेदकधर्मनिष्ठावच्छेदकतानिरूपकत्वसाध्यतावच्छे
दकसंसर्गनिष्ठावच्छेदकतानिरूपकत्वोभयाभाव इति धर्मत्वं साध्यतावच्छेदकता घटकसंसर्गावच्छिन्नावच्छेदकत्वं संबन्धत्वं संबन्धानवच्छिन्नावच्छेदकत्वमित्यभिप्रायेण समवायिनः संयोगेन साध्यता
यां संयोगे समवायिनोऽभावस्मारायाः व्याप्तिवारणाय धर्मसंबन्धयोरुपादानं कृतं जगदीशेन तथा च तन्निवेशे तादृशधर्मनिष्ठयत्किंचित्संसर्गावच्छिन्नावच्छेदकतानिरूपकत्वतादृशसंसर्ग
निष्ठयत्किंचित्संसर्गानवच्छिन्नावच्छेदकतानिरूपकत्वोभयाभावस्य अथवा कल्पाभिप्रायेण च साध्यतावच्छेदकधर्मनिष्ठावच्छेदकतानिरूपकत्वसाध्यतावच्छेदकसंसर्गनि

पि कालिकादिसंबन्धेन हेत्वधिकरणवृत्तितया साध्याभावतावच्छेदकप्रतियोगिताकस्य विशेषणतया उभयवृत्तित्वविरहात् वह्निमान् धूमादित्यादावव्याप्तिरिति चेन्न भावभिन्नपदेन विशेषणतया हेत्वधिकरणवृत्त्यभावस्य तथात्वात् तादृशाभावस्य विशेषणतया हेत्वधिकरणवृत्तित्वविरहेण लक्षणाघटकत्वात् यदि च भावभिन्नपदेन विशेषणतया हेत्वधिकरणवृत्तित्वविवक्षणेन लक्षणघटितत्वतद्रूपभेदकत्वस्याभावस्य तद्रूपनिष्ठप्रधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावाभावस्य च तादृशसंबन्धेन हेत्वधिकरणवृत्तितया तत्र साध्यप्रसक्त्या नाव्याप्तिरिति विभाव्यते न तादृशस्य वत्ते वृत्तिरूपध्वंसाभावविशिष्टत्वाभावस्य तादृशरूपध्वंसाभाववाप्यत्योभयाभावस्य निरूपकत्वात् तदन्तस्य भावभिन्नस्य देशिकविशेषणतया उभयवृत्तित्वाभावात् वह्निमान् धूमादित्यादावव्याप्तिरेव एतत्कल्पे दोषावकल्पः अपि चावैशिष्ट्याभावप्रतियोगित्ववैशिष्ट्यस्याभावप्रतियोगित्वं वद्भावप्रतियोगिकाभावावस्थितिले तत्स्थौ रूपने वैशिष्ट्याप्रसज्य वृत्तिधर्मावच्छिन्नसंबन्धाव्यापकतावच्छेदकप्रतियोगिता विशेषणं दीयते तदा तु तत्र न शिष्टानां तेषां निरुक्तविशेषणानां यं अर्थं साध्यवन्निष्ठाभावः प्रतियोगिव्यधिकरणत्वेन विशेषणीयः तेन साध्यवन्मात्रे एव समवायित्वावच्छिन्ना व्याप्याभावप्रतियोगित्वेन घटाभावस्य स्वस्तेति यदि भावविशिष्टभावभिन्नत्वे केवलसमवायेन खण्डघटस्याव्यापकतया घटाभावे भावभिन्नस्याभावत्वादेशात् नातिव्याप्तिः साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकप्रतियोगिताकाभावस्याप्रसिद्धेः इष्टं च यत्संबन्धेन यदवच्छिन्ना यदधिकरणसाध्यवन्निष्ठाभावप्रतियोगितावच्छेदकोपलक्षणत्वेऽस्तीति तत्संबन्धावच्छिन्नाधेयतावच्छेदकरूपवत्त्वं तत्संबन्धेन साध्यव्यापकतावच्छेदकत्वमिति प्राप्तिशीनोक्तं अथात्र पर्यन्त प्रतियोगितावच्छिन्नाधिकरणसाध्यवन्निष्ठप्रतियोगिताभिन्नत्वं साध्यव्यापकतावच्छेदकमिति तस्य च सम्यक् साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकरूपवर्तित्वं तथा च तवर्थे च व्यापकतावच्छेदकत्वपदेन साधिकरणनिष्ठाभावप्रतियोगितावच्छेदकत्वस्यैव प्रतीयमानत्वेन न दण्डो व्यापकतावच्छेदकत्वपदस्य प्रहिभाविकत्वापत्या जगदीशेन तत्परित्यागात् व्यापकतावच्छेदकपरिष्कारे संबन्धलाघवानुरोधेन महाचार्यैस्तथा कृतत्वात् अथात्र प्रतियोगिव्यधिकरणत्वेनाभावस्य विशेषणीयत्वे पितृसत्त्वावच्छिन्नेन वाच्यत्वाभावप्रतियोगित्वेन घटाभावे दृष्टस्य साध्यवतिवृत्तित्वेन प्रतियोगितावच्छेदकस्याहेतुरिति वन्न साध्याधिकरणवृत्तितादृशाभावप्रतियोगितावच्छेदकत्वाभावप्रतियोगितानवच्छेदकत्वस्य व्यापकतावच्छेदकत्वपदेन विवक्षितत्वात् साध्याधिकरणवृत्तित्वं च स्वनिष्ठावच्छेदकताकप्रतियोगिताकाभावत्वसंबन्धेन अवच्छेदकतावत्त्वा. वच्छिन्ननिरूपकताकाधिकरणत्वं तत्संबन्धेन स्वं साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकत्वेनाभिमताप्रतियोगितानवच्छेदकत्वं तथापि स्वावच्छिन्ननिरूपकताकाधिकरणत्वसंबन्धेन

नं० ४४-८१

षोडशकारिका
व्याकरण विषय
पत्र · १ - ७ तक

श्री ५ को सरकार

४४८१

१

श्रीसरस्वत्यैनमः पर्यस्तरिमाणीतानां कारिकाणां विवेचनम् क्रियते पाणिनीयानां शिष्याणां बोधहेतवे १ यस्मिन्निति· भ्वमेकुरः व
भव·भविता·भविष्यति·भवतु·अभवत्·भवेत्·भूयात्·अभूत्·अभविष्यत्॥ अग्निपापसंपोतः ५जुहोति वरयज्ञमानः अश्वेदी
व्यतिधूर्त्तः स्तेनोत्तिमदितंज्ञोऽलिकः तुदतिपादूकण्टकः॥व्रजमवरुणाह्रिणां गोपालः तनोति मंगलं शिवः क्रीणाति सुवर्णं सा
धुः चोरयति परस्वं चौरः गणुलः कर्त्रीति सुक्तः कर्त्ता॥ ॥ शस्त्राजीयते शत्रुः॥अघुरावणरामारघुपतिना॰ शास्यते धेनुः कार्षिकां वेष्ट
वेन·पोष्यते मात्रा कुमारः। अवचीयन्ते वृक्षेभ्यः फलानि दारकेण। उपास्यते ज्ञानेधानुषेण। भिद्यन्ते मल्हैः राजा। कृषीवलो यं नविष्युन
।अपास्विकेदारः कृषीवलेन॥ यद्यसौ स्वपराकेन समं गम्यते तेन रामेनतिष्ठुरचिंतयिष्यत·एवुक्तः कर्मणि सुक्तं कर्म॥ वसल

श्रीगणेशायनमः यस्मिन्नर्थे विधीयन्ते लकाराश्च हि लाः कृतः समासो वा भवेद्यत्र स उक्तः प्रथमा ततः १

प्रवर्त्तते गिरिस्थ्याः स्त्रयोरेव रत्नः।पाचकः।स्वपकारः।कंटकतन्नर्त्तादेवरत्नः कृतवान्वाण एवु क्तेनेरिकृदिस्युक्तः कर्त्ता॥ ॥दुर्जयो वै
सौ वेश्यानाकर्त्तेयो भवनाकरः। ताक्ष्णीस्पवयो वचनशक्तिपुनान्त्र·पीयमानः सोमो भवता। भोग्यो विषयः सामं तस्य। प्रक्तंका
वंमाघस्य। राजभोजनाद्रलालपः। गणुकर्मणि कृदित्युक्तं कर्म॥ ॥स्नानीयं चूर्णं। वहनं शकटं स्मभयं करणं कृपं। चरणाःप
दः। प्रथनः कुठारः। लेखनी स्वाम्यमयी। आयुधं शास्त्रं। आक्षितं भवापं च फली एवु करणे कृदित्युक्तं करणं॥ ॥दानीयो
विप्रः। गोघ्नोऽतिथिः एवु संप्रदाने कृदित्युक्तं संप्रदानम्॥

समावर्त्तनीयो गुरुः। मेत्तव्यः खलः। ज्ञांकितव्योऽञ्जलिः। गंगाप्रभवो हिमालयः। उपाध्यायो द्विजः। भीमो राक्षसः एषु अपादाने कृदिरुक्तमपादानं भीमादयोऽपादाने इति निपातितः॥ ॥अमावास्या तिथिः। ज्ञानानामाधारः कूर्मः। संपदामौको दक्षः। रत्नानामालयः समुद्रः। दोहनी घटी। आसनं पीठम् एषु अधिकरणे कृदिरुक्तमधिकरणम्॥ ॥वैयाकरणः पाणिनिः। नैयायिको गौतमः। नाविकः कर्णधारः। आक्षिकः कितवः। एषु कर्तरि तद्धित इति उक्तः कर्ता। शाक्तीकः शाक्तिको वा। दाधिकः ओदनः। आश्विनः पंथाः। कैंकुमं पटः। राधानुराधीयारात्रिः। आपामुदकं। चाक्षुषं रूपं एषु कर्मणि तद्धित इति उक्तं कर्म॥ ॥द्वितीयो भागः। द्वैतीयिको वा। चतुर्थो भागः। तुर्यः तुरीयो वा॥ पंचमः पक्षः षष्ठो वा एषु करणे तद्धित इति उक्तं करणं। आवणिको विप्रः। आग्निकः छात्रः आग्नेयो वा। दाक्षिरेपा द्विजः दाक्षिणीयो वा। एषु संप्रदाने तद्धित इति उक्तं संप्रदानं॥ ॥अपादाने तद्धितो न दृश्यते॥ गोमान् गृहस्थः। धनवान् साधुः। तेजस्वी रविः। मायावी घटोत्कचः। मेधावी पंडितः। स्रग्वी पुत्रः। एषु संबंधे तद्धित इति उक्तः संबंधः॥ ॥दांडाकीणा। शैवं पातालमगधा। प्राकारी पार्थिवः एषु अधिकरणे तद्धित इति उक्तमधिकरणं॥ ॥कृतप्रयोजनो जनः। आरूढवानरो वृक्षः। कनकः कुठारः। उपहृतपशुः रुद्रः। उद्धृतौदना स्थाली। चित्रगुरीश्वरः। निर्मलजलस्तडागः। एषु षष्ठ्याद्यर्थकर्त्रादिषु समासस्त्वुक्तः कर्त्रादिः सर्वस्मात्सर्वस्माद्भिहितः सोऽर्थः संपन्नः॥ ॥शक्तिपरिक्रमात्रे प्रथमा॥ श्रीरस्तु

वचनान्येकत्वद्वित्वबहुत्वान्यवतिष्ठेग गृह्णन्ति: कस्य उक्तस्यार्थस्य न लिंगविभक्तीः स्वभावात्तद्यथा। एधते पुरुषः। एधेते पुरुषौ। एधन्ते पुरुषाः पचति स्त्री॰ पचतः स्त्रियौ। पचन्ति स्त्रियः। पचते कुलं। पचेते कुले। पचन्ते कुलानि। चक्रे कटः। चक्राते कटौ। चक्रिरे कटाः। गंता पुरः। गंतारौ पुरौ। गंतारः पुरः। ईक्ष्यते मित्रम्। ईक्ष्येते मित्रे। ईक्ष्यन्ते मित्राणि। कृत्तद्धितसमासास्तु लिंगसंख्याविभक्तीश्च गृह्णन्ति: कारकः पुमान्। कारकौ पुमांसौ। कारकाः पुमांसः। कारिका स्त्री। कारिके स्त्रियौ। कारिकाः स्त्रियः। कारकं कुलं। कारके कुले। कारकाणि कुलानि। अत्र ण्वुल कर्त्तरि विहितः। ण्वुलः कर्त्ता। सुगमः पंथाः। सुगमौ पंथानौ। सुगमाः पंथानः सुगमा पद्धतिः। सुगमे पद्धती। सुगमाः पद्धतयः। सुगमं वर्त्म। सुगमे वर्त्मनी। सुगमानि वर्त्मानि। एषु कर्मणि खल् विहित इति उ-

उक्तस्यार्थस्य गृह्णन्ति वचनानि तिङःपरम। लिंगसंख्याविभक्तीश्च कृत्तद्धितसमासकाः २

क्तकर्म। ॥ वैयाकरणः पुरुषः। वैयाकरणी स्त्री। वैयाकरणं कुलं। आन्तिकः पटः। आत्तिका पटी। आनिकं वासः। द्वितीयो भागः। द्वितीया विभक्तिः। द्वितीयं वस्तु। तृतीयं लयं। एषु कर्त्रादिषु विहितस्तद्धित इति उक्तकर्त्रादिः। ॥ आरूढवानरो वृक्षः। आरूढवानरा शाखा। आरूढवानरं वृक्षाग्रं। कृतप्रणामो जनः। कृतप्रणामा नारी। कृतप्रणामं कुलं। एवं द्विवचनबहुवचनमप्युदाहार्यं। एषु कारकेषु तद्धितसमासौ विहिताविति सुक्तं कर्त्रादि उक्तार्थस्य लिंगसंख्याविभक्तीः कृत्तद्धितसमासा गृह्णन्ति॥ कृतश्च लिंगं गृह्णातीति निम्नापिकं आसनं वृषी। द्रोणः परिमाणं॰ धर्मंडलं। कचिल्लिंगसंख्ये अपि न गृह्णाति। वेदाः प्रमाणं। स्मृतयः प्रमा-

णं। महामुनीनां वचनं प्रमाणमित्यादि ज्ञेयं॥

नामेतिप्रातिपदिकस्यार्थसंज्ञा।नेनाचद्यातिपदिके बहूनिप्रातिपदिकानिसमुच्चित्यपरिशाकंप्रयुज्यन्तेतदान्यागाश्रितासंख्याचयाश्रिता
यासंख्यातिङादौ·तिङ्कृत्तद्धितसमासेष्वविशेषेणाभयोक्रमा।अग्रगमवयव:।चयःसमुदायः हरिश्चहरश्चविजयतेः·विजयेतेवा·
विजितवंतौविजितवान्वा।हरिश्चहरश्चकमलासनश्चतेजस्विनः तेजस्वीवा·कृतार्थनाःकृतार्थोवा।सचत्वंचगतौ·गतोवा।त्वंचाहं
चसमेतौसमेतोवा।क्वचिद्भक्तत्वाच्छान्दसप्रयोगंविनापित्वमहंगतौगतोवा।आपेक्षिकत्वात्पुष्पदन्तादौर्मयोर्गम्यमविषये संमुदायाश्रि

रूपोनाम्नोर्वहूनांवापरिशाकंसमुच्चये।अन्वयाश्रितासंख्यातिङादौचाविशेषतः ३ प्रकृ
तेर्विकृतेर्वापियत्रोक्तिःस्याद्द्वयोरपि वाचकःप्रकृतेःसंख्यांगृह्णातिविकृतेर्नतु ४

तास्ते[illegible]नैभवतिकिंतुअन्वयवाश्रितेतिद्विवचनबहुवचनेएवभवतः सचत्वंचतिष्ठथः।सचाहंचतिष्ठावः।सचाहंचत्वंचतिष्ठामः
२ तंतवोधभवन्तिपटः।वीरणानिक्रियंतेकटः।सुवर्णानिक्रियंतेकुंडलं।तंडुलाःपच्यंतेओदनः।एषुतंतुवीरणसुवर्णतंडुला
नांप्रकृतिरूपाणांबहुत्वात्संख्याबहुत्ववाचकः कर्मकर्मणोर्विहितःप्रत्ययोगृह्णाति·नपुनःकटपटकुंडलौदनानांसंख्यामे
कत्वंवचने।एवंकरपि·पटोभवंतितंतवइत्यादिवाचकःप्रकृतेःसंख्यांगृह्णातीत्यस्योपलक्षणत्वात·एवंवक्ष्यमाणस्तंतवइत्यादौलि

द्विजः परितो जस्ते। द्विजौ परितौ जस्ताते। द्विजाः परिताः जस्तिरे। अश्वशष्पन्न शाष्पा परिष्कृता। अश्वशाष्पे तां शष्पे परिष्कृते। अश्वशष्पं तं शाष्पाः परि
ष्कृताः। अपचत श्रीरत्नो देवरत्नेन अस्पृशा। सवत्सां गां ग्रामं रामाय कुलीनाय ददात्। राजमनेक विशेषणोऽपि। दीर्घान्महतः पर्वतादधि
रोहति। ऋद्धस्य वीरस्य राज्ञः पुरुषः। समुद्रे अपारे गंभीरे रत्नानि सन्ति। एवं द्विवचन बहुवचनयोरपि योज्यं। ये द्विजादिर्विशेष्यभूतः सद्ववं
डि तादिभिर्विशेष्यते इति विशेष्येणासहैकार्थं विशेषणं भवतीति विशेष्ये लिंगसंख्याविभक्तयः तिष्ठंति ता एव विशेषणे वेदितव्याः। प्राय
इति वचनात् स्थानपात्रं क्वचित् त्रियः पुरुषप्रकांडं भूपतिः। विंशतिः पुरुषाः। त्रिंशत् पुरुषाः। विंशतिशतादाप्यंचाशतान्ताः सर्वा संख्याः स्त्रियामेकत्वे च

विशेष्येणसहैकार्थं भवेद्यत्र विशेषणम् तत्र लिंगादयः प्रायो विशेष्यस्य विशेषणे ५ ॥ ॥

वर्त्तेते। तेन विशेष्यस्य लिंगसंख्ये न भजते। शतादयो नपुंसके एकत्वे च वर्त्तन्ते। कोटिः पुनः स्त्रियामेकत्वे एव। तेन शतं पुरुषाः। शतं स्त्रियः। शतं कु
लानि। सहस्रादयः। यदा पुनरेत एव विंशत्यादयः शतादयश्च संख्यायंते तदा द्विवचनबहुवचने अपि भवत एव। द्वे विंशती त्रीणि शतादयः।
यदा पुनरेत एव विंशत्यादयः शतादयश्च संख्यायंते तदा द्विवचन बहुवचने अपि भवत एव। द्वे विंशती त्रीणि शतानि। चतस्रः कोट्यः।
विशेष्येणसहैकार्थमिति वचनाद्भिन्नाधिकरणे विशेष्यस्य लिंगादयो न भवंति। कष्टश्रितः। वाचा निपुणाः। ब्राह्मणाय देया दक्षिणा
। वृकेभ्यो भयम्। हंसस्य शाखा। जंघायां लोमानि। अत्र हि कथं प्रयंते नाम्नलुंर्वंति कष्टमेव कर्म। अथवा क्रियया क्रियांतरं। कष्टेन च कृ
मेण कर्मांतरं च वच्छिन्नमिति अवच्छेदकाभावान्न तावद्विशेषणविशेष्यभावः। एवं यथायोगमपरेषु। किंतु। ये कष्टादयो नैते श्रितास्य

इति भिन्नार्थता ५

लिंगभेदेसंख्याभेदे लिंगसंख्ययोर्भेदेपि उपमानोपमेयता भवति। लिंगभेदेपि ताक्ष्मत्तमातंगगर्जितानि तत्र विकीर्णानि। संख्याभेदे· कंदर्परवाक्मी रुनि रत्नवोयुवानस्तिष्ठंति। लिंगसंख्ययोर्भेदेपि· राजेव महत्तयः सेव्याः। तुरगाइवरहिम्नोगादंति। विभक्तिः पुनरेकैव भवति। यथा देवदत्तमिवभद्रंतं पश्यामि। देवदत्तेनेव भवता हतंस्तोषमुदाहृतेनैवागतार्थं॥ ६॥ प्रयुक्त इति· यथा त्वंचिकीर्षसि। युवांचिकीर्षथः। यूयंचिकीर्षथ अहंचिकीर्षे। आवांचिकीर्षावहे। वयंचिकीर्षामहे एवंचिकीर्षसे। चिकीर्षेथे। चिकीर्षध्वे। त्वं युवां यूयमिति गम्यमानेपि। एवंचिकीर्षे चिकीर्षावहे। चिकीर्षामहे अहमावां वयमिति गम्यमानेपि॥ सबोभूयते· तौ भूयेते। तेबोभूयंते। एवं अनुबोभूयते· अनुबोभूयेते· अनुबोभूयेते। अनुबोभूयंते अत्र सतौ ते इति गम्यमानेपि· एवं कर्तृकर्मभाविविशिष्टेषु युष्मदादिप्रयुक्ते गम्यमाने तिङोक्तमिति मध्यमादि

लिंगसंख्याविभेदेपि उपमानोपमेयता। विभक्तिः पुनरेकैव ह्युपमानोपमेययोः ६ प्रयुक्ते गम्यमाने वा
उक्ते युष्मदि मध्यमः त्वयास्मद्युत्तमस्ताभ्यामन्यत्र प्रथमो भवेत् ७ ॥

पुरुषविधिरुक्तः॥ उक्ते इति वचनादनुक्ते न मध्यमादिविधिः यथा त्वया हमध्याप्ये। मया त्वमध्याप्यसे। देवदत्तेन वा हमध्याप्ये। त्वया मया वा देवदत्तोऽध्याप्यते· अत्र युष्मदस्मद्भ्यामन्यत्रार्थे उक्ते इत्यस्मिन्दर्शने प्रथमपुरुषो भवति· भावः सत्ता· सा चैका· तस्मादभिधेयायां तु भावात्तिङ् एकवचनमेव भवति। यथा भूयते देवदत्तेन· देवदत्ताभ्यां देवदत्तैः। त्वया· युवाभ्यां· युष्माभिः। मया· आवाभ्यां· अस्माभिः अत्र त्वगतेव संख्या भवति। एवं आस्यते सुप्यते· शय्यते इत्यादि॥

एकस्मिन्काले यदि क्रियावचनानि अनिपाद्यानि भवेयुस्तदा युष्मदस्मदोः शेषसंज्ञकेषु पुरुषाणां मध्ये यः परः स पुरुषो भवेत्॰ पर्यायतः प्रथममध्यमोत्तमे
षु प्राप्तेषु परस्परापेक्षया प्रवर्त्तमानेषु वा निश्चयोयम् । यथा स च त्वं च पचथः अत्र परत्वात्प्रथमान्मध्यमः त्वं चाहं च पचावः । स च त्वं चाहं च पचा
मः अत्र प्रथममध्यमापेक्षया परत्वादुत्तमः । एषु प्रथमादिविधानेषु सूत्रक्रमेणैव पूर्वापरभावो न तु प्रयोगक्रमेण तेन त्वं च स च पचथः इत्यादिप्रयो
गविपर्ययेपि रूपं प्रतिपत्तव्यम् ८ यथा त्वमहं संपद्येते त्वं भवति॰ मद्भवीति॰ उभयोरप्यनयोर्युष्मदर्थानन्वयेऽपीति न मध्यमः । अस्मदर्थानुरू
पेति नोत्तमः ९ यथा ग्रामं गच्छति देवदत्तः । गमयति ग्रामं देवदत्तं यज्ञदत्तः । याति विप्रो ग्रामं । यापयति विप्रं ग्रामं यज्ञदत्तः । बुद्धि॰ बुध्यते शास्त्रं शि

एकत्र चेत्क्रियाकाले संबंधश्च निपातनम् धातोर्नामादिषु क्तेषु यः परः स पुमान्भवेत् ८ यद्यस्मदर्थे
युनिर्देश्ये भवतो युष्मदस्मदी द्वयोरप्यनयोर्योगे न धातोर्मध्यमोत्तमौ ९ गतिबुद्ध्यशनार्थानां शब्दा
र्थानामकर्मणाम् भवेदणिस्थितः कर्त्ता णिच्यसौ कर्मसंज्ञकः १०

ष्यः । बोधयति शास्त्रं शिष्यमुपाध्यायः । अज्ञासीत्कार्यं राज्ञा । अजिज्ञपत्कार्यं राजानं मंत्री । अमंस्त आज्ञां मांडलिकः । अमीमनत् आज्ञां मांडलिकं
राजदाराः । भक्ष्यवशान॰ आशितवान्यवसान्बलीवर्दः । आशयद्यवसान्बलीवर्दं रक्षकः । अभुक्तौदनं विप्रः । अभोजयदोदनं विप्रान्गृ
हस्थः । अपात्पानीयं पथिकः । अपीप्यत्पानीयं पथिकं देवदत्तः । शब्दकर्मकः पठिष्यति वेदं माणवकः । पाठयिष्यति वेदं माणवकमुपाध्या
यः । अध्येता सूत्रं छात्रः । अध्यापयिता सूत्रं छात्रमुपाध्यायः । नंदति नृपः । नन्दयति नृपं भृत्यवलः । रमते विलासी॰ रमयति विलासि
नं दूती । क्रीडते बालः । क्रीडयति बालं धात्री । वत्स्यति भक्तार्थी॰ वासयिष्यति भक्तार्थिनं दाता॰ नदति चातकः । नादयति चातकं मेघः । अशि

विइति हेतौ यो णिच् भवति तस्मिन्नित्यर्थो विवक्षितः । कथयति रा
मायणं कथकः । कथयति रामायणं कथकं सभापंडितः इति ॥

हरति हरते वा भारं ग्रामं भारिकः। हारयति भारं ग्रामं भारिकं वणिक भारिकेण वा कटं करोति कुरुते वा देवदत्तः कटं कारयति कारयते वा देवदत्तं देवदत्तेन वा यज्ञदत्तः॥ आत्मनेपदविषये अभिवादिदृशोरणि त्विचः कर्त्ता सणिचि कर्मसंज्ञो वा भवति हृकृवत्॥ अभिपूर्वो वदेर्णिजविषये चोगदिको वाचादिरित्येके गतवनभिवादिदृशि इति स्थितेऽत्र नईतोलिङ्गस्यक। यथा अभिवादयते हस्तामकुमारः। अभिवादयते हस्तान कुमारं कुमारेण वा गुरुः॥ पश्यन्ति भृत्या राजानं दर्शयते भृत्यान् भृत्यैर्वा राजानं पार्गलिकः॥ परस्मैपदविषये तु देवानभिवादयति दानपतिना शरवधारकः प्रयोज्ये कर्मत्वं नेति दानपतिः शहांसनीपा दृश्योर्नेधनार्थतया पर्दैण निसम्याने निरुक्तः पश्यति मित्रं देवदत्तः। दर्शयति मित्रं देवदत्तं यज्ञ

हृक्रोरणि त्विचः कर्त्ता णिच्यसौ कर्म वा भवेत् आत्मनेविषये न दृगभिवादिदृशोरपि ११ णीखादि
हृः इदि ज्ञाह्वायः क्रंदां कर्त्ता न कर्म सः वहेरसारथौ रेतौ भक्षेर्धीतोर्न हिंसने १२ ॥ ॥

दत्तः। प्रयोज्ये कर्मणि द्वितीयैव १२ नीखादद्यदिशब्दायक्रंदां अणि त्विचः कर्त्ता सणिचि कर्मसंज्ञो न भवति नीवहोर्गत्यर्थतया अदिखाद्योर्भक्षणार्थतया शब्दायक्रंदोरकर्मकतया नयतेः गत्यर्थतया प्राप्ते निषेधः। ग्राममजां नयति देवदत्तः ग्राममजां नाययति देवदत्तेन यज्ञदत्तः। खादति पोतो गुडं खादयति पोतेन गुडं माता ह्वयति श्येनं वाजिपालः। ह्वाययति श्येनेन वाजिपालेन कुतुकी गुडमत्ति बालः आदयति गुडं बालेन धात्री शब्दायन्ते कीचकाः शब्दाययति कीचकैर्मारुतः। क्रंदति बालः क्रंदयति दालेन दुष्टः॥ शब्दापयति कुक्कुटं॥ तथा वहेरणि त्विचः कर्त्ता सणिचि कर्मसंज्ञको न भवति सारथ्येऽन्यो यदि प्रयोजकः स्यात्॥

वहतिभारंग्रामंदेवदत्तः गांवाहयतिभारंग्रामंदेवदत्तेनयज्ञदत्तः सारथेःपुनःप्रयोजकेविधिः शाकटंवहंतिवलीवर्दाः वाहय
तिवलीवर्दान्शाकटःसूतोवलः॥तथाभक्षेरहिंसापामक्षिणिकर्मसंज्ञानभवति।भक्षयतिगुडंपोतः।पुनर्हेतौणिचि
क्षयतिगुडंपोतेनजननी।हिंसार्थानुविधिरेव।भक्षयतिसस्यंवलीवर्दः।भक्षयतिसस्यंवलीवर्दंगोपालकः सस्यप्रि
सस्यमनह्यंसहिंसितोभवतीत्यत्रैवहिंसा।भक्षयतिश्वानंव्याधः।भक्षयतिश्वानंव्याधंदेवदत्तः।अत्रमृतैवहिं

प्रधानेनीवहादीनंदुहादेरुपसर्जनं कर्मसं

सा गमयादीनांणिजंतानांप्रयोज्यस्यकर्तुःकर्मसंज्ञेतिनियमादिहनभवतिपचत्योदनंदेवदत्तः।पाचयत्योदनंदेवद
त्तेनयज्ञदत्तः।गांपयोदोग्धिगोपालकः।दोहयतिपयोगांगोपालकेनगृहस्थः।अवचिनोतिवृक्षंकुसुमानिवटुः।अवचा
पयतिवृक्षंकुसुमानिवटुनामहेश्वरः।जयतिसेनापरचक्रं।जापयतिपरचक्रंसेनयाराजा।क्रीणातिकटंमाणवकः
।क्रापयतिकटंमाणवकेनपथिकः १२ अजानीयतेग्रामंदेवदत्तेन० निन्ये० नेता० नायिता० नेष्यते० नायिष्यते० नीयतां०

५

अनीयत० नीयेत० नेषीष्ट० नायिषीष्ट० अनायि० अनायिष्यत० अनेष्यत० नेतव्या० नयनीया० नेया० नीयमाना० नीता० हृनया०
उह्यते ग्रामं भारो भारिकेणइत्यादि। ह्रियते ग्रामं भारो भारिकेण० हर्त्तव्यः हरणीयः। हार्यः ह्रियमाणः। हृतः। सुहरः यद्यज्ञादेर्नी
यिमानस्य कर्मणः प्राधान्यं तर्ह्येव क्रिया प्रवृत्तेः अतः कर्मत्वेन प्रत्ययेनाज्ञादिकं कर्मैव वोच्यते। दुह्यते गो गोपालकेन पयः।
दुदुहे० दोग्धा० धोक्ष्यते० दुह्यतां० अदुह्यत० दुहेत० धुक्षीष्ट० अदोहि० अधोक्ष्यत० दोग्धव्या० दोहनीया० दोह्या० दुह्य

यस्मिं[illegible]वाक्ये कर्त्ता प्रयोजकः १३

मानाः० दुदुहाना० दुग्धा० सुदोहा० पाच्यते राज्ञा कं वंशं विप्रेण० पपाचे याचिता० पाचिष्यते० पाच्यतां० अपाच्यत० पाच्येत०
पाचिषीष्ट० अपाचि० अपाचिष्यत० याचितव्यो पाचनीया पाच्या पाच्यमानो पचमानो याचितः सुपाचः॥ रुध्यते गौर्व्रजं गोपा
लकेन० रुरुधे० रोद्धा रोत्स्यते० रुध्यतां० अरुध्यत० रुध्येत० रुत्सीष्ट० अरोधि अरोत्स्यत० रोद्धव्यः० रोधनीयः० रोध्या० रुध्यमाना०
रुरुधाना० सुरोधा० पृच्छ्यते माणवको यात्रां अयाणाभिमुखे॥

५

अयाच्यत· याच्येत· याचिषीष्ट· अयाचि· अयाचिष्यत· याचितव्यो याचनीयो याच्यो याच्यमानो ययाचानो याचितः। सुयाचः॥ रुध्यते गौर्व्रजे गोपालकेन· रुरुधे· रोद्धा· रोत्स्यते· रुध्यतां· अरुध्यत· रुध्येत· रुत्सीष्ट· अरोधि· अरोत्स्यत· रोद्धव्यः रोधनीयः रोध्यो· रुध्यमानो· रुरुधानो· सुरोधः॥ पृच्छ्यते माणवको यात्रां प्रयाणाभिमुखेन· पप्रच्छे· प्रष्टा· प्रक्ष्यते· पृच्छ्यतां· अपृच्छ्यत· पृच्छ्येत· प्रक्षीष्ट· अप्रच्छि· अप्रक्ष्यत· प्रष्टव्यः पृच्छनीयः। पृच्छ्यमानः। पपृच्छानः। पृष्टः। सुप्रच्छः॥ भिक्ष्यते घृतौदनं गृहस्थो भिक्षुकेण· भिक्षितव्यो रसा। अवचीयन्ते फलानि वृक्षः दारकेण· अवचेतव्यो वा· उच्यते शास्त्रं शिष्यो गुरुणा· वक्तव्यो वा· अनुशिष्यते ग्रन्थं शिष्य उपाध्यायेन· अनुशासितव्यो वा· एते दुहादयः॥ यदुक्तं· दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ॥ ब्रुविशासिगुणेन च यत्सचते तदकीर्तितमाचरितं कविना १ अत्र सम्प्रयुज्यमानपयःप्रभृतिकर्मणां दोहादिक्रियाप्रवृत्तिहेतुभूतानां पयःप्रभृतीनां कारणानां गवादिकं प्रधानादिना वचनानि क्रियाप्रवृत्तिहेतुभूतानि ब्रुविशास्योर्गुणेनाभिसंबध्यते· यच्छिष्यादि तदकीर्तितमकथितमपादानादिभिर्विशेषसंज्ञाभिर्यदविवक्षितं तदपि कर्मसंज्ञं भवति· तदेवमप्रधानमिति कर्मणि विहितेन प्रत्ययेनाभिधीयते न त्वचकारेण याचनार्था द्विधा ततः· अपरेऽपि जिमंथिदंडिप्रभृतयो गृह्यन्ते· ब्रवीत्यर्थग्रहणात् उदिवचिवदिभाषिअभिधानं च सिद्धं· अथो कथिप्रभृतयश्च· याच्यते कंबलं राजा ब्राह्मणेन· मार्ग्यते अर्थ्यन्ते अवचिष्यते॥ नीयते मंडलं भूपो नरपतिना· दंड्यते सहस्रं दुर्वृत्तः कारणिकेन। ममंथे जलधिरमृतं हंसेन।

निगद्यते शिष्यो धर्ममुपाध्यायेन । एवमुच्यते उपदिश्यते अभिधीयते आख्यायते कथ्यते ॥ तथा यस्मात् गतिबुद्धीत्यादिना अणिचकर्तुः णिचि कर्मसंज्ञा विहिता सणिजन्तानां धीयं कर्म न देवक मज्ञैः प्रत्ययैरभिधीयते यथा गम्यते ग्रामं देवदत्तो यज्ञदत्तेन । गमयितव्यो वा । बोध्यते शास्त्रं पुत्रः पित्रा बोधयितव्यो वा । भोज्यते ओदनं ब्राह्मणो गृहस्थेन भोजयितव्यो वा । वेदमध्याप्यते माणवकः उपाध्यायेन अध्यापयितव्यो वा स्थाप्यते पोतो जनन्या स्थापयितव्यो वा हार्यते ग्रामं भारं देवदत्तो यज्ञदत्तेन हारयितव्यो वा । अभिवाद्यते कुमारो गुरून् जनकेन अभिवादयितव्यो वा । आत्मानं दर्श्यते भृत्यो नरपतिना दर्शयितव्यो वा । तथा णिजन्तानां धातूनां कर्तृद्वयसंभवे यि कर्तरि विहितेन प्रत्ययेन प्रयोजक एव कर्तोच्यते न प्रयोज्यः । पाचयत्योदनं देवदत्तेन यज्ञ

स्वभावादभिधेयस्य अन्यद्ग्राहककर्मजः नाभिधत्तेच कालादीन् कर्मणोः स्यात्संभवे १४

दत्तः यद्यपि पाचयतं प्रयुंक्ते णिजन्तात् द्वितीयो णिच् । तत्रापि पाचयत्योदनं देवदत्तेन यज्ञदत्तेन विष्णुमित्रः अत्र देवदत्तस्य यज्ञदत्तस्य च प्रयोजको नाभिधीयते । द्वितीये णिचि तस्य प्रयोज्यत्वात् १३ दुह्यते गौः पयः गवां गोधुग् पयो गोपालकेन । दोग्धव्यं वा । याच्यते पौरवं धनः पौरवाय पौरवान् पौरवस्य पौरवे । भिक्षते ब्राह्मणेन ह गवार्थंकारकमपादानादिभावो वा । तेनतस्य कर्मसंज्ञा न भवति । पाचते ओदनो देवदत्तेन यज्ञदत्तेन । घात्यते शत्रुः सामन्तेन नरपतिना । तथा कालभावाध्वदेशान् नाभिधत्ते कर्त अकर्मकस्य कर्मणः संभवे यथा मासमास्यते स्वयमेव ग्रामे । गोदोहं गोपानीतं गायनेन । क्रोशमनुगम्यते कान्तारं कान्तया मरुदेशं पीयन्ते पथिकैः पिपासया । कर्मणोऽप्यण्यः संभवे सति आदौ अपि यत्र कर्मणि तत्र कर्मजः प्रत्ययोत्पत्तिः यथा वत्सान्स

सुप्यन्ते धेनुं धककर्तार । गोदोहः स्थीयते तपसा । क्रोशो गुडधानाभि
व्यते । वः अभमनुभूतं मासस्पते ण मुनिः तत्रम वं त्रकाः स्था नाध्वदे
शानामकर्मयितं रे स्वतेन कर्मसंज्ञा च कारेण १५

निऽगच्छतां च क्रियावत्ता विशेष्येण यदुक्तं तयोर्विशेषणक्रियया अनुक्रमविनयुक्तं भवति। पुत्त्रागच्छति देवदत्तः भोजनपूर्वकं गमनं करोतीत्यर्थः। दानं पचति देवदत्तः पक्त्वा वा दानार्थं पचनं करोति। भोजनदानाभ्यां विशेषणक्रियाभ्यां अनुक्तमपि विशेष्येण गमनपचनक्रियावत्ता तिङा कृता वा कर्तृविहितेनाऽनुक्तमित्यर्थः प्रथमानानुक्तकर्त्रीथिनान्ती या एवमानीय गुरुः पूज्यते पूजयितव्यो वा। आमं अगुरुः पूज्यते पूजयितव्यो वा। आमं च ब्राह्मणो भोज्यते भोजयितव्यो वा। भोक्तुमोदनः पच्यते पक्तव्यो वा। दातुमुपक्रीयते कटः उपक्रेतव्यो वा॥ भोजनार्थं तत्पचनादिकं प

यदेवोक्तं विशेष्येण तिङा वा यदि वा कृता विशेषणक्रियानुक्तमप्युक्तं तद्भवेदिति १५
उक्तमेवोक्ततां पाति क्वचिदुक्तमनुक्ततां अनुक्तमपि नोक्तं स्यात्क्वचिदेव परांतरैः १६

आदानयनादिकं विशेषणेनानुक्तमपि पूजादिक्रियावत्ता विशेष्येण तिङा कृता च कर्मविहितेनानुक्तं कर्मेत्यतः प्रथमा। नानुक्तकर्माथिना द्वितीया १५ नरस्त्रिणपतिनटः ओदनः पच्यते भुज्यते वा ब्राह्मणेन पाठको देवदत्तो दृष्टः श्रुतः। सुरत्वपतिसमुरुषः। वैयाकरणः श्रुतो विज्ञप्यते ज्ञीप्सते वा। शान्तिकः पटः। शोभते परिधीयते वा आरूढवानरो वृक्षः कं व्यज्ञे निरीक्ष्यते वा। क्वचिदुक्तमनुक्तं तार्ने पतन्नरं अवलोकयति जनः। वैयाकरणमध्यापकं शब्दान् पठति छात्रः। आरूढवानरं तरुं स्वयमवलोकयति कुतुकी। अनुक्तमपि नोक्तं स्यात्। नन्वेतेनापि पतनेन टना भोक्तुमन्नं पचति बुभुक्षितः

।आनीय गुरुं दाजयति शिष्यः॥ इति षोडशकारिकास
माप्तासीत् ॥

नं. ४४८०

श्री ५ को सरकार
राष्ट्रिय अभिलेखालय

व्या२८०।७८:।

श्रीगणेशायनमः॥ ॥सुखसन्तानसिद्ध्यर्थंनत्वाब्रह्माच्युतार्चितम्॥गौरीविनायकोपेतंशंकरंलो
कशंकरम्॥वेदार्थशैवशास्त्रज्ञःपव्येकोभूद्द्विजोत्तमः॥तस्यपुत्रोस्तिकेदारःशिवपादार्चनेरतः॥२॥
तेनेदंक्रियतेछन्दोलक्ष्यलक्षणसंयुतम्॥वृत्तरत्नाकरंनामबालानांसुखसिद्धये॥३॥त्रिभिर्विशेषकं॥
पिंगलादिभिराचार्यैर्यदुक्तंलौकिकंद्विधा॥मात्रावर्णविभेदेनछन्दस्तदिहकथ्यते॥४॥षड्ध्यायनिब
द्धस्यछन्दसोस्यपरिस्फुटम्ः॥प्रमाणमपिविज्ञेयंषट्त्रिंशदधिकंशतं॥५॥म्यरस्तजभ्नगैर्लान्तैरेभि
र्दशभिरक्षरैः॥समस्तंवाङ्मयंव्याप्तंत्रैलोक्यमिवविष्णुना॥६॥सर्वगुर्मोमुखान्तर्लौयरावन्तगलौसतौ
॥ग्मध्याद्यौज्भौत्रिलोनोष्टौभवन्त्यत्रगणास्त्रिकाः॥७॥ज्ञेयाःसर्वान्तमध्यादिगुरवोत्रचतुष्कलाः॥गणा
श्चतुर्लघूपेताःपंचार्यादिषुसंस्थिताः॥८॥सानुस्वारोविसर्गान्तोदीर्घोयुक्तपरश्चयः॥वापदान्तेत्वसौग्व
क्रोज्ञेयोन्योमात्रिकोलृजुः॥९॥पादादाविहवर्णस्यसंयोगःक्रमसंज्ञकः॥पुरःस्थितेनतेनस्याल्लघुतापि
क्वचिद्गुरोः॥१०॥इदमस्योदाहरणं॥तरुणंसर्षपशाकंनवौदनंपिच्छलानिचदधीनि॥अल्पव्ययेनसुन्द

ऽऽऽ मगण
।ऽऽ यगण
ऽ।ऽ रगण
।।ऽ सगण
ऽऽ। तगण
।ऽ। जगण
।।। नगण
ऽ।। भगण १

अनुस्वारादिचतुर्भ्यःभाव
कोलघुः २ नो

क्रमसंज्ञकेन २

गुरोरपिक्वचिल्लघुत्व
माह १

यत्नुतस्तुस्त्रादिकं यथपर्यालोचनेन आर्यायाः पादस्यपलात्नास्ति अतएव पद्यविपर्ययोस्येति
पाठः क्वचित्पुस्तकेछ्यपलभ्यते युक्तश्चायंपाठः कथयितंज्ञत्वयोरुपयोगात्कुलोर्हितमहत्तेः २

पुरःस्थितेनतेनसता २

पादस्थेहस्वमोर्ग्याह्यः विषमपादान्त्यस्यलघोरस्यानु
स्वारादिनाविनागुरुत्वं २

१

िक्राम्यजन्तोमित्रमश्नाति॥११॥आधिभूतारसादीनांज्ञेयाःसंज्ञास्तुलोकतः॥ज्ञेयःपादश्चतुर्थांशोयति
विच्छेदसंज्ञका॥१२॥युक्समंविषमंचायुक्स्थानंसद्भिर्निगद्यते॥सममर्द्धसमंवृत्तंविषमंचतथाप
रं॥१३॥अङ्घ्रयोयस्यचत्वारस्तुल्यलक्षणलक्षिताः॥तच्छन्दःशास्त्रतत्त्वज्ञाःसमवृत्तंप्रचक्षते
॥१४॥प्रथमाङ्घ्रिसमोयस्यतृतीयश्चरणोभवेत्॥द्वितीयस्तुर्यवद्वृत्तंतदर्द्धसममुच्यते॥१५॥यस्यपा
दचतुष्केपिलक्ष्मभिन्नंपरस्परम्॥तदाहुर्विषमंवृत्तंछन्दःशास्त्रविशारदाः॥१६॥आरभ्यैकाक्षरात्पादा
क६ देकैकाक्षरवर्द्धितैः॥पृथक्छन्दोभवेत्पादैर्यावत्षड्विंशतिंगतं॥१७॥तदूर्द्ध्वंचण्डवृष्ट्यादिदण्डकापरिकीर्त्ति
ताः॥शेषंगाथास्त्रिभिःषड्भिश्चरणैश्चोपलक्षिताः॥१८॥उक्तात्युक्तातथामध्याप्रतिष्ठान्यासुपूर्विकागा
यत्र्युष्णिगनुष्टुप्चबृहतीपङ्क्तिरेवच॥१९॥त्रिष्टुप्चजगतीचैवतथातिजगतीमता॥शक्वरीसातिपूर्वा
स्यादष्ट्यत्यष्टीततःस्मृते॥२०॥धृतिश्चातिधृतिश्चैवकृतिःप्रकृतिराकृतिः॥विकृतिःसंकृतिश्चापितथाभि
कृतिरुत्कृतिः॥२१॥इत्युक्ताश्छन्दसांसंज्ञाःक्रमतोवच्मिसाम्प्रतं॥लक्षणंसर्ववृत्तानांमात्रावृत्तानुपूर्वकं
म्॥ ॥इतिवृत्तरत्नाकरेछन्दःसंज्ञाप्रथमोध्यायः॥लक्ष्मैतत्सप्तगणागोपेताभवन्तिनेहविषमेजः॥षष्ठोयं

यतिर्जिह्वेष्टविश्राम
स्थानंकविभिरुच्यते:
साविच्छेदविरामाद्यैः
पदैर्वाच्यानिजेच्छया·१

न लघू वा प्रथमेर्द्धे नियतमार्यायाः॥१॥ षष्ठे द्वितीयलात्परके न्ले मुखलाच्च स यतिपदनियमः॥ चरमेर्द्धे पं
चमके तस्मादिह भवति षष्ठो लः॥२॥ त्रिष्वंशकेषु पादो दलयोराद्येषु दृश्यते यस्याः॥ पथ्येति नाम तस्या
श्छन्दोविद्भिः समाख्यातं॥३॥ संलंघ्य गणत्रयमादिमे दले यत्र भवति पादः॥ यस्यास्तां पिंगल
नागो विपुलामिति समाख्याति॥४॥ उभयोर्द्दलयोर्ज्जकारौ द्वितीयतुर्यौ गमध्यगौ यस्याः॥ चपलेति ना
म तस्याः प्रकीर्तितं नागराजेन॥५॥ आद्यदलं समस्तं भजेत लक्ष्म चपलागतं यस्याः॥ शेषे पूर्वजल
क्ष्मा मुखचपला सोदिता मुनिना॥६॥ प्राक्प्रतिपादितमर्द्धे प्रथमे प्रथमेतरे तु चपलायाः॥ ल
क्ष्माश्रयेत सोक्ता विशुद्धधीभिर्ज्जघनचपला॥७॥ आर्याप्रकरणम्॥ आर्याप्रथमदलोक्तं यदि कथ
मपि लक्षणं भवेदुभयोः॥ दलयोः कृतयतिशोभां तां गीतिं गीतवान्भुजंगेशः॥१॥ आर्याद्वितीय
केर्द्धे यद्गदितं लक्षणं तत्स्यात्॥ यद्युभयोरपि दलयोरुपगीतिं तां मुनिर्ब्रूते॥२॥ आर्याशकल
द्वितयं व्यत्ययरचितं भवेद्यस्याः॥ सोद्गीतिः किल कथिता तद्वद्यत्यंकभेदसंयुक्ता॥३॥ आर्यापू
र्वार्द्धं यदि गुरुणैकेनाधिकेन निधने युक्तं॥ इतरत्तद्वन्निखिलं यदीयमुदितेयमार्यागीतिः॥
इति गीतिप्रकरणम्॥ षड्विषमेष्टौ समे कलास्ताश्च समे स्युर्नो निरंतराः॥ न समात्र पराश्रिता कला वैता

पाटके १

लीयेंतेरलौगुरुः॥ पर्य्यान्तेर्यौतथैवशेषंवौपछन्दसिकंसुधीभिरुक्तम्॥ आपातलिकाकथितेयंभाङ्गुरुका
वथपूर्ववदन्यत्॥२॥ तृतीययुग्दक्षिणान्तिकाः समस्तपादेषुद्वितीयलः॥ उदीच्यवृत्तिर्द्वितीयलःसक्तोन्येन
भवेद्युग्मयोः॥ पूर्वेणयुतोथपंचमःप्राच्यवृत्तिरुदीतेतियुग्मयोः॥ यदासमावोजयुग्मकौपूर्वयोर्भवतितत्प्रवृ
त्तकम्॥ अस्ययुग्मरचितापरान्तिकाँअयुग्मयुग्चारुहासिनि॥ ॥इतिवैतालीयप्रकरणम्॥ वक्त्रंनाद्यान्नसौ
स्यातामब्धेर्योनुष्टुभिख्यातं॥ युजोर्जेनसरिद्भर्तुःपथ्यावक्त्रंजेनवारिधेस्तदेवविपरीतादि॥ चपलावक्त्रमयुजो
र्नकारश्चेत्पयोराशेः॥२॥ यस्यांलःसप्तमोयुग्मेसायुग्मविपुलामता॥ सैतवस्याखिलेष्वपिभेनाद्विनोभाद्वि
पुला॥३॥ इत्थमन्यारश्चतुर्थात्॥ नेंबुधेश्चान्त्यविपुला तोब्धेस्तत्पूर्वान्याभवेत्॥४॥ इतिवक्त्रप्रकरणम्॥ द्वि
कगुणितवसुलघुरचलधृतिरिति॥ मात्रासमकंनवमोलान्तं॥ जोलौवपांबुधौविश्लोकः॥ तद्युगलाद्वानवा
सिकास्यात्॥ वाराणाष्टनवसुयदिलश्चित्रा॥ उपचित्रानवमेपरयुक्ते॥ भाष्टाभ्योगोल्यावुपचित्रा॥ नवमेभ
वीतगुरएयुपचित्रा॥ अष्टाभ्यांभात्रयुपचित्रा॥३॥ यदतीतकृतविविधलक्ष्मयुतैर्मात्रासमादिपादैःकलितं॥
अनियतवृत्तपरिमाणसहितंप्रथितंजगत्सुपादाकुलकम्॥ इतिमात्रासमप्रकरणम्॥ ॥वृत्तस्यलावि

५प्रकीर्तितं·ओजयो

प्रकीर्तितं॥ओ
जयो५९

नायसैँगोवर्णगुरुभिस्तथा॥ गुर्वेलैर्द्वन्द्वैर्नान्त्यं प्रमाणीमानिश्चितम्॥ क्रौंरकुरेणनद्भ्रञ्ञापुरो चनमपान्तल्घु
युगलमपरीमदंमविलं॥ समुत्तमकलनयुगलकमपिसुपरिघोटतल्लोनितपदेनोवतीभवतीतिग्रवा॥५॥
यिनमयाथीहितसकलनयुगललघुलोलितपद्वितीतरवितगलनिवयाश्रुतिसुखकृविषमपिजगति
जौरउपगतवीतीत्रसंतभवतिलज्जा॥६॥ अष्टावैकृगाणमभस्ताखस्याः सानं मक्रीडोक्ता॥ दलम
परमोपवसुगुरणतसलिललीनधिलघुकीवरवितपद्वीं नतिभवतिमयति॥ त्रिगुणनवलघुरवीस
निगुरुरीतिनदलयुग कृततनुरितिहविरए॥ ॥छलएडप्रकरणम्॥ जातिमात्रावृत्तप्रकरणम्॥ इति
भट्टकेदारीयरविते वृत्तरत्नाकराख्ये छन्दसिसंकीर्णवृत्ताध्यायो द्वितीयः॥ उक्तागश्रीः॥१॥ अत्युक्ता
गौस्त्री॥२॥ मध्या॰ मोनारी॰ रोमृगी॰॥३॥ प्रतिष्ठा॰ मौ॰ चेत्कन्या॥४॥ सुप्रतिष्ठा॰ भौ॰ गिनिपङ्क्तिः॥५॥
गायत्री॰ त्यौस्तनुमध्या॰ शशिवदना न्यौ त्सौ चेद्वसुमती॥६॥ उष्णिक् मधुमतिननगा॥ कुमार
ललिताज्सौगःचूडामणिर्गस्तभनाः॥ म्सौगाः स्यान्मदलेखा॰ सरगाः हंसमाला॥७॥ अनुष्टुप्॰ भौगि
चित्रपदा गः॥ मोमोगोगो विद्युन्माला॥ माणवकं भात्तलगाः॥ म्नौगौ हंसरुतमेतत्॥ जौसमा
निकागलौच॥ प्रमाणिकाजरौलगौ॥ वीतानमाभ्यांयदन्यत्॥ नाराचिकातरौलगौ॥८॥ बृहतीरा

म

३

त्रसाविह हलमुखी भुजगशिशुभृता नौमः॥२॥ पङ्क्तिः म्सौज्गौ शुद्धविराडिदं मतम्॥ म्नौ य्गौ चेत्पणवनामकम्ः
र्जौ र्गौ मयूरसारिणी स्यात्॥ म्भौ सयुक्तौ रुक्मवतीयम्॥ ज्ञेयामत्ताम्भसयुक्ता॥ चंपकमाला चेद्भमसाद्गः
नरजौ गौ र्भवेन्मनोरमा॥ त्रिष्टुप् त्जौ ज्गौ गुरुणेयमुपस्थितोक्ता॥ स्यादिन्द्रवज्रा यदि तौ जगौ गः॥ उपेन्द्रवज्रा ज
तजास्ततो गौ॰ अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः॥ इत्थं किलान्यास्वपि मिश्रितासु स्म
रन्ति जातिष्विदमेव नाम॥ सान्द्रपदं भ्तौ नगौ गेण भिन्नम्॥ ननजलगैर्गदिता सुमुखी॥ दोधकवृत्तमिदं भभभा
द्गौ॥ शालिन्युक्ता म्तौ तगौ गोब्धिलोकैः॥ वातोर्मीयं गदिता म्भौ तगौ गः॥ पंचरसैः श्रीर्भतनगागैः स्यात्॥ म्भौ न्लौ
गः स्याद्भ्रमरविलसितं॥ रान्नराविह रथोद्धता लगौ॥ स्वागतेति रनभाद्गुरुयुग्मम्॥ ननसगगुरुरचिता वृत्ता॰
ननरलगुरुभिश्च भद्रिका॥ श्येनिका रजौ रलौ गुरुर्यदा॥ उपस्थितमिदं ज्सौ ताद्गकारौ॥ मौक्तिकमाला यदि
भतनाद्गौ॥ जगती॰ चन्द्रवर्त्म गदितं तु रनभसैः॥ जतौ तु वंशस्थमुदीरितं जरौ॥ स्यादिन्द्रवंशा ततजैरसंयुतैः॰
इह तोटकमंबुधिसैः प्रथितं॥ द्रुतविलंबितमाह नभौ भरौ॥ द्रुतपदं नभजयैः कथितं स्यात्॥ वसुयुगविरतिर्नौ म्यौ
पुटोऽयम्॥ चतुर्जगणं वद मौक्तिकदाम॥ प्रमुदितवदना भवेन्नौ रौ॥ नयसहितौ न्यौ कुसुमविचित्रा॥ रसैर्जसज

साजलोद्धतगतिः ॥ भुजङ्गप्रयातं भवेद्यैश्चतुर्भिः ॥ रैश्चतुर्भिर्युता स्रग्विणी सम्मता ॥ भुविभवेन्नभजरैः प्रियंवदा ॥
त्यौत्यौ मणिमाला छिन्ना गुहवक्त्रैः ॥ धीरैरभाणि ललिता तभौ जरौ ॥ प्रमिताक्षरा सजससैरुदिता ॥ ननभर
सहिताभिहितोज्ज्वला ॥ पंचाश्वैश्छिन्ना वैश्वदेवी ममौ यौ ॥ अंब्ध्यंगैः स्माज्जलधरमाला म्भौ स्मौ ॥ इह नवमा
लिनी नजभरैर्म्यौ ॥ स्वरशरविरतिर्ननौ रौ प्रभा ॥ भवति नजावथ मालती जरौ ॥ इति वद तामरसं नजजायः ॥
जरौ जरौ वदन्ति पञ्चचामरम् ॥ १२ ॥ अतिजगती ॥ तुरगरसयतिर्नौ ततौ गः क्षमा ॥ म्नौ ज्रौ गस्त्रिदशयतिः प्रह
र्षिणीयम् ॥ चतुर्ग्रहैरिह रुचिरा जभौ सजौ गः ॥ वेदैरंध्रैर्म्तौ यसगा मत्तमयूरम् ॥ उपस्थितमिदं ज्सौ त्सौ सगुरुकं
वेत् ॥ जतौ सजौ गो भवति मञ्जुभाषिणी ॥ ननततगुरुभिश्चन्द्रिकाश्वर्तुभिः ॥ १३ ॥ शक्वरी ॥ म्तौ न्सौ गाव क्षग्रह
विरतिरसंबाधा ॥ ननरसलघुगैः स्वरैरपराजिता ॥ ननभननलगैः प्रहरणकलिका ॥ उक्ता वसन्ततिलका त
भजा जगौ गः ॥ सिंहोन्नतेयमुदिता मुनिकाश्यपेन ॥ उद्धर्षिणीयमुदिता मुनिसैतवेन ॥ तोभ्नौसेयमादिता र
मधुमाधवीति ॥ इन्दुवदना भजसनैः सगुरुयुग्मैः ॥ सप्ताश्वच्छेदे लोला स्मौ म्भौ गौ चरणे चेत् ॥ १४ ॥ अतिशक्वरी ॥
द्विहतहयलघुरथगितिशशिकला ॥ स्रगिति भवति रसनवकयतिरियम् ॥ वसुमुनियतिरिह मणिगुण
निकरः ॥ मायाराणायस्यां सा कामक्रीडा संज्ञा ज्ञेया ॥ ननमयययुतेयं मालिनी भोगिलोकैः ॥ भवति नजौ

भ्जौ रसौ ल्गौ प्रभद्रकम् ॥ सजनानयौ शरदशकविरतिरेला ॥ म्रौ म्यौ यान्तौ भवेतां सप्ताष्टकैश्चन्द्रलेखा ॥
अष्टिः ॥ भ्रौ भ्नौ नगैः स्वरनवयतिमृषभगजविलसितं ॥ नौ भजजरैः सदा भवति वाणिनी गयुक्तैः ॥ जरौ जरौ जगौ वदन्ति
पंचचामरं ॥ अत्यष्टिः ॥ रसैः रुद्रैश्छिन्ना यमनसभलागः शिखरिणी ॥ जसौ जसयलावसुग्रहयतिश्च पृथ्वीगुरुः
दिङ्मुनिवंशपत्रपतितं भरनभनलगैः ॥ रसयुगहयैर्न्सौ म्रौ स्लौ गो यदा हरिणी तदा ॥ मन्दाक्रान्ता जलधिषडगै-
र्म्भौ नतौ ताद्गुरू चेत् ॥ यदि भवतो नजौ भजजला गुरु नर्कुटकं ॥ मुनिगुहकार्णवैः कृतयतिं वद कोकिलकम् ॥ १७ ॥
धृतिः ॥ स्याद्भूतर्त्वश्वैः कुसुमितलतावेल्लिता म्तौ नयौ यौ ॥ अतिधृतिः ॥ रसर्त्वश्वैर्य्मौ न्सौ ररगुरुयुता मेघविस्फू-
र्जिता स्यात् ॥ सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितं ॥ १९ ॥ कृतिः ॥ ज्ञेया सप्ताश्वषड्भिर्मरभनययुता
भ्लौ गः सुवदना ॥ त्रीरजौ गलौ भवेदिहेदृशेन लक्षणेन वृत्तनाम ॥ २० ॥ प्रकृतिः ॥ म्रभ्नैर्यानां त्रयेण त्रिमुनियतियु-
ता स्रग्धरा कीर्तितेयं ॥ आकृतिः ॥ भ्रौ नरनारनावथ गुरुर्दिगर्कविरामं हि भद्रकमिदम् ॥ २२ ॥ विकृतिः ॥ यदि दहन
जौ भजौ भ्जभलगास्तदाश्वललितं हरार्कयतिमत् ॥ मत्ताक्रीडं ॥ मौ त्नौ नौ न्लौ गिति भवति वसुशरदशयतियुतं
२३ ॥ संस्कृतिः ॥ भूतमुनीनैर्यतिरिह भतनाः स्भौ भनयाश्च यदि भवति तन्वी ॥ २४ ॥ संस्कृतिः ॥ क्रौञ्च पदा भ्मौ स्भौ न
ननान्या विषुशरवसुमुनिविरतिरिह भवेत् ॥ २५ ॥ उत्कृतिः ॥ वस्वीशाश्वच्छेदोपेतं ममतनयुगनरसलगैर्भुज

ङ्कंदमितं ॥ सोनाः षट्सगतैर्गे यदिनैवरसरसस्त्वारयतिमुत्तमपवाहरम्यम् ॥१६॥ इतिसमवृत्तप्रकरणम् ॥ यदि
ह नयुगलततः सप्तरेफास्तदा चंडवृष्टिप्रयातो भवेद्दण्डकः ॥ प्रतिचरणविवृद्धरेफाः स्युरर्णार्णवव्यालजीमू
तलीलाकरोद्दामशंखादयः ॥२॥ प्रचितकसमभिधोधीरधीभिः स्मृतोदण्डकोनद्वयादुत्तरैः सप्तभिर्यैः ॥ ॥इति
भट्टकेदारविरचिते वृत्तरत्नाकराख्ये छन्दसि समवृत्ताध्यायस्तृतीयः ॥ विषमेयदिसौसलगादले ॥ भौयुजिभाद्गुरु
कावुपचित्रम् ॥ भत्रयमोजगतंगुरुणीचेत् भाविहवेगवती युजिभाद्गौ ॥ ओजेतपरौजरौगुरुश्चेत् ॥ म्सौ ज्गौ
गभद्रविराड्भवेदनोजे ॥२॥ विषमेससजासगुरुयुक्तौ ॥ केतुमतीसमेभरनगाद्गः ॥ आख्यानकीतौजगयुग्मगो
जे ॥ जतावनोजेजगुरूगुरुश्चेत् ॥३॥ जतौजगौगो विषमेसमेस्यात् ॥ तौ ज्गौ गमिथा विपरीतपूर्वा ॥ सयुगात्स
लघूविषमेगुरुर्युजिनौ भजौभरौ हरिणप्लुता ॥४॥ अयुजिननरलागुरुः समेनजमपरवक्त्रमिदंततोजरौ ॥ अयुजि
नयुगरेफतोयकारो युजिचनजौजरगाश्च पुष्पिताग्रा ॥५॥ गदन्त्यपरवक्त्राख्येतालीयंविपश्चिताः ॥
पुष्पिताग्राभिधंकेचित् औपच्छन्दसिकंतथा ॥६॥ स्यादयुग्मयोरजौरसमेतुजरौगुरुर्यदा यवान्मतीयं
॥इतिश्री भट्टकेदारविरचिते वृत्तरत्नाकराख्ये छन्दसिह्यर्द्धसमवृत्ताध्यायश्चतुर्थः ॥४॥ मुखपादस्तुभिर्व
र्णैः परस्तु मकारेणलयैः क्रमाद्गुरू ॥ सततन्तथस्वाविचित्रैः पादैः संपन्नसोऽट्दयं ॥ तदभिहितममलधीभिःप
द्वक्तुकामभिदंवृत्तं ॥१॥ प्रथममुदितवृत्तैर्विरचितविषमचरणभाजि गुरुकयुगलनिधनेहृह कलितक्रमा

ञ्ग॥ यदिवितनपदविनितियोतोर्गौ नभवतिपीडः॥२॥ प्रथममितरचरणसमुत्थं॥ कथितनियमविलक्ष्म॥ इतरदितरजनितमपि
यदि चतुर्थं॥ चरणयुगलकमथ कृतमपरो भाति कलिकासा॥३॥ यदि पुरस्तुत सकलचरणान्ता॥ मुखचरणरचितमनुभव
ति तृतीयः॥ चरणो हि हि लक्ष्म॥ अकृतमपरमपि विलक्ष्मपि यदि भवति लवली सा॥४॥ प्रथममधिवसति यदि तुर्यं॥ चरम
चरणपदमधिवसति गुरुयुग्मा॥ निखिलमपरमुपरितनसमभिहत्य नितनपाद॥ ततयममृतधारा॥५॥ पदचतुरूर्ध्व
प्रकरणम्॥ ॥ सजसादिमे सलघुकौ च॥ नसजगुरुकेष्वथोद्गता॥ त्र्यंघ्रिगतभनजलागयुता॥ सजसा जगौ च
चरमेकतः पठेत्॥१॥ चरणत्रयं भजनितलक्ष्म॥ यदि सकलमुद्गतागतं नौ भगौ भवति सौरभकम्॥ चरणे यदीह
भवतस्तृतीयके॥२॥ नयुगं सकारयुगलं च॥ भवति चरणे तृतीयके॥ तदुदितमुरुमतिभिर्ललितं॥ यदि शे
षमस्य खलु पूर्वतुल्यकम्॥ ॥ इत्युद्गताप्रकरणम्॥ म्सौ ज्भौ गौ प्रथमांघ्रिरेकतः पथगन्यतः॥ त्रितयं सनजा
स्त्यानन्तौ सः॥ त्रिनपीरकीर्तितं नजयोः प्रचुपितमिदमुदितमुपस्थितपूर्वम्॥१॥ नौ पादे यत्तृतीयके सनौ नसयुक्तौ प्र
थमांघ्रिरुक्तायतिः प्रवर्धमानम्॥ त्रितयमपरमपि पूर्ववत्तु शुद्धमिह भवति॥ जततमानितिरभिहितागौ द्वितीयं खलु सूक्तम्॥२॥
अस्मिन्नेव यत्तृतीये पादे केतजराः स्युः॥ प्रथमेव विरीतिरार्षभं वदन्ति॥ तच्छुद्धविराडुपस्थितम्॥ त्रितयमपरमपि
यदि पूर्वसमं स्यात्॥ ॥ इति उपस्थितप्रचुपितप्रकरणम्॥ विषमाक्षरपादं वा पादैरसमं दशधर्मवत्॥ यच्छन्दो नो
क्तं गाथेति तत्सूरिभिः प्रोक्तम्॥ ॥ इति भट्टकेदारविरचिते वृत्तरत्नाकरे छन्दसि विषमवृत्ताध्यायः पंचमः॥५॥

प्रस्तारोनष्टमुद्दिष्टमेकद्व्यादिलगक्रिया॥ संख्यावैवाध्वयोगश्चषडेतेप्रत्ययाःस्मृताः॥१॥ पादेसर्वगुरावाद्याल्लघुंन्य
स्यगुरोरधः॥यथोपरितथाशेषंभूयःकुर्यादमुंविधिम्॥२॥ ऊनेदद्याद्गुरूनेवयावत्सर्वेलघुर्भवेत्॥ प्रस्तारोयंसमाख्या ६
तश्छन्दोविचितिवेदिभिः॥ प्रस्तारः॥ नष्टस्ययोभवेदंकस्तस्यार्द्धेर्द्धेसमेचलः॥ विषमेचैकमाधायततोर्द्धेर्द्धेगुरुर्भवे
त्॥ नष्टम्॥ उद्दिष्टंद्विगुणानाद्यादुपर्यंकान्समालिखेत्॥ लघुस्थायेतुतत्रांकास्तैःसैकैर्मिश्रितैर्भवेत्॥ उद्दिष्टम्॥
वर्णान्वृत्तभवान्सैकानौत्तराधर्यतःस्थितान्॥ एकादिक्रमतश्चैतानुपर्युपरिनिक्षिपेत्॥५॥ उपान्त्यतोनिवर्त्तेतत्य
जन्नेकैकमूर्द्ध्वतः॥ उपर्याद्याद्गुरोरेवमेकद्व्यादिलगक्रिया॥६॥ एकद्व्यादिलगक्रिया॥ लगक्रियांकसन्दोहे
भवेत्संख्याविमिश्रिते॥ उद्दिष्टांकसमाहारःसैकोवाजनयेदिमाम्॥ ॥इतिसंख्यासंख्यैवद्विगुणैकोनासद्भिरध्वा
प्रकीर्तितः॥ वृत्तस्यांगुलिकीव्याप्तिरधःकुर्यात्तथांगुलम्॥८॥ वंशेभट्टकपपटस्यप्रकटगुणगणःशैवसिद्धान्तवेत्ता
विप्रःपथ्येकनामाविमलतरमतिर्वेदवित्तत्त्वबोधी॥ केदारस्तस्यसूनुःशिवचरणयुगाराधनैकाग्रचित्तश्छन्दस्तेनाभिरा
मंविरचितममिलंवृत्तरत्नाकराख्यम्॥ ॥इतिश्रीभट्टकेदारविरचितेवृत्तरत्नाकराख्येछन्दःशास्त्रेषष्ठोध्यायः॥ ॥

६

श्रीरामहरि: रामोजयतु

श्रीहरयेनमः सरस्वत्यैनमः

हरिहरि हरिहरा
हरिहरा

व्याकरणम्

श्री ५ को सरकार

शिवपुराणषट्चत्वारिंशदध्यायः धर्मसंहितायाः

देव्युवाच भगवंस्त्वत्प्रसादेन ज्ञातं मे सकलं मतं ॥ यथार्चनं तु ते
देव यैर्मन्त्रैश्च यथाविधि ॥१॥ अद्यापि संशयो ह्येकः कालचक्रं
प्रति प्रभो ॥ मृत्युचिन्हं यथा देव किं प्रमाणं तथायुषः ॥२॥ तथा
कथय मे नाथ यद्यहं तव वल्लभा ॥ ईश्वर उवाच ॥ सत्यं ते कथ
यिष्यामि येन कालः प्रबुध्यते ॥३॥ अहः पक्षं तथा मासमृतं चाय
नवत्सरं ॥ स्थूलं सूक्ष्माणि चिन्हानि बहिरन्तर्गतानि तथा ॥४॥ तत्तेहं स
म्प्रवक्ष्यामि शृणु तत्वेन सुन्दरि ॥ अकस्मात्पाण्डुरं देहमूर्ध्वरागं
समन्ततः ॥५॥ मुखं कर्णौ तथा चक्षुर्जिह्वास्तम्भो यदा भवेत् ॥ तदा
मृत्युं विजानीयात्षण्मासाभ्यन्तरे प्रिये ॥६॥ रौरवानुगतं भद्रे ध्व
निं नाकर्णयेद्द्रुतं ॥ षण्मासाभ्यन्तरे मृत्युर्ज्ञातव्यः कालवेदिभिः
रविसोमाग्निसंयोगाद्यदा द्योतं न पश्यति ॥ कृष्णं सर्वं समस्तं तु
षण्मासं जीवितं तथा ॥८॥ वामहस्तो यदा देवि सप्ताहं स्पन्दते प्रि
उन्मीलयति गात्राणि तालुकं शुष्यते यदा ॥९॥ जीवितं तु तदा तस्य
मासमेकं न संशयः ॥ नासा तु स्रवते यस्य त्रिदोषे पक्ष जीवितं
वक्त्रं कण्ठश्च शुष्येत षण्मासान्ते गतायुषः ॥ स्थूला जिह्वा
वे यस्य द्विजाः क्लिद्यन्ति भामिनि ॥११॥ षण्मासाज्ज्ञायते मृत्यु
हैस्तैरुपलक्षयेत् ॥ अम्बु तैलघृतस्य तु दर्पणे वरवर्णिनि
पश्यते न यदात्मानं विकृतं स्वस्वरूपकं ॥ षण्मासायुः स विज्ञेय
कालचक्रविज्ञानता ॥१३॥ शिरोहीनं यदा छायां स्वकीयामुपल
क्षयेत् ॥ अथवा छायया हीनं मासमेकं न जीवति ॥१४॥ आग्नि
काः कथिता भद्रे याम्यस्थां शृणु साम्प्रतं ॥ रश्मिहीनं यदा देवि
सोमार्कमण्डलद्वयं ॥१५॥ दृश्यते पटलाकारं मासार्द्धेन
म्रियते ॥ अरुन्धतीं महायानमिन्दुं लाञ्छनवर्जितं ॥१६॥
सोपि जीवति वर्षार्द्धं तथा वा दृष्टतारकः ॥ मेघहीनं यद

विविधुद्भिर्ज्वलितं नभः ॥१७॥ दृष्टे गृहे वा दिङ्मोहः षण्मा
साज्ज्ञायते ध्रुवं ॥ रात्रौ धनुर्यदा पश्येन्मध्याह्ने चोल्कापातनं १८
वेष्टनं गृध्रकाकैश्च षण्मासायुर्न संशयः ॥ कश्यपः स्वर्गप
थश्चैव दृश्येते चाम्बरे ॥१९॥ षण्मासायुर्विजानीयात्पुरु
षैः कालवेदिभिः ॥ अकस्माद्राहुणाग्रस्तं सूर्यं वा सोममेव च २०
दिक्चक्रं भ्रान्तवत्पश्येत्षण्मासान्म्रियते स्फुटं ॥ मक्षिकैर्नी
लवर्णाभैरकस्माद्वेष्ट्यते पुमान् ॥२१॥ जीवते मासमेकं तु
ज्ञातव्यो परमार्थतः ॥ गृध्रः काकः कपोतश्च शिरश्चाक्रम्यति
ष्ठति २२ ॥ शीघ्रं तु म्रियते जन्तुर्मासैकेन न संशयः ॥२२॥ एवं चा
रिष्टभेदं तु बाह्यस्थं समुदाहृतं २३ ॥ आधुधानो हितार्थाय
संक्षेपेण वदाम्यहं ॥ हस्तयोरुभयोर्देवि यथा कालं विजा
नते ॥२४॥ वामदक्षिणयोर्भद्रे प्रत्यक्षं ते वदाम्यहं ॥ वामं शु
क्लं विजानीयाद्दक्षिणं कृष्णसंज्ञितं २५ ॥ दक्षिणं सूर्यमित्याहु
र्वामश्चन्द्र उदाहृतः ॥ एवं पक्षौ स्थितौ द्वौ तु समासात्सुरसुन्दरि २६
शुचिर्भूत्वा स्मरेद्देवं शुभध्यानः संयतेन्द्रियः ॥ हस्तौ प्रक्ष्याल्य क्षीरे
णालक्तकेन तु मर्दयेत् २७ ॥ गन्धैः पुष्पैः करौ कृत्वा मृगये
च्छुभाशुभम् ॥ कनिष्ठामादितः कृत्वा यावदङ्गुष्ठकं प्रिये २८
पर्वत्रयक्रमेणैव हस्तयोरुभयोरपि ॥ प्रतिपदादि विन्यस्य
तिथिं प्रतिपदादितः २९ संपुटाकारहस्तौ तु पूर्वादिमुखसं
स्थितः ॥ स्मरेन्नवार्णकं मन्त्रं यावदष्टोत्तरं शतं ३० निरीक्ष
येत्ततो हस्तौ सर्वपर्वाणि यत्नतः ॥ तस्मिन्पर्वणि तद्रुवाद
श्यते भृङ्गसन्निभा ३१ तत्तिथौ मृत्युर्विज्ञेयः कृष्णे शुक्ले त
था प्रिये ॥ निश्चितं मरणं तस्य कालचक्रस्य कीर्तितम् ३२
अधुना नादजं वक्ष्ये संक्षेपात्कालं लक्षणं गमागमं

विदित्वा तु कर्म कुर्याद् तु प्रिये ३३ आत्मविज्ञानं सुश्रोणि चारं ज्ञात्वा
तु तत्त्वतः ॥ क्षणं त्रुटिर्लवं चैव निमेषं काष्ठ कालिकं ३४ मुहूर्तं
त्वहोरात्रं पक्ष मासर्तुवत्सरं ॥ अब्दं युगं तथा कल्पं महाकल्पं
तथैव च ३५ एवं संहरते कालः परिपाट्या सदाशिवः ॥ वा
म दक्षिण मध्ये तु पार्थिव यमिदं स्मृतं ३६ दिनानि पञ्च
चारस्य ~~[illegible]~~ पञ्चविंशद्दिनावधिः ॥ वामचार
गतो नादः प्रमाणं कथितं तव ३७ भूतरन्ध्र दिशश्चैव च
जश्च परवर्णिनि ॥ वामचारगतो नादः प्रमाणं काल
वेदिनः ३८ चतुर्विकार भूताश्च गुणास्तथैव भामिनि
प्रमाणं दक्षिणं प्रोक्तं ज्ञानं च प्राणवेदिभिः ३९ भूत
संख्यां यदा प्राणो वहते चइडादयः ॥ वर्षत्रयं न दान
स्य जीवितस्य न संशयः ॥ ४० ॥ दिनादश प्रवाहेन षण्मा
सं लक्षयेत्तथा ॥ पंचविंशद्दिनान्तु वहते वामनाडि
का-४२१ जीवितं तु तदा तस्य मास त्रयगतायुषः ॥ षड्
विंशद्दिनमानेन मासद्वय गतायुषः ४३ सप्तविंशद्दि
नानां तु वहत्वे त्वति विभ्रमा ॥ मासमेकं समाख्यातं
जीवितं वामगोचरे ४४ एतत्प्रमाणं विज्ञेयं वामवा
यु प्रमाणतः ॥ सव्यन्तरे दिनान्येव चत्वार भतुर्द
शः ४५ चतुःस्थानोस्थिता देवि षोडशैताः प्रकीर्तिता ॥
तेषां प्रमाणं वक्ष्यामि अधुना हि हितार्थतः ४६ षड्
दिनान्यादितः कृत्वा संख्यायाश्च यथाविधिः ॥ ए
तदन्तर्गतं कालं वामरन्ध्रे प्रकाशितं ४७ षड्दिना
नि यथा कुर्वं वर्षद्वयं स जीवति ॥ मासान्पंचैव वि

दिनाद्दशप्रवाहे नावदा जीवति · पैदशप्रवाहेन मेकं गतायुषः ४६

जानीयाद्दिनान्यष्टादशानि तु ४८ प्राणः सप्तदिने दे
वि वर्षद्वयं न संशयः ॥ सप्तमासान्विजानीयाद्दिनैः च
तुर्भिर्गतायुषः ४९ अष्टौ दिनप्रभेदेन वर्षद्वयं स जीव
ति ॥ मासांश्चत्वारि विज्ञेयं चतुर्विंशद्दिनावधि ५० न
व दिनानि यदा प्राणो वहन्ति न त्रिमासकं ॥ मासद्वयं
च द्वे मासे दिना द्वादश कीर्तिताः ५१ पूर्ववत्कथिता ये तु
कालं तेषा न पूर्वके ॥ अवान्तरा दिना ये तु ते समासेन
कथ्यते ५२ एकादश प्रवाहेन वर्षमेकं न जीवति ॥
मासान्नव तथा प्रोक्ता दिना अष्ट दिनावधि ५३ द्वा
दशाह प्रवाहेन वर्षमेकं गतायुषं ॥ मासान्सप्त वि
जानीयाद्दिन षट्क मुदाहृतं ॥ ५४ ॥ यथा च वहते
नाडि त्रयोदशदिनावधि ॥ संवत्सरं भवेत्तस्य मा
साश्चत्वारि कीर्तिताः ५५ चतुर्विंशद्दिनाः षोषा जी
वितं च न संशयः ॥ प्राणवाहो यदा वामे चतुर्दश
दिनानि तु ५६ द्वादशाह प्रवाहेन द्विमासं जीवितं च
तु ॥ द्वितीये तु चतुर्थेन अन्तराल दशान्तरे ५७ तृती
यं च समासेन कालचक्रं वदाम्यहं ॥ षोडशाह प्रवा
हेन नवमासैर्गतायुषं ५८ दिनाअष्टादशन्तत्र क
थितं साधकेश्वर ॥ वामचारं यदा देवि अष्टादशदि
नावधि ५९ जीवित अष्टमासन्तु दिनाद्वादशकी
र्तिताः ॥ चतुर्विंशद्दिनास्तत्र निश्चयेनावधारय ६०
प्राणवाहो यदा वामे त्रयोविंशद्दिनावधि ॥ मासा
श्चत्वारि विज्ञेया षड्दिनानि तथा नरे ६१ चतुर्वि

शप्रवाहेन मासत्रयं सजीवति ॥ दिनास्तत्र दशाष्टौ च सं
हरत्यविचारतः ६२ अवान्तर दिनाद्येतु सङ्क्षेपात्प्रकटी
कृता ॥ वामचारं समास्थातं दक्षिणं शृणु साम्प्रतं ६३
अष्टाविंशप्रवाहेन तिथिमानेन जीवति ॥ प्रवाहेन
दशाहेन तत्सङ्ख्येन विपद्यते ६४ विंशवाह प्रवाहेन
पंचाहेन विनश्यति ॥ एकविंशप्रदादेवि वहते च नि
रन्तरं ६५ दिनत्रयेन दा तस्य जीवितस्य न संशयः ॥ द
क्षिणं कथितं च मध्यस्थं शृणु साम्प्रतं ६६ एकमासगा
तो वायुः प्रवाहो मुखमण्डले ॥ धम्यमानः प्रवाहेन दिन
मेकं स जीवति ६७ चक्रमेतन्वरारोहे कालचक्रमुदा
हृतं ॥ एतत्ते कथितं देवि किमन्यच्छ्रोतुमिच्छसि ॥ ६८ ॥
इति श्रिवपुराणे धर्मसंहितायां कालज्ञानं नाम षट्पंचाशः
अध्याय
देव्युवाच · कथितं तु त्वया देव कालज्ञानं यथार्थतः ॥ काल
स्य वंचनं ब्रूहि यथा तत्त्वेन योगिनः ॥१॥ कालेन तु समाक्रा
न्तो हि वर्तन्ते सर्वजन्तवः ॥ यथा चास्य नरैः पुंभि वंचते काल
मागतं ॥२॥ तथा कथय मे नाथ हितार्थमिह योगिनः ॥ शंक
र उवाच · शृणु देवि प्रवक्ष्यामि यन्त्वया पृष्टवानेतदहं ॥३॥ कथ
यामि समासेन मानुषाणां हितार्थतः ॥ पृथिव्यापस्तथा ते
जो वायुराकाशमेव च ·४· एतेषां हि समायोगः शरीरं पाञ्च
भौतिकं ॥ आकाशस्तु परो व्यापी सर्वेषां सर्वगः स्थितः ५ आ
काशे तु विलीयन्ते सम्भवन्ति पुनस्ततः ॥ वियोगात्तु सदैक
रूपं स्वं धाम प्रतिपेदिरे · ६ · ततो स्यास्थिरता यातितं निपा
तस्य सुन्दरि ॥ शान्तिनोपि तथा यत्नात्तपो मन्त्रवत्नायाँ

देव्युवाच · भवेतं नयन्नालतिघोररूपः कालः करालस्त्रिदिवेशनाथ
दग्धस्त्वया त्वं पुनरेव तुष्टः स्तोत्रैस्तु तात्त्वां प्रकृतिं सतेभ्यः ·८ त्वया
सयोक्तः कृपया जनानामदृष्टरूपः प्रवरिष्यतीति · इत्थं च यातनि
हितं मम ब्रूहि प्रभो वराने पुनस्तु स्थितं च ९ तदद्य भोः कालइहास्ति
किंचिद्विहन्यते येन वदस्व तन्मे · शंकर उवाच · न हन्यते देव
वरैस्तु दैत्यैः सयक्षरक्षोरगमानुषैश्च · १० · ये योगिनो ध्यान
पराः सदैव हा भवन्ति ते घ्नन्ति सुखेन कालं · ११ सनत्कुमार
उवाच · एतच्छ्रुत्वा त्रिभुवनगुरोः प्राह गौरी विहस्य सत्यं त्वं मे
वद कथमसौ हन्यते येन कालः ॥ शंभुस्तामाह शशिवदने
योगिनां येक्षयन्ति कालं जातं स कलमनघास्तच्छृणु त्वं च
चित्ता · १२ · शंकर उवाच · पंचभूतात्मको देहः सदापुन्दत्तु
तत्कृते उत्पद्यते वरारोहे तद्विलीयेत पार्थिवैः १३ · आकाशा
ज्जायते वायुर्वायोस्तेजश्च जायते · तेजसोऽम्बु विनिर्दिष्टं त
स्मात्पृथिवी भवेत् · १४ · पृथिव्यादीनि भूतानि गन्धादिक्र
मशो वरे · धरा पंचगुणा प्रोक्ता आपश्चैव चतुर्गुणाः · १५ · त्रि
गुणं च तथा तेजो वायुर्द्विगुण एव च · शब्दैकगुण आका
शं पृथिव्यादि बुधोदिताः · १६ · शब्दः स्पर्शश्च रूपं च रसो गं
धश्च पंचमः · विज्ञहानिगुणानां स्वं तथा भूतं विपद्यते · १७ ·
यदा गुणो विगलति प्रादुर्भूतं तदुच्यते · तस्माद्धि योगिना नि
त्यं स्वकायाकाश[illegible]णा · १८ चिन्तनीयाः प्रयत्नेन देवि
कालजिगीषुणा ॥ देव्युवाच · कथं हि जीयते कालो यो
गिभिर्मे वदेश्वर · १९ · ध्यानेन जाप्यमात्रेण तत्सर्वं कथ
य प्रभो · शङ्कर उवाच · शृणु देवि प्रवक्ष्यामि योगिनां
हितकाम्यया · २० · परं ज्ञानमकथ्यं च न देयं यस्य कस्य
चित् · श्रद्धानाय दातव्यं भक्तियुक्ताय धीमते २१

धर्मीनस्वापभाविनि

अनास्तिकायश्रद्धा[illegible]ानयोगरतायच॥ सुरतासक्तेष
शय्यायांयोगंभुञ्जीतयोगवित् २२ दीपंविनान्धकारेतु
प्रमादतस्तुधारयेत्॥ तर्जन्यापिहिनोकर्णौ पीडयित्वामु
हूर्तकं २३ तस्मात्संश्रूयतेशव्दस्तुन्दवारिसमुद्भवः॥ सन्ध्या
नोभुक्तमेवंहिपञ्चत्वंक्षणादपि २४ सर्वरोगंनिहन्त्याशु
ज्वराद्युपद्रवान्बहून्॥ यश्चोपलक्षयेन्नित्यमेकान्तेघटि
काद्वयं २५ जित्वामृत्युंयथाकामंस्वेच्छयापर्यटेदिह॥ स
र्वज्ञःसर्वदर्शीचसर्वसिद्धिमवाप्नुयात् २६ यथाभ्वंनदते
नादंप्राप्य[illegible]भस्मिसंस्थितं॥ तेभ्यस्त्वामुच्यतेयोगीसद्यः
संसारबन्धनात् २७ सयोगीनिर्भयःसूक्ष्मःसूक्ष्मनरोभ
वेत् स्तनैकपितंदेविशब्दब्रह्मविधिक्रमं २८ पत्नात्न
भिवधान्यार्थीत्यजेद्ध्यमशेषतः शब्दब्रह्मणिसंप्राप्ये
केचिदन्यकांक्षिताः २९ यान्तितेमुक्तिनाकाशंकेऽप्यन्ति
शुध्यानुमान्तःशान्तापरमिदंब्रह्मतुरवेदमुक्तिकारणं ३०
अवाच्यमक्षरंचैवसर्वोपाधिविवर्जितं॥ मोहिताःकालपाशेन
मृत्युपाशवशंगताः ३१ शब्दब्रह्मनजानन्तिपापिनस्तेकुबु
द्धयः तावद्भ्रमतिसंसारेयावद्ब्रह्मनविन्दति ३२ विदितेतुपरेतत्
त्वेमुच्यतेजन्मबन्धनात् निद्रालस्यंमहाविघ्नंजित्वाशत्रु
प्रयत्नतः ३३ सुखासनस्थितोनित्यंशब्दब्रह्माभ्यसेन्निशि॥
शतवृद्धःपुमाँल्लब्ध्वायावदायुष्यमभ्यसेत् ३४ मृत्युञ्जय
वपुर्लम्भआरोग्यंचायुर्वर्धनं· प्रत्ययोदयनेहस्तौकिंपुनस्त
हृतोज्ञनैः ओंकारोनमन्त्रोपिनैववीजेनचाक्षरं· अ
नाहतमनुच्चार्यंशब्दब्रह्मपरंशिवं ३६ तस्माद्धद्दान
वप्रोक्ताःप्रायशोविदितुम्भक्षिताः· नात्रवक्ष्याभियत्ने
ननादसिद्धिमनुत्तमान् ३७ घोषंकांस्यंतथाशृंगंघ
ण्टावीणादिवंशजं· दुन्दुभिःशंखशब्दश्चनवमंमेघ
गर्जितं· नवशब्दंपरित्यज्यओंकारंतुसमभ्यसेत्॥

नश्यतोगति
ध्यायन्नेवंसदायोगीशुश्रयणापैनीलिपघने ३९ यदाश्चराव
न्वरंमासेवंतदाभिद्के॥ श्रूयतेस्यस्यध्यानस्यंयोगीतिष्ठे
द्वियानिशं ४० तस्मादुत्पद्यतेशब्दोमृत्युजित्सप्रसिद्धिदैः॥ प्रथ
मेनदनेघोषमात्मशुद्धिकरंपरं ४१ सर्वव्याधिहरंनादंवश्या
कर्षणमुत्तमम्॥ द्वितीयंनदतेकांस्यंस्तम्भयेप्राणिनांगतिं ४२
विषंमूत्रग्रहान्सर्वान्बन्धयेन्नात्रसंशयः॥ तृतीयंनदतेश्रृंग
मभिचारेनियोजयेत् ॥४३॥ विद्वेषोच्चाटनेशत्रोर्मार
णेचप्रयोजयेत्॥ घंटानादंचतुर्थंतुवदतेपरमेश्वरः ४४
आकर्षेत्सर्वदेवानांकिंपुनर्मानुषाभुवि॥ यक्षगन्ध
र्वकन्याश्चतस्याकृष्टाददतिहि ४५ पथोपितनोमहा
सिद्धिंयोगिनःकामतोपिवा॥ वीणातुपञ्चमोनादः
श्रूयतेयोगिभिःसदा ४६ तस्मादुत्पद्यतेदेविदूरा
दर्शनमेवहि॥ ध्यायन्नेवंशनादंतुसर्वज्ञत्वंप्रजा
यते ४७ दुन्दुभिंध्यायमानस्तुजरामृत्युविवर्जितः॥
शंखशब्देनदेवेशिकामरूपंप्रपद्यते ४८ योगिनो
मेघनादेनविपत्संगमनोभवेत्॥ सर्वज्ञःसर्व
दर्शीचकामरूपीप्रजायते ४९ एतत्तेसर्वमाख्या
तंकिंभूयःश्रोतुमिच्छसि॥ देव्युवाच॥ वायोस्तुप
दमाप्नोतियोगाकाशसमुद्भवात् ५० तन्मेसर्वं
समाचक्ष्वप्रसन्नस्त्वंयदिप्रभो॥ शङ्करउवाच॥
शृणुमेसर्वमाख्यातंयोगिनांहितकाम्यया ५१ का
लेजिगमिषोःसम्यग्वायोर्लिंगंयथाभवेत्॥ प्राणा
यामपरिश्रितः ५२ सज्जयत्यागतंकालंमासार्द्धे
नैवसुन्दरि॥ हस्तौवाकुःसदानेत्रेदीपकःसोत्रपाद

कः॥५३॥सबाह्याभ्यन्तरव्यापीवायुःसर्वगतोमहान्
ज्ञानविज्ञानमुत्साहंसर्वंवायोःप्रवर्तते॥५४॥येनै
हनिर्जितोवायुस्तेनसर्वमिदंजगत्॥धारणायांस
दातिष्ठेज्जरामृत्युजिघांसया.५५.लोहकारोयथा
मापूर्यमुखतोन्यतः॥धारयेद्वायुनाकर्मतद्वद्योगी
समभ्यसेत्.५६.देवःसहस्रकोनेत्रपादहस्तसह
लकः॥खंयोपिसर्वमावृत्यसोग्रेतिष्ठद्दशाङ्गुलम्.५७
गायत्रींशिरसासार्द्धंजपेद्व्याहृतिपूर्वकं॥त्रिःपठेद
यतप्राणःप्राणायामःसउच्यते.५८.गत्वागत्वानि
वर्तन्तेचन्द्रसूर्यादयोग्रहाः॥अद्यापिननिवर्तन्तेप्रा
णायामपरायणाः॥५९॥ज्ञानमर्द्धंतपस्तप्राकुशा
ग्रापःपिबेद्द्विजः॥तदाप्नोतिफलंदेविप्राणानांधा
रणैकया.॥६०॥योद्विजःकल्यमुत्थायप्राणायामे
कमाचरेत.॥सर्वपापंनिहत्याशुब्रह्मलोकंसग
च्छति॥६१॥योतन्द्रितःसदैकान्तेप्राणायामपरो
भवेत्॥जरांमृत्युंविनिर्जित्यवायुगःखेचरीमतिः ६२
सिद्धस्यभवतेरूपंकान्तिर्मेधापराक्रमः॥शौर्यं
वायुसमोगत्यासौख्यंश्लाघ्यंसुरादिभिः॥६३॥ए
तत्कथितमशेषंवायोःसिद्धिंसमाप्नुतेयोगी॥यत्ते
जसोपिलभन्तेतत्तेवक्ष्यामिदेवेशि.॥६४॥स्थित्वा
सुखासनेसौम्यांतेजनवचनहीनेजु॥शिशिर
विमुच्यातेजःप्रकाशयेन्मध्यमेदेशे.॥६५॥वन्हि
गतंभ्रूमध्येप्रकाशितेयस्त्वतन्द्रितोयोगी.॥मा

रंध्यैश्चायेन्मुहूर्त्तार्द्धेनमेकमासोपि ६६ ननन्तुन
मसिध्यानी पश्यते ज्योतिरैश्वरं ॥ श्वेतं रक्तं तथा पी
तं कृष्णमिन्द्रायुधप्रभं ६७ भ्रुवोर्मध्ये ललाटस्थं बाला
र्कसमतेजसं ॥ तं विदित्वा तु कामांगी नदते कामरू
पधृक् ६८ कारणप्रसमावेशं परकायप्रवेशनं
अणिमादिगुणावाप्तिर्मनसा चावलोकनं ६९ दूराच्छ्र
वणविज्ञानमदृश्यं बहुरूपधृक् ॥ संततभ्यासयोगे
न खेचरत्वं प्रजायते ७० श्रुताध्ययनसम्पन्ना नाना
शास्त्रविशारदाः ॥ ज्ञानिनोपि विमुह्यन्ते पूर्वकर्मवशा
नुगाः ७१ पश्यन्तोपि न पश्यन्ति श्वरं पानावधिराय
धा ॥ यथांधा मानुषे लोके मूकाः पापविमोहिताः ७२
वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्ता
त् तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यते प्राण
नाय ७३ एतन्ते कथितं सम्यक्तेजसो विधिमुत्तमं ॥
कालं जित्वा यथा योगी चामरत्वं प्रपद्यते ७४ पुनः
परतरं वक्ष्ये यथा मृत्युर्न जायते ॥ तुरीयादिविभूतीभि
योगिनो ध्यानिनः कदा ७५ ॥ सुखासने समास्थो
य योगी नियतमानसः ॥ समुन्नतशरीरोपि सबाह्या
करसंपुटं ७६ चंच्वाकारेण वक्त्रेणापिवन्वायुंश
नैः शनैः ॥ प्रस्नवनिःक्षरणादापस्त्वास्य जीवदायकाः ७७
नाजिह्वाग्रेण पुनादायामृतं तन्न छीतलं जलं ॥ पिबन्न
नुदिनं योगी न मृत्युवशगो भवेत् ॥ ७८ ॥ दिव्यकायो
महातेजाः पिपासाक्षुद्विवर्जितः ॥ ७९ बलेन नागस्तु

रणोजवेन हृष्यासुपूर्णाः सुभूतिस्तु दूरान्तः॥ अणाङ्कें
चिन्ताकुण्डलिकुस्तकैः शोगन्धर्वविद्याधरम्तुल्य
वर्णाः ८० जीवेन्नरो वर्षशतं सुराणांसुमेधासावाक्य
तिनासमत्वं ८१ पुनरन्यन्तुवक्ष्यामिविधानंयन्मुरे
रपि॥ जोपिनंतुप्रयत्नेन नद्धृशुष्यवरानने ८२ समा
कुंच्याम्पसेघोगीरसनांतालुकंप्रति॥ किंचित्का
लान्तरे रोवक्र मान्मुाप्नोतिलम्बिकां ८३ ततःप्रस्र
वतेसातुसंस्पृष्ठा शीतलांसुधां॥ पिबन्नेवसदायो
गीसोमरत्वंहिगछति ८४ रेफाग्रलम्बकाग्रंकुरु
तलघटनं भ्रूपदास्याविन्दुसेनाकृष्टंसुधौघंप
ततिपरपदेदेवतानन्दकारं॥ सारंसंसारतारंक्षत
कलुषमरं कारणं कालतारं येनेमं ह्याविनाद्यं सभव
तिअमरः क्षुत्पिपासाविहीनः॥ ८५॥ एभिर्ध्यात्वाच
तुर्भिः क्षितिधरतनये योगिनैर्यद्धरादेर्धैर्यान्नित्यं
कुतोन्तः सकलमपिजगद्यन्तुरत्वप्राणनाथः॥ त्वत्प्र
देशेविधत्तेसकलमपिसदामानसंयच्छ्रेदः त्वंस्व
र्गेलीवधीर[illegible]त्याः प्रभवतिचततो वासिकिं चिन्त्य
तुर्णा॥ ८६॥ तस्मात्म-त्योत्सर्पोमिर्वृत्ततिपमधुनैरोध
धैर्यैगप्रसाधात्तरिरक्तामनुष्यैर्नपावितय पुते धर्म
विद्भिः क्रमेण॥ भूतानामादिदेवोनहिभवतिचल
संप्रतोवैचतुर्णांतस्मादेवंप्रवक्ष्ये विविधमनुदिनं
दापिकेपरिद्धिवारव्यं॥ ८७॥ इतिश्रीशिवपुराणे
धर्मसंहितायांकालज्ञानंनामपञ्चचत्वारिंशोध्यायः

देव्युवाच ॥ कथितन्ते समासेन रूपिकं शान्तमुत्तमं ॥ वि
स्तरेण समाख्याहि योगिनां हितकाम्यया ॥ १ ॥ शङ्कर उ
वाच ॥ शृणु देवि प्रवक्ष्यामि छायापुरुषलक्षणं ॥ यं ज्ञा
त्वा पुरुषः सम्यक् सर्वपापैः प्रमुच्यते ॥ २ ॥ सूर्यं हि पृष्ठतः
कृत्वा सोमं वा वरवर्णिनि ॥ शुक्लाम्बरधरः स्रग्वी गंधधू
पादिवासितः ॥ ३ ॥ संस्मरेन्मे महामन्त्रं सर्वकामफलप्र
दं ॥ नवात्मकं पिण्डभूतं स्वां छायां संनिरीक्षयेत् ॥ ४ ॥ दृष्ट्वा
तां पुनराकाशे श्वेतवर्णस्वरूपिणीं ॥ स पश्यत्येकभावस्तु शि
वं परमकारणं ॥ ५ ॥ ब्रह्महत्यादिकैः पापैर्मुच्यते नात्र संश
यः ॥ शिरोहीनं यदा पश्येत् षाड्मासैर्भवेन्नसः ॥ ६ ॥ स
मस्तं चाभयं तस्य विघ्नं योगिनस्तथा ॥ शुक्ले धर्मं विजा
नीयात् कृष्णे पापं विनिर्दिशेत् ॥ ७ ॥ रक्ते बन्धं विजानीया
त्पीते विद्वेषमादिशेत् ॥ विबाहौ बन्धुनाशः स्याद्विगुणे चै
व क्षुद्रयं ॥ ८ ॥ विकटे [illegible] नश्यते भार्या वि
नेच्छे धनमेव हि ॥ पादयोर्वै विदेशः स्यादित्येन क
थितं मया ॥ ९ ॥ सम्यक् पुरुषं दृष्ट्वा सन्निवेश्यात्म
तात्मनि ॥ जपेन्नवात्मकं मन्त्रं हृदये मे महेश्वरि १०
वत्सरोद्वेगतो मन्त्री नन्ना सिद्धयन्न साधयेत् ॥ अ
णिमादिगुणान्यष्टौ खेचरत्वं प्रपद्यते ॥ ११ ॥ पुन
रन्यत्प्रवक्ष्यामि शाङ्करि ज्ञातुं दुरासदँ ॥ प्रत्यक्षं दृश्य
ते लोके ज्ञानिनामग्रतः स्थितं ॥ १२ ॥ अज्ञेयालिख्य
ते लोके यासर्पीकृतकुण्डली ॥ सामाचाऽपानसं
स्थापि दृश्यते न च पश्यते ॥ १३ ॥ वीणादण्डमूर्द्धगा
यश्चैतस्तु नायं देवस्तु नित्यशः ॥ जननी सर्वविद्यानां

रणोजवेन दृष्ट्वा सुपूर्णाः सम्भूतिस्तु हृदान्तरा ॥ आकुं
चिताकुण्डलिकस्तत्कैशोगन्धर्वविद्याधरस्तुल्य
वर्णाः ८० जीवेन्नरो वर्षशतं सुराणां सुमेधसा वाक्य
तिनासमत्वं ८१ पुनरन्यत्प्रवक्ष्यामि विधानं यत्सुरे
रपि ॥ जोपितं तु प्रयत्नेन तच्छृणुष्व वरानने ८२ समा
कुंच्यात्मसे योगी रसनां तालुकं प्रति ॥ किंचित्का
लान्तरे सौव क्रमात्प्राप्नोति लम्बिकां ८३ ततः प्रस्र
वते सा तु संस्पृष्ट्वा शीतलां सुधां ॥ पिबन्नेव सदा यो
गी सोमरत्वं हि गच्छति ८४ रेफाग्रलम्बकाग्रं कुण्ड
नलघटनं भ्रूपद्मस्य बिन्दुसेनाकृष्टं सुधौघं प
नतिपरपदे देवता नन्दकारं ॥ सारं संसारतारं कृत
कलुषतरं कारणं कालतारं येनेमं त्वा विनाद्रुं स भव
ति अमरः क्षुत्पिपासा विहीनः ॥ ८५ ॥ एभिर्जन्मा च
तुर्भिः क्षितिधरतनये योगिनैर्यं धराद्यैर्ध्येयं नित्यं
कृतोनः सकलमपि जगपश्यत्स्वप्राणनाथः ॥ त्वत्प्र
देहि विधत्ते सकलमपि सदा मानसं यच्छदेः त्वत्स्व
रोऽप्येव धीरि[illegible]न्याः प्रभवति च ततो वाक्सिद्धिश्च
तुर्णां ॥ ८६ ॥ तस्मान्मत्यैस्तपोभिर्व्रतनियमयुतैरौष
धैर्योगयुक्ताधात्रीरक्षामनुष्यैर्नयविनययुतैर्धर्म
विद्भिः क्रमेण ॥ भूतानामादिदेवो न हि भवति चल
त्वं युतोवै चतुर्णां तस्मादेवं प्रवक्ष्ये विविधमनुदिनं
ह्यपि केपर्ह्कि वा स्वं ॥ ८७ ॥ इति श्रीशिवपुराणे
धर्मसंहितायां कालज्ञानं नाम षड्चत्वारिंशोऽध्यायः

देव्युवाच॥ कथितन्तेसमासेनत्वयापिकंज्ञानमुत्तमम्॥ वि
स्तरेणसमाख्याहियोगिनांहितकाम्यया॥१॥ शङ्करउ
वाच॥ शृणुदेविप्रवक्ष्यामिछायापुरुषलक्षणं॥ यंज्ञा
त्वापुरुषःसम्यक्सर्वपापैःप्रमुच्यते॥२॥ सूर्यंहिपृष्ठतः
कृत्वासोमंवावरवर्णिनि॥ शुक्लाम्बरधरःस्रग्वीगंधधू
पादिवासितः॥३॥ संस्मरेन्मेमहामन्त्रंसर्वकामफलप्र
दं॥ नवात्मकंपिंडभूतंस्वांछायांसंनिरीक्षयेत्॥४॥ दृष्ट्वा
तांपुनराकाशेश्वेतवर्णस्वरूपिणीं॥ सपश्यत्येकभावस्तुशि
वंपरमकारणं॥५॥ ब्रह्महत्यादिकैःपापैर्मुच्यतेनात्रसंश
यः॥ शिरोहीनंयदापश्येत्षाड्मासैर्भवेन्नसः॥६॥ स
मस्तंचाभयंतस्यविघ्नंयोगिनस्तथा॥ अङ्गेधर्मंविजा
नीयात्कलत्रपापंविनिर्दिशेत्॥७॥ स्कन्धेवंधविजानीया
द्यातेविद्वेषमादिशेत्॥ विवाहेबन्धुनाशःस्याद्धितरणेचै
वक्षुद्वयं॥८॥ विकरे ~~[illegible]~~ नश्यतेभार्यावि
तंघेधनमेवहि॥ पादयोर्वैविदेशःस्यादित्येतत्क
थितंमया॥९॥ सम्यक्पुरुषंदृष्ट्वासन्निवेश्यात्म
तात्मनि॥ जपेन्नवात्मकंमन्त्रंहृदयेमेमहेश्वरि १०
वत्सरेविगतेमन्त्रीमन्त्रासिद्धियन्तसाधयेत्॥ अ
णिमादिगुणान्यश्चैवखेचरत्वंप्रपद्यते॥११॥ पुन
रन्यत्प्रवक्ष्यामिशक्तिंज्ञातुंदुरासदां॥ प्रत्यक्षंदृश्य
तेलोकेज्ञानिनामग्रतःस्थिता॥१२॥ अज्ञेयालिख्य
तेलोकेयासर्पीकृतकुण्डली॥ सामाचाऽपानतं
स्थापिदृश्यतेनचपश्यते॥१३॥ व्रीक्षाण्डमूर्द्धिगा
पञ्चाशत्तुनायेदेवेनित्यशः॥ जननीसर्वविद्यानांगु

ल्लविद्येति गीयते·।।१४।। खेचरी सा विनिर्दिष्टा सर्वप्राणिषु संस्थिता·।। दृश्यादृश्या चला नित्या व्यक्ताव्यक्ता सनातनी·।।१५।। अवर्णा वर्णसंयुक्ता प्रोच्यते विन्दुमालिनी·।। तां पश्यन्सर्वदा योगी कृतकृत्योभिजायते·।।१६।। सर्वतीर्थकृतस्नानाद्द्वे दानस्य यत्फलं· सर्वयज्ञफलं यत्तु मालिन्या दर्शनात्सदा·।।१७।। प्राप्नोति नत्र सन्देहः सत्यं यत्कथितं मया·।। सर्वतीर्थेषु यः स्नायाद्दानानि सर्वशः·।।१८।। सर्वेषां देवि यज्ञानां यत्फलं तल्लभेन्नुमान्·।। तस्माज्ज्ञानं यथायोगमभ्यसेत्सततं बुधः·।।१९।। अभ्यासाज्जायते सिद्धिर्योगोभ्यासात्प्रवर्त्तते·।। सवित्तिर्लभ्यतेभ्यासान्मोक्षोभ्यासात्समश्नुते·।।२० इत्येतत्कथितं देवि भुक्तिमुक्तिफलप्रदं·।। किमन्यत्पृच्छसे देवि वद सत्यं ब्रवीमि ते·।।२१।।

इतिश्रीशिवपुराणे धर्मसंहितायां अष्टचत्वारिंशोध्यायः सम्पूर्णः शुभमस्तुवाम्

योगवासिष्ठे उत्पत्ति प्रकरणे ६८ अध्याये विसूचिका मन्त्रः

हिमाद्रेरुत्तरे पार्श्वे कर्कटी नाम राक्षसी.
विसूचिकाभिधाना सा नाम्नाप्यन्यायबाधिका : तस्या मन्त्रः —

" ॐ ह्रीं ह्रां रीं रां विष्णुशक्त्यै नमः ॐ नमो भगवति विष्णुशक्तिमेनां ॐ हर हर नय नय पच पच मथ मथ उत्सादय दूरे कुरु स्वाहा हिमवन्तं गच्छ जीव सः सः सः चन्द्रमण्डलं गतोसि स्वाहा. "

इति मन्त्रं महामन्त्रं न्यस्य वामकरोदरे.
मार्जयेदातुराकारं तेन हस्तेन संयुतः
हिमशैलाभिमुखेन विद्रुतां तां विचिन्तयेत्,
तां कर्कटीं कर्कशाकारां मन्त्रमुद्गरमर्दिताम्.
आतुरं चिन्तयेच्चान्द्रे रसायनहृदि स्थितम्.
अजरामरणं शान्तं मुक्तं सर्वाधिविभ्रमैः
साधकोऽपि शुचिर्भूत्वा आचान्तः सुसमाहितः।
नित्याभ्यासेन सकलां प्रोञ्छनाति विसूचिकाम्.

इति योगवासिष्ठे रामायणे उत्पत्तिप्रकरणे कर्कट्युपाख्याने विसूचिकामन्त्रकथनं नाम एकोनसप्ततितमः सर्गः

हेतुमन्निष्ठाभावीयप्रतियोगितानवच्छेदकतायाः निवेशे न संयोगेन दण्डवदभाववत्त्वं तेन वह्नेर्हे
तौ ।

सन्योगद्रव्यत्ववदभावस्य हेतुसमानाधिकरणस्य च · ध्वंसत्वनामाभावमादाय अकालोक्तं न्वयात्
ज्ञानः पूर्वं आत्मत्वदण्डोपादानतत्तत्पदार्थस्य किंचित्प्रयोजनमात्रमतादृशत्वे कं अर्थं तत्त्वा
दृशकथयति · अपि चेति · तद्दण्डी नास्तीति प्रतीतिसमानविषयकत्वं दृष्ट्यन्त्वावच्छेदकत्वावगाहि
प्रत्ययान्तरासत्त्वे · न च दण्डी नास्तीति प्रतीतिशालित्वे दण्डी नास्ति तद्दण्डी नास्तीत्यत्रापि द
ण्डत्वावच्छिन्नदण्डनिष्ठावच्छेदकताप्रतियोगिकाभावस्य प्रतीतिविषयत्वाविशेषेण तु
ल्यत्वम् · तद्दण्डी नास्तीत्यत्र तादृशप्रतीतिविषयतास्वीकारे · अपरदण्डिमद्देशे तद्दण्डी ना
स्तीति प्रतीत्यनुपपत्तिः स्यात् आभावप्रतियोगितावच्छेदकावच्छिन्नत्वरूपकताकाधिकर
णतया सत्त्वेऽपि तत्र अपरदण्डिमद्देशेऽपि प्रतियोगितावच्छेदकावच्छिन्नत्वरूपकताका
धिकरणतायाः सत्त्वात् · तद्दण्डी नास्तीति प्रतीत्यधिकरणे दण्डी नास्तीति प्रतीत्य
नवच्छेदयोः प्रतीत्योः समानविषयकत्वात् · तदर्थं तद्दण्डी नास्तीत्यस्य तादृशदण्डत्वेन सह
[illegible] विशिष्टदण्डनिष्ठावच्छेदकताप्रतियोगिकाभेदः प्रतीतिविषयः · दण्डी नास्तीत्य
स्य दण्डत्वावच्छिन्नदण्डनिष्ठावच्छेदकताप्रतियोगिकाभेद प्रतीतिविषयः · प्रमेय
दण्डवान्नास्तीत्यत्र तु · दण्डवान्नास्तीति प्रतीतिर्जायत इति नतु प्रमेयदण्डवान्नास्ती
ति प्रतीतिरपि भवति · दण्डवान्नास्तीत्यत्र तु प्रमेयदण्डवत्त्वावच्छेदकत्वे · प्रमेयवद्दण्डवान्
~~[illegible]~~ नास्तीत्यस्यापि तस्य प्रतीतिविषयत्वकल्पने ज्ञापकत्वानुपपत्तिर्नेष्यत
इति चेन्न · प्रमेयदण्डवान्नास्तीति प्रतीतौ तु दण्डवत्त्वावच्छेदकत्वस्यानुभवेऽपि भवति · तद्द
ण्डवान्नास्तीत्यस्य तु विशिष्टे दण्डत्वरूपप्रतीतिविषयत्वकल्पनात् · अतः इत्यन्नादा दु-
न्योऽसाध्यतेन वानकपदानां व्याप्तिलक्षणे · [illegible] व्यापकत्वे [illegible] प्रति
योगितावच्छेदकतायाः अन्यावच्छिन्नत्वानुपपत्त्यभावमादाय लक्षणसमन्वयात् · आदिपदसंगृहीत
मन्यस्य लेखदर्शयति रूपवत्त्वेनेति · रूपत्वेन रूपनिष्ठा निरवेच्छ · रूपवत्समानाधिकरणत्वे सति रूप
वत्समानाधिकरणभेदप्रतियोगितानवच्छेदकधर्मवत्त्वं · न तु रूपत्वादिकं · तथा च · नीलादिरू
पाधिकरणे वृत्ति · तादृशरूपाभावीयप्रतियोगितावच्छेदकमेव रूपत्वादिकं साध्यतावच्छे
दकमिति व्याप्तिः · आदिपदेन रूपत्वसंग्रहः · परस्परासमानकालीनस्वरूपनिरूपितान्यायाप्य
रूपः · तथा च नीलादिरूपस्य तत्तद्रूपत्ववदभाव हेतुसमानाधिकरणे · तत्तद्रूपाधिकाभावी
यप्रतियोगितानवच्छेदकं साध्यतावच्छेदकं रूपत्वमिति न व्याप्तिः अर्थः · अनुमितिविधेयेति · (
अनुमितिनिरूपितविधेयताविशेषनिरूपितावच्छेदकत्ववत्त्वमित्यर्थः · [illegible]तेति · तद्धूमाव
च्छिन्नविधेयताशालिन्यनुमितिः वा वह्नित्वं प्रति · तद्धर्मिकव्यापकतावच्छेदकत्वज्ञानेन · अ-
थान् हेतुमन्निष्ठाभावप्रतियोगितानवच्छेदक तद्धूमावच्छिन्नसमानाधिकरणहेतुमानयं:
इत्याकारकपरामर्शोऽनिकारणताज्ञानिनि · तथा च · धूमवान्वह्निमान्विधेयताशालिन्यनुमितित्वा
वह्नित्वं प्रति · वह्निमन्निष्ठाभावप्रतियोगितानवच्छेदकधूमवान्वह्निमत्समानाधिकरण
धूमवानयं: इत्याकारकज्ञानस्य कारणत्वेऽपि तस्याप्रमात्वेन धूमविधेयकत्वनिरूपितेऽप्य
प्रमात्वे अन्यथा · वह्निमन्निष्ठाभावप्रतियोगितानवच्छेदकधूमत्वावच्छिन्नसमानाधिकरणवह्नि
मानयं: इत्याकारकप्रमात्मकपरामर्शस्य सत्त्वात् धूमविधेयकानुमितेः प्रमात्वात् · प्रमापरा
मर्शजन्यानुमितेः प्रमात्वात् · प्रकृते च · दण्डी वह्निमान्विधेयताशालिन्यनुमितित्वा वह्नित्वं प्रति · द
ण्डिसंयोगसमानाधिकरणाभावप्रतियोगितानवच्छेदकदण्डावच्छिन्नसमानाधिकरणहेतु
मानयं इत्याकारकज्ञानस्य कारणत्वे · तस्य अपरदण्डिसंयोगाधिकरणवृत्तित्वात् दण्डवद
भावप्रतियोगितानवच्छेदकत्वाद् दण्डस्य असिद्धिः · तादृशाभावप्रतियोगितानवच्छेदकदण्ड
त्वावच्छिन्नसमानाधिकरणहेतुमानयं इत्याकारकपरामर्शस्य तु · दण्डत्वावच्छिन्न
विधेयताशालिन्यनुमितित्वावच्छिन्नं प्रति कारणत्वात् · तत्प्रतिकारणत्वाभावात् · का
रणासत्त्वात् · दण्डिमानिति तादृशानुमितिः किन्तु दण्डत्ववानित्येवानुमितिः स्यादर्थः · न तु
दण्डिमानिति प्रतीतेः सर्वत्र प्रसिद्धत्वात् · अतएवापत्ताविंद्रियत आह [illegible] · दण्डिसं
योगवद्वह्नि अभावप्रतियोगितानवच्छेदकदण्डत्वावच्छिन्नसमानाधिकरणहेतुमानयं इ
त्यस्य दण्डत्ववत्त्वानुमितौ प्रतिकारणत्वात् · न देवानुमितिः स्यात् · दण्डिमानिति
अनुमितौ प्रतिकारणत्वाभावात् · तादृशानुमितिरेव न तेन कथं व्याप्तिसंभावना अत
एव आदिपदमुपात्तमित्यत्राह · आदिपदेन दण्डसंग्रहः · दण्डवृत्ति दण्डत्वावच्छि
न्नरूपः परम्परासम्बन्धः · तथा च साध्यतावच्छेदकताघटकसम्बन्धत्वविवक्षाया

वह्निलिङ्गता केनचिदर्थे· न साच· तद्धूमत्वावच्छिन्नायालिङ्गता धूमत्वावच्छिन्नालिङ्गता तादृशलिङ्गता
कतद्धूमनिष्ठयनिष्ठायाविधेयता वह्नित्वाश्रयनिष्ठा वह्नित्वावच्छिन्नाविधेयता तादृशविधेयताकानुमिति
जनकतावच्छेदकं धूमत्वावच्छिन्नसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्न
सामानाधिकरण्यं यत्र धूमत्वावच्छिन्नाधिकरणपर्वतादिस्थात्यन्ताभावप्रतियोगितावच्छेदकत्वात्
धूमेवाधेन न प्रामाण्यं· धूमत्वतद्धूमावच्छिन्नायालिङ्गता धूमत्वावच्छिन्नालिङ्गता तादृशलिङ्गता-
कतद्धूमनिष्ठयनिष्ठायाविधेयता तत्तद्वह्नित्वाश्रयनिष्ठावह्नित्वावच्छिन्नविधेयता तादृशविधेय
ताकानुमितिजनकतावच्छेदकं धूमत्वावच्छिन्नसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छे
दकवह्नित्वावच्छिन्नसामानाधिकरण्यं मत्वस्य धूमे सत्वात् धूमो तत्तद्वह्निव्याप्य इति
व्यवहारस्य प्रामाण्ये स्यात् न दर्शन धूमावच्छिन्नविधेयताकेत्यपि वक्तव्यं· तथा च तद्धूमावच्छि
न्नापादितलिङ्गता धूमत्वावच्छिन्नालिङ्गता तादृशलिङ्गताकतद्धूमावच्छिन्नाया विधेयता तत्तद्वह्नि-
त्वावच्छिन्नाविधेयता तादृशविधेयताकानुमितिजनकतावच्छेदकं धूमत्वावच्छिन्नसमा-
नाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकतत्तद्वह्नित्वावच्छिन्नसामानाधिकरण्यं धू-
मत्वावच्छिन्नाधिकरणपर्वतादिवृत्त्यभावप्रतियोगितावच्छेदकत्वात् तस्य धूमे नास्तित्वात्· न प्रा
माण्यं· तदेव कथयति न धूमो वह्निव्याप्य इति· अयमर्थो निष्कर्षः तथा च तद्धूमविशिष्टधूमनिष्ठ तद्धूमावच्छि
न्नयावद्वह्निगमकताप्रयोजकस्याप्यर्थे तद्धूमावच्छिन्नालिङ्गताकतद्धूमावच्छिन्नविधेयता
कानुमितिजनकतावच्छेदकं द्वितीयावत्· इत्याशयः· ननु दण्डाभावादिति· साध्यतावच्छेदकतादित
रोमयानवच्छिन्नतादृशाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकर
ण्योक्तो जपरदण्डसंयोगाधिकरणवृत्तिप्रतियोग्यधिकरणवृत्तिज्ञानाभावीयप्रति-
योगिता साध्यतावच्छेदकदण्डानवच्छिन्ना साध्यतावच्छेदकेतर[illegible]वच्छिन्नत्वात् अनुभयावच्छि
तदवच्छेदकमेव स्यात् इत्युक्तं साध्यतावच्छेदकं ज्ञातो व्याप्तिरित्यर्थः ननु साध्यतावच्छेदकमिति· ननु सा
ध्यतावच्छेदकविशिष्टसाध्यतावच्छेदकस्य लाघवादिव्याप्तिः ननु साध्यतावच्छेद[illegible]
तावच्छेदकतादितरोभयानवच्छिन्ना [illegible]तादृशात्यन्ताभावीयप्रतियोगितानिरूपिताया निरवच्छिन्नावच्छेद
कता तादृशावच्छेदकताभाववत्साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यरूपः· विशिष्टसाध्य
तावच्छेदकस्थलीयव्याप्तिः साध्यतावच्छेदकतादितरोभय[illegible]च्छिन्ना तादृशाभावीयप्रतियोगिता
निरूपिता या साध्यतावच्छेदकतावच्छेदकतादितरोभयानवच्छिन्ना [illegible]वच्छेद[illegible]तादृशाव
च्छेदकताभाववत्साध्यतावच्छे[illegible]वच्छिन्नसामानाधिकरण्यरूपः· ननु साध्यतावच्छेदक
स्थलीयव्याप्तौ निर्वाच्यतावच्छेदिकायां वह्निमान्धूमादित्यत्र [illegible]तियोगपदसमानाधिकरणम
हानसेहेतुसमानाधिकरणपर्वतीयवह्निवृत्तित्वविशिष्टजातिमान्नास्तीत्याकारका
भावीयप्रतियोगिता साध्यतावच्छेदकवह्नित्वावच्छिन्ना· साध्यतावच्छेदकेतरच्च तत्वादेव
[illegible]त्वात् अनुभयानवच्छिन्ना न च साध्यतावच्छेदकेतरपर्वतीयवह्निवृत्तित्वविशिष्टजातिमज
गतप्रत्यात्वावच्छिन्नैवेति [illegible] वाच्यम्· तज्जातिपदस्य वह्नित्वमात्रपरत्वात्· तदवच्छेद
कमेव साध्यतावच्छेदकमिति अव्याप्तिः स्यात्· तथा च जातिनिष्ठावच्छेदकता निरव
च्छिन्ना न विशिष्टसम्बन्धावच्छिन्नजातित्वनिष्ठावच्छेदकतानिरूपितत्वात्· अनुपलभ्य
माणजातिवरदण्डोपाध्यादिरिक्तपदार्थज्ञानस्य किञ्चिद्धर्मप्रकारकत्वनियमात् नि
रवच्छिन्नाव लक्षणोऽवच्छेदकतानिरूपितत्वमात्रोक्तौ च यत्र आधीयप्रति[illegible]ता
वच्छेदकतामपि संसर्गनिष्ठावच्छेदकतानिरूपितत्वात् वह्निमान् धूमादित्यत्रापि अव्या
प्तिः स्यात्· किञ्च सम्बन्धावच्छिन्नत्वे[illegible]क्तो संसर्गनिष्ठावच्छेदकता संसर्गावच्छिन्नत्वात्·
संसर्गस्य संसर्गास्वीकारात्· यथा तत्र निवेशः क्रियते तथा वह्निमान् साध्यतावच्छेद
कस्थलीयव्याप्तौ प्रतियोगितावच्छेदकता या साध्यतावच्छेदकतावच्छेदकतादितरो
भयावच्छिन्ना वा निवेशः· जातिमान् घटत्वादित्यत्र प्रतियोगपदसमानाधिकरण
हेतुसमानाधिकरणपटसमवेतत्वविशिष्टजातिमान्नास्तीत्याकारकाभावीय
प्रतियोगिता साध्यतावच्छेदकजातिनिष्ठावच्छेदकतानिरूपितावच्छेदकतादितरानिष्ठाव
च्छेदकतानिरूपितात्वेनैव न तु तेनोभयानवच्छिन्ना तदवच्छेदकमेव साध्यतावच्छेद
कं जातिरित्यव्याप्तिः स्यात्· तदर्थं साध्यतावच्छेदकतावच्छेदकतादितरोभयानवच्छिन्ना
तादृशाभावीयप्रतियोगितावच्छेदकतादृति वक्तव्यं· तथा च· जातिनिष्ठा प्रतियोगि

तावच्छेदकता साध्यतावच्छेदकतावच्छेदकं जातित्वं· तदवच्छिन्नापि तद्भिन्नं पटसमवे
तत्वविशिष्टत्वेन ~~[illegible]~~ उभयानवच्छिन्नानुपलम्भ
व्यभावाय लक्षणसमन्वयः· तादृशाभावाकारस्तु· पटानिरूपिता या समवायसम्बन्धा
वच्छिन्नाधेयता तद्रूपेण स्वाधिकरणे समवायेन वृत्तित्वरूपसामानाधिकरण्य
सम्बन्धेन तादृशवृत्तित्वविशिष्टं यज्जातित्वं तादृशजातिमदभावरूपः अथवा तद्रूपत्व
घटत्वादिमदभावरूपः· तादृशदण्डवान्नास्तीत्यत्रापि साध्यतावच्छेदकतावच्छेदकं दण्ड
त्वं तद्भिन्नं तेनोभयावच्छिन्नैव दण्डनिष्ठावच्छेदकता· घटाभावमादाय लक्ष
णासमन्वयः· न तु उभयव्याप्तिनिरवच्छिन्नत्वं उभयानवच्छिन्नत्वं वा· निरूपितत्वम्· निरवच्छिन्नत्वा
रूपपर्वतीयवह्निवृत्तित्वविशिष्टजातिमान्नास्तीत्याकारकाभावीयप्रतियोगितानिरूपितजातिनिष्ठाव
च्छेदकता निरवच्छिन्ना जातित्वनिष्ठावच्छेदकतानिरूपिता पटसमवेतत्वविशिष्टजातिमान्नास्तीत्या
कारकाभावीया जातिनिष्ठा प्रतियोगितावच्छेदकता निरवच्छिन्ना न जातित्व· पटसमवेतत्ववैशिष्ट्य
निष्ठावच्छेदकतानिरूपितैवेति अव्याप्तिर्नैवमवती उभयानवच्छिन्नत्वनिवेशेऽपि· पर्वतीयवह्निवृत्ति
त्वविशिष्टजातिमान्नास्तीत्यभावीयप्रतियोगितावच्छेदकता जातिनिष्ठा· जातित्वं पर्वतीय
वृत्तित्ववैशिष्ट्य एतदुभयावच्छिन्नैव· पटसमवेतत्वविशिष्टजातिमान्नास्तीत्यभावीयजाति
निष्ठप्रतियोगितावच्छेदकतापि जातित्वपटसमवेतत्ववैशिष्ट्य एतदुभयावच्छिन्नैवेति अव्याप्ति
रित्येवमवतिः किमर्थमुभयोर्निवेशः इति चेन्न· न चाथे दण्डिमान् घटत्वादित्यत्र व्यभिचारिणि हेतुसमा
नाधिकरणप्रतियोगव्यधिकरणदण्डवदभावीयदण्डत्वावच्छिन्नाप्रतियोगितावच्छे
दकता निरवच्छिन्ना न· घटाभावमादायातिव्याप्तिः स्यात् उभयानवच्छिन्नत्वनिवेशे तु उभयान
वच्छिन्नैव तदवच्छेदकमेव साध्यतावच्छेदकमिति नातिव्याप्तिः· द्वितीये वह्निमान् धूमादित्यत्रैव
साध्यतावच्छेदकतावच्छेदकस्याप्रसिद्ध्या अव्याप्तिः स्यात्· निरवच्छिन्नत्वघटितत्वे च घटादि
भावीयप्रतियोगितावच्छेदकतानिरवच्छिन्नत्वेनैवातिव्याप्तिः प्रमेयत्वादिति· यथा दण्डवान्नास्ति
इति प्रतीतौ दण्डवत्त्वावच्छेदकत्वं [illegible] प्रमेयदण्डवान्नास्तीति प्रमाणेऽपि दण्डत्व
वेवावच्छेदकत्वं न त्वन्यत् प्रमेयत्वादेः पदार्थ· तथा च प्रमेयत्वोपलक्षितदण्डत्वस्य वच्छेदक
त्वे केवलदण्डत्वस्य विशिष्टस्य तथात्वस्वीकारात्· अत एव केवलो अवच्छेदकत्वकल्पने आपत्ता
नुपपत्तिः स्यादेवं सम्भवति· अतः केवलस्यावच्छेदकत्वे तथा च दण्डवान्नास्तीति प्रतीतेरपि तनो
पलक्षितदण्डत्वावच्छेदकत्वं [illegible] व्यक्तस्वरूपमस्त्वमार्गः· अनुपलभ्यमानजाति
स्वरूपोपाध्यादिरिक्तपदार्थस्य किञ्चिद्धर्मप्रकारकत्वेनैव भानं [illegible]
माने[illegible]निरवस्थानत्वानिरक्तत्वेन भानं स्यात्· इति अनवस्था स्यात्· तथा च साध्यतावच्छेद
कावच्छेदकं दण्डत्वं तदवच्छिन्न[illegible]वमपि नैव वर्तते· न द्वितीयावच्छिन्नत्वमपि नैव वर्तते उभयानव
च्छिन्ना प्रतियोगितानिरूपितावच्छेदकता तदवच्छेदकमेव साध्यतावच्छेदकमिति निअव्याप्तिरित्यर्थः
हेतुमानिति· हेतुसमानाधिकरणस्य प्रतियोगव्यधिकरणस्य दण्डाभावस्य प्रतियोगिता
वच्छेदकमिति अव्याप्तिः स्याद्वह्निमान्· परम्परेति· स्वाश्रयाश्रयत्वरूपसम्बन्धेन दण्डत्ववदभा
वस्य हेतुसमानाधिकरणत्वाभावात्· तदभावस्य प्रतियोगितावच्छेदकावच्छिन्ननिरूपकताकाधिक
रणत्वात् तद्विरोधात्· अतो हेत्वधिकरणे तु दण्डत्ववदधिकरणेऽपि तदभावाधिकरणे न घट
त्वाभावमादाय लक्षणसमन्वयः· न च समवायेन दण्डत्ववदभावस्य हेतुसमानाधिकरणे न
वत्सेव तदवच्छेदकमेव साध्यतावच्छेदकमिति अव्याप्तिः स्यादवस्थैवेति [illegible] साध्यता
वच्छेदक· साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्ना तादृशात्यन्ताभावीया प्रतियोगितावच्छे
दकतेति विवक्षितमिति· [illegible] साध्यतानिरूपिता या वच्छेदकता तादृशावच्छेदकता [illegible]
धर्मस्य धूमनिष्ठा या संसर्गता तादृशसंसर्गतावच्छेदकीभूतो यो धर्मस्तद्धर्मावच्छिन्ना या साध्यता
तादृशसंसर्गतावच्छेदकीभूतो धर्मो वह्निमत्ता तादृशान्यताभावीयप्रतियोगितावच्छेद
ति· अत्र साध्यतावच्छेदकतादिस्थले सम्बन्धस्य स्वाश्रयाश्रयत्वरूपत्वं तदवच्छिन्नाया वह्नेः
साध्यतावच्छेदकताघटितत्वात्· समवायेन दण्डत्ववदभावो वह्नि
मानित्यत्र स्वाश्रयाश्रयत्वरूपसम्बन्धेन दण्डत्ववदभावस्य हेतुसमानाधिकरण
त्वेन घटस्थले स्वाश्रयाश्रयत्व[illegible]प्रतियोगितावच्छेदकतायाः साध्यतावच्छेद
तत्वत्वार्थे· अन्यथा [illegible] विवक्षितार्थत्वे समवायेन घटस्य समवायेनाभावस्य
ताघटकसम्बन्धावच्छिन्नत्वाभावेऽपि [illegible]
हेतुसमानाधिकरणत्वान्न तदवच्छेदकमेव साध्यतावच्छेदकमिति [illegible]
अव्याप्तिः स्यात्· तत्र [illegible] साध्यतावच्छेदकताघटकसम्बन्धः समवायः समवायघटवानस

र्थमिति। सा चाभिन्नप्रतियोगिकत्वासौ व सम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्न[illegible]
भिन्निरित्यर्थः प्रतियोग्यसमानाधिकरणयद्वृत्तावच्छेदेन हेतुसमानाधिकरणमहान[illegible]
वीयप्रतियोगितावच्छेदकमेव साध्यतावच्छेदकमिति व्याप्तिरत आह यावच्छेदकतापर्याप्त्यधि
करणत्वविशिष्टत्वमेवेति। तादृशान्यतमाभावप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणत्वाभा
ववत्साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यरूपा व्याप्तिः। तथा च तादृशावच्छेदकताप
र्याप्त्यधिकरणत्वं वह्नित्वमहानसीयत्वोभयेऽवर्तते न वह्नित्वमात्रे एवं च तादृशाधिकरणत्वा
भाववद्वह्नित्वावच्छिन्नसामानाधिकरण्याद्व्याप्तिः अस्यार्थस्तु साध्यतावच्छेदक
ताऽवच्छिन्नप्रतियोगिताकयत्किंचिदन्योन्याभावप्रतियोगितावच्छेदकत्वावच्छेदेन प्रतियोग्यसमाना
धिकरणयत्सामानाधिकरण्यान्यतमाभावप्रतियोगितावच्छेदकतावच्छिन्नप्रतियोगि
ताकत्वमेव यत्सामान्ये तावच्छेदकावच्छिन्नसामानाधिकरण्यरूपा व्याप्तिरिति। तथा च साध्य
तावच्छेदकताप्रतियोगितावच्छिन्नाभावप्रतियोगिताविशिष्टत्वनिरूपितावच्छेदकताविशिष्टप्रतियोगिता
पत्र तादृशप्रतियोगिताकोऽथः पर्याप्तिसम्बन्धेन तादृशपर्याप्तियोगितावच्छेदकत्वं वह्नित्वे
काल तदवच्छेदेन तादृशमहानसीयवह्न्यभावीयप्रतियोगितावच्छेदकतावच्छिन्नप्रतियोगिता
महानसीयत्वं वह्नित्वनिष्ठावच्छेदकत्वेन प्रतियोगिताश्रयीभूतसाध्यतावच्छेदकेनैव वर्तते अन्यथा
सजातीयधर्मेण सामान्यधर्मस्यासत्वनियमात्। वह्नित्व[illegible]महानसीयत्वान्यतरवह्नित्व
उभयनिष्ठावच्छेदकनिष्ठप्रतियोगिताया असम्भवात्। एकत्वावच्छिन्नयोगिताकपर्याप्तिप्रति
योगित्वेन च सम्बन्धनियमाभावात्। तत्प्रतियोगिताकाभाववत्साध्यतावच्छेदकाव
च्छिन्नसामानाधिकरण्यमव्याप्तिः अन्यथा महानसीयत्ववह्नित्वोभयवृत्तिना पर्याप्त्यधि
करणत्वस्य वह्नित्वेऽसत्त्वेन तादृशाधिकरणत्वाभाववत्त्वस्य साध्यतावच्छेदकेऽन्यतो व्या
प्तिः स्यादिति भावः। तं दूषयति प्रत्येकेत्यादिना। येन सम्बन्धेन प्रत्येकावृत्तिः तेन स
म्बन्धेनोभयावृत्तित्वनियमात् यदि प्रत्येकनिरूपितवृत्तित्वाभाववत्त्वात्तदा
उभयनिरूपितवृत्तित्वाभाववत्त्वात् इत्याकारकोभयाधारकभावः उभयाभावा
त्मकाधारकाभावस्य सिद्धिः उभयनिरूपितवृत्तित्वाभावाभावे हेतुं कृत्वा प्रत्येकनिरू
पितवृत्तित्वाभावाभावस्य सिद्धिः प्रत्येकनिरूपितवृत्तित्वाभावाभावश्च प्रत्येक
मि तद्वृत्तित्वे तस्य सिद्धिः तथा च तादृशान्यतमाभावप्रतियोगितावच्छेदकतात्वावच्छिन्ना
प्रतियोगितानां प्रत्येकवृत्तिः तथा च व्याप्तेरव्याप्तिः। अभावासत्पदार्थनिष्ठधर्मेणावाससि
पदार्थधर्मस्य सम्बन्धवत्वे ते तादृशाभाववत्साध्यतावच्छेदके [illegible] व्याप्तिरिति
त्यर्थः साध्यतावच्छेदके इति। तादृशान्यतमाभावीया साध्यतानिरूपितावच्छेदकतावच्छे
र्मनिष्ठावच्छेदकतानिरूपितत्वसाध्यतानिरूपितावच्छेदकतावच्छे
र्मनिष्ठावच्छेदकतानिरूपितत्व एतदुभयाभाववती या प्रतियोगिता तादृशप्रतियो
गितानवच्छेदकं साध्यतावच्छेदकं इत्यर्थः तथा च महानसीयवह्न्यभावीयप्रतियो
गिता साध्यतावच्छेदकवह्नित्वावच्छिन्नापि साध्यतावच्छेदकेतरमहानसीयत्वाव
च्छिन्नापि तदभावान्न वह्नौ नैतेनाव्याप्तिः तदिदमाह स्वपदं साध्यतावच्छेदकपरं
तथा च साध्यतावच्छेदकधर्मनिष्ठावच्छेदकतानिरूपितत्वसाध्यतावच्छेदकान्य
च्छिन्नाया प्रकारतानामप्रकारतावच्छेदकधर्मनिष्ठावच्छेदकतानिरूपितत्व एतदुभया
भाववती या तादृशान्यतमाभावीया प्रतियोगिता तादृशप्रतियोगितानवच्छे
दकमित्यर्थः प्रमेया अयवा धूमादित्यत्र तादृशान्यतमाभावीयप्रतियोगितानवच्छेदकं साध्यताव
च्छेदकं प्रमेयं तदनवच्छिन्ना या प्रकारता घटत्वादिरूपा दृश्याकारकज्ञानीया
घटत्वावच्छिन्नप्रकारता तादृशप्रकारतावच्छेदके घटत्वे तन्निष्ठावच्छेदकतानिरूपितत्वं
तिसाध्यतावच्छेदके घटत्वान्यके प्रमेये तन्निष्ठावच्छेदकतानिरूपितत्वव
यानवच्छिन्नप्रतियोगितातदवच्छेदके घटत्वे अनवच्छेदकत्वे वा तन्निरूपितत्वाभावे नैव वर्तते अ
तः प्रमेयानवच्छिन्नप्रकारताया स्वाप्रसिद्धिः सर्वस्याः प्रकारतायाः घटत्वादिरूपप्रमेया
वच्छिन्नत्वादिति तत्र साध्यतानिरूपितावच्छेदकताविशिष्टान्यावच्छेदकत्वाभावनिरूपि
तत्वस्य विवक्षितत्वान्न विशिष्टाद्यपन्नघटकत्वैतद्व्याप्तिश्च स्वसामानाधिकरण्य

साध्यतावच्छेदकसम्बन्धावच्छिन्नत्व स्वानवच्छेदकानवच्छिन्नत्व स्ववृत्तित्व एतत्त्रितय
सम्बन्धेन। ध्वंसत्वं च स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेनेति बोध्यम्। तथा च वह्नि
मान्धूमादित्यत्र साध्यतानिरूपिता या अवच्छेदकता वह्नित्वनिष्ठावच्छेदकता तादृशी
या या अवच्छेदकता वह्नित्वनिष्ठैव अवच्छेदकता स्वसामानाधिकरण्यमपि वर्तते स्वा
श्रयसम्बन्धेन स्वावच्छेदकसमवायसम्बन्धावच्छिन्नत्वमपि वर्तते स्वानवच्छेदकघट
त्वपटत्वाद्यनवच्छिन्नत्वमपि वर्तते स्ववृत्तित्वमपि वर्तते स्वानवच्छेदकघटत्वपटत्वा
द्यनवच्छिन्नत्वसम्बन्धेन वह्नित्वनिष्ठावच्छेदकतायाम्। तदन्या या अवच्छेदकता द्रव्य
त्वनिष्ठावच्छेदकता तन्निरूपितत्वं वर्तते घटान्यतमाभावीयप्रतियोगितायामिति
लक्षणसमन्वयः। प्रमेयावानयवान्धूमादित्यत्र च साध्यतानिरूपितावच्छेदकता प्र
मेयत्वनिष्ठावच्छेदकता तद्विशिष्टायावच्छेदकता सैवावच्छेदकता तदन्या या अवच्छेद
कता द्रव्यत्वनिष्ठावच्छेदकता तन्निरूपितायाः प्रतियोगिताया घटान्यतमाभावीयाः
प्रतियोगितातदवच्छेदके घटत्वे अनवच्छेदके वा व्याप्यत्वरूपं साध्यतावच्छेदकमि
तिनाव्याप्तिरित्यर्थः साध्यतावच्छेदकेत्यादि। साध्यतावच्छेदकभिन्नोयः साध्यवृत्ति
धर्मः द्रव्यत्वादिरूपः तदनवच्छिन्ना घटान्यतमाभावीया तदनवच्छेदकं साध्यतावच्छेदकमि
तिनाव्याप्तिः न च प्रमेयावानयवान्धूमादित्यत्र प्रमेयभिन्नसाध्यवृत्तिधर्मस्यैवाप्रसिद्धिः
साध्यतानिरूपितावच्छेदकताविशिष्टावच्छेदकताया साध्यवृत्तिवृत्तिअवच्छेदकता तादृशावच्छे
दकतानिरूपितप्रतियोगितायां विवक्षितत्वात् वैशिष्ट्यं च स्वसाजात्य स्वसामा
नाधिकरण्य एतदुभयसम्बन्धेन साजात्यं च स्ववृत्तिसावच्छिन्नत्व निरवच्छिन्न
त्वान्यतररूपेण सामानाधिकरण्यं स्वरूपसम्बन्धेनेति बोध्यम्। तथा च वह्निमान्धूमा
दित्यत्र साध्यतानिरूपितावच्छेदकता वह्नित्वनिष्ठावच्छेदकता तद्विशिष्टावच्छेदकता वह्नित्वनिष्ठैवावच्छेद
कता स्ववृत्तिनिरवच्छिन्नत्वरूपेण साजात्यमपि वर्तते वह्नित्वावच्छेदेन सामानाधिकरण्यमपि
वर्तते स्वरूपसम्बन्धेन। तदन्या यावच्छेदकता द्रव्यत्वनिष्ठावच्छेदकता तदनवच्छिन्ना घटा
न्यतमाभावीयप्रतियोगितेति लक्षणसमन्वयः धूमवान्वह्नेरित्यत्र तादृशप्रतियोगिता धू
माभावीयाप्रतियोगितेति नातिव्याप्तिः प्रमेयावानयवान्धूमादित्यत्र साध्यतानिरूपिता
वच्छेदकता प्रमेयत्वनिष्ठावच्छेदकता तादृशावच्छेदकताविशिष्टावच्छेदकता सैवावच्छेदक
ता तदन्या या साध्यवृत्तिः अवच्छेदकता द्रव्यत्वनिष्ठावच्छेदकता तन्निरूपिता घटान्य
तमाभावीया प्रतियोगिता तदवच्छेदके घटत्वे अनवच्छेदके वा व्याप्यत्वरूपं प्रमेयमिति ना
व्याप्तिः वैयर्थ्यमपि नेति। तत्र ध्वंसनिष्ठावच्छिन्नाभावमादाय व्याप्तिवारणार्थमुपात्त
स्वानवच्छेदकत्वाघटकत्वस्य वैयर्थ्यमपि नेति कुतः साध्यतावच्छेदकभिन्नोयः साध्यवृत्ति
धर्मस्तदनवच्छिन्ना या प्रतियोगिता तादृशप्रतियोगिता अत्र साध्यसामानाधिकरण्ये
कालिके साध्यतावच्छेदकभिन्नोयः साध्यवृत्तिधर्मः सध्वनिकत्वरूपः तदनवच्छिन्नाप्र
तियोगिताने प्रसरवावाप्तिवारणात् इत्यर्थः वैयर्थ्यमेव भवतु इच्छापत्तिलाघवात् अत
आह अन्यथेति ध्वंसीयप्रतियोगितास्वीकारे साध्यतावच्छेदकभिन्नसाध्यवृत्तिध
र्मानवच्छिन्नप्रतियोगिताया अप्रसिद्धिरित्येवमवतीति अभावाप्रसिद्धिदशा। अथ
वाच्छेदकेति। तत्तत्धूमत्वावच्छिन्नबोधकपदसमभिव्याहृतव्याप्यत्वशब्दस्य तद्धूमवृत्तित्व
विशिष्टाकतद्धूमावच्छिन्नविधेयताकानुमितिजनकत्वावच्छेदकत्वमर्थः तत्तद्धूमाश्रयनि
ष्ठलिङ्गताकतद्धूमाश्रयनिष्ठविधेयताकानुमितिजनकतावच्छेदकं [illegible] प्रतीतिप्रमा
याः सिद्धसत्तासीनत्वात् तद्धूम [illegible] धूमनियत [illegible]
तमसाकलिङ्गताक तद्धूमाश्रयनिष्ठविधेयताकानुमितिजनकतावच्छेदकत्व [illegible]
[illegible] विधेयताका [illegible] अनुमितिजनकतावच्छेदकीभूतत्वावच्छिन्नसमानाधिकर
[illegible] प्रतियोगितानवच्छेदकवृत्तित्वावच्छिन्नसामानाधिकरण्य [illegible]
[illegible]

॥ सिद्धान्तलक्षण[illegible]॥

[illegible] ना तत्प्रमाणं प्रमाण[illegible] [illegible] प्रमाणं प्रमितिकरणतावच्छेदकधर्मवत्
[illegible] प्रमाणो [illegible] तत्र निमित्तहेतु व्याप्तिज्ञाने [illegible] कारककि[illegible]
[illegible] तत्र [illegible] सामानाधिकरण्य [illegible] व्याप्तिग्रन्थे [illegible]
[illegible] सति [illegible] व्याप्तिकथयति [illegible] इत्यादिग्रन्थेन [illegible] प्रयाति [illegible]
[illegible] प्रतियोगितावच्छेदकावच्छिन्न [illegible] व्याप्तिज्ञा [illegible]
[illegible] प्रतियोगिसमानाधिकरण [illegible] सामानाधिकरण्य [illegible]
योगितावच्छेदकावच्छिन्न [illegible] सामानाधिकरण्य [illegible] प्रतियोगि [illegible]
[illegible] व्याप्तिज्ञानाकारक [illegible] तद्विषयत्वेन [illegible]
[illegible] विषयता [illegible] सम्बन्धात् [illegible]
[illegible] प्रतियोगिसमानाधिकरण [illegible]
[illegible] सामानाधिकरण्य [illegible] प्रतियोगितावच्छेदकावच्छिन्न [illegible]
प्रतियोगितावच्छेदकावच्छिन्नाभावविच्छिन्नप्रतियोगिताक सामानाधिकरण्य [illegible]
[illegible] प्रतियोगितावच्छेदकावच्छिन्न [illegible] सामानाधिकरण्य [illegible]
[illegible] व्याप्तिर्व्याप्तिः स्यात्। तथा च [illegible] सामानाधिकरण्य [illegible]
[illegible] प्रतियोगितावच्छेदकावच्छिन्नेत्याकारकः [illegible] प्रतियोगितावच्छेदकावच्छिन्न
[illegible] अवच्छिन्नप्रतियोगिताकत्व [illegible] प्रतियोगितावच्छे-
दकावच्छिन्न [illegible] सामानाधिकरण्य [illegible]
[illegible] स्यात्। प्रतियोगितावच्छेदकावच्छिन्नत्व [illegible]
[illegible] प्रतियोगितावच्छेदकावच्छिन्नत्व [illegible]
[illegible] प्रतियोगितावच्छेदकावच्छिन्न [illegible]
[illegible] प्रतियोगिता [illegible]
[illegible]
[illegible] प्रतियोगितावच्छेदकावच्छिन्न [illegible]
[illegible] इति [illegible] घटोऽयं घट इत्यादौ घटप्रतियोगिक
[illegible] घटप्रतियोगि [illegible]
[illegible] सामानाधिकरण्य [illegible] प्रमा [illegible]
[illegible]
[illegible] प्रतियोगितावच्छेदक [illegible]
[illegible] व्याप्तिरिति [illegible]
[illegible] व्याप्ति [illegible] प्रतियोगितावच्छेदकावच्छिन्न [illegible]
[illegible] समवायेन [illegible]
व्याप्तिरिति [illegible] सर्वत्र [illegible]
व्याप्तिरिति प्रतियोगिसमानाधिकरणानां [illegible] सामानाधिकरण्य [illegible] अवच्छिन्नत्व
[illegible] सामानाधिकरण्या [illegible]
[illegible] प्रतियोगितावच्छेदक [illegible]
[illegible] प्रतियोगितावच्छेदक [illegible]
प्रतियोगितावच्छेदक [illegible]
[illegible] अवच्छिन्न [illegible] सामानाधिकरण्य [illegible] व्याप्ति [illegible]
[illegible] प्रतियोगितावच्छेदकावच्छिन्न [illegible]
[illegible] सामानाधिकरण्य [illegible] व्याप्ति [illegible]

हे म

श्रीगणेशाय नमः॥ ॥विशेष्यनिघ्नैः संकीर्णैर्नानार्थैरव्ययैरपि॥ लिंगादिसंग्रहै
र्वर्गाः सामान्ये वर्गसंश्रयाः॥१॥ स्त्रीदाराद्यैर्यद्विशेष्यं यादृशैः प्रस्तुतं पदैः॥ गुणद्र
व्यक्रियाशब्दास्तथा स्युस्तस्य भेदकाः॥२॥ सुकृती पुण्यवान्धन्यो ३ महेच्छस्तु महा
शयः २॥ हृदयालुः सुहृदयो २ महोत्साहो महोद्यमः २॥ ३॥ प्रवीणे निपुणाभिज्ञविज्ञ
निष्णातशिक्षिताः॥ वैज्ञानिकः कृतमुखः कृती कुशल १० इत्यपि॥ ४॥ पूज्यः प्रतीक्ष्यः
२ सांशयिकः संशयापन्नमानसः २॥ दक्षिणीयो दक्षिणार्हस्तत्र दक्षिण्य ३ इत्यपि॥
५॥ स्युर्वदान्यस्थूललक्ष्यदानशौण्डा बहुप्रदे ४॥ जैवातृकः स्यादायुष्मान् २ अन्तर्वाणि
स्तु शास्त्रवित् २॥ ६॥ परीक्षकः कारणिको २ वरदस्तु समर्द्धकः २॥ हर्षमाणो विकुर्वाणः
प्रमना हृष्टमानसः ४॥ ७॥ दुर्मना विमना अन्तर्मनाः ३ स्यादुत्क उन्मनाः २॥ दक्षिणे सर

॥राम॥
॥१॥

[illegible]

श्री ना प
धा अ
[illegible]

स्रवः शीधुर्मेदको जगलस्समौ २ ॥ सन्धानं स्यादभिषवः किण्वं पुंसि तु नग्नहूः २ ॥ कारो
त्तरस्सुरामण्ड आपानं पानगोष्ठिका २ ॥ चषकोस्त्री पानपात्रं २ सरकोप्यनुतर्षणम् २
॥ धूर्त्तोक्षदेवी कितवोक्षधूर्त्तो द्यूतकृत्समाः ५ ॥ पणोक्षेषु ग्लहो २ क्षास्तु देवनाः पाश
काश्च ते ३ ॥ परिणायस्तु शारीणां समन्तान्नयने स्त्रियाम् १ ॥ अष्टापदं शारिफलं प्राणि
द्यूतं समाह्वयः २ ॥ उक्ता भूरिप्रयोगत्वादेकस्मिन्येत्र यौगिकाः ॥ ताद्धर्म्यादन्यतो वृत्तावूह्या
लिंगान्तरेपि ते ॥ ॥ इति शूद्रवर्गः ॥ ॥ इत्यमरसिंहकृते नामलिंगानुशा
सने ॥ भूकाण्डो नाम द्वितीयः साङ्ग एव समर्थितः ॥ ॥ छ ॥ ॥ शुभम् ॥ ॥

॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥